वराहमिहिराचार्यविरचिता

भट्टोत्पलविवृतिसहिता

बृहत्संहिता

प्रथमो भागः

कुलपतेः डॉ० मण्डनमिश्रस्य 'शिवसङ्कल्प'-
पुरोवाचा पुरस्कृता

सम्पादकः
डा० कृष्णचन्द्रद्विवेदी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

SARASVATĪBHAVANA-GRANTHAMĀLĀ
[Vol. 97]

BṚHATSAṀHITĀ

[PART ONE]

BY

ŚRĪ VARĀHAMIHIRĀCĀRYA

With the Commentary of Bhaṭṭotpala

FOREWORD BY

DR. MANDAN MISHRA

VICE-CHANCELLOR

EDITED BY

DR. KṚṢṆACANDRA DVIVEDĪ

Ex-Professor & Head, Jyotiṣa Department

Sampurnanand Sanskrit University

Varanasi



VARANASI
1996

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 97]

BṚHATSAṀHITĀ

[PART ONE]

BY

ŚRĪ VARĀHAMIHIRĀCĀRYA

With the Commentary of Bhaṭṭotpala

FOREWORD BY

DR. MANDAN MISHRA

VICE-CHANCELLOR

EDITED BY

DR. KṚṢṆACANDRA DVIVEDĪ

Ex-Professor & Head, Jyotiṣa Department

Sampurnanand Sanskrit University

Varanasi

VARANASI

1996

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

❑

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002

❑

Second Edition, 1000 Copies
Price Rs. 200.00

❑

Printed by—
Tara Printing Works
Kamachha, Varanasi-221 010

सरस्वतीभवन-ग्रन्थमाला
[९७]

पुस्तकालय
परिग्रहण सं० 12728
दि० 25-9-97
नई दिल्ली

श्रीवराहमिहिराचार्यविरचिता

भट्टोत्पलविवृतिसहिता

बृहत्संहिता

[प्रथमो भागः]

कुलपतेः डॉ. मण्डनमिश्रस्य 'शिवसङ्कल्प'-पुरोवाचा
पुरस्कृता

सम्पादकः
डॉ. कृष्णचन्द्रद्विवेदी
आचार्योऽध्यक्षचरश्च,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी



वाराणस्याम्

२०५३तमे वैक्रमाब्दे १९१८तमे शकाब्दे १९९६तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः —

निदेशकः, अनुसन्धानसंस्थानस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणसी।

❑

प्रकाशकः —

डॉ. हरिश्चन्द्रमणित्रिपाठी

प्रकाशनाधिकारी,

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

वाराणसी-२२१ ००२.

❑

प्राप्तिस्थानम् —

विक्रय-विभागः,

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

वाराणसी-२२१ ००२.

द्वितीयं संस्करणम्, १००० प्रतिरूपाणि

मूल्यम्— २००-०० रूप्यकाणि

मुद्रकः —

तारा प्रिंटिंग वर्क्स

कमच्छा, वाराणसी-२२१ ०१०.

शिवसङ्कल्पः

पुरा ग्रन्थप्रणयनप्रकारा विविधा अभवन्— सूत्र-भाष्य-वृत्ति-विवृति-वार्तिक-चूर्णिका-व्याख्यान-व्याख्या-टीकाप्रभृतयः। तेषु संहिताप्रकारोऽप्येक आसीत्। संहिता, अर्थाद् बहूनां विषयाणां सम्यगाहृत्यैकत्र विशदं वर्णनम्। यथा संहिताशब्दव्युत्पत्तिर्वदति— सम् = सम्यक्प्रकारेण, धा = डुधाञ्-धारणे धातोर्निष्ठायां क्तप्रत्यये "दधातेर्हिः" इति सूत्रेण 'हि' इत्यादेशे स्त्रीत्वविवक्षायां टापि 'संहिता' इति। तेन ऋग्वेदसंहिता-यजुर्वेदसंहिता-सामवेदसंहिता-अथर्ववेदसंहिता-जयसंहिता-चरकसंहिता-सुश्रुतसंहिता-गर्गसंहिता-प्रभृतयो ग्रन्था दृष्टिपथमायान्ति। यथार्थपुरःसरं संहिताग्रन्थानामिदं वैशिष्ट्यमासीद् यत् प्रस्तुतविषयेण सहावान्तरप्रचुरविषयाणामप्येकत्र समावेशनमभवत्। दृश्यन्ते च वेदसंहितासु नानाविध आध्यात्मिकाधिदैविकाधिभौतिकैतिह्यभूगोलखगोलादिसामग्र्यः। महाभारतमभिलक्ष्यैषोक्तिः प्रसिद्धैव —

'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्'।

शुद्धायुर्विज्ञानशास्त्रं 'चरकसंहिता' अथवा 'सुश्रुतसंहिता'; किन्तु तत्रात्मपरमात्मजीवेश्वर-शुभाशुभकर्मपुण्यपापैहिकामुष्मिकसुखदुःखादिसर्गप्रतिसर्गाद्यनेकविषया अपि सन्दृब्धाः।

एतस्मिन् ग्रन्थप्रणयनसंहिताप्रकारे प्रस्तुतोऽयं श्रीवराहमिहिरप्रणीतः श्रीभट्टोत्पलप्रणीत-विवृतिसहितो **'बृहत्संहिता'**-ग्रन्थः। यद्यप्ययं ज्यौतिषशास्त्रस्य प्रमुखो ग्रन्थस्तथापि भुवनकोश इवाध्यात्मिकैतिहासिक-भौगोलिक-पौराणिक-धार्मिकादिविविधा विपुला विषया अप्यत्र संलक्ष्यन्ते। दिङ्मात्रं यथा—

कपिलः प्रधानमाह द्रव्यादीन् कणभुगस्य विश्वस्य।
कालं कारणमेके स्वभावमपरे परे जगुः कर्म ।। (१।७)

अत्र दर्शनदृशा सृष्टिकारणम्।

ब्रह्माणमूचुरमरा भगवन् शक्ताः स्म नासुरान् समरे।
प्रतियोधयितुमतस्त्वां शरण्यशरणं समुपयाताः।। (४२।१)

देवानुवाच भगवान् क्षीरोदे केशवः स वः केतुम्।
यं दास्यति तं दृष्ट्वा नाजौ स्थास्यन्ति वो दैत्याः।। (तत्रैव)

अत्रेतिहासपुराणे।

'शोणस्य नर्मदाया भीमरथ्याश्च पश्चिमार्द्धस्थाः'। (१६।९)

एवमादौ भौगोलिकम्।

'आगच्छन्तु सुराः सर्वे येऽत्र पूजाभिलाषिणः'। (४७।२०) इत्यादि।

'मूलस्थाने जुहुयात् पुरोहितोऽग्निम्'। (४७।७७) इत्यादि।

अत्र धर्मकृत्यम्।

'शकयवनमगधशबरप्राग्ज्योतिषचीनकाम्बोजाः'। (१६।१) इत्यादि।

अत्र विविधदेशाः। एवमेव स्त्रीप्रशंसाध्यायः, यत्र नारीनिन्दका एवं निन्दिताः —

अहो धाष्ट्यमसाधूनां निन्दतामनघाः स्त्रियः।
मुष्णतामिव चौराणां तिष्ठ चौरेति जल्पताम्।। (स्त्री.प्र., अ. १५)

अत्र नारीप्रशंसा। एवमेव तदानीं के के धार्मिकाः केषां केषामुपासका आसन्नित्यपि वर्णितम् —

विष्णोर्भागवतान् भगाँश्च सवितुः शम्भोः सभस्म द्विजो
मातृणामपि मण्डलक्रयविदो विप्रान् विदुर्ब्रह्मणः।

शाक्यान् सर्वहितस्य शान्तमनसो नग्नान् जिनानां विदु-
र्ये यं देवमुपाश्रिताः स्वविधिना तैस्तस्य कार्या क्रिया।। (५९।१९)

एवमेव संस्कृतेतरारबीकशब्दानामपि यत्र तत्र प्रयोगः।

इत्थञ्चायं ग्रन्थ औपयोगिकानां ज्यौतिषायुर्वेद-शाकुनिकौत्पातिक-शान्तिक-पौष्टिक-वृक्षायुर्वेद-धार्मिकाध्यात्मिक-भौगोलिकैतिहासिकादि-विविधविचित्रविलक्षणविषयाणां सन्निवेशेन **बृहत्संहिता** बृहत्संहितैवेति परमोपयोग्ययं संस्कृतवाङ्मयस्य मूर्द्धाभिषिक्तो ग्रन्थः। तमिमं ग्रन्थं पिटकाध्यायपर्यन्तं प्रथमभागात्मकं विपश्चितां करकमलेषु समुपाहरन् परमं मुदमावहामि।

इदमस्ति संस्कृतवाङ्मयस्य वैशिष्ट्यं यदेकं शास्त्रमपरेण शास्त्रेण सर्वथा सुसम्बद्धम्। ज्यौतिषशास्त्रं तु सर्वेषां शास्त्राणां पथप्रदर्शकम्। धार्मिकानि पर्वाणि धर्मशास्त्रदृशा ज्यौतिषशास्त्रस्य निर्देशमपेक्ष्यन्ते। अस्माकमायुर्विज्ञानशास्त्रं चिकित्सासमारम्भ-औषधिसङ्ग्रह-भैषज्यरसायनादिनिर्माण-अन्नग्रहणादिप्रसङ्गेषु ज्यौतिषशास्त्रस्य मुहूर्तविनिश्चयं सर्वतः प्राग् आवश्यकं सम्मनुते। एवमेव दर्शनस्य विभिन्नानां तत्त्वानां धर्मशास्त्रस्यापि गम्भीरस्य पाण्डित्यस्य विशिष्टानां ज्योतिर्विदां कृतेऽस्त्यनिवार्यं महत्त्वम्। अस्यां बृहत्संहितायामेतादृशस्य विविधज्ञानविज्ञानस्य चित्रं सुस्पष्टमवलोकयितुं शक्यते।

अयमस्ति हर्षप्रकर्षस्य विषयो यदयं विश्वविद्यालय एतादृशानां विदुषां परम्परया

सुसमृद्धः। तस्याः परम्परायाः प्रतीकभूता विश्वविद्यालयस्यास्य ज्यौतिषविभागाध्यक्षचराः **डॉ. कृष्णचन्द्रद्विवेदि**महाशया वर्तन्ते, यैर्विश्वविद्यालयोऽयं स्वकीययाऽध्ययनाध्यापनशोधसाधनया संसेवितः। अस्मिन्नेव वर्ष एभिः सम्पादितस्य **'सिद्धान्ततत्त्वविवेक'** -ग्रन्थस्य प्रकाशनं विश्वविद्यालयेन कृतम्। इदमपि बृहत्संहिताया द्वितीयं संस्करणं तेषां सम्पादने प्रकाश्यत इत्यस्माकं कृते गौरवस्य विषयः। एतेन ज्यौतिषशास्त्रस्य महिमा संवर्द्धिष्यते।

एतां सिद्धिमुपलक्ष्याहं मनीषिप्रवरेभ्यः **डॉ. कृष्णचन्द्रद्विवेदि**महोदयेभ्यः स्वकीयमादराञ्जलिम्, विश्वविद्यालयस्यास्य प्रकाशनाधिकारिणे **डॉ. हरिश्चन्द्रमणित्रिपाठिने**, ग्रन्थस्यास्य मुद्रकाय तारायन्त्रालयस्य सञ्चालकाय **श्रीरविप्रकाशपण्ड्या**महोदयाय च शुभकामनाः समर्पयन् ग्रन्थमिमं ज्यौतिषशास्त्रविशारदानां सेवायामुपायनीकरोमि।

वाराणसी
चैत्रपूर्णिमा,
वि. सं. २०५३
(३.४.१९९६ खैस्ताब्दः)

मण्डनमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

मङ्गलाचरणम्

श्रुतिविदितविभूतिः संसृतेरेकदीपो
घनतिमिरविभेत्ता लोकचक्षुर्नमस्यः ।
निखिलभुवनगोप्ता जीवनं प्राणिनां स
उदयति रविरात्मा भास्वरः कर्मसाक्षी ।।१।।

ग्रहगणमवधृत्या चालयत्येष नित्यं
गगनभवनभूतिः श्रीप्रभाराशिरूपः ।
श्रुतिनयनविभर्ता ब्रह्मलोकस्य पन्थाः
प्रतिदिनमुदयन् वै जीवलोकं दधाति ।।२।।

सुचरितनृपवंशो मन्त्रमूलः प्रणम्यो
भवविभवनिमित्तं संश्रयः संसृतेः सः ।
तपति पतिरमोघं पावयन् भूतसङ्घं
दशशतकरधारी मङ्गलायास्तु सूर्यः ।।३।।

लम्बोदरं श्रीगिरिजातनूजं
विघ्नेश्वरं सिद्धिगणैः समेतम् ।
वन्दे गणेशं तनयं शिवस्य
निरस्य विघ्नान् शिवमातनोतु ।।४।।

उमामहेशाङ्कमणिं स्फुरन्तं
पूज्यं द्विपास्यं मुनिदेवसंघैः ।
श्रीसिद्धिसम्पत् सुखदं नमामि
हेरम्बमीशं प्रथमं नमस्यम् ।।५।।

वन्दे गिरीन्द्रतनयातनयं दयालुं
सौभाग्यसन्ततिकरं करिसुन्दरास्यम् ।
शम्भुप्रियं सुरगणैर्मुनिभिश्च वन्द्यं
विघ्नानपोह्य मम मङ्गलमातनोतु ।।६।।

अङ्के लसन् करिमुखो गिरिराजपुत्र्या
संवीक्षितश्च शिववत्सललोचनाभ्याम् ।
दूर्वादलैश्च कुसुमादिभिः पूजितोऽसौ
विघ्नान् निवारयतु मङ्गलमातनोतु ।।७।।

वन्दे विभूतिसुविभूषितसर्वगात्रं
काशीश्वरं सकललोकभवादिहेतुम् ।
विद्यानिधानममृतेन्दुकलाललाट-
मङ्गीकृताद्रितनयं वरविश्वनाथम् ।।८।।

वन्दे सदा पशुपतिं करुणैकसिन्धुं
गङ्गाधरं विषमलोचनमिन्दुभूषम् ।
ब्रह्मादिदेवमहितं परबोधरूपं
सोमं शिवं सुभजतां परमार्थदञ्च ।।९।।

उमामहेश्वरौ वन्दे सर्वप्रत्ययसाक्षिणौ ।
याभ्यां सर्वस्य विश्वस्य जन्मादि संप्रवर्तते ।।१०।।

पूज्या श्रीगिरिजा शिवाङ्कलसिता काश्यां सदा राजते
योगक्षेमकरी सतां जनिमतां नित्यं शिवं ध्यायताम्।
कारुण्याम्बुधिलोचना भगवती मातान्नपूर्णा परा
दृष्ट्वा शम्भुमहो समाधिसुगतं पाति स्वयं सर्वदा।।११।।

नित्यं स्वाध्यायशीलानां न किञ्चिदपि कुर्वताम्।
अलसानां बुभुक्षूणामन्नपूर्णा हि पालिका ।।१२।।

नाभुक्तः प्राणवान् कश्चित् काश्यां यत्कृपया भृशम् ।
तस्यै भवान्यै पूर्णायै भुक्तिमुक्तिकृते नमः ।।१३।।

पीताम्बरेति बगलेति वदन् मनुष्यः
लोकाञ्जयेद् निहतशत्रुरकण्टकश्रीः ।
सा लोकमङ्गलकरी करुणार्द्रचित्ता
काश्यां सदा विजयते बगला पराम्बा ।।१४।।

सौवर्णभूषणविभूषितसर्वदेहा
पीताम्बरा भगवती भवभावसिद्धा ।
माता स्मृता प्रकुरुते सकलां समृद्धिं
शत्रून् विदार्य विजयं भजतां जनानाम् ।।१५।।

पीतैः पुष्पफलैश्च पीतवसना पीतप्रिया प्रीतिदा।
सौवर्णाभरणैर्विभूषिततनुः सौवर्णसिंहासने।
संस्था वैरिविनाशिनी भगवती पीताम्बरा पूजिता।
माता श्रीबगला प्रसन्नवदना वाक्स्तम्भिनी राजते।।१६।।

वराहमिहिराचार्यः

श्रीमान् वराहमिहिरो मिहिरो ज्यौतिषाम्बरे ।
उदितोऽभिनवः कश्चिद् ज्योतिषां ज्योतिरद्भुतम्।।१७।।

विक्रमादित्यनृपतेः सभारत्नमभूदयम् ।
नवरत्नेषु महितो वराहमिहिरो महान् ।।१८।।

विद्यासु वेदप्रभवासु नानाविधासु विद्वानपि सूक्ष्मबुद्धिः ।
अभूद् वराहो मिहिरः प्रसिद्धो ज्योतिर्नये लब्धपरप्रतिष्ठः।।१९।।

अचार्य एषोऽभिनवावतारः
सूर्यस्य देवस्य सहस्ररश्मेः ।
अभूत् प्रसिद्धः प्रतिभाप्रकाशै-
र्विध्वस्तविभ्रान्तितमःसमूहः ।।२०।।

आदित्यदासादादित्यभक्तवंशात् पितुः सतः ।
लब्धजन्मा महामेधा विद्वत्कुलविभूषणः ।।२१।।

सूर्यप्रसादात् प्रतिभाविशेषाद्
आचार्यवान् ज्योतिरवाप्तवान् सः ।
बभूव लोके रचनाविशेषाद्
ज्योतिर्विदाचार्य इति प्रसिद्धः।।२२।।

मुहूर्त्तहोरागणितेषु सर्वे-
ष्वपि त्रिषु प्राप्तविशिष्टबुद्धिः ।
ग्रन्थानतिक्रान्तपरान् निबन्धान्
अरीरचच्छास्त्रमतप्रसिद्धान् ।।२३।।

अवन्तिकाविक्रमराजधानी पुरी प्रसिद्धा भुवि मोक्षदात्री ।
सम्मानमापेह तथा सभायां श्रीविक्रमस्य नवरत्नमध्ये ।।२४।।

शास्त्रप्रमाणैः सुपरीक्षया च
वेधैः सयन्त्रैर्विविधैः समूहैः ।
नक्षत्रविद्यां गणितैर्मुहूर्तैः
फलैः समग्रामधिकां चकार ।।२५।।

परीक्ष्य सम्यग् विविधान् विचारान्
ज्योतिर्नये प्राक्प्रथितान् विरुद्धान् ।
वैदेशिकान् यावनरोमकाँश्च
तथार्षसिद्धान्तमतानि विद्वान् ।।२६।।

वेधप्रमाणैः प्रतिभाविशेषै-
र्दृढीकृतान्येव नवानि नूनम्।
अन्यानि तत्त्वानि नियोजितानि
प्रकाशयामास निजप्रबन्धे।।२७।।

दृढाः प्रबन्धा विदुषां मनोरमा-
स्त्रिषु प्रकारेषु कृताः प्रकाशिताः।
वराहनाम्ना मिहिरेण तेजसा
महार्हमूर्धन्यविभूषणानि ते ।।२८।।

वराहमिहिरेणोक्तं होराशास्त्रं बृहद्भुवि ।
वर्तते ज्यौतिषे शास्त्रे जातके मूर्धनि स्थितम्।।२९।।

ग्रहराशिफलैः सम्यग् राजयोगादिलक्षणैः।
ज्यौतिषैर्विषयैर्युक्तं साश्चर्यं वीक्ष्यते बुधैः।।३०।।

ग्रहचारादिभिर्युक्तां खड्गरत्नादिलक्षणैः।
छन्दोभिर्विविधै रम्यैर्ज्यौतिषैः विषयैर्युता ।।३१।।

बृहती संहिता ख्याता रचिता विस्तृताऽद्भुता ।
ज्योतिःशास्त्रस्य सर्वस्वभूताचार्येण तेन सा ।।३२।।

न भाति ज्यौतिषं शास्त्रमम्बरं मिहिरं विना ।
तमो व्याकुलितं ह्येतद् विफलीकृतलोचनम् ।।३३।।
सुविभाति महाशास्त्रं कौशलेन समुद्धृतम् ।
आचार्येण सुविज्ञेन वराहेणेव मेदिनी ।।३४।।

एवंविधाकरग्रन्थान् ज्योतिःशास्त्रस्य सम्मतान् ।
रचयामास मिहिरो वराहो हि महायशाः ।।३५।।

आसीत् पाटलिपुत्राख्यं नगरमुज्जयिनी तथा ।
कार्यक्षेत्रं तु विदुषो महाचार्यस्य धीमतः ।।३६।।

बृहती संहिता ग्रन्थो वराहस्य महामतेः ।
कृष्णचन्द्रेण विदुषा विशोध्य संप्रकाश्यते ।।३७।।

ज्योतिःशास्त्रमहाचार्यो बुधचक्रशिरोमणिः ।
दैवज्ञः सत्यवाक् कृष्णचन्द्रो धीमान् शुचिव्रतः।।३८।।

पूज्ये देवरियाभिधे जनपदे ग्रामे सजॉवाभिधे
जातोऽसौ सरयूत्तरे शुभतटे गोत्राद्भरद्वाजतः ।
आचार्यः प्रतिभाबलैरधिगतज्योतिर्नयः सर्वश
आचार्यस्य कृतिं स्थिरां सुप्रथितां सम्पादयन् मोदते।।३९।।

धन्याऽस्य माता रजलाभिधाना
धन्यः कुबेरो जनको द्विवेदी।
वंशश्च धन्यो हि यतः प्रसूतः
श्रीकृष्णचन्द्रो ननु पूर्णचन्द्रः।।४०।।

ज्योतिःशास्त्रे लब्धकीर्तिः कृतात्मा
सत्याचारः सत्यसन्धो वरिष्ठः।
शुभ्रैः कृत्यैस्तारितः स्वीयवंश-
स्तेन प्रीता गोद्विजाः पितृसंघाः।।४१।।

अयं हि धैर्येण धिया श्रमेण च
पुरातनं ग्रन्थमिमं सुविस्तरम् ।
विशोध्य सम्पाद्य सुनीतवान् भुवि
प्रकाशतां लोकहिताय पण्डितः ।।४२।।

श्रीकृष्णचन्द्रस्य सुधीवरस्य
चिरायुरारोग्यसुखादिमिच्छन् ।
श्रीविश्वनाथं सहितं भवान्या
संप्रार्थये सम्प्रतिपन्नबुद्ध्या ।।४३।।

●

वराहमिहिराचार्यप्रणीताया बृहत्संहितायाः पृष्ठभूमिका

अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।

१. निखिलब्रह्माण्डस्य रचनासु पृथिव्याः सर्वप्रथमविज्ञानं प्रकाशविज्ञानमेवास्ति यद्धि ज्यौतिषविज्ञाननाम्ना प्रसिद्धमस्ति। सूर्यस्य प्रथमोदयः प्राणिमात्रस्य कृते विशेषरूपेण मानवमात्रस्य कृते आह्लादकारकश्चमत्कारपूर्णश्चासीत्। निरन्तरमनुभवेन अभ्यासकारणेन चास्य "दिन" इति संज्ञा बभूव।

अनेन प्रकारेण सूर्यास्तस्यानन्तरम् अर्धगोलाकारकश्चन्द्रः सर्वैर्नक्षत्रैर्ग्रहोपग्रहैः सह अतीव शोभनीयो नयनाभिरामो नीलगगने मानवैः आश्चर्यान्वितेन चक्षुषाऽवलोकितः। क्रमेण सम्पूर्णा निशा प्रकाशवती तमोयुक्ता च दृष्टा। सूर्यस्य पृथिव्याश्च खगोलीयस्थित्या रात्रिः, दिवसश्च बभूवतुः। क्रमशः प्रवर्धमानश्चन्द्रः पञ्चदशम्यां तिथौ पूर्णाकारकः (पूर्णगोलाकाररूपेण) अवलोकितो बभूव।

इत्थं दिवसः, रात्रिः, पक्षः, मासश्चेत्येते कालनाम्ना व्यवह्रियन्ते। पूर्णिमात आगामी पूर्णिमां यावत् तथा अमावस्यात आगामी अमावस्यां यावत् कालो मासशब्देन व्यवह्रियते।

२. भौगोलिकदृशा खलोगीयदृशा च सूर्य-चन्द्र-पृथिवीनां परस्परस्थित्या सञ्चलनरूपेण च ऋतूनां (ग्रीष्म-वर्षा-शरद्-ऋतूनां) प्रादुर्भावोऽभवत्। कतिपयेषु स्थलेषु षड्ऋतूनां (ग्रीष्म-वर्षा-शरद्-हेमन्त-शिशिर-वसन्त इत्येतेषां) प्रादुर्भावो वर्णितः।

३. विभिन्नासु परिस्थितिसु विभिन्नेषु समयेषु गगने ग्रहनक्षत्राणाम्, उपग्रहाणाम्, नीहारिकानाम्, आकाशगङ्गानाम्, धूमकेतूनाञ्च दर्शनमभूत्, सर्वतोऽधिकं विस्मयकारकं सूर्यग्रहणस्य चन्द्रग्रहणस्य च दर्शनमभूत्। समये-समये आकाशे उपलवृष्टेः, विद्युत्प्रकाशस्य, अनेकेषु रङ्गेषु इन्द्रधनुषोऽवलोकनम् अतीवाश्चर्यजनकमभवत्। शनैः शनैः इमानि सर्वाणि ज्ञानानि मानवमस्तिष्कजन्यज्ञानानि सन्तीति सम्पुष्टीकृतम्।

निरन्तरावलोकनविधिना अध्यात्मचिन्तनेन च ऋषयो महर्षयो ज्यौतिषशास्त्रजिज्ञासवश्च बहुकालं यावदनुसन्धाय फलानुभूतिमनुभूय च सर्वजनकल्याणभावनया फलादेशमकुर्वन्।

अस्य प्रथमः परिचयो वेदेषूपनिषत्सु पुराणेषु च दृश्यते। अनन्तरं सूक्ष्मातिसूक्ष्मरूपेण गणितगणनया ग्रहाणां यन्त्रादिकवेधादिना च ग्रहनक्षत्रादीनां ज्ञानं विधाय तां विपुलां ज्ञानराशिं प्राणिमात्रस्य सुखसाधनार्थं "ज्यौतिषं शास्त्रम्" इति नाम्ना अकथयन्। तद्धि ज्यौतिषं शास्त्रं त्रिस्कन्धात्मकमस्तीति वराहमिहिराचार्येण स्वयं सूचितम्। यथा—

ज्यौतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् ।
तत्कात्स्न्यार्पनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।।

शास्त्रेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ ।
होराऽन्याङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।

क्वचिद् एतादृशाः श्लोका अपि दृश्यन्ते यैर्ज्यौतिषशास्त्रस्य पञ्चस्कन्धात्मकत्वं सिद्ध्यति। यथा—

पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः ।
केरलिः शकुनश्चेति ज्यौतिःशास्त्रमुदीरितम्।।

शकुनकेरलिजातकादयः सर्वे इमे संहितान्तर्गता एव सन्ति, अत एव ज्यौतिःशास्त्रस्य स्कन्धत्रयात्मकत्वमेव युक्तियुक्तमस्ति। पञ्चस्कन्धात्मकमिति कथनमसमीचीनमस्ति।

प्रख्यातस्य ग्रन्थस्य सिद्धान्तशिरोमणेः कर्त्ता आचार्यभास्करः सिद्धान्तग्रन्थस्य परिभाषां कुर्वन् ज्यौतिषशास्त्रे सिद्धान्तस्कन्धस्यातीवप्रशंसां कृतवानस्ति।

प्रशंसात्मकश्लोका यथा—

त्रुट्यादिप्रलयान्तकालनामानप्रभेदक्रमा-
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तस्य उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।।६।।

जानन् जातकसंहिताः सगणितस्कन्धैकदेशा अपि
ज्यौतिःशास्त्रविचारसारचतुरः प्रश्नेष्वकिञ्चित्करः।
यः सिद्धान्तमनन्तयुक्तिविततं नो वेत्ति भित्तौ यथा
राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः ।।७।।

गर्जत्कुञ्जरवर्जिता नृपचमूरप्यूर्जिताऽश्वादिकै-
रुद्यानं च्युतचूतवृक्षमथवा पाथोविहीनं सरः।
योषित्-प्रोषितनूतनप्रियतमा यद्वत्रमत्युच्चकै-
र्ज्यौतिःशास्त्रमिदं तथैव विबुधाः सिद्धान्तहीनं जगुः।।८।।

तन्त्रलक्षणम्—

सिद्धान्तोदीरितो ह्यर्थो निजयुक्त्यैव केवलम् ।
निखिलं यत्र तत्तन्त्रं निजोपकरणाश्रितम्।।

एवं च यत्र युगाद्यहर्गणेन ग्रहसाधनं कृतं तत्तन्त्रमिति लक्षणं निष्पन्नम्।

करणलक्षणम्—

सिद्धान्तोक्तैकदेशास्तु केचिद्यत्र निरूपिताः।
तदुक्तं करणं नाम्ना लघूपायो विनिर्मितम् ।।

एवं यत्र शकाद्यहर्गणेन ग्रहसाधनं तत्करणमिति व्यवच्छेद्यम्। यत्र यत्र तात्कालिकद्युचरचारवशेन सुभिक्ष-दुर्भिक्षादिसार्वभौमशुभाशुभफलं प्रस्तूयते, सा संहिता।

अत्रैव स्वर-मुहूर्त्त-शकुन-पुरुष-स्त्री-गज-तुरग-रत्न-प्रतिमालक्षणप्रभृतिनानाविषय-जातानामन्तर्भावमाचक्षते तद्विदः। अत एव विविधपदार्थसार्थसान्निध्येन विश्वजनीनत्वात् संहिताभिधानमन्वर्थाभिधायि।

होरास्कन्धलक्षणम्—

यत्र च प्रत्येकमनुजजननकालिकद्युचरसंस्थानुकूलभङ्ग्या तदादिषु वृत्तवर्तमान-वर्तिष्यमाणादेशाः कीर्त्यन्ते तज्जातकम्। जातमेव जातकमुत्पन्नम्, स्वार्थे कन्। उपचारात् तत्प्रतिपादकशास्त्रमपि जातकपदव्यपदेश्यमस्यैवापरपर्यायो होराशब्दः। अस्य व्युत्पादनन्तु होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरपर्यायलोपात्।

इति वराहमिहिरोक्त्या ''अहोरात्र'' शब्दस्य पूर्वापरवर्णाभावमुत्पाद्य पृषोदरादिविकल्पनया क्रियते। हुल-हिंसासंवरणयोरिति धातोः पचादेराकृतिगणत्वादचि कृते निष्पन्नो होलति हुल्यते वा होलाशब्दः। रलयोरभेदेन होराशब्दो जातः। अत्रैव यवनाचार्येण पारसीकभाषायां प्रतिपादितस्य वार्षिकफलादेशपरकस्य फलस्य ताजिकस्याप्यन्तर्भावमुशन्ति तदभिमानिनः।

इदानीं ज्यौतिषशास्त्रस्य वेदाङ्गत्वनिरूपणम्—

यस्य कस्यापि देशस्य ज्ञान-विज्ञान-धर्माचरण-संस्कार-संस्कृति-इत्यादीनाम् ऐतिहासिक-भौगोलिक-राजनैतिक-सामाजिक-वैज्ञानिकदृष्ट्या समसामयिकः प्रतिपादकस्तस्य देशविशेषस्य प्राचीनसाहित्यमेव भवति। अनेन विचारेण भारतवर्षस्यास्य वेद एव सर्वतः प्राचीनमस्ति। वेदस्य भाषा संस्कृतमस्ति।

वेदः सर्वज्ञानविज्ञानसम्पन्नोऽस्ति। अयं हि वेदवाक् श्रुतिश्चेति नामभिः ख्यातः। श्रवणेन मननेनावलोकनेन च ऋषीणां महर्षीणामध्यात्मचिन्तकानाञ्च दृष्टिपथे समायातः। लोककल्याणकामनया वार-नक्षत्र-तिथि-उदयास्तकालज्ञान-ऋतुज्ञानपूर्वकम् उत्तमसमये प्रकृतिदेवस्याराधनार्थं यज्ञादेर्व्यवस्था वर्तते। इमे यज्ञाः कालाधीनाः सन्ति। तस्य कालस्य ज्ञानं सूर्य-चन्द्र-ग्रह-पृथिवी-नक्षत्रादीनां संयोगाधारेण भवति। एवं समयानुसारं यज्ञादिसम्पादनेन सर्वस्मिन् क्षेत्रे जनानामपूर्वो लाभो मिलति। अत इमं समग्रं ज्यौतिषशास्त्रं वेदाङ्गस्य

मुख्यमङ्गं नेत्रस्थानं मन्यन्ते। भास्कराचार्येण स्वकीये सिद्धान्तशिरोमणिनामके ग्रन्थे अस्य स्पष्टतया प्रतिपादनं कृतमस्ति। यथा—

वेदास्तावद् यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात्कालबोधो यतः स्याद् वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्।।

इत्थं चाङ्गत्वमुपरागादिपदार्थजातनिर्णायकत्वं च तदभ्यर्हितत्वे बीजम्। तथा चोक्तं शिरोमणौ लगधतन्त्रे च क्रमेण—

वेदचक्षुः किलेदं स्मृतं ज्यौतिषं
मुख्यताङ्गमध्येऽस्य तेनोच्यते ।
संयुतोऽपीतरैः कर्णनासादिभिः
चक्षुषाङ्गेन हीनो न किञ्चित्करः ।।

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद् वेदाङ्गशास्त्राणां ज्यौतिषं मूर्धनि स्थितम्।।

सिद्धान्तवैशिष्ट्यम्—

अत एव एतन्निबन्धरहस्यालोडनेन निरूपितेषु ज्यौतिषस्कन्धेषु कतमस्योपजीव्यत्वकोटि-प्रवेश इति चेदन्वयव्यतिरेकाभ्यां सिद्धान्तस्यैव सङ्गच्छत इति निपुणं विभावनीयम्। अत एव प्रमेयसम्बोधनानुरोधेन गाणितिकानां गौरवमप्यध्याहार्याय युक्तम्—

दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता
त्रिदिनजनितदोषं तन्त्रविद् दृष्ट एव ।
करणभगणवेत्ता हन्त्यहोरात्रदोषं
जनयति घनमंहस्तत्र नक्षत्रसूचिः ।।

भारतीयज्ञानराशेः प्रचार-प्रसारः पार्श्वदेशेषु अतीवतीव्रतया बभूव। बाह्यदेशीय-विशिष्टानि ज्ञानानि भारतीया अपि आत्मसात् कृतवन्तः। अङ्कगणित-बीजगणित-रेखागणित-दशमलवादिनामाकारप्रकाराः पाश्चात्त्यदेशेषु विभिन्नरूपेण अगच्छन्। तेन ज्यौतिषशास्त्रम् आयुर्वेदश्च विशेषरूपेण प्रभावितौ बभूवतुः।

जातकग्रन्थेषु ताजिकग्रन्थेषु रमलादिषु एवं सप्तदशाष्टादशशताब्द्या वेधशालासु, विशेषतो वराहमिहिराचार्यस्य पञ्चसिद्धान्तिका-बृहज्जातक-बृहत्संहितासु चास्य प्रभावो दृश्यते।

वेदाङ्गज्यौतिःशास्त्रे दिनमानम्—

वेदाङ्गज्यौतिःशास्त्रे उदगयनारम्भस्य दिनमानतो दक्षिणायनारम्भस्य दिनं यावत् संगण्य महत्तमदिने लघुतमदिनस्य ऋणं कृत्वा तस्मिन् वर्षार्धसंख्यया (१८३ इत्यनेन)

विभज्य मध्यवर्तिदिनानां कालमानं गृहीतमस्ति। इत्थमाकलितानां दिनमानानाम् अनुपातः २/३ अस्ति, अर्थात् लघुतमस्य दिनस्य सार्धैकगुणमानं महत्तमस्य दिनस्य मानमस्ति। अनेन चरघटी ३५ अंशस्य अक्षांसस्य भवति। 'खाल्दिया' इत्यस्य अक्षांसोऽप्ययमेवास्ति। अत एव कतिपया यूरोपीया मन्यन्ते यद् वेदाङ्गज्यौतिषस्य दिनमानेषु खाल्दियनप्रभावो वर्तते; परन्त्विदमवधेयं यद् वेदाङ्गज्यौतिषस्य समये उत्तर-पंजाब-सीमाप्रान्त-काश्मीर-अफगानिस्तानेषु आर्याणां निवास आसीत्। अत्रत्योऽक्षांसः ३२ अस्ति, किरणवक्रीभवनसंस्कारेणापि दिनमाने ९ क्षणानां (मिनटस्य) वृद्धिर्भवितुं शक्यते, एवं जलघटीद्वारा कालमापनविधेर्व्यवहारेणापि किञ्चिदन्तरं सम्भाव्यते। अनेन प्रकारेण वेदाङ्गज्यौतिषस्य विषयो विशुद्धरूपेण भारतीयोऽस्ति। एतदर्थं नक्षत्रेषु लग्नस्य गणना अपरप्रमाणमस्ति। वेदाङ्गज्यौतिषे उक्तमस्ति यद्—

श्रविष्ठाभ्यो गणाभ्यस्तान् प्राग्विलग्नान् विनिर्दिशेत्। (आर्च ज्यौतिषम्- १९)

अर्थाद् धनिष्ठानक्षत्रतः संगण्य पूर्वक्षितिजे संलग्नानि नक्षत्राणि विनिर्देश्यानि। वेदाङ्गज्यौतिषं फलितस्य पुस्तकं नास्ति, अत एव नक्षत्राणां लग्नफलं तत्र नोपदिष्टम्; किन्तु अग्रे अथर्वज्यौतिषे नक्षत्राणां फलं दृश्यते तथा जन्म, सम्पत्तिः, विपत्तिः, क्षेमः, प्रत्यरिः, साधकः, वधः, मैत्रः, अतिमैत्र इत्येता नवसंज्ञा जन्मनक्षत्रादारभ्य कथिताः सन्ति। एतासां फलान्यपि नामानुसारं कथितानि सन्ति। उक्तप्रकारेण वयम् अवलोकयामो यद् वेदाङ्गज्यौतिषसमये गणितस्य फलितज्यौतिषस्य च भित्तिर्दृढा आसीत्।

ज्यौतिषे खाल्दियनानां योगदानम्—

उपरि वेदाङ्गज्यौतिषस्य नक्षत्रगणनाप्रणाली निर्दिष्टा। तासु केवलं गणनया एव चान्द्रमास-चन्द्रभगणपूर्तिकालदिवसानां संख्या निर्धारिता अस्ति या मध्यमगणनायाः स्वरूपस्यैव प्रतिनिधित्वं करोति। यूरोपीयविदुषां मतेन खाल्दियना एव प्रथमं कोणमापन-विधेराविष्कारं कृतवन्तः। एवं ग्रहणस्य निधिरूपेण क्रान्तिवृत्तस्य, कालगणनाया साधनरूपेण विषुवद्वृत्तस्य चान्वेषणं कृतवन्तः। सैरोसस्य अथवा ग्रहणचक्रस्य अन्वेषकास्त एव कथ्यन्ते।

पेनकाकनामा कश्चिद् यूरोपीयज्योतिर्विद् इत्थं कथितवान् येनेदं प्रतीयते यद् ज्यौतिषगणनायाः सम्भावनानामुद्भवः सामान्यविधिद्वारैवाभवत्। पेनकाकस्य वक्तव्यमस्ति यत्—

सा परिस्थितिः आकाशीयपरिवृत्तीनाम् अतिसरलानां तथा ध्यानाकर्षकपुनरावृत्तीनां घटना आसीद् यया ज्यौतिषगणनाया सम्भावना जाता। यो विषयो यदा कदा अथवा उपरिदृष्ट्या अनियमित आसीत् स निरन्तरगृहीतानां विशालरूपाणाम् आकलनानां

समुपस्थितौ स्वस्य नियमितत्वं प्रकटितवान्। नियमितता नामन्वेषणं न जातम्; अपि तु ता नियमिततः केनाप्याश्चर्येण विना (ममोपरि) भारभूताः। ताभिर्नियमिततताभिः कतिपयसम्भावनाः प्रकटीकृताः। व्यावहारिकानुभवैः प्रवर्धमानस्य दैनिकजीवनस्य सम्पूर्णयान्त्रिकस्य औद्योगिकस्य ज्ञानस्येव "सम्भावना" एव व्यापकस्य ज्ञानस्य प्रथमोऽचेतनस्वरूपोऽस्ति। तदनु शनैः शनैः सम्भावना भविष्यफलानि वक्तुं प्रभवति, यस्यायमभिप्रायो यद् अस्या नियमितता एवं तस्याश्चेतनरूपे आगमनम्। खगोलीयपरिवृत्तिषु नियमितता स्थिरपरिक्रमणकाल एव प्रतीयते, यस्या एकसमाप्तेरनन्तरं तादृशी घटना पुनर्घटिता भवति। "परिक्रमा-कालानां ज्ञानावाप्तिः" ज्यौतिषसिद्धान्तस्य प्रथमः स्वरूप आसीत्।

क्रान्तिवृत्तस्य (Ecliptic) आविष्कारः —

पेनकाकस्य वक्तव्यानुसारं ग्रहपरिवृत्तीनाम् (भगणपूर्तिकालानाम्) आविष्कारे खाल्दियनानां प्रथमभूमिका आसीत्। ते क्रान्तिवृत्तस्याविष्कारं कया रीत्या अकुर्वन् इत्येको मनोरञ्जको विषयोऽस्ति। ग्रहणचक्रस्य वा सैरोसस्य आविष्कारानन्तरमेव सूर्यस्य भ्रमणमार्गस्याविष्कारोऽभूत्। ग्रहणचक्रस्याविष्कारस्य वर्णनं पूर्वमेव कृतमस्ति।

चन्द्रग्रहणानां पुनः पुनः वेधं कुर्वन्तो जना इदं निश्चितवन्तो यत् चन्द्रग्रहणं येषां नक्षत्राणां पार्श्वे भवति त एव आकाशे सूर्यस्य मार्गाणि सन्ति यतः चन्द्रमसः सूर्यस्य च भ्रमणमार्गे अन्योन्यस्य ५ अंशानां कोणं प्रकुर्वन्तौ कटेते, एवं तयोः कटबिन्दू राहु-केतु-नाम्ना प्रसिद्धौ स्तः। तदा या पूर्णिमा राहोः अथवा केतोः समीपे भवति तस्यामेव चन्द्रग्रहणस्य दृष्टिगोचरसम्भावना भवति। फलतो रविमार्ग एव राहोः केतोश्च बिन्दुसमीपे चन्द्रग्रहणो दृष्टिगोचरो भविष्यति। अतोऽयं निश्चयो यद् यानि नक्षत्राणि चन्द्रग्रहणकाले राहोः केतोश्च बिन्दूपरि दृष्टिगोचराणि भवन्ति तानि सूर्यस्य भ्रमणमार्गस्य समतले सन्ति। इत्थं सूर्यस्य भ्रमणमार्गम् 'इक्लीप्टिक' - नाम्ना अथवा 'इक्लीप्स' नाम्ना अभिहितम्। भारतेऽस्य 'क्रान्तिवृत्त' इति संज्ञा अस्मात् कारणाज्जाता यद् विषुवद्वृत्तात् सूर्यस्य दक्षिणम् अथवा उत्तरं च गमनमनया क्रान्त्या एव भवति।

नाडीवृत्तस्य (Equater) आविष्कारः —

कोणमापनविधेर्ज्ञानस्यायमेव परिणाम आसीद् यद् आकाशीयपिण्डानां गतिनिर्धारणं सम्यग्रूपेण जातम्। कोणमापकयन्त्राणां निर्माणं विधाय ज्योतिर्विदो विद्वांसः चन्द्रमसः सूर्यस्य च गतीनां यथार्थरूपेण गणनां कुर्वन्ति स्म। प्रथमतः सूर्यस्य गतेर्गणनया यः परिणामः समायातः स आकाशे सूर्यस्य उत्तरदक्षिणदिग्गमनस्य सीमानिर्धारणमासीत्। मध्याह्नकाले प्रतिदिनं सूर्यस्य नमनकोणानामाकलनेनायं निश्चयो जातो यद् यदा सूर्यस्य दक्षिणे परमगमनं भवति तदा दिनं लघुतमं (सर्वतो लघु) भवति एवं तदाप्रभृति सूर्यः क्षितिजे उत्तरं प्रति गमनमारभते। तदा प्रभृति प्रतिदिनमस्य मध्याह्नकालिकनमनकोणे न्यूनता

भवितुमारभते, एवं च दिनमेकमेतादृशं भवति यदा सूर्यस्य नमनकोण: सर्वतो लघु भवति। अस्य दिनस्य मानं सर्वतो महद् (महत्तमं) भवति सूर्यश्च प्रात:काले क्षितिजवृत्ते स्वकीयोत्तरगमनसीमां समाप्य दक्षिणदिशं प्रति गमनं (वर्द्धनं) प्रारभते। अयमेव दक्षिणायनारम्भ: कथ्यते। अनयोर्द्वयोर्मध्ये दिनमेकमेतादृशमागच्छति यदा दिनस्य मानं रात्रेश्च मानं समं भवति। इमं कालं 'विषुवत्काल' इति कथ्यते। अयमेकस्मिन् वर्षे वारद्वयम् आयाति।

म.म.पण्डितसुधाकरद्विवेदिमहोदयानां मतानुसारेण वराहमिहिरस्य जीवनवृत्तम्—

आदित्यदासतनयोऽयं काम्पिल्लके (कालपीनगरे) सूर्यदेवताया वरप्रसादमवाप्य स्वपितुर्ज्यौतिषसिद्धान्तं समधीत्यावन्तिकायां तत्रत्यनृपतिन: समादरमासाद्य लघुजातकम्, बृहज्जातकम्, विवाहपटलम्, बृहत्संहिताम्, योगयात्राम्, पञ्चसिद्धान्तिकाञ्च व्यरचयत्। अनेकेषां मतेन यथा लघुबृहन्नामभेदेन जातकद्वयमकारि वराहेण, तथैव लघुबृहत्कृतभेदेन "लघुसंहिताया:" अर्थात् समाससंहिताया: कर्त्ता च वराह:। केचित् 'काम्पिल्लके' इत्यत्र 'कापित्थके' इति पाठं वदन्ति।

आदित्यदासतनयस्तदवाप्तबोध:
काम्पिल्लके सवितृलब्धवरप्रसाद: ।
आवन्तिको मुनिमतान्यवलोक्य सम्यग्
घोरां वराहमिहिरो रुचिरां चकार ।। (बृहज्जातके—१६।५)

भट्टोत्पलमतेनायं मगधद्विज:। केषाञ्चिन्मतेऽयं मगधद्विज:, अर्थात् सूर्योपासको ब्राह्मण:। जीविकार्थं मगधादुज्जयिनीं गतस्य वराहस्य मगधद्विजत्वमसम्भवं न। एके मगधे स्वगेहे निजपितु: सम्यग् ज्यौतिषमधीत्याऽऽर्यभट्टादिसिद्धान्तं चावगम्य धनार्जनार्थं यशोलाभार्थं च देशाटनं कुर्वता वराहेण काम्पिल्लके सूर्यदेवाराधनेन वरप्रसादमासाद्य परम्परया विक्रमनरपतिविभूषितामवन्तिकामवाप्य तत्र वसति: कृतेति निगदन्ति।

यथा सम्प्रति यूरोपीयभाषामधीत्य सुधिय: प्रसिद्धा भवन्ति तथैव वराहोऽपि स्वसमये यवनभाषामधीत्य नृपसभासु स्वप्रसिद्धिं कारयामासेति संहितायां गर्गवचनेन ज्ञायते। यथा—

म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद् द्विज: ।।

अनेन यवनोत्कर्षवर्णनाद् बृहज्जातके "क्रियतावुरिजितुम्" इत्यादिश्लोकेन यवनभाषायां राशिनामोल्लेखाच्च ज्ञायते।

सिद्धान्तरीत्या कल्पादेरहर्गणसाधने गणिताधिक्यात् क्लेशो भवति तदुपाकरणाय कमपि सिद्धान्तमवलम्ब्य गणका: करणग्रन्थान् विरचयन्ति तत्रापि यदा गताब्दा अधिका

भवन्ति तदा अहर्गणसाधने तथैव क्लेशोऽतः पुनस्तदपाकरणार्थं नव्या नवं करणं कुर्वन्ति। एवं स्वसमये पञ्चसिद्धान्तिकायां "सप्ताश्विवेदसंख्यं शककालमपास्ये"त्यादिना रोमकसिद्धान्तानुसारेणाहर्गणं गणयता वराहेण रोमकसिद्धान्तरचनाकालात् सप्ताश्विवेदमित-(४२७) शकादहर्गणः साधित इति वदतां डॉ. भाऊदाज्यादीनां मतं युक्तिशून्यं प्रतिभाति, भारतवर्षे सकलकरणग्रन्थेषु करणारम्भशकादेवाहर्गणसाधनदर्शनात्। वस्तुतः खण्ड-खाद्यकरणटीकायामामराजोक्तस्य "नवाधिकपञ्चशतसंख्याके शाके (५०९) वराहमिहिराचार्यो दिवं गत" इत्यस्य लेखस्य न किमपि प्रमाणम्। न ह्यन्योक्तवचनप्रामाण्यादाचार्यवचनाप्रामाण्यम्। यदि पञ्चसिद्धान्तिकारचनाकाले वराहस्य वयोऽष्टादशवर्षसमं कल्प्यते तदा तज्जन्मशकः (४०९) निधनसमयश्च आमराजोक्त एव गृह्यते तदा वराहस्य पूर्णायुः शतमायाति तत्र हि असम्भवम्—बहुश्रुते बहुविषयचतुरे मगधादागते बहुकृति कर्त्तरि वराहे। अथवा आत्मजन्मयोगपरिचयार्थं स्वजन्मशकाद् अहर्गणसाधनं कृतमाचार्येणेति बहूनां मतमपि नाऽसम्भवम्; परन्तु रोमकसिद्धान्तारम्भकालादहर्गणसाधने न काचिद्युक्तिरुत्पद्यते।

आलवीरुनी-नाम्नाऽपि पञ्चसिद्धान्तिकासमयस्तत्र लिखितः सप्तद्विवेदमितः (४२७) शक एव स्वीकृतः। यद्यपि देशाटनं कुर्वतो विदेशीयस्य आलवीरुनीनाम्नो जनस्य लेखो न प्रामाणिकस्तथापि तत्समये सर्वत्रैव पञ्चसिद्धान्तिकाया प्रचारात् तज्ज्ञानां च विदुषामाधिक्याद् भारते करणग्रन्थरीत्यनुसारतश्च तल्लेखे न संशयः। आधुनिकस्य ज्योतिर्विदाभरणकृतो गणकस्य कालिदासस्याप्रामाणिकं लेखमवलम्ब्य डॉ. कर्णेनाम्ना बृहत्संहिताभूमिका व्यर्थं विस्तारिता। वराहानन्तरं सार्धसप्तशतैर्वर्षैः (७५०) उद्भवस्य वराहादिविषयकलेखेषु परस्परमसङ्गतेषु कपोलकल्पितेषु च न किमपि वाक्यं प्रामाणिकमिति मन्मतम्।

वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः ।
होरागतं विस्तरतश्च जन्मयात्राविवाहैः सह पूर्वमुक्तम्।।
(बृहत्सं. १।१०)

इत्यनेन यद्यप्यस्य सर्वासां कृतीनां नामानि न स्पष्टानि भवन्ति तथापि वराहस्यान्तिमा कृतिः बृहत्संहिता एवेति स्फुटं तेन श्लोकेन।

लघुजातकं भट्टोत्पलटीकासहितं तथैव बृहज्जातकं च सम्प्रति फलितज्ञानां दैवज्ञानां गृहेषु सर्वत्रैव लिखितं मुद्रितं चोपलभ्यते। मिथिलाप्रान्तेषु लघुजातकस्य काश्यां च बृहज्जातकस्य विशेषरूपेण प्रचारो वर्तते। बृहत्संहिता च डॉ. कर्णेमहाशयस्य भूमिकया सह मुद्रणकालात् (सन् १८६४ ई.) विशेषरूपेण प्रसिद्धा। "समाससंहिता" अद्यावधि नोपलब्धा। योगयात्रा-विवाहपटल इत्येतौ ग्रन्थौ प्रयासबहुलेन काश्यां पण्डितश्यामाचरण-शास्त्रिणो ज्योतिर्विदो गृहे मया अवलोकितौ यत्र यात्रा-विवाहयोः मुहूर्त्तमस्ति। पञ्चसिद्धान्तिका च बह्वायासेन डॉ. थिबोमहाशयेन मया च यथासम्भवं संशोध्य नवीनां टीकां विरचय्य

मुद्रिता। अस्या अन्या प्रतिः अद्यावधि नोपलब्धा। फलग्रन्थेषु विवाहपटलस्यानेकानि वाक्यान्युपलभ्यन्ते (पद्मनाभमिश्रस्य वर्णनमवलोकनीयम्)। यथा शास्त्रान्तरे अध्याया भवन्ति तथा तन्त्रशास्त्रे अध्यायस्थाने पटलं लिख्यते, तेन तान्त्रिकलेखानुसारेण विवाहपटलेन विवाहाध्यायो गृह्यते। यथा— दुर्गापटलम्, कालीपटलमित्यादि (बृहत्संहितायां डॉ. कर्णेमहाशयस्य भूमिका २५ पृष्ठे द्रष्टव्या)। बृहज्जातकोपरि भट्टोत्पलस्य, महीधरस्य, महादेवस्य च टीका प्रसिद्धा। एका केरली टीका च दशाध्यायी-नाम्नी दुर्लभा अस्ति। भूरि श्रमेण लेखकेन सह सम्पर्कं विधाय राजकीयसंस्कृतपुस्तकालयेऽस्याः प्रतेः स्थापनार्थं मया लेखकः प्रोत्साहितः।

अस्यां टीकायां गोविन्देनाऽपि बृहज्जातकस्य टीका कृतेति लिखितमस्ति। अत्र प्रथमश्लोकटीकायां "चन्द्रो जलमर्कोऽग्निरित्यादि" सूर्यभट्टस्य, भगवत्पादाचार्यवेदान्ताचार्यस्य गोविन्दस्य, हलधरस्य, श्रीपतेः, सारावलीकारस्य, कृष्णाचार्यस्य, भट्टोत्पलस्य, आर्यभटस्य, "सिंहो वृषः प्रथममेषम्" इत्यादिचतुर्दशश्लोकटीकायाम्—विद्यामाधवस्य, वसिष्ठस्य, पराशरहोरायाः, वादरायणस्य, यवनेश्वरस्य, एकोनविंशतिश्लोकटीकायाम्—"शशिकृतनभरामै-राहता राशिजीवा" इत्यादि, तथा—

शून्याद्रिरसरूपाणि भूतरन्ध्रमुनीन्दवः ।
पञ्चाग्निरन्ध्रशशिनो मेषादीनां निरक्षजाः।।

चरप्राण" इत्यादि भास्करस्य, विद्वज्जनवल्लभाख्यस्य, द्वितीयाध्यायान्तिमश्लोकटीकायाम्—

"कदाचिद् ब्रह्मसिद्धान्तः सावित्रस्तु कदाचन ।
कदाचिद्रोमशः स्पष्टो न कदाचित्तथेतरौ ।।

(इतरौ ब्राह्मवासिष्ठौ) इति पराशरस्य,

"अनिमिषपरमांशके विलग्ने शशितनये गवि पञ्चवर्गलिप्ते"।

इत्यादिश्लोकटीकायां "वृषस्य पञ्चविंशतिकलायां कदा बुधो भविष्यति— एतदर्थमाचार्येण पञ्चसिद्धान्तिका विनिर्मिता। यदि पञ्चानां मतेन बुधः पञ्चविंशतिकलायामागच्छेत् तर्हि समीचीन एवान्यथा येन दृग्गणितैक्यं भवेत्तेनैव साध्यः" इति तत्कृतदशमाध्यायारम्भे "तथा चाऽऽचार्यपुत्रेणोक्तम्", "यो यो भावः स्वामिदृष्टो युतो वा" इत्यादि षट्पञ्चाशिकाकारस्य पृथुयशसो वचनान्युपलभ्यन्ते।

अथ वराहेणाष्टपञ्चाशत्तमेऽध्याये ४४तमेन श्लोकेन—

"पद्माङ्कितकरचरणः प्रसन्नमूर्तिः सुनीचकेशश्च।
पद्मासनोपविष्टः पितेव जगतो भवेद् बुद्धः"।।

इत्यनेन बुद्धप्रतिमालक्षणम्, ४५तमेन श्लोकेन—

"आजानुलम्बबाहुः श्रीवत्साङ्कः प्रशान्तमूर्तिश्च ।
दिग्वासांस्तरुणो रूपवांश्च कार्योऽर्हतां देवः" ।।

इत्यनेन चार्हद्देवप्रतिमालक्षणं चोक्तमिति वैदिकधर्म्मावलम्बिनां न रीतिरिति वदतां मतं न तथ्यम्, प्रतिमालक्षणं कर्तुं प्रवृत्तस्य विदुषः सर्वलक्षणवर्णनावश्यकत्वात्।

लङ्कार्धरात्रसमये दिनप्रवृत्तिं जगाद चार्यभटः ।
भूयः स एव सूर्योदयात् प्रभृत्याह लङ्कायाम् ।। (पञ्चसि. १५।२०)

इत्यनेन वराहेणार्यभटस्य दिनप्रवृत्तौ मतद्वयं कथितं परन्तु आर्यभटीयतन्त्रे दशगीतिकासूत्रे सूर्योदयादेव दिनप्रवृत्तिर्लिखिता, अन्यस्य मतस्य चर्चा न कुत्रापि वर्तते। वराहेण पञ्चसिद्धान्तिकायां बहवो गणितस्कन्धविशेषा विहितास्ते च विस्तरभयान्न लिख्यन्ते। वराहस्य सर्वे ग्रन्थाः प्रकटयन्ति ज्यौतिषस्कन्धत्रयेऽद्वितीयं पाण्डित्यं सर्वजनमनस्तोषकरं काव्यकलाकलापवैभवं च। मन्मते वराहार्यभटौ समकालिकौ, मगधराजधान्यां वराहः आर्यभटमतं सम्यग् विज्ञाय ततोऽवन्तीं गत इति।

अन्यच्च केचिदूचुः —

वराहस्य समयनिर्धारणक्रमे विचार्यते यद् वर्तमानवत्सरे अयनांशे २२°-९'-२४" विकलाः प्रवहमानाः सन्ति। क्रान्तिपातस्य वात्सरिकी ५०".१ विकला स्थिरीकृत्य गणितकरणेन ज्ञायते यद् वर्तमानकालात् प्रायेण १५९२ वर्षपूर्वं वराहमिहिराचार्य आसीत्। अस्या उपपत्तेः समर्थने विलायतदेशस्य मिश्रदेशस्य च विख्यातज्योतिर्विदो 'हिपार्क़स' महोदयस्य गगनदर्शनफलं वक्ष्यते।

हिपार्कसमहोदयेन लिखितमस्ति यत् तस्य समये चित्रानक्षत्रं क्रान्तिपातबिन्दुतः ६° अंशाः पश्चिमे आसीत्, एवं हार्सेलमहोदयेन लिखितं यद् १७५० ईशवीयस्य प्रारम्भकाले उक्तनक्षत्रं (चित्रानक्षत्रम्) क्रांतिपातबिन्दुतः २०° अंश २४' कला पूर्वेऽग्रसर आसीत्। अतो हिपार्कसमहोदयस्य समयाद् हार्सेलमहोदयस्य समयं यावत् क्रान्तिपातबिन्दुः २६° अंश २४' कला पूर्वस्मिन् अग्रसरोऽस्ति। अत एव सूक्ष्मगणितमतेन ज्ञायते यद् हिपार्कसमहोदयेन हार्सेलमहाशयात् १८९७ वर्षाणि पूर्वम् अर्थात् १४७ ई. वर्षतः पूर्वम् आकाशस्य दर्शनं कृतमासीत्। हिपार्कससमये चित्रानक्षत्रं राशिचक्रस्य १७४° अंशे स्थितमासीत्; परन्तु सूर्यसिद्धान्तलेखकसमये वराहस्य समये च ६° अंशाः पूर्वेऽग्रसरोऽस्ति, अर्थात् क्रान्तिपातः चित्रानक्षत्रं च राशिचक्रस्य एकस्मिन् स्थाने वा १८०° अंशे स्थितमासीत्। अतोऽयनस्य वात्सरिकी गतिः ५०.१ विकला स्थिरीकृत्य गणितक्रियया ज्ञातुं शक्यते यत् सूर्यसिद्धान्तस्य लेखकं एवं वराहश्च हिपार्कसात् ४३१ वर्षाणि पश्चाद् अर्थात् सन् २८४ ई. वर्ष उत्पन्नौ। पूर्वमेवोक्तं यत् पराशरीलेखको वराहात् १६७६ वर्षाणि पूर्वमेव ऋतूनामवस्थानं प्रकाशितवान्। अतः स ईशवीयवर्षतः १३९२ वर्षाणि पूर्वं जातः।

सूर्यसिद्धान्तग्रन्थे प्रदर्शितस्य तत्कालीननक्षत्रावस्थानस्यावलोकनेन ज्ञायते यद् वराहसमयकाल एव तन्निर्मितम्। वराहेण स्वपञ्चसिद्धान्तिकायां सौरसिद्धान्तस्य नामोल्लेखः कृतः। अनेन निश्चयो भवति यत् सूर्यसिद्धान्तस्य रचयिता वराहो नास्ति। सूर्यसिद्धान्तो वराहस्य पित्रा आदित्यदासेन रचित इति ज्ञायते, पाठकानामवलोकनार्थं सूर्यसिद्धान्तस्य ब्रह्मगुप्तस्य च नक्षत्रावस्थानं प्रदर्श्यते।

नक्षत्र	कल्पित आकार	सूर्यसिद्धान्त-लिखित ध्रुवक पूर्व-पश्चिम	ब्रह्मगुप्तलिखित ध्रुवक	अक्षांस उत्तर वा दक्षिण	प्रत्येक नक्षत्र के आरम्भ से योग-तारे की दूरता	प्रत्येक नक्षत्र में नक्षत्र-संख्या	संख्या एकादि क्रम से
अश्विनी	तुरंगमुख	८°	८	१० उ	४८ उ.	३	१
भरणी	योनि	२°	२°	१२ उ.	४० द.	३	२
कृत्तिका	क्षुर	३७°-३०′	३७.२८	४०-३० उ.	६५ द.	६	३
रोहिणी	शकट	४९°-३०′	४९.२८	४०-३० द.	५७ पू.	५	४
मृगशिरा	हरिणमुख	६३	६३	१० द.	५८ उ.	३	५
आर्द्रा	रत्न	६७°-२०′	६७	११ द.	४ मध्य	१	६
पुनर्वसु	गृह	९३°	९३	६ उ.	७८ द.	४	७
पुष्य	बाण	१०६	१०६	उत्तर	७६ मध्य	७	८
आश्लेषा	चक्र	१०९	१०८	७° द.	१४ पू.	५	९
मघा	गृह	१२९	१२९	० उ.	५४ द.	८	१०
पूर्वाफाल्गुनी	शय्या	१४४	१४७	१२° उ.	४६ उ.	२	११
उत्तराफाल्गुनी	शय्या	१५५	१५५	१३ उ.	५० उ.	२	१२
हस्त	हस्त	१७०	१७०	११° द.	६०	५	१३
चित्रा	मुक्ता व प्रदीप	१८०	१०३	२० द.	४०	१	१४
स्वाती	प्रवाल	१९९	१९९	३७° उ.	७४	१	१५
विशाखा	तोरण	२१३	२१२.५	१३० उ.	७८ उ.	४	१६
अनुराधा	बलि	२२४	२२४.५	१°-४४′द.	६४ मध्य	४	१७
ज्येष्ठा	कुन्तल	२२९°	२२९.५	४° द. ३-३० द.	१४ मध्य	३	१८
मूल	क्रोधित केशरी	२४१	२४१	८°-३०′द.	६ पू.	११	१९
पूर्वाषाढ़ा	शय्या	२५४°	२५४	५°-३०द.	४३	४	२०
उत्तराषाढ़ा	हस्तिविलास	२६०°	२६०°	५द.	पूर्वाषाढ़ा का मध्य नक्षत्र उ.	२	२१
अभिजित्	त्रिकोण	९६°-४०′	२६५	६०° उ. ६२ उ.	पूर्वाषाढ़ा का शेष उज्ज्वल	३	
श्रवण	त्रिविक्रम	२८०	२७८	३० उ.	उत्तराषाढ़ा के शेष मध्य में	३	२२
धनिष्ठा	मृदंग	२९०	२९०	३६ उ.	श्रवण का शेषपाद पश्चिम	४	२३
शतभिषा	वृत्त	३२०	३२०	०°-३०′ द. ०°-१८′ द. ०-२०′ द.	८० उज्ज्वल	१०० १००	२४
पूर्वाभाद्रपद	यमल	३३६°	३२६	२४° उ.	३६ उ.	२	२५
उत्तराभाद्रपद	शय्या	३३७	३२७	२६° उ.	२२ उ.	२	२६
रेवती	मुरज	८५९°-५०′	३६०°	३०	७९ द.	३२	२७

अन्य प्रधान नक्षत्रों के ध्रुवक व अक्षांस

नक्षत्र	अंग्रेजी नाम	सूर्यसिद्धान्त तथा ब्रह्मगुप्त के मत से ध्रुवक	सिद्धान्तसार्वभौम के मत से ध्रुवक	ग्रहलाघव के मत से ध्रुवक	अक्षांस १ के मत से दक्षिण वा उत्तर	अक्षांस २ के मत से दक्षिण वा उत्तर	अक्षांस ३ के मत से दक्षिण वा उत्तर
अगस्त्य	Conopus	९० ८७	८५.५	८०	८० द. ७७ द.	७७०-६ द.	७६ द.
लुब्धक	Sirius वेटा	८० ८६	८४-७६	८०	४० द.	४०'-५द.	४०° द.
अग्नि	Tauri	५२	५७-४	४३	८ उ.	८-१४	८ उ.
ब्रह्महृदय	Capella	५२	५८-३६	५६	३० उ.	३०.४९	३१ उ.
प्रजापति डेल्टा	Aurigi	५७	५६-५३	६१	३७ उ.	३८.३०	३१ उ.
आयर वसे आयः	डेल्टा Virginis	१८०	१८०	१८३	३ ९	३	३९ उ. ३उ.
ऋतु	—	—	—	—	५५ उ.	—	—
पुलह	—	—	—	—	५० उ.	—	—
अत्रि	—	—	—	—	५६ उ.	—	—
अंगिरस	—	—	—	—	५७ उ.	—	—
वशिष्ठ	—	—	—	—	६० उ.	—	—
मरीचि	—	—	—	—	६०	—	—
पुलस्त्य	—	—	—	—	५० उ.	—	—

सूर्यसिद्धान्तानुसारम् अयनस्य वार्षिकी गतिः ५४'' विकला अस्ति। पराशर-आर्यभट्टयोर्मतानुसारं प्रतिवत्सरम् अयनः क्रमशः ५२'-३ठ एवं ५२'-१ठ विकला पूर्वे अग्रेसरति। पराशरसंहितैव आर्यभट्टसिद्धान्तस्य मूलभित्तिरस्ति। अयनस्य चलायमानावस्था-प्रवर्तकः पराशर्याः लेखकोऽस्ति। तन्मतेन अयनचक्रं मेषराशेः २७° अंशात् पूर्वपश्चिमयो-र्मध्ये दोलायमानं भवति। पराशरीग्रन्थे लिखितेन गगनदर्शनसिद्धान्तेन सह आर्यभट्टः स्वकीयं गगनदर्शनं निरीक्षितवान्। आर्य्याष्टशतिकाग्रन्थे अनेनायनविषय एकं भिन्नमतमुल्लिखितम्। तन्मतेन अयनचक्रम् २४° अंशपरिमाणे उभयतो गच्छति। अत इदं ज्ञायते यद् यदा अयनचक्रः पश्चिमबिन्दुतः २४ अंशपरिमाणम् अग्रेसरो भवति तदा स जन्म लेभे। सूर्यसिद्धान्तलेखकस्य समये वराहस्य च समये अयनचक्रः पश्चिमबिन्दुतः २७°अंशे अग्रेसर आसीत्। अत एव आर्यभट्टसमये अयनचक्रो मेषस्य पश्चिमे ३° अंशे आसीत्। अनेन कारणेन सिद्ध्यति यद् आर्यभट्टो वराहात् २१५ वर्षाणि पूर्वम् अर्थात् शकाब्दाद् नववर्षाणि पूर्वं जन्म लेभे।

गर्गसंहिता अपि ज्यौतिषस्यैकः प्राचीनग्रन्थोऽस्ति। वराहेण बृहत्संहितायां पुनः पुनः ग्रन्थस्यास्योल्लेखः कृतः। गर्गोऽप्ययनविषये किञ्चित् लिखितवान् किन्तु तेन पराशरीत एतद्विषयं गृहीतमिति ज्ञायते। यथा पराशरः —

यदा प्राप्तो वैष्णवान्तमुदग्भागे प्रपद्यते ।
दक्षिणेऽश्लेषां वा महाभयाय ।।
गर्गः —
यदा निवर्तते प्राप्तः श्रविष्ठामुत्तरायणे ।
आश्लेषां दक्षिणोऽप्राप्तस्तावविद्यान् महद्भयम्।।

अनयोर्द्वयोरपि अर्थः समानः। धनिष्ठान्तगमनेन सूर्यस्योत्तरायणं भवति। आश्लेषान्तगमनेन दक्षिणायनं भवति। क्रान्तिपातस्य परिधिवत् परिभ्रमणं हिन्दूज्योतिर्विदां मध्ये वशिष्ठसिद्धान्तस्य लेखकेन विष्णुचन्द्रेन सर्वप्रथमं प्रकटीकृतम्। तस्य मतमस्ति यत् क्रान्तिपात एकस्मिन् कल्पे १८९४११ वारं प्रतिभ्रमति। अत एव ज्ञायते यत् तन्मतेन अयनं प्रतिवर्षम् ६०''.०६ विकला पूर्वमग्रेसरति। इदं मतं ग्रीसदेशीयहिपार्कस-टेलिमी इत्यनयोर्ज्योतिर्विदोर्ग्रन्थाभ्यां गृहीतमस्ति वा स्वयम् आर्यज्योतिर्विद्भ्यः प्रकाशितमिति सम्यग् न ज्ञायते; किन्तु द्वाभ्यां ज्योतिर्विद्भ्यां निरूपितायनस्य वात्सरिकीं गतिमवलोक्य ज्ञायते यद् विष्णुचन्द्रेण निरपेक्षभावेन प्रकटितमिदम्। हिपार्कसमतेन क्रान्तिपातः प्रायेण ८५ वर्षेषु अंशमेकम्, टेलिमीमतेन च १०० वर्षेषु अंशमेकमग्रेगच्छति।

वराहमिहिराचार्येण बृहज्जातकग्रन्थे मय-यवन-मणित्थ-शक्ति-सत्य-बली-विष्णुगुप्त-देवस्वामी-सिद्धसेन-जीवशर्म्मा-पृथुयशा इत्यादीनामनेकेषां ज्योतिर्विदां नामोल्लेखः कृतः। एते विद्वांसो वराहस्य पूर्ववर्तिन आसन्। वराहेणेदमपि स्वीकृतं यद् ज्यौतिषशास्त्रे यवना अपि दक्षा आसन्। तेनोक्तम्—

''म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम् ।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः'' ।।

अनेनानुमीयते यद् मिश्रदेशीयैर्ज्योतिर्विद्भिर्वराहस्य मित्रता आसीत्।

बृहत्संहितायामस्यां प्रथमखण्डे वक्ष्यमाणा विषया अध्यायानुसारेण वर्तन्ते—

अध्यायाः	विषयाः	अध्यायाः	विषयाः
१.	उपनयनाध्यायः	६.	भौमचारः
२.	सांवत्सरसूत्राध्यायः	७.	बुधचारः
३.	आदित्यचारः	८.	बृहस्पतिचारः
४.	चन्द्रचारः	९.	शुक्रचारः
५.	राहुचारः	१०.	शनैश्चरचारः

अध्याया:	विषया:	अध्याया:	विषया:
११.	केतुचार:	१८.	शशिग्रहसमागमाध्याय:
१२.	अगस्त्यचार:	१९.	ग्रहवर्षफलाध्याय:
१३.	सप्तर्षिचार:	२०.	ग्रहशृंगाटकाध्याय:
१४.	नक्षत्रकूर्माध्याय:	२१.	गर्भलक्षणनामाध्याय:
१५.	नक्षत्रव्यूह:	२२.	गर्भधारणाध्याय:
१६.	ग्रहभक्तियोग:	२३.	प्रवर्षणाध्याय:
१७.	ग्रहयुद्धाध्याय:	२४.	रोहिणीयोगाध्याय:

ग्रन्थस्यास्य द्वितीयसंस्करणस्य प्रकाशनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनाधिकारिणो **डॉ. हरिश्चन्द्रमणित्रिपाठिनो** महता प्रयासेन सम्पन्नमिति हेतोस्तम्प्रति हार्दिकं धन्यवादं विज्ञापयामि। अन्ये च **डॉ. पारसनाथद्विवेदिन:** (वेदान्तविभागे आचार्या:), **डॉ. गिरिजेशकुमारदीक्षित:** (व्याकरणप्राध्यापक:), **पं. रामसहोदरपाण्डेयश्च** (पूर्व- अनुसन्धानाधिकारी) ग्रन्थस्यास्य प्रकाशने परमसहयोगिन: सन्ति, अतस्तेभ्योऽपि हार्दिकं धन्यवादं विज्ञापयामि।

वाराणस्याम्
वसन्तपञ्चम्याम्,
वि. सं. २०५२

कृष्णचन्द्रद्विवेदी
आचार्योऽध्यक्षचरश्च, ज्यौतिषविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

भूमिका

[प्रथमसंस्करणस्य]

मिहिरभक्तोऽवन्तिमिहिरो वराहमिहिरो महीयते कर्ता बृहत्संहिताया ज्योतिर्विद्धितायाः। जनको[1] मिहिर(= आदित्य-)दासो गुरुश्चापि। समधिगतमिहिरवरप्रसादेन वराहमिहिरेण वन्दितो मिहिरो ग्रन्थादौ हार्द्यां। यद्यपीदमीयो गुरुर्भिन्नो जनकादिति ज्ञायते पञ्चसिद्धान्तिकाया मङ्गलश्लोकेन,[2] तथापि तत्र 'येनास्मिन् नः कृतो बोधः' इत्येकवचनान्ततोऽलं द्वयोरैक्यप्रतिपादनाय। वाराहीसंहितेत्यभिधानान्तरं बृहत्संहितायाः।

द्वादशोत्तरचतुश्शतसंख्याके शाके समजनि जनिरस्य लब्धवर्णस्येत्यनुमानम्। यद्यपि न कृता संख्यावता तेन स्वकीयसमयचर्चा विशदा, तथापि पञ्चसिद्धान्तिकाख्ये करणग्रन्थे निजे समाश्रुतो गणितारम्भाब्दः सप्तविंशत्युत्तरचतुश्शते (४२७) शाके। एवं खलु प्रसिद्धयत्येतदीया जनिस्ततः पूर्वम्। तेन बृहज्जातक-बृहद्यात्रा-बृहद्विवाहपटलयात्रेति ग्रन्थत्रयरचना बृहत्संहितातः प्राक् कृतेति स्वयमेवोक्तं बृहत्संहितायाम् (१, १०)। बृहत्संहिता नूनं प्रौढरचनेति संश्रवे पञ्चदशवर्षदेशीयो न प्रभवेत् कर्तुं स ताम् इत्यतोऽपि प्राक् पञ्चाब्दा निर्धारयितुं शक्यन्ते।

नभोगतपिण्डानि प्रभावयन्ति मानवभाग्यमिति शक्यते वक्तुं तद्भाग्यम्। भारते वर्षे सुपुरातनोऽयं विश्वासः। केचन विश्वासमिमं 'बेबिलोन' इत्याख्यदेशात् संप्राप्तं मन्वते। ब्राह्मणग्रन्थेषु सूत्रग्रन्थेषु च नक्षत्रविचारो लभ्यते। पुरोहितवद् भूपः फलितज्योतिर्विदं समाश्रयेदिति धर्मसूत्रेषु विधिः। मागधानां पुरोहितानुचरवर्गाणां फलितज्योतिर्विदां च गणना कौटलीयार्थशास्त्रे नानवद्या। शुभाशुभलक्षणैर्भाविकथनाय, सैन्योत्साहाय, रिपुत्रासाय चापेक्ष्यते फलितज्योतिर्विद् भूपैः। तदुक्तं बृहत्संहितायाम्—

अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।
तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि ॥ १, ८।
नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता।
चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते ॥ १. ११।

---

१. तदुक्तमुपसंहाराध्याये बृहज्जातकस्य तेनैव—
आदित्यदासतनयस्तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः। ९।

२. दिनकरवसिष्ठपूर्वान् विविधमुनीन् भावतः प्रणम्यादौ।
जनकं गुरुं च शास्त्रे येनास्मिन् नः कृतो बोधः ॥

अभूवन् फलितज्योतिषविषयका बहवो ग्रन्थाः प्रागिति नास्ति संशीतिलेशः। पाणिनीयाष्टाध्याय्या महत्त्वेन पूर्ववर्तिव्याकरणग्रन्थलोपवद् वराहमिहिरकृतबृहत्संहिताया महिम्ना प्रायः समे सुपुरातना ज्योतिर्विषयका ग्रन्थास्तिरोहिताः। वराहमिहिरो गर्गासितदेवलवृद्धगर्गनारदपराशरादीन् पूर्ववर्तिनो ग्रन्थकारान् स्मरति स्वकीये ग्रन्थे। एतेषां ग्रन्थकाराणां ग्रन्थखण्डितांशा लभ्यन्ते। तत्र वृद्धगर्गसंहितायाः गार्गीसंहिताया वा खण्डितांशा आधिक्यतो दृश्यन्ते। ग्रन्थोऽयं ग्रीसदेशीयानां भारतशासनोल्लेखाय सुप्रसिद्धः। खैस्ताब्दात् पूर्वं प्रथमशताब्द्यामुपलभ्यते स्म ग्रन्थरत्नमिदमित्यत्र नास्ति किमपि गमकम्। म्लेच्छयवनेषु फलितज्योतिषशास्त्रं सम्यक् स्थितमिति ते पूज्यन्त ऋषिवत् पुनः किं वक्तव्यं दैवविद्-द्विजस्यार्हणाविषय इति भावार्थकं कथनमस्मिन् ग्रन्थे विद्यते। वराहमिहिरेणापीदृशमेवोक्तं[1] तच्चास्माद् ग्रन्थाद् गृहीतमिति फलितज्योतिषाध्ययनार्थं तद्विदेशगमनकल्पना भ्रान्त्यनिर्लिता, तद्ग्रन्थवर्णितविषयाणां ग्रन्थानां तद्ग्रन्थरचनातः प्रागेव विनिर्मितत्वात्; पूर्वाचार्यग्रन्थालोडनपूर्वकं कृतेयं कृतिः समासत इति प्रतिजानीते स बृहत्संहितायाम्—

आब्रह्मादिविनिःसृतमालोक्य ग्रन्थविस्तरं क्रमशः।
क्रियमाणकमेवैतत् समासतोऽतो ममोत्साहः॥ १, ५।

भूयो वराहमिहिरस्य न युक्तमेतत्
कर्तुं समासकृदसाविति तस्य दोषः।
तज्ज्ञैर्न वाच्यमिदमुक्तफलानुगीति
यद्वर्हिचित्रकमिति प्रथितं वराङ्गम्॥ ४६, २॥

आर्यभटेन गोलपादे भूभ्रमणसिद्धान्तः प्रत्यपादि सर्वतः प्राक् "अनुलोमगतिर्नौस्थः" इति। ब्रह्मसिद्धान्ते (११ अध्याये) ब्रह्मगुप्तेन प्रत्यादेशि सः 'प्राणेनैति कलां भूर्यदि" इति। एवमेव वराहमिहिरेण चन्द्रग्रहणादिविषये प्रदर्शिता स्वोपज्ञता। 'भूच्छायां स्वग्रहणे' (५, ८) इति प्रतिपादयता तेन चन्द्रग्रहणकारणं भूच्छायेति प्रदर्शितम्। संपूर्णः श्लोकश्चेत्थम्—

भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः।
प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्द्धात्॥

धीमत्तल्लजो वराहमिहिरः स्वसिद्धान्तस्थापनात् प्राक् प्रचलितपूर्वं 'राहुकृतमर्कचन्द्रयोर्ग्रहणम्' इति सिद्धान्तं निराकृत्य तस्मिन् काले स्वपाण्डित्यं प्रदर्शितवान् सडिण्डिमघोषम्। तत्कृतं खण्डनमवश्यमध्येयम्—

---

१. म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत् तेऽपि पूज्यन्ते किं पुनर्दैवविद् द्विजः॥ २, १४।

यदि मूर्तो भविचारी शिरोऽथवा भवति मण्डली राहुः ।
भगणार्द्धेनान्तरितौ गृह्णाति कथं नियताचारः ॥ ५, ४ ।
अनियताचारः खलु चेदुपलब्धिः संख्यया कथं तस्य ।
पुच्छाननाभिधानोऽन्तरेण कस्मान्न गृह्णाति ॥ ५, ५ ।
अथ तु भुजगेन्द्ररूपः पुच्छेन मुखेन वा स गृह्णाति ।
मुखपुच्छान्तरसंस्थं स्थगयति कस्मान्न भगणार्द्धम् ॥ ५, ६ ।
राहुद्वयं यदि स्याद् ग्रस्तेऽस्तमितेऽथोदिते चन्द्रे ।
तत्समगतिनान्येन ग्रस्तः सूर्योऽपि दृश्यते ॥ ५, ७ ।

रात्रौ भूच्छायाराहित्येन चन्द्रग्रहणाभाव इत्याशङ्कापि निराकृता तेनेत्थम्—"यथा वृक्षस्य दीर्घचया स्वच्छाया खल्वेकपार्श्वे भवति तद्वद् निशि निशि दिनेशस्य भूमेरावरण-वशाज्ज्ञेया तच्छायेति । प्रतिमासं चन्द्रग्रहणं कुतो नेति शङ्कापि समाहिता (५।१०) । एवं सत्यपि वराहमिहिरेण 'चन्द्रग्रहणकारणं भूच्छाया' इति ज्ञानं पूर्वाचार्येभ्य उपगतमित्यूरीकृतम्—

एवमुपरागकारणमुक्तमिदं दिव्यदृग्भिराचार्यैः ।
राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः ॥ ५, १३ ।

वराहमिहिरो ज्योतिषशास्त्रं त्रिधा विभजते—१. सिद्धान्तज्योतिषं गणितीयाधारश्च । तन्त्रेति नामान्तरम्; २. होरा जन्मपत्रादिकं संबध्नाति । भट्टोत्पलाचार्येण 'होरायाम् = जातके' इति प्रतिपादितं बृहत्संहितायाः (१, ६) टीकायाम् । इदमभिधानं सुस्पष्टं ग्रीकभाषीयम् । ३. संहिता भौतिकफलितज्योतिषं संबध्नाति । यत्र ग्रन्थे कात्स्न्र्येन ज्योतिषशास्त्रवर्णनं सा संहिता (१, ६) । होरा-गणित-संहितेति समुदितं त्रिस्कन्धज्योतिषशास्त्रम् ।

इयं बृहत्संहिता वराहमिहिरप्रणीतग्रन्थेषु मूर्द्धन्यमणिरिव शोभते । तेषु समेष्वियं महिष्ठा । वाराही संहितेत्यभिधानान्तरमस्याः । इह ग्रन्थे महानुभावोऽयं ग्रामं गच्छंस्तृणं स्पृशतीति न्यायेन बहुविधं भूगोलच्छन्दःकाव्यादीनां कोशं संनिवेशितवान् फलितज्योतिषशास्त्रवर्णनपरोऽपि । ग्रन्थस्यास्यानुवाद आरब्यभाषामयोऽलबरूनीमहाशयेन संपादितोऽभिव्यनक्ति ग्रन्थमाहात्म्यं सहस्राब्दीतः पूर्वमितः । सांवत्सरेण विदुषा तेन छन्दसि भाषायां च पूर्णतः प्रदर्शितं वैदुष्यम् । तद्रचनायां यत्र क्वापि साधीयो हि कवित्वयोग्यतासंस्पर्शो विद्वन्मनोहारी । प्रस्तूयते किमपि निदर्शनम् । तत्र विभाव्यतां सौष्ठवं सुधीभिः—

अगस्त्यस्य मुनेः प्राधान्यद्वारेण समुद्रशोभामुपवर्णयितुमाह—

समुद्रोऽन्तःशैलैर्मकरनखरोत्खातशिखरैः
कृतस्तोयोच्छित्त्या सपदि सुतरां येन रुचिरः ।

पतन्मुक्तामिश्रैः प्रवरमणिरत्नाम्बुनिवहैः
सुरान् प्रत्यादेष्टुं मितमुकुटरत्नानिव पुरा ॥ १२, १ ।

भगवतागस्त्यमुनिना पूर्वं जलापहरणेन तत्क्षणमेव सागरो रम्यो विहितः । जलाभावात् तत्रत्याः पर्वता रत्नादिसमलङ्कृतमूर्धानो देवानधरीचक्रुरित्येतदाकूतम् ।

शरद्वर्णनचमत्कृतिरतुला । नदीनां प्रत्यहं जलाल्पत्वात् पुलिनानि भवन्ति व्यक्तानि । तानि च हंसैः सेव्यन्ते । पार्श्वद्वयाधिष्ठितचक्रवाकः (लोहितवर्णाः पक्षिविशेषाः) सस्वनहंसपङ्क्तिः शरत् ताम्बूलरक्तोत्कषिताग्रदन्ती योषेव शोभत इत्युत्प्रेक्षते ग्रन्थकारः—

पार्श्वद्वयाधिष्ठितचक्रवाका-
मापुष्णती सस्वनहंसपङ्क्तिम् ।
ताम्बूलरक्तोत्कषिताग्रदन्ती
विभाति योषेव शरत् सहासा ॥ १२, ८ ।

अन्यच्च—

इन्दीवरासन्नसितोत्पलान्विता शरद् भ्रमत्षट्पदपङ्क्तिभूषिता ।
सभ्रूलताक्षेपकटाक्षवीक्षणा विदग्धयोषेव विभाति सस्मरा ॥ १२, ९ ।
इन्दोः पयोदविगमोपहितां विभूतिं द्रष्टुं तरङ्गवलया कुमुदं निशासु ।
उन्मूलयत्यलिनिलीनदलं सुपक्ष्म वापी विलोचनमिवासिततारकान्तम् ॥ १२,१० ।

भूमेः शोभावर्णनम्—

नानाविचित्राम्बुजहंसकोरकारण्डवापूर्णतडागहस्ता ।
रत्नैः प्रभूतैः कुसुमैः फलैश्च भूर्यच्छतीवार्घमगस्त्यनाम्ने ॥ १२, ११ ।

भुजङ्गप्रयातच्छन्दोनिबद्धं मेघवर्णनमिदम्—

तडिद्धैमकक्ष्यैर्बलाकाग्रदन्तैः
स्रवद्वारिदानैश्चलत्प्रान्तहस्तैः ।
विचित्रेन्द्रचापध्वजोच्छ्रायशोभै-
स्तमालालिनीलैर्वृतं चाब्दनागैः ॥ २४, १७ ।

द्रुतविलम्बितच्छन्दोनिबद्धं चैतत्—

सशिखिचातकदर्दुरनिःस्वनै-
र्यदि विमिश्रितमन्द्रपटुस्वनाः ।
खमवतत्य दिगन्तविलम्बिनः
सलिलदाः सलिलौघमुचः क्षितौ ॥ २४, १९ ।

पीताम्बरवेष्टितशरीरस्य भगवतो नन्दनन्दनस्य कान्तिं चोरयतां मेघानां वर्णनम्—

सन्ध्यानुरक्ते नभसि स्थितानाम्
इन्दीवरश्यामरुचां घनानाम्।
वृन्दानि पीताम्बरवेष्टितस्य
कान्तिं हरेश्चोरयतां यदा वा ॥ २४, १८।

इह पेपीयतां याथातथ्येन काव्यमाधुर्यम्—

शालीक्षुमत्यपि धरा धरणीधराभ-
धाराधरोज्झितपयःपरिपूर्णवप्रा।
श्रीमत्सरोरुहतताम्बुतडागकीर्णा
योषेव भात्यभिनवाभरणोज्ज्वलाङ्गी ॥ १६, १६।
क्षत्रं क्षितौ क्षपितभूरिबलारिपक्ष-
मुद्घुष्टनैकजयशब्दविरावितांशम्।
संहृष्टशिष्टजनदुष्टविनष्टवर्गां
गां पालयन्त्यवनिपा नगराकराढ्याम् ॥ १६, १७।
पेपीयते मधु मधौ सह कामनीभि-
र्जेगीयते श्रवणहारि सवेणुवीणम्।
बोभुज्यतेऽतिथिसुहृत्स्वजनैः सहान्न-
मब्दे सितस्य मदनस्य जयावघोषः ॥ १६, १८।

बृहत्संहिताया भौगोलिकं महत्त्वम्

एवं तावद् ग्रन्थस्यास्य सुविशङ्कये विषयवस्तुसीमा। फलितज्योतिषमाहात्म्यवर्णनान्तरं निरूप्यन्ते ग्रन्थकारेण दिवाकरगतिप्रभावाः, चन्द्रगतपरिवर्तनानि ग्रहैः सार्धं च तत्संयोगा ग्रहणानि च। तदनन्तरं विभिन्ननक्षत्राणां प्रभावो मानवभाग्ये केन रूपेण जायत इति समुपवर्णितम्। चतुर्दशेऽध्याये भारतीयभूगोलस्वरूपं तात्कालिकं प्रसङ्गतः समुपस्थापितमिति महते ज्ञानाय तद्विदाम्।

ज्योतिषशास्त्रप्रतिपादनपरेऽस्मिन् ग्रन्थे भूगोलकोशरत्नानि पूर्वस्मिन् खण्डे प्रायशः सर्वत्र विकीर्णानि। तत्र स्मृता देशा जना जनपदाश्च बाहुल्येन न श्रूयन्ते। तेषां केचन प्रस्तूयन्ते—

सुह्मजनाः (५, ३७)। अपरान्ता जनाः (३, ४०; ६, १५), अपरान्तका वा (५, ७०; १४, २०)। सिंहपुरकाः (३, ४२), कुकुराः (५, ७१ ; १४, ४), कोटिवर्षाः

(६, ११), शूलिकाः (६, १५; २१; १०, ७; १४, ८; २३; १६, ३४)। प्रत्यन्ताः (५, ३१; ६, १७; २१; १०, ६) = गह्वरवासिनः। चारुदेवयः (६, १८) = चारुदेवी, नदी तत्तटनिवासिनः। जाङ्गलाः (६, २६) — जाङ्गलम् = स्वल्पोदकस्थानम्, तत्र ये निवसन्ति ते। पारतः (१४, २१), पारता जनाः (१०, ७; १३, ६; १६, ४; १२; २१), पारतरा जना वा (१०, ५) = पर्यियनजनाः। आवगाणाः (११, ६१; १६, ३७)। माण्डव्याः (१४, २; २२; २७)। उज्जिहानाः (१४, २)। असिकाः (११, ५६)। देविका (११, ३५) = एतन्नामिका नदी। नीपाः (१४, २)। गौरग्रीवाः (१४, ३)। उद्देहिकाः (१४, ३)। पाण्डुगुडाः (१४, ३)। पुरिकाः (१४, १०)। तालिकटाः (१४, ११)। सौरिकीर्णाः (१४, ११)। फणिकाराः (१४, १२) आवर्त्तकाः (१४, १२)। पिशिकाः (१४, १४)। कार्मणेयकाः (१४, १५)। ऋषिका जनाः (१४, १५)। मरुचीपट्टनम् (१४, १५) — तु० मछलीपट्टन इति। चेर्यार्यकाः (१४, १५), तु० (पाण्ड्य) — चेरी। बलदेवपट्टनम् (१४, १५)। अरवाः (१४, १७) = अरबदेशीयाः। नारीमुखाः (१४, १७)। मार्गराः (१४, १८)। कर्णप्रावेयाः (१४, १८)। चञ्चूकाः (१४, १८)। शान्तिकाः (१४, २०)। वोक्काणाः (१४, २०; १६, ३४)। तारक्षितिः (१४, २१)। हलडाः (१४, २२)। फल्गुलुकाः (१४, २३)। गुलुहाः (१४, २३)। मरुकुच्चाः (१४, २३)। वसातयः (१४, २५; १७, १६)। वाटधानाः (१४, २६; १६, २१)। शरधानाः (१४, २६)। पुष्कलावताः (१४, २६)। कैलावताः (१४, २६)। कण्ठधानाः (१४, २६)। कच्छाराः (१४, २७)। माणहलाः (१४, २७)। कोहलाः (१४, २७)। डामराः (१४, ३०)। कुनटाः (१४, ३०)। गोलाङ्गूलाः (१६, ३)। पाराः (१६, १०)। भासापराः (१६, ११)। समन्त्रिषिकाः (१६, ११) — प्रभृतयः। एवमेव नदीपर्वत-नामान्यपि संदब्धानि तत्र। कस्य ग्रहस्य प्रभावेण के के देशा जनपदा वा प्रभाविताः, वस्तूनि वा प्रभावितानि जायन्त इत्यनूनकं चित्रमुपस्थापितम्। ग्रहगतयो युद्धनिर्णायिकाः, स्वामिग्रहस्य कारणेन संवत्सरस्य शुभाशुभं संपद्यते फलम्। इन्द्रध्वजोत्सवस्य कवित्वपूर्णं वर्णनं द्वाचत्वारिंश-दध्याये विलोकनीयम्। वास्तुविद्या-भूगर्भादिविद्या-प्रासाद-प्रतिमा-गवाश्व-पुरुषलक्षणानि (५२-६७) वर्णितानि। स्त्रीप्रशंसाध्यायः (७३) सुभाषितसंग्रहार्हः। यथा—

रत्नानि विभूषयन्ति योषा भूष्यन्ते वनिता न रत्नकान्त्या।
चेतो वनिता हरन्त्यरत्ना नो रत्नानि विनाङ्गनाङ्गसङ्गम्॥ ७३, २।

ब्राह्मणाः पादतो मेध्या गावो मेध्याश्च पृष्ठतः।
अजाश्वा मुखतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः॥ ७३, ८।

आब्रह्मकीटान्तमिदं निबद्धं
पुंस्त्रीप्रयोगेण जगत् समस्तम्।
व्रीडात्र का यत्र चतुर्मुखत्व-
मीशोऽपि लोभाद् गमितो युवत्याः ॥ ७३, २०।
यत्राकृतिस्तत्र गुणा वसन्ति ॥ ६९, २३।

एतदनन्तरमेकस्मिन् प्रकरणेऽन्तःपुरजीवनवर्णना। तत्र खलु कामसूत्रार्थशास्त्रसादृश्यं दृग्गोचरायते। ततः परं शय्या आस्तरणानि च कथं भवेयुरिति। रत्नानां वर्णनम् (७९-८२) अध्यायेषु। दीपकदन्तधावनवर्णनोत्तरं शाकुनप्रकरणमेकादशाध्यायेषु। विवाहपटलाद्यनन्तरं शास्त्रानुक्रमणीं विरचय्य समापितो ग्रन्थो ग्रन्थकारेण।

प्रयुक्तानि च्छन्दांसि

बृहत्संहितायामुपयोजितानि च्छन्दांसि षष्टिसंख्याकानि साहित्यनदीष्णानामप्याश्चर्याय कल्पन्ते। भट्टोत्पलेन टीकाकृता व्याख्यातानि तानि ग्रहगोचराध्याये नयनगोचरीभवन्ति। ग्रन्थस्यास्योत्तरार्द्धे छन्दोनामसूची विलोकनीया। विन्ध्यादिवर्णनप्रसङ्गे गद्यमपि विद्योतते ग्रन्थकृताम्। एवं तावद् गद्यपद्योभयनिबद्धोऽयं ग्रन्थः।

बृहत्संहिताया भाषा

इह ग्रन्थे प्रयुक्ता संस्कृतभाषा वैलक्षण्यमावहति। शब्दानामर्थविकासः, अन्याभ्यो भाषाभ्यश्च शब्दादानमपि ग्रन्थस्यास्य वैशिष्ट्यम्। पञ्चसिद्धान्तिकायां यत्र संप्रवेशशब्दप्रयोगस्तत्र बृहत्संहितायां संप्रयोगशब्दः (द्र० ३९ पृ०)। द्वितीयाध्यायस्य द्वितीये श्लोके आर्याशब्दो मातृवाचकः। संस्कृतभाषायामार्येति शब्दो नास्ति मातृवाचकः। महाभारते (३, १२, ८७) प्राकृतभाषायां च स दृश्यते पूज्यस्त्रीवाचको न तु मातृवाचकः (द्र० पिशलकृतस्य ग्रामातिकेर प्राकृतस्प्राखेन इत्यभिधस्य ग्रन्थस्य १०६; १४३; १४५ कण्डिकाः)। नाटकेषु श्वश्रूवाचकोऽपि। द्वितीयेऽध्याये (६६ पृ०) अनूकशब्दः प्राग्जन्मवाचकः। अथर्ववेदे (४, १४, ८; ९, १३, २१), शतपथब्राह्मणे (३, ८, ३, २७) ऐतरेयब्राह्मणे (७, १) चानूकशब्दार्थः सास्ना मूत्रवस्तिर्वा 'अनूकं मूत्रवस्तिः स्यात् सास्नेत्येके वदन्ति च' इति। कात्यायनश्रौत्रसूत्रे (१६, ७, २२-२४) कशेरुकेति तदर्थः। सुश्रुते "व्याघर्क्षनकुलानूकैः पैत्तिका नराः स्मृताः" इत्यत्रानूकशब्दः शीलार्थकः। अमरकोशे, अभिधानरत्नमालायाम् (५, ४३), वैजयन्त्याम् (२५०. ५), शाश्वतकोशे (६७३) चानूकशब्दः कुलशीलोभयार्थकः। मेदिनीकोश एवैकलः—'अनूकं तु कुले शीले पुंसि स्याद् गतजन्मनि' इत्यभ्यधात् पुंस्यनूकशब्दं गतजन्मार्थकम्।

राघवकृतनानार्थमञ्जर्यामप्ययमर्थोऽवाप्यत इत्याप्टेमहाशयोऽनवलोकितमेदिनीकोशः। एवं सत्यपि बृहत्संहितागतानूकशब्दो न पुंसि—

"आश्रयभावावलोकननिर्याणगत्यनूकानि" (२ अ०, ४ श्लोकानन्तरं गद्यम्)।

एतदनन्तरवर्तिनि गद्ये 'गणयाग'-शब्दो द्रष्टव्यः। तदर्थस्तु गुह्यकपूजनम् इति। निषेकशब्दार्थो गर्भाधानम्। निष्ठाप्रत्ययान्तस्य निपूर्वकस्य सिच्-धातोरर्थस्तु प्रक्षेपणात्मकः—

जगति प्रसारितमिवालिखितमिव मतौ निषिक्तमिव हृदये। २, ५।

२, ५ श्लोकानन्तरं गद्ये 'मृगचक्रम्' 'श्वचक्रम्' इत्यादिशब्दगतचक्रपदार्थश्चेष्टितमिति। वातचक्रम् इत्यत्र चक्रशब्दार्थो लक्षणम् इति। अत्रैव नीराजनशब्दः। तदर्थस्तु—नीरेण जलेन मन्त्रपूतेनाजनम् = क्षेपणं स्पर्शनमिति। पुष्यस्नानार्थे घृतकम्बलशब्दः। नृपमुकुटार्थे पट्टशब्दः—पट्टपरीक्षा···। चारोदयाः प्रशस्ताः (६, १२) इत्यत्र चारशब्दार्थोऽवस्थितिरिति।

सत्यपि भाषाप्रयोगनैपुण्ये वराहमिहिरेण पादपूर्त्त्यर्थमङ्गीकृताः कतिचन शब्दाः। अथ-शब्दः स्वार्थे (४, २४; ८, १६; १०, ११), अथ-शब्दः पादपूरणे (४, २५; ५, ७४; ८, २६)।

ग्रन्थकारेण सन्नन्तप्रयोगः—त्रिभक्षयिषु-(१६, १) इति, यङन्तप्रयोगाः—पेपीयते, जेगीयते, बोभुज्यत इति, यङ्लुक्प्रयोगश्च—नरिनर्ति (१३, २) इति कृताः। तद्धितान्तप्रयोगाणां तु भूयस्त्वम्।

इह होराजामित्रत्रिकोणकेन्द्रादयो ग्रीकभाषायाः शब्दाः सुस्पष्टाः। एतेषां संस्कृतीकरणप्रयत्नो रोचकः। होरा-पणफर-आपोक्लिम-हिबुक-त्रिकोण-जामित्र-मेषूरण-क्रिय-तावुरि-जितुम-लेय-पाथोन-जुक-कौर्प्य-तौक्षिक-आकोकेरो-हृद्रोगेत्थसि-प्रभृतिशब्दाः सन्ति। क्रान्तिवृत्तम् (राशिचक्रम्) इत्यादयः शब्दा अनुवादमूलकाः। बृहत्संहितायां तु पञ्चधा एव ते शब्दा गृहीताः। बृहज्जातके तु प्रायः सर्वे प्रयुक्ताः।

संक्षेपतो वराहमिहिरज्ञानस्यानन्त्यविषये नास्ति द्वापरत्वम्। तट्टीकाकारो भट्टोत्पलमहाभागोऽप्यसामर्थ्यं व्यक्तीकरोति बृहत्संहितागतविषयवस्तुतत्त्वव्याख्याने "केवलमक्षराणां व्याख्या क्रियते न चास्माकं तथाविधं प्रावीण्यम्" (७६, ४) इति।

विवृतिटीकाकारो भट्टोत्पलः

सुप्रसिद्धोऽयं टीकाकारः कश्मीराभिजनः। खण्डखाद्यटीकाकारेण वरुणेन तु सुस्पष्टमेतस्य कश्मीरीयता साधिता। खण्डखाद्यटीकया सप्तषष्ट्युत्तरपञ्चदशशतशाकीयेन पञ्चाङ्गकौतुकेन च ज्ञायते यद् भट्टोत्पलस्य टीका लब्धप्रचारा कश्मीरेषु। बृहज्जातकटीकायां ८८८ मिते शाके प्रणीतायामनेन तत्प्रणयनकालः ८८८ मितः शाको दर्शितः—

चैत्रमासस्य पञ्चम्यां सितायां गुरुवासरे।
वस्वष्टाष्ट ८८८ मिते शाके कृतेयं विवृतिर्मया ॥

बृहत्संहिताटीकाकालोऽपीत्थमेव लिखितस्तेन—

फाल्गुनस्य द्वितीयायामसितस्य गुरोर्दिने।
वस्वष्टाष्टमिते शाके कृतेयं विवृतिर्मया ॥

अनेन वराहमिहिरस्य यात्राबृहज्जातकलघुजातकबृहत्संहितेति ग्रन्थेषु टीकिता टीका। बृहत्संहितान्ते स्वकीयटीकागौरवं तेन स्वयं वर्णितम्—

आचार्यप्रवरस्य बोधजलधेः पारं तितीर्षुर्जनो
व्यामुह्यन्नभिधेयरत्ननिचयैः काङ्क्षंस्तरीं भ्राम्यति।
इत्येवंविधमाकलय्य करुणामालम्ब्य भट्टोत्पल-
श्चक्रे तत्कृतिसंहिताविवरणं स्थैर्यं प्लवं कीर्तये ॥

वस्तुतः सुपुरातने काले संहिताशाखाविविधविषयज्ञानं भारते वर्षे कियदभूत् ? तज्ज्ञानसंवर्धनं च क्रमशः केन प्रकारेण जातम् ? इत्याद्यैतिह्यबोधनार्थं बृहत्संहितायाः उत्पलटीकाऽनन्योपायः। भट्टोत्पलः प्राचीनग्रन्थशोधकस्तद्वाचनं च सुविस्तृतमिति ज्ञायते तट्टीकया बृहत्संहितायाः। वराहमिहिरलिखिता विषया आधिक्यतः प्राचीनग्रन्थेभ्य गृहीता इति तत्र टीकायां दर्शितं पदे पदे तेन। क्वचित् क्वचिच्च तेन तद्ग्रन्थनामान्यपि समुट्टङ्कितानि। प्रसङ्गतश्च प्रायः सर्वत्र तत्तद्विषयकप्राचीनसंहिताकृतामुद्धृतानि वचनानि। क्वचित्त्वेकस्मिन्नेव विषयेऽष्टाधिकप्राचीनसंहिताकृतां वचनोल्लेखः। सर्वास्ताः संहितास्तदा सुलभा अभूवन्निति सुस्पष्टं विज्ञायते भट्टोत्पलटीकायां तदुद्धरणैः। महामतिना तेन संहिताजातकयोस्तदन्तभेदविषये चानेकपौरुषग्रन्थकारनामानि तद्वचनानि च सादरं गृहीतानि टीकायाम्।

भट्टोत्पलेन ब्रह्मगुप्तकृतखण्डखाद्यटीकापि कृतेति ज्ञायते बृहत्संहिताटीकावचनेन—"खण्डखाद्यकरणेऽस्मदीयवचनम्" इत्यनेन। वराहमिहिरपुत्रस्य पृथुयशसः 'षट्पञ्चाशिका' इति जातकग्रन्थेऽपि लिखिता टीका भट्टोत्पलेन। तस्या एका प्रतिः पूनाकालेजसंग्रहे (सं० ३५५, सन् १८८२-८३) विद्यते। यात्राग्रन्थटीका नोपलभ्यते संप्रति। खण्डखाद्यटीका भूर्जपत्रलिखितैतदीया कश्मीरेष्वूपलब्धा साम्प्रतं डेक्कनकालेजसंग्रहे विद्यते।

भट्टोत्पलकृता मौलिका ग्रन्थाः

अनेन महाभागेन टीकातिरिक्ताः स्वतन्त्रा ग्रन्था अपि लिखिता इति प्रथमाध्याये 'अस्मदीयवचनम्' इत्युक्त्वार्यानिर्देशेन ज्ञायते। गणितस्कन्धमधिकृत्य स्वतन्त्रग्रन्थरचनाऽनु-

मीयते । खण्डखाद्यटीकागतमपि शक्नोति भवितुमुक्तवचनम् । द्विसप्तत्यार्यामितः प्रश्नज्ञाननामकः प्रश्नग्रन्थ एतदीयः । अलबेरुनीमहाशयमतानुसारेण 'राहुन्नाकरणम्' इति 'करणपातः' चेति करणग्रन्थद्वयमप्येतदीयम् । बृहन्मानसग्रन्थटीका टीकिताऽनेन । एकेनैव ग्रन्थकारेण रचितस्य करणद्वयस्यासंभवः । उक्तग्रन्थद्वयस्याभिधेयमपि वैचित्र्यमावहतीतीह बेरुनीमहाशयस्य स्यात् कोऽपि भ्रमः ।

भट्टोत्पलविरचितः श्रूधव' इत्यभिधोऽप्येको ग्रन्थ इति तन्मतम् । इहापि नाम्नि विद्यते काचित् त्रुटिः । तेनास्य ग्रन्थस्य कालादिमानविषये लिखितम् । श्रूधवेत्यभिधाः सन्त्यन्येऽपि ग्रन्था इति तद्व्याहारः । दत्तेन श्रूधवविषयकेण मनाक् परिचयेन ज्ञायते यद् शकुनसंबद्धौ प्रश्नसंबद्धौ वा भवेतां तौ ग्रन्थाविति । भट्टोत्पलकृतो वास्तुविद्याग्रन्थोऽपीत्यवगम्यते तट्टीकया बृहत्संहितायाः—"तथा चास्मदीयवास्तुविद्यायाम्" (५२, ५७) इति ।

भट्टोत्पलीया देशभाषा

बृहत्संहितायाष्टीकायां भट्टोत्पलविरचितायां देशभाषीयाः सन्ति प्रयुक्ताः केचन शब्दाः । तेषामध्ययनेन भट्टोत्पलस्य जनिभूः पार्यते निश्चेतुम् । प्रस्तूयन्ते तथाविधा इह कतिचन शब्दाः—

१. जानुकपिच्छे चतुरङ्गुले च चतुरङ्गुलप्रमाणे कार्ये ये च लोके 'एक्कलके' इति प्रसिद्धे (५७, १७) ।

२. मृदङ्गो वादित्रो मण्डलेति प्रसिद्धः (६७, ९५) ।

३. ष्वेडः सुखशब्दः शोडनिकेति प्रसिद्धा (८५, ३९) ।

४. भृङ्गारवद् विरुवति वाशति । भृङ्गारो दांदानी दमनी (८७, ६) इति भृङ्गारो भृङ्गारी वा झिल्लिकेति मे मतम्, वराहमिहिरेणापि 'निशि द्वयङ्गुलशरीरा' इति स्वीकृतत्वात् ।

बहोः कालादनुपलब्धं ग्रन्थरत्नमिदं दुर्लभग्रन्थपुनर्मुद्रणयोजनायां केन्द्रीयशिक्षामन्त्रणालयस्य साहाय्येन तत्त्वविदां जिज्ञासूनामुपकारततये साम्प्रतं प्राकाश्यं नीयते । तदर्थं केन्द्रीयशिक्षामन्त्रिमहोदयेभ्यः प्रभूतान् धन्यवादान् समर्पयामि । दुर्लभेयं संहिता वाराणसेयसंस्कृतविश्वविद्यालयीयानुसन्धानविभागेन विद्वद्धिताय शोभनतरं प्रकाश्यमानाऽधुना सुलभा संजातेति महतः प्रमोदस्यावसरः —इति निवेदयते

वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी
सावित्री जयन्ती
सं० २०२५,
दि० २७-५-१९६८

बलदेव उपाध्यायः
अनुसन्धानसञ्चालकः

।।श्रीः।।

अवतारिका

[प्रथमसंस्करणस्य]

श्रीवराहमिहिराचार्यप्रणीता काऽपि ज्योतिर्निबन्धना बृहत्संहिता नाम श्रीभट्टोत्पलरचितेन विवरणेन समन्विता द्वितीयवारं प्रकाश्यते। गणित-संहिता-होराभिधानैस्त्रिभिः स्कन्धैराचिताकृतेः किल महतो ज्योतिश्शास्त्रस्य कोऽप्यन्यतमः स्कन्धो भवति संहिता।

गणित-संहिता-होरेति शाखाभिर्विस्तृतस्याऽस्य ज्योतिश्शास्त्रस्य स्वरूपवर्णनमनेकैराचार्यैर्विस्तरतः कृतमस्ति। तत्रैकैकस्कन्धस्य स्वरूपावबोधकं लक्षणं संक्षेपेण निर्दिश्यते। तत्र प्रथमं गणितस्कन्धस्य लक्षणं भास्कराचार्यकृते सिद्धान्तशिरोमणौ मध्यमाधिकारे—

त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमा-
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः॥
(श्लो० ६)

संहितास्कन्धस्य लक्षणं बृहत्संहितायां प्रथमाध्याये ६ श्लोके—

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योंपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।

अग्रे द्वितीयाध्याये "यत्रैते संहितापदार्थाः" इति १७ सूत्राग्रे १८ सूत्रे "दिनकरादीनां ग्रहाणां चाराः" इत्यादिना विस्तरत उक्तं तत्रैवावलोक्यम्।

स्कन्धत्रये सर्वापेक्षया विस्तृतो जातकस्कन्धः। तत्संक्षिप्तं प्रयोजनं सारावलीग्रन्थारम्भे श्रीकल्याणवर्मणोक्तम्—

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम्।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव॥

वस्तुतो होरास्कन्धो जातकं प्रश्नो मुहूर्तो निमित्तमिति चतुर्भिरङ्गैरुपबृंहितोऽस्ति। अस्य विस्तृतवर्णनं बृहत्संहिताया द्वितीयाध्यायस्थ १४ सूत्रे द्रष्टव्यम्।

स्वरूपावलोकनात् स्पष्टं यत् सर्वेषां स्कन्धानां संहितास्कन्धेऽन्तर्भावः। अत एव श्रीवराहमिहिराचार्येण संहितास्कन्धलक्षणनिरूपणे च "तत्कात्स्न्योंप नयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता" इत्युक्तम्। तथा बृहत्संहिताद्वितीयाध्यस्य १६ सूत्रे "संहितापारगश्च दैवचिन्तको

भवति" इत्यपि तस्य पोषकमेव। तस्मादाचार्यमते संहितास्कन्धः सर्वापेक्षया महान्। अत एवानेनाचार्येण स्वकृतिष्वियमन्तिमा कृती रचितेति।

वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः।
होरागतं विस्तरतश्च जन्मयात्राविवाहैः सह पूर्वमुक्तम्॥

(बृ० सं० १ अ० १० श्लो०)

इत्यनेन प्रतीयते। अतोऽस्य स्कन्धस्य महद्वैशिष्ट्यम्।

अस्य चैवंविधस्य ज्योतिर्निबन्धस्य निबन्धा श्रीवराहमिहिराचार्यः। अस्य जन्मादि-विषये स्वकृतबृहज्जातकस्य २६ अध्यायारम्भे—

आदित्यदासतनयस्तदवाप्तबोधः
कापित्थके सवितृलब्धवरप्रसादः।
आवन्तिको मुनिमतान्यवलोक्य सम्यग्
होरां वराहमिहिरो रुचिरां चकार॥ १॥

इत्ययं श्लोकः। तत्र "कापित्थके" इत्यत्र भिन्न-भिन्नपुस्तकेषु भिन्नो भिन्नः पाठः समुपलभ्यते।

के० साम्बशिवशास्त्रिसम्पादिते होराशास्त्रे "कापिष्ठिलः" इति पाठः। अस्य श्रीरुद्र-कृतम् "कापिष्ठिलः कपिष्ठिलगोत्रजात इत्यनेनाभिजन्म सूचितम्" इति व्याख्यानं वर्तते। रुद्रकृतव्याख्यानस्य चतुश्शताब्द्याः प्राचीनत्वं श्री-के० साम्बशिवशास्त्रिणा स्वकृतहोराशास्त्रा-वतारिकायां साधितमस्ति।

मोहमय्यां खेमराजश्रीकृष्णदासमुद्रणालये मुद्रिते भट्टोत्पलकृतव्याख्यासहिते बृहज्जातके "कापित्थके" इति पाठो वर्तते। अस्य भट्टोत्पलकृतं व्याख्यानं यथा—

"कापित्थाख्ये ग्रामे योऽसौ भगवान् सविता सूर्यस्तस्माल्लब्धः प्राप्तो वरः प्रसादो येन।"

गणकतरङ्गिण्यां श्रीसुधाकरद्विवेदिभिः "काम्पिल्लके" इति पाठः संगृहीतः। एवञ्चास्य विवरणे "कालपीनगरे" इत्यर्थः स्वीकृतः।

शङ्करबालकृष्णकृते भारतीयज्यौतिषेऽपि "कापित्थके" इति पाठः संदृश्यते। अस्य मते कापित्थको ग्रामविशेष आसीत्।

प्राचीन-ग्रीक-भौगोलिक-एरियान इत्यनेन "क्याम्बिस्थली" इति शब्दप्रयोगमङ्गीकृत्य तत्स्थानं च पञ्जाबप्रान्तान्तर्गतकुरुक्षेत्रस्य मध्यगतमस्तीति निश्चितम्। वर्तमानकाले तस्य नाम "कइथल" इति वर्तते।

कपिष्ठिलस्येदं कापिष्ठिलम्, वा कपिष्ठलस्येदं कापिष्ठलमिति गोत्रपरकः शब्दः।

(स्कान्दे नागरखण्डे १०८।२२)

इत्येवं कापित्थके, काम्पिल्लके, कापिष्ठिल इति विभिन्नपाठाः समुपलभ्यन्ते। तत्र कापित्थके, काम्पिल्लके इति पाठाभ्यां स्थानविशेषस्य संकेतः। इदं स्थानं कुत्र इति केनापि टीकाकारेण न स्पष्टीकृतम्। यत्तु "प्राचीन-ग्रीक-भौगोलिक-एरियान" इत्येन यस्य स्थानस्य संकेतः कृतः स त्वरुचिकरः। वराहमिहिरस्य तत्र गत्वा सूर्योपासना असंभाविनी। यतो हि तस्मिन् ग्रामे अञ्जनामन्दिरं प्रसिद्धमस्ति, न तु सूर्यमन्दिरम्। एवं केवलं सूर्योपासनार्थमेव तत्र गमनं न महत्त्वमावहति, विशिष्टतीर्थस्थानाभावात्। यद्युक्तशब्देन स्थानमेवाभीष्टं तदा तत्स्थानमुज्जयिनीसमीप एव भवितुमर्हति। एवञ्चोक्तशब्दो गोत्रपरको गृह्यते ? तदा विवाद एव नास्ति। प्राचीनकाले स्वपरिचयप्रदानावसरे द्विजाः स्वगोत्रोच्चारपूर्वकं नाम गृह्णन्ति स्म। अतो वराहमिहिराचार्योक्तश्लोके कापिष्ठिल इति पाठो गोत्रपरिचायकः साधु प्रतिभाति। स्कन्धपुराणे नागरखण्डे १०८।२२ अस्य गोत्रस्य प्रसङ्गः समायाति। अतो मद्दृष्ट्या कापिष्ठिल इति गोत्रबोधकः पूर्वटीकाकारस्वीकृतः पाठः समुचितः।

जन्मस्थानम्

आचार्येण स्वजन्मस्थानविषये किमपि नोक्तम्। बृहज्जातकोपसंहाराध्यायस्थे "आदित्यदासतनय" इत्यादिश्लोके 'आवन्तिक' इति विशेषणं वर्तते। तेन बहवो विद्वांसोऽस्य जन्मभूमिः 'उज्जयिनी' इति वदन्ति। परम् 'आवन्तिक' विशेषणस्य तत्र जातस्तथा च सोऽस्य देश इति व्युत्पत्त्या उज्जयिन्युद्भव इत्येवार्थं कर्तुं न शक्यते। अतोऽस्य जन्मस्थानविषये विवाद एव वर्तते। भट्टोत्पलेन बृहत्संहिताया आरम्भश्लोकावतरणिकायाम् "तदयमप्यावन्तिकाचार्यमगधद्विजवराहमिहिरोऽर्कलब्धवरप्रसादो" इत्युक्तम्। एतदन्यच्च दृष्ट्वा म० म० श्रीसुधाकरद्विवेदेन गणकतरङ्गिण्यां वराहमिहिरवृत्तालोचने जन्मभूमिविषयेऽनेकमतान्युपन्यस्तानि। मम मते तु 'आवन्तिकः' इति विशेषणोपादानादनेनोज्जयिन्यस्य जन्मभूमिरासीत्। यथाऽऽर्यभटोक्ते—

ब्रह्मकुशशिबुधभृगुरविकुजगुरुकोणभगणान् नमस्कृत्य।
आर्यभट्टस्त्विह निगदति कुसुमपुरेऽभ्यर्चितं ज्ञानम्॥

इत्यस्मिन् पद्ये 'कुसुमपुरे' इति शब्दप्रयोगेणार्यभटस्य जन्मभूरपि कुसुमपुरमेव विद्वद्भिः स्वीकृतम्। तथैव वराहमिहिरस्यापि जन्मभूरुज्जयिनी भवेत्। केवलमत्र भट्टोत्पलकृतमगधशब्दप्रयोगो भ्रान्तिमुत्पादयति। वराहमिहिरात् पादोनपञ्चशतकासन्नकालादनन्तरं जातस्य

भट्टोत्पलस्याप्याचार्यजन्मविषये कदाचिदज्ञानं भवेत्। आचार्यस्य पूर्वजा मगधदेशादागत्य उज्जयिन्यां कृतनिवासा भवेयुः, येन भट्टोत्पलेन मगधद्विज इति विशेषणं प्रयुक्तम्। परमाचार्यस्य मगधद्विजत्वेऽभिमानो नासीत्। तेनास्य मगधद्विजत्वं विवादास्पदमेव।

जन्मकालः

जन्मकालनिर्णयेऽपि विदुषां विवाद एव। यतो हि पञ्चसिद्धान्तिकायां गणितारम्भार्थं ४२७ शको गृहीतः। तद्वाक्यं यथा—

सप्ताश्विवेदसंख्यं शककालमपास्य चैत्रशुक्लादौ।
अर्धास्तमिते भानौ यवनपुरे सौम्यदिवसाद्ये॥

(प० सि० १ अ० ८ श्लो०)

एवञ्चास्य मृत्युविषये प्रचलितमामराजोक्तम "नवाधिकपञ्चशतसङ्ख्यशाके वराहमिहिराचार्यो दिवं गतः" इतीदं वाक्यम्। पुनश्च पञ्चसिद्धान्तिकायामार्यभटोल्लेखादार्यभटादनन्तरं ५०९ शकात् प्रागेवास्य जन्मादिकालः। तदर्थं विशेषविवेचनं भारतीयज्यौतिष-गणकतरङ्गिण्यादिग्रन्थेष्ववलोक्यम्। इतिहासकारैः ४१२ शकासन्नकालोऽस्य निर्धारितः। स युक्तियुक्तः प्रतिभाति।

जनको गुरुश्च

अस्य जनक आदित्यदासः। स एव गुरुरप्यासीदित्याचार्योक्तपरिचयश्लोकेन स्पष्टम्। पितुरन्योऽपि गुरुरासीदिति—

दिनकरवशिष्ठपूर्वान् विविधमुनीन् भावतः प्रणम्यादौ।
जनकं गुरुञ्च शास्त्रे येनास्मिन् नः कृतो बोधः॥

(प० सि० १ अ० १ आर्या०)

अनेन पद्येन प्रतीयते।

ग्रन्थाः

१. पञ्चसिद्धान्तिका, २. बृहज्जातकः, ३. लघुजातकः, ४. योगयात्रा, ५. विवाहपटलः, ६. बृहत्संहिता, ७. समाससंहिता, ८. जातकार्णवः, ९. विवाहखण्डः, १०. ढिकनिकयात्रा, ११. ग्रहणमण्डलफलम्, १२. पञ्चपक्षी, १३. दिक्किनीयात्रा। श्रीशङ्करबालकृष्णदीक्षितेन 'भारतीयज्यौतिषे' वराहस्य "पञ्चसिद्धान्तिका" एव करणग्रन्थ इति यन्मतमुपन्यस्तम्, तज्जातकार्णवदर्शनेनापास्तं भवति। वराहस्य पञ्चसिद्धान्तिकातिरिक्तः करणग्रन्थो जातकार्णवो नेपालदेशीयकाठमाण्डूस्थवीरपुस्तकालये वर्तते।

रुद्रकृतविवरणोपेतं होराशास्त्रमेव बृहज्जातकम्। अस्य प्रचारो विशेषतया वर्तते। फलवेत्तार एनं सादरं स्वीकुर्वन्ति। बृहज्जातकस्य लघुस्वरूपं लघुजातकम्।

यात्राविचारप्रमुखो योगयात्राग्रन्थो मुद्रितो लभ्यते। राज्ञां यात्राविषये विस्तरतो विचारोऽस्मिन् ग्रन्थे वर्तते।

विवाहपटलो वराहप्रणीतः प्रसिद्धः। यथा नाम तथा वस्तुनिर्देशोऽस्मिन् पुस्तके वर्तते। परमेतन्नामको ग्रन्थोऽपराचार्येण पीताम्बरेण प्रणीत इति वाराणसेयसंस्कृतविश्वविद्यालयीय-सरस्वतीभवनपुस्तकालये वर्तत इति तद्धस्तलिखितपुस्तकानां सूचीदर्शनेन प्रतीयते। विवाह-खण्डेति वराहप्रणीतं पुस्तकं नेपालदेशीयकाठमाण्डूनगरे वीरपुस्तकालये वर्तते। परमस्या-रम्भोपक्रमदर्शनेन वराहप्रणीतत्वे संदेहो जायते। पुस्तकारम्भो यथा—

"ॐ नमः सूर्याय

विशुद्धनक्षत्रविलग्नमार्याः प्राहुस्तदैवेष्टफलं यतोऽतः।
निगद्यतेऽनेकविधा मयाद्यौ तानद्धशुद्धिः शुभकर्ममुख्या॥
बहुवाचालतां लग्नप्रविष्टां चागमाम्बुधेः।
शिष्यश्रीबालदेवस्य भालदेवमलीलिखेत्॥"

अत्र प्रथमश्लोकानन्तरं यत्पद्यार्धं गद्यं वा तद्विचारणीयं वर्तते। अस्यैव ग्रन्थस्यान्तिमं वाक्यम्—

समावर्तनकर्माणि प्रशस्यन्ते द्विजातिषु।
वृषलग्ने शुभे दृष्टे विप्राणां पदकर्मणि॥

इति बटुकेशविधिः समाप्तः।

१०. ढिकनिकयात्रापुस्तकं नेपालदेशीयकाठमाण्डूनगरे नेपालराष्ट्रियपुस्तकालये वर्तते। मुहूर्तविषयकं पुस्तकमेतत्।

११. पञ्चपक्षी—एतत्पुस्तकमपि नेपाले काठमाण्डूनगरे राष्ट्रियपुस्तकालये तथा वाराणसेय-संस्कृत विश्वविद्यालयीयसरस्वतीभवने वर्तते। परं तत्र मङ्गलाचरणमेतत्—

"ॐ परमात्मने नमः

अभिगम्य महादेवं सर्वशास्त्रविशारदम्।
भविष्यदर्थबोधाय पञ्चपक्षी प्रकाश्यते॥
अनेन शास्त्रसारेण लोके कालत्रयं प्रति।
बलाबलानि दृश्यन्ते सर्वकार्येषु निश्चितम्॥

तथा चान्तिमं वाक्यम्—

ग्रन्थास्तावद्विराजन्ते यावन्नोदेति भास्वती।
पञ्चपक्षिस्तूदिते तु न ग्रन्था न च भास्वती॥

इति पञ्चपक्षी साकुलं समाप्तम्।"

अत्राद्यन्तश्लोकदर्शनेन पुस्तकमेतद्वराहमिहिरकृतं नास्तीति प्रतीयते। मङ्गलाचरणे यथा सर्वग्रन्थारम्भे सूर्यवन्दना वर्तते, तथाऽत्र नास्ति। एवञ्चान्तिमं पद्यं यद्यप्यशुद्धम्, तथापि तत्र भास्वतीग्रन्थस्य प्रशंसा वर्तते। भास्वतीकर्ता शतानन्दः १०२१ शके भास्वतीकरणं वराहमिहिरस्वीकृतसूर्यसिद्धान्तसम्मतं व्यलिखत्। तेन पञ्चपक्षिपुस्तकं १०२१ शककालादनन्तरं जातमिति प्रतीयते। पुस्तकमेतद्वराहविषये भ्रान्तिमुत्पादयति। यथा कालिदासा बहवो जातास्तथैव बराहा अपि बहवः संजाता इति वितर्कावसरः समुदेति। यथा प्रसिद्धकालिदासेन विशिष्टं काव्यं रचितम्, तथैव प्रसिद्धेन वराहमिहिरेण प्रसिद्धाः पञ्चसिद्धान्तिकादयो ग्रन्था निबद्धाः। अन्यानि लघुपुस्तकानि केनचिदन्येन वराहेण ग्रथितानीत्यनुमितिर्जायते।

वाराणसेयसंस्कृतविश्वविद्यालयीयसरस्वतीभवनेऽस्यानेकाः प्रतयः सन्ति। तत्र मङ्गलाचरणं तथाऽन्तिमं पद्यं भिन्नं भिन्नमस्ति। तद्यथा प्रारम्भे—

"नमस्कृत्य महादेवं गुरुं शास्त्रं विशारदम्।
भविष्यदर्थबोधाय वक्ष्येऽहं पञ्चपक्षिणम्॥

अन्ते—

वाराहमिहिरेणोक्तं सद्यः प्रत्ययकारकम्।
स्वशंसात्कठिनं भित्वा स्वामासेन स्वशक्तितः॥

अन्यपुस्तकस्य प्रारम्भे—

नमस्कृत्य हरिं देवं सर्वशास्त्रविशारदम्।
भविष्यदर्थबोधाय वक्ष्यन्ते पञ्चपक्षिणः॥

अन्ते—

.....

अन्यत्र च प्रारम्भे—

प्रणम्य श्रीमहादेवं सर्वशास्त्रविशारदम्।
भविष्यदर्थबोधाय पप्रच्छुर्मुनयो मुदा॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः।

अन्ते—

इति मुनिगणसंतोषार्थं श्रीशिवविरचितं पञ्चपक्षिशकुनं समाप्तम् ।"

इत्येवमेतत्पुस्तकं वराहमिहिराचार्यविषयेऽनेकशः संशयमुत्पादयति । एतदर्थमनुसन्धातारो विचारयन्तु ।

१२. ग्रहणमण्डलफलम् । एकपत्रात्मकं लघुपुस्तकं वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवने वर्तते ।

तत्र प्रारम्भे—

"भूकम्पश्चाति निर्घातोल्कापातो भवेद्यदि ।
ग्रहणं चन्द्रसूर्यस्य धूमकेतोश्च दर्शनम् ॥

अन्ते—

आग्नेयं चाष्टभिर्मासैर्वायव्यं च त्रिमासिकम् ।
वारुणं मासमेकेन माहेन्द्रं सप्तमासिकम् ॥

इति वाराहमिहिरकृते ग्रहणमण्डलफलम् ।"

अस्य भाषाद्दष्ट्या पुस्तकमेतदाचार्यप्रणीतमस्ति न वेति संशयो जायते ।

१३. दिक्किनीयात्रा—इदं पुस्तकं नेपाले वीरपुस्तकालये वर्तते । तत्राद्यन्तस्थलानि अशुद्धानि सन्ति । यात्राविषयको ग्रन्थः । ढिकनिकयात्रापुस्तकतो भिन्नं पुस्तकमेतत् ।

बृहत्संहिता समाससंहितेति संहिताद्वयस्योल्लेख इतिहासविद्भिः कृतो दृश्यते । परं समाससंहिता मुद्रिताऽमुद्रिता वा न दृष्टिपथं समायाता । इतिवृत्तविदां मतं यत्समाससंहिता बृहज्जातकस्य लघुजातकमिव बृहत्संहिताया लघुस्वरूपं भवेदिति । बृहत्संहिता अनेकस्थलात् मुद्रितोपलभ्यते । तद्यथा—

१. श्रीभट्टकर्ण (डॉ. कर्ण) परिशोधिता तत्कृताङ्गलानुवादसहिता च कलिकातानगरे प्रकाशिता ।

२. म० म० श्रीसुधाकरद्विवेदद्वारा संपादिता भट्टोत्पलकृतविवृतिसहिता काश्यां प्रकाशिता ।

३. मोहमयीस्थ(बॉम्बे)खेमराजश्रीकृष्णदासमुद्रणालयतो हिन्दीभाषासहिता प्रकाशिता वर्तते ।

४. वी० सुब्रह्मण्यशास्त्रिकृताङ्गलभाषानुवादसहिता बेङ्गलोरनगरतः प्रकाशिता ।

५. रत्नागिरेर्जगन्मित्रमुद्रणालये मराठीभाषानुवादालङ्कृतमूलपाठयुक्ता मुद्रिता आसीदिति 'भारतीयज्यौतिष' ग्रन्थाद् ज्ञायते ।

६. अस्या अन्तिमं संस्करणं काशिकचौखम्भासिरीजमुद्रणालयात् हिन्दीभाषानुवाद-सहितमधुनोपलभ्यते ।

इत्येवं बृहत्संहिताया भट्टोत्पलेन या टीका कृता तदतिरिक्ता अन्या काचित्प्राचीना टीका नोपलभ्यते ।

महत्सौभाग्यस्यावसरो यद्भट्टोत्पल्लटीकासमलङ्कृताया बृहत्संहिताया वाराणसेयसंस्कृत-विश्वविद्यालयतः पुनः प्रकाशनं जायमानं वर्तते ।

बृहत्संहिता

अयं ग्रन्थः १०६ अध्यायात्मको वर्तते । इयं संख्या श्रीसुधाकरद्विवेदसम्पादिते ग्रन्थे । कस्मिंश्चित्पुस्तके १०७ अध्यायाः सन्ति । तत्र वी० सुब्रह्मण्यशास्त्रिणां मत आचार्य-प्रणीताः १०० अध्याया एव सन्ति । अन्ये सप्त अध्यायाः प्रक्षिप्ताः सन्ति ।

एषां मते (१) वातचक्रम् , (२) रजोलक्षणम् (३) अङ्गविद्या, (४) पिटकाध्यायः, (५) विवाहपटलः, (६) नक्षत्रजातकम् (७) शास्त्रानुक्रमणी इत्येतेऽध्याया आचार्यप्रणीता न सन्ति । परमेषामाचार्यप्रणयनाभावे किमपि सबलं कारणं नो दर्शितम् ।

प्रभावः

वराहमिहिराचार्यकाले संहितापदार्था विशेषतो लोके प्रचलिता आसन् । आचार्येण स्वयं बृहत्संहितायाः प्रथमाध्यायस्य द्वितीयश्लोके—

प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।
नाति लघु विपुलं रचनाभिरुद्यतः स्पष्टमभिधातुम् ॥

इत्युक्तम् । अत इयं बृहत्संहिता पूर्वप्रचलितविषयानेव सारल्येन संक्षेपेण च प्रकट-यति । अस्याः प्राक्काले गर्गसंहिता, काश्यपसंहिता, नारदसंहितेत्यादिसंहिता आर्षा आसन् । यासां मध्ये बह्वीनां संहितानां तत्र तत्र प्रमाणान्युत्पलेन संगृहीतानि । एवमाचार्येण तत्त-त्संहिताकारमुनेरुल्लेखो मूले कृतो दृश्यते । प्राचीना गर्गसंहिता-मनुसंहिताद्याः १८ संहिता आसन् । अतोऽस्याः संहितायाः प्रणयने प्राक्तनीनां संहितानां प्रभावोऽत्रावलोक्यते ।

एकमपरमपि पुस्तकं दृष्टिपथं समागतं शार्दूलकर्णावदानमिति । एतद्भगवतो बुद्धस्य मातङ्गदारिकां प्रत्युपदेशसूत्ररूपमस्ति । अस्य पुस्तकस्य चीनीतिब्बत्यादिभाषास्वप्यनुवादः सञ्जातः । चीनीभाषायामनुवाद ई०सन् १७० समये जात इति सुजितकुमारमुखोपाध्यायसम्पादित शार्दूलकर्णावदानस्य भूमिकादर्शनेन प्रतीयते । अत एतत्पुस्तकं बृहत्संहितारचनातः पूर्वरचना वर्तते । अस्मिन् भूकम्पनिर्देशः, तिलकाध्यायः, नक्षत्रजन्मगुणः, उत्पातचक्रनिर्देशः, पिटकाध्यायः,

स्वप्नाध्यायः, मासपरीक्षा, खञ्जरीटकज्ञानम्, शिवारुतम्, पाणिलेखा, वायसरुतम्, द्वारलक्षणम्, वस्त्राध्यायः, लुङ्गाध्यायः, धूमिकाध्यायः, इत्यादयो संहितापदार्था अन्ये च विभिन्नविषयाः समुपवर्णिता अवलोक्यन्ते ।

काश्यपसंहितायां तु बृहत्संहितायां वर्णिताः प्रायः सर्वे विषयाः सन्निवेशिताः सन्ति । इत्येवं बृहत्संहितायां संहितापदार्थानां विकसितस्वरूपं कालक्रमागतमिति स्पष्टमेव । तत्र आचार्यस्य प्रागल्भ्याल्लेखनशैलीप्रौढ्या च सिद्धान्तेषु भास्कराचार्यस्येव, एवञ्च करणग्रन्थकारेषु गणेशदैवज्ञस्येव प्रतिभावैशिष्ट्याल्लोके यशः प्रसृतम् ।

आचार्यस्य कालिदासकाव्येन वा कालिदासकविना सह विशिष्टसम्बन्ध आसीदिति वी० सुब्रह्मण्यशास्त्रिणा बृहत्संहितायाः स्वकृताङ्गलानुवादभूमिकायामङ्गीकृतम् । एतदर्थं कालिदासप्रयुक्तसूक्तीनामुल्लेख आचार्येण बृहत्संहितायां विहित इति काश्चिदुक्तय उद्ध्रियन्ते—

यत्राकृतिस्तत्र गुणा वसन्ति (अ० ७०-२३) ।

प्रायः शरीराकारानुवर्तिनो हि गुणा दोषाश्च भवन्ति (अ० २–२) ।

ते दुर्जना मे मनसो वितर्कः (अ० ७३-५) ।

यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा (अ० ७४–३) ।

इत्यादयः प्रसङ्गाः सन्ति । अतो बहूनामिदं मतं यत्कालिदासवराहमिहिरौ समकालिकौ स्तः । तदर्थम् :—

धन्वतरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥

इति ज्योतिर्विदाभरणोक्तं पद्यमपि कौतुकमुत्पादयति । भवतु नामैतत् । पद्यानां लालित्यदृष्ट्या आचार्यस्य पद्यबन्धः कालिदासं स्मारयत्येव ।

विषयोपन्यासो वैदग्ध्यपूर्णः क्रमिकश्च । भाषा च सरला प्रासादिकी च । संहितालक्षणानुसारं सर्वे संहिताविषया अत्र साकल्येनावलोक्यन्ते । अर्थाद्ये लक्षणगुणास्ते सर्वेऽत्र संकलिताः सन्ति । अतोऽस्या लोके महानादरः परिलक्ष्यते ।

अत्र संहितायां केचनाध्याया अन्यप्राचीनग्रन्थेभ्यः संगृहीता इति केषाञ्चिद्विदुषां मतम् । यथा दकार्गलाध्यायो मनुसंहितातः संगृहीतः ।

एवञ्चात्र संहितायां ये सैद्धान्तिका विषया निबद्धास्ते स्वयं परीक्षिता न सन्तीति प्रतीयते । यथा "आसन्मघासु मुनयः" इत्यादिपद्ये सप्तर्षीणामाकाशे स्थितिर्वर्णिता । तस्याः

स्थितेः स्वग्रन्थरचनाकाले स्वयं परीक्षणं कृतञ्चेत्तदा साधूपकृतं भवेत्। यतो हि सप्तर्षीणां गति-विषये स्थितिविषये चाधुना गणितेन पूर्ववर्णितस्थितौ संदेहो जायते। एवमेवागस्त्यचारोऽपि परम्पराविधिनैव वर्णितः। अतोऽयमाचार्यो गणितादिविषयान् क्रियारूपेण न परीक्षितवानिति तत्तत्स्थलनिरीक्षणेन प्रतीयते। आचार्यस्य बृहत्संहितानन्तरं तादृशसंहिताग्रन्थो न प्रादुर्भूतः। श्रीबल्लालसेनविरचितोऽद्भुतसागरस्तथारूपः, तथापि सा प्रतिष्ठा तस्य नास्ति।

एतत्तु सत्यमेव यज्जातकशास्त्रस्य परम्पराप्रवर्तकोऽयमेव प्रथम आचार्यः। आर्षग्रन्था लभ्यन्ते। परमाचार्यप्रणीता जातकग्रन्थास्तु वराहमिहिरस्य प्राथम्यं लभन्ते। तदनन्तर-मस्या शाखाया विस्तारः समजनि। एतदपि वक्तुमुचितं यद् वराहमिहिरादन्यः कोऽप्याचार्य-स्त्रिस्कन्धज्योतिर्विद्याकुशलो ग्रन्थप्रणेता नासीत्। अतोऽस्य ज्यौतिषशास्त्रस्य आचार्येषु प्रामुख्यमस्ति।

बृहत्संहिताया हस्तलिखिताः प्रतयो देशस्य सर्वसंस्कृतशास्त्रीयपुस्तकालयेषु वर्तन्ते इत्येतदस्या वैशिष्ट्यं लोकप्रियत्वञ्च द्योतयति। एका प्रतिर्नेपाले काठमाण्डूनगरे वीरपुस्तकालये वर्तते। तस्या लिपिकालविषये "संवत् ६५८ श्रावणशुक्लषष्ठ्यां तिथौ स्वातीनक्षत्रे बृहस्पति-वासरे लिखितं सम्पूर्णम्। श्रीभक्तपत्तने श्रीश्रीजयप्राणमल्लदेवस्य स्वभुज्यराज्ये लिखितमिदं शास्त्रं वराहसंहिता दैवज्ञजयकीर्त्तराजेन स्वार्थमिति शुभमस्तु।" इयं शब्दावलिराश्चर्यमुत्पाद-यति। संवत् ६५८ काले नेपालेऽस्याः प्रतिलिपिः संजाता। तदाऽस्या अस्माद्देशात्तद्देशे प्रचारार्थं कालोऽपेक्षते। तदर्थं यदि १०० वर्षाणि संरक्ष्यन्ते तदाऽपि पूर्वनिर्दिष्टो जन्मकालः संभावनाकोटिमारोहति।

अस्याः पुनः प्रकाशनेन ज्योतिर्विद्याजिज्ञासूनां लोकस्य च महानुपकारो भविष्यति।

वाराणसेयसंस्कृतविश्वविद्यालयः,
वाराणसी
वसन्तपञ्चमी
संवत् २०२४
दि० २२-१-६८

विदुषामाश्रवः
अवधविहारी त्रिपाठी
ज्योतिषविभागाध्यक्षः

PREFACE

* Varâhamihira's admirable production, the Bṛihat Samhitâ, has long been studied and appreciated as a complete system of natural astrology and is still considered as most elaborate and scientific in its treatment.

Dr. Kern's edition of 1864 first introduced it to the Sanskrit scholars of Europe, who have held it in high esteem.

Bhaṭṭotpala's † Vivṛitti is familiar to every student of Varâhamihira as the most elaborate and helpful commentary. But manuscripts of this work are so generally imperfect and incorrect that the task of editing them is by no means easy.‡

Dr. G. Thibaut, Ph. D., (Principal, Muir Central College, Allahabad, and Superintendent, Sanskrit Studies, N. W. P. and Oudh,) collected six manuscripts of this commentary.

---

* See for his life, "Lives of Hindu Astronomers" compiled by me, p. II.

† See "Lives of Hindu Astronomers," p. 21.

‡ "The commentary on the Bṛihat Samhitâ would be well worthy of being separately edited; unhappily, it is rather bulky, containing the substance of somewhat more than twenty thousand Ślokas, and a still greater barrier to such an undertaking is offered by the horrible state of all codices." (Preface to the Bṛihat Samhitâ, edited by Dr. H. Kern, p. 62).

"I am sorry to say that the copies of Utpala's commentary are in such a condition that I have often been obliged to recur to conjectures, most of them, however, being obvious. The uncertainty about the true reading materially affects the translation; and the want of any explanation on the part of Utpala does so in a no less degree. At the same time, I am of opinion, the greater or less degree of correctness of the extracts by no means renders them less important for the purpose of comparing them with the complete works ascribed to the renowned Indian Mathematicians and Astronomers."

(On some fragments of Âryabhata, by Dr. H. Kern printed in the Journal of the Royal Asiatic Society, p. 4).

The first—copied from Râkhan Lal's MS. from Muttra, purchased by P. Dhuṇḍhirâja Śâstri, late Librarian, Sanskrit College, Benares. The second—a fragment up to Utpâta-Lakshana, bought by Dr. G. Thibaut through me. The third—purchased by me for the Sanskrit College Library. The fourth—belonging to Pt. Vâmanâchârya of Benares, borrowed by me for Dr. G. Thibaut. The fifth—purchased by Dr. G. Thibaut for the Sanskrit College Library in Allahabad. The sixth—an incomplete and useless copy supplied by Pt. Vindhyesvarî Prasâda Dvivedi, Librarian, Sanskrit College, Benares.

All these copies were found to be full of mistakes, and Dr. G. Thibaut asked me to make out the correct original reading by comparing them all with one another.

I accordingly availed myself of another copy belonging to Kṛishna Joshi, one of my pupils and diligently applied myself to the work, the first fifty-one chapters of which are now laid before the pudlic.

I have taken care to add important differences in reading as foot notes; and although emending to the best of my powers I am still doubtful as to the prose quotations from Parâśara, where the names of countries &c. occur; therefore suggestions in regard to these will be thankfully accepted. Out of the 7 MSS. I have made use of the first five and the seventh are denoted by "प्र" "अ" "क" "ग" "घ" and "व" respectively; and the 6th being too replete with errors, no notice has been taken of it.

Further I have added an index to help the readers to refer the quotations from different authors.

Other particulars regarding the present edition will be given in an appendix at the end of the work.

In conclusion, I shall consider my labour amply rewarded if this edition is deemed acceptable to the public to whom I venture to present it.

SUDHĀKARA DVIVEDĪ.

श्रीजानकीवल्लभो विजयते

भूमिका



जयति सहितशेषोऽशेषलीलाविशेषो
जनकवचनधीरः सत्यसङ्कल्पवीरः।
सकलनिजजनानां शर्मदः सज्जनानां
दशरथनृपबालः कोशलेन्द्रो नृपालः॥

अस्तीयं भारतवर्षे त्रिस्कन्धज्योतिर्विद्यावेदिनां मध्ये गुरुपरम्पराप्रथिता सद्गणकगणप्रशंसिता सकलसंहितालक्षणोपेता विविधविधानभूषिता प्रशस्तपुरुषादिलक्षणमण्डिता [1]वराहमिहिरकृता बृहत्संहिता नाम। यूरपदेशेऽपीयं डाक्टरकर्ण (Dr. H. Kern) मुद्रणकालात (सन् १८६४ ई०) विशेषतो यूरपदेशीयसंस्कृतविद्याविनोदिनां विदुषां प्रसिद्धा जाता। अथैतस्याः संहितायाः प्राचीनाचार्यवचननिचयनिचिता चतुरविद्वज्जनमनोविनोददायिनां सदर्थविचारचातुरीप्रपञ्चसहायिनी सद्भारते भारते चिरात् प्रसिद्धा [2]भट्टोत्पलविरचिता संहिताविवृतिनाम्नी टीका च। चिरकालाल्लेखकाध्यापकाध्येतृदोषैरतीव दुर्दशामापन्ना सम्प्रति सेयं विवृतिर्नष्टभ्रष्टास्पष्टकष्टदायिभिर्दुष्टविवर्णपाठपरम्परासमुदायैः।

अथैतस्याष्टीकायाः श्रीडाक्टरथिबो(Dr. G. Thibaut, Ph. D., Principal, Muir Central College, Allahabad.)महाशयैः काशिकराजकीयप्रधानसंस्कृतपाठशालासरस्वतीभवने स्थापनार्थं श्रीढुण्ढिराजशास्त्रिद्वारा सम्पादितं मथुरानगरीयश्रीराखनलालपुस्तकस्य प्रत्यन्तरमेकं मत्साहाय्येन निजार्थं क्रीतमुत्पातलक्षणाध्यायस्य ५७ श्लोकपर्यन्तं द्वितीयं विद्यामन्दिरे स्थापनार्थं मत्क्रीतं तृतीयं मदुद्योगेनानीतं श्रीमत्पण्डितवरवामनाचार्यस्य पुस्तकं चतुर्थं तत्रैव पुस्तकालये स्थापनार्थं प्रयागे क्रीतं पञ्चमं सम्प्रति पुस्तकालयाध्यक्षश्रीपण्डितविन्ध्येश्वरीप्रसादद्विवेदिना दत्तं खण्डितमनुपयुक्तं षष्ठं च पुस्तकं सङ्गृह्यैतेषु सर्वेषूपलब्धपुस्तकेषु च प्रतिपङ्क्त्यशुद्धसमुदायं संवीक्ष्य तच्छोधनं च दुरवगममवगम्य संशोधनार्थं मह्यं तानि समर्पितानि। मयाऽत्मच्छात्रश्रीकृष्णजोशीतो लब्धं खण्डितं पञ्चाशदध्यायपर्यन्तमपरं

---

१. वराहमिहिरविषये द्रष्टव्या मद्विरचिता गणकतरङ्गिणी, पृ० ११।

२. भट्टोत्पलविषये द्रष्टव्या मन्निर्मिता गणकतरङ्गिणी, पृ० २१।

सप्तमं पुस्तकं च समासाद्य बहुनाऽऽयासेन तेभ्यो विवर्णान् स्खलितान् पाठान् संशोध्य पाठशालाध्यक्षश्रीवेनिस्(A. Venis, M. A., Principal, Sanskrit College, Benares.) महाशयानुकम्पया विजयनगरसंस्कृतसीरिजनाम्नि प्रबन्धे मुद्रापितुमारब्धेयं विवृतिर्यस्याश्चायमाद्यत एकपञ्चाशदध्यायात्मकः पूर्वभागोऽद्य प्रकाश्यते। एतस्या एकस्यैवाध्यायस्य संशोधने यावान् परिश्रमस्तद्दशमांशेनैव श्रमेण सुखेन मया समग्रबृहत्संहिताया नूत्ना सुटीका कर्त्तुं शक्यते—इति सर्वं सदसद्विवेकिनां सहृदयानां विदुषामग्रे ह्युपलब्धप्राचीनपुस्तकस्थदुष्टभ्रष्टपाठानां तथा मच्छोधितपाठानां चावलोकनेन स्फुटमेवेत्यात्मप्रशंसाप्रयासेनालमिति। अत्र बहूपयुक्तानि प्राचीनानां बहूनि वचनानि प्राचीनमतसूचकानि सन्ति, येषु यावच्छक्यमुपलब्धग्रन्थान्तराद्यवलोकनेन पाठभेदादिनिश्चयश्च टिप्पण्यां प्रदर्शितः। अत्र यद्यपि बहुनायासेन सावधानतया च सर्वाणि पदानि संशोधितानि, तथापि गद्यरूपपराशरवचनेषु यत्र देशादिनामानि सन्ति तत्रास्ति नामान्तरसंशयोऽतो निष्पक्षपातधिया प्राचीनकृतिकीर्त्तिस्थापनशीलैः सुधीभिस्तान्यन्यानि च भृशं विचिन्त्य संशोधनीयानीति तान् सुजनान् विनीतो मुहुरर्थये।

अत्र प्रथमं पुस्तकं 'प्र' संज्ञकम्, द्वितीयम् 'अ' तृतीयं 'क' चतुर्थं 'ग' पञ्चमं 'घ' सप्तमं 'व' संज्ञकं च प्रकल्पितम्। षष्ठं चातीव भ्रष्टमवलोक्य नादृतम्। एतानि सर्वाणि पुस्तकानि प्राय एकमातृकाणि तेन सर्वत्रानुपयुक्तपाठान्तराणि विहाय स्थलविशेषे क्वचिदेव समुचितपाठान्तरं मया न्यासि। एवमत्र यत्र यत्र येषां येषामाचार्याणां ग्रन्थान्तराणां वा वचनानि तेषां सुखेनावगमाय ग्रन्थादौ तत्सूचीपत्रं च निवेशितम्। अन्ये ग्रन्थस्थविशेषा ग्रन्थान्ते प्रकाशिता भविष्यन्ति।

भट्टोत्पलः प्लवमकल्पयदर्थिनां यं
श्रीमद्वराहमिहिरोदिततोयराशौ।
स्वार्थाप्तये विवृतिरूपमपूर्वमज्ञा-
श्चक्रुर्विवर्णमकलं बहुधाऽत्र यं च॥ १॥

तं विप्लवं प्लवमवेक्ष्य विवर्णशीर्णं
ते शिल्पकर्मनिपुणाश्च कलाप्रवीणाः।
तद्भग्नभागपरिसंस्करणाय मह्य-
माज्ञां ददुः सपदि यूरपदेशविज्ञाः॥ २॥

तद्भग्नभागमखिलं परिशोध्य सम्यग्
वर्णं विभूष्य विधिवच्च पवित्रवर्णैः।

सोऽयं ह्लवो निजकरेण सुधाकरेण
नूत्नीकृतः सुकृतिभिः सकलो विलोक्यः ॥ ३ ॥
अत्र प्राचीनवाचां खचरसमुचिताचारचारप्रचार-
चञ्चच्चारुप्रपञ्चार्चिततुरगकरिश्वादिलक्ष्माङ्कितानाम् ।
सन्दोहे नेत्रदोषादखिलविधिकृतां वर्णसंयोजनाद्वा
बुद्धिभ्रान्त्या खिलत्वं गणकगणवरास्तच्च संशोधयन्तु ॥ ४ ॥
इति मुहुः शिरसा सुरसंहिता-
गणितजातकभेदविदो विदः ।
बहुविधान् नयतोऽर्थयते सुधीः
सदुपकारकरोऽत्र सुधाकरः ॥ ५ ॥

सुधाकरद्विवेदी



श्रीभट्टोत्पलकृतविवृतिसहितबृहत्संहितायाः पूर्वभागस्थितानामध्यायानामनुक्रमणिका

अ०	पृ०	अ०	पृ०
उपनयनाध्यायः	१-१६	आषाढीयोगाध्यायः	३५६-३६४
सांवत्सरसूत्राध्यायः	१६-७६	वातचक्राध्याय	३६४-३६८
आदित्यचाराध्यायः	७६ ६४	सद्योवर्षणाध्यायः	३६८-३७८
चन्द्रचाराध्यायः	६४-११०	कुसुमलताध्यायः	३७८-३८१
राहुचाराध्यायः	११०-१५४	सन्ध्यालक्षणाध्यायः	३८२-३६३
भौमचाराध्यायः	१५४-१६०	दिग्दाहलक्षणाध्यायः	३६३-३६४
बुधचाराध्यायः	१६१-१७०	भूकम्पलक्षणाध्यायः	३६४-४०६
बृहस्पतिचाराध्यायः	१७०-१६५	उल्कालक्षणाध्यायः	४०६-४१५
शुक्रचाराध्यायः	१६५-२१३	परिवेषलक्षणाध्यायः	४१५-४२२
शनैश्चरचाराध्यायः	२१३-२२०	इन्द्रायुधलक्षणाध्यायः	४२२-४२६
केतुचाराध्यायः	२२०-२४५	गन्धर्वनगरलक्षणाध्यायः	४२६-४२७
अगस्त्यचाराध्यायः	२४५-२५४	प्रतिसूर्यलक्षणाध्यायः	४२८-४२६
सप्तर्षिचाराध्यायः	२५४-२५८	निर्घातलक्षणाध्यायः	४२६-४३०
नक्षत्रकूर्माध्यायः	२५६-२६८	सस्यजातकाध्यायः	४३१ ४३५
नक्षत्रव्यूहाध्यायः	२६८-२७६	द्रव्यनिश्चयाध्यायः	४३५-४४०
ग्रहभक्तियोगाध्यायः	२७७-२८६	अर्घकाण्डाध्यायः	४४०-४५४
ग्रहयुद्धाध्यायः	२६०-३००	इन्द्रध्वजसम्पदध्यायः	४५४-४६४
शशिग्रहसमागमाध्यायः	३००-३०३	नीराजनाध्यायः	४६४-४७४
ग्रहवर्षफलाध्यायः	३०३-३१४	खञ्जनकलक्षणाध्यायः	४७४-४७६
ग्रहशृङ्गाटकाध्यायः	३१४-३१७	उत्पाताध्यायः	४७६-५०४
गर्भलक्षणाध्यायः	३१८-३३२	मयूरचित्रकाध्यायः	५०५-५१३
गर्भधारणाध्यायः	३३२-३३५	पुष्यस्नानाध्यायः	५१३-५३४
प्रवर्षणाध्यायः	३३५-३३८	पट्टलक्षणाध्यायः	५३४-५३६
रोहिणीयोगाध्यायः	३३८-३५६	खड्गलक्षणाध्यायः	५३६-५४४
स्वातियोगाध्यायः	३५६-३५८	अङ्गविद्याध्यायः	५४५-५६२
		पिटकलक्षणाध्यायः	५६२-५६६

—:०:—

आचार्यवचनानां सूचीपत्रम्

अज्ञातनामाचार्यवचनानि

पृ. सं.	पं. सं.	श्लो.
२	१—६	३
२	१०—११	१
६	३—६	२
६	६—१०	१
१८	२०—२१	१
१८	१७—२६	५
४८	२०—२६	३
४६	१—१२	६
५०	१—२	१
५०	१६—२०	१
६८	३—४	१
७२	१८—१६	१
७५	२३—२६	२
७८	७—१२	३
७८	२०—२१	१
१२५	१७—२१	२॥
१२६	६—१०	१
१३८	२५—२६	१
१८०	१—२८	१
२०६	२०—२१	१
२१३	१०—१६	३
२४१	११—२२	६
२५४	१६—१६	२
२६६	७—८	१
२६१	१—२	१
३०४	१५—१६	१
३०८	२३—२६	२
३५५	५—६	१
३५६	११—१२	१
३६४	३	॥
३६७	२०—२३	२
४५३	१—१८	६
४६६	२०—२८	४
४६७	२—८	३॥
४६६	७—१६	२॥
५२२	८—१४	३॥
५४५	२३—२४	१

आर्यभटस्य वचनानि

पृ. सं.	पं. सं.	श्लो.
२४	७—१०	२
४३	५—६	१
४३	२०—२३	२
४४	४—५	१
५५	४—११	४
५६	२३—२४	१
५७	६—१०	१
६५	६—१०	१
१७२	३—४	१
२६२	५—६	१

ऋषिपुत्रवचनानि

पृ. सं.	पं. सं.	श्लो.
१३८	१२—२०	४
१६८	७—१०	२
१७१	१६—१६	१
१७४	१६—१०	२
२०६	२३—२६	२
२६१	५—६	१
३०१	१—२	१
३२६	८—१०	१॥
३४४	२०—२३	२
३४५	१—२	१
४२३	१७—१८	१

कणादवचनम्

पृ. सं.	पं. सं.	श्लो.
८	७	॥
८	११	॥

कपिलाचार्यवचनानि

पृ. सं.	पं. सं.	श्लो.
७	५—२०	६
८	१—२	

कश्यपवचनानि

पृ. सं.	पं. सं.	श्लो.
१३६	१२—१८	३॥

कश्यपवचनानि

पृ. सं.	पं. सं.	श्लो.
१४६	६—१०	१
१४६	१८	॥
१५०	३—४	१
१५०	१२—१३	१
१५०	२२—२३	१
१५१	४—५	१
१५१	१४—१५	१
१५१	२४	॥
१६१	२०—२१	१
१६२	६—७	१
१६२	१६—१७	१
१६२	२५—२६	१
१६३	८—६	१
१६३	१८—१६	१
१६४	१—२	१
१६६	१०—१३	२
२७६	२०—२५	३
३१६	२७—२८	१
३३६	२०—२१	१

काश्यपवचनानि

पृ. सं.	पं. सं.	श्लो.
१२५	७—८	१
१२६	७—८	१
१३०	२—६	३॥
१३१	७—८	१
१३२	६—१०	१॥
१७१	१२—१३	१
१७५	२—३	१
१८२	३—७	२॥
१६५	२२—२७	३
१६८	५—६	२॥
२०७	१६—३०	१०
२०८	१—८	
२०८	२१—२२	१
२७८	५—१८	७
२७६	१०—१७	४

काश्यपवचनानि

पृ. सं.	पं. सं.	श्लो.
२८०	२३—३०	५
२८१	१—२	४
२८२	९—१६	
२८३	१८—२६	४॥
२८५	१—१०	५
२८६	५—१४	५
२८७	६—११	३
२८७	२४—२७	२
२९२	२—८	३॥
३१४	१३—१६	२
३१४	२६—२७	१
३१७	१२—१४	१॥
३२५	१२—१९	४
३३३	१२—२३	६
३५२	१४—१५	१
३९१	१२—१९	४
३९४	९—१३	२॥
३९५	३—४	१
४०४	१३—१८	३
४०५	२१—२३	१॥
४०९	१३—२६	७
४११	२२—२३	१
४१५	४—५	१
४१६	९—१२	२
४१६	२३—२६	२
४२१	५—१०	३
४२३	१—२	१
४२५	१९—२५	३॥
४२७	२४—२५	१
४२८	२१—२२	१
४३६	१२—१३	१
४३६	२२—२३	१
४३७	४—५	१
४३७	१४—१५	१
४३७	२५—२६	१
४३८	७—८	१
४३८	१५	॥
४३९	१—५	२॥
४३९	१३—१४	१
४३९	२२—२३	१
४४०	२२—२५	३
४४१	१—२	

काश्यपवचनानि

पृ. सं.	पं. सं.	श्लो.
४४३	१९—२०	१
४४४	५—८	२
४६५	२३—२४	१
४६६	४—५	१
४६७	१५—१६	१
४७५	१—५	२॥
४७७	१०—१२	१॥
४७८	१६—१७	१
४८१	८—१९	१
५३६	४—७	२
५३८	२५—२८	२

गर्गवचनानि

पृ. सं	पं. सं.	श्लो.
४	२४—२५	३
५	१—४	
१०	२१—२२	१
१७	२६—२७	२॥
१८	१—३	
३९	१५—१६	१
७३	१०—११	१
७३	१७—१८	१
८०	२७—२८	१
८८	२१—२२	१
९८	४—११	४
१११	२५—२६	१
११७	१०—११	१
१२०	७—१२	३
१२४	१६—१७	१
१२५	२—५	२
१३०	२३—२४	१
१५५	२२—२७	३
१५६	१२—१५	२
१५६	२४—२५	२
१५७	१—२	
१५७	१२—१५	२
१६०	२३—२७	२॥
१६७	१०—१३	२
१७१	२१—२२	१
१७२	१५—१८	२
१७२	२६—२७	४
१७४	१—६	

गर्गवचनानि

पृ. सं.	पं. सं.	श्लो.
१७४	२६—२७	१
१७५	१३—१४	१
१७५	२२—२३	१
१७५	२२—२३	१
१७६	९—१०	१
१७६	१८—१९	१
१७७	१—२	१
१७७	१०—११	१
१७७	१९—२०	१
१७८	७—८	१
१७८	१६—१७	१
१७८	२५—०	१॥
१७९	१—२	
१७९	९—१०	१
१९७	६—१७	६
१९८	२१—२६	३
१९९	१४—१९	३
२१०	१७—१८	१
२१३	२८—२९	१
२१४	७—९	५॥
२१५	१६—१	१७
२२०	१६—१७	१
२२२	७—८	१
२२३	१२—१५	२
२२५	७—१०	२
२२५	१८—२१	२
२२६	१—१२	१
२२६	११—१३	१॥
२२६	२१—२२	१
२२७	४—५	१
२२७	२०—२३	२
२२८	४—५	१
२२८	१३—१६	२
२२८	२४—२७	२
२२९	८—११	२
२२९	२०—२२	१॥
२३०	८—११	२
२३०	१९—२२	२
२३१	४—७	२
२३१	१५—१८	२
२३२	१—४	२
२३२	११—१२	१
२३५	२६—२७	१

गर्गवचनानि

पृ. सं.	पं. सं.	श्लो.
२५३	१८—२१	२
२५९	६१—१६	४
२८६	२२—२७	३
२६१	२६—२७	१
२६५	२२—२७	३
२६६	४— ७	२
३१६	२४—२५	१
३२१	४—१२	४॥
३२२	६—१२	२
३२७	७—१२	३
३२८	११—१४	३
३३५	१४—१५	१
३३६	२८—२६	१
३३८	१८—२०	१॥
३४१	१—७	३॥
३४४	७—८	१
३४४	११—१८	४
३४५	२१—२२	१
३४८	२७—२८	२
३४६	१—२	
३४६	२७—२८	१
३५१	२६—२६	३
३५५	२३—३१	४॥
३५७	२२—२६	५॥
३५८	१—३	
३५६	१६—२०	१
३६२	१४—१६	१॥
३६३	४—५	१
३८२	१०—११	१
३८८	१४—२१	४
३९५	८—१४	३॥
३६७	२७—३०	३
३६८	१—२	
३६८	२४—२६	३
४००	५—१०	३
४०१	६—१४	३
४०२	११—१६	३
४०३	१—४	२
४०६	१—३	१॥
४०६	२०—२१	१
४१७	२७—२८	१
४१८	११—१४	२

गर्गवचनानि

पृ. सं.	पं. सं.	श्लो.
४१६	४—५	१
४१६	१३—१४	१
४२३	२४—२५	६
४२४	१—१०	
४२६	१२—१३	१
४३०	१८—२६	४॥
४४६	६—१३	२॥
४४६	१—२	१
४५५	१६—२०	१
४५६	३—४	१
४५६	१०—१३	२
४६०	१२—१३	१
४६२	३—६	२
४६३	२३—२६	२
४७६	१६—२०	१
४८०	३—१२	५
४८०	२४—२६	३
४८१	२४—२५	१
४८२	५—१२	४
४८५	२०—२१	१
४८६	४—५	१
४८७	२६—२७	१
४६३	१६—२८	५
४६४	२४—३०	३॥
४६७	१६—२३	२॥
५०६	३—६	२
५०६	१४—१५	१
५०६	२३—२६	२
५०७	२३—२४	१
५०८	१६—२२	२
५०६	१२—१४	१॥
५०६	२१—२२	१
५४०	२७—३०	३
५४१	१—२	
५४२	६—१४	३
५१२	१०—१५	१
५१२	२८—२६	१
५२४	६—१२	२
५३२	१२—१८	३॥
५३३	१७—१८	१

देवलवचनानि

पृ. सं.	पं. सं.	श्लो.
११२	१५—१६	१
१६८	२५—२६	५
१६६	१—८	
१६५	१६—२०	१
२१६	२३—२४	१
३१४	१—२	१
३३६	२४—२५	१
३६२	१६—२१	१॥

नन्दिवचने

पृ. सं.	पं. सं.	श्लो.
१७०	११—१२	१
४२३	२०—२१	१

नारदवचनम्

पृ. सं.	पं. सं.	श्लो.
२२२	१२—१३	१

पञ्चसिद्धान्तिकास्थवचनानि

पृ. सं.	पं. सं.	श्लो.
२३	१—२	१
२६	२७	॥
३०	१८—२६	५
३१	१—२	
३१	६—१०	१
३१	२१—२४	१२
३२	१—२०	
३४	१८—१६	१
३५	२—३	१
३५	५—६	१
४०	२—३	१
४०	६—७	१
४०	६—१०	१
४०	१७—१८	१
४१	२—३	१
४१	१३—१६	२
४१	२३—२४	१
४२	२—३	१
४२	५—६	१
४२	२३—२४	१
४३	१२—१५	२
४४	२६—२७	२
४५	१—२	

पञ्चसिद्धान्तिकास्थवचनानि

पृ. सं.	पं. सं.	श्लो.
४५	२५—२६	१
५५	१२—१६	४
५६	२०—२१	१
५६	२६—२७	३
५७	१—४	
५७	२३—२४	२५
५८	१—३०	
५६	१—२०	
५६	२६—२७	२
६०	१—२	
६०	७	॥
६०	६—१२	२
६०	१५	॥
६०	१८—१६	१
६१	५—८	२
६१	१३—१४	१
६३	१६—२३	४
६२	२—५	२
६४	१७—१८	१
१०२	१४—२३	१०
१०३	१—१०	
११६	८—६	१
१२१	३—२२	१०
१२१	२४—२५	२
१८३	२५—२६	३
१८४	१—४	
२५४	४—७	२
२६४	४—५	१
३०३	१४—१५	१
३२०	१८	॥
३४०	४—५	१
३४२	१८—१६	१

पराशरवचनानि*

पृ. सं.	पं. सं.	श्लो.
१४	१—१६	ग
१४	२३—२७	ग
१७	१—२४	
२३	१२—१६	ग

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
७७	२४—२५	ग
७८	१—५	
७६	६—१४	ग
८१	२	१
८१	२१—२८	४
८२	६—१०	१
८७	२३—२५	ग
६०	१३—२८	ग
६१	८—६	१
६२	६—१०	१
६३	१८—२१	२
६३	२४—२६	ग
६४	१—२	ग
६७	६—१३	ग
१०३	१६—२३	ग
१०६	४—५	ग
१०८	१०—१७	ग
१०६	२०—२१	ग
१११	१५—२३	ग
११६	४—१६	ग
१२४	६—१४	ग
१३१	१०	ग
१३५	२३—२४	ग
१३६	१—१०	
१३६	३—१७	ग
१४१	२—५	ग
१४२	८—१२	२॥
१४८	१२—१६	ग
१५५	१२—१४	ग
१५६	२—३	ग
१५६	१७	ग
१५७	४	ग
१५७	१७	ग
१५८	१—२	१
१५८	८—६	१
१५८	१३—१४	१
१६०	१६—१७	ग
१६०	१८—१६	१

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
१६५	५—६	ग
१६५	२३—२५	ग
१६७	४—८	ग
१६६	२०—२३	२
१७०	२०	ग
१७४	८—१५	ग
१८०	१६—२१	ग
१८१	६—१०	१
१६६	२८—२६	ग
१६७	१—४	
१६६	२१—२५	ग
२०३	३—१५	ग
२०३	२७—२८	१
२०८	१०—१३	ग
२०८	२६—३४	४
२०६	१—२	
२१३	५—८	ग
२१८	१५—३०	ग
२१९	१—७	
२१६	१६—१६	२
२२०	१—२	ग
२२०	१६—२०	१
२२१	२६	ग
२२२	१—४	ग
२२६	२४—२६	३
२३३	४—८	ग
२३३	१८—२२	ग
२३४	४—८	ग
२३५	१८—२४	ग
२३६	११—१५	ग
२३६	२३—२६	ग
२३७	४—५	ग
२३७	२१—२७	ग
२३८	८—१३	ग
२३८	२६—२६	ग
२३६	८—१०	ग
२३६	२३—२८	ग

* यद्यपि कुत्रचित् पराशरस्थाने पाराशरस्तथापि सर्वत्र पराशरमेव स्वीकृत्यात्र वचनानि लिखितानि।

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
२४०	८—९	ग
२४०	१७—१९	ग
२४१	५—९	ग
२४४	१७—२०	ग
२४५	१—४	
२५४	१०—१४	ग
२६०	६—१८	ग
२६१	७—१०	ग
२६१	२७—२८	ग
२६२	१—२	
२६३	४—१२	ग
२६३	२८	ग
२६४	१—३	
२६४	१५—१८	ग
२६५	१—३	ग
२६५	२७—३०	ग
२६६	१७—१९	ग
२९१	२३—२४	ग
२९५	११	ग
२९५	१९—२०	ग
३००	९—१०	१
३२४	१२—१६	ग
३२७	१४—१५	ग
३३०	१३—१६	२
३४९	४—८	ग
३५६	२—४	ग
३५६	२७—२९	ग
३५९	४—१०	ग
३६२	१८—२१	२
३६३	७—९	ग
३७७	३—६	२
३८१	२५—२६	१
३८६	१५—१८	२
३९०	२५—३०	ग
३९१	१—१०	२
३९७	११—१६	ग
३९७	२५—२६	ग
३९९	१३—१७	ग
४००	१९—२२	ग
४०१	२३—२६	ग
४०२	२१—२४	ग

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
४०४	२१—३०	७
४०५	१—४	
४०६	५—९	ग
४२८	२४—२७	२
४२९	१—२	१
४९९	२५—२६	१
५४२	१७—२३	ग
५४३	२८—३०	ग
५४४	१—३	ग
५४५	१९—२२	
५४६	१५—१८	ग
५४८	१—४	ग
५४८	६—७	१
५४९	१८—१९	१
५४९	३—४	ग
५४९	१५—१६	ग
५४९	२७—२८	ग
५५०	७—१०	ग
५५०	१२—१५	२
५५०	२२—२४	ग
५५१	१—३	१॥
५५१	१०—११	१
५५१	२०—२१	१
५५२	९—१२	ग
५५२	२१—२३	ग
५५३	१—३	ग
५५३	१२—१४	ग
५५४	७—११	ग
५५४	२८—२९	ग
५५५	१—३	
५५५	२१—२४	ग
५५६	१५—१८	ग
५५६	२६—२८	ग
५५८	१७—२५	ग
५५९	१७—१९	ग
५६०	२७—२९	ग
५६०	१—११	ग
५६२	१—८	ग
५६३	२०—२४	ग
५६४	९—११	ग
५६५	१—३	ग
५६५	१६—१८	ग

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
५६५	२५—२६	ग
५६६	५—६	ग

पुराणकारवचने

पृ. सं.	पं. सं.	श्लो.
१११	४—५	१
३४२	९—१०	१

पुलिशाचार्यवचनानि

पृ. सं.	पं.. सं.	श्लो.
२२	४—५	१
२४	२—५	२
२४	२५—२६	१
२५	५	॥
२५	७	॥
२५	१५	॥
२५	१८	॥
२६	२१	॥
२६	१२—१५	२
२७	५—६	१
२८	२	॥
३६	३—४	१
४०	२—३	१
४७	१—२	१
४७	४—५	१
४८	१२	॥
४९	१८—२५	४
५१	१४—१५	१
५३	१६—२३	४
५५	२१—२२	१
५७	६—७	१
२९६	१	॥

बलभद्रवचनानि

पृ. सं.	पं. सं.	श्लो.
२६	२०—२५	३
३३	१२—२१	५
३४	९—१०	१

बृहस्पतिवचनम्

पृ. सं.	पं. सं.	श्लो.
४२३	२३—२४	१

ब्रह्मगुप्तवचनानि

पृ. सं.	पं. सं.	श्लो.
२२	१०—१३	२
२३	४—५	१

ब्रह्मगुप्तवचनानि

पृ. सं.	पं. सं.	श्लो.
२३	२१—२४	२
२७	६	॥
३१	१४—१७	२
३२	२३—२४	१
३२	२६—२७	१
३४	१६	॥
३६	२—११	५
४२	८—६	१
४३	२—३	१
४३	१७—१८	१
४५	५—६	१
४६	१६	॥
५४	२—३	१
५५	२४—२५	२
५६	१—२	
५७	१२—१५	२
६४	१५—१६	१
६८	१७—२३	३॥
११५	३—४	१
११५	२०—२१	१
११६	११—१२	१
११६	२०—२३	२
११७	१३—१७	२॥
११८	१२—२२	५॥
२०४	१४—१५	१
२०५	१८—२१	२
२५५	११—१२	१
३४०	७—८	१
३५३	१२—१३	१

भट्टोत्पलवचनानि

पृ. सं.	पं. सं.	श्लो.
३४	१२—१३	१
६२	११—२८	४
६२	२२—२३	२॥
६३	१—३	
१२२	१४—१८	२॥

भद्रबाहुवचनम्

पृ. सं.	पं. सं.	श्लो.
२१०	८—१५	४

भानुभट्टवचनम्

पृ. सं.	पं. सं.	श्लो.
२०४	१७—१८	१

मनुवचनानि

पृ. सं.	पं. सं.	श्लो.
२	२१—२२	२
५	१६—२६	६
६	१—१०	

महाभाष्यवचनानि

पृ. सं.	पं. सं.	श्लो.
२	८—६	ग
३०४	७—८	१
३०५	५—६	१
३०६	१५—१६	१
३०७	२०—२१	१
३०६	८—६	१
३१०	१३—१४	१
३११	२७—२८	१
३१३	५—६	१

योगयात्रास्थवचनानि

पृ. स.	पं. सं.	श्लो.
४४८	६—११	३
४५३	१—१८	६
४६८	२७—३०	२
४६६	२—५	२
५१६	२७—२८	८
५२०	१—१४	

लौकायतिकवचनम्

पृ. सं.	पं. सं.	श्लो.
६	६—१०	१

वसिष्ठवचनानि

पृ. सं.	पं. सं.	श्लो.
५६	१३—१४	१
११२	११—१२	१
२६३	१६	॥
३६५	२१—२४	२
४३२	१—२	२
४३२	१७—१८	१
४३३	२०—२१	१
४३४	११—१२	१
४३४	२५—२६	१

विष्णुचन्द्रवचनम्

पृ. सं.	पं. सं.	श्लो.
३०३	६—७	१

वीरभद्रवचनम्।

पृ. सं.	पं. सं.	श्लो.
११२	७—८	१

हस्तिवैद्यककारवीरसोमवचनम्

पृ. सं.	पं सं.	श्लो.
३	१६	॥

वृद्धगर्गवचनानि

पृ. सं.	पं. सं.	श्लो.
८७	१७—२१	२॥
८६	५—६	१
६६	१५—१८	२
१००	२—३	१
१००	१२—१७	३
१००	२४—२७	२
१०१	५—७	१॥
१०१	१५—१६	”
१०२	१—१	१
१०२	१०—११	१
१०५	७—८	१
११६	२४—२५	१
१२०	३—४	१
१२७	१०—१५	३
१२८	७—१०	२
१३०	१०—११	१
१५३	२३—२६	५
१५४	१—६	
१५५	७—१०	२
१६१	१७—१८	१
१६६	१—८	४
१६७	२३—२८	४
१६८	१— २	
१६६	१५—१८	२
१७६	१८—१६	१
२२३	१०—२०	२
२३४	[illegible]—१६	५
२५५	२०—२१	१
२५७	५— ८	२
२५८	४—१४	२
२६१	६—१४	३
३०१	४— ७	२
३३०	२५—२७	१॥
३६५	३०—३१	२
३६६	१— २	
५१४	११—२०	५

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
२४०	८—९	ग
२४०	१७—१९	ग
२४१	५—९	ग
२४४	१७—२०	ग
२४५	१—४	
२५४	१०—१४	ग
२६०	६—१८	ग
२६१	७—१०	ग
२६१	२७—२८	ग
२६२	१—२	
२६३	४—१२	ग
२६३	२८	ग
२६४	१—३	
२६४	१५—१८	ग
२६५	१—३	ग
२६५	२७—३०	ग
२६६	१७—१९	ग
२९१	२३—२४	ग
२९५	११	ग
२९५	१९—२०	ग
३००	९—१०	१
३२४	१२—१६	ग
३२७	१४—१५	ग
३३०	१३—१६	२
३४९	४—८	ग
३५६	२—४	ग
३५६	२७—२९	ग
३५९	४—१०	ग
३६२	१८—२१	२
३६३	७—९	ग
३७७	३—६	२
३८१	२५—२६	१
३८६	१५—१८	२
३९०	२५—३०	ग
३९१	१—१०	२
३९७	११—१६	ग
३९७	२५—२६	ग
३९९	१३—१७	ग
४००	१९—२२	ग
४०१	२३—२६	ग
४०२	२१—२४	ग

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
४०४	२१—३०	७
४०५	१—४	
४०६	५—९	ग
४२८	२४—२७	२
४२९	१—२	१
४९९	२५—२६	१
५४२	१७—२३	ग
५४३	२८—३०	ग
५४४	१—३	ग
५४५	१९—२२	
५४६	१५—१८	ग
५४८	१—४	ग
५४८	६—७	१
५४९	१८—१९	१
५४९	३—४	ग
५४९	१५—१६	ग
५४९	२७—२८	ग
५५०	७—१०	ग
५५०	१२—१५	२
५५०	२२—२४	ग
५५१	१—३	१॥
५५१	१०—११	१
५५१	२०—२१	१
५५२	९—१२	ग
५५२	२१—२३	ग
५५३	१—३	ग
५५३	१२—१४	ग
५५४	७—११	ग
५५४	२८—२९	ग
५५५	१—३	
५५५	२१—२४	ग
५५६	१५—१८	ग
५५६	२६—२८	ग
५५८	१७—२५	ग
५५९	१७—१९	ग
५६०	२७—२९	ग
५६०	१—११	ग
५६२	१—८	ग
५६३	२०—२४	ग
५६४	९—११	ग
५६५	१—३	ग
५६५	१६—१८	ग

पराशरवचनानि

पृ. सं.	पं. सं.	श्लो.
५६५	२५—२६	ग
५६६	५—६	ग

पुराणकारवचने

पृ. सं.	पं. सं.	श्लो.
१११	४—५	१
३४२	९—१०	१

पुलिशाचार्यवचनानि

पृ. सं.	पं.. सं.	श्लो.
२२	४—५	१
२४	२—५	२
२४	२५—२६	१
२५	५	॥
२५	७	॥
२५	१५	॥
२५	१८	॥
२६	२१	॥
२६	१२—१५	२
२७	५—६	१
२८	२	॥
३६	३—४	१
४०	२—३	१
४७	१—२	१
४७	४—५	१
४८	१२	॥
४९	१८—२५	४
५१	१४—१५	१
५३	१६—२३	४
५५	२१—२२	१
५७	६—७	१
२९६	१	॥

बलभद्रवचनानि

पृ. सं.	पं. सं.	श्लो.
२६	२०—२५	३
३३	१२—२१	५
३४	९—१०	१

बृहस्पतिवचनम्

पृ. सं.	पं. सं.	श्लो.
४२३	२३—२४	१

ब्रह्मगुप्तवचनानि

पृ. सं.	पं. सं.	श्लो.
२२	१०—१३	२
२३	४—५	१

ब्रह्मगुप्तवचनानि

पृ. सं.	पं. सं.	श्लो.
२३	२१—२४	२
२७	६	॥
३१	१४—१७	२
३२	२३—२४	१
३२	२६—२७	१
३४	१६	॥
३६	२—११	५
४२	८—६	१
४३	२—३	१
४३	१७—१८	१
४५	५—६	१
४६	१६	॥
५४	२—३	१
५५	२४—२५	२
५६	१—२	
५७	१२—१५	२
६४	१५—१६	१
६८	१७—२३	३॥
११५	३—४	१
११५	२०—२१	१
११६	११—१२	१
११६	२०—२३	२
११७	१३—१७	२॥
११८	१२—२२	५॥
२०४	१४—१५	१
२०५	१८—२१	२
२५५	११—१२	१
३४०	७—८	१
३५३	१२—१३	१

भट्टोत्पलवचनानि

पृ. सं.	पं. सं.	श्लो.
३४	१२—१३	२
६२	११—२८	४
६२	२२—२३	२॥
६३	१—३	
१२२	१४—१८	२॥

भद्रबाहुवचनम्

पृ. सं.	पं. सं.	श्लो.
२१०	८—१५	४

भानुभट्टवचनम्

पृ. सं.	पं. सं.	श्लो.
२०४	१७—१८	१

मनुवचनानि

पृ. सं.	पं. सं.	श्लो.
२	२१—२२	२
५	१६—२६	६
६	१—१०	

महाभाष्यवचनानि

पृ. सं.	पं. सं.	श्लो.
२	८—६	ग
३०४	७—८	१
३०५	५—६	१
३०६	१५—१६	१
३०७	२०—२१	१
३०६	८—६	१
३१०	१३—१४	१
३११	२७—२८	१
३१३	५—६	१

योगयात्रास्थवचनानि

पृ. स.	पं. सं.	श्लो.
४४८	६—११	३
४५३	१—१८	६
४६८	२७—३०	२
४६६	२—५	२
५१६	२७—२८	८
५२०	१—१४	

लौकायतिकवचनम्

पृ. सं.	पं. सं.	श्लो.
६	६—१०	१

वसिष्ठवचनानि

पृ. सं.	पं. सं.	श्लो.
५६	१३—१४	१
११२	११—१२	१
२६३	१६	॥
३६५	२१—२४	२
४३२	१—२	२
४३२	१७—१८	१
४३३	२०—२१	१
४३४	११—१२	१
४३४	२५—२६	१

विष्णुचन्द्रवचनम्

पृ. सं.	पं. सं.	श्लो.
३०३	६—७	१

वीरभद्रवचनम्।

पृ. सं.	पं. सं.	श्लो.
११२	७—८	१

हस्तिवैद्यककारवीरसोमवचनम्

पृ. सं.	पं सं.	श्लो.
३	१६	॥

वृद्धगर्गवचनानि

पृ. सं.	पं. सं.	श्लो.
८७	१७—२१	२॥
८६	५—६	१
६६	१५—१८	२
१००	२—३	१
१००	१२—१७	३
१००	२४—२७	२
१०१	५—७	१॥
१०१	१५—१६	
१०२	१—१	१
१०२	१०—११	१
१०५	७—८	१
११६	२४—२५	१
१२०	३—४	१
१२७	१०—१५	३
१२८	७—१०	२
१३०	१०—११	१
१५३	२३—२६	५
१५४	१—६	
१५५	७—१०	२
१६१	१७—१८	१
१६६	१—८	४
१६७	२३—२८	४
१६८	१— २	
१६६	१५—१८	२
१७६	१८—१६	१
२२३	१०—२०	२
२३४	—१६	५
२५५	२०—२१	१
२५७	५— ८	२
२५८	४—१४	२
२६१	६—१४	३
३०१	४— ७	२
३३०	२५—२७	१॥
३६५	३०—३१	२
३६६	१— २	
५१४	११—२०	५

वृद्धगर्गवचनम्

पृ. सं.	पं. सं.	श्लो.
५१८	८—११	२

व्यासवचनानि

पृ. सं.	पं. सं.	श्लो.
१२६	२२—२३	१
१२७	४—५	१
२९३	१६—१७	१

श्रुतिवचने

पृ. सं.	पं. सं.	श्लो.
२	२५	ग
११७	८	ग

समाससंहितास्थवचनानि ।

पृ. सं.	पं. सं.	श्लो.
८७	१४—१५	१
९७	६—७	१
१०३	२५—३०	३
१०४	१८—१९	१
१०६	७—८	१
१०८	२४	॥
१३२	१२—१५	२
१३६	११—१२	१
१४८	९—१०	१
१५३	२०—२१	१
१६१	१०—११	१
१६६	१५—२२	४
१७९	२१—२२	१
१८५	७—८	१
१८६	१३—१४	१
१९७	१९—२४	३
२०३	१७—१८	१
२२४	२—७	३

समाससंहितास्थवचनानि ।

पृ. सं.	पं. सं.	श्लो.
२२४	२२—२५	२
२५१	१०—१३	२
२५१	२२—२३	१
२६६	२१—२४	१३
२६७	१—२२	
२८८	२—२३	११
३०५	८—९	१
३०६	१८—१९	१
३०७	२३—२४	१
३०९	११—१२	१
३१०	१६—१७	१
३१२	२—३	१
३१३	८—११	२
३१५	५१—१८	२
३१६	१६—२५	५
३१७	१६—१७	१
३१७	१९—२६	४
३२०	२०—२१	१
३२५	२०—२४	२
३२६	११—१६	३
३२८	१६—१७	१
३२९	१४—१५	१
३३५	२५—२६	१
३३८	३—६	२
३४९	१०—१५	३
३५४	२४—२९	३
३५९	२९—३०	१
३७०	३—४	१
३७०	१९	॥

समाससंहितास्थवचनानि

पृ. सं.	पं. सं.	श्लो.
३७६	१७—२९	६॥
४०३	६—१९	७
४०६	२०—२१	१
४०७	५—७	१॥
४०७	२१	॥
४०८	१	॥
४०८	९	॥
४०८	१५	॥
४०८	२३	॥
४११	२५—२६	१
४१५	८—९	१
४१८	१८—२३	३
४२०	१३—१६	२
४३०	१५—१६	१
४७९	१२—१३	१
४८१	२—३	१

सिद्धसेवनवचनम्

पृ. सं.	पं. सं.	श्लो.
३१९	१२—१३	१

* सूर्यसिद्धान्तवचनानि

पृ. सं.	पं. सं.	श्लो.
९४	१८—१९	१
९५	६—७	१
९५	२२—२३	१
११५	१५—१८	२

स्मृतिवचने

पृ. सं.	पं. सं.	श्लो.
११७	३	॥
११७	५—६	१

* एतानि वचनानि सम्प्रति प्रसिद्धसूर्यसिद्धान्ते नोपलभ्यन्ते ।

The following is a brief analysis of the important subjects contained in Bhaṭṭotpala's commentary, in their respective order, which require special attention of the learned public for discussion and consideration as regards subject matter and historical interest and research :—

Page.	*Line.*	
		CHAPTER I
3	.....	In the commentary of stanza 2, "हस्तिवैद्यककारो वीरसोमः" Who was this Virasoma and what is his work ?
6-8	.....	In the commentary of stanza 7. A quotation from Kapilâchârya (कपिलाचार्य), which differs from the known (साङ्ख्यतत्त्वकौमुदी). Vâchaspati Miśra ascribes it to be that of Îśvara Kṛiṣṇa (see footnote). Hence a question arises, Was Bhaṭṭotpala older than Vâchaspati Miśra ?—a matter worth investigation.
8	.....	Quotation from Kaṇâda.
9	.....	Quotations from पुराणलौकायतिकमीमांसक.
12-18	.....	Birth of nine planets.
		CHAPTER II.
		The whole chapter is very remarkable, for it contains a good many quotations from different authors, regarding the periodical revolutions (भगण) etc.; and more specially the following :—
23	12-13	Here the table for measuring time (काल) differs from those known in Sūrya Siddhânta and Siddhânta Śiromaṇi.
25	7	Here 7 digit is indicated by air (पवन). See footnote.
34	12-13	A quotation from Bhaṭṭotpala's own unknown work.
		CHAPTER III.
79-80	.....	In the commentary of stanza 3. The method for Calculating the value of precession (अयनांश) by observation and Bhaṭṭotpala shows 7° to be the value of the precession (अयनांश) of his time.
81	21-28	Five different names of the Sun's motion by Parâśara.

Page	*Line*	
		CHAPTER IV.
94	18-29	The quotation is not found in the known Sūrya Siddhanta. (See foot-note.)
		CHAPTER V.
111	4-5	From what Purâṇa is it quoted ?
112	7-8	Who was Virabhadra and what is his work ?
115	15-18	Quotation not found in the known Sūryasiddhânta.
121	24-25	This stanza is not in the published Pañchasiddhântikâ, it should be supplied after the 5th stanza, page 40 of it. (See foot-note.)
122	14-17	Quotation and foot-note.
		CHAPTER VII.
170	11-12	Who was Nandî or Nandi and what is his work ?
		CHAPTER IX.
205	18-21	See foot-note, for the quotation from ब्रह्मगुप्त ।
		CHAPTER XIII.
256	17	In the commentary of stanza 4. (See foot-note).
		CHAPTER XIV.
259-268	.....	The whole chapter is interesting, for it contains the ancient names of countries not current now.
		CHAPTER XV.
269	7–8	Indication of Rogue (शठ)
		CHAPTER XVI.
277-289	.....	Peculiar names for countries and rivers.
		CHAPTER XVII.
291	1-2	Different names of the conjunction of planets.
		CHAPTER XIX.
304	15-16	The meaning of the word (दैव)
308	23-26	The indications of the protection of the subject (प्रजा)
		CHAPTER XXXIII.
407	28	See foot-note.
		CHAPTER XLII
448	5	Names of auspicious things (मङ्गलवस्तु) ।
		CPAPTER XLIII.
448	27	A peculiar name (द्रेकाणी) for a tree.

Page	*Line*	CHAPTER XLVII.
522	8-14	A way of worshipping the Sun, unknown in any पद्धति.

CHAPTER L.

546	8	The names of holy trees (प्रशस्तवृक्ष)।
546	26	Do. of unholy trees (कुत्सितवृक्ष)।

श्रीजानकीवल्लभो विजयते

अत्र सविवृतिबृहत्संहितायामुपयोगिनः पदार्था ये च विद्यानुरागिभिरितिहासतत्त्वविद्भिर्विद्वद्भिरवश्यं दर्शनीया विचारणीयाश्च



१ अध्याये

३ पृष्ठे, २ श्लोकटीकायाम् "हस्तिवैद्यककारो वीरसोमः" कोऽयं वीरसोमः के च तन्निर्मिता ग्रन्था इति विचारणीयाः ।

६–८ पृष्ठेषु ७ श्लोकटीकायाम्—"तथा च कपिलाचार्यः" इति प्रभृति "तत्पूर्विका वृत्तिरिति" इत्यन्तं भट्टोत्पलेन यानि कपिलाचार्यवचनानि लिखितानि तानि सम्प्रति साङ्ख्यतत्त्वकौमुद्यां वाचस्पतिमिश्रमतेनेश्वरकृष्णनिर्मितानीति सर्वं तत्र टिप्पण्यामस्माभिः प्रदर्शितम् । प्रसिद्धां साङ्ख्यतत्त्वकौमुदीं विहाय कपिलाचार्यवचनोपन्यासेन किं भट्टोत्पलो वाचस्पतिमिश्रतः प्राचीन इति बुद्धिमद्भिर्भृशं चिन्त्यम् ।

८ पृष्ठे, कणादवचनानि च चिन्त्यानि ।

९ पृष्ठे, पुराणलौकायतिकमीमांसकवचनानि च विचारयोग्यानि ।

१२–१८ पृ० ग्रहाणामुत्पत्तिर्दर्शनार्हा ।

२ अध्याये

अयमध्यायः सम्पूर्णो दर्शनार्हः । अत्र बहूनां प्राचीनगाणितिकानां भगणादिसंबन्धीनि वचनानि सन्ति । तत्रापि विशेषतः—

२३ पृ० १२–१३ पङ्क्त्योः पराशरमतेन कालपरिभाषा । इयं च सम्प्रति प्रसिद्धसूर्यसिद्धान्तसिद्धान्तशिरोमणिस्थकालपरिभाषातो भिन्नैव ।

२५ पृ० ७ पं० पवनशब्देन सप्तसंख्या सम्प्रत्यप्रसिद्धा तत्रस्था मल्लिप्पणी च विलोक्या ।

३४ पृ० १२–१३ पं० भट्टोत्पलेन कस्मिन् निजे ग्रन्थे–इदं वचनं लिखितम्—इति तद्ग्रन्थोऽन्वेषणीयः ।

३ अध्याये

७९–८० पृ. ३ श्लोकटीकायाम्—अयनांशज्ञानयुक्तिः स्वसमयानुसारिणः सप्तायनभागाश्च दर्शनार्हाः ।

८१–पृ० २१–२८ पं० पराशरतन्त्रोक्ताऽर्कस्य पञ्चधा गतिरपि विलक्षणा।

४ अध्याये

६४ पृ० १८–१६ पं० सूर्यसिद्धान्तवचनानि सम्प्रति प्रसिद्धसूर्यसिद्धान्ते नोपलभ्यन्ते, तदर्थं मत्कृता तत्रैव टिप्पणी च विलोक्या।

५ अध्याये

१११ पृ० ४–५ प० कस्य पुराणस्येदं वचनम्।

११२ पृ० ७–८ पं० कोऽयं वीरभद्रस्तत्कृतो ग्रन्थश्च कः।

११५ पृ० १५–१८ पं० सूर्यसिद्धान्तवचने।

१२१ पृ० २४–२५ पङ्क्त्योर्यद्वचनं तत्पञ्चसिद्धान्तिकायाः २० पृ० पञ्चमश्लोकान्तरश्लोकः समुचितः। तत्र पञ्चसिद्धान्तिकायां त्रुटिरस्ति। द्रष्टव्या टिप्पणी।

१२२ पृ० १४–१७ वचनानि तत्रस्था मत्कृता टिप्पणी च विलोक्या।

६ अध्याये

न कश्चिद्विशेषः।

७ अध्याये

१७ पृ० ११–१२ पं० कोऽयं नन्दी वा नन्दिस्तत्कृताश्च के ग्रन्थाः।

८ अध्याये

न कश्चिद्विशेषः।

९ अध्याये

२०५ पृ० १८–२१, पं० ब्रह्मगुप्तवचनोपरि मत्कृता टिप्पणी विलोक्या।

१०—१२ अध्यायेषु

न कश्चिद्विशेषः।

१३ अध्याये

२५६ पृ० ४ श्लोकटीकायाम् १६ पङ्क्तौ मन्निर्मिता टिप्पणी विलोक्या।

१४ अध्याये

२५६–२६८ पृ० अत्रानेकदेशनामानि प्राचीनानि तदर्थं सम्पूर्णोऽध्यायो विलोक्यः।

१५ अध्याये

२६६ पृ० ७–८ पं० शठलक्षणं दर्शनार्हम्।

१६ अध्याये

२७७–२८६ पृ० अत्रापि देशविशेषाणां नदीविशेषाणां च नामानि विचिन्त्यानि।

१७ अध्याये

२६१ पृ० १—२ पं० ग्रहयुद्धादिलक्षणं विचिन्त्यम् ।

१८ अध्याये

न कश्चिद्विशेषः ।

१९ अध्याये

३०४ पृ० १५–१६ पं० दैवशब्दार्थो द्रष्टव्यः ।

३०८ पृ० २३–२६ पं० प्रजारक्षणलक्षणं दर्शनार्हम् ।

२०—३२ अध्यायेषु

न कश्चिद्विशेषः ।

३३ अध्याये

४०० पृ० २८ पं० मत्कृता टिप्पणी विचिन्त्या ।

३४—४१ अध्यायेषु

न कश्चिद्विशेषः ।

४२ अध्याये

४४८ पृ० ५ पं० मङ्गलवस्तुनामानि दर्शनार्हाणि ।

४३ अध्यायें

४४८ पृ० २७ पं० द्रेकाणीति विलक्षणं वृक्षनाम विलोक्यम् ।

४४—४६ अध्यायेषु

न कश्चिद्विशेषः ।

४७ अध्याये

५२२ पृ० ८–१४ पं० सूर्यपूजाविधिर्विचिन्त्यः । सम्प्रति प्रसिद्धपूजापद्धतिग्रन्थेषु कुत्रापि नोपलभ्यतेऽयं विधिः ।

४८—४९ अध्याययोः

न कश्चिद्विशेषः ।

५० अध्याये

५४६ पृ० ८ पं० प्रशस्तवृक्षनामानि विलोक्यानि ।

५४६ पृ० २६ पं० कुत्सितवृक्षनामानि विलोक्यानि ।

५१ अध्याये

न कश्चिद्विशेषः ।



श्रीगणेशाय नमः

श्रीजानकीवल्लभो विजयते

बृहत्संहिता

वराहमिहिरकृता

भट्टोत्पलकृतविवृतिसहिता[1]

ब्रह्माजशङ्कररवीन्दुकुजज्ञजीवशुक्रार्कपुत्रगणनाथगुरून् प्रणम्य।
यः संग्रहोऽर्कवरलाभविवृद्धबुद्धेरावन्तिकस्य तमहं विवृणोमि कृत्स्नम् ॥१॥

यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्यौतिषं
तस्योच्छित्तिभयात् पुनः कलियुगे संसृत्य यो भूतलम्।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ॥२॥

वराहमिहिरोदधौ सुबहुभेदतोयाकुले
ग्रहर्क्षगणयादसि प्रचुरयोगरत्नोज्ज्वले।
भ्रमन्ति परितो यतो लघुधियोऽर्थलुब्धास्ततः
करोमि विवृतिप्लवं निजधियाऽहमत्रोत्पलः ॥३॥

कानीह शास्त्रे संबन्धाभिधेयप्रयोजनानि भवन्तीत्युच्यते--वाच्यवाचकलक्षणः संबन्धः। वाच्योऽर्थो वाचकः शब्दः। अथवोपायोपेयलक्षणः संबन्धः। उपायस्त्विदं शास्त्रमुपेयं ज्ञानम्। अथवा आब्रह्मादिविनिःसृतं वेदाङ्गमिति संबन्धः। अनेन शास्त्रेण च यद् ग्रहनक्षत्रोत्थानां शुभाशुभानां दिव्यान्तरिक्षभौमानामुत्पातानां फलज्ञानं तदभिधेयम्। जगतः शुभाशुभकथनं प्रयोजनं सम्यग्ज्ञानान्मोक्षावाप्तिरिति च प्रयोजनम्। किमेभिरुक्तैरित्यत्रोच्यते- श्रोतृणां संबन्धाभिधेयप्रयोजनकथनाच्छास्त्रविषये श्रद्धा जायत इति। तथा चोक्तमत्रार्थे--

---

१. इयमेव विवृतिर्लोके भट्टोत्पलकृतटीकेति व्यवह्रियते।

सिद्धिः श्रोतृप्रभृतीनां संबन्धकथनाद्यतः।
तस्मात् सर्वेषु शास्त्रेषु संबन्धः पूर्वमुच्यते॥
किमेवात्राभिधेयं स्यादिति पृष्टस्तु केनचित्।
यदि न प्रोच्यते तस्मै फलशून्यं तु तद्भवेत्॥
सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते॥

तस्मात् संबन्धाभिधेयप्रयोजनानि वक्तव्यानि। कस्याऽस्मिन् शास्त्रेऽधिकार इत्युच्यते। द्विजस्यैव यतस्तेन षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्च। कानि तान्यङ्गानीत्युच्यते—

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः।
छन्दसां लक्षणं चैव षडङ्गो वेद उच्यते॥

सतामयमाचारो यच्छास्त्रप्रारम्भेष्वभिमतदेवतानमस्कारं कुर्वन्ति। तदयमस्मदावन्तिकाचार्यमगधद्विजवराहमिहिरोऽर्कलब्धवरप्रसादो ज्योतिःशास्त्रसंग्रहकृद् गणितस्कन्धहोरास्कन्धौ संक्षिप्तौ कृत्वा संहितास्कन्धं संक्षिप्तं चिकीर्षुरशेषविघ्नोपशान्तये भगवन्तं तत्प्रधानं सूर्यमादावेव प्रणनाम।—

जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभसः।
द्रुतकनकसदृशदशशतमयूखमालार्चितः सविता॥१॥

भगवान् सविता श्रीसूर्यो जयति सर्वोत्कर्षेण वर्तते। कीदृशः। जगतः प्रसूतिः। प्रसूयते उत्पद्यतेऽस्माज्जगदिति जगतः प्रसूतिः। यतस्तद्वशाद् वृष्टेः सम्भवस्ततोऽन्नं ततः प्रजा इति। तथा च भगवान्मनुः—

अग्नौ[1] हुताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा॥ इति।

विश्वात्मा विश्वस्य जङ्गमस्य स्थावररूपस्य चात्मा प्राणरूपेण हृदयान्तरस्थितः। तथा च श्रुतिः—

सूर्य आत्मा जगतस्तस्थुषश्चेति।

जगतो जङ्गमस्य तस्थुषः स्थावरस्य सूर्य एवात्मा। सहजभूषणं नभसः। नभस आकाशस्य सहजभूषणमकृत्रिममलङ्करणम्। यतो दृश्याकाश-

---

१. मनुस्मृतौ द्वितीयाध्यायस्य ७६ श्लोकोऽयम। तत्र "अग्नौ प्रास्ताहुतिः" इति पाठः।

भागस्थेऽर्के सुतरां तस्य विराजनात् सहजं भूषणम्। द्रुतकनकसदृशेति। द्रुतं गलितं कनकं सुवर्णं द्रुतकनकस्य सदृशास्तत्तुल्या दशशत संख्या ये मयूखाः किरणास्तेषां या माला प्रचयस्तयार्चितो व्याप्त इति। एवमिष्टदेवतासङ्कीर्तनात् कायवाङ्मनोभिः प्राधान्याद्धर्मः, धर्मेण चाधर्मनिवृत्तिः, तन्निवृत्तौ विघ्नोपशमस्तदुपशमादविघ्नेन शास्त्रपरिसमाप्तिरिति ॥१॥

नन्वन्येषु ज्योतिःशास्त्रेषु सत्सु किमिदं प्रारब्धमिति पौनरुक्त्यपरिहारार्थमाह--

प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम्।
नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुम् ॥२॥

मननाद् ज्ञानान्मुनिः। प्रथमश्चासौ मुनिश्च प्रथममुनिर्ब्रह्मा तेन यत्कथितमुक्तमवितथं सत्यरूपं विस्तरग्रन्थमतिविस्तीर्णशास्त्रं तस्य ग्रन्थविस्तरस्यार्थमभिधेयमवलोक्य विचार्याहं नातिलघ्वीभिः स्वल्पाभिर्न चातिविपुलाभिर्विस्तीर्णाभी रचनाभिर्वाक्यपदसन्निवेशैर्मध्यरचनाभिः स्पष्टं स्फुटतरमभिधातुं वक्तुं समुद्यतः प्रवृत्त इति। यतः संक्षिप्तस्य ग्रन्थस्य ग्रहणधारणे सुखम्। तथा च हस्तिवैद्यककारो वीरसोमः--

समासोक्तस्य शास्त्रस्य सुखं ग्रहणधारणे ॥ इति ॥२॥

अधुना मुनिविरचितस्य स्वरचितस्य च शास्त्रस्य साम्यमाह--

मुनिविरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम्।
तुल्येऽर्थेऽक्षरभेदादमन्त्रके का विशेषोक्तिः ॥३॥

इदं यच्छास्त्रं मुनिभिर्ब्रह्मादिभिर्विरचितं निबद्धं तत्साधु श्रेष्ठमिति। इतिशब्दो निश्चयार्थे। मुनीनामतीतानागतज्ञानं प्रत्यक्षादविशिष्टमाविर्भूतप्रकाशत्वात्। यतस्तच्चिरन्तनं मुनिभिः प्रागेव विरचितं तेन साधु न मनुजग्रथितं मनुष्यरचितत्वान्न साधु साम्प्रतं रचितत्वान्न शोभनमिति। एवमाशङ्क्याह--तुल्येऽर्थेऽक्षरभेदादमन्त्रक इति। तुल्ये सदृशेऽर्थेऽभिधेयेऽक्षराणां वर्णानां भेदादन्यत्वात्। तत्रामन्त्रक इति मन्त्रवर्जिते का विशेषोक्तिः किं विशेषवचनम्। एतदुक्तं भवति--मुनिकृतान्येव शास्त्राणि दृष्ट्वा तदर्थ एव नात्यल्पैर्नातिबहुभिः पदसन्निवेशैरुच्यत इत्यक्षराणां मात्राभेदो नार्थानाम्। मन्त्रार्थो वेदार्थोऽन्यैः

शब्दैस्तदर्थप्रतिपादकैर्निबद्धो वेदवत्कार्यकरो न भवतीत्यत उक्तममन्त्रक इति ॥३॥

अधुना मुनिकृतानां महत्त्वं च स्वशास्त्रस्य चाल्पत्वं प्रदर्शयितुमाह--

क्षितितनयदिवसवारो न शुभकृदिति पितामहप्रोक्ते।
कुजदिनमनिष्टमिति वा कोऽत्र विशेषो नृदि[1]व्यकृतेः ॥४॥

क्षितितनयस्याङ्गारकस्य दिवसः वारः। दिवसे वारो दिवसवारः। पितामहप्रोक्ते कमलजकथिते शास्त्रे न शुभकृदित्युक्तिः। न शुभं फलं करोतीति न शुभकृत्। भौमवारः सर्वकर्मणामशुभकृदिति कमलजकथिते शास्त्र उक्तिः। मदीये पुनः कुजदिनमनिष्टम्। कुशब्देन भूरित्युच्यते ततो जातः कुजस्तस्य दिनं वारस्तच्चानिष्टमशोभनं सर्वकर्मणामित्युक्तिः। तस्मान्नृकृतेर्मनुष्यरचितस्य शास्त्रस्य दिव्यकृतेर्देवरचितस्यार्थस्यात्रास्मिन्नर्थे को विशेषः किमन्तरमिति भवन्त एव विचारयन्तु। अनेनर्षिकृतानां महत्त्वं स्वशास्त्रस्य संक्षिप्तत्वं प्रकाशितं भवतीति। अथवा नृदिव्यकृते इति पाठे नृकृते दिव्यकृतेऽत्रास्मिन् शास्त्रे को विशेष इति ॥४॥

एवं स्वग्रन्थकरणे निर्दोषतां संस्थाप्य सकलमुनिनिबद्धशास्त्रसंग्रहकरण-हेतुं दर्शयितुमाह-

आब्रह्मादिविनिःसृतमालोक्य ग्रन्थविस्तरं क्रमशः।
क्रियमाणकमेवैतत् समासतोऽतो ममोत्साहः ॥५॥

ब्रह्मादिभ्यो यद्विनिःसृतं निर्गतं ग्रन्थविस्तरं विस्तीर्णशास्त्रं तच्चालोक्य दृष्ट्वा। अथवा तस्माद् ग्रन्थविस्तरादालक्ष्य क्रमशः क्रमेण समासतः संक्षेपेणै-तच्छास्त्रं क्रियमाणम्। एवशब्दो निश्चयार्थे। मुनिभिः पारम्पर्येण संक्षिप्तीकृत-महमपि संक्षिप्तीकरोम्यतोऽस्माद्धेतोर्ममोत्साहः शृङ्गार इति। तथा च भगवान् गर्गः--

स्वयं स्वयम्भुवा सृष्टं चक्षुर्भूतं द्विजन्मनाम्।
वेदाङ्गं ज्योतिषं ब्रह्मपरं यज्ञहितावहम्॥

---

१. नृदिव्यकृते इति पाठान्तरम्

मया स्वयम्भुवः प्राप्तं क्रियाकालप्रसाधनम्।
वेदानामुत्तमं शास्त्रं त्रैलोक्यहितकारकम्॥
मत्तश्चान्यानृषीन् प्राप्तं पारम्पर्येण पुष्कलम्।
तैस्तदा स्रष्टृभिर्भूयो ग्रन्थैः स्वैः स्वैरुदाहृतम्॥ इति॥५॥

अस्मिन् शास्त्रे जगतः शुभाशुभकथनं तात्पर्यं तस्य च जगतः कुत उत्पत्तिरस्त्येतत्प्रदर्शयितुमाह--

आसीत्तमः किलेदं तत्रापां तैजसेऽभवद्धैमे।
स्वर्भूशकले ब्रह्मा विश्वकृदण्डेऽर्कशशिनयनः॥६॥

किलशब्दोऽत्रागमप्रदर्शनार्थः। इदं जगत्किल तम आसीत्। अन्धकारमभूत् तस्मिंस्तमस्यपां मध्ये हैमे सौवर्णेऽण्डे तैजसे तेजोमये स्वर्भूशकले यस्याण्डस्यैकं शकलमेकं खण्डं स्वर्गो द्वितीयं भूः। तथाभूते ब्रह्मा पितामहोऽभवद् जज्ञे। कीदृशो ब्रह्मा। अर्कशशिनयनः। अर्क आदित्यः शशी चन्द्रः। एतौ नयनं नेत्रे यस्य स विश्वकृद्विश्वस्रष्टा। एतदुक्तं भवति--तमोभूतेऽस्मिन् जगति भगवानव्यक्तः प्रजासिसृक्षुरादावपः ससर्ज, तासु च वीर्यमुदसृजत्। ततस्तदण्डं सौवर्णं सहस्रांशुसन्निभमभवत्, तस्मिन्नभ्यन्तरे ब्रह्मा जज्ञे, ततः स भगवांस्तत्र परिवत्सरमुषित्वा स्वयमेव ध्यानात्तदण्डं द्विधाऽकरोत्। ताभ्यां शकलाभ्यामेकं स्वर्गो द्वितीयं भूरिति निर्ममे। स ब्रह्मा सोमसूर्यनेत्रः सर्वलोकपितामहो विश्वकृदिति स्मृतिकाराः। तथा च भगवान्मनुः--

आसीदिदं तमोभूतमप्रज्ञातलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥
ततः स्वयम्भूर्भगवानव्यक्तं व्यञ्जयन्निदम्।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः॥
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुब्दाभौ॥
सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु वीर्यमवासृजत्॥

---

१. मनुस्मृतौ प्रथमाध्यायस्यैते ५-१३ श्लोकाः। तत्राष्टमश्लोके "बीजमवासृजत्" इति पाठः।

तदण्डमभवद् हैमं सहस्रांशुसमप्रभम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम्।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते॥
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद् द्विधा॥
ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे।
मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम्॥ इति॥६॥

अत्रैव पक्षान्तराण्याह--

कपिलः प्रधानमाह द्रव्यादीन् कणभुगस्य विश्वस्य।
कालं कारणमेके स्वभावमपरे परे जगुः कर्म॥७॥

कपिलः सांख्याचार्यो जगतः कारणं प्रधानमाह कथयति। सत्त्व-रजस्तमसां त्रयाणां गुणानां सुखदुःखमोहलक्षणानां प्रकाशप्रवृत्तिनियमार्थानां साम्यावस्था प्रधानमुच्यते। प्रधानमव्यक्तं प्रकृतिरिति पर्यायाः। प्रकृतेर्महान् भवति। महान् बुद्धिरध्यवसाय इति पर्यायाः। तस्या बुद्धेः सत्त्वाधिकाया धर्मो ज्ञानं वैराग्यमैश्वर्यमिति धर्माः। तस्या एव तमोऽधिकाया अधर्मोऽ-ज्ञानमवैराग्यमनैश्वर्यमित्यध [ति ध] र्माः। अध्यवसाय। निश्चयः। यथा पुरुष एवायं गौरेवायमश्व एवायमिति। ततो महत्तत्त्वादहङ्कारो भवति। अभिमान इत्यर्थः। यथाहं कुलजोऽहं सुरूपोऽहमीश्वर इत्यादि। अहङ्कारात् षोडशको गणो भवति। तद्यथा--एकादश[1]करणानि सत्त्वाधिकादहङ्कारात्। तानि पञ्च बुद्धीन्द्रियाणि। श्रोत्रं त्वक् चक्षुषी जिह्वा नासिकेति। पञ्च कर्मेन्द्रियाणि। वाक्पाणिपाद-पायूपस्थं चेति। एकादशं मनस्तच्च सङ्कल्पात्मकम्। सङ्कल्पोऽभिलाषः स्पृहेति पर्यायाः। तमोऽधिकादहङ्कारात् पञ्च तन्मात्राणि भवन्ति। तद्यथा--शब्द-तन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति। एभ्यः पञ्चभ्यः

---

१. करणं साधनतमं क्षेत्रगात्रेन्द्रियेष्वपीति-अमरः। अतोऽत्र करणशब्देनेन्द्रियं गृह्यते।

पञ्च महाभूतानि भवन्ति आकाशवाय्वग्निजलपृथिव्याख्यानि। तेभ्यः शरीरिणां शरीराणि। यतः पञ्चमहाभूतमयानि शरीराणि। एवं प्रधानं चिद्रूपस्य पुरुषस्य विश्वं भोगार्थं मोक्षार्थं च सृजति। भुक्तभोगस्य वैराग्योत्पादनं मोक्षावाप्तिरिति। तथा च [1]कपिलाचार्यः —

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि॥
अध्यवसायो[2] धर्मो ज्ञानं वैराग्यमैश्वर्यम्।
सात्त्विकमेतद् रूपं तामसमस्माद्विपर्यस्तम्॥
अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः।
ऐन्द्रियमेका[3]दशकं तन्मात्रपञ्चकश्चैव॥
सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्॥
बुद्धीन्द्रियाणि कर्णत्व[4]क्चक्षूरसननासिकाख्यानि।
वाक्पाणिपा[5]दपायूपस्थं कर्मेन्द्रियाण्याह॥
सङ्क[6]ल्पकमत्र मनस्तच्चेन्द्रियमुभयथा समाख्यातम्।
अन्तस्त्रिकालविषयं तस्मादुभयप्रचारं तत्॥
रूपा[7]दिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दा[8]स्तु पञ्चानाम्॥
स्वालक्षण्यं वृत्तिस्त्रयस्य[9] सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च॥

---

१. सांख्यतत्त्वकौमुद्यामीश्वरकृष्णस्यैताः कारिकाः।
२. सम्प्रति सांख्यतत्त्वकौमुद्यामध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यमिति पाठः।
३. सम्प्रति सांख्यतत्त्वकौमुद्यामेकादशकश्च गण इति पाठः।
४. सम्प्रति सांख्यतत्त्वकौमुद्यां चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानीति पाठः।
५. सम्प्रति सांख्यतत्त्वकौमुद्यां वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुरिति पाठस्तत्र च छन्दोभंगः।
६. सम्प्रति सांख्यतत्त्वकौमुद्यामस्याः कारिकायाः स्थाने "उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्। गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च" इतीयं कारिकाऽस्ति
७. सम्प्रति सांख्यतत्त्वकौमुद्यां शब्दादिषु—इति पाठः।
८. सम्प्रति सांख्यतत्त्वकौमद्यां नन्दाश्चेति पाठः।

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः॥ इति॥

द्रव्यादीन् कणभुगस्य विश्वस्येति। कणभुक् कणादोऽस्य विश्वस्य द्रव्यादीन् पदार्थान् कारणमाह। द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट्पदार्थाः। तत्र द्रव्यं नवविधम्। तद्यथा--आकाशवाय्वग्निजलपृथिव्याख्यानि पञ्च महाभूतानि। आत्मा मनः कालो दिक् चेति। तथा च तद्वाक्यम्--

खादीन्यात्मा मनः कालो दिशश्च द्रव्यससंग्रहः। इति।

द्रव्याश्रिताश्चतुर्विंशतिर्गुणाः। के ते? उच्यन्ते। तत्रात्मगुणा नव विशेषगुणाः। तद्यथा--बुद्धिरिच्छा सुखं दुःखं प्रयत्नः संस्कारः पुण्यं पापं द्वेषश्चेति। तथा च--

बुद्धीच्छासुखदुःखप्रयत्नसंस्कारपुण्यपापानि।
द्वेषश्चेति।

नवामी गुणास्त्वनित्याः सुखदुःखादिभुजां कदाचिद् भवन्ति कदाचिन्न भवन्ति। एते विशेषगुणाः। महाभूतानां खादीनां पञ्च यथाक्रमं शब्दादयो गुणाः समाश्रिताः। तथा संख्या परिमाणं पृथक्त्वं संयोगविभागौ परत्वापरत्वे स्नेहो द्रवत्वं गुरुत्वं च। एते चतुर्विंशतिर्गुणाः। पञ्चविधं कर्म। उत्क्षेपणमधिक्षेपणमाकुञ्चनं प्रसारणं गमनं चेति। सामान्यं जातिः। सा च द्विविधा परमपरं च। सामान्यं परं सत्ताख्यं महाविषयत्वात्। यतो द्रव्यादयस्त्रयः पदार्थाः सत्तया व्याप्ताः। अपरं [1]द्रव्यगुणकर्मत्वादि। नित्यद्रव्यवृत्तय उक्ता विशेषाः। नित्यानि द्रव्याण्यात्माकाशपरमाणुप्रभृतीनि। अपृथक्सिद्धानामाधाराधेयभावः संबन्धः समवाय इति। एतेषां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसस्य मोक्षस्य हेतुः। साधर्म्यं सादृश्यं वैधर्म्यं वैलक्षण्यं भेदो विशेष इति साधर्म्यवैधर्म्यज्ञानमवबोधो निःश्रेयसस्य मोक्षस्य हेतुः। एवमेते द्व्यणुकादिक्रमेण कार्यं निर्वर्तयन्ति। चतुर्विधाः परमाणवः क्षितिजलाग्निवायूनाम्। द्वाभ्यां परमाणुभ्यां द्व्यणुकमारभ्यते त्रिभिः परमाणुभिस्त्र्यणुकमारभ्यत इति क्रमेण स्थूलकार्यस्य द्रव्यस्योत्पत्तिः। एवं जगत्सम्भवः।

---

१. द्रव्यत्वगुणत्वकर्मत्वादीति नैयायिकसम्मतः पाठः।

कालं कारणमेक इति च। केऽपि कालकारणिकाः पौराणिकाः कालं कारणमाहुरुक्तवन्तः। कालस्य लक्षणम् —

नित्यमेकं विभुं द्रव्यं परिमाणं क्रियावताम्।
व्यापारव्यतिरेकेण कालमेके प्रचक्षते॥
आदित्यग्रहतारादिपरिस्पन्दमथापरे ।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः॥ इति।

एवं जगतः कालः कारणं कालः प्रजाः सृजति स एव संहरति। तथा च तद्वाक्यम् —

कालः सृजति भूतानि कालः संहरति प्रजाः।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः॥ इति।

यथा कालेन बलिरिन्द्रः कृतः कालेन ततो निवर्तितः काल एव पुनरेवं कर्तेति।

स्वभावमपर इति। अपरे अन्ये लौकायतिकाः स्वभावं जगतः कारणमाहुः। स्वभावादेव जगद्विचित्रमुत्पद्यते स्वभावतो विलयं याति। तथा च तद्वाक्यम्—

कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च।
माधुर्यमिक्षोः कटुतां च निम्बे स्वभावतः सर्वमिदं प्रवृत्तम्॥ इति।

परे जगुः कर्मेति। परे अन्ये मीमांसका जगतः कर्म कारणं जगुरुक्तवन्तः। शुभाशुभकर्म प्राणिनां पुण्यापुण्यरूपं जगतः कारणं शुभेन कर्मणा शुभफलभोगी जायते अशुभेन विपरीतमिति। तथा च —

पूर्वजन्मार्जितं यच्च कर्म पुंसां शुभाशुभम्।
तदेव सर्वजन्तूनां सृष्टिसंहारकारणम्॥ इति॥ ७॥

एवमनेकजन्मकारणेषूक्तेषु किं जगत्कारणं निश्चितमित्यत्र निषेधमाह —

तदलमतिविस्तरेण प्रसङ्गवादार्थनिर्णयोऽतिमहान्।
ज्योतिःशास्त्राङ्गानां वक्तव्यो निर्णयोऽत्र मया॥८॥

अलमिति वारणपक्षहेतुर्दृष्टान्तैर्दर्शनान्तराणि निवर्त्य कारणनिश्चयः। स चेह प्रस्तुतः, कुतो जगदुत्पत्तिरिति। प्रसङ्गादतिविस्तरेण वादः प्रसङ्गवादः, प्रसङ्गवादे

अतिमहानतीवार्थस्य निर्णयो विचारो य आरब्धस्तस्यालं भवतु। अनेनास्माकं न किञ्चित् प्रयोजनम्। यतो मया एतस्मिन् शास्त्रे ज्योतिःशास्त्राङ्गानां निर्णयो वक्तव्यः। ज्योतींषि ग्रहनक्षत्रादीनि तान्यधिकृत्य कृतं शास्त्रं ज्योतिःशास्त्रं ग्रहनक्षत्रयोगेन जगतः शुभाशुभसम्भवात्। ज्योतिःशास्त्रे यान्यङ्गानि गणितहोराशाखाख्यानि तेषां निर्णयो निश्चयो वक्तव्यः कथनीयः। यद्यपि गणितहोरास्कन्धौ प्रागेवोक्तौ तथाप्यत्राङ्गत्वेनोदाहृतौ। पुरुषलक्षणादौ जातकं समागमादिषु गणितमिति। अथवा तदुक्तस्यात्र फलकथनं क्रियत इति ॥८॥

अथ ज्योतिःशास्त्रस्वरूपं तत्र संज्ञान्तराण्याह —

ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योंपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ॥९॥

ज्योतिःशास्त्रं कीदृशम्। अनेकभेदविषयम्। भेदो विशेषः। अनेको बहुप्रकारो भेदोऽनेकभेदः। अनेकभेदो विषयो यस्य तद्भिद्यतेऽस्मादिति भेदः। यथा श्वेतवर्णयोगात् कृष्णो वर्णो भिद्यते। एवं बहुप्रकारो भेदः स्कन्धत्रयमध्यनिर्दिष्टस्तस्य विषयं गोचरं स्कन्धत्रयाधिष्ठितं स्कन्धत्रयेण गणितहोराशाखाख्येनाधिष्ठितं व्याप्तम्। तत्कात्स्न्योंपनयस्येति। तस्य ज्योतिःशास्त्रस्य कात्स्न्येन निरवशेषेणोपनयः कथनं यस्मिन् शास्त्रे तच्छास्त्रं संहितेति मुनिभिर्गर्गादिभिर्नाम सङ्कीर्त्यते कथ्यते। तथा च भगवान् गर्गः —

गणितं जातकं शाखां यो वेत्ति द्विजपुङ्गवः।
त्रिस्कन्धज्ञो विनिर्दिष्टः संहितापारगश्च सः॥

स्कन्धेऽस्मिन्निति। अस्मिन् ज्योतिःशास्त्रे ग्रहाणामादित्यादीनां या गतिर्गमनं प्रतिराशौ सञ्चरणं सा येन ज्ञायते तद् गणितं तस्य च तन्त्रमिति संज्ञा। असौ गणितस्कन्धस्तन्त्राभिधानः। होराऽन्योऽङ्गविनिश्चयश्च कथित इति। प्रतिष्ठायात्राविवाहादीनां लग्नग्रहवशेन च शुभाशुभफलं जगति यया निश्चीयते सा होरा।

अन्यो द्वितीयोऽङ्गविनिश्चयः। होराख्यः कथित इति। होरास्कन्धो द्वितीयः। स्कन्धस्तृतीयोऽपर इति। अपरस्तृतीयोऽयं स्कन्धो वक्ष्यमाणः शाखाख्य इति ॥९॥

अथ स्कन्धत्रयविभागमाह —

वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः।
होरागतं विस्तरशश्च जन्म यात्राविवाहैः सह पूर्वमुक्तम् ॥१०॥

ताराग्रहा भौमादयस्तेषां वक्रं प्रतीपगमनम्। यथा भौमादिको ग्रहो मेषस्थो मीनं याति स प्रतीपगतित्वाद्वक्रित इत्युच्यते। अनुवक्रं स्पष्टगतित्वम्। वक्रां गतिं त्यक्त्वा पुनः स्पष्टां गतिमाश्रितोऽनुवक्रित इत्युच्यते। अस्तमयस्तेषामेव ग्रहाणां सूर्यवशेन भवति। यः कश्चिच्चन्द्रादिको ग्रहः सूर्यसमीपवर्ती भवति स च रविकरनिकराभिभूतो गगने लोकानामालोकं नायाति तदास्तमित इत्युच्यते। तथा च स एव ग्रह आदित्यमण्डलाद्विप्रकृष्टो यदा भवति तदा नभसि दृश्यते स चोदित इत्युच्यते। एवं वक्राऽनुवक्रास्तमयोदयाद्यास्ताराग्रहाणाम्। आदिग्रहणात् परस्परं ग्रहाणां युद्धं चन्द्रेण नक्षत्रैश्च सह समागमो ज्ञेयः। एतदप्युपलक्षणार्थम्। मध्यगतिस्तिथिनक्षत्रच्छेदः स्फुटगतिस्त्रिप्रश्नश्चन्द्रार्कग्रहणे उदयास्तमयौ शृङ्गोन्नतिः समागमस्ताराग्रहसंयोग इत्येते मया करणे पञ्चसिद्धान्तिकायामुक्ताः कथिताः सर्व एव। तथा होरागतं विस्तरशश्च जन्मेति। विस्तरशो विस्तरेण प्रदर्शनेन जन्म जातकं होरागतं होराशास्त्रसंबन्धं यात्राविवाहैः सह पूर्वमादावेवोक्तं कथितम्। एतदुक्तं भवति —बृहज्जातकं बृहद्यात्रा बृहद्विवाहप्रकरणं च मयादावेव विरचितमिति ॥१०॥

अथात्र वक्ष्यमाणे स्कन्धेऽनुपयोगिकं त्यक्त्वा यत्सारं तद्वक्ष्यामीत्येतदाह —

प्रश्नप्रतिप्रश्नकथाप्रसङ्गान्
स्वल्पोपयोगान् ग्रहसम्भवांश्च।
सन्त्यज्य फल्गूनि च सारभूतं
भूतार्थमर्थैः सकलैः प्रवक्ष्ये ॥११॥

प्रश्नो यथा। हिमवदादौ स्थितो गर्गादिको मुनिः शिष्येण क्रौष्टुकिपूर्वेण पृष्टः —भगवन्! ज्योतिःशास्त्रं ज्ञातुमिच्छामि किं स्वरूपं केनोत्पादितं किं तेन करणमित्यादि। प्रतिप्रश्नो यथा। गर्गादिको मुनिः शिष्यवचनं श्रुत्वाह यत्त्वयाऽहं पृष्टस्तत्ते वक्ष्यामीति। तथा च प्रश्नः —

हिमवच्छिखरे रम्ये नानाधातुविचित्रिते।
नानाद्रुमलताकीर्णे नानातीर्थसमाश्रिते॥

हंसकारण्डवक्रौञ्चचक्रवाकविराजिते ।
सिद्धगन्धर्वसङ्कीर्णे देवर्षिगणसेविते॥

हुताग्निहोत्रमासीनमाश्रमे देवदर्शनम्।
वृद्धगर्गं द्विजश्रेष्ठं मुनिभिः परिवारितम्॥

अभिगम्य समीपस्थो विनयात् संश्रितव्रतः।
क्रौष्टुकिः परिपप्रच्छ प्रश्नं लोकानुकम्पया॥

भगवन् मुनिशार्दूल सर्वज्ञानविशारद।
ज्यौतिषं श्रोतुमिच्छामि परं कौतूहलं हि नः॥

ज्यौतिषं ज्ञानमुत्पन्नं कथमेतदनुत्तमम्।
केन वा पूर्वमेवोक्तमृषिणा दैवतेन वा॥

किमस्य कारणं लोके परिज्ञानाच्च किं फलम्।
नामतश्चानुपूर्वेण ब्रूहि मे मुनिसत्तम॥

इति मुनिप्रश्नः।
तथा च प्रतिप्रश्नः —

एवमुक्तस्तु मुनिना वृद्धगर्गो महातपाः।
प्रोवाच तानृषीन्सर्वान्क्रौष्टुकिप्रमुखस्थितान्॥

श्रूयतां स्वर्ग्यमायुष्यं धर्म्यं पुण्यं यशस्करम्।
ज्ञानविज्ञानसम्पन्नं द्विजानां पावनं परम्॥

कालज्ञानमिदं पुण्यमाद्यं हि ज्ञानमुत्तमम्।
सिसृक्षुणा पुरा वेदानेतत्सृष्टं स्वयम्भुवा॥

वेदाङ्गमाद्यं वेदानां क्रियाणां च प्रसाधकम्।
ज्योतिर्ज्ञानं द्विजेन्द्राणामतो वेद्यं विदुर्बुधाः॥

ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम्।
ज्योतिर्ज्ञानं च यो वेत्ति स तु वेत्ति परां गतिम्॥

चन्द्रनक्षत्रताराणां ग्रहाणां भास्करस्य च।
ज्योतिषामपि यज्ज्योतिर्ज्योतिषामपि पावनम्॥

तद्भावभाविनं युक्तं तं देवा ब्राह्मणं विदुः।
तस्मात्पूर्वमधीयीत ज्योतिर्ज्ञानं द्विजोत्तमः॥

धर्मसूत्रं ततः पश्चाद्यज्ञकर्मविधिक्रियाम्।
यज्ञाश्चायुष्यहोमाश्च चूडोपनयनादि च॥

साम्राज्यं पौर्णमास्यं च पितृदैवततर्पणम्।
सर्वारम्भाश्च जगतो लोके च विविधाः क्रियाः॥

न ज्यौतिषं विना तासां प्रवृत्तिरुपलभ्यते।
आप्यायनं च देवानां यज्ञाः प्रोक्ताः क्रियाश्रयाः॥

यज्ञार्थमपि च प्रोक्ताः स्वयं वेदाः स्वयम्भुवा।
न ते च सम्प्रवर्तन्ते कालाज्ञानात् कथञ्चन॥

यज्ञक्रिया अहोरात्रं क्रियाश्चान्या जगद्धिताः।
तस्मात् पुण्यं समं वेदैर्यज्ञचक्षुः सनातनम्॥

स्वर्ग्यमध्येयमव्यग्रैर्ब्राह्मणैः शंसितव्रतैः।
ततः कालप्रसिद्ध्यर्थं राशयः पूर्वमीरिताः॥

अहोरात्रविभागश्च तिथीनां च क्रियाविधिः।
सोमसूर्यविलग्नानामृक्षाणां चापि निश्चयः॥

आदानयोगभोगाश्च विसर्गश्चार्कसोमयोः।
दिनर्तुपक्षमासानां चन्द्रार्काणां विनिश्चयः॥

कर्मोपभोगमानानां लेख्यप्रश्नविधिस्तथा।
एवमाद्याः[1] समस्ताश्च क्रिया ज्यौतिषसंश्रिताः॥ इति।

एवमादिकाः प्रतिप्रश्नाः।

तथान्यान् कथाप्रसङ्गानिति। आख्यायिका कथा तत्र प्रसङ्गः प्रसक्तिः।

---

१. एवमासां बहुविधा इति अ० पुस्तके पाठः।

यथा भगवता पराशरेण पुष्करस्थाने कथा कृता। पुरा खलु सुरासुराणां महति महायुद्धे विग्रहे विपरीतविग्रहे भार्गवप्रयुक्ताभिचारोपहतवीर्यप्रभावाः सुराः शत्रुविक्रमोपहततेजसः स्वयम्भुवं शरणमभिजग्मुः। शुक्र एव वो गतिरित्यादिष्टाः सुराः शुक्रमभिसमेत्याऽऽनतास्ते देवाः पवित्रैर्मन्त्रैराद्यैरभिष्टुतवन्तः। सर्वरत्नधनधान्याधिपत्यं यज्ञभागं चास्मै दत्त्वा पैतामहा ऋषयो देवताश्च वरमभियाचयाम्बभूवुः। अनेकविधप्रयुक्तस्याद्यधर्मस्य परन्तपस्य यथा न स्यान्नाशस्तथा भगवान्नो विधत्ताम्। यथा च नो बृहस्पतिरुपाध्यायस्तथा भगवानपि भवत्विति। शुक्रः परमपीत्युक्त्वा देवान् शान्तिस्वस्त्ययनादिभिः पुनस्तेजसाभिवरयामास। नहि वेदमन्त्रकर्मणां यथावत्प्रयुक्तानां किञ्चिदप्यसाध्यं पश्यामस्तेषां शुद्धाशुद्धमन्त्राचार्यप्रतिग्रहीतृदेशकालकरणद्रव्यसाधनसामग्र्यम्। इतरथा हि मिथ्या[1] हीनमन्त्रप्रयोगा यजमानस्यैवाभिचाराय भवन्ति। पुरा खलु सुराधिपत्यमाजिहीर्षुरतिप्रवृद्धवीर्योत्सेकाद्वृत्रः पुरन्दरमभिचचार। अथैनं[2] कर्मविधिसमाप्ताविन्द्रशत्रुवृद्धिवचनसुरापराधिनमिन्द्र एव शत्रुमभिवृद्धो वृत्रमभिजघान। एवमनियतकर्मारम्भाः शतशः सुरा विलयं जग्मुः। अतो विधिहीनकर्मारम्भादनारम्भ एव श्रेयान्। तत्राऽभिचारकर्माऽथर्ववेदमन्त्रोपदिष्टैरुपकल्पयेदित्यादि।

एवमादिकाः प्रश्नाः प्रतिप्रश्नाः कथाप्रसङ्गाः स्वल्पोपयोगाः प्रायो न कुत्रचिदुपयुज्यन्ते। आचार्येण यद्यपि रोहिणीयोगादिष्वीषत्कथाप्रसङ्गः प्रदर्शितस्तथापि न दोषः। यत आचार्येण सहृदयहृदयाह्लादकं शास्त्रं कृतं तावन्मात्रेण तेषां चित्तरञ्जनं भवति।

तथा ग्रहसम्भवांश्चेति। ग्रहाणामादित्यादीनां सम्भवा उत्पत्तयः। कुतः सूर्यादय उत्पन्ना इति। तथा च भगवान् पराशरः —

हिमवति हिमावदातेऽवनिधरवरशिखरविपरिवर्तिततमिव विवस्वन्तं भगवन्तं पराशरमभिसङ्गम्य विनयावनतः कौशिकोऽभ्युवाच। भगवन्! सर्वात्मा कालगतिविधाता सूर्यस्तस्य चरितमभिशुश्रूषामहे। द्वादश च श्रूयन्ते। एक एव तपन् दृश्यते। शीतोष्णवर्षाभ्रानिलानां कथमस्मात् प्रादुर्भावः। कथं चर्त्तवस्तन्मानमनुवर्तते। मार्गप्रमाणवर्णसंस्थानादि शुभाशुभफलमखिलमभिव्याहर्तुमर्हसीति।

---

१. मिथ्याहोममन्त्रप्रयोगा इति अ० पु० पाठः।
२. अथैनं श्रेष्ठकर्मेति अ० क० पु० पाठः।

तमुवाच भगवान् पराशरः—पुरा खल्वपरिमितशक्तिप्रभाप्रभाववीर्यायुरारोग्यसुखैश्वर्यधर्मसत्त्वशुद्धतेजसः पुरुषा बभूवुः। तेषां क्रमादपचीयमानसत्त्वानामुपचीयमानरजस्तमस्कानां लोभः प्रादुरभवत्। लोभात् परिग्रहं परिग्रहाद् गौरवं गौरवादालस्यमालस्यात्तेजोऽन्तर्दधे। अथ भगवान् परमर्षिरचिन्त्यः पुरुषो नारायणः स्ववेद्यमाद्यमात्मानं द्वादशधा कश्यपाददितेर्जनयामास। येनानन्तं पुनर्जगदभवत्। यान् द्वादशादित्यानाचक्षते। इन्द्रो विष्णुर्विवस्वान्मित्रोंऽशुमान् धाता त्वष्टा पूषा वरुणोऽर्यमा भगः सवितेति। अथ सवितारं पितामहोऽतितुष्टाव वराहं चैनं वरयाञ्चकार। यथा द्वादशादित्येभ्यस्त्वामुपस्थास्यतीति। मत्तो योगस्तेजो रुद्रात् स्वयमग्नीषोमौ वायुरमृतं मर्त्यं चेति। चन्द्रस्य[1] पराशरमुनिना सम्भवो नोक्तः।

राहोर्यथा—अथ भगवन्तमनिलवलसमीरितप्रोद्धतहुतवहप्रभाभासुरमवितथदर्शनमुदासीनमाश्रमस्थमभिसंक्रम्य कौशिको विनयात् पराशरमुवाच। भगवन्! सकलभुवनविलयोद्भवस्थितिविकरणौ कथमुपरज्येते सूर्याचन्द्रमसौ गृह्णाति को वा ग्रहो ग्रहणप्रयोजनं फलं वा किमस्य ग्रहणे नियतमनियतं चेति।

तमुवाच भगवान् पराशरः—पुरा पुरुहूतपितरं कश्यपमपत्यार्थमकाले सिंहिका अभियाचयामास। तस्यै मुनिरकालयाञ्चाकोपाद्दारुणं यमकालान्तकोपमं सुतमदात्। यं राहुरित्याचक्षते कुशलाः। स जातमात्र एवाऽदितिसुतसङ्घरावमर्दादनु विमुखीकृतः क्रोधाद्भिमवति दिव्यमत्युग्रमयुतं वर्षाणां तपोऽतप्यत। स पितामहाद्दिवं चरणममरतां सुरविजयमर्कचन्द्रसम्भक्षणं च वरमभिवरयामास। तस्मै भगवानमरगुरुः स्वयम्भूः प्रहसन्नुवाच। अतिवरमशक्तस्त्वमेतौ जरयितुं किन्त्वेवमस्त्वित्युक्त्वाऽन्तर्हिते भगवति दिनकररजनिकरावभिदुद्राव राहुः। ततो हरिररिविमथनं चक्रमुपरि परिक्षिप्यास्य शिरश्छित्त्वोवाच। सर्वमवितथं पितामहवचो भवतु स्वे स्वे युगे पर्वणि ग्रहणं कुर्वन् जगतः शुभाशुभानां कर्ता भविष्यसीति।

भौमस्य यथा—अथ भगवान् जगदादिसर्ग एव प्राक् प्रजापतिः सिसृक्षयेश्वरः करेण क्रोधात् स्वतेजसोऽभिनिष्यन्दमग्नि तेजस एव जुहाव। अथ तदग्नितोऽवनिमुपसृतमुर्व्यग्निसर्वतेजोभिः सम्भृतमुदतिष्ठद्यं प्रजापतिं प्राजापत्यं भौम-

---

१. भास्कराचार्यस्तु सिद्धान्तशिरोमणिशृङ्गोन्नत्यधिकारस्य ८–९ श्लोकयोरुपपत्तौ—"अत्र हरिहरविरञ्चिवरलाभश्रवणसहर्षपुत्रकामात्रिनेत्रविगलितजलबिन्दुरयमिन्दुः पितामहेन ग्रहत्व आकाशे निवेशित इति श्रूयते स्मृतिषु पुराणेषु" इति चन्द्रोत्पत्तिकारणं विलिखति।

मिति मन्यन्ते। स स्वयम्भुवो नियोगादृक्षचक्रमनुचरन्नशेषग्रहसामान्यचाराद्वक्रानुवक्राभ्यां चराचरं जगद्विशिष्टाविशिष्टेन[1] कर्मणा युनक्तीति।

बुधस्य यथा—प्रागसुरसुरसन्निपातेऽसुरगुरुमायया भिमुह्यन्तः सुराः स्वयम्भुवमभिसङ्गम्योचुः। भगवन्निद्राभिभूताः स्मः। स्वपतां नो द्विषद्विघातहेतुमभिध्यायस्वेति। स्वयम्भुवा ग्रहपतिरपां तेजः सोमोऽभिध्यायोक्तः। सुतस्ते त्रिभुवनोद्भावनविलयनगोपायनप्रजापतिर्भविता। सकलविबुधगणान् बुधोऽभिरक्षते। ततो जगदभिगुप्त्यर्थं गतिवर्णचारमार्गास्तमनोदयप्रवासैर्जगतः शुभाशुभकरो भवतीति।

बृहस्पतेर्यथा—अथामरवरगुरुमधिकृत्य गुरुर्भगवान् पराशरः शिष्येणाभिनन्दितः सुरगुरुचरितमखिलमभिप्रणम्य गुरुमेवोवाच। आदिसर्ग एव पितामहोऽङ्गिरसं मनसाभिजज्ञे। अङ्गिरसोऽभिमुखाद् ब्रह्मधामैव त्रिभुवनगोप्ता प्रजापतिर्भगवान् बृहस्पतिरजायत। तमुत्पन्नमात्रमेव स त्रैलोक्याधिपतिः[2] पिनाकभृत् सुरवरगुप्तर्थं वरार्हं वरयामास। पितामहमिव त्वां प्रभाप्रभावर्द्धिसिद्धियोगज्ञानमन्त्रब्रह्मकर्माण्युपस्थास्यन्ति। गुरुरपि च सुराणां जगति शुभाशुभकारी त्वमेव भवितेति।

शुक्रस्य यथा—प्राग्भगवन्तममलतपसमनेकर्षिगणपरिवृतमशक्तदृशमपगतसंशयमुपेत्य संशयात् कौशिकः पराशरं विनयादवोचत्। भगवन्! दितिसुतगुरुचरितमिति यदग्रे भगवानुवाच तत्संशयो[3] नः कथममरवरवपुषस्तस्यायत्ताः प्रजाभावाभावास्तमुवाच भगवान् पराशरः। प्रागादिसर्गे च भगवतस्त्रिलोचनस्य शम्भो रोरूयमाणस्य पितामहो भव इति यन्नामाकरोत्तस्यापो मूर्तिः सा भृगुकन्यका यस्यामुशना यं शुक्रं जनयामास स पुराऽयुतवर्षकेण कणधूम्रव्रतेन त्रिभुवनगुरुं पिनाकिनमाराध्य सकलधनपतित्वममरवरवपुः प्रज्ञाप्रभावतपःश्रुततेजोऽधिकत्वमसुरगुरुत्वमर्कवर्षनिग्रहं प्रजापतित्वं च लेभे। तस्य भगवतश्चरितमुदयास्तमयर्क्षमार्गवर्णवीथीमण्डलैरुपदिशन्तीति।

सौरस्य यथा—अथ भगवतः पुरा आदियुग एवातिभासुरमभितपतो विवस्वतस्तेजसाऽभिव्यथ्यमानेषु भूतेषु स्वयं स्वयम्भूर्भगवन्तं विवस्वन्तमुवाच।

---

१. भूतग्राममिति अ० क० पु० पाठः।
२. सदसदधिपतिरिति अ० क० पु० पाठः।
३. तस्मात्संशय इति तत्संशय एवमत्र विग्रहः कार्यः।

अलमतितेजसा। न देवदेवा अपि तत्तेजसः परमं बलमतिसोढुं समर्थाः! किमङ्ग पुनः प्रजाः। प्रजापतिनेत्यादिष्टो र्विरतितेजोनिवारणादतिक्रुद्धः स्वभावात् क्रोधमेवापत्यं जनयामास यं शनैश्चरमित्याचक्षत इति।

अगस्त्यस्य यथा––अथ भगवन्तममितयशसं पराशरं कौशिकोऽभ्युवाच। भगवन्! याम्यायां दिशि ज्योतिष्मद्ग्रहरूपमुदितमालक्ष्यते नक्षत्रग्रहमार्गव्युत्क्रान्त-चरितं न वेद्मि। किं तत्किमर्थं वा प्राचीं दिशमपहाय दक्षिणेन प्रावृट्कालान्तोदितं शरत्कालान्तोदितं वा कतिपयाहान्यदृश्यं भवति। तन्नो भगवन्! वक्तुमर्हसीत्येव-मुक्तो भगवानुवाच––श्रुतपूर्वस्ते पृथिव्यां मेरुमन्दरातिरिक्तप्रभावः शैलराड् विन्ध्यो नाम। स स्ववीर्यबलसमुच्छ्रायविशेषमन्विष्यमाणो दिव्यं वर्षसहस्रमुग्रं तपस्तेपे। स पितामहादहन्यहनीषुपातप्रमाणमुच्छ्रायेण वर्द्धस्वेतीप्सितं वरं लेभे। तस्यातिवृद्धया दिवसकर आवृतस्तेनान्धमिव जगदभवत्। ततो देवर्षिगन्धर्वो-रगयक्षरक्षांसि पितामहमभिजग्मुः। भगवन्! विन्ध्यवृद्धया जगदवसीदत इत्यूचुः। ततः स्वयम्भुवा अगस्त्यनामा महर्षिरनेकवर्षसहस्रसम्भृततया ध्यात उक्तश्च। त्वमेकः शक्तो विन्ध्यातिवृद्धिनिवर्तनं कर्तुं कृते चास्मिन् कर्मणि नभसि विराजि-ष्यसे। दर्शनादेव ते जगति सर्वविघ्नविनाशो भविष्यति। एवमस्त्विति कृत्वा महर्षिरगमद्विन्ध्यसकाशम्। उवाचैनमनन्तरं मे प्रयच्छ तीर्थयात्रां करिष्यामि। अनागते च मयि त्वया न वर्द्धितव्यम्। इत्येवमुपश्रुत्य तपःप्रभावविस्तरस्याभिज्ञो महर्षेर्विन्ध्याचलश्चलच्छिखरपादो भयविषादविक्लवमतिरुवाच। भगवन्! बृहदस-ङ्कीर्णमविषममनेकतरुगणोदकमेकदेशमार्गमायोजयिष्यामि येन[2] भगवान् यास्य-तीत्येवमुक्तो महर्षिश्चुकोप। क्रोधरक्तान्तनेत्रोऽवदत्। ममाज्ञाक्षोभात् कदा-चित् सर्वथैव न भविष्यसीति। ततः शैलस्तत्प्रभावभयभीतः स्वभावमुपगतोऽनागते भगवति न वृद्धिं यास्यामीति। ततो महर्षिर्दक्षिणां दिशमगमत्। स एषोऽगस्त्यः शैलवृद्धिव्याघातनिमित्तं न प्रत्येति दक्षिणस्यामुदेति तस्यामेवास्तं गच्छतीति।

केतोः केतुचारोक्ता एवोत्पत्तिः। तथा च भगवान् गर्गः—

जातस्तूशनसः शुक्रः सूर्यपुत्रः शनैश्चरः।
पुत्रः सोमस्य तु बुधो भूमेरङ्गारकः स्मृतः॥

---

१. विष इति अ० क० पु० पाठः।
२. तेनेति अ० क० पु० पाठः।

पुत्रमङ्गिरसः प्राहुर्बृहद्वाक्यं बृहस्पतिम्।
राहुः स्वर्भानुपुत्रः स्यात् पुत्रः केतुर्विभावसोः॥
मनसा ब्रह्मणा ख्यातावुभौ सोमदिवाकरौ। इति।

ग्रहसम्भवानेतानपि स्वल्पोपयोगान् सन्त्यज्य त्यक्त्वा। तथा अन्यान्यपि फल्गून्यसाराणि यान्ययुक्तिमद्भिर्गणितगोलबाह्यैर्विरुद्धान्यभिहितानि। यथा भुवनप्रविभागे भूमेर्महाप्रमाणत्वं दर्पणोदराकारतां च कथयन्ति। मेरोश्च महाप्रमाणं वृत्तत्वं तत्पृष्ठासक्तो ध्रुवश्च ग्रहनक्षत्राणि चावलम्बमानानि।

तथा च भगवान् पराशरः--

सप्तषष्टिसहस्राण्यशीतियोजनकोट्यो भूर्यत्पृथिवीमण्डलं परमस्मादगम्यं तमः। तन्मध्ये हिरण्मयो मेरुश्चतुरशीतियोजनसहस्रोच्छितः षोडश चाधस्तात् त्रिगुणविस्तारायामो यं स्वर्गमाचक्षते। तन्मध्येनार्कचन्द्रौ ज्योतिश्चक्रं च पर्येति। तथा च--

मेरोरर्धविभागे सूर्यश्चन्द्रो द्वितीयके त्वटते।
ग्रहनक्षत्रतारकासहितौ द्वौ कृतैककालविभागौ॥

इति गोलकशास्त्रे निश्चयः। तस्य छायां निशामिच्छन्ति कुशलाः। एवमादिकं बहुप्रकारमस्माकं गोलज्ञानेन सिद्ध्यति। तथा च--

मेरोरर्धप्रमाणेन सूर्यस्य गतिरुच्यते।
भगणस्याथ पञ्चाशदादित्यादुपरि स्थिता[1]॥
भगणात् सप्तषष्टिस्तु सोमस्य गतिरुच्यते।
अध्यर्धं तु गतेः सोमाद्भार्गवस्य गतिः स्मृता॥
बृहस्पतिर्बुधश्चैव प्राजापत्यः शनैश्चरः।
केतवश्च ग्रहाः सर्वे ज्ञेयाः सोमसमा गतौ॥
निमेषान्तरमात्रेण योजनानां शतं शतम्।
पर्येति भगवानर्को भावयन् भूतभावनः॥
अन्ते निम्नोन्नता मध्ये कूर्मपृ[2]ष्ठोपमा मही।
त्रिगुणाद् भूपरीणाहादष्टभागो दिगन्तरम्॥

---

१. स्मृता इति अ० क० पु० पाठः।
२. पृष्ठस्थितेति अ० क० पु० पाठः।

एवमादिकानि वाक्यानि निरुपपत्तिकानि गोलविरुद्धान्यसाराणि सन्त्यज्य यत्सारभूतं श्रेष्ठं लोकप्रत्यक्षजननं[1] भूतार्थं सत्यार्थं दृष्टप्रत्ययं सकलैः समग्रैः परिपूर्णैरर्थैरनाकाङ्क्षैः प्रवक्ष्ये कथयिष्य इति ॥११॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ
शास्त्रोपनयनाध्यायः प्रथमः ॥१॥

एवं स्वशास्त्रस्य स्वरूपप्रदर्शनेनोत्कर्षं प्रदर्श्याधुना कीदृग् ज्योतिःशास्त्रेऽधिकारीत्यतोऽधिकारिस्वरूपं प्रदर्शयितुमाह--

अथातः सांवत्सरसूत्रं व्याख्यास्यामः।

अथात इत्ययं समुदायः। अथातोऽस्माच्छास्त्रोपनयनादनन्तरं सांवत्सरसूत्रं व्याख्यास्यामः कथयिष्यामः। अथवाऽथशब्दो मङ्गलार्थः। अतोऽस्माच्छास्त्रोपनयनादनन्तरं सांवत्सरसूत्रं विविधैरर्थैरा शास्त्रपरिसमाप्तेर्व्याख्यास्यामः कथयिष्यामः। संवत्सरं वेत्ति सांवत्सरः। सूत्र्यते अर्थो येन तत्सूत्रं सांवत्सरसूत्रमित्यर्थः।

तच्चाह--

तत्र सांवत्सरोऽभिजातः प्रियदर्शनो विनीतवेषः सत्यवागनसूयकः क्षमः सुसंहितोपचितगात्रसन्धिरविकलश्चारुकरचरणनखनयनचिबुकदशनश्रवणललाटभ्रूत्तमाङ्गो वपुष्मान् गम्भीरोदात्तघोषः। प्रायः शरीराकारानुवर्त्तिनो हि गुणा दोषाश्च भवन्ति।

तत्र सांवत्सर इति। तत्र तस्मिन् ज्योतिःशास्त्रे सांवत्सरो दैवज्ञः कीदृशः। संवत्सरो वर्षं तत्र शुभाशुभज्ञानार्थं यः कृतो ग्रन्थः स सांवत्सरस्तमधीते वेद वा यः सोऽपि सांवत्सरः। स चाभिजातः कुलीनः सांवत्सरकुलप्रसूत इति केचित्। यदि तत्कुलेऽपि जातो वक्ष्यमाणगुणलक्षणयुक्तो न भवति तत्किं तेन। तस्मात् सांवत्सरकुले निरवद्ये जातेनाऽन्यस्मिन् प्रधानकुले वा सांवत्सरकुलाच्च येन विद्या सागमा अधीता सोऽत्राभिजातो विवक्षितः। प्रियदर्शनो दृश्यमानः सुखजनको विनीतवेषः उद्भटो वेषः शरीरालङ्करणं यस्य। आचार्येणान्यत्राप्युक्तम्--"सांवत्सरस्तस्य विनीतवेषः" इति।

---

१. लोके प्रत्ययजननमिति अ० क० पु० पाठः।

सत्यवाक् अवितथभाषी। अनसूयकः अनिन्दकः। गुणेषु दोषाविष्करणमसूया। असूया कुत्सा। न असूयकोऽनसूयकः। समो रागद्वेषरहितः। शत्रौ मित्रे च तुल्यस्नेह इत्यर्थः। सुसंहतोपचितगात्रसन्धिः सुसंहता अतिसंलग्ना उपचिता मांसला गात्रेषु बाहुहस्तोरुजानुगुल्फपादेषु सन्धयो यस्य। अविकलोऽव्यङ्गः परिपूर्णावयवः। चारुकरचरणनखनयनचिबुकदशनश्रवणललाटभ्रूत्तमाङ्गः। करौ हस्तौ। चरणौ पादौ। नखाः करुहाः। नयने चक्षुषी। चिबुकमधराधोभागः। दशना दन्ताः। श्रवणौ कर्णौ। ललाटं मुखपृष्ठभागः। भ्रुवौ नयनोपरि रोमलेखे। उत्तमाङ्गं शिरः। एतानि चारूणि दर्शनीयानि यस्य। प्रशस्तलक्षणयुक्तानीत्यर्थः। वपुष्मान् वपुः शरीरं शोभनं विद्यते यस्य। रूपवानित्यर्थः। गम्भीरोदात्तघोषः गम्भीरः सानुनाद उदात्त उद्भटो घोषः शब्दो यस्य। मेघमृदङ्गसमध्वनिरित्यर्थः। हि यस्मादर्थे। प्रायो बाहुल्येन शरीराकारानुवर्तिनः। शरीरस्याकारः शरीराकारस्तमनुवर्तन्ते शरीराकारानुवर्तिनः। के ते गुणा दोषाश्च भवन्ति। शरीरस्य सादृश्यं गुणा दोषाश्चानुवर्तन्ते। निर्दोषं शरीरं गुणा अनुवर्तन्ते। सदोषं शरीरं दोषाश्चानुवर्तन्त इति। तथा चोक्तम्—

"यत्राकृतिस्तत्र गुणा भवन्ति" इति।

अथ गुणानाह—

तत्र गुणाः—शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभानवान् देशकालवित् सात्त्विको न पर्षद्भीरुः सहाध्यायिभिरनभिभवनीयः कुशलोऽव्यसनी शान्तिकपौष्टिकाभिचारस्नानविद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः स्वतन्त्राश्चर्योत्पादितप्रभावः पृष्टाभिधाय्यन्यत्र दैवात्ययाद् ग्रहगणितसंहिताहोराग्रन्थार्थवेत्तेति।

तत्र गुणा इति। तत्र तस्मिन् सांवत्सरे शरीरे वा गुणाः। के ते? तद्यथा शुचिः शास्त्रोक्तशौचानुष्ठाता परस्वदेवधनाद्यलुब्धश्च। दक्षश्चतुरः शीघ्रकारी। प्रगल्भः सभायां वक्तुं शक्तः। वाग्मी प्रशस्ता शास्त्रार्थानुसारिणी वाग्यस्य। प्रतिभानवान् प्रतिभा एव प्रतिभानम्, तद्विद्यते यस्यासौ प्रतिभानवान्। पृष्टः सन् पौर्वापर्येण शास्त्रं स्मृत्वोत्तरं ददातीत्यर्थः। देशकालवित् देशवित्सर्वदेशेषु व्यवहारज्ञः। मध्यदेशादिष्वार्यदेशेषु यच्चेष्टितं तज्जानाति। कालस्त्ररूपज्ञः पूर्वाह्णमध्याह्नाऽपराह्णादिषु कालेषु धर्मवर्षशीतसाधारणकालेषु चेदं क्रियते इदं न क्रियत इति जानाति। अथवा देशमानूपजाङ्गलमरुभूमीत्यादिकं हस्त्यश्वखरोष्ट्र-

नावादिषु मनुष्यगम्यं जानाति। कालं यात्रादाविदं योग्यमिदमयोग्यमिति जानाति। अथवा देशविद्यथा--कश्मीरादिषु हिमप्रधानेषु बहुव्रीहिसम्भवं दृष्ट्वोत्पातं न वक्ति मध्यदेशादौ वक्ति। कालविद्यथा--

चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु।
पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः॥ इति

सात्त्विको निर्मलचित्तः। भयहर्षशोकादिभिरनभिभवनीयः। न पर्षद्भीरुः। परिषदि सभायामभीरुस्त्यक्तभयः। सहाध्यायिभिरनभिभवनीयः। सह सार्द्धमध्ययनं पठनं कृतं यैस्ते सहाध्यायिनस्तैः सहाध्यायिभिः समानतन्त्रैरनभिभवनीयो ज्ञेयः। कुशलः शिक्षित इङ्गितज्ञः। अव्यसनी गीतवाद्यनृत्यस्त्रीद्यूतद्युनिद्रादिषु व्यसनेष्वसक्तः। शान्तिकपौष्टिकाभिचारस्नानविद्याभिज्ञः। उत्पातप्रतीकारार्थं वेदोक्तमन्त्रपाठविनियोगानुष्ठाता शान्तिकविद्याभिज्ञः। आयुर्धनादिष्वधिकरणं पौष्टिकविद्या तदभिज्ञः। कृत्यावेतालोत्थापनमारणोच्चाटनविद्वेषणवशीकरणस्तम्भनचालनादिकमभिचारविद्या तदभिज्ञः। स्नानविद्यासु नित्यनैमित्तिककाम्यक्रियाङ्गास्वभिज्ञः। पुण्यस्नानादिषु वेत्ता। आभिमुख्येन जानातीत्यभिज्ञः। विबुधार्चनव्रतोपवासनिरतः। विबुधा देवास्तेषामर्चनं पूजा आवाहनस्नानमाल्यानुलेपनधूपोपहारवाद्यगेयनृत्यस्तोत्रपाठादिका तस्यामभिज्ञः। व्रतानि कृच्छ्रपराकचान्द्रायणप्रभृतीनि। उपवासः अभोजनम्। यथा--एकादश्यां न भुञ्जीतेत्यादि, एतेषु निरतः सक्तः। स्वतन्त्राश्चर्योत्पादितप्रभावः। स्वतन्त्रं ग्रहगणितं तत्रार्कचन्द्रग्रहणग्रहसमागमयुद्धानामनागताभिधायकत्वाद्यन्त्राणां कूर्ममयूरचापशङ्खघण्टापुरुषादीनां काष्ठादिविरचितानां स्वयमेव कालव्यञ्जकत्वाद्यदाश्चर्यं कुतूहलं तेनोत्पादितो जनित आत्मनः प्रभाव उत्कर्षो येन। पृष्टाभिधायी परिपृष्टस्यार्थस्याभिधायको वक्ता। नापृष्टस्य किन्त्वन्यत्र देवात्ययात्। दिव्यान्तरिक्षभौमेषूत्पातेषु यद्भाव्यशुभं स दैवात्ययस्तन्निवारणाय शान्त्यादिकमपृष्टेनाप्यभिधातव्यं वक्तव्यम्। ग्रहगणितसंहिताहोराग्रन्थार्थवेत्ता। ग्रहगणिते पञ्चसिद्धान्तिकायां संहितायां फलग्रन्थे होरायां जातकादौ ग्रन्थार्थवेत्ता ग्रन्थज्ञोऽर्थज्ञश्च। सूत्रार्थपाठकस्तदर्थविदित्यर्थः॥

अथान्यल्लक्षणमाह--

तत्र ग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्तनाडीप्राणत्रुटित्रुटचाद्यवयवादिकस्य कालस्य क्षेत्रस्य च वेत्ता।

तत्रेति। तत्र तस्मिन् ग्रहगणिते पञ्चसिद्धान्ता भवन्ति। के ते? पौलिशरोमकवासिष्ठसौरपैतामहाः, पुलिशसिद्धान्तः, रोमकसिद्धान्तः, वासिष्ठसिद्धान्तः, सूर्यसिद्धान्तः, ब्रह्मसिद्धान्त इति। एतेषु सिद्धान्तेषु पञ्चसु वेत्ताऽभिज्ञः। युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्तनाडीविनाडीप्राणत्रुटित्रुट्याद्यवयवस्य कालस्य वेत्ता। युगानां कृतत्रेताद्वापरकलीनां प्रमाणज्ञः। यथैतावद्भिः सौरैर्वर्षैः कृतयुगं भवति, एतावद्भिस्त्रेता, एतावद्भिर्द्वापरम्, एतावद्भिः कलिरिति। तद्यथा--खखखदन्ताब्धयः कलियुगपरिमाणं तदेव द्विगुणं द्वापरप्रमाणं त्रिगुणं त्रेताप्रमाणं चतुर्गुणं कृतयुगप्रमाणं भवति। एतैः सर्वैरेकीकृत्य चतुर्युगप्रमाणं भवति। तथा च[1] ब्रह्मसिद्धान्ते—

खचतुष्टयरदवेदा ४३२०००० रविवर्षाणां चतुर्युगं भवति।
सन्ध्यासन्ध्यांशैः सह चत्वारि पृथक् कृतादीनि॥
युगदशभागो गुणितः कृतं चतुर्भिस्त्रिभिर्गुणस्त्रेता।
द्विगुणो द्वापरमेकेन सङ्गुणः कलियुगं भवति॥

तथा च पुलिशसिद्धान्ते दिव्येन मानेन पठ्यन्ते—

अष्टाचत्वारिंशत् पादविहीना क्रमात् कृतादीनाम्।
अब्दास्ते शतगुणिता ग्रहतुल्ययुगं तदेकत्वम्॥ इति।

तद्यथा--४८००। ३६००। २४००। १२००। एते दिव्येन मानेनातः षष्टिसमधिकशतत्रयेण गुणिता जाताः १७२८००० कृतम्। १२९६००० त्रेता। ८६४००० द्वापरम्। ४३२००० कलिः। एवं युगानां वेत्ता।

यावता कालेनार्को द्वादशराशिकं भचक्रं मेषादिमीनान्तं भुङ्क्ते, तद्वर्षं तेन सौरवर्षप्रमाणेन युगसंख्यानम्। एवं रविराशिभोगो मासः। द्वादशभिर्मासैर्वर्षमिति। तथा च ब्रह्मसिद्धान्ते--"नृवत्सरोऽर्काब्दः" इति।

अयने दक्षिणोत्तरे षड्भिः सूर्यमासैरुत्तरमयनं षड्भिर्दक्षिणमिति। तत्र मकरादिराशिषट्कस्थेऽर्क उत्तरमयनं कर्क्यादिराशिषट्कस्थे दक्षिणमिति।

ऋतवः षड् भवन्ति शिशिरादयः। ते च मासद्वयात्मकाः। तद्यथा--मकरकुम्भस्थेऽर्के शिशिरः। मीनमेषस्थे वसन्तः। वृषमिथुनस्थे ग्रीष्मः। कर्कटसिंहस्थे वर्षाः। कन्यातुलास्थे शरत्। वृश्चिकधन्विस्थिते हेमन्त इति। तथा चाचार्यः—

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

उदयगयनं [1]मकरादावृतवः शिशिरादयश्च सूर्यवशात्।
द्विभवनकालसमाना दक्षिणमयनं च कर्कटकात्॥ इति।

तथा च [2]ब्रह्मसिद्धान्ते—

द्वौ द्वौ राशी मकरादृतवः षट् सूर्यगतिवशाद्योज्याः।
शिशिरवसन्तग्रीष्मवर्षाशरदः सहेमन्ताः॥ इति।

मासश्चैत्रादिकः। स च रविराशिभोगस्त्रिंशद्दिनात्मकः। पक्षो मासार्धं पञ्चदश दिनानि। अहोरात्रं षष्टिर्घटिकाः। यामोऽहोरात्राष्टमभागः। दिनस्य चतुर्थभागो रात्रेश्च। मुहूर्तोऽह्नः पञ्चदशांशः, रात्रेश्च पञ्चदशभागः। नाडी घटिकाऽहोरात्रषष्ट्यंशः। विनाडी विघटिका घटिकाषष्ट्यंशः। प्राणः श्वासनिर्गमप्रवेशौ। त्रुटिश्चक्षुर्निमेषद्वयम्। त्रुट्याद्यवयवस्तदर्धम्। आदिग्रहणात् त्रुटिचतुर्थभागमपि। एवमादिकस्य वेत्ता।

तथा च भगवान् पराशरः—यावता कालेन विकृतमक्षरमुच्चार्यते स निमेषः। निमेषद्वयं त्रुटिः। त्रुटिद्वयं लवः। लवद्वयं क्षणः। दश क्षणाः काष्ठा। दश काष्ठाः कला। दश कला नाडिका। नाडिकाद्वयं मुहूर्तः। त्रिंशन्मुहूर्ता दिनमिति। एवं कालस्य वेत्ता। तथा क्षेत्रस्य वेत्ता। तत्र कालक्षेत्रयोः साम्यम्। तद्यथा—काले षट् प्राणा विघटिका। विघटिकानां षष्ट्या घटिका। घटिकानां षष्ट्या दिनम्। दिनानां त्रिंशता मासः। मासैर्द्वादशभिर्वर्षं भवति। अथ क्षेत्रे। षष्ट्या तत्पराणां विलिप्ता भवति। विलिप्तानां षष्ट्या लिप्ता। लिप्तानां षष्ट्या भागः। भागानां त्रिंशता राशिः। राशिर्द्वादशकं भगण इति।

तथा च [3]ब्रह्मसिद्धान्ते—

प्राणैर्विनाडिका षड्भिर्घटिकैका विनाडिकाषष्ट्या।
घटिकाषष्ट्या दिवसो दिवसानां त्रिंशता मासः॥
मासा द्वादश वर्षं विकलालिप्तांशराशिभगणान्तः।
क्षेत्रविभागस्तुल्यः कालेन विनाडिकाद्येन॥

---

१. पञ्चसिद्धान्तिकायाम् ३ अध्यायस्य २५ श्लोकः।
२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
३. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

तथा च पौलिशे--

षट् प्राणास्तु विनाडी तत्षष्ट्या नाडिका दिनं षष्ट्या।
एतासां तत्त्रिंशन्मासस्तैर्द्वादशभिरब्दः॥
षष्ट्या तु तत्पराणां विकला तत्षष्टिरपि कला तासाम्।
षष्ट्यांशस्ते त्रिंशद्राशिस्ते द्वादश भचक्रम्॥

तथा चार्यभटः--

वर्षं द्वादश मासास्त्रिंशद्दिवसो भवेत् स मासस्तु।
षष्टिर्नाड्यो दिवसः षष्टिश्च विनाडिका नाडी॥
गुर्वक्षराणि षष्टिर्विनाडिकाक्षीं षडेव वा प्राणाः।
एवं कालविभागः क्षेत्रविभागस्तथा भगणात्॥

अन्यदप्याह।----

चतुर्णां च मानानां सौरसावननाक्षत्रचान्द्राणामधिमासकावमसम्भवस्य च कारणाभिज्ञः।

चतुर्णां च मानानामिति। त्रिंशद्भागपरिकल्पनया यावता कालेनार्को भागमेकं भुङ्क्ते तत्सौरं दिनम्। तत्त्रिंशता मासः। एवं राशिभोगेन संक्रान्त्यवधिर्यो मास एतत्सौरं मानम्। सर्वेषां ग्रहनक्षत्राणां स्वोदयात् पुनः स्वोदयं यावत्तत्सावनं दिनम्। तत्त्रिंशता मास इति। एवं सावनं मानम्। नाक्षत्रं मानं चन्द्रनक्षत्रभोगः। यावता कालेन नक्षत्रमेकं चन्द्रमा भुङ्क्ते तन्नाक्षत्रं दिनम्। तत्र च दिनानां सप्तविंशत्या मासो भवति। एवं नाक्षत्रं मानम्। अमावास्यान्तात् प्रतिपत्प्रभृत्यर्काच्चन्द्रः प्रतिदिनमग्रगो भूत्वा प्रतिपदाद्यान् पञ्चदश तिथीन् निर्वर्तयति यावत्पौर्णमास्यन्तम्। तथा च कृष्णपक्षप्रतिपत्प्रभृत्यर्कसमीपं क्रमेण गत्वा अमावास्यान्तं निर्वर्तयतीति चान्द्रं मानम्। एवं तिथिरेव चन्द्रदिनम्। त्रिंशत्तिथयो मास इति।

तथा च पुलिशसिद्धान्ते--

सावनमकृतं चान्द्रं सूर्येन्दुसमागमान् दिनीकृत्य।
सौरं भूदिनराशिं शशिभगणदिमानि नाक्षत्रम्॥

सावनमकृतं स्वयमेव सिद्धं यावन्तश्चतुर्युगेणार्कभगणास्तावन्त एव सौरमानेनाब्दाः। यदस्माकं सौरमानं तत्पुलिशाचार्यसावनम्। तत्र चतुर्युगाब्दाः ४३२०००० । एत एव द्वादशहताः सावनमासाः ५१८४०००० । एतावत्य-

श्चतुर्युगेणार्कसंक्रान्तयः। एतास्त्रिंशद्गुणाः सावनमानदिनानि १५५५२०००००। एतावतश्चतुर्युगेणार्को भागान् भुङ्क्ते, तत्र यावता कालेनार्को भागमेकं भुङ्क्ते स सावनमानदिवसः सिद्धः --

चान्द्रं सूर्येन्दुसमागमान् दिनीकृत्येति। तद्यथा --
परिवर्तैरयुतगुणैर्द्वित्रिकृतैर्भास्करो युगं भुङ्क्ते।

इति रविभगणाः ४३२०००००।

रसदहनहुतवहानलशरमुनिपव नेन्द्रियैश्चन्द्रः।

इति चन्द्रभगणाः ५७७५३३३६। अर्कचन्द्रभगणानामन्तरम् ५३४३३३३६।

एतान् सूर्येन्दुसमागमान् दिनीकृत्य त्रिंशता सङ्गुण्य दिनरूपा भवन्ति। ते च दिनीकृत्य जाताः १६०३००००८० चतुर्युगेणैतावन्तश्चान्द्रेण मानेन दिवसा भवन्ति। यदेव चान्द्रं मानं सैव तिथिः।

सौरं भूदिनराशिमिति। भूदिनराशिश्चतुर्युगभगणाः। तस्यानयनमहर्गणविधिनैव। तच्च प्रदर्श्यते। सावनमासानामेतेषां ५१८४०००० चतुर्युगाधिमासका उच्यन्ते --

अधिमासकाः षडग्नित्रिकदहनच्छिद्रशररूपाः।

न्यासः १५९३३३६ एतान् संयोज्य जाताः ५३४३३३३६। एत एव रविचन्द्रसमागमा उत्पन्नाः। यत उक्तम् --

भगणान्तरशेषं यत्समागमास्ते द्वयोर्ग्रहयोः॥ इति।

अत एव त्रिंशता गुणिता जाताः १६०३००००८०। एते चन्द्रमानदिवसा उत्पन्नाः। एतेषां चतुर्युगोनरात्राः के ते उच्यन्ते--

तिथिलोपाः खवसुद्विकदस्राष्टकशून्यशरपक्षाः २५०८२२८०।

एतान् संशोध्य जातम् १५७७९१७८००। एष भूदिनराशिश्चतुर्युगाहर्गणः। तावन्तश्चतुर्युगेण दिवसाः सौरेण मानेन भवन्ति। अस्माकं सावनं

---

१. आवहः, प्रवहः, उद्वहः, संवहः, सुवहः, परिवहः, परावह इति सप्तपवना ज्योतिषशास्त्रे प्रसिद्धाः। अतः प्राचीनैः पवनशब्देन सप्तसंख्या गृह्यते, परन्तु सम्प्रति भास्कराचार्यादिभिः शरीरस्थान् पञ्चप्राणानवगम्य पवनशब्देन पञ्चसंख्या गृह्यते। यथा सिद्धान्तशिरोमणिगणिताध्याये भग्रहयुत्यधिकारे द्वितीयश्लोके "पवनोत्कृतयः" इत्यत्र पवनशब्देन पञ्चसंख्या विवक्षितेति।

तत्पुलिशाचार्यस्य सौरमानम्। अर्द्धरात्रादर्द्धरात्रं यावत्सौरेण मानेन दिनमुदयादुदयं वा।

शशिभगणदिनानि नाक्षत्रमिति। तत्र शशिभगणाः ५७७५३३३६। एते त्रिंशद्गुणिताः सन्तो दिनीकृताः १७३२६०००८०। एतावन्तश्चतुर्युगेण नाक्षत्रमानदिवसाः। अत्र नक्षत्रभोगदिनं चन्द्रभगणत्रिंशद्भागो दिनम्। एवं यावता कालेन चन्द्रो द्वादश भागान् भुङ्क्ते तावता कालेन नाक्षत्रं दिनम्। भगवद्वसिष्ठादिभिश्चन्द्रनक्षत्रभोगेन नाक्षत्रदिनमभिहितम्, किन्तु तैर्नक्षत्रमानैः सप्तविंशत्या दिनैर्मासोऽभिहितः। एवं पुलिशाचार्यस्य नाक्षत्रं मानं वसिष्ठादिभिः सह भिन्नम्। अस्य सर्वमानेषु त्रिंशद्दिनात्मको मास इति प्रतिज्ञा। पराशरादीनां यत्सौरं मानं तस्यानेन सावनमिति संज्ञा कृता सावनस्य सौर इति। अथैतानेव पठति--

दस्रार्थबाणतिथयो लक्षहताः १५५५२००००० सावनेन ते दिवसाः।
वियदष्ट[1] खचतुष्कत्रिखपोडश १६०३००००८० चन्द्रमानेन॥
वसुसप्तरूपनवमुनिनगतिथयः शतगुणाश्च १५७७९१७८०० सौरेण।
आर्क्षेण खाष्टखत्रयषड्दस्रगुणा[2]निलशशाङ्काः १७३२६०००८०॥
अथ चन्द्रभगणाः सप्तविंशत्या गुणिता वसिष्ठादिमतेन नाक्षत्रं मानम्--

पक्षसप्तखशून्याब्धिगुणगोऽर्थशरेन्दवः १५५९३४००७२।
चतुर्युगार्क्षाण्येतानि कथितानि पुरातनैः॥ इति

तथा च भट्टबलभद्रः --

रव्यंशभोगोऽहोरात्रः सौरश्चान्द्रमसस्तिथिः।
चन्द्रनक्षत्रभोगश्च नाक्षत्रः परिकीर्त्तितः॥
स्वसावनो ग्रहर्क्षाणामुदयादुदयावधिः।
नक्षत्रमाने मासः स्यात् सप्तविंशतिवासरैः॥
शेषमानेषु निर्दिष्टो मासस्त्रिंशद्दिनात्मकः।
इष्टाः सर्वेषु मानेषु समा द्वादशमासिकाः॥ इति

अन्यच्च नाक्षत्रं मानं सावनमानस्य मूलभूतं यतो नक्षत्रपरिवर्त्ता नियता एव, एषामगतित्वात्। नक्षत्रपरिवर्तेभ्यो ग्रहभगणान् संशोध्य प्रत्येकस्य ग्रहस्य

---

१. वियदष्टाभचतुष्केति पाठे न छन्दोभङ्गदोषः।

२. अनिलः पवनः, तेन सप्तसंख्या विवक्षिता। २५ पृष्ठस्य टिप्पणी विलोक्या।

सावनं मानं भवति। यतो नक्षत्रग्रहौ यदैकत्र स्थितौ भवतस्तद्रा नक्षत्रमगतित्वात्तत्रैव तिष्ठति। ग्रहः स्वस्वगतिवशेन प्रतिदिनं नक्षत्रादग्रगो भूत्वोदयास्तमयौ करोति। भूम्यासन्नो दृष्टिपथं यातीति यावत्। तेन नाक्षत्रं मानं सावनसाधकम्। तथा च पुलिशसिद्धान्ते पठ्यन्ते नक्षत्रपरिवर्त्ताः--

खखाष्टमुनिरामाश्विनेत्राष्टशररात्रिपाः १५८२२३७८००।
भानां चतुर्युगेणैते परिवर्त्ताः प्रकीर्तिताः॥

एभ्यः सूर्यभगणान् संशोध्य जाताः सावनदिवसा इति १५७७९१७८००। तथा च ब्रह्म[1]सिद्धान्ते।

रविभगणोना भानां सावनदिवसाः कुदिवसा वा।

तथा च--

नक्षत्रसावनदिनात् सूर्यादीनां स्वसावनदिनानि।
यस्मात्तस्मादार्क्षं दुरधिगमं मन्दबुद्धीनाम्॥इति।

अधिमासकावमसम्भवस्य च कारणाभिज्ञः। अधिमासकसम्भवः सौरमास-चान्द्रमासयोरन्तरात्। कथाऽहर्गणे क्रियमाणे पूर्वं सौरो वर्षगणो भवति। तस्मिन् मासीकृते वर्त्तमानवर्षगतमाससंयुक्ते त्रैराशिकोपलब्धान् गताधिमासकान् संयोज्य चान्द्रो मासगणो भवति। तेन सौरमासचान्द्रमासानामन्तरमधिमासकाः। तथा च ब्रह्मसिद्धान्ते--"शशिमासाः सूर्यमासोना अधिमासाः" इति।

अथावमसम्भवः प्रदर्श्यते-- शशिमानसावनमानयोरन्तरादवमोत्पत्तिः। चान्द्रं मानं यावत्सावनमानेन मीयते तावत्प्रतिवर्षं षड्दिनान्यधिकतराणि न पूर्यन्ते तान्येवोनरात्रवाच्यानि तिथीनां न्यूनताऽवमानि तत्र तिथ्यानयने कर्म। अर्कोनस्य चन्द्रस्य लिप्तापिण्डीकृतस्य खयमस्वरै७२० र्भागे हृते भुक्ततिथयो लभ्यन्ते। शिष्टस्य षष्टिगुणस्य चन्द्रार्कस्फुटभुक्त्यन्तरं भागहारः। तच्च कदाचिन्न्यूनं कदाचिदधिकं भवति। तेन मध्यमभुक्त्योरन्तरेणोत्पत्तिः प्रदर्श्यते। तद्यथा--अर्कमध्यमभुक्तिः ५९। चन्द्रमध्यमभुक्तिः ७९०। अनयोरन्तरं सप्तशतमेकत्रिंशदधिकम् ७३१। अत्र खयमस्वरान् ७२० विशोध्यैकादश ११ अवशिष्यन्ते, तान्यवमशब्दवाच्यानि। तानि चानुदिनं तिथिप्रमाणादधिकमग्रतोऽर्काच्चन्द्रो भूत्वा तिथिलोपं करोति तदेवा-वमरात्रसंज्ञम्। एवं शशिदिवसानां सावनदिवसानां चान्तरमवमानि। तथा च ब्राह्मे--"शशिसावनदिवसान्तरमवमानि" इति। एवमत्र ज्ञानं यथा--सौरचान्द्र-मानयोरन्तरमधिमासकाः शशिसावनयोरन्तरमवमानि।

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

अत्र पुलिशाचार्यः—

चान्द्रैः सावनवियुतैः प्रचयस्तैरपचयोऽर्कदिनहीनैः।

चतुर्युगचन्द्रदिवसानां सावनदिवसान् संशोध्य चतुर्युगाधिमासकदिवसा भवन्ति। तेषां त्रिंशता भागमपहृत्य चतुर्युगाधिमासकाः। तैरेव चन्द्रदिवसैरर्कसावनदिनहीनैर्यदवशिष्यते तावन्ति चतुर्युगेणापचयदिनानि भवन्ति। ऊनरात्रा इत्यर्थः। सावनमासस्य चन्द्रमानेन सहान्तरे कृते यदतिरिच्यते तदधिमासकाख्यः। चन्द्रमानात्सौरं यदूनं तदूनरात्राः। तद्यथा—चतुर्युगे चन्द्रदिवसानामेतेषां १६०३०००८० सावनमानाहानीमानि १५५५२००००० संशोध्य जातं ४७८०००८० सावनमानादेतावन्ति चतुर्युगे चन्द्रदिनान्यतिरिच्यन्ते। एतेषां त्रिंशता भागमपहृत्यावाप्तं १५९३३३६ एतावन्तश्चतुर्युगेणाधिमासकाः। अथवा सावनदिनानां चन्द्रदिनानां च त्रिंशता भागमपहृत्य[1] मासाः कार्यास्तेषामन्तरेऽधिकमासकाः।

अथोनरात्रार्थं चान्द्रमानदिवसानामेतेषां १६०३०००८० सौरमानदिनान्येतानि १५७७९१७८०० संशोध्य जातं २५०८२२८० एतावन्तश्चतुर्युगेणोनरात्राः। एवं चतुर्युगस्य प्रदर्शिताः।

अथ संवत्सरस्य प्रदर्श्यते। तत्र सावनमानेन स्वानि संवत्सरदिनानि ३६०। अस्मिन्नेव सावनसंवत्सरे चन्द्रदिनानि ३७१$\frac{२८००८०}{४३२०००००}$। एतेषामुत्पत्तिमग्रतः प्रदर्शयिष्यामः। अत्र सावनमानाहानीमानि ३६० संशोध्य जातं ११$\frac{२८००८०}{४३२०००००}$। एतावन्ति दिनानि प्रतिसंवत्सरे प्रचयो भवति।

अथ संवत्सरप्रचयदिनानि प्रकारान्तरेणानीयन्ते त्रैराशिकेन। न्यासः ४३२०००० । ४७८०००८० । १ । अतः फलं तदेव।

अथ कियता कालेनाधिमासकः पततीति त्रैराशिकेन प्रदर्श्यते। न्यासः—११$\frac{२८००८०}{४३२०००००}$। ३६० । ३० । अत्राद्यो राशिः[2] सवर्णीकृतो जातः ४७८०००८० । यस्मादाद्यो राशिश्चतुर्युगाब्दैर्गुणितः सवर्णीभूतस्तस्मादन्त्योऽपि राशिश्चतुर्युगाब्दैरेवं गुणितो जातः १२९६००००० । अथ भागहारराशिरेषः ४७८०००८० । गुण्यराशिना षष्टयधिकैस्त्रिभिः शतैरपवर्तितः १३२७७८ । एष भागहारराशिः। अथ भाज्यभाजकराशी जातौ १२९६००००० । १३२७७८ । एतौ पुनरपि द्वाभ्यामपवर्तितौ जातौ ६४८००००० । ६६३८९ । भाज्यस्य भाजकराशिना भागमप-

---

१. राशयः कार्या इति अ० पु० पाठः।

२. ११$\frac{२८००८०}{४३२०००००}$ = ११×$\frac{४३२०००००}{४३२०००००}$+२८००८० = $\frac{४७५२०००००+२८००८०}{४३२०००००}$ = $\frac{४७८००००८०}{४३२०००००}$ अयं चतुर्युगाब्दैर्गुणितो जातः ४७८०००८० । अयमेवाद्यः सवर्णीकृत इति भट्टोत्पलसंकेतः।

हृत्यावाप्तम् ९७६$\frac{४३३६}{६६३८८}$। एतावद्भिः सावनदिवसैर्गतैरधिमासः[1] पतति। वर्षद्वयं मासाष्टकं षोडशदिवसा दर्शिताऽवशेषसहिताः। अनेन कालेन भवति। एतेषामेव दिवसानां प्रकारान्तरेणानयनं त्रैराशिकेन १५९३३३६। १५५५२०००००। १। फलम् ९७६$\frac{१०४०६४}{१२८३३३६}$। अत्रावशेषच्छेदौ चतुर्विंशत्याऽपवर्तितौ जातौ $\frac{४३३६}{६६३८८}$। एवमधिमासकोत्पत्तिः प्रदर्शिता।

अथापचयाः प्रदर्श्यन्ते। तत्र चतुर्युगचन्द्रदिनानामेतेषां १६०३०००८०। सूर्यदिवसानेतान् १५७७९१७८०० संशोध्य जातम् २५०८२२८०। एतावन्तश्चतुर्युगेणोनरात्राः। एवं चतुर्युगस्य प्रदर्शिताः।

अथ संवत्सरस्य प्रदर्श्यन्ते। तत्र वक्ष्यमाणविधिना चन्द्रसंवत्सरे सौरमानदिनानि ३५४$\frac{१६३४३८८}{४४२७७८}$। एतानि चन्द्रसंवत्सरस्वदिनेभ्यः ३६० संशोध्य जातम् ५$\frac{२८१८३९०}{४४२७७८}$। अत्रावमशेषच्छेदौ द्वाभ्यामपवर्तितौ। एतावन्तः संवत्सरेणोनरात्रा भवन्ति। एतेषां त्रैराशिकेन प्रकारान्तरेणानयनम्। न्यासः—१६० ३०००८०। २५०८२२८०। ३६०। अत्राद्यो भागहारराशिर्गुणकारराशिना षष्ट्यधिकैस्त्रिभिः शतैरपवर्तितो जातः ४४५२७७८। अनेन राशिना चतुर्युगोनरात्राणां भागमपहृत्यावाप्तम् ५$\frac{२८१८३९०}{४४२७७८}$। एतावन्त ऊनरात्राः संवत्सरेण भवन्ति पूर्वानीतेषु संविदिता इति। अथ कतिभिर्दिवसैरूनरात्रपातो भवतीति तथा त्रैराशिकेन तत्प्रदर्श्यते। न्यासः—५$\frac{२८१८३९०}{४४२७७८}$। ३६०। १। अत्राद्यो राशिः सवर्णीकृतः २५०८२२८०। यस्मादनेन ४४५२७७८ राशिना गुणित आद्यो राशिः सवर्णीभूतस्तस्मादनेनैव राशिनान्त्यो राशिरेष १ गुणितो जातः ४४५२७७८। एष भाज्यो राशिः। अथास्य भाजकराशेः २५०८२२८० गुण्यराशिनानेन ३६० भागमपहृत्यावाप्तम् ६९६७३। अनेन भाज्यस्याऽस्य राशेः ४४५२७७८ भागमपहृत्यावाप्तम् ६३$\frac{६३२७९}{६९६७३}$। एतावद्भिश्चान्द्रमानदिवसैरूनरात्रः पतति। अस्यैवोनरात्रस्यानयने त्रैराशिकेनापरः प्रकारः। २५०८२२८०। १६०३०००८०। १। अतः फलम् ६३। अत्रावशेषच्छेदौ षष्ट्यधिकैस्त्रिभिः शतैरपवर्तितौ जातौ $\frac{६३२७९}{६९६७३}$। एतावन्त एव ऊनरात्रदिवसाः पूर्वानीतेषु संविदिता इति।

तथा[2] चाचार्यः—

युगवर्षमासपिण्डं रविमानं साधिमासकं चान्द्रम्।

---

१. रधिमासको भवतीति अ० क० पु० पाठः।

२. पञ्चसिद्धान्तिकायाम् १ अध्यायस्य १६ श्लोकः।

अवमविहीनं सावनमैन्दवमब्दान्वितं त्वार्क्षम् ॥ इति।
एवमधिमासकावमसम्भवस्य च कारणाभिज्ञः ॥ इति।

अन्यत् कीदृशो दैवविदित्याह --

षष्टचब्दयुगवर्षमासदिनहोराधिपतीनां प्रतिपत्तिच्छेदवित्।

षष्टिवर्षाणि षष्टचब्दः। स च पुनः पुनर्भवति। तस्य प्रतिपत्तिः प्रवर्तनं कस्मिन् काले षष्टचब्दस्य प्रारम्भो भविष्यति। एतच्च बृहस्पतिचारे वक्ष्यत्याचार्यः—

आद्यं धनिष्ठांशमभिप्रवृत्तो माघे यदा यात्युदयं सुरेज्यः।
षष्टचब्दपूर्वः प्रभवः स नाम्ना प्रपद्यते भूतहितस्तदाब्दः ॥ इति।

छेदस्तस्यैव षष्ट्यब्दस्य निवृत्तिः। तज्जानातीति छेदवित्। तन्मध्ये च तत्र द्वादशयुगानि भवन्ति।

विष्णुः सुरेज्यो वह्निभुजगस्त्वष्टोत्तरप्रोष्ठपदाधिपश्च।
क्रमाद्युगेशाः पितृविश्वसोमशक्रानलाख्याश्विभगाः प्रदिष्टाः ॥ इति।

एतेषामाचार्यो बृहस्पतिचारे गणितविधानं वक्ष्यति। वयमपि तत्रैव व्याख्यास्यामः। एषामपि प्रतिपत्तिच्छेदवित्। अत्र च सावनमानेन वर्षपतिर्भवति। तत्र चानयनमाचार्येणोक्तम्।

तथाऽहर्गणा[1]नयनम्—

सप्ताश्विवेदसंख्यं शककालमपास्य चैत्रशुक्लादौ।
अर्कास्तमिते भानौ यवनपुरे सोमदिवसाद्ये ॥
मासीकृते समासे द्विष्ठे सप्ताहतेऽष्टयमपक्षैः २२८।
लब्धैर्युतोऽधिमासैस्त्रिंशद्घ्नस्तिथियुतोऽधःस्थः ॥
रुद्रघ्नः समनुशरो ५१४ लब्धोनो गुणखसप्तभि७०३र्द्युगणः।
रोमकसिद्धान्तेऽयं नातिविरे पौलिशेऽप्येवम् ॥ इति।

अतो वर्षाधिपानयनम्--

मुनियमयमद्रि२२२७युक्ते द्युगणे शून्यद्विपञ्चयमभक्ते २५२०।
प्रतिराशि खर्त्तुदहनैर्लब्धं वर्षाणि यातानि ॥

---

१. पञ्चसिद्धान्तिकायाम् १ अध्यायस्य ८–१०, १७–१९ श्लोकाः।

तानि प्रपन्नसहितान्यग्निगुणान्य[1]श्विवर्जितानि हरेत्।
सप्तभिरेवं शेषो वर्षाधिपतिः क्रमात् सूर्यात्॥

तत्राहर्गणस्य षष्टिशतत्रयेण भागे हृते यच्छेषं तानि दिनानि प्रवृत्तस्याब्दपतेर्गतानि तान्येव षष्टयधिकाच्छतत्रयात् संशोध्यं यदवशिष्यते तावन्ति दिनान्येवाब्दपतिर्भविष्यति।

एवमब्दपतेः प्रतिपत्तिच्छेदौ ज्ञातौ। मासपतेरपि सावनेनैव मानेन प्रवृत्तिनिवृत्ती भवतः। तस्य चानयनमाचार्येण तत्रैवोक्तम्।

तथा च--

त्रिंशद्भुक्ते मासाः प्रतिपत्सहिता द्विसंगुणा व्येकाः।
सप्तोद्धृतावशेषो मासाधिपतिस्तथैवार्कात्॥

तत्र त्रिंशता भागे हृते यदवशिष्यते तावन्त्येव दिनानि तस्य मासपतेः प्रवृत्तस्य गतानि। तानि च त्रिंशतः संशोध्य यदवशिष्यते तावन्ति दिनानि स एव मासपतिर्भविष्यति। एवं मासाधिपतेः प्रतिपत्तिच्छेदौ जातौ। तथा च [2]ब्रह्मसिद्धान्ते--

षष्टिशतत्रयभक्तात् कल्पगताहर्गणात्फलं त्रिगुणम्।
सैकं सप्तविभक्तं सावनवर्षाधिपोऽर्कादिः॥
द्युगणात्त्रिंशदुक्ताद्यल्लब्धं द्विगुणितं सरूपं तत्।
सप्तविभक्ते शेषः सावनमासाधिपोऽर्कादिः॥

दिनपतिहोराधिपत्योराचार्याणां निश्चयो नास्ति। केषाञ्चिदौदयिको वारपतिः। अन्येषां माध्याह्निकोऽन्येषामास्तमयिकोऽन्येषामार्द्धरात्रिक इति।

तथा[3] चाचार्यः--

द्युगणाद्दिनवाराप्तिर्द्युगणोऽपि हि देशकालसंबन्धः।
लाटाचार्येणोक्तो यवनपुरेऽर्द्धास्तगे सूर्ये॥
रव्युदये लङ्कायां सिंहाचार्येण दिनगणोऽभिहितः।
यवनानां निशि दशभिर्गतैर्मुहूर्तैश्च तद्गुरुणा॥

---

१. पञ्चसिद्धान्तिकायां न्यब्धिवर्जितानीति पाठः।
२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्ते--इत्यर्थः।
३. पञ्चसिद्धान्तिकायाम् १५ अध्यायस्य १८-२९ श्लोकाः।

लङ्कार्द्धरात्रसमये दिनप्रवृत्तिं जगाद चार्यभटः।
भूयः स[1] एव चार्कोदयात् प्रभृत्याह लङ्कायाम्॥
देशान्तरसंशुद्धिं कृत्वा चेन्न घटते तथा तस्मिन्।
कालस्यास्मिन् साम्यं तैरेवोक्तं यथा शास्त्रम्॥
मध्याह्नं भद्राश्वेष्वस्तमयं कुरुषु केतुमालानाम्।
कुरुतेऽर्द्धरात्रमुद्यन् भारतवर्षे युगपदर्कः॥
उदयो यो लङ्कायां योऽस्तमयः सवितुरेव सिद्धपुरे।
यमकोट्यां मध्याह्नं रोमकविषयेऽर्द्धरात्रं च॥
अधिमासकोनरात्रग्रहदिनतिथिदिवसमेषचन्द्रार्काः।
अयनर्त्वक्षगतिनिशाः समं प्रवृत्ता युगस्यादौ॥
अन्यद्रोमकविषयाद् देशान्तरमन्यदेव यवनपुरात्।
लङ्कार्द्धरात्रसमयादन्यत् सूर्योदयाच्चैव॥
सूर्यस्यार्द्धास्तमयात् प्रतिविषयं यदि दिनाधिपं ब्रूमः।
तत्रापि नाप्तवाक्यं न च युक्तिः काचिदप्यस्ति॥
सन्ध्या क्वचित्क्वचिदहः क्वचिन्निशा दिवसपतेः क्वचित्क्वचित्।
स्वल्पे स्वल्पे स्थाने व्याकुलमेवं दिनपतित्वम्॥
होरावार्त्ताप्येवं यस्माद्धोरा दिनाधिपस्याद्या।
तस्यापरिनिष्ठाने होराधिपतिः कथं भवति॥
अविदित्वैवं[2] प्रायो दिनवारे जनपदः प्रवृत्तोऽयम्।
स्फुटतिथिविच्छेदसमं युक्तमिदं प्राहुराचार्याः॥ इति।

एवं स्थिते सति दिनवार औदयिक इत्यस्माकं मतम्। यस्माद्भट्टब्रह्मगुप्तेनोक्तम्—

जगति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः सृष्टैः।
यस्माद् दिनप्रवृत्तिर्दिनवारोऽर्कोदयात् तस्मात्॥

तत्र च विशेषः—

दिनवारादिः पश्चादुज्जयिनीदक्षिणोत्तरायाः प्राक्।
देशान्तरघटिकाभिः प्राक् पश्चाद्भवति रव्युदयात्॥ इति।

---

१. मन्निर्मितगणकतरङ्ग्यां वराहमिहिरवर्णनं विलोक्यम्।
२. अविचार्य्येवमिति अ० क० पु० पाठः।

दिनाधिपस्तु सावनेनैव मानेन भवति, किन्तु देशे देशे स्वदेशान्तरघटिकाभिश्चरार्द्धकालयुक्ताभिर्वियुक्ताभिर्वा क्वचित्सूर्योदयाद्दिवागते काले क्वचित्सूर्योदयात्पूर्वं दिनप्रवृत्तिः।

तद्यथा—उज्जयिनीयाम्योत्तररेखायाः प्राग्भागे स्वदेशान्तरघटिकाभिः सूर्योदयात्परतो वारप्रवृत्तिर्भवति। रेखापश्चिमभागे स्वदेशान्तरतुल्याभिर्घटिकाभी रात्रिशेषाभिर्वारप्रवृत्तिरिति। एवं विषुवद्दिने चरदलाभावादन्यकाले चरदलं स्वधिया योज्यं यथासम्भवम्। तत्रायं प्रयोगः—स्वदेशमध्याह्नघटिकाः पञ्चदशभ्यो विशोध्यावशेषघटिकाभिस्ताभी रेखाप्राग्भागे मध्याह्नात् प्राग् वारादिः स्वदेशे नित्यं वक्तव्यः। रेखापश्चिमभागे मध्याह्नादूर्ध्वं तावतीभिरेव घटिकाभिरिति।

तथा च भट्टवलभद्रः—

उज्जयिनीतस्तु गता या [1]रेखा दक्षिणेन लङ्कायाम्।
उत्तरतस्तु सुमेरोर्ज्ञेया देशान्तराख्या सा॥
स्वदेशरेखान्तरयोजनानां षष्ट्या हतानां स्फुटभूहृतानाम्।
ज्ञेयः स लब्ध्या घटिकादिकालो देशान्तराख्यः सततं स्वदेशे॥
[2]चरार्द्धतत्कालयुतौ गतायां दिवा सुराहे दिनपादिवेला।
रेखादिभागे च परे निशायां कालेन शेषेण महेन्द्ररात्रौ॥
रेखादिभागे त्रिदिवेशरात्रौ कालान्तरोनश्चरखण्डशेषः।
काले नते तत्क्षणदावशेषे न्यूने चरार्द्धे तु दिवागते स्यात्॥
रेखापरार्द्धे तु कृतान्तराले चरार्द्धकालाभ्यधिके दिनस्य।
काले प्रयाते त्रिदशाह्नि वेला तदूनतायां क्षणदावशेषे॥

एवं यस्मिन् काले वर्तमानस्य दिनपतेः प्रवृत्तिस्तस्मिन् कालेऽतीतस्य निवृत्तिरिति।

---

१. लेखेति अ० क० पु० पाठः।

२. रेखादिभागे प्राग्देशान्तरे, सुराहे सुरदिने उत्तरगोले चरदेशान्तरघटीयोगसमायां सूर्योदयाद्गतायामिष्टघटिकायां दिवा दिवसे वारप्रवृत्तिः। परे पश्चिमदेशान्तरे महेन्द्ररात्रौ सुरेशरजन्यां दक्षिणगोले तद्योगसमायां निशायां शेष घटिकायां वारप्रवृत्तिः। रेखापरार्द्धे पश्चिमदेशान्तरे त्रिदशाह्नि उत्तरगोले यद्देशान्तरचरार्द्धान्तरं कृतं तावति दिनस्य गते काले वारप्रवृत्तिश्चेत्तद्देशान्तरतश्चरमानमधिकमूने तु क्षणदावशेषे रात्रिशेषे तावति काले वेला वारप्रवृत्तिरित्यर्थः। अन्यत् स्पष्टम्। सिद्धान्तशिरोमण्यादियुक्त्या वासना चास्यातिसुगमेति।

एवं दिनपतेः [1]प्रतिपत्तिच्छेदौ ज्ञातौ।

अथ होराधिपत्यानयने तत्र यावतीनां घटीनां वारपतेरारम्भात्प्रभृति दिनगतानां रात्रिगतानां वा कालहोरा ज्ञातुमिष्यते ता घटिका अभीष्टकाले गता एकीकृत्य यावत्यो भवन्ति ता द्विगुणाः कार्याः। ततस्तासां पञ्चभिर्भागमपहृत्यावशेषाङ्कसमो दिनपात्प्रभृतीष्टे काले होराधिपो भवति। पञ्चभिर्भागे हृते यच्छेषं तदधः पञ्चभ्यो विशोधयेत्। ततो द्वावप्यूर्ध्वाधःस्थितावङ्कावर्द्धीकृत्योर्ध्वस्थो वर्तमानहोरापतेर्गतः कालः। अधःस्थितो यस्तावत्कालः स एव होराधिपतिः। तथा च भट्टबलभद्रः——

प्रारम्भकालाद्दिनपस्य याते काले यमघ्नेऽर्थहृते तु लब्धिः।
शराहता चन्द्रयुताद्विभक्ता शेषस्तु होराधिपतिर्द्युपादेः॥

तथा चास्मदीयवचनम्——

वारपतेरारम्भात्कालाद्द्विगुणाच्छरैर्हृताल्लब्धम्।
पञ्चघ्नं रूपयुतं मुनिभवतं वारपात् स होरेशः॥

तत्र होराधिपतेर्नाडिकाद्वयं सार्द्धभागं परिकल्प्य प्रवृत्तिनिवृत्त्योः परिकल्पना कार्या। तथा च [2]ब्रह्मसिद्धान्ते——

दिनगतघटिका द्विगुणाः पञ्चहृता वान्यमतमेतत्॥ इति।

तथा चाऽऽचार्यः[3]——

सप्तोद्धृते दिनेशस्त्रिगुणो व्येको युतश्च होराभिः।
पञ्चघ्नः सप्तहृतो विज्ञेयः कालहोरेशः॥ इति।

अत्राऽहर्गणाद्यो दिनपतिस्ततोऽस्यानयनं कार्यम्। एवं वर्षाधिपादीनामयं गणनाक्रमः। वर्तमानवर्षाधिपाच्चतुर्थोऽन्यस्मिन् वर्षे भवति। मासाधिपाद् मासपतिस्तृतीयः। होराधिपाद्धोरापतिः षष्ठः। [4]दिनपतिर्निरन्तर इति।

---

१. प्रवृत्तिरिति अ० क० पु० पाठः।
२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इति।
३. पञ्चसिद्धान्तिकायाम् १ अध्यायस्य २० श्लोकः।
४. विनाधिपतिरिति अ० क० पु० पाठः।

तथा चाऽऽचार्यः[1] कक्षाक्रममुक्त्वाऽऽह—

मासाधिपा यथोर्ध्वं चन्द्रात् सौरादधश्च होरेशाः।
ऊर्ध्वक्रमेण दिनपाश्च पञ्चमा वर्षपाः स्पष्टाः॥ इति।

तथा च—

[2]वर्षाधिपश्चतुर्थो मासाधिपतिस्तथा तृतीयोऽन्यः।
होराधिपश्च षष्ठो निरन्तरं दिवसनाथः स्यात्॥
एवं होराधिपतिप्रतिपत्तिच्छेदौ [3]ज्ञातौ॥

अथान्यदप्याह—

सौरादीनां च मानानामसदृशसदृशयोग्यायोग्यत्वप्रतिपादनपटुः।

सौरमानं रविराशिभोगः। अनया कल्पनया यावता कालेनार्को राशिद्वादशकं भचक्रं भुङ्क्ते तावान् कालो रविमानेन वर्षं भवति। द्वादश राशयो द्वादशमासा एव। एतच्च सौरं मानं सावनदिनानां पञ्चषष्ट्यधिकं दिनशतत्रयं भवति घटिकापञ्चदशकेन सार्द्धेनाधिकम्।

सावनं मानं स्वोदयात् स्वोदयं यावत् षष्ट्यधिकेन दिनशतत्रयेण भवति। नाक्षत्रं चन्द्रनक्षत्रभोगः। तच्च कदाचित् षट्षष्टिघटिका भवन्ति कदाचिच्चतुष्पञ्चाशत्। अत्रापि मध्ये सञ्चरति।

चान्द्रं तिथिभोगः। तस्यापि नक्षत्रवदूनाधिकता। एतदसदृशत्वं मानानाम्।

सदृशत्वं चैककार्यकरणद्वारेण। तच्चैककार्यकरणं ग्रहगतिसाधनं नाम। तद्यथा—प्रथमं तावन्नक्षत्रपरिवर्त्ता इष्टग्रहभगणोना यावत्क्रियन्ते तावदिष्टग्रहस्य सावनदिवसा भवन्ति। ते च नक्षत्रपरिवर्त्ताः सूर्यभगणोना भूदिनसंज्ञास्तावत् स्थाप्याः। तत्रेष्टकाले कल्पाब्दा ये गता रविपरिवर्ताः सौरमानोत्पन्नास्ते च द्वादशगुणिता वर्त्तमानकाले चैत्रसिताद्यतीतमाससंयुक्ता रविमानेनैव मासा भवन्ति। ततस्तस्मिन् मासगणे त्रैराशिकोपलब्धान् गताधिमासकान् संयोज्य त्रिंशता संगुण्य वर्त्तमानमासगततिथीः संयोज्य चान्द्रो दिनगणो भवति। स च त्रैराशिकोपलब्धैस्तिथिलोपैर्विहीनः सावनोऽहर्गणो भवति। स चेष्टग्रहभगणगुणः सावनदिनहृतः फलं भगणादिको ग्रहः। स च स्फुटीकृतो जातकादावुपयुज्यत इति।

---

१. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य ४२ श्लोकः।
२. पञ्चसिद्धान्तिकायाम् १ अध्यायस्य २१ श्लोकः।
३. विज्ञातव्याविति अ० क० पु० पाठः।

एवं सर्वमानानामेककार्यत्वं नाम सादृश्यम्।

अथवा पुलिशसिद्धान्तानुसारेण प्रदर्श्यते। तत्र सदृशत्वविज्ञाने सूत्रम्--

युगवत्सरैः प्रयच्छति यदि मानचतुष्टयं किमेकेन।
यदवाप्तं ते दिवसा विज्ञेयाः सावनादीनाम्॥

युगवत्सरैर्यदि माने माने पठितदिवसा लभ्यन्ते तदैकस्मिन् संवत्सरे कियन्तः स्युरिति त्रैराशिके न्यासः ४३२०००० । १५५५२००००० । १ । अतः फलम् ३६०। एवं ज्ञातं यथा सावनमानवर्षे एतावद्भिः सावनमानदिवसैर्वर्षमिति।

न्यासः ४३२०००० । १६०३०००८० ।१। अतः फलम् ३७१ $\frac{२८००८०}{४३२०००}$। सावनवर्षेणैतावन्तश्चान्द्रदिवसा भवन्ति।

न्यासः ४२२०००० । १५७७९१७८०० । १ । फलम् ३६५ $\frac{१११७८००}{४३२०००}$। सावनवर्षेणैतावन्तः सौरमानदिवसा भवन्ति।

न्यासः ४३२०००० । १७३२६००८० । १ । फलम् ४०१ $\frac{२८०००८०}{४३२०००}$। सावनवर्षेणैतावन्तो नाक्षत्रमानदिवसा भवन्ति॥[1]

न्यासः ४३२०००० । १५५९३४००७२ । १ । फलम् ३६० $\frac{४१४००७२}{४३२०००}$। सावनवर्षेणैतावन्ति नाक्षत्राणि भवन्ति।

अथ चान्द्रमानेन चातुर्युगदिवसानाम् १६०३०००८० एतेषां त्रिंशता भागमपहृत्यावाप्तम् ५३४३३३६। एतावन्तश्चतुर्युगेण चान्द्रमानेन मासा भवन्ति। एतेषां द्वादशभिर्भागमपहृत्यावाप्तम् ४४५२७७८। एतावन्ति चतुर्युगेण चान्द्रेण मानेन वर्षाणि भवन्ति। तत्र न्यासः ४४५२७७८। १६०३०००८०। १। फलम् ३६०। एतावन्तश्चान्द्रमानवर्षेण चान्द्रमानदिवसा भवन्ति।

न्यासः ४४५२७७८। १५५५२००००० । १। फलम् ३४९ $\frac{११८०४०८}{४४५२७७८}$। चान्द्रवर्षेणैतावन्तः सावनमानदिवसा भवन्ति।

न्यासः ४४५२७७८। १५७७९१७८०० । १। फलम् ३५४ $\frac{१६३४३८८}{४४५२७७८}$। एतावन्तश्चान्द्रवर्षेण सौरदिवसा भवन्ति।

न्यासः ४४५२७७८। १७३२६०००८० । १। फलम् ३८९ $\frac{४६८४३८}{४४५२७७८}$। एतावन्तश्चान्द्रवर्षेण नाक्षत्रमानदिवसा भवन्ति।

न्यासः ४४५२७७८। १५५९३४००७२ । १। फलम् ३५० $\frac{८६७७२}{४४५२७७८}$। एतावन्ति चान्द्रवर्षेण नाक्षत्राणि भवन्ति।

---

१. कल्पे त्रिंशद्गुणिता शशिभगणाः नाक्षत्रमानदिवसा इति पूर्वं प्रतिपादिता भट्टोत्पलेन (द्रष्टव्यं २६_पृष्ठम्)।

अथ चतुर्युगसौरमानदिवसानामेतेषां १५७७९१७८०० त्रिंशता भागमपहृत्यावाप्तम् ५२५९७२६०। एतावन्तश्चतुर्युगेण सौरमानमासा भवन्ति। तेषां द्वादशभिर्भागमपहृत्यावाप्तम् ४३८३१०५। एतेषां चतुर्युगेण वर्षाणि भवन्ति।

न्यासः ४३८३१०५। १५७७९१७८००। १। फलम् ३६०। एतावन्तः सौरण वर्षेण सौरमानदिवसा भवन्ति।

न्यासः ४३८३१०५। १५५५२००००० । १ । फलम् ३५४ $\frac{३५८०८३०}{४३८३१०५}$। सौरवर्षेणैतावन्तः सावनमानदिवसा भवति ॥

न्यासः ४३८३१०५। १६०३०००८०। १। फलम् ३६५ $\frac{३१६६७५५}{४३८३१०५}$। एतावन्तः सौरवर्षेण चान्द्रमानदिवसा भवन्ति ॥

न्यासः ४३८३१०५। १७३२६०००८०। १। फलम् ३९५ $\frac{१२७३६०५}{४३८३१०५}$। एतावन्ति सौरवर्षेण नाक्षत्रमानदिनानि भवन्ति।

न्यासः ४३८३१०५। १५५९३४००७२। १। फलम् ३५५ $\frac{३३३७७८७}{४३८३१०५}$। एतावन्ति सौरवर्षेण नाक्षत्राणि भवन्ति।

अथ चतुर्युगेण नाक्षत्रमानदिवसाः १७३२६०००८०। एतेषां त्रिंशता भागमपहृत्यावाप्तम् ५७७५३३३६। एतावन्तश्चतुर्युगेण नाक्षत्रमानमासाः। एतेषां द्वादशभिर्भागमपहृत्यावाप्तम् ४८१२७७८। एतावन्ति चतुर्युगनाक्षत्रमानवर्षाणि भवन्ति।

न्यासः ४८१२७७८। १७३२६०००८०। १। फलम् ३६०। नाक्षत्रमानवर्षेणैतावन्ति नाक्षत्रमानदिनानि भवन्ति।

न्यासः ४८१२७७८। १६०३०००८०। १। फलम् ३३३ $\frac{३४५००६}{४८१२७७८}$। नाक्षत्रमानवर्षेणैतावन्ति चान्द्रमानदिनानि भवन्ति।

न्यासः ४८१२७७८। १५५५२००००० । १। फलम् ३२३ $\frac{६७२७०६}{४८१२७७८}$ नाक्षत्रमानवर्षेणैतावन्ति सावनमानदिनानि भवन्ति।

न्यासः ४८१२७७८। १५७७९१७८००। १। फलम् ३२७ $\frac{४१३८३८४}{४८१२७७८}$। नाक्षत्रमानवर्षेणैतावन्ति सौरमानदिनानि भवन्ति।

न्यासः ४८१२७७८। १५५९३४००७२। १। फलम् ३२४। नाक्षत्रमानवर्षेणैतावन्ति नाक्षत्राणि भवन्ति।

अथ चतुर्युगेण नाक्षत्राणामेतेषां १५५९३००७२ सप्तविंशत्या भागमपहृत्यावाप्तम् ५७७५३३३६। एतावन्तश्चतुर्युगेण नाक्षत्रमासाः पूर्वानीतेषु नाक्षत्रमानमासेषु संविदिताः। एतेषां तुल्यत्वाद्वर्षाणि तुल्यान्येव। वर्षाणां तुल्यत्वात्सर्वमानेषु त्रैराशिकमपि तुल्यम्। अत्र तात्पर्यार्थः--सौरमानं स्वमानेन षष्टयधिकं शतत्रयं दिनानां भवति। तस्मिन्नेव वर्षे चान्द्राणि त्रीणि शतानि एकसप्तत्यधिकानि

किञ्चिदधिकदिनानि आयान्ति। तस्मिन्नेव [1]सावनदिनानि त्रीणि शतानि पञ्च-षष्ट्यधिकानि सपादान्यायान्ति। तस्मिन्नेव नाक्षत्रदिनानि चत्वारि शतान्येकाधि-कानि किञ्चिदधिकान्यायान्ति।

तथा चान्द्रमानं स्वमानेन षष्ट्यधिकं दिनशतत्रयं भवति। तस्मिन्नेव रविदिनानां शतत्रयमेका[2]न्नपञ्चाशदधिकं सपादं भवति। तस्मिन्नेव सावनदिनानां शतत्रयं चतुष्पञ्चाशदधिकं सावशेषं भवति। तस्मिन्नेव नाक्षत्रदिनानां शतत्रय-मेकान्ननवत्यधिकं भवति।

तथा सावनं वर्षं स्वमानेन षष्ट्यधिकं शतत्रयं दिनानां भवति। तस्मिन्नेव रविदिनानां चतुष्पञ्चाशदधिकं शतत्रयमेकान्नपञ्चाशद्घटिकाधिकं भवति। तस्मिन्नेव चान्द्रं पञ्चषष्ट्यधिकं शतत्रयं दिनानां त्रिचत्वारिंशद्-घटिकाधिकं भवन्ति। तस्मिन्नेव शतत्रयं पञ्चनवत्यधिकं दिनानां नाक्षत्रमानं भवति।

तथा नाक्षत्रं वर्षं स्वमानेन दिनानां षष्ट्यधिकं शतत्रयं भवति। तस्मिन्नेव चान्द्रदिनानां शतत्रयं त्रयस्त्रिंशदधिकं भवति। तस्मिन्नेव शतत्रयं त्रयोविंशत्यधिकं दिनानां सौरं मानं भवति। तस्मिन्नेव सावनं दिनं दिनानां शतत्रयं सप्तविंशत्यधिकं भवति। एवं प्रत्येकं स्वमानेन षष्टिशतत्रयं दिनानां भवत्येव तत्सदृशत्वम्। एवं सौरादीनां च मानानामसदृशसदृशत्वं च ज्ञातम्।

अथ योग्यायोग्यत्वं प्रतिपाद्यते। सौरं मानं क्व योग्यं क्व वाऽयोग्यं तेन यन्निश्चीयते तदुच्यते। तद्यथा––युगानि कृतयुगादीनि तथा वर्षाणि विषुवद्द्वयमयनद्वयमृतवो दिनप्रमाणं चेति। अत्र तद्योग्यं नान्यत्र। तथा चान्द्रेण तिथयः करणान्यधिमासकोनरात्रामावस्यान्तं पौर्णमास्यन्तम्। तत्र तद्योग्यं नान्यत्र। तथा सावनं यज्ञव्रतोपवासचिकित्सासूतकप्रायश्चित्तग्रहगतौ योग्यत्वं नान्यत्र। नाक्षत्रं मानं सावनमानस्य मूलभूतं यद्वशात् क्रियते तत्तत्र योग्यं नान्यत्र।

---

१. अत्र सर्वत्र सौरसावनपदेन वास्तवे एव सौरसावनमाने विज्ञेये, न पौलिशमतानुसारेण परस्परं विपरीतरूपे इति।

२. एकादिश्चेकस्य चादुक् (६।३।७६) इत्यनेन पाणिनिसूत्रेण एकेन न पञ्चाशत् एकान्नपञ्चाशदथवैकोनपञ्चाशत्। एवमन्यत्र बोध्यम्।

तथा च [1]ब्रह्मसिद्धान्ते--

सौरेणाब्दा मासास्तिथयश्चान्द्रेण सावनैर्दिवसाः।
दिनमासाब्दपमध्या न तद्विनार्केन्दुमानाभ्याम्॥
मानानि सौरचान्द्रार्क्षसावनानि ग्रहानयनमेभिः।
चारैः पृथक् चतुर्भिः संव्यवहारश्च लोकस्य॥
युगवर्षविषुवदयनर्त्वहर्निशावृद्धिहानयः सौरात्।
तिथिकरणाधिकमासोनरात्रपूर्वक्रियाश्चान्द्रात्॥
यज्ञसवनप्रमाणग्रहगत्युपवाससूतकचिकित्साः।
सावनमानाज्ज्ञेयाः प्रायश्चित्ताः क्रियाश्चान्याः॥
नक्षत्रसावनदिनात् सूर्यादीनां स्वसावनदिनानि।
यस्मात्तस्मादार्क्षं दुरधिगमं मन्दबुद्धीनाम्॥ इति।

केचित्तु चन्द्रनक्षत्रभोगेण रूप[2]सत्राख्यो यो व्रतविशेषस्तत्रोपयोगित्व-माहुर्नाक्षत्रमानस्य।

तथा च भगवान् गर्गः--

सावनैन्दवसावित्रैर्दिनमाससमात्मकैः।
व्यवहारो भसत्रेषु भमानेन प्रकीर्तितः॥ इति।

एवं सौरादीनां मानानामसदृशसदृशयोग्यायोग्यत्वप्रतिपादने पटुः कुशलः॥

अन्यदप्याह --

सिद्धान्तभेदेऽप्ययननिवृत्तौ प्रत्यक्षं सममण्डल[3]लेखासम्प्रयोगाभ्युदितांशकानां छायाजलयन्त्रदृग्गणितसाम्येन प्रतिपादनकुशलः।

सिद्धान्तभेदेऽपीति। सिद्धान्ताः पौलिशादयः, तेषां भेदः असादृश्यम्, तस्मिन्नपि प्रतिपादने कुशलः शक्तः। अतिगणितपटुत्वात्। यथा--अमुकसिद्धान्तस्याऽमुकसिद्धान्तेन सह ग्रहाणामेतावदन्तरममुकेनापि सहैतावदन्तरमिति।

एवं ग्रहणसमागमादीनामपि। तथा चाऽऽचार्येण पञ्चसिद्धान्तिकायामेव प्रदर्शितम्।

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
२. गर्गत्रिरात्रब्राह्मणे रूपसम्पादको व्रतविशेषः।
३. रेखेति पाठान्तरम्।

तथा च—

[1]खार्कघ्नेऽग्निहुताशनमपास्य रूपाग्निवसुहुताशकृतैः।
हृत्वा क्रमाद्दिनेशो मध्यः केन्द्रं सविंशांशम्॥

इति पौलिशे।

तथा च—

[2]रोमकसूर्यो द्युगणात् खतिथिघ्नात्पञ्चकर्तुपरिहीणात्।
सप्ताष्टकसप्तकृतेन्द्रियोद्धृतात् मध्यमः सूर्यः॥

तथा—

[3]द्युगणेऽर्कोऽष्टशतघ्ने विपक्षवेदार्णवेऽर्कसिद्धान्ते।
स्वरखाश्विद्विनवयमोद्धते क्रमाद्दिनदलेऽवन्त्याम्॥ इत्यादि।

एवं सिद्धान्तत्रयेणार्कमानीयान्तरं बोद्धव्यमिति। तथायनयोर्दक्षिणोत्तरयोर्या निवृत्तिर्निवर्तनं तस्यामपि प्रतिपादने कुशलः। यथा—अमुकसिद्धान्तेऽर्कस्यैतावद्भिर्दिनैरेतावतीभिर्घटिकाभिरयनचलनममुकसिद्धान्ते एतावतीभिर्दृष्ट्याऽमुकस्मिन् दिने एतावतीभिर्घटिकाभिश्च दृश्यते तत्प्रतिपादने च कुशलः। एतच्चाऽऽचार्येणैव [4]प्रतिपादितम्।

तथा च पञ्चसिद्धान्तिकायाम्—

[5]आश्लेषार्द्धादासीद्यदा निवृत्तिः किलोष्णकिरणस्य।
युक्तमयनं तदाऽऽसीत् साम्प्रतमयनं पुनर्वसुतः॥

तथा च वक्ष्यति—

[6]आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु॥
साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत्।
उक्ताभावे विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः॥

---

१. पञ्चसिद्धान्तिकायाम् ३ अध्यायस्य १ श्लोकः।
२. पञ्चसिद्धान्तिकायाम् ८ अध्यायस्य १ श्लोकः।
३. पञ्चसिद्धान्तिकायाम् ९ अध्यायस्य १ श्लोकः।
४. प्रदर्शितमिति अ० क० पु० पाठः।
५. पञ्चसिद्धान्तिकायाम् ३ अध्यायस्य २१ श्लोकः।
६. बृहत्संहितायामादित्यचारस्य १–२ श्लोकौ।

तथा च दृष्टिवेधमाचार्य एव वक्ष्यति—

दूरस्थचिह्नवेधादुदयेऽस्तमये सहस्रांशोः।
छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति ॥ इति।

कथं प्रतिपादने कुशलः। प्रत्यक्षं दृश्यमानं पीठयन्त्रादिभिः कालयन्त्रैर्यथा लोकाः प्रतिपद्यन्ते। अपिशब्दः समुच्चये। तथा सममण्डललेखासम्प्रयोगाभ्युदितांशकानां च प्रतिपादने कुशलः। यथा स्वदेशसममण्डलाख्या लेखा विषुवल्लेखेत्यर्थः। तया योऽसौ ग्रहाणां सम्प्रयोगः सम्प्रवेशस्तत्र येऽभ्युदितांशका अभिमुखेनोद्गताः शेषा वांशकाः। स्वाहोरात्रवृत्ते ये दिनभागा दिनगतघटिकाः शेषघटिका वेत्यर्थः। यथास्मिन्निष्टदिने भगवतो भास्करस्य एतावतीभिर्दिनगतघटिकाभिः सममण्डलप्रवेशो भवति तावतीभिश्च शेषाभिः। तासां प्रतिपादने कुशलः।

अर्कस्य सममण्डलप्रवेशकाल आचार्येण तत्रोक्तः। तथा च—

[1]इष्टोत्तरगोलापक्रमांशकज्यां खभास्कराभ्यस्ताम्।
हृत्वाक्षजीवया तच्चापादुदयेन तत्कालः॥
तस्मिन् दिनकृत् कुरुते सममण्डलसंश्रयं दिनाद्ये वा।
तावच्छेषे परतो न तुलादिषु विद्यते चैतत्॥

मेषस्थः सूर्यः प्रथमेऽह्नि सममण्डलरेखायामेवोदितस्तस्यामवास्तमयं याति, क्रान्त्यभावात्। ततः प्रतिदिनं यथा यथार्कस्य क्रान्तिसम्भवो भवति, तथा तथा दिनगते काले सममण्डलप्रवेशो भवति। यावति दिनगते काले तावति दिनशेषेऽपि भवति। एवं यावत्कन्यान्तं तावद्भवति सममण्डलप्रवेशो राशिषट्केऽर्कस्य। तुलादिष्वेतन्न सम्भवति। एवं मेषादिराशिषट्के स्थितस्य सममण्डलप्रवेशो भवति, न तुलादिराशिषट्के स्थितस्य। तत्र प्रविष्टस्याभिज्ञानमिदम्—

[2]कृतदिग्ग्रहणे वृत्ते रेखां पूर्वापरां यदा छाया।
प्रविशति सम्यक् शङ्कोः सममण्डलगस्तदा सूर्यः॥

---

१. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य ३२–३३ श्लोकौ।
२. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य ३८ श्लोकः।

तत्र च काले शङ्क्वानयनम्--

[1]उत्तरगोलेऽर्कज्या काष्ठान्तगुणा ध्रुवज्यया भक्ता।
ताः शङ्कुलिप्तिकाख्यास्ताभिः सममण्डले छाया॥

सममण्डलज्ञस्य फलम्--

सममण्डललेखासम्प्रवेशवेलां करोति योऽर्कस्य।
तत्प्रत्ययं च जनयति जानाति स भास्करं सम्यक्॥

तथा च [2]ब्रह्मसिद्धान्ते--

विषुवत्कर्णेन गुणा विषुवच्छायोद्धृतोत्तरा [3]क्रान्तिः।
यद्यूनाक्षज्याभ्यः शङ्कुः सममण्डलस्थेऽर्के॥

एवमेतेषां सर्वेषां सिद्धान्तभेदादीनां छायया तात्कालिकया यन्त्रैश्च चक्रधनुस्तुयगोलयष्टिशङ्कुघटिकाकपालकर्तरीपीठैः कालपरिच्छेदकैस्तथा दृग्गणितसाम्येन दृष्टेर्गणितस्य च यत्साम्यं सादृश्यमेकरूपता तेन प्रतिपादने कुशलः शक्तः। गणितेनोपलभ्यच्छायां यन्त्रैर्दृष्ट्या समीकरोतीत्यर्थः॥

तथाऽन्यदप्याह--

सूर्यादीनां च ग्रहाणां शीघ्रमन्दयाम्योत्तरनीचोच्चगतिकारणाभिज्ञः।

सूर्यादय आदित्यादयो ग्रहाः। आदित्यचन्द्रभौमबुधजीवशुक्रसौराः। तेषां कः शघ्री: को मन्द इत्यस्मिन् कारणेऽभिज्ञः। तत्र च सर्वग्रहेभ्यश्चन्द्रमाः शीघ्रस्ततो मन्दो बुधस्ततः शुक्रस्ततोऽर्कस्ततः कुजस्ततो गुरुस्ततः शनिरिति। तथा सर्वग्रहेभ्यो मन्दः शनैश्चरस्ततो गुरुः शीघ्रस्ततः शुक्रस्ततो बुधस्ततश्चन्द्रमा इति। यस्य तु भूमेरासन्नो भ्रमः सोऽन्यस्माच्छीघ्रः। यस्य दूरः स मन्दः। यस्य च महती भुक्तिः स शीघ्रो यस्याल्पा स मन्द इति। तथा चाऽऽचार्यः--

[4]चन्द्रादूर्ध्वं बुधसितरविकुजजीवार्कजास्ततो भानि।
प्राग्गतयस्तुल्यजवा ग्रहास्तु सर्वे स्वमण्डलगाः॥

---

१. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य ३५-३६ श्लोकौ। अर्कज्या रविभुजज्या। काष्ठान्तः परमक्रान्तिज्या। ध्रुवज्या पलांशज्येति बोध्यम्।
२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
३. क्रान्तिपदेन क्रान्तिज्या ग्राह्या।
४. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य ३९ श्लोकः।

तथा च [1]ब्रह्मसिद्धान्ते--

भगणस्याधःशनिगुरुभूमिजरविशुक्रसोम्यचन्द्राः।
कक्ष्याक्रमेण शीघ्राः शनैश्चराद्याः कलाभुक्त्या॥

तथा चाऽऽचार्यभटः--

भानामधःशनैश्चरबृहस्पतिकुजार्कशुक्रबुधचन्द्राः।
[2]तेषामधश्च भूमिर्मेढीभूता खमध्यस्था॥

तत्र यस्य भूमिनिकटभ्रमः सोऽल्पेन कालेन भगणभोगं पूरयत्यतः शीघ्रः। यस्य दूरे स महता कालेनातो मन्दः। यतो भूम्यासन्नस्याल्पो भ्रमस्तत्र च राशिभागा अल्पा एव भवन्ति। दूरस्थितस्य च महान् भ्रमस्तत्र च राशिभागा एव महान्तस्तेन चन्द्रमाः स्वल्पेन कालेन भगणभोगं पूरयति महता कालेन सौरः। तथा चाऽऽचार्यः--

[3]तैलिकचक्रस्य यथा विवरमराणां घनं भवति नाभ्याम्।
नेम्यां महदेवं संस्थितानि राश्यन्तराण्यूर्ध्वम्॥
पर्येति शशी शीघ्रं स्वल्पं नक्षत्रमण्डलाधःस्थः।
ऊर्ध्वस्थस्तुल्यजवोऽपि संस्थितस्तथा न महदर्कसुतः॥

तथा च [4]ब्रह्मसिद्धान्ते--

लघवोऽल्पे राश्यंशा महति महान्तोऽल्पमल्पेभ।
पूरयतीन्दुर्महता कालेन महाशनैश्चारी॥

तथा चाऽऽर्यभटः--

मण्डलमल्पमधःस्थात् कालेनाल्पेन पूरयति चन्द्रः।
उपरिष्टात् सर्वेषां महच्च महता शनैश्चारी॥
अल्पे हि मण्डलेऽल्पा महति महान्तश्च राशयो ज्ञेयाः।
अंशाः कलास्तथैव विभागतुल्याः स्वकक्ष्यासु॥ इति।

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
२. एषामिति अ० क० पु० पाठः।
३. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य ५० श्लोकः।
४. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

तथा च याम्योत्तरादिगतिः। मेषादितः कन्यान्तं यावद्यो ग्रहो याति स उत्तरां गतिमाश्रितो भवति। तुलादितो मीनान्तं यावद्यो ग्रहो याति स दक्षिणां गतिमाश्रितो भवति। तथा चाऽऽचार्यभटः--

मेषादेः कन्यान्तं समुदगयनमण्डलार्धमुपयातम्।
तौल्यादेर्मीनान्तं शेषार्धं दक्षिणेनैव॥

एतत्सूर्यस्य दक्षिणोत्तरगतिकारणमुक्तम्। चन्द्रादिकस्तु पुनः सूर्यभ्रमणप्रदेशानुसारेण स्वभ्रमप्रदेशात् स्वविक्षेपवशेन दक्षिणेनोत्तरेण वा याति एतदुक्तं भवति--आदित्यस्य विक्षेपाभावात् क्रान्तिरेव स्वक्रान्तिः। चन्द्रादीनामर्कवत्क्रान्ति कृत्वा तस्या [1]विक्षेपेण सहैकदिक्केन योगः कार्यो भिन्नदिक्केन वियोगः। एवं कृते स्वक्रान्तिर्भवति यस्य च क्रान्तिरुत्तरा स उत्तरां गतिमाश्रितो भवति, यस्य दक्षिणा स दक्षिणाम्। अथवा मकरादौ राशिषट्के स्थित उत्तरां गतिमाश्रितो भवति कर्कटादौ राशिषट्के दक्षिणाम्। यस्मादुत्तरायणस्थो ग्रहः प्रतिदिनमुत्तरां दिशं याति दक्षिणायनस्थो दक्षिणाम्। एवं ग्रहाणां याम्योत्तरा गतिः।

अथ नीचोच्चा ग्रहाणां गतिः। तत्र स्वभ्रमणप्रदेशात् कदाचिद् ग्रह उपरि स्थितो भवति कदाचिदधःस्थः। यत्र मध्यमो ग्रहो भवति तत्कक्ष्यामण्डलम्। यत्र स्फुटग्रहो भवति तत्प्रतिमण्डलम्। अर्कचन्द्रौ मन्दप्रतिमण्डले भ्रमतः। ताराग्रहाः शीघ्रप्रतिमण्डले भ्रमन्ति। तत्र कक्ष्यामण्डलादुपरि स्थितो ग्रहो यदा भवति तदा द्रष्टुरतिदूरस्थो भवत्यतिदूरत्वात् स्वल्पबिम्बो दृश्यते स चोच्चां गतिमाश्रितो भवति। यदा कक्ष्यामण्डलादधःस्थितो भवति तदा भूमेरासन्नत्वान्महान् प्रमाणो दृश्यते स नीचां गतिमाश्रितो भवति। तत्र च ग्रहे स्फुटीक्रियमाणेऽन्त्यकर्णः प्रथमे केन्द्रपदे भवति चतुर्थे वा तदा ग्रह उच्चां गतिमाश्रितो भवति। अथ यदा द्वितीयतृतीयपदस्थो भवति तदा नीचां गतिमाश्रितोऽत एव त्रिज्यायां कोटिफलं धनमृणं वा क्रियते येन प्रतिमण्डलप्रापी स्फुटकर्णो भवति। तथा चाऽऽचार्यः--

[2]शीघ्रान्मध्यविहीनाद्राशित्रितये गतैष्यदंशज्या।
भुजकोटी तत्परतः षड्भ्यः पतिते स एव विधिः॥

---

१. प्राचीनाः कदम्बसूत्रीयशरसंस्कारेणैव स्फुटां क्रान्तिमानयन्ति। तदर्थमेव भास्कराचार्यैः सिद्धान्तशिरोमण्युदयास्तदृक्कर्मवासनाधिकारयोर्विशेषं लिलेख।

२. पञ्चसिद्धान्तिकायाम् १७ अध्यायस्य ४-५ श्लोकौ।

स्वपरिधिगुणिते भाज्ये खर्तुगुणैस्ते विपरिणते तच्च।
कोटिफलं व्यासार्धे मृगकर्क्यादौ चयापचयः॥

तद्भुजकृतियोगपदैरिति।

तथा च [1]ब्रह्मसिद्धान्ते--

तद्गुणिते ज्ये भांशैर्हृते फले कोटिफलयुता त्रिज्या।
आद्यन्तयोर्विहीना पदयोर्द्वितृतीययोः कोटिः॥

तद्भुजफलकृतियोगान्मूलं कर्ण इति।

एवमादिषु कारणज्ञाने अभिज्ञः। अभि मुख्येन जानातीत्यभिज्ञः॥

अन्यदप्याह--

सूर्याचन्द्रमसोश्च ग्रहणे ग्रहणादिमोक्षकालदिक्प्रमाणस्थिति-विमर्दवर्णादेशानामनागतग्रहसमागमयुद्धानामादेष्टा।

सूर्याचन्द्रमसोरर्कशशिनोर्ग्रहणे उपरागे ग्रहणादि ग्रहणप्रारम्भं जानाति। एतावति स्वदिनगते काले ग्राह्यग्राहकविम्बसम्पर्कः। तथा मोक्षकालं जानाति। एतावति गते काले मोक्षः। ग्राह्यमण्डलं [2]सकलं ग्राहकस्त्यजति। तथा कालं जानाति। ग्रग्रहणमोक्षयोरन्तर एतावान् कालः। तथा दिक्। अमुकस्यां दिशि ग्रग्रहणममुकस्यां निमीलनममुकस्यां मध्यग्रहणममुकस्यामुन्मीलनममुकस्यां मोक्ष इति। प्रमाणं यथा--खण्डग्रहण एतावद्विम्बं छिन्नं भवति। मध्यग्रहणकालिके तिथ्यन्ते स्फुटग्रग्रहणस्थित्यर्धं विशोध्य ग्रहणादिर्भवति, तत्रैव मौक्षकालिकं स्फुट-स्थित्यर्द्धं संयोज्य मोक्षकालो भवति। स्थित्यर्धद्वयस्य योगः स्थितिकालः। विमर्दो निमीलनोन्मीलनयोर्मध्यकालः। तावन्तं कालं ग्राह्यविम्बं सकलं ग्राहकः संछाद्य तिष्ठति स विमर्दकालः। तथा वर्णो ग्रहणे ग्राहकगृहीतस्य विम्बस्य। स धूम्रकृष्णताम्रकपिल इति। एतत्सर्वं गणितस्कन्धनिर्दिष्टम्। वलनविक्षेपवशेन परिलेखेन ग्रग्रहणादीनां दिग्ज्ञानम्। मध्यग्रहणपरिलेखकरणात् प्रमाणज्ञानम्। निमीलिनोन्मीलनविमर्दार्द्धयोर्योगे विमर्दकालः। वर्णो यथा--

आद्यन्तयोः स धूम्रः कृष्णः खण्डग्रहेऽर्धतोऽभ्यधिके।
ग्रासे प कृष्णताम्रः सर्वग्रहणे कपिलवर्णः॥ इति।

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
२. समग्रमिति अ० क० पु० पाठः।

एवमादिकानामादेशानामनागतानामेष्याणामादेष्टा कथयिता । तथा अनागतानां ग्रहसमागमानां ग्रहयुद्धानां चादेष्टा। समागमस्ताराग्रहाणां चन्द्रमसा सहैकराशिगतानां भवति। भौमादीनामेकराशिगतानां दक्षिणोत्तरसंस्थानवशेन युद्धं भवति।

तत्र समागमे युद्धे चैतत्परिज्ञानम्। यथा--अमुको ग्रह उत्तरे। अमुको दक्षिणे भविष्यति। तयोश्चान्तरमेतावन्तो हस्ता एवमेतावन्त्यङ्गुलानि वा भेदः समागमो वा भविष्यतीति। एतदपि गणितसिद्धम्। ग्रहयोर्विक्षेपौ कृत्वा ततस्तयोर्विक्षेपयोरेकदिक्कयोरन्तरं कार्यं भिन्नदिक्कयोर्योगः। ततस्तस्मादन्तराद्योगाद्वा ग्रहमानैक्यार्धं विशोधयेत्। यदि न शुद्धयति तदा भेदसमागमः। अधःस्थेन ऊर्ध्वस्थो ग्रहश्छाद्यते। अथ शुद्धयति तदा संशोध्य यदवशिष्यते तद्ग्रहान्तरं स्फुटं भवति। तच्च लिप्तारूपं तस्य षष्टया भागमपहृत्यावाप्तं भागास्त एव हस्ताः शेषं चतुर्विंशत्यां सङ्गुण्य प्राग्वद्विभज्यावाप्तान्यङ्गुलानि। तत्र यस्य दक्षिणो विक्षेपः स दक्षिणभागस्थो यस्योत्तरः स उत्तरविभागस्थः। द्वयोरेकदिक्कयोर्यस्याधिकः स तत्रस्थः। इतरोऽन्यत्र स्थितः। तत्र फलानि वक्ष्यत्याचार्यः। तथा चोक्तम्--

[1]भागैः कराः परस्परमेषां युद्धं समागमः शशिना।
रविणास्तमय उदक्स्थो ग्रहो जयी दक्षिणे शुक्रः॥ इति।

एतेषामप्यनागतानामादेष्टा॥

अन्यदप्याह--

प्रत्येकग्रहभ्रमणयोजनकक्ष्याप्रमाणप्रतिविषययोजनपरिच्छेदकुशलः।

एकमेकं प्रत्येकं प्रत्येकस्य ग्रहस्य भ्रमणयोजनानि प्रत्येकग्रहभ्रमणयोजनानि तेषां परिच्छेदे परिच्छित्तौ विज्ञाने कुशलः शक्तः। यथा---अमुको ग्रह एतावद्भिर्योजनैर्भूगोलादुपरि भ्रमति। ग्रहयोजनकर्णं जानातीत्यर्थः। तथा कक्ष्याप्रमाणपरिच्छेदकुशलः। अमुकस्य ग्रहस्यैतावन्ति कक्ष्यायोजनानि। मध्यमो ग्रहो यत्र भ्रमति तद्वृत्तपरिज्ञानमित्यर्थः।

तच्च कक्ष्याकर्णपरिज्ञानं पुलिशादिषु पठ्यते तत। आनीयास्माभिरिह प्रदर्श्यते। तत्र तावद्योजनप्रमाणज्ञानम्--

---

१. भागैरंशैः करा हस्ता ज्ञेया इत्यर्थः।

योजनमष्टौ क्रोशाः [1]क्रोशश्चत्वारि करसहस्राणि।
हस्तः शङ्कुद्वितयं द्वादशभिः सोऽङ्गुलैः शङ्कुः॥

अथ ग्रहाणां चतुर्युगाध्वयोजनप्रमाणम्--

युगमासाधिकमासाः सभमासा योजनीकृताः सोऽध्वा।
प्राग्यायिनां ग्रहाणां तस्मात् [2]कक्ष्या भगणभक्ताः॥

यावन्तश्चतुर्युगेणार्कभगणास्तावन्ति सावनमानेन चतुर्युगवर्षाणि भवन्ति। तानि च--

परिवर्तैरयुतगुणैर्द्वित्रिकृतैर्भास्करो युगं भुङ्क्ते ४३२०००।

एतानि चतुर्युगवर्षाणि द्वादशगुणानि ५१८४०००। एते सावनेन चतुर्युगमासाः। एत एव साधिमासकाः कर्तव्याः।

अधिमासकाः षडग्नित्रिकदहनच्छिद्रशररूपाः १५९३३३६॥

एतैर्युक्ता जाताः ५३४३३३३६। एते चतुर्युगेण चान्द्रेण मानेन मासा भवन्ति। एते भमाससहिताः कर्तव्याः। भमासाश्चान्द्राधिका ग्रहीतव्याः। चतुर्युगेण चान्द्रमासेभ्यो यावन्तोऽतिरिच्यन्त इति। तत्र चतुर्युगेण नाक्षत्रमानदिनानि।

आर्क्षेण खाष्टखत्रय[2]रसयुग्मगुणानिलशशाङ्काः १७३२६०००८०।

एतेषां त्रिंशता भागमपहृत्यावाप्तम् ५७७५३३३६। एतावन्तश्चतुर्युगेण नाक्षत्रमानमासा भवन्ति। एत एव चन्द्रभगणाः। चन्द्रभगणेनैकेन नाक्षत्रमानमासो भवति। तस्मान्नाक्षत्रमानमासानां चन्द्रमासाः संशोध्याः। संशोध्य जाताः ४३२०००। एतावन्तश्चतुर्युगेण चन्द्रमासेभ्यो नक्षत्रमासा अतिरिच्यन्त इति। तस्मादेतान् भमासान् सूर्यमासाधिमाससंयोगेऽस्मिन् ५३४३३३३६ संयोज्य जाताः ५७७५३३३६। एवं युगमासाधिकमासभमासयोगतश्चन्द्रभगणा[3] उत्पन्नाः। तस्माद्वक्ष्यति--

---

१. भास्कराचार्यकृतलीलावत्यां तु—"हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषाम्" इति क्रोशपरिभाषा। अतो भास्करक्रोशार्द्धं पुलिशक्रोशमानं तदष्टकं पुलिशयोजनमानं च भास्करक्रोशचतुष्टयेन योजनेन सममेव।

२. षड्दस्रगुणेति पाठान्तरम्। द्रष्टव्यं २७ पृष्ठमस्य ग्रन्थस्य।

३. अतोऽत्र--"युगमासाधिकमासाः सममासाः" इति पुलिशवाक्यव्याख्या भट्टोत्पलेन चन्द्रभगणा इति कृता।

रसदहनहुतवहानलशरमुनिपवनेन्द्रियै ५७७५३३३६ श्चन्द्रः।

अथैते चन्द्रभगणा योजनीकार्याः। कथमित्यत्रोच्यते——चन्द्रकक्ष्यायां पञ्चदशभिर्योजनैरेकैका लिप्ता भवत्यतश्चन्द्रभगणानां लिप्ताः कृत्वा पञ्चदशभिर्गुणयित्वा योजनसंख्यात्वमाप्नुवन्ति। वक्ष्यति च——

पञ्चदशहता योजनसंख्येति।

तत्र युगमासाधिकमासभमासयोगोऽयं ५७७५३३३६ द्वादशहतो जातः ६९३०४००३२। एते चतुर्युगेण चन्द्रराशयः। एते त्रिंशद्गुणाः २०७९१२००-९६०। एते चतुर्युगेण चन्द्रभागाः षष्ट्या गुणिताः १२४७४७२०५७६००। एताश्चतुर्युगेण चन्द्रलिप्ताः। एताः पञ्चदशहता जाताः १८७१२०८०८६४-०००। एतावन्ति योजनानि प्रत्येकस्य ग्रहस्य चतुर्युगाध्वा।

आचार्यः पठिष्यति च——

वेदरसाष्टवियद्वसुखरविनगाष्टेन्दवः सहस्रघ्नाः १८७१२०८०८६४०००।

एतावन्ति योजनान्येकेन ग्रहेण स्वकक्ष्यास्थेन पूर्वां दिशमाक्रमता चतुर्युगेण गन्तव्यानीति। तद्युक्तम्——प्राग्यायिनां ग्रहाणामिति।

तस्मात् कक्ष्या भगणभक्ताः। अत्र तावदाकाशकक्ष्याप्रमाणं क्रियते। तत्र चतुर्युगाध्वयोजनानीमानि १८७१२०८०८६४०००। एतान्यष्टाधिकेन[1] चतुर्युगसहस्रेण कल्प इत्यष्टाधिकेन सहस्रेण गुणितानि जातानि १८८६१७७७५१०९१२-०००। इयमाकाशकक्ष्या। अस्या अभ्यन्तरं सविता वितमस्कं करोति। एषा च पठ्यते——

खत्रयसूर्यनवाम्बरचन्द्रबाणमहीधरसप्तमहीध्राः।
चन्द्ररसाष्टकमङ्गलचन्द्रा मार्गमिदं नभसः प्रवदन्ति॥

अथ ग्रहभगणाः——

परिवर्त्तैरयुतगुणैर्द्वित्रिकृतै४३२०००० र्भास्करो युगं भुङ्क्ते।
रसदहनहुतवहानलशरमुनिपवनेन्द्रियै५७७५३३३६श्चन्द्रः॥
वेदाश्विवसुरसाङ्कलोचनदस्रै२२९६८२४रविनिसूनुः।
अम्बरगगनवियन्मुनिगुणविवर[2]नगेन्दुभिः १७९३७००० शशिसुतश्च॥

---

१. सम्प्रति प्रसिद्धसूर्यसिद्धान्तादिमतेन चतुर्युगसहस्रेण कल्प इति।
२. विवर–अन्तर–छिद्र–रन्ध्र–शब्दा एकपर्याया नवसंख्याद्योतकाः।

आकाशलोचनेक्षणसमुद्रषट्कानलै३६४२२०र्जीवः ।
अष्टवसुहुतवहानलयमखनगै७०२३३८८ भार्गवश्चापि ॥
कृतरसशरर्त्तुमनुभिः १४६५६४ सौरो बुधभार्गवौ दिवाकरवत् । इति ।

एतैर्भगिमपहृत्य यथाक्रमं कक्ष्याप्रमाणानि ।

तद्यथा--

रविकक्ष्या खखार्थरूपाग्निगुणाब्धयः ४३३१५००
चन्द्रकक्ष्या शून्यखखजिनाग्नयः ३२४०००
भौमकक्ष्या मुन्यग्नि[1]नन्दषट्काब्धिरूपवसवः ८१३६९३७
बुधशीघ्रकक्ष्या भवरदाब्धिदिशः १०४३२११ ।
बृहस्पतिकक्ष्या वेदर्त्वगार्थमुनिविश्वार्थाः ५१३७५७६४
शुक्रशीघ्रकक्ष्या रदर्त्वब्धिषडङ्गाश्विनः २६६४६३२
सौरकक्ष्या गोऽग्न्यगशशिमुनिरसागार्काः १२७६७१७३९
रविकक्ष्या सवि[2]कला षष्ठिहता नक्षत्रकक्ष्या

तथा च ब्रह्मसिद्धान्ते---

अर्को भषष्ट्यंश इति ।

सा च रविखखगोऽष्टनवतत्त्वानि २५९८९००१२

तथा च पुलिशाचार्यः----

आकाशशून्यतिथिगुणदहनसमुद्रै४३३१५००र्बुधार्कशुक्राणाम् ।
इन्दोः सहस्रगुणितैः समुद्रर्नत्राग्निभि३२४०००श्च स्यात् ॥
भूसूनोर्मुनिरामच्छिद्रर्त्तुसमुद्रशशिवसुभिः ८१४६९३७ ।
रुद्रयमाग्निचतुष्कव्योमशशाङ्कै१०४३२११र्बुधोच्चस्य ॥
जीवस्य वेदषट्कस्वरविषयनगाग्निशीतकिरणार्थैः ५१३७५७६४ ।
शुक्रोच्चस्य यमानलषट्कसमुद्रर्त्तुरसदस्रैः २६६४६३२ ॥
भ्रमणोऽर्कजस्य नवशिखिमुनीन्दुनगषट्कमुनिसूर्यैः १२७६७१७३९ ।
रविखवियन्नववसुनवविषयेक्षणयोजनै२५९८९००१२र्भकक्ष्यायाः ॥

अथ कर्णानयनम् ।

तत्रादौ तदुपयोगिनीनां चान्द्रीणां कलानामानयनमाह---

---

१. नवेति क्ष० क० पु० पाठः ।

२. सविकला विकलासहिता यतो गणितेन रविकक्षा सावयवा = $\frac{\text{खकक्षा}}{\text{रविभगणा}}$ = ४३३१५००$\frac{२}{५}$ = ४३३१५००।२४ इति वास्तवा समायाति ।

इष्टग्रहकक्ष्याभ्यो यल्लब्धं चन्द्रकक्ष्यया भक्त्वा।
ता मध्यमा ग्रहाणां सौरादीनां कलाश्चान्द्र्यः॥

इष्टग्रहकक्ष्यायोजनानां चन्द्रकक्ष्यायोजनैर्भागमपहृत्यावाप्तं लिप्तास्तस्यैव ग्रहस्य चान्द्रचो भवन्ति। कक्ष्यामहत्त्वविवक्षया सौरादीनामित्युक्तम्। सौरादीनां मध्यमग्रहाणां चान्द्रचः कला भवन्ति। तत्र कर्मणो लाघवार्थं सर्वग्रहाणां भाज्यभाजकराशी चन्द्रकक्ष्यायोजनैरपवर्त्तनीयौ तत्र सर्वग्रहस्य भाज्यो राशिश्चन्द्रभगणा भवन्ति। भाजकराशिः स्वभगणा इति। तत्रैतत्कर्म जातम्। चन्द्रभगणानां यस्यैव ग्रहस्य संबन्धिभिर्भगणैर्भागो ह्रियते तस्यैव कलाश्चान्द्रचो भवन्ति। एवं दर्शितविधिना सर्वग्रहाणामागताश्चान्द्रचः कला लिख्यन्ते।

रवेः १३$\frac{१५६३३३६}{४३२०००}$।
चन्द्रस्य १।
भौमस्य २५$\frac{३३२७३६}{२२६६८२४}$।
बुधस्य ३ $\frac{३६४२३३६}{१७६३७०००}$।
जीवस्य १५८$\frac{२०६५७६}{३६४२२०}$।
शुक्रस्य ८$\frac{१५७४२३२}{७०२२३८८}$।
शनेः ३९४$\frac{७१२०}{१४६२६४}$।
(खकक्षायाः[1] ५८२१५३६२६८८)।

अथ चान्द्रीभिः कलाभिर्ग्रहकक्ष्याकर्णानयनमाह----

पञ्चदशहता योजनसङ्ख्या तत्सङ्गुणोऽर्द्धविष्कम्भः।
योजनकर्णोऽधः स्याद्भूयोजनकर्णविधिना वा॥

एताश्चान्द्रचः कलाः पञ्चदशगुणिता योजनत्वं गच्छन्ति योजनभूताश्च क्रमेण लिख्यन्ते।

रवेः २००$\frac{२३०००४०}{४३२०००}$।
चन्द्रस्य १५।
भौमस्य ३३७$\frac{३६७३६२}{२२६६८२४}$।
बुधस्य ४८$\frac{५३२४०४०}{१७६३७०००}$।
गुरोः २३७८$\frac{१८४८८०}{३६४२२०}$।

---

१. लभ्यन्त इति अ० क० पु० पाठः।
२. इदं न केष्वपि पुस्तकेषु वर्ततेऽस्माभिर्गणितेन निश्चित्य लिखितमावश्यकत्वात्।

शुक्रस्य १२३$\frac{२५४६३१६}{७०२२३८८}$।

शनेः ५९१०$\frac{१०६८००}{१४६२६४}$।

[1]नक्षत्राणाम् १२०३१$\frac{२०४१२}{२१६००}$।

(खकक्षायाः ८७३२३०४४०३२०)।

एतानि प्रतिकक्ष्यं ग्रहाणां लिप्तायोजनानि।

तत्सङ्गुणोऽर्द्धविष्कम्भ इति।

एतैः सर्वकक्ष्यायोजनैरर्द्धविष्कम्भो [2]व्यासार्द्धं ३४३७$\frac{८६७}{१३०८}$ गुणितः प्रतिकक्ष्यं कर्णार्द्धयोजनानि भवन्ति। तत्र व्यासार्द्धं ३४३७$\frac{८६७}{१३०८}$ पूर्वानीतैराकाशकक्ष्यालिप्तायोजनैरेतैः ८७३२३०४४०३२० गुणितं जाताः[3] ३००१९३८१०६५२४०६४। एतदाकाशकक्ष्याकर्णार्द्धम्। भूवृत्तयोजनाष्टशतीं खनित्वा यः प्रदेशो भवति तस्मात्प्रदेशादेतावत्सु योजनेष्वाकाशकक्ष्योपरि भवति। सर्वेषामेव कक्ष्याकर्णार्द्धानां तस्मादेव प्रदेशात् प्रवृत्तिर्ज्ञातव्या।

एतत्पुलिशसिद्धान्ते पठ्यते।—

[4]कृतर्त्तुशून्यवेदाश्विपञ्चर्त्तुखनिशाकराः।

वस्वग्निरन्ध्रेन्दुखखगुणाः ३००१९३८१०६५२४०६४ कर्णार्द्धमाम्बरम्॥

अथ तदेव व्यासार्द्धं पूर्वानीतैर्नक्षत्रकक्ष्यालिप्तायोजनैरेतैः १२०३१ $\frac{२०४१२}{२१६००}$ गुण्यम्। तत्र गुण्यो राशिर्गुणकारश्च [5]सवर्णीकृतो नक्षत्रकक्ष्यां जाता रविखवियन्नववसुनवविषयेक्षणयोजनानीति २५९८९००१२।

इयं नक्षत्रकक्ष्या व्यासार्द्धेन सवर्णीकृतेनानेन ४५००००० गुणनीया व्यासार्द्धच्छेदेनानेन १३०९ खखषड्भूयम २१६०० हतेनानेन २८२७४४००विभ-

---

१. षष्टिगुणितानि रविकलायोजनानि नक्षत्राणां कलायोजनानि भवन्ति।

२. इदं २१६०० परिधेर्व्यासार्द्धम् ३९२७ : ६२५ :: २१६०० : ३४३७$\frac{९६७}{१३०८}$ अनेनानुपातेन सिध्यति। भास्कराचार्येणापि परिधितो व्यासानयनार्थमयमेवानुपातः सूक्ष्मः प्रतिपादितः। (द्रष्टव्या मच्छोधिता भास्करलीलावती)।

३. अत्रान्ते $\frac{३२४}{१३०८}$ इदं शेषमायाति तदल्पत्वात् पुलिशेन त्यक्तमिति भाति।

४. सर्वेषु पुस्तकेषु "कृतं तु शून्यवेदब्धिपञ्चशंखरविनिशाकराः वस्वनिरध्रेन्दुखखगुणाः कर्णार्द्धमाम्बरम्" इति भ्रष्टपाठस्तथैतत्पूर्वं सर्वं गणितं च भ्रष्टमतोऽस्माभिर्ग्रन्थस्थपुलिशसिद्धान्तीयवचनानुसारेण सर्वं गणितं विगणय्य महतायासेन निवेशितं तद्वशादिदं पौलिशवाक्यं च संशोध्य निवेशितम्।

५. कोऽपि सच्छेदो राशिः स्वच्छेदेन गुणितः सवर्णीकृतो भवति। (द्रष्टव्यमस्य ग्रन्थस्य २९ पृष्ठम्)।

ज्यते यस्मात् परस्परच्छेदवधो भागोपहारो भवति। तदर्थं गुणकारभागहारराश्योरनयोः४५०००००। २८२७४४००। [1]परस्परं वर्तने कृते जातम् ७२००। अनेनाप्तं गुणकारम् ६२५। अनेन नक्षत्रकक्ष्या गुणिता। एवं जाताः १६२४-३१२५७५००।

अथ छेदेनानेन ७२०० छिन्नाद्भागोपहारालब्धेनानेन ३९२७ भागो हर्तव्यः। लब्धम् ४१३६२६८३। एतन्नक्षत्रकक्ष्याकर्णार्द्धम्।

अथ शनैश्चरकक्ष्यालिप्तायोजनानि ५९१०$\frac{१०६८००}{१४६९६४}$ सवर्णीकृतानि ८६६३०००४० व्यासार्द्धेन च सवर्णीकृतेनानेन ४५००००० गुणितानि ३८९८३५०१८०००००० [2]सर्वग्रहाणां भाज्यो राशिः। अयं व्यासार्द्धच्छेदेनानेन १३०९ गुणितैर्यस्यैव ग्रहसंबन्धिभिर्भगणैर्भागो ह्रियते तस्यैव कक्ष्याकर्णार्द्धं लभ्यते तस्मात् सर्वग्रहाणां कक्ष्यालिप्तायोजनानि सवर्णीकृतान्ययमेव ८६६३०००४० राशिर्भवति।

अस्य राशेः सर्वेषामेव सवर्णीकृतं व्यासार्द्धं गुणकारो ग्रहभगणहतो व्यासार्द्धच्छेदोऽयं १३०९ भागोपहारः। १३०९ अनेन गुणिता भगणाः सर्वेषां लिख्यन्ते यस्मात्ते भागोपहारा भविष्यन्ति।

तद्यथा––रवेः ५३५४८८०००।

चन्द्रमसो नोपयुज्यते तत्कक्षायाः सविकलायाः पञ्चदशयोजनानि यस्मालिप्ता।

भौमस्य ३००६५४२६१६।

बुधस्य २३४७९५३३०००।

गुरोः ४७६७६३९८०।

शुक्रस्य ९१९२३०५८९२।

सौरस्य १९१८५२२७६।

---

१. परस्परं वर्तनं मिथो भजनं महत्तमापवर्त्तनानयनवत्।

२. अत्रोपपत्तिः––शनिलिप्तायोजनानि $= \frac{\text{१५ चंभ}}{\text{शभ}}$। शनिकर्णार्द्धं $= \frac{\text{१५ चंभ}}{\text{शभ}} \times \frac{४५०००००}{१३०९}$

$= \frac{\text{१५} \times \text{चंभ} \times ४५०००००}{१३०९ \times \text{शभ}}$। एवमिष्टग्रहलिप्तायोजनानि $= \frac{\text{१५ चंभ}}{\text{इग्रभ}}$। इष्टग्रहकर्णार्द्धं

$= \frac{\text{१५} \times \text{चंभ} \times ४५०००००}{१३०९ \times \text{इग्रभ}}$ अतोऽत्र सर्वत्र भाज्यो राशिः स्थिर एव। स च १३०९ गुणितैर्यस्य ग्रहस्य भगणैर्ह्रियते तस्य कर्णार्द्धं लभ्यत इति।

अत्र भाज्यराशेरस्य सर्वग्रहाणाम् ३८९८३५०१८०००००० आदित्यभागोपहारेणानेन ५३५४८८०००० भागमपहृत्यावाप्तम् ६८९३७८। एतदादित्यकर्णार्द्धम्।

व्यासार्द्धमेतत् ३४३७ $\frac{६६७}{१३०६}$। कक्ष्यालिप्तायोजनैः पञ्चदशभिर्गुणितम् ५१५६६। एतच्चन्द्रकक्ष्याकर्णार्द्धम्।

एवं सर्वेषां भाज्यराशेः स्वभाजकेन भागमपहृत्यानीताः सर्व एव। तद्यथा--अर्ककर्णो वस्वागाग्निनन्दाष्टरसाः ६८९३७८।

चन्द्रकर्णः षडर्तुशरैकार्थाः ५१५६६।
भौमकर्णो नेत्रनेत्रर्त्वङ्गनन्दार्काः १२९६६२२।
बुधशीघ्रकर्णः शशिगुणखाङ्गाष्टयः १६६०३१।
बृहस्पतिकर्णो वस्वष्टषट्षण्मुनिरूपदसवः ८१७६६८८।
शुक्रशीघ्रकर्णो वस्वष्टखाब्धिनेत्राऽब्धयः ४२४०८८।
सौरकर्णो रूपाब्धिशरनन्दैकगुणनखाः २०३१९५४१।
नक्षत्रकर्णो रामाष्टर्त्वश्विरसविश्वेवेदाः ४१३६२६८३।

तथा च पुलिशाचार्यः--

वसुमुनिगुणान्तराष्टकषट्कै ६८९३७८ दिननाथशुक्रसौम्यानाम्।
द्वादशदलषट्केन्द्रियशशाङ्कभूतै ५१५६६ रजनिकर्तुः॥
दस्राश्विषट्करसनवलोचनचन्द्रै १२९६६२२ र्धरणिसूनोः।
रूपत्रिशून्यषट्काष्टि १६६०३१ र्भिमितं तद्बुधोच्चस्य॥
अष्टवसुरसषण्मुनिशशाङ्कवसुभि ८१७६६८८ स्तु जीवस्य।
वसुवसुशून्याब्धिद्विकवेदै४२४०८८ रपि भार्गवोच्चस्य॥
एकार्णवार्थनवशशिदहनखदस्रै २०३१९५४१ रविसुतस्य।
त्रिवसुरसद्विरसानलशशिवेदैर्ऋक्षकर्णार्द्धम् ४१३६२६८३ ।इति।

भूयोजनकर्णविधिना वैतत्सूत्रखण्डकं प्रकारान्तरप्रदर्शनायातो न व्याख्यातम्।

एवं कर्णकक्ष्याप्रमाणेष्वभिज्ञः। तथा प्रतिविषयं प्रतिदेशं योजनपरिच्छेदकुशलः। परिच्छेदो ज्ञानम्। यथा--इतः समुद्र एतावद्योजनसङ्ख्यस्तस्माद्देशादयं देश एतावन्ति योजनानि तत्र कुशलः शक्तः। तद्यथा--अभीष्टदेशद्वयाक्षभागानामन्तरं कृत्वा यद्भवति तेन 'स्वराश्विखशरान् ५०२७ सङ्गुण्य खर्त्वग्नि ३६० भिर्विभजेत्, लब्धमिष्टदेशयोरन्तरयोजनानि ।

---

१. ५३पृष्ठस्य २ पङ्क्तिस्थलेखेन "योजनाष्टशतीम्" इत्यनेन भूव्यासार्द्धं ८०० तत्परिधिश्च

तथा च [1]ब्रह्मसिद्धान्ते--

अक्षांशकुपरिधिवधान्मण्डलभागाप्तयोजनैर्विषुवति।
नतभागयोजनैः ख उपरि सूर्योऽन्यदनुपातात्॥

अथवाक्षद्वयान्तरभागैस्त्रैराशिकेन योजनानयनम्। यद्येकेन[2] भागेन नवयोजनानि नवभागोनानि भवन्ति, तदाभीष्टभागैः किमिति लब्धं योजनानि। एतदेवाचार्यो "दृश्ये[3] चक्रस्यार्द्धे" इत्यादिना ग्रन्थेन वक्ष्यति। एवं प्रतिविषयं योजनपरिच्छेदकुशलः॥

अथान्यदप्याह--

भूभगणभ्रमणसंस्थानाद्यक्षावलम्बकाहर्व्यासचरदलकालराश्युदयच्छायानाडीकरणप्रभृतिषु क्षेत्रकालकरणेष्वभिज्ञः।

भूभगणेति, भूमेः संस्थानाभिज्ञः। भूमेः संस्थानं जानाति।

यथा--भूर्गोलकाकारा खमध्यस्थिता नक्षत्रपञ्जरमध्यगता च ध्रुवतारकद्वयप्रतिबद्धा तिष्ठति। अयस्कान्तद्वयाकृष्टोऽन्तरे लोहपिण्ड इव। स च भूगोलः समन्तात्तरुनगनगरसरित्समुद्रादिभिर्व्याप्तः। तस्योपरि मध्यभागे मेरौ देवास्तले दैत्या इति। एवमियं भूर्गोलकाकारा खमध्यगा तिष्ठति।

नन्विदमत्याश्चर्यमुच्यते यथा खस्थो भूगोल इति यावदल्पस्यापि मूर्तिमत्पदार्थस्याऽऽकाशे स्थितिर्न दृश्यते किमिति पुनर्महाप्रमाणया भुवो नगनगरद्वीपगजरथतुरङ्गाद्यनेकाश्चर्याकुलीकृतायाः। नैतद्योग्यं स्वरूपत्वात्। यथाऽग्निर्दहनात्मको वायुश्च प्रेरणात्मकः। उदकं च क्लेदनात्मकम्। न विषयेण कश्चित्प्रयोजकः। एवमियं भूर्धारणात्मिका न धारणा तस्मात् खेऽस्थिरा नेयं सर्वं धारयति। अथ पतत्येव तिष्ठतु का नः क्षतिरिति चेत् तदपि न। यतो लोष्टादयः शिशुभिरुपरि

$\frac{२१६०० \times ८००}{३४३७\frac{९६७}{१३०९}} = \frac{२१६०० \times ८००}{\frac{४५०००००}{१३०९}} = \frac{२१६०० \times ८०० \times १३०९}{४५०००००} = \frac{२४ \times ८ \times १३०९}{५०}$

$= \frac{९६ \times १३०९}{२५} = \frac{१२५६६४}{२५} = ५०२६\frac{१४}{२५} = ५०२७$ स्वल्पान्तरात्। तेन सर्वपुस्तकेष्वतिभ्रष्टः पाठोऽत्रास्माभिः शोधितः।

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

२. वराहमिहिरमतेन भूपरिधिः=३२०० तेनैकस्मिन्नंशे योजनानि=$\frac{३२००}{३६०}=\frac{८०}{९}=९-\frac{१}{९}$ (द्रष्टव्यो मच्छोधितपञ्चसिद्धान्तिकात्रयोदशाध्यायस्य १५ श्लोकः)।

३. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य १४ श्लोकः।

क्षिप्ता भुवमासादयन्तो दृश्यन्ते। मन्दं क्षितिः पतति चेद् मान्द्यमेवैतदतिगुरुत्वाद् भूमेः। अथावश्यं पतति तथापि क्व पततु। अध इत्याह--किमिदमधो नाम? प्रतियोगिसापेक्षश्चाधःशब्दः। यथा स च विशेषाणामपादानं चाधो भूरुपरि वियदेवमस्याः सर्वाधोभूताया भुवः किमधः। खमिति चेत्, तर्हि सर्वतो युगपत्प्रसङ्गः। तत्रोपरिपार्श्वपतने निरस्ते दृष्टिविरोधात्। अधश्च निरस्तमेव। अधःपतनाद्यदाधारविशेषः प्रकल्प्य इत्यभिप्रायेण तदपि न शक्यते वक्तुं तस्यापि मूर्त्तिमत्त्वादन्योऽन्यस्तस्याथ इत्यनवस्थाप्रसङ्गः। अत्रोच्यते— स्वशक्याऽसौ तिष्ठति तत्प्राथम्यादेव स्वशक्तिः कथं भुवो न परिकल्प्यते। भूमेश्चावश्यं शक्तिः परिकल्पयितुं बुध्यते। अन्यथा सर्वतोऽपि परस्परमधोभावेन सत्त्वानामवस्थितिरेव न स्यात् समुद्रादीनां च। तस्मान्मूर्त्तिमदाधाररहितो विशिष्टशक्तियुक्तो भूगोलः खे तिष्ठतीत्युपपन्नम्। तथा चाऽऽचार्य एवाऽऽह--

[1]पञ्चमहाभूतमयस्तारागणपञ्जरे महीगोलः।
खेऽयस्कान्तान्तः स्थो लोह इवावस्थितो वृत्तः॥
तरुनगनगराग्रामसरित्समुद्रादिभिश्चितः सर्वः।
विबुधनिलयः सुमेरुस्तन्मध्येऽधःस्थिता दैत्याः॥
सलिलतटासन्नानामवाङ्मुखी दृश्यते यथा छाया।
तद्वद्गतिरसुराणां मन्यन्ते तेऽप्यधो विबुधान्॥
गगनमुपैति शिखिशिखा क्षिप्तमपि क्षितिमुपैति गुरु किञ्चित्।
यद्वदिह मानवानामसुराणां तद्वदेवाधः॥

तथा च पौलिशे--

वृत्ता चक्रवदचला नभस्यपारे विनिर्मिता धात्रा।
पञ्चमहाभूतमयी तन्मध्ये मेरुरमराणाम्॥

तथा च [2]ब्रह्मसिद्धान्ते—

शशिबुधसिताककुजगुरुशनिकक्ष्यावेष्टितो भकक्ष्यान्तः।
भूगोलः सत्त्वानां शुभाशुभैः कर्मभिरुपातः॥

---

१. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य १–४ श्लोकाः। अत्र ३ श्लोके "सलिलतटसङ्गतानाम्" इति पाठः।

२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

खे भूगोलस्तदुपरि मेरौ देवाः स्थितास्तले दैत्याः।
खे भगणक्षगस्थावुपर्यधश्च ध्रुवौ तेषाम्॥

तथा चाऽऽर्यभटः--

वृत्तभपञ्जरमध्ये कक्ष्यापरिवेष्टितः खमध्यगतः।
मृज्जलशिखिवायुमयो भूगोलः सर्वतो वृत्तः॥
यद्वत् कदम्बपुष्पग्रन्थिः प्रचितः सशन्ततः कुसुमैः।
तद्वद्विविधैः सत्त्वैर्जलजैः स्थलजैश्च भूगोलः॥
मेरुर्योजनमात्रः प्रभाकरो हिमवता परिक्षिप्तः।
नन्दनवनस्य मध्ये रत्नमयः सर्वतो वृत्तः॥
स्वर्मेरुस्थलमध्ये नरको वडवामुखं च जलमध्ये।
असुरसुरा मन्यन्ते परस्परमधःस्थिता नियताः॥

तथा च वसिष्ठसिद्धान्ते--

जगदण्डखमध्यस्था महाभूतमयी क्षितिः।
भावाय सर्वसत्त्वानां वृत्तगोल इव स्थिता॥ इति।

एवं भूमेः संस्थानं जानाति।

तथा च भगणस्य नक्षत्रचक्रस्य भ्रमणसंस्थानं च जानाति। यथा भपञ्जरो ध्रुवयोर्नियमितः प्रवहाऽनिलेन भ्राम्यमाणो लङ्कास्थानामुपरिष्टाद् भूलग्नो देवासुराणां परिभ्रमतिइति च। देवानां प्रदक्षिणगो दैत्यानामप्रदक्षिणगोऽन्येषां भूस्थानामक्षवशादुन्नमति ध्रुव उत्तरेण नमति। तथा चाऽऽचार्यः--

मेरोः[1] समसुपरि वियत्यक्षो व्योम्नि स्थितो ध्रुवोऽधोऽन्यः।
तत्र निबद्धो मरुता प्रवहेण भ्राम्यते भगणः॥

यदुक्तमाचार्याऽऽर्यभटेन--

अनुलोमगतिनौस्थः पश्यत्यचलं विलोमगं यद्वत्।
अचलानि भानि तद्वत्समपश्चिमगानि लङ्कायाम्॥ इति।

अत्रायं परिहारः--

[2]भ्रमति भ्रमस्थितेव स्थितिरित्यपरे वदन्ति नोडुगणः।
यद्येवं श्येनाद्या न खात् पुनः स्वनिलयमुपेयुः॥

---

१. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य ५ श्लोकः।
२. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य ६–८ श्लोकाः।

अन्यच्च भवेदभूमेरह्ना भ्रमरहंसा ध्वजादीनाम्।
नित्यं पश्चात्प्रेरणमथाल्पगा स्यात्कथं भ्रमति॥
अर्हत्प्रोक्तेऽर्केन्दू द्वौ द्वावेकान्तरोदयौ किल तौ।
यद्येवमर्कसूत्रात् किं ध्रुवसूत्रं भ्रमत्यह्ना॥

तथा च पौलिशे--

तस्योपरि ध्रुवः खे तद्बद्धं पवनरश्मिभिश्चक्रम्।
पवनक्षिप्तं भानामुदयास्तमयं परिभ्रमति॥

तथा चाऽऽचार्याऽऽर्यभटः--

उदयास्तमयनिमित्तं नित्यं प्रवहेण वायुना क्षिप्तम्।
लङ्कासमपश्चिमगं भमण्डलं सग्रहं भ्रमति॥

तथा च [1]ब्रह्मसिद्धान्ते--

ध्रुवयोर्मध्ये सव्यगममराणां क्षितिजसंस्थमुडुचक्रम्।
अपसव्यगमसुराणां भ्रमति प्रवहानिलक्षिप्तम्॥
अन्यत्र सर्वतो दिशमुन्नमति भपञ्जरो ध्रुवौ नमति।
लङ्कायामुडुचक्रं पूर्वापरगं ध्रुवौ क्षितिजे॥

एवं भगणभ्रमः।

संस्थानं तथा। नक्षत्रध्रुवकात् क्रान्तिज्यां कृत्वा तस्याश्चापभागाः कार्यास्तेषां विक्षेपेणैकदिवकेन सह योगो भिन्नदिवकेन सह वियोगः कार्यः। एवं कृते स्वक्रान्तिर्भवति भागरूपा। तावद्भिर्भागैर्विषुवल्लेखातो याम्येनोत्तरेण वा नक्षत्रयोगतारकः क्रान्तिवशेन संस्थितः। एवं भगण भ्रमणसंस्थानज्ञः। आदिग्रहणादर्कसंस्थानमन्यदेशानां भ्रमणव्यस्तत्वं च जानाति।

एतच्चाऽऽचार्येणैवोक्तमर्थे। तथा च--

प्रोद्यंतरविरमराणां भ्रमत्यजादौ कुवृत्तगः सव्यम्।
उपरिष्टाल्लङ्कायां प्रतिलोमश्चामरारीणाम्॥

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्ते–इत्यर्थः।

२. पञ्चसिद्धान्तिकायाम् १३ अध्यायस्य ९–३४ श्लोकाः। तत्र ११ श्लोके तद्दक्षिणदेशानाम्। १२ श्लोके दिवसोऽर्के। १५ श्लोके समदक्षिणोत्तराणाम्। १८ श्लोके तद्भ्रमति मेरुमध्यात्। १९ श्लोके योजनं गत्वा। २१ श्लोके उज्जयिनीतो विरमति पर्यस्तोऽयं भगणगोलः। २३ श्लोके त्र्याधिक्यं च चतुःशतमुदगवन्त्याः। २४ श्लोके चतुःशतों साग्राम्। नोदयमिह यान्त्यलिमृगघटचापधराः कदाचिदपि–इति पाठः।

मिथुनान्ते च कुवृत्तादंशचतुर्विंशतिं विहायोच्चैः।
भ्रमति हि रविरमराणां समोपरिष्टात्तदाऽवन्त्याम्॥
नष्टच्छायाप्येवं छायोदक् तत्प्रभृत्युदक्स्थानाम्।
तद्वद्दक्षिणगानां मध्याह्ने दक्षिणा छाया॥
मेषवृषमिथुनसंस्थे दिनं रवौ कर्कटादिगे रात्रिः।
यैरुक्ता विबुधानां मेरुस्थानां नमस्तेभ्यः॥
येष्वेवोदङ्मेषाद्याति स्थानेषु संभिवृत्तोऽपि।
तेष्वेव कथं दृश्यः पुनर्न दृश्यश्च तत्रस्थः॥
दृश्ये चक्रस्यार्धे त्रयः खमध्यात्तु राशयस्ते[1] धाम्।
नवतिस्तानि च खण्डान्युदयात् परिकल्पनीयानि॥
एकैकांशो नवभिर्नवभागोनैश्च योजनैर्भवति।
सच दक्षिणोत्तराणां प्रत्यक्षः खेऽप्ययं मध्यात्॥
एवं च नवत्यंशैरष्टौ दृष्टानि योजनशतानि।
तत्प्रामाण्यादेशे मध्याह्ने द्रष्टुरुदयो यः॥
उज्जयिनी लङ्कायाः संनिहिता योत्तरेण सभसूत्रे।
तन्मध्याह्नो युगपद्विषमो दिवसो विषुवतोऽन्यः॥
योजनशतानि भूमेः परिमाणं षोडश द्विगुणितानि।
तापयति मेरुमध्याद्विषुवस्थोऽर्कः क्षितिं चैवम्॥
षडशीतिं पञ्चशतीं त्रिभागहीनं च योजनं मित्वा।
क्षितिमध्यमुदगवन्त्या लङ्कायां योजनाष्टशतीम्॥
प्रतिविषयमुदक्तुङ्गो हरिजाद्यावद्ध्रुवः खमध्यात्तु।
दिनकृदपि नमति विषुवति दक्षिणतस्तावदेवांशैः॥
त्रिशतीं त्रिसप्ततियुतां गत्वोदग्योजनत्रिभागं च।
उज्जयिनीतो विघटति पर्याप्तोऽयं भगणगोलः॥
षष्टिर्नाड्यस्तस्मिन् सकृदुदितो दृश्यते दिवसनाथः।
परतः परतो बहुतरमाषण्मासादिति सुमेरौ॥
योजनपञ्चनवांशान् व्यधिकां च चतुःशतीमुदगवन्त्याम्।
गत्वा न धनुर्मकरौ कदाचिदपि दर्शनं व्रजतः॥
तस्मादेव स्थानाद्द्व्यशीतियुक्तां चतुःशतीं गत्वा।
दृष्टिपथं नो यान्त्यलिमृगघटचापधराः कदाचित्॥

---

१. स्तेंऽशा इति अ० क० पु० पाठः।

षडशीतिं पञ्चशतीं त्र्यंशोनं योजनं च तत एव।
गत्वाऽन्त्यं चक्रार्द्धं नोदेत्याद्यं न यात्यस्तम्॥
लङ्कास्था भूलग्नां नभसो मध्यस्थितां च मेरुगताः।
ध्रुवतारामीक्षन्ते तदन्तरालेऽन्तरोपगताः॥
सकृदुदितः षण्मासान् दृश्योऽर्को मेरुपृष्ठसंस्थानाम्।
मेषादिषु षट्सु चरन् परतो दृश्यः स दैत्यानाम्॥
मेषस्तेषां नित्यं लग्नं त्र्यंशश्च भूमिपुत्रस्य।
त्रिंशद्भागनवांशद्वादशभागाश्च तस्यैव॥
विषुवल्लेखाधस्ताल्लङ्का तस्यां समो भगणगोलः।
त्रिंशन्नाड्यो दिवसस्त्रिंशत्तस्यां सदा च निशा॥
सलिलेन समं कृत्वा तुङ्गं फलकं यथादिशं दृष्ट्या।
दक्षिणकोट्यां शंङ्कुं फलकप्रमितं व्यवस्थाप्य॥
ऋजुशङ्कुबुध्नविन्यस्तलोचनो नामयेत्तथा शङ्कुम्।
भवति यथा शङ्क्वग्रं ध्रुवतारादृष्टिमध्यस्थम्॥
पतितेन भवति वेधो लङ्कायामूर्ध्वगेन तु सुमेरौ।
विनतेन चान्तराले फलकच्छेदार्धसूत्रसमे॥
तत्रावलम्बको यः सोऽक्षज्या तस्य शङ्कुविवरं यत्।
विषुवदवलम्बकोऽसौ याम्योत्तरदिक्प्रसिद्धिकरः॥
स्वप्रत्ययेन सन्तो विज्ञायैवं वदन्ति भूमध्यम्।
सकलमहीमानं वा रसमिव लवणाम्भसाल्पेन॥ इति॥

एवमादिग्रहणाज्ज्ञेयम्।

तथाक्षावलम्बाभ्यां। अक्षो ध्रुवोन्नतिः। एतावद्भिर्भागैः स्वदेशे हरिजादुच्छ्रितो ध्रुवो दृश्यते। अथवेष्टदिने कीदृशोऽक्षः। तत्र गणितविधिना स्वदेशाक्षभागानुत्पाद्य तेषु क्रान्तिभागानुत्तरान् शोधयेत्। दक्षिणान् क्षिपेत्। एवमिष्टदिनाक्षो[1] भवति। तथा चाऽऽचार्यः—

विषुव[2]द्दिनसममध्यच्छायावर्गात्सवेदकृतरूपात्।
मूलेन शतं विभां विषुच्छायाहतं छिन्द्यात्॥

---

१. इष्टदिनाक्ष इष्टदिने रवेर्मध्यनतांशाः।

२. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य २०-२१ श्लोकौ। तत्र २० श्लोके आदौ "विषुवद्दिनमध्याह्नच्छाया", प्रत्यपे च "छिन्द्याम्", २१ श्लोके च "अथवा यथेष्टदिने" इति पाठः।

लब्धं विषुवज्जीवा चापमतोऽक्षोऽथवैवमिष्टदिने ।
मेषाद्यपक्रमयतस्तुलादिषु विवर्जितः स्वाक्षः ।।

अवलम्बकः । यावद्भिर्भागैः स्वदेशसममण्डलरेखातो ध्रुव उत्तरेण नमति सोऽवलम्बकः, इष्टदिनावलम्बको वा, तत्राभीष्टाक्षभागा नवतेः संशोध्याः शेषा अवलम्बकांशा भवन्ति ।

तथा चाऽऽचार्यः--

[1]विषुवज्ज्यायामार्धवर्गविश्लेषमूलमवलम्बकः ।

तथा--

चरख[2]ण्डकपक्षांशज्याघ्नमहर्व्यासमुद्धरेत्खजिनैः ।
द्विः कृत्वा तद्वर्गात्क्रान्तिज्याकृतियुतान्मूलम् ।।
तेन विभजेत् स्थितज्यां व्यासार्द्धगुणामवाप्तमक्षज्या ।
नवतेरक्षोनायाः क्रमशो ज्या लम्बको भवति ।।

अहर्व्यासो द्युव्यासः स्वाहोरात्रविष्कम्भः । ग्रहस्येष्टक्रान्तित्रिज्याकृत्योरन्तरपदं द्विगुणमित्यर्थःतथा चाऽऽचार्यः--

क्रान्ति[3]त्रिज्याकृत्योरन्तरपदं द्विगुणं द्विनव्यासः ।। इति ।

चरदलकालः । राशीनां मेषादीनां चरखण्डकालः । स्वदेशनिरक्षदेशदिनरात्र्योरन्तरमित्यर्थः ।

[4]विंशतिरष्टिः सार्द्धपादोनाः सप्त चाजपूर्वाणाम् ।
विषुवच्छायागुणिताः क्रमोत्क्रमाच्चरविनाडयोऽर्द्धैः ।।

---

१. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य २३ श्लोकपूर्वार्द्धम् । तत्रान्ते "मूलभवो लम्बः" इति पाठः ।

२. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य २८–२७ श्लोकौ । तत्र २७ श्लोकस्योत्तरार्द्धे "भूजीवां कृत्वा तत्क्रान्तिज्याकृतियुतान्मूलम्" इति तथा २८ श्लोकस्य पूर्वार्द्धे "तेन विभजेत् क्षितिज्याम्" इति पाठः ।

३. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य २३ श्लोकस्योत्तरार्द्धम् । तत्र "क्रान्तिज्यात्रिज्याकृत्यन्तरात्पदद्विदिनव्यासः" इति पाठः ।

४. पञ्चसिद्धान्तिकायाम् ३ अध्यायस्य पौलिशसिद्धान्ताख्यस्य १० श्लोकः ।

एवं चरदलज्ञानम्।

एतैर्गणितविधिना स्फुटरवेरिष्टदिनचरदलसाधनं कार्यम्।

राश्युदया राशीनां मेषादीनां निरक्षदेशे स्वदेशेष्वेवोदयप्रमाणचषकाः॥

तथा चाऽऽचार्यः——

वसुमुनिपक्षा[1] व्येकं शतत्रयं चिद्विकाग्नयश्चाङ्काः।
परतस्त एव वामाः षड्उत्क्रमात्ते तुलाद्यर्द्धे॥
चरदलकालक्षीणास्त्रयस्त्रयः संयुताः प्रतीपैस्तैः।
उदयर्क्षतुल्यकालेन यान्ति तत्सप्तमाश्चास्तम्॥

छाया। स्वदेशे विषुवति[2] द्वादशाङ्गुलस्य शङ्कोरिष्टकाले वा। सलिलकृतसमायामवनौ विषुवद्दिवसमध्याह्ने द्वादशाङ्गुलस्य शङ्कोश्छाया विषुवती भवति इष्टदिने गणितविधिना सिद्धयति।

तथा चाऽऽचार्यः——

[3]अपमोनयुताक्षज्यां त्रिज्यातत्कृतिविशेषमूलेन।
छिन्द्याद्द्वादशगुणितां लब्धा माध्याह्निकी छाया॥

इष्टच्छायानयनम्——

[4]तत्कालचरविनाडीद्विदशांशं द्विष्ठमजतुलाद्यैषु।
षड्घ्नीभ्यो नाडीभ्यो जह्यात् संयोजयेच्चापि॥
तज्ज्या स्थितज्यया संयुता विसंयोजिताजतुलाद्येषु।
अविशोधनेन जीवा षड्घ्नीनामेव कर्तव्या॥
एवं कृत्वा हन्याद्द्युव्यासेनावलम्बघ्नेन।
छिन्द्यात् खखाष्टवस्वश्विभिः फलं शङ्कुलिप्ताख्यम्॥
तत्कृतिविनाकृतानां खखवेदसमुद्रशीतरश्मीनाम्।
पदमर्कघ्नं शङ्क्वङ्गुलाख्यलिप्तोद्धृतं छाया॥

नाडीकरणम्। इष्टकाले शङ्कुच्छायां दृष्ट्वा कालानयनं छायातो जानाति कालाच्च छायानयनम्।

---

१. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य ३०–३१ श्लोकौ। तत्र ३० श्लोके "त्रिद्विकाग्नयश्चाजात्" इति पाठः।

२. विषुवति विषुवद्दिन इत्यर्थः।

३. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य २२ श्लोकः। तत्र "छिन्द्या द्वादशगुणिता लब्धा" इति पाठः।

४. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य ४१–४५ श्लोकाः।

तथा चाऽऽचार्यः—

[1]षड्घ्नेऽथ स्वद्युमिते छिन्ने सद्वादशैर्विमाध्याह्नैः।
छायाङ्गुलैर्गतास्ता नाड्यः प्राक् पृष्ठतः शेषाः॥
छायाऽऽर्की नाडीभिर्दिनमानं षड्घ्नमुद्धरेत्तत्र।
लब्धं द्वादशहीनं मध्याह्नच्छायया सहितम्॥
सा विज्ञेया [2]छायेति च॥

तत्क्षेत्रं कालाज्जानाति क्षेत्राच्च कालम्।

यथैतावतीनां दिनगतघटिकानां रात्रिगतानां वा किं लग्नं तस्य लग्नस्य कियत्यो राशिभागलिप्ता इति।

एतत्कालात् क्षेत्रमतथा चास्मदीयवचनम्—

तात्कालिकार्कराशेर्भोगकलास्तत्प्रमाणसङ्गुणिताः।
खखवसुशशिभिर्लब्धं विशोधयेत् प्रश्नचषकेभ्यः॥
संयोज्यं भुक्तमिते तत्परतः शोधयेत् स्वराश्युदयान्।
यावन्तः संशुद्धास्तावन्तो राशयः क्षेप्याः॥
सूर्ये शेषं विभजेदशुद्धचषकैः खरामसङ्गुणितम्।
लब्धं भागादि रवौ प्रक्षिप्य तथा कृते लग्नम्॥
रात्रिगते षड्भयुतादर्काद्दिनवत्प्रसाधयेल्लग्नम्।
दिनलग्ने यद्विहितं तद्विपरीतं निशाशेषे॥

एतत्कालात् क्षेत्रम्। क्षेत्राच्च कालम्। इष्टकाले तात्कालिकं लग्नं दृष्ट्वार्कं च इदं लग्नं कियतीनां घटिकानां दिनगतानां रात्रिगतानां रात्रिशेषाणां वा। एतज्जानाति लग्नार्कयोरन्तराद् घटिकानयनं करोति। तथा चास्मदीयवचनम्—

सूर्यादभुक्तभागैर्लग्नाद्भुक्तैः प्रसाधयेल्लब्धिम्।
तद्योगे राश्युदयान् तदन्तरस्थान् क्षिपेत्कालः॥

---

१. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य ४८–४९श्लोकौ। तत्र ४८ श्लोकादौ "षड्घ्नेऽथवा द्युमाने" इति पाठः।

२. "सा विज्ञेया छाया वासिष्ठसमाससिद्धान्ते" इत्याचार्येण पञ्चसिद्धान्तिकायाम् २ अध्याये नक्षत्राविच्छेदाख्ये १३ श्लोके कथितम्।

तथा—

ऊनो लब्धेः कालस्तमेव भक्त्वार्करााशमानेन।
प्राग्वल्लब्धं सूर्ये दत्त्वा लग्नं भवेत्तदन्तरकम्॥
तद्राशिमानगुणितं खखाष्टरूपैर्विभाजितं कृत्वा।
लब्धं कालं विन्द्यादिति।

एवं क्षेत्रकालकरणमेवमादिष्वभिज्ञ। इति।

अथ तन्त्रज्ञस्य विशेषलक्षणमाह—

नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारो निकषसन्तापाभिनिवेशैः कनकस्येवाधिकतरममलीकृतस्य शास्त्रस्य वक्ता तन्त्रज्ञो भवति।

इत्थंभूतस्य शास्त्रस्य यो वक्ता प्रतिपादकः स तन्त्रज्ञो भवति गणितज्ञ इत्यर्थः।

कीदृशस्य शास्त्रस्य निकषसन्तापाभिनिवेशैः कनकस्येवाधिकतरममलीकृतस्य। यथा कनकं स्वर्णं स्वभावनिर्मलं भवति। तच्चनिकषसन्तापाभिनिवेशैरधिकतरं निर्मलं भवति। निकषं निर्घर्षणं पाषाणतले। सन्तापोऽग्नौ परितापनम्। अभिनिवेशो यन्त्रच्छेदनसङ्घट्टनमेतैः सुवर्णमधिकतरममलं भवति। शास्त्रस्य निकषं निर्घर्षणं भूयोभूयोऽन्वेषणम्। सन्तापश्चित्तपरितापश्चमत्कारस्तत्रैवैकाग्रता। अभिनिवेशो यत्नो व्यासक्तिः। एतैरमलीकृतस्य निःसन्देहभूतस्य कीदृशो वक्ता नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारः। नानाप्रकाराश्च ते चोद्याः, प्रश्नानां भेदाः प्रश्नभेदाः। अभिधेयस्यार्थस्य प्रतिपक्षोद्भावेनानुपपत्त्योपपादनं चोद्यम्। यथा केनचिच्चोद्यः कृतः। यथा यो दक्षिणस्यां दिशि कन्यास्थे सवितर्यतीवस्फुटरूपस्तारको दृश्यते स ध्रुवः। उत्तरस्यां दिशि योऽतिसूक्ष्मरूपः सोऽगस्त्यः। तस्य गोलवासनया तन्त्रज्ञेन परिहारो दीयते। यथा भूगोलमध्ये मेरुस्तत्र चाक्षभागानुवर्तिर्ध्रुवोन्नतिरेवाक्षोऽतो दक्षिणस्यां दिशि ध्रुवो न दृश्यते यतस्तन्न भूगोलमध्यम्। अगस्त्य उत्तरस्यां न दृश्यते यतः स खमध्यात् स्वक्रान्त्या दक्षिणे गतो ध्रुवकविक्षेपवशात्। अनधिगतस्यार्थस्याधिगमतापवचनम्। प्रश्नो यथा—नक्षत्रगणनया चित्रा प्रथमतः स्थिता तत्पश्चात् स्वाती कथं स्वाती पूर्वमुदयं याति पश्चाच्चित्रा। चित्रायामस्तमितायां पश्चात्स्वातिरस्तमेति। तस्या अपि गोलवासनया तन्त्रज्ञेन परिहारो दीयते। यथा चित्रा दक्षिणविक्षिप्ता स्वातिरुत्तरतश्चित्राया अल्पमहःप्रमाणं स्वातेरतिमहत्। तेनैतत् सम्भवति। एवं नानाचोद्यप्रश्नभेदानामुपलब्धिर्नानाचोद्यप्रश्नभेदोपलब्धिः। उपलब्धिरुपलम्भनं ज्ञानं वादिकृतप्रश्नानां परिहारः। तयोपलब्ध्या

जनित उत्पन्नो वाक्सारो निश्चयो यस्य स तथाभूतः। अन्य एवं व्याचक्षतेयथा—नानाचोद्यप्रश्नभेदोपलब्ध्या जनितो वाक्सारो यस्य कैर्निकषसन्तापाभिनिवेशैः कनकस्येवाधिकतरममलीकृतस्य शास्त्रस्येति।

उक्तं च गर्गेण महर्षिणा किं तदित्याह—

न प्रतिबद्धं गमयति वक्ति न च प्रश्नमेकमपि पृष्टः।
निगदति न च शिष्येभ्यः स कथं शास्त्रार्थविज्ज्ञेयः॥१॥

यो नरः प्रतिबद्धं शास्त्रोपनिबद्धमर्थं न गमयति न प्रतिपादयति सूत्राक्षराणां योऽर्थस्तं विहायाऽसारार्थं प्रतिपादयति। तथा हि—केनचित् सन्देहव्युदासार्थं पृष्टः सन्नेकमपि प्रश्नं न वक्ति न कथयति। तथा च शिष्येभ्यश्छात्रेभ्यो न निगदति न पाठयति। स कथं केन प्रकारेण शास्त्रार्थविद् ग्रन्थसद्भावो ज्ञेयो ज्ञातव्यः। एतदुक्तं भवति। एवंविधः स मूर्ख इति ज्ञेयो न पण्डितः॥१॥

अथ मूर्खोपहासार्थमाह—

ग्रन्थोऽन्यथाऽन्यथार्थं करणं यश्चान्यथा करोत्यबुधः।
स पितामहमुपगम्य स्तौति नरो वैशिकेनार्याम्॥२॥

यो नरो मनुष्योऽन्यथाऽन्येन प्रकारेण ग्रन्थसंस्थितोऽन्यथार्थं करोति। करणं गणितकर्म्म गुणकारभागहारादिकमन्यथास्थितमन्यथा करोति। यथा—

दिन[1]करवसिष्ठपूर्वान् विबुधमुनीन् भावतः प्रणम्यादौ।
जनकं गुरुं च शास्त्रे येनास्मिन्नः कृतो बोधः। इति।

अत्र व्याख्या—दिनं सर्वत्र मानैर्यद्गण्यते। करौ हस्तौ। याभ्यां गणितकर्म क्रियते। वसिष्ठो धनधान्यतोऽर्थः प्रार्थयते। पूर्वा आद्यपुरुषाः। पितामहप्रभृतयो य एतान् दिनकरवसिष्ठपूर्वान्। विशेषेण बुधाः पण्डिता ये मुनयः ऋषयो ये तान्। तथा भावतो भा कान्तिर्विद्यते येषु ते भावन्तो द्वादशादित्यास्तानपि भावतः। यतस्तदालोकात् सर्वेषामेव कर्म्मणां प्रवृत्तिः आदौ प्रथमतः प्रणम्य नमस्कृत्य। तथा जनानां लोकानां कं शिरो जनकं कीदृशं गुरुं च गौरवयुक्तं सर्वाङ्गप्राधान्यात्। येन केन नोऽस्माकमस्मिन् शास्त्रे बोधः कृत उत्पादितः। मूर्ध्ना विना सत्सु विद्यमानेष्ववयवेषु न किञ्चित् कर्तुं शक्यत इति।

---

१. पञ्चसिद्धान्तिकायाः प्रथमः श्लोकस्तत्र "विविधमुनीन्द्रान् प्रणम्य भक्त्यादौ" इति पाठः।

तथा करणे। [1]द्युगणेऽहर्गणे, अष्टशतघ्ने अष्टौ च शतं चाष्टशतं तेन हते गुणिते। किं भूतेऽहर्गणे विपक्षा वेदार्णवाः प्रमाणं यस्य द्वाभ्यां हीना चतुश्चत्वारिंशदित्यर्थः। तथा तस्मिन् अर्कसिद्धान्ते। अर्का द्वादश। सिद्धाश्चतुर्विंशतिरन्तेऽवसाने यस्य। यथासङ्ख्यं स्वरखाश्विद्विनवयमाभ्यां क्रमादुद्धृते विभक्ते भगणादिविलिप्तान्तोऽर्को लभ्यते। एवमवन्त्यामुज्जयिन्यां दिनदले मध्याह्ने नान्यदेशेष्वित्यर्थः।

सोऽबुधो मूर्खः पितामहं पितुः पितरमुपागम्य तत्समीपं गत्वा वैशिकेन वैश्यात्वेन नखदशनक्षतसीत्कारादिभिर्गुणैरार्यां मातरं स्तौति श्लाघयति। मूर्खोपहासमेतत् ॥२॥

अथ त्रिस्कन्धस्य वाक्प्रशंसार्थमाह --

तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते।
होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या ॥३॥

तन्त्रे गणितस्कन्धे सुपरिज्ञाते सुष्ठु सवासनिके विदिते। तथा लग्ने तात्कालिके उदये छायायाः शङ्कोः संबन्धिन्या अम्बुयन्त्रेण घटिकादिकेन च संविदिते सम्यग्ज्ञाते। कालं ज्ञात्वा स्फुटतरे कृत इत्यर्थः।

तथा होरार्थे जातकार्थे सुरूढे सुस्थिरे सति। आदेष्टुरुपदेशकर्तुर्भारती वाग् वन्ध्या निष्फला न भवति। तस्य वाग् मुनेरिव सत्या भवतीत्यर्थः॥

उक्तं चाऽऽचार्यविष्णुगुप्तेन। तथाऽऽह --

अप्यर्णवस्य पुरुषः प्रतरन् कदाचि-
दासादयेदनिलवेगवशेन पारम्।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत्कदाचिदनृषिर्मनसापि पारम् ॥ ४ ॥

अपिशब्दः सम्भावनायां वर्तते। अर्णवस्य समुद्रस्य दुस्तरस्यापि पुरुषो मनुष्यः प्रतरन्नुल्लङ्घयन्ननिलवेगवशेन वायुरयहेतुना परं पारमासादयेत्प्राप्नुयात्। अस्य पुनः कालपुरुषाख्यमहार्णवस्य कालरूपः पुरुषः स चाख्या नाम यस्यासौ कालपुरुषाख्यः, स च महार्णवस्तस्य ज्योतिःशास्त्रविस्तीर्णसमुद्रस्यानृषिरमुनिर्मनसा चित्तेनापि पारं नासादयेत्। अनेन ज्योतिःशास्त्राऽऽनन्त्यं प्रदर्शितं भवति॥

---

१. पञ्चसिद्धान्तिकायाम् ९ अध्यायस्य १ श्लोकः।

अथ स्कन्धद्वये के भेदास्तदर्थमाह --

होराशास्त्रेऽपि च राशिहोराद्रेष्काणनवांशकद्वादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादिपरिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दायदशान्तर्दशाष्टकवर्गराजयोगचन्द्रयोगद्रिग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रयभावावलोकननिर्यणगत्यनूकानि तत्कालप्रश्नशुभाशुभनिमित्तानि विवाहादीनां च कर्मणां करणम्।

होराशास्त्रे जातकशास्त्रे के भेदाः। अपिशब्दः सम्भावनायां चशब्दः प्रकारार्थे। न केवलं तन्त्रे वक्रानुवक्रास्तमयोदयाद्या उक्ताः। यावद्धोराशास्त्रेऽपि तथा भेदाः। तद्यथा--राशिर्मेषादिकस्तस्य स्वरूपं [1]मत्स्यो घटीत्यादि स चाष्टादशशतलिप्तात्मकः। होरा तदर्द्ध तस्या [2]मार्तण्डेन्द्वोरिति लक्षणमुक्तम्। द्रेष्काणस्त्रिभागस्तस्य द्रेष्काणाः [3]प्रथमपञ्चनवाधिपानामिति लक्षणमुक्तम्। नवांशको नवभागस्तस्याजमृगेति[4] लक्षणमुक्तम्। द्वादशभागो द्वादशांशस्तस्य [5]भवनसमांशकेति लक्षणमुक्तम्। त्रिंशद्भागस्त्रिंशांशस्तस्य [6]कुजरविजेत्यादि लक्षणमुक्तम्। बलाबलपरिग्रहो राशीनामेव [7]होरास्वामिगुरुज्ञेत्यादिनोक्तः। तथा ग्रहाणामादित्यादीनां दिग्बलं [8]दिक्षु बुधार्किरसाविति। स्थानबलं [9]स्वोच्चसुहृदिति। कालबलं [10]निशि शशिकुजसौरा इति। चेष्टाबलमुदगयने[11] रविशीतमयूखाविति। एताभिर्दिक्स्थानकालचेष्टाभिः। अनेकप्रकाराणां बहुविधानां बलानां वीर्याणां निर्धारणं विचारः। यथा चन्द्रसितौ क्षेत्र इति शुभग्रहदर्शनं नैसर्गिकबलमित्येवमादिकानाम्। प्रकृतिर्वातपित्तश्लेष्मात्मकत्वम्। [12]मधुपिङ्गलदृक्चतुरस्रतनुः पित्तप्रकृतिरित्यादि। धातुः वसासृङ्मांसमेदास्थिमज्जाशुक्राणि धातवस्ते चोक्ताः [13]स्नाय्वस्थ्यसृक्त्वगित्यादि। द्रव्यं ताम्रादि। ताम्रं स्यान्मणिहेम[14] इत्याद्युक्तम्।

---

१. बृहज्जातके १ अध्यायस्य ५ श्लोकः। २. बृहज्जातके १ अध्यायस्य ११ श्लोकः।
३. लघुजातके १ अध्यायस्य ७ श्लोकः। ४. बृहज्जातके १ अध्यायस्य ६ श्लोकः।
५. बृहज्जातके १ अध्यायस्य ६ श्लोकः। ६. बृहज्जातके १ अध्यायस्य ७ श्लोकः।
७. बृहज्जातके १ अध्यायस्य १९ श्लोकः। ८. बृहज्जातके २ अध्यायस्य १९ श्लोकः।
९. बृहज्जातके २ अध्यायस्य १९ श्लोकः। १०. बृहज्जातके २ अध्यायस्य २१ श्लोकः।
११. बृहज्जातके २ अध्यायस्य २० श्लोकः। १२. बृहज्जातके २ अध्यायस्य ८ श्लोकः।
१३. बृहज्जातके २ अध्यायस्य ११ श्लोकः। १४. बृहज्जातके २ अध्यायस्य १२ श्लोकः।

जातिर्ब्रह्मणादिर्विप्रादितः [१]शुक्रगुरू इत्युक्ता। चेष्टा विनियोगः। [२]राजानौ रविशीतगू इति। आदिग्रहणात् सत्त्वादिगुणत्रयं [३]चन्द्रार्कजीवा इति। कटुकादिरसषट्कं देवादिस्थानानि वस्त्राणि [४]देवाम्व्वग्नीत्यादिनोक्तानि। एवमादिकः। परिग्रहः स्वामित्वम्। तथा निषेको गर्भाधानं यथास्तराशिर्मिथुनं[५] समेतीत्यादि। जन्मकालो गर्भमोक्षसमयः पितुर्जातः[६] परोक्षस्येत्यादिकः। तत्र च विस्मापनप्रत्ययादेशः। विस्मयजननानां प्रत्ययानां नालवेष्टितकोशवेष्टितानां द्वित्रादीनां भुजांघ्रिशिरसां जन्मकथनं तदीयस्य पितुश्च सन्निधानमसन्निधानं गर्भमोक्षलक्षणं द्वारदिक्परिज्ञानं गृहशय्यासूतिकासहजव्रणादिपरिज्ञानम्। सद्योमरणमरिष्टाध्यायः [७]सन्ध्यायामित्यादि। आयुर्दायो जीवितप्रमाणम्। [८]मययवनमणित्थमिति। दशा ग्रहाणामायुषं आधिपत्यम्। [९]उदयरविशशाङ्केत्यादि। अन्तर्दशा मध्यवर्तिनो दशा [१०]एकर्क्षगोऽर्द्धमिति। अष्टकवर्ग औत्पादिकानां फलानां परिज्ञानं स्वादर्क[११] इत्यादि। राजयोगाः प्राहुर्यवना[१२] इति। चन्द्रयोगाः सुनफादुरुधुराख्याः। हित्वार्क[१३] सुनफानफेति। द्विग्रहयोगाः। [१४]तिग्मांशुर्जनयतीत्यादि। [१५]तथैकस्थैश्चतुरादिभिरिति। नाभसयोगा नवदिग्वसव[१६] इति। आदिग्रहणात् कर्माजीवाराशिशीलानि प्रकीर्णाध्यायानिष्टयोगाः। [१७]अर्थाप्तिः पितृमातृपत्नीति कर्माजीवाः। वृत्ता[१८] तामदृगिति राशिशीलानि। [१९]स्वर्क्षतुङ्गेति प्रकीर्णकः। लग्नात् [२०]पुत्रकलत्र इत्यनिष्टयोगाः। एतेषां फलानि तथा क्रियाश्रयाध्यायः। कुसल[२१]मकुलमुख्य इत्यादि। भावाध्यायः [२२]शूरस्तब्धेति। अवलोकनं दृष्टिफलाध्यायः। चन्द्रे [२३]भूपबुधाविति। निर्याणं मरणनिमित्तं [२४]मृत्युर्मृत्युगृहेक्षणेनेति। गतिर्देवलोकादिः। [२५]गतिरपि रिपुरन्ध्रेत्यादि। अनूकं

---

१. बृहज्जातके २ अध्यायस्य ७ श्लोकः। २. बृहज्जातके २ अध्यायस्य १ श्लोकः।
३. बृहज्जातके २ अध्यायस्य ७ श्लोकः। ४. बृहज्जातके २ अध्यायस्य १२ श्लोकः।
५. बृहज्जातके ४ अध्यायस्य २ श्लोकः। ६. बृहज्जातके ५ अध्यायस्य १ श्लोकः।
७. बृहज्जातके ६ अध्यायस्य १ श्लोकः। ८. बृहज्जातके ७ अध्यायस्य १ श्लोकः।
९. बृहज्जातके ८ अध्यायस्य १ श्लोकः। १०. बृहज्जातके ८ अध्यायस्य ३ श्लोकः।
११. बृहज्जातके ९ अध्यायस्य १ श्लोकः। १२. बृहज्जातके ११ अध्यायस्य १ श्लोकः।
१३. बृहज्जातके १३ अध्यायस्य ३ श्लोकः। १४. बृहज्जातके १४ अध्यायस्य १४ श्लोकः।
१५. बृहज्जातके १५ अध्यायस्य १ श्लोकः। १६. बृहज्जातके १२ अध्यायस्य १ श्लोकः।
१७. बृहज्जातके १० अध्यायस्य १ श्लोकः। १८. बृहज्जातके १७ अध्यायस्य १ श्लोकः।
१९. बृहज्जातके २२ अध्यायस्य १ श्लोकः। २०. बृहज्जातके २३ अध्यायस्य १ श्लोकः।
२१. बृहज्जातके २१ अध्यायस्य १ श्लोकः। २२. बृहज्जातके २० अध्यायस्य १ श्लोकः।
२३. बृहज्जातके १९ अध्यायस्य १ श्लोकः। २४. बृहज्जातके २५ अध्यायस्य १ श्लोकः।
२५. बृहज्जातके २५ अध्यायस्य १५ श्लोकः।

प्राग्जन्म [1]गुरुरुडुपतिशुक्राविति। तत्कालप्रश्ने पृच्छायां शुभाऽशुभानि। लग्नाश्रितानि निमित्तानि शुभाशुभफलसूचकानि। तथा चोक्तम्—

अपृच्छतः पृच्छतो वा जिज्ञासोर्यस्य कस्यचित्।
होराकेन्द्रत्रिकोणेभ्यस्तस्य विन्द्याच्छुभाशुभम्॥

इत्यादि तत्कालप्रश्नः।

विवाहादीनां च कर्मणां विवाहोपनयनचूडाकरणगृहप्रवेशानां करणं [2]अज्ञातेत्यादि विवाहपटलम्। तत्रैव सप्तैते शशियोगाः सौम्यैः सह सर्वकर्मसिद्धिकरा इत्याद्युपनयादीनामतिदेशः कृत इति॥

अथ यात्रायां के भेदा इत्याह—

यात्रायां तु तिथिदिवसकरणनक्षत्रमुहूर्त्तविलग्नयोगदेहस्पन्दनस्वप्नविजयस्नानग्रहयज्ञगणयागाग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमङ्गलामङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गोपलम्भोपायश्चेत्युक्तं चाचार्यैः।

यात्रायां यज्ञेऽश्वमेधिकायां देवपुरुषाकारावन्यमतेनोक्तावतः सोऽध्यायो न गृहीतः। तिथयो नन्दादिकास्तासां शुभाशुभं [3]नन्दाभद्राजयेत्यादि। दिवसग्रहणेन वार उच्यते। उदगयने रोगेत्यादि तत्फलमुक्तम्। करणानि ववादीनि तेषां फलं गरवणिजेत्यादि। नक्षत्राण्यश्विन्यादीनि तेषां गमने फलं दिशि बहुलाद्या इत्यादि। मुहूर्त्तास्त्रिंशच्छिवादिकास्तेषां लक्षणं फलानि च शिवभुजगेति लक्षणं नक्षत्रफलवदिति फलानि। विलग्नं तात्कालिकं यात्रालग्नं द्विपदवशगाः सर्व इत्याद्युक्तम्। योगा योगाध्यायोक्ता देहः कोश इत्यादि। अथात्रैव पृच्छाकाले उक्ताः। तस्मान्नृपः कुसुमरत्नफलाग्रह इति। अथवा शुभाशुभफलयोगा जातके उदाहृता इति। यथा होरागतः स्वभवने यदि सूर्यपुत्र इति। तेषामपि फलानि तत्रैव। देहस्पन्दनलक्षणं दक्षिणपार्श्वं स्पन्दन-

---

१. बृहज्जातके २५ अध्यायस्य १४ श्लोकः।

२. अज्ञातेत्यादि तथा सप्तैते शशियोगा इत्यादीति वचनद्वयं वराहमिहिरकृतविवाहपटलाख्यस्याद्यावधि नोपलब्धस्येत्यनुमीयते।

३. नन्दाभद्राजयेत्यादि—इत्यादि वचनानि वराहमिहिरकृतबृहद्यात्राख्यग्रन्थस्थानीत्यनुमीयते। बृहद्यात्राग्रन्थकमस्माभिर्नोपलब्धमतस्तत्र कुत्रैतानि वचनानीति न ज्ञायते।

मिति। स्वप्नं स्वप्नाध्याये दुकूलमुक्तामणिस्तदिति। विजयस्नानं विजिगीषोर्नृपस्य विजयार्थं स्नानं क्षीरैकतरुनगार्णवेत्यादि। ग्रहयज्ञो ग्रहाणां यागः। ग्रहयज्ञमतो वक्ष्ये इति। गणयागो गुह्यकपूजनं यात्रावक्ष्यसप्ताहादिति। अग्निलिङ्गान्यग्निलक्षणानि होमकाले उच्छ्रायः स्वयमुज्ज्वलार्चिरिति। हस्तिनां गजानामिङ्गितं चेष्टितं दन्तमूलपरिणाहदीर्घतामित्यादि। अश्वानां तुरगाणां चेङ्गितं बलावकिरणेति। सेनाप्रवादः सैनिकानां प्रधानराजपुरुषाणां प्रवदनं व्याहरणं संग्रामे वयममरद्विजप्रसादादित्यादि। चेष्टा उत्साहोऽनुत्साहो वा विद्विष्टप्रवरनरा इति। आदिग्रहणाद्वातमेघवृष्ट्यादीनां लक्षणानि। प्रोत्क्षप्तेत्यादि वातलक्षणम्। पृथुघनमनुलोममित्यादि मेघलक्षणम्। सप्ताहान्तर्बलभयकरीत्यादि वृष्टिलक्षणम्। एवमन्येषामपि। तथा ग्रहाणां बलाबलवशात् षाड्गुण्यं सन्धिविग्रहयानासनद्वैधीभावसंश्रयाणां षण्णां गुणानां भावः षाड्गुण्यं तेषां ग्रहवशात् सिद्ध्यसिद्धी ज्ञातव्ये स्वर्क्षेशदशापयोरित्याद्युक्ताः। उपायाश्चत्वारः सामदामभेददण्डाख्याः। तेषामपि सिद्ध्यसिद्धी साम्नः शुक्रबृहस्पती इत्याद्युक्ताः। मङ्गलामङ्गलानि सिद्धार्थकादर्शेत्यादिमङ्गलानि, कर्पासौषधादीनिन्यमङ्गलानि, प्रस्थानसमये शुभाशुभसूचकानि तथा शकुनमन्यजन्मान्तरकृतमिति। तथा सैन्यनिवेशभूमयः सैन्ये सेनायां निवेशार्थं शुभाऽशुभभूमयस्तासां लक्षणानि स्निग्धा स्थिरा सुरभिगुल्मेति शुद्धाः। नेष्टा विपर्ययगुणेत्यशुभाः। अशुभा अग्निवर्णा उपस्थाग्निकर्मणि शुभाशुभाः शुक्लेन्दीवरकाञ्चनद्युतिधरा इति। तथा अन्याश्रितान्यपि शुभाशुभनिमित्तानि सर्वाणि सन्ति। चरदूताटविकानां यथाकालं प्रयोगाः। प्रयोगः प्रयुञ्जनं कस्मिन् काले मन्त्री रिपोः सकाशं प्रयुज्यते। तथा च शत्रोर्वधाय सचिवं शुभदैवयुक्तमाज्ञापयेदिति। कस्मिन् काले चराणां गूढपुरुषाणां प्रयोगाः कस्मिन् काले दूतादेः। बुद्ध्वा शक्तिं स्वपरबलयोरित्यत्र प्रयोजनमुक्तम्। कस्मिन् काले आटविकादेर्बलस्य प्रयोगः। अर्कादाटविकमित्यादि प्रयोजनमुक्तम्। एतेषां यथाकालं प्रयोगाः। परदुर्गोपलम्भोपायः परस्य शत्रोर्दुर्गे उपलम्भनं लाभो ग्रहणमित्यर्थः। तत्रोपायो यथा लभ्यते दुर्गस्तस्य च केतूल्कार्कज इत्युपलम्भनमुक्तम्। इत्येवं प्रकारः। उक्तमाचार्यैः। किं तदित्याह—

जगति प्रसारितमिवालिखितमिव मतौ निषिक्तमिव हृदये।
शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य ॥५॥

यस्य शास्त्रं ग्रन्थं सभगणं भगणज्ञानेन सहितं संयुक्तं गणितेनेत्यर्थः। अनेन स्कन्धत्रयं प्रतिपादितं भवति। कीदृशं शास्त्रं जगति लोके प्रसारितं

विस्तारितमिव मतौ बुद्धावालिखितं चित्रितमिव हृदये निषिक्तं प्रक्षिप्तमिव तस्य दैवज्ञस्याऽऽदेशा उक्तयो निष्फला न भवन्ति, सत्यरूपा भवन्तीत्यर्थः। एतदुक्तं भवति--त्रिस्कन्धज्ञस्य मुनिरिव वाणी सत्यरूपा भवति ॥५॥

अथ संहिताप्रशंसार्थमाह--

संहितापारगश्च दैवचिन्तको भवति।

संहितापारगो निःशेषज्ञाततत्त्वार्थः। स दैवचिन्तको भवति। दैवस्य प्राक्तनकर्मविपाकस्य शुभाऽशुभस्य चिन्तको भवति स्मरणशील इत्यर्थः॥

यत्रैते संहितापदार्थाः।

यत्र यस्यां संहितायामेते वक्ष्यमाणाः पदार्थाः। के त इत्याह--

दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृति-प्रमाणवर्णकिरणद्युतिसंस्थानास्तमनोदयमार्गमार्गान्तरवक्रानुवक्रर्क्षग्रह - समागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्त्यचारः। सप्तर्षिचारः। ग्रहभक्तयो नक्षत्रव्यूहग्रहशृङ्गाटकग्रहयुद्धग्रहसमागमग्रह-वर्षफलगर्भलक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुमलतापरिधि-परिवेषपरिघपवनोल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्वनगररजो - निर्घातार्घकाण्डसस्यजन्मेन्द्रध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्या - न्तरचक्रमृगचक्रश्वचक्रवातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापन - वृक्षायुर्वेदोदगार्गलनीराजनखञ्जनकोत्पातशान्तिमयूरचित्रकघृतकम्बल - खड्गपट्टकृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणान्यन्तःपुरचिन्तापिटक - लक्षणोपानच्छेदवस्त्रच्छेदचामरदण्डशयनाऽऽसनलक्षणरत्नपरीक्षा दीप-लक्षणं दन्तकाष्ठाद्याश्रितानि शुभाऽशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारः कर्तव्याः। तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्या। याम्या नैर्ऋती चान्येनैवं वारुणी वायव्या चोत्तरा चैशानी चेति। यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति। तस्याश्चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षोपघातादिभिः फलानि भवन्ति।

एतत्सुबोधं तथापि मन्दबुद्धिहिताय व्याख्यायते। दिनकरादीनामिति। दिनकर आदित्यस्तदादीनां ग्रहाणां रविशशिराहुभौमज्ञगुरुसितसौरिकेतूनां चाराः। चरणं चारः। गतिवशेन शुभाशुभकथनम्।

तेषु चारेषु च तेषामेव ग्रहाणां प्रकृतिः स्वभावः। विकृतिर्विकारः। प्रमाणं बिम्बस्य। वर्णः सितादिकः। किरणा रश्मयः। तेषामेव द्युतिः कान्तिः। संस्थानमाकारः। ऊर्ध्वाधोगामित्वं तोरणदण्डादिसंस्थानम्। अस्तमनोदयौ रविसन्निकर्षविप्रकर्षाभ्याम्। मार्गा दक्षिणोत्तरमध्यमाः शुक्रचारोक्ताः। मार्गान्तरं मार्गमध्यम्। वक्रं प्रतीपगतित्वं ताराग्रहाणाम्। अनुवक्रं पुनः स्पष्टगतित्वम्। ऋक्षग्रहसमागमो नक्षत्रैः सह ग्रहाणां संयोगः। चारो नक्षत्रेषु विचरणं संस्थितिः। आदिग्रहणाद्दक्षिणोत्तरमध्यगमनम्। योगतारकाशकटभेदश्च नक्षत्राणाम्। एवमादिभिस्तेषां तेषु चारेषु फलानि भवन्ति। तथा नक्षत्रकूर्मविभागेन नक्षत्रसप्तविंशत्या कूर्माकारस्थित्या भारतवर्षे नवधा विभक्तेन नक्षत्रत्रयेण देशेषु फलानि। अगस्त्यस्य मुनेश्चारः। सप्तर्षीणां वसिष्ठपूर्वाणां चारः। ग्रहाणां भक्तयो देशद्रव्यप्राणिनामाधिपत्यम्। नक्षत्राणां व्यूहो द्रव्यजनाधिपत्यम्। ग्रहशृङ्गाटकं ताराग्रहाणामेकर्क्षगतानां शृङ्गाटकादिसंस्थानैः शुभाशुभज्ञानम्। ग्रहयुद्धम्। ऊर्ध्वाधोभावेन दक्षिणोत्तरसंस्थानेन च ग्रहाणाम्। समागमश्चन्द्रेण सह संयोगः। ग्रहाणां वर्षाधिपतित्वेन फलानि। गर्भाणां प्रावृट्कालपरिज्ञानार्थं लक्षणम्। रोहिण्याश्चन्द्रमसा सह संयोगः समागमः। एवं स्वातियोगः पूर्वाषाढायोगश्च। सद्योवर्षलक्षणम्। कुसुमलतानां लक्षणं वृक्षादीनां फलकुसुमप्रवृद्ध्या लोके शुभाऽशुभज्ञानम्।

तथा परिधेः प्रतिसूर्यस्य च लक्षणम्। परिघस्य सूर्योदयास्तमययोस्तिर्यक्स्थिताया मेघरेखाया लक्षणम्। पवनस्य वायोरुल्कापातदिग्दाहलक्षणानि। क्षितिचलनं भूकम्पः। सन्ध्यारागः सन्ध्ययो रक्तत्वम्। गन्धर्वनगरं खपुरं तल्लक्षणम्। रजसां पांशूनां लक्षणम्। निर्घातलक्षणम्। अर्घकाण्डं राशिवशेन द्रव्याणां समर्घत्वं महार्घत्वं च। क्रीत्वा स्थापितानां येन विक्रयकाले लाभालाभौ ज्ञायेते तदर्घकाण्डम्। सस्यजन्म सस्यजातकम्। इन्द्रध्वजस्य शक्रकेतोस्तथा इन्द्रचापस्येन्द्रधनुषो लक्षणम्। वास्तुविद्या गृहाणां लक्षणम्। अङ्गविद्या यया प्राणिनामङ्गस्पर्शनेन शुभाऽशुभं ज्ञायते। वायसविद्या काकचेष्टितम्। अन्तरचक्रं शाकुने। मृगचक्रं मृगचेष्टितम्। तत्रैव श्वचक्रं श्वचेष्टितम्। वातचक्रमष्टासु दिक्षु प्रवहतो वातस्य लक्षणम्। प्रासादलक्षणं देवगृहाणां रचना। प्रतिमालक्षणं सुरस्थानादिप्रमाणम्। प्रतिष्ठापनं प्रतिष्ठा

सुरप्रतिमानामेव। वृक्षायुर्वेदस्तरूणां चिकित्सा। उदगार्गलं जलोपलब्धिः। नीराजनं नीरेण जलेन मन्त्रपूतेनाजनं क्षेपणस्पर्शनमिति नीराजनम्। खञ्जनकानां पक्षिणां लक्षणालक्षणम्। उत्पातशान्तिः। उत्पातानां दिव्यान्तरिक्षभौमानामुपशमनम्। घृतकम्बलं पुष्यस्नानम्। मयूरचित्रकं यस्मिन्नध्याये निःशेषसंहितार्थं संक्षेपेणाभिधीयते तन्मयूरचित्रकम्। खड्गपरीक्षा खड्गलक्षणम्। पट्टपरीक्षा पट्टानां नृपमुकुटादीनां लक्षणम्। कृकवाकुः कुक्कुटः। कूर्मः प्रसिद्धजलप्राणी। गौः प्रसिद्धा। अजश्छागः। अश्वस्तुरगः। इभो हस्ती। एतेषां लक्षणानि। पुरुषस्त्रीलक्षणानि। अन्तःपुरचिन्ता अन्तःपुरे स्त्रीणां रक्तानां विरक्तानां च चेष्टितम्। पिटकानां लक्षणम्। उपानच्छेदो मूषकादिभक्षणेनोपानहां छेददर्शनाच्छुभाशुभफलम्। एवं वस्त्राणामम्बराणां छेदः। चामराणां बालव्यजनानां दण्डानां यष्टीनां च द्विजातिक्रमेण लक्षणं परीक्ष्योच्यते। शयनाऽऽसनलक्षणम्। रत्नानां वज्रादीनां परीक्षा। दीपस्य लक्षणम्। दन्तकाष्ठादीनां यान्याश्रितानि तदायत्तानि शुभाशुभानि निमित्तानि चिह्नानि। आदिग्रहणात् कर्तुरपि यानि शुभाशुभानि फलानि। जगतः सर्वजनानां सामान्यानि साधारणानि। यथा [1]रोहिणीशकटमर्कनन्दनः। [2]प्राजापत्ये शकटे भिन्न इत्यादिकानि। तथा प्रतिपुरुषं पुरुषे पुरुषे प्रतिपुरुषं यानि शुभाशुभानि। तद्यथा—

चापं मघोनः कुरुते निशायामाखण्डलायां दिशि भूपपीडाम्।
याम्यापरोदक्प्रभवं निहन्यात् सेनापतिं नायकमन्त्रिणौ च॥ इत्यादि।

पार्थिवे राजनि च शुभाशुभानि। यथा [3]कृष्णा रेखा सवितरीति तानि च प्रतिक्षणं क्षणं क्षणम्। न अन्यकर्मा अनन्यकर्मा तेनानन्यकर्मणा एकचित्तेनाभियुक्तेन तत्परेण दैवज्ञेन सांवत्सरिकेण चिन्तयितव्यानि। न तानि निमितान्येकाकिना केवलेनावधारयितुं लक्षयितुं शक्यानि। तस्मात् सुभृतेन दैवज्ञेन सुष्टु कृत्वा यो नृपेण भृतः, अतिप्रभूतार्थदानेन परितोषितः। तेन दैवज्ञेनान्ये परे तद्विदः कालविदो यथानिर्दिष्टाः कर्त्तव्या अवधार्याः। तत्र तस्मिन्निमित्तज्ञाने ऐन्द्री पूर्वा। आग्नेयी च पूर्वदक्षिणदिगाशा। एकेनावलोकयितव्या द्रष्टव्या। याम्या दक्षिणा नैर्ऋती दक्षिणपश्चिमाऽन्येन द्वितीयेनावलोकयितव्या। एवमनेन प्रकारेण वारुणी पश्चिमा। वायव्या पश्चिमोत्तरा। तृतीयेनावलोकयितव्या।

---

१. बृहत्संहितायाः ४७ अध्यायस्य मयूरचित्रकाख्यस्य १४ श्लोकः।
२. बृहत्संहितायाः ९ अध्यायस्य शुक्रचाराख्यस्य २५ श्लोकः।
३. बृहत्संहितायाः ३ अध्यायस्याऽऽदित्यचाराख्यस्य ३२ श्लोकः।

उत्तरा सौम्या। ऐशानी पूर्वोत्तरा चान्येन चतुर्थेनावलोकयितव्या। इतिशब्दः प्रकाराय। यस्माद्धेतोरुल्कापातादीनि निमित्तानि, आदिग्रहणादुल्कागन्धर्वनगरकेतुदर्शनानि गम्यन्ते। एतान्युल्कापातादीनि निमित्तानि शीघ्रमाश्वेवापगच्छन्त्यदर्शनं यान्ति। तस्याश्चोल्काया आकार आकृतिः। यथा प्रेत[1] प्रहरणेति। वर्णः श्वेतादिः। स्नेहः सुस्निग्धता। प्रमाणं हस्तादि। दिगुत्तरादिका ग्रहर्क्षोपघातः, ग्रहाणामर्कादीनामृक्षाणामश्विन्यादीनां चोपघात उपहननम्। आदिग्रहणात् कस्मिंस्थाने केनावयवेन पतिताः। एवमादिभिस्तस्याः फलानि शुभाशुभानि भवन्तीति॥

उक्तं च गर्गेण महर्षिणा तच्चाह--

कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकम्।
यो न पूजयते राजा स नाशमुपगच्छति॥६॥

कृत्स्नानि निरवशेषाणि यानि ज्योतिःशास्त्राङ्गानि तथोपाङ्गानि तत्रैव पठितानि पुरुषलक्षणस्त्रीलक्षणवस्त्रोपानच्छेदरत्नलक्षणदीपदन्तकाष्ठलक्षणादीनि। एतदुक्तं भवति--ग्रहनक्षत्रराशीनाश्रित्य यदुक्तम्--"तान्यङ्गानि परिशिष्टान्युपाङ्गानि" इति।

तथा च भगवान् गर्गः--

अधिकृत्य ग्रहर्क्षादि जगतो येन निश्चयः।
तदङ्गमुत्तमं विन्द्यादुपाङ्गं शेषमुच्यते॥ इति।

एतेषां कृत्स्नानां निरवशेषाणामङ्गानामुपाङ्गानां कुशलस्तज्ज्ञः। तथा च होरायां जातके गणिते ग्रहगणिते च नैष्ठिकं निष्ठालग्नं षडङ्गं तत्पारगन्तारमित्यर्थः। एवं विधं दैवज्ञं यो राजा नृपो न पूजयते नार्चयति स नाशं विनाशमुपगच्छति प्राप्नोति॥६॥

अन्यद्दैवज्ञप्रशंसार्थमाह--

वनं समाश्रिता येऽपि निर्ममा निष्परिग्रहाः।
अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम्॥७॥

---

१. बृहत्संहितायाः २३ अध्यायस्योल्कालक्षणाख्यस्य ९ श्लोकः।

येऽपि तपस्विनो वनमरण्यं समाश्रिता वसन्ति। निर्ममा निरहङ्काराः। निष्परिग्रहा दारवर्जिताः। निर्गतः परिग्रहो येभ्यस्तेऽपि तथा भूता ज्योतिषां ग्रहनक्षत्राणां गतौ गमने कोविदं तज्ज्ञं परिपृच्छन्ति शुभाशुभं ज्ञातुमिच्छन्ति च। अपिशब्दः सम्भावनायां यतस्तेषां ज्योतिःशास्त्रेण न किञ्चित्प्रयोजनं तापसत्वात् ॥७॥

अन्यत्प्रशंसार्थमाह—

अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।
तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि ॥८॥

यथा रात्रिर्निशाऽप्रदीपा प्रदीपरहिता न शोभामाप्नोति तमसावृतत्वात्। यथा नभ आकाशमनादित्यं सूर्यरहितं सान्धकारं न शोभामाप्नोति। तथा तेन प्रकारेण सांवत्सरो दैवज्ञरहितो राजा न शोभते। न केवलं यावत्सर्वत्र च संशयत्वाद् भ्रमति यथान्धो नेत्रहीनोऽध्वनि पथि परिभ्रमति ॥८॥

अन्यत्प्रशंसार्थमाह—

मुहूर्त्ततिथिनक्षत्रमृतवश्चायने तथा।
सर्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि ॥९॥

मुहूर्त्ताः शिवादिकाः। तिथयः प्रतिपदादिकाः। नक्षत्रमश्विन्यादि। ऋतवः शिशिरादयः। अयने उत्तरदक्षिणे। तथा तेनैव प्रकारेण एतानि सर्वाणि आकुलानि अज्ञातानि। स्युर्भवेयुः। अथवाऽऽकुलानि नष्टागमानि स्युर्यदि सांवत्सरो दैवविन्न स्यान्न भवेत् ॥९॥

अन्यत्प्रशंसार्थमाह—

तस्माद्राज्ञाधिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः।
जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता ॥१०॥

तस्मात् पूर्वोक्ताद्धेतो राज्ञा नृपेणाधिगन्तव्योऽधिगमनीयः। विद्वान् पण्डितः। सांवत्सरो दैववित्। अग्रणीः प्रधानः। कीदृशेन राज्ञा। जयं शत्रुविजयं यशः कीर्तिं श्रियं लक्ष्मीं भोगान् उपभोगान् श्रेय आरोग्यं समभीप्सता आप्राप्तुमिच्छता ॥१०॥

अन्यदप्याह—

नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता।
चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते ॥११॥

भूतिं समृद्धिमिच्छता प्रार्थयता नरेण पुंसा। असांवत्सरिके देशे दैवज्ञवर्जिते देशे स्थाने न वस्तव्यं न निवसनीयम्। हि यस्माद्यत्र यस्मिन् देशे एष दैवविच्चक्षुर्भूतः प्रकाशकः स्यात् तस्मिन् देशे पापमेनो न विद्यते न भवति, तत्पुण्यशरीरावृतत्वात् ॥११॥

अथ दैववित्प्रशंसार्थमाह--

न सांवत्सरपाठी च नरकेषूपपद्यते।
ब्रह्मलोकप्रतिष्ठां च लभते दैवचिन्तकः॥१२॥

संवत्सरमधिकृत्य कृतं शास्त्रं सांवत्सरं तत्पठनशीलः सांवत्सरपाठी। दैवविद् नरकेषु नोपपद्यते, नरकान् न प्राप्नोति। यतो दैवचिन्तकः कालविद् ब्रह्मलोके धातृभवने प्रतिष्ठां स्थितिं लभते॥१२॥

अन्यत्प्रशंसार्थमाह--

ग्रन्थतश्चार्थतश्चैतत्कृत्स्नं जानाति यो द्विजः।
अग्रभुक् स भवेच्छाद्धे पूजितः पङ्क्तिपावनः॥१३॥

एतज्ज्योतिःशास्त्रं ग्रन्थतः पाठेनार्थतो व्याख्यानात् कृत्स्नं निरवशेषं यो द्विजो ब्राह्मणो जानाति वेत्ति स श्राद्धे पितृतर्पणे अग्रभुक् प्रथमभोजी भवति। स च पूजितोऽर्चितः। पङ्क्तिपावनः। यस्या पङ्क्त्यामुपविशति तां पवित्रीं करोति॥१३॥

अन्यदप्याह--

म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः॥१४॥

हि यस्मादर्थे यवनाः किल म्लेच्छजातयस्तेषु यवनेष्विदं ज्योतिःशास्त्रं सम्यक् स्फुटतरमागमतः स्थितं यतः पूर्वाचार्येभ्यस्तैः प्राप्तम्। तथा च--

यद्दानवेन्द्राय उशाय सूर्यः शास्त्रं ददौ सम्प्रणताय पूर्वम्।
विष्णोर्वसिष्ठश्च महर्षिमुख्यो ज्ञानामृतं यत्परमाससाद॥
पराशरश्चाप्यधिगम्य सोमाद् गुह्यं सुराणां परमाद्भुतं यत्।
प्रकाशयांचक्रुरनुक्रमेण महर्द्धिसन्तो यवनेषु तत्ते॥ इति।

तेऽपि ऋषिवन्मुनिवत्पूज्यन्ते अभ्यर्च्यन्ते किं पुनर्यो द्विजो ब्राह्मणो दैवविद्दैवज्ञ इति ॥१४॥

अथाप्रष्टव्यानाह--

[1]कुहकावेशपिहितैः कर्णोपश्रुतिहेतुभिः।
कृतादेशो न सर्वत्र प्रष्टव्यो न स दैवित् ॥१५॥

कुहकेनेन्द्रजालेन प्रसेनादिकेन आवेशेन देवतादिदेहप्रवेशेन पिहितः प्रच्छन्नोऽदृश्यशरीरः। कुत्रचित्सुषिरे भित्त्यादिके अभ्यन्तरस्थितयाऽव्यक्तया वाचा सम्भाषते। एतैः कुहकावेशपिहितैः । तथा कर्णोपश्रुत्या कश्चिन्मन्त्रविशेषं जपतः कर्णे यथेष्टं कथयति लोके कर्णपिशाचिकेति प्रसिद्धा। अथवा प्रष्टारो यत्रोपविष्टाः स्थितास्तन्मध्ये आत्मीयं शिशुं विसृज्य तेषां कथां परस्परं क्रियमाणामाकर्ण्य पितुर्वक्ति। यथा यस्येदमभिज्ञानं तस्य भवता इदं वक्तव्यमिति हेतुना तर्केणाशयं बुध्द्वा।

केचत् कुहकावेशपिहितकर्णोपश्रुतिहेतुभिरिति पठन्ति तथापि न कश्चिद्दोषः। एवमादिभिर्यः कृतादेशः। आदेशः कृतो येन। सर्वत्र न क्वचित्प्रष्टव्यो यतः स दैवविज्ज्योतिःशास्त्रवेत्ता न भवति ॥१५॥

अथाज्ञं प्रत्याह--

अविदित्वैव यच्छास्त्रं दैवज्ञत्वं प्रपद्यते।
स पंक्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः ॥१६॥

यः शास्त्रमविदित्वा अज्ञात्वैव दैवज्ञत्वं ज्यौतिषिकत्वं प्रपद्यते अङ्गीकरोति दैवज्ञत्वमाख्यापयति। स पङ्क्तिदूषकः पवित्रं दूषयति अपवित्रीं करोति। पापः पापात्मा। नक्षत्रसूचको नक्षत्रपिशुनः। ज्ञेयो ज्ञातव्य इति ॥१६॥

यद्येतेषां कदाचिदज्ञानां वचनं सत्यरूपं भवति तान् प्रत्याह--

नगरद्वारलोष्टस्य यद्वत्स्यादुपयाचितम्।
आदेशस्तद्वदज्ञानां यः सत्यः स विभाव्यते ॥१७॥

नगरद्वारे पुरद्वारे यो लोष्टो [2]मृत्खण्डस्तस्योपयाचितं, [3]प्रार्थितं यद्वद्यथा

---

१. कुहकावेशपिहितकर्णोपश्रुतिहेतुभिरिति पाठान्तरम्।
२. मृत्पिण्ड इति अ० क० पु० पाठः।
३. यथा हे लोष्ट यदि मम पुत्रो भविष्यति तर्हि त्वां पूजयिष्यामीति कया कामिन्या

सत्यं स्यात्। सत्यरूपं भवेत्। तथा कदाचित्काकतालन्यायेन तद्वदज्ञानां मूर्खाणां यआदेशो वार्ताकथनं सत्यमिव विभाव्यते प्रतिभाति ॥१७॥

अविदग्धसांवत्सरं प्रत्याह--

सम्पत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः।
मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङ् महीक्षिता ॥१८॥

यो दैववित्सम्पत्त्या योजितादेशः। सम्पत्त्या अर्थदानेन योजित आदेशो येन। यथा पूर्वमेवं मया अमुकस्य कथितमेतत्स देववदैश्वर्यं प्राप्स्यति। तदिति ज्योतिः [1]शास्त्रमुच्यते। तद्विच्छिन्ना ज्योतिःशास्त्रवर्जिता अन्या कथा प्रिया यस्य सः। यतस्तत्र तस्याज्ञानत्वम्। शास्त्रैकदेशमेकं प्रकरणं ज्ञात्वा तेनैव मत्तः सदर्पस्तादृग्भूतो दैववित्महीक्षिता राज्ञा त्याज्यस्त्यक्तव्यः ॥१८॥

नैवं विघमात्मसात्कुर्यादित्याह--

यस्तु सम्यग्विजानाति होरागणितसंहिताः।
अभ्यर्च्यः स नरेन्द्रेण स्वीकर्तव्यो जयैषिणा ॥१९॥

यस्तु सम्यक् स्फुटतराः सागमाश्च। होरागणितसंहिताः। त्रिस्कन्धं ज्योतिःशास्त्रं विजानाति। स च नरेन्द्रेण राज्ञा जयैषिणा विजयमाकाङ्क्षता प्राप्तुमिच्छताऽभ्यर्च्यः सम्पूज्यः। स्वीकर्त्तव्य आत्मसात्कार्य इति ॥१९॥

विदग्धसांवत्सरिको हितकृद्भवतीत्याह--

न तत्सहस्रं करिणां वाजिनां च चतुर्गुणम्।
करोति देशकालज्ञो यथैको दैवचिन्तकः ॥२०॥

राज्ञः करिणां हस्तिनां सहस्रं दशशतानि न तत्कार्यं कुर्वन्ति तथा वाजिनामश्वानां चतुर्गुणं चत्वारि सहस्राणि न तत् कार्यं कुर्वन्ति यथा देशकालज्ञो दैवचिन्तकः सांवत्सरिक एक एव कार्यं करोति। देशकाललक्षणं[2] प्रागेव व्याख्यातम्। तथा च भगवान् पराशरः--

यथा मन्त्रमुखोऽग्निरग्निमुखा देवास्तथा दैवज्ञमुखो राजा राजमुखाश्च प्रजाः। तस्मात्तद्विज्ञानाद्यत्नत्वाच्छ्रेयसो नरपतिरिहामुत्र च श्रेयोऽर्थी विजिगीषुरेन-

---

प्रार्थना कृता। प्रार्थनानन्तरं दैववशात् पुत्रो जातः। परन्तु लोष्टदत्तो मत्पुत्रोऽयमिति तस्या ज्ञानमसत्। एवमज्ञानामपि वाक् कदाचित् सत्यरूपेवाऽऽभातीति भावः।

१. शास्त्रं परामृश्यत इति अ० क० पु० पाठः।

२. द्रष्टव्यमस्य ग्रन्थस्य २१ पृष्ठम्।

मधिगच्छेत्। कुलीनमनहङ्कृतमस्तब्धमशठमप्रमत्तमविपयमव्यङ्गमविहतप्रशस्तलक्षणं वेदवेदाङ्गेतिहासपुराणधर्मशास्त्रावदातं शुचिं शरण्यं सत्यवादिनमक्रोधिनमग्निदेवद्विजगुरुवृद्धाचार्यपूजाभिरतमनुगामिनमाचार्यं शिष्य इवाभ्युपेत्य नावजानीयाद्रहसि चैनं पृच्छेद्यथास्य दैवं परे न विद्युः। नास्य पृष्टानर्थान्नातिक्रमेदिति।

तथा च--

हिंसादम्भानृतस्तेयद्विष्टानिष्टविवर्जितम्।
अरेन्द्रहितमक्रोधं श्रेष्ठं कालविदं विदुः॥
भूतभव्यभविष्यस्य कालस्य ज्ञानपारगम्।
अहीनाङ्गगुणोपेतं गुरुभक्तं प्रियम्वदम्॥
यथाङ्गिरसमाचार्यमधिगम्य शतक्रतुः।
त्रैलोक्यराज्यं कृतवांस्तद्वत्कालविदं नृपः॥ इति॥ २०॥

अथाधुना तिथिनक्षत्रश्रवणात् फलमाह--

दुःस्वप्नदुर्विचिन्तितदुष्प्रेक्षितदुष्कृतानि कर्माणि।
क्षिप्रं प्रयान्ति नाशं शशिनः श्रुत्वा भसंवादम्॥२१॥

दुःस्वप्नं दुष्टस्वप्नम्। दुर्विचिन्तितमनभिमतमध्यातम्। दुष्प्रेक्षितममङ्गलं यद्दृष्टम्। दुष्कृतानि दुष्टानि च यानि कर्माणि कृतानि। एतानि सर्वाणि शशिनश्चन्द्रमसो भसंवादं भेन नक्षत्रेण सह संवादं श्रुत्वा क्षिप्रमाश्वेव विनाशं क्षयं व्रजन्ति। तिथिनक्षत्रं श्रुत्वा सर्वपापानि नश्यन्तीत्यर्थः। तथा चोक्तम् —

श्रुत्वा तिथिं भग्रहवासरं च प्राप्नोति धर्मार्थयशांसि सौख्यम्।
आरोग्यमायुर्विजयं सुतांश्च दुःस्वप्नघातं प्रियतां च लोके॥ इति॥२१॥

आप्तज्यौतिषिकं प्रत्याह--

न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत्।
स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित्॥२२॥

भूपते राज्ञः। सबलस्य बलसहितस्य। स्वयशोऽभिविवृद्धये आत्मीयकीर्तिवृद्ध्यर्थम्। आप्तः शास्त्रज्ञाततत्त्वार्थः। दैववित्दैवज्ञो यथा हितमिच्छति श्रेय आकाङ्क्षते। तथा न पिता जनक इच्छति न जननी माता न स्वजनो बन्धुजनो न सुहृन्मित्रं तथा हितमिच्छतीति॥२२॥

आवन्तरचिते सांवत्सरसूत्रमहोदधौ।
अर्थिनामुत्पलश्चक्रे स्वाप्तये विवृतिप्लवम् ॥ इति ॥२२॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ
सांवत्सरसूत्रनामाध्यायो द्वितीयः ॥२॥

अथादित्यचारो व्याख्यायते। तत्र तावत्परमतेनायनयोर्लक्षणमाह--

आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ॥१॥

यदुक्तं पराशरतन्त्रे--

श्रविष्ठाद्यात् पौष्णान्तं चरतः शिशिरः। वसन्तः पौष्णान्ताद्रोहिण्यन्तम्। सौम्याद्यात् सार्पार्द्धं ग्रीष्मः। प्रावृट् सार्पार्द्धाद्धस्तान्तम्। चित्राद्यादिन्द्रार्द्धशरद्धेमन्तो ज्येष्ठार्द्धाद्वैष्णवान्तमिति।

तत्र रवेरादित्यस्याश्लेषार्द्धात् सार्पान्त्यपादद्वयाद्दक्षिणमयनं तथा धनिष्ठाद्यं वासवप्रारम्भमुत्तरमयनं नूनं निश्चितं कदाचिदुत्पातवशादासीदभूत्। येन पूर्वशास्त्रेषु पाराशरादिषूक्तं कथितम्। नूनमनुमाने वा ॥१॥

अधुना स्वमतमाह--

साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत्।
उक्तभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तः ॥२॥

साम्प्रतमिदानीं युक्तं वा। सवितुरादित्यस्य। कर्कटकाद्यं कुलीरप्रथममेकमयनं मृगादितो मकरादितश्चान्यद् द्वितीयमुत्तरमयनम्। एवं कथितस्यार्थस्य यद्यभावोऽन्यथात्वं स्यात्तद्विकृतिर्विकारः। तत्र च प्रत्यक्षपरीक्षणैर्दृश्यमानैर्व्यक्तः स्पष्टता भवति। विकृतेरुपलम्भनमित्यर्थः ॥२॥

तत्र च परीक्षणमाह--

दूरस्थचिह्नवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः।
छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति ॥३॥

दूरे तिष्ठतीति दूरस्थम्। दूरस्थं तच्चिह्नं दूरस्थचिह्नं तेन वेधो दूरस्थचिह्नवेधस्तस्माद् दूरस्थचिह्नवेधात् सहस्रांशोरादित्यस्योदये उदयकालेऽप्ययनचलनमन्वेष्यं यतो मकरादावादित्यः प्रतिदिनमुत्तरां दिशं याति तथा कर्कटादिस्थितः

पतिदिनं दक्षिणां दिशं याति तेन दूरस्थितं वृक्षादिकमुदयेऽस्तमयेऽथवा सवितुश्चिह्नं कृत्वा द्वितीयेऽपि दिने तत्रैव स्थित्वा पुनरपि विचारः कार्यः किमयनचलननिवृत्तिर्जाता न वेति। एवं [1]दिनसप्तकं यावद्गणितागतसङ्क्रान्तिकालाद्यावत्कन्यान्तम्। तुलादौ पुनः प्राच्यपररेखायां पतति ततो बलात प्राक् पश्चाच्चान्वेष्य किं स्फुटगणितागतसङ्क्रान्तिकालतुल्या जाता किमादौ किं पश्चाद्वेति। तथा महत्यतिबृहन्मण्डले उदयास्तमयसमीप इत्यर्थः। छायाप्रवेशनिर्गमनेन वा यानि चिह्नानि उपलक्षणानि तैरपि। वाशब्दः प्रकाराय। एतदुक्तं भवति——समायामवनौ वृत्तमुत्पाद्य दिगङ्कितं कृत्वा शङ्कुं तन्मध्ये विन्यसेत्। तत्र विषुवद्दिने सूर्योदयास्तमययोः प्राच्यपररेखायां तस्य शङ्कोश्छाया पतति ततो यथायथाऽर्को मिथुनान्तं यावद्याति तथातथाऽर्कोदयकाले छाया दक्षिणेन याति प्राच्यपररेखायाः। अस्तमयेऽप्येवम्। ततः कर्कटादौ स्थितेऽर्के प्रतिदिनं छायोत्तरेण याति यावत्कन्यान्तम्। तुलादौ पुनः प्राच्यपररेखायां पतति ततो धनुरन्तं यावत्प्रतिदिनमुत्तरेण याति ततो मकरादौ पुनः प्रतिदिनं दक्षिणेन याति यावन्मीनान्तम्। एवं मत्वा ततोऽयननिवृत्तावासन्नायां तस्मिन् मण्डले यस्मिन् प्रदेशे पूर्वाह्णे छाया प्रविशति तत्र चिह्नं कार्यम्। यत्र चापराह्णे निर्गच्छति चिह्नं कार्यम्। पुनरपि द्वितीयदिने तथास्थितस्य शङ्कोश्छायाप्रवेशनिर्गमचिह्ने कार्ये। एवमन्वेष्यं प्रतिदिनं दिनसप्तकं यावत्। प्रथमदिनचिह्नकृतद्वितीयदिनचिह्नयोर्यदि साम्यमुत्पन्नं तदा तस्मिन् दिनेऽयननिवृत्तिरेवं तस्यां ज्ञातायां विचारयेत् किमयननिवृत्तिः करणागतसङ्क्रान्तिकालतुल्या किमादौ किं पश्चाद्वेति। एवं प्राकृतायां वैकृतायां वायननिवृत्तावन्वेषणं कार्यमिति ॥३॥

इदानीं वैकृते फलमाह——

अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां याम्याम्।
कर्कटकमसम्प्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम् ॥४॥

अर्क आदित्यो मकरमप्राप्य मकरमगत्वा यदि विनिवृत्तो व्यावृत्तस्तदा सापरां याम्यामपरया पश्चिमया सह दक्षिणां दिशं हन्ति। तत्स्थान् जनान्नाशयतीत्यर्थः। तथा कर्कटकं कुलीरमसम्प्राप्तोऽगतो यदि निवृत्तो भवति तदोत्तरामुदीचीं दिशं सैन्द्रीं सपूर्वां हन्ति। तत्स्थान् जनान्नाशयतीत्यर्थः। तथा च गर्गः——

यदा निवर्ततेऽप्राप्तो धनिष्ठामुत्तरायणे।
आश्लेषां दक्षिणेऽप्राप्तस्तदा विन्द्यान्महद्भयम्।। इति।

---

१. दिनसप्तकं स्वसमयानुसारेण भट्टोत्पलो लिखति। यतस्तत्समये सप्तायनांशा आयान्ति।

तथा च पराशरः--

यद्यप्राप्तो वैष्णवमुदग्मार्गं प्रपद्यते। दक्षिणमाश्लेषां वा महाभयाय ॥ इति ॥४॥

अथाधिकतायां शुभमाह--

उत्तरमयनमतीत्य व्यावृत्तः क्षेमसस्यवृद्धिकरः।
प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृदुष्णांशुः ॥ ५ ॥

उष्णांशुरादित्य उत्तरमयनमतीत्यातिक्रम्य मकरं प्राप्य पश्चाद्यदि व्यावृत्तो निवर्तितस्तदा क्षेमसस्यवृद्धिकरो भवति। लब्धपालनं क्षेमं करोति, लोके सस्यानां च वृद्धिकरो भवति। तस्य च दिनाधिक्यादुत्तरायणग्रहणमुपलक्षणार्थम्। दक्षिणमयनमप्येवं ज्ञेयम्। तथा प्रकृतिस्थः स्वभावस्थश्चाप्येवं क्षेमसस्यवृद्धिकृद्भवति। एतदुक्तं भवति--स्फुटगणितेन यस्मिन् दिनेऽयननिवृत्तिर्ज्ञाता तस्मिन्नेव दिने यदि छायाप्रवेशनिर्गमचिह्नैर्महति मण्डले दृष्ट्या दृश्यते तदा प्रकृतिस्थः। तथा च भगवान् वृद्धगर्गः--

अयने सुप्रभः स्निग्धः सेवते यदि भास्करः।
सुवृष्टिं च सुभिक्षं च योगक्षेमं च निर्दिशेत् ॥
अनिवृत्ते समे वापि निवृत्तः शस्यते रविः।
हीने भयावहो लोके दुर्भिक्षमकरप्रदः ॥

विकृतगतिर्भयकृदिति। विकृता सविकारा गतिर्यस्यासौ विकृतगतिः। तथाभूतो भयकृल्लोके भयं भीतिं करोति। अयननिवृत्तौ दृष्टायां पुनर्यदि प्रतीपगतित्वमर्कस्य दृश्यते तदा विकृतगतिर्ज्ञातव्या।

पराशरतन्त्रेऽर्कस्य पञ्चधा गतिरुक्ता। तथा च--

पञ्चविधां गतिमुदयास्तमययोरन्तरे भजत्यूर्ध्वाम्।
तिर्यङ्मण्डलमधो नक्षत्रानुयायिनीमपि च ॥
तिर्यग्गच्छति काष्ठायामूर्ध्वं गच्छति चोदये।
प्रातराशामनुक्रम्य मध्यं गच्छति भास्करः ॥
मध्याह्ने तापयंल्लोकान्मण्डलं कुरुते गतिम्।
भ्रष्टस्त्वपि च मध्याह्नादधो गच्छति भास्करः ॥
अस्तं गच्छन्नपि रविर्नक्षत्रमनुगच्छति।
एषापि यदि सविकारा दृश्यते तथापि भयकृत् ॥ इति ॥५॥

त्वष्टा नाम ग्रहस्तेनाच्छादनादर्कस्य यदशुभफलं तदाह--

सतमस्कं पर्व विना त्वष्टा नामार्कमण्डलं कुरुते ।
स निहन्ति सप्त भूपान् जनांश्च शस्त्राग्निदुर्भिक्षैः ॥६॥

त्वष्टा नाम ग्रहोऽर्कमण्डलं सूर्यबिम्बं पर्व विनाऽपर्वण्येव सतमस्कं तमसान्धकारेण संयुक्तं कुरुते स तु दृष्टः सप्त भूपान्नक्षत्रकूर्मोक्तानां[1] नवानां नृपाणां मध्यात् सप्तसङ्ख्यान् भूपान् नृपान् निहन्ति घातयति। तथा शस्त्राग्निदुर्भिक्षैः शस्त्रेण सङ्ग्रामेणाग्निना हुतवहेन दुर्भिक्षेण च जनांल्लोकान् निहन्ति । तथा च भगवान् पराशरः--

अपर्वणि शशाङ्कार्कौ त्वष्टा नाम महाग्रहः ।
आवृणोति तमः श्यामः सर्वलोकविपत्तये ॥ इति ॥६॥

अथ तामसकीलकानामर्कमण्डलगतानां फलमाह--

तामसकीलकसंज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत् ।
वर्णस्थानाकारैस्तान् दृष्ट्वार्के फलं ब्रूयात् ॥७॥

राहुसुताः स्वर्भानुपुत्रास्त्रयस्त्रिंशत्केतवस्तामसकीलकसञ्ज्ञास्तामसकीलक इति तेषां नाम । तान् तामसकीलकानर्केऽर्कमण्डले वर्णस्थानाकारैः, वर्णाः श्वेतादयः, स्थानं प्रवेशो बिम्बैकभागः, आकार आकृतिर्ध्वाङ्क्षादिसदृशी, एतैर्वर्णस्थानाकारैर्दृष्ट्वा अवलोक्य लोके जनपदे शुभाऽशुभफलं ब्रूयाद् वदेत् ॥७॥

अथ तेषां शुभाऽशुभलक्षणमाह--

ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः ।
ध्वाङ्क्षकबन्धप्रहरणरूपाः पापाः शशाङ्केऽपि ॥८॥

ते तामसकीलकाश्चार्कमण्डले सूर्यबिम्बे गताः प्राप्ताः पापफला दुष्टफलप्रदा भवन्ति। चन्द्रमण्डले शशिबिम्बे गताः सौम्याः शुभफलप्रदा भवन्ति। ध्वाङ्क्षः काकः। कबन्धश्छिन्नशिराः पुरुषः। प्रहरणं खड्गादि। ध्वाङ्क्षकबन्धप्रहरणरूपास्तदाकृतयः। शशाङ्केऽपि चन्द्रमण्डलेऽपि दृष्टाः पापाः पापफला भवन्ति। अनिष्टदानेतान् वर्जयित्वा अन्यरूपाश्चन्द्रमण्डले शुभदाः। अपिशब्दः सम्भावनायाम्। चन्द्रमण्डले येऽशुभास्ते सूर्यमण्डलेऽतीवाऽशुभदा इति ॥८॥

---

१. बृहत्संहितायाः १५ अध्याये नक्षत्रकूर्माङ्गविभागेन नव देशा उक्ता आचार्येण।

अथ तेषामुदयनिमित्तान्याह--

तेषामुदये रूपाण्यम्भः कलुषं रजोवृतं व्योम।
नगतरुशिखरामर्दी सशर्करो मारुतश्चण्डः ॥९॥
ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहाः।
निर्घातमहीकम्पादयो भवन्त्यत्र चोत्पाताः ॥१०॥

तेषामिति। तेषां तामसकीलकानामुदये दर्शने रूपाण्येतानि लक्षणानि दृश्यन्ते। तद्यथाऽम्भः पानीयं निमित्तं विना कलुषमप्रसन्नम्। व्योम आकाशं रजोवृत्तं रजसा व्याप्तम्। तथा मारुतो वातश्चण्डः परुषो वाति वहति। कीदृशः। नगतरुशिखरामर्दी। नगनां पर्वतानां तरूणां वृक्षाणां शिखराण्यग्राणि। आसमन्तात् मर्दयति लोडयति। सशर्करः शकराभिर्मृत्कणिकाभिः सहितः ॥९॥

तथा तरवो वृक्षा ऋतुविपरीताः। तेषां ऋतौ स्वकालकुसुमफलानामभावः। अनृतौ कुसुमफलान्युत्पद्यन्ते। तथा मृगा अरण्यपशवः। पक्षिणः खगाश्च। दीप्ताः सूर्याभिमुखदीप्तस्थाः परुषरवाश्च भवन्ति। दिशां दाहा दिग्दाहाश्चासकृद्दृश्यन्ते। अत्रास्मिंस्तामसकीलकोदये निर्घातः। निर्घातलक्षणं वक्ष्यति।

पवनः[1] पवनाभिहता गगनादवनौ यदा समापतति।
भवति तदा निर्घातः। इति।

महीकम्पो भूकम्पः। आदिग्रहणाद्रजोनीहारोल्कापातगन्धर्वनगराणि गृह्यन्तं। एते उत्पाता भवन्ति ॥१०॥

अथ तेषामुत्पातानां निष्फलमाह--

न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनानि यदि।
तदुदयकारणमेषां केत्वादीनां फलं ब्रूयात् ॥११॥

तेषामम्भःकलुषादीनामुत्पातानां पृथक् फलानि न भवन्ति। यदि शिखिनः केतोः। कीलकानां तामसकीलकानाम्। राहोः स्वर्भानोश्च दर्शनानि भवन्ति। अर्कचन्द्रयोरन्यतरस्य ग्रहणं भवतीत्यर्थः। एतेषां सप्ताहान्तरदर्शने उत्पाता निष्फला ज्ञेयाः। तदुदयकारणमिति। यतस्तामसकीलकानामुदयकारणमुदयनिमित्तानि सम्भवन्ति। अत एतेषां केत्वादीनां फलमेव ब्रूयाद् वदेत्। केतुतामसकीलकराहूणामित्यर्थः। एतदुक्तं भवति--अम्भःकलुषादिभिरुत्पातैदृष्टैर्निश्चितं

---

१. बृहत्संहितायाः ३९ अध्यायस्य १ श्लोकः।

केत्वादीनामुदयो वक्तव्यः। अथ कदाचित्केत्वादीनां दर्शनं न भवति तदा अम्भःकलुषादीनामेव फलं[1] वदेत् ॥११॥

अथ तामसकीलकानां दर्शनवशात् फलमाह।

यस्मिन् यस्मिन् देशे दर्शनमायान्ति सूर्यबिम्बस्थाः ।
तस्मिंस्तस्मिन् व्यसनं महीपतीनां परिज्ञेयम् ॥१२॥
क्षुत्प्रम्लानशरीरा मुनयोऽप्युत्सृष्टधर्मसच्चरिताः ।
निर्मांसबालहस्ताः कृच्छ्रेणायान्ति परदेशम् ॥१३॥
तस्करविलुप्तवित्ताः प्रदीर्घनिःश्वासमुकुलिताक्षिपुटाः ।
सन्तः सन्नशरीराः शोकोद्भववाष्परुद्धदृशः ॥१४॥
क्षामा जुगुप्समानाः स्वनृपतिपरचक्रपीडिता मनुजाः ।
स्वनृपतिचरितं कर्म न पुरा कृतं प्रब्रुवन्त्यन्ये ॥१५॥
गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः ।
सरितो यान्ति तनुत्वं क्वचित्क्वचिज्जायते सस्यम् ॥१६॥

यस्मिन् यस्मिन् देश इति। ते तामसकीलकाः सूर्यबिम्बस्था आदित्यमण्डलगताः। यस्मिन् यस्मिन् यत्र यत्र देशे दर्शनमायान्त्युपगच्छन्ति तस्मिन् तस्मिंस्तत्र तत्र देशे महीपतीनां भूमिपानां व्यसनं दुःखं परिज्ञेयं ज्ञातव्यम् ॥१२॥

क्षुत्प्रम्लानशरीरा इति। अपिशब्दः सम्भावनायां वर्तते। मुनयोऽपि ऋषयोऽपि जितक्षुधः, क्षुत्प्रम्लानशरीराः, क्षुद्बुभुक्षा तया प्रकर्षेणातिशयेन म्लानानि शरीराणि देहा येषां ते तथाभूताः, तथोत्सृष्टं त्यक्तं धर्मसच्चरितं शोभनचारित्रं च यैस्ते तथोक्ताः। तथा निर्मांसा मांसरहिताः। दुर्बला ये बालाः शिशवोऽन्नाभावात्ते हस्तेषु करेषु येषां ते तथाभूताः। कृच्छ्रेण केशेन परदेशमन्यदेशं यान्ति प्राप्नुवन्ति ॥१३॥

तथा सन्तः साधवो जनास्तस्करविलुप्तवित्ताः, तस्करैश्चौरैर्विलुप्तं छिन्नं वित्तं धनं येषाम्। तथा प्रदीर्घैरत्यायामवद्भिर्निश्वासैः श्वसनैर्मुकुलिताः संकुचिता अक्षिपुटा नेत्राच्छादनानि येषाम्। तथा सन्नशरीराः, सन्नान्यवसादं गतानि शरीराणि देहा येषाम्। तथा शोकेन दुःखेन यदुद्भवं वाष्पमश्रु तेन रुद्धे वृते दृशौ चक्षुषी येषां ते तथोक्ताः ॥१४॥

क्षामाः कृशाः जुगुप्समाना निन्दन्तो मनुजा[2] मानवाः। यतः स्वनृपतिपर-

---

१. फलानि वदेदिति अ० क० पु० पाठः।
२. मनुष्या इति अ० क० पु० पाठः।

चक्रपीडिताः। स्वनृपतिना आत्मीयेन राज्ञा परचक्रेण चान्यराष्ट्रेण पीडिता। स्वनृपतिना आत्मीयेन राज्ञा परचक्रेण चान्यराष्ट्रेण पीडिता उपतप्ताः, अतो जुगुप्समानाः। अन्येऽपरे एवं ब्रुवन्ति कथयन्ति च कथयेति च यथा यत्कर्मास्माभिरद्यानुभूयते तत्पुरा पूर्वं स्वचरितमात्मनार्जितं न नृपतिचरितं राज्ञा वर्जितमिति ॥१५॥

गर्भेष्वपीति। वारिमुचो मेघा गर्भेष्वपि निष्पन्ना गर्भलक्षणयुक्ता अपि वृष्टिप्राप्तसमये न प्रभूतं न बहु वारि [1]पयो मुञ्चन्ति त्यजन्ति। तथा सरितो नद्यस्तनुत्वं स्वल्पतोयत्वं यान्ति गच्छन्ति जलाभावात्। सस्य धान्यादिकं क्वचित्क्वचित्कुत्रचिज्जायते उत्पद्यते न सर्वत्रेति ॥१६॥

अथ तेषामाकृतिवशेन फलमाह--

दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने ।
ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे ॥१७॥

अर्कस्थे सूर्यमण्डलसंस्थिते। दण्डे दण्डाकारे चिह्ने। नरेन्द्रस्य राज्ञो मृत्युर्मरणं स्यात्। कबन्धश्छिन्नशिराः पुरुषः। कबन्धसंस्थाने कबन्धाकारे चिह्नेऽर्कस्थे। व्याधिभयं रोगभयम्। स्याद् भवेत्। ध्वाङ्क्षः काकस्तस्मिन्नर्कस्थे तस्करभयं चौरकृतं भयं वदेत्। कीलके कीलकाकारेऽर्कस्थे दुर्भिक्षमसुभिक्षं भवेत्[2] ॥१७॥

अन्यदप्याह--

राजोपकरणरूपैश्छत्रध्वजचामरादिभिर्विद्धः ।
राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहा ॥१८॥

राजा नृपस्तस्योपकरणानि हस्त्यश्वादयस्तद्रूपैस्तदाकारैरर्कः सूर्यो यदि विद्धो भवति। तथा छत्रध्वजचामरादिभिः। छत्रं गातपत्रम्। ध्वजं पताका। चामरं बालव्यजनम्। आदिग्रहणाद् भृङ्गारकुम्भाकारैर्यद्यर्को विद्धो भवति तदा राजाऽन्यत्वकृत्, राज्ञोऽन्यत्वं करोति, अन्यो राजा भवतीत्यर्थः। अथ स्फुलिङ्गैरग्निकणैर्धूमेन। आदिग्रहणाज्ज्वालादिभिर्युक्तो भवति तदा जनहा, जनान् हन्ति घातयतीत्यर्थः ॥१८॥

अन्यदप्याह--

एको दुर्भिक्षकरो द्व्याद्याः स्युर्नरपतेर्विनाशाय ।
सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्नः ॥१९॥

---

१. पानीयमिति अ० क० पु० पाठः।
२. वदेदिति अ० क० पु० पाठः।

एको वेधोऽर्कस्थो दुर्भिक्षमसुभिक्षं करोति। द्वावाद्यौ येषां ते द्व्याद्याः। द्वौ त्रयश्चत्वारो वा वेधा नरपते राज्ञो विनाशायाभावाय स्युर्भवेयुः। अर्क आदित्यस्तैश्चिह्नैस्सितरक्तपीतकृष्णैर्विद्धोऽनुवर्णघ्नो भवति। अनु क्रमेण। वर्णान् द्विजादीन् हन्ति। तद्यथा--सितैः श्वेतवर्णैश्चिह्नैर्विद्धो ब्राह्मणान् हन्ति घातयति, रक्तवर्णैः क्षत्रियान्, पीतवर्णैर्वैश्यान्, कृष्णवर्णैः शूद्रानिति ॥१९॥

विशेषफलमाह--

दृश्यन्ते च यतस्ते रविबिम्बस्योत्थिता महोत्पाताः ।
आगच्छति लोकानां तेनैव भयं प्रदेशेन ॥२०॥

ते महोत्पाता ध्वाङ्क्षप्रभृतयो रविबिम्बस्यार्कमण्डलस्योत्थिता उत्पन्ना यतो यस्यां दिशि दृश्यन्ते, पूर्वस्यां दक्षिणस्यां पश्चिमायामुत्तरस्यां वा दिशि विदिक्षु वा तेनैव प्रदेशेन लोकानां जनानां भयमागच्छति आयाति ॥२०॥

अथार्करश्मिवशेन शुभाशुभफलमाह--

ऊर्ध्वकरो दिवसकरस्ताम्रः सेनापतिं विनाशयति ।
पीतो नरेन्द्रपुत्रं श्वेतस्तु पुरोहितं हन्ति ॥२१॥
चित्रोऽथवापि धूम्रो रविरश्मिर्व्याकुलं करोत्यूर्द्धम् ।
तस्करशस्त्रनिपातैर्यदि सलिलं नाशु पातयति ॥२२॥

दिवसकर आदित्यः। ऊर्ध्वकर ऊर्ध्वरश्मिर्यदा दृश्यते। अधोभागे तस्य रश्मयो न दृश्यन्त इत्यर्थः। स च ताम्रस्ताम्रवर्णश्च तदा सेनापति चमूनाथम्, विनाशयति घातयति। ऊर्ध्वकरः पीतवर्णश्च नरेन्द्रपुत्रं नृपसुतम्, हन्ति मारयति। ऊर्ध्वकरः श्वेतवर्णश्च पुरोहितं मारयति ॥२१॥

चित्रोऽथवेति। रवेरादित्यस्य संबन्धी रश्मिः करः। ऊर्ध्वं स्थितः स च चित्रो नानावर्णोऽथवापि तु धूम्रवर्णस्तस्करशस्त्रनिपातैः, तस्कराश्चौराः, शस्त्रमायुधम्, तैस्तस्करशस्त्रनिपातैश्चौरसङ्ग्रामोपमर्द्दनैर्व्याकुलं सोद्यमं देशं करोति, यद्याशु शीघ्रं सलिलं जलं न पातयति न वर्षति तदैवम्। अथ सलिलपातं करोति तदा शिवमिति ॥२२॥

अथ भगवतो भास्करस्य ऋतुवर्णलक्षणमाह।

ताम्रः कपिलो वार्कः शिशिरे हरिकुङ्कुमच्छविश्च मधौ।
आपाण्डुकनकवर्णो ग्रीष्मे वर्षासु शुक्लश्च ॥२३॥

शरदि कमलोदराभो हेमन्ते रुधिरसन्निभः शस्तः ।
प्रावृट्काले स्निग्धः सर्वर्त्तुनिभोऽपि शुभदायी ॥२४॥

ताम्रः कपिलो वार्क इति। शस्त इति सर्वत्र संबध्यते। शिशिरे माघ-फाल्गुनयोरर्क आदित्यस्तामवर्णः कपिलो वा कपिलवर्णः शस्तः शुभफल इत्यर्थः। मधौ वसन्ते चैत्रवैशाखयोर्हरिकुङ्कुमच्छविर्हरित[1] कान्तिः शुकाभः। कुङ्कुमवर्णश्च पीतलोहितवर्णः शस्त एव। ग्रीष्मे ज्येष्ठाऽऽषाढयोः पाण्डुः पाण्डुरवर्ण ईषच्छुक्रः। कनकवर्णः सुवर्णकान्तिश्च शस्त एव। वर्षासु वर्षाकाले श्रावण-भाद्रयोः। शुक्लः श्वेतवर्णः शस्तः। चशब्दादापाण्डुकनकवर्णश्च शस्त एव॥

शरदि शरत्काले। आश्वयुजकार्त्तिकयोः। कमलोदराभः कमलं पद्मं तस्योदरमभ्यन्तरं तत्सदृशी भा कान्तिर्यस्य स तथाभूतः शस्तः। हेमन्ते मार्ग-पौषयोः। रुधिरवर्णो रक्तवर्णः शस्तः। प्रावृट्काले वर्षासमये स्निग्धो विमल-स्तथा सर्वर्त्तुनिभः सर्वेषां शिशिरादीनामृतूनां ये वर्णा उक्तास्तेषां निभः सदृश-स्तद्वर्णोऽपि शुभदायी शुभप्रदो भवति। तथा च समाससंहितायाम्––

ताम्रघृतकनकमुक्ताकमलासृवसन्निभः शुभः सविता ।
शिशिरादिषु षट्सु ऋतुषु प्रावृषि सर्वर्त्तुसन्निभः स्निग्धः ॥

तथा च वृद्धगर्गः––

शिशिरे ताम्रसंकाशः कपिलो वापि भास्करः ।
वसन्ते कुङ्कुमप्रख्यो हरितो वापि शस्यते ॥
ग्रीष्मे कनकवैदूर्यं सर्वरूपो जलागमे ।
शस्तः शरदि पद्माभो हेमन्ते लोहितप्रभः ॥
एतत्स्वरूपं सवितुर्विपरीतमतोऽन्यथा ।

तथा च पराशरः––

शिशिरे ताम्रः कपिलो वा। वसन्ते [2]कुङ्कुमाभो हरितो वा। ग्रीष्मे कनक-वैदूर्यप्रभः। प्रावृषि सर्ववर्णः। शरदि पद्माभो हेमन्ते रक्तवर्णो रश्मिः सर्वर्त्तुषु श्वेतः पाण्डुवर्णश्च शस्यते विपरीतो विपरीतकारीति ॥२३-२४॥

---

१. हरितः कान्तिः शुकानाम्। कुङ्कुमच्छविः कुङ्कुमच्छविवर्ण इति अ० क० पु० पाठः
२. लोहित इति अ० क० पु० पाठः।

अन्यदप्याह—

रूक्षः श्वेतो विप्रान् रक्ताभः क्षत्रियान् विनाशयति ।
पीतो वैश्यान् कृष्णस्ततोऽपरान् शुभकरः स्निग्धः ॥२५॥

रूक्ष इति सर्वत्र संबध्यते। श्वेतः शुक्लवर्णो रूक्षः स्नेहरहितो विप्रान् ब्राह्मणान्। विनाशयति हन्ति। रक्ताभो लोहितकान्ती रूक्षश्च क्षत्रियान् विनाशयति। पीतः पीतवर्णो रूक्षो वैश्यान्नाशयति। कृष्णः कृष्णवर्णो रूक्षश्च ततोऽपरान् तदित्यनेन वैश्याः परामृश्यन्ते तेभ्योऽपरानन्यान् शूद्रान् हन्तीति।

शुभकरः स्निग्ध इति। यथोक्तवर्णो यदि स्निग्धो भवति तदा तेषामेव शुभकरो भवति। तथा श्वेतः स्निग्धो ब्राह्मणानां शुभकरो भवति, रक्ताभः स्निग्धः क्षत्रियाणाम्, पीतः स्निग्धो वैश्यानाम्, कृष्णः स्निग्धश्च शूद्राणामिति ॥२५॥

अथार्कस्य ऋतुष्वशुभवर्णानाह—

ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम् ।
हेमन्ते पीतोऽर्कः करोति न चिरेण रोगभयम् ॥२६॥

अर्क आदित्यो रक्तो लोहितवर्णो ग्रीष्मे दृष्टो भयकृद् भयं करोति। वर्षासु वर्षाकाले। असितवर्णः कृष्णवर्णोऽनावृष्टिं वृष्ट्यभावं करोति। हेमन्ते पीतः पीतवर्णो न चिरेण शीघ्रमेव रोगभयं गदभीतिं करोति। शेषर्त्तुषु न विशेषः पूर्वोक्तमेव शुभाशुभमिति ॥२६॥

अन्यदप्याह—

सुरचापपाटिततनुर्नृपतिविरोधप्रदः सहस्रांशुः ।
प्रावृट्काले सद्यः करोति विमलद्युतिर्वृष्टिम् ॥२७॥
वर्षाकाले वृष्टिं करोति सद्यः शिरीषपुष्पाभः ।
शिखिपत्रनिभः सलिलं न[1] करोति द्वादशाब्दानि ॥२८॥

सुरचापेति। सहस्रांशुरादित्यः। सुरचापमिन्द्रधनुस्तत्तुल्येन चिह्नेन पाटिता विदारिता तनुर्मूर्तिर्यस्य तथा भूतो नृपते राज्ञो विरोधप्रदो भवत्यशुभ इत्यर्थः। प्रावृट्काले वर्षासमये विमलद्युतिर्निर्मलकान्तिः सद्यस्तस्मिन्नेवाहनि वृष्टिं करोति वर्षतीत्यर्थः।

---

१. द्वादशवर्षाणि न करोतीति पाठान्तरम्।

वर्षाकाले प्रावृट्समये शिरीषपुष्पाभः शिरीषपुष्पकान्तिसदृशो नीलपीत इत्यर्थः। सद्यो वृष्टिं करोति। शिखी मयूरस्तस्य पत्रं पक्षस्तन्निभस्तत्तुल्यो मयूरचन्द्रिकाकारो द्वादशवर्षाणि सलिलं जलं न करोति न वर्षतीत्यर्थः। तथा च वृद्धगर्गः ––

मयूरचन्द्रिकाभो वा यदा दृश्येत भास्करः।
पूर्णे तु द्वादशे वर्षे तदा देवः प्रवर्षति॥ इति॥२८॥

अन्यदप्याह ––

श्यामेऽर्के कीटभयं भस्मनिभे भयमुशन्ति परचक्रात्।
यस्यर्क्षे सच्छिद्रस्तस्य विनाशः क्षितीशस्य॥२९॥

अर्के सूर्ये श्यामवर्णे कीटभयं कृमिभीतिः सस्यानां भवति। भस्मनिभे भस्मवर्णे पाण्डौ रूक्षे परचक्रादन्यनृपाद्भयं भीतिमुशन्ति कथयन्ति। अर्क आदित्यो यस्मिन्नृक्षे नक्षत्रे स्थितः सच्छिद्रो दृश्यते तन्नक्षत्रं यस्य क्षितीशस्य राज्ञः कूर्मविभागेन भवति तस्य विनाशो मृत्युर्भवति॥२९॥

अन्यदप्याह ––

शशरुधिरनिभे भानौ नभस्तलस्थे भवन्ति सङ्ग्रामाः।
शशिसदृशे नृपतिबधः क्षिप्रं चान्यो नृपो भवति॥३०॥

शशः प्राणिविशेषः। भानावादित्ये शशरुधिरनिभे शशलोहितवर्णे अतिरक्त इत्यर्थः। नभस्तलस्थे मध्याह्ने मध्यस्थिते सङ्ग्रामा युद्धानि भवन्ति। नभस्तलग्रहणमुदयास्तमयकालपरिहारार्थम्। तत्र किल स्वभावादतिलोहितो रविर्भवति। तथा च गर्गः ––

शशलोहितवर्णाभो यदा भवति भास्करः।
तदा भवन्ति सङ्ग्रामा घोरा रुधिरकर्दमाः॥ इति॥

शशिसदृशे चन्द्रनिभे विरश्मौ शीतले च नृपते राज्ञो बधो मरणं भवति। क्षिप्रं चाश्वेवान्योऽपरो नृपो राजा भवति॥३०॥

अन्यदप्याह ––

क्षुन्मारकृद्घटनिभः खण्डो जनहा विदीधितिर्भयदः।
तोरणरूपः पुरहा छत्रनिभो देशनाशाय॥३१॥

घटनिभो घटाकारोऽर्कः। क्षुन्मारकृत्। क्षुद्भिक्षं मारं मरकं च करोति। खण्ड एकदेशाद्धीनो जनहा। जनान् हन्ति घातयति। विदीधितिर्विगतरश्मिर्भयदो भीतिं ददाति। तोरणरूपस्तोरणाकारः पुरहा। पुरं नगरं हन्ति। छत्रनिभ आतपत्राकारो देशस्य जनपदस्य नाशाय विघाताय भवति॥३१॥

अन्यदप्याह —

ध्वजचापनिभे युद्धानि भास्करे वेपने च रूक्षे च।
कृष्णा रेखा सवितरि यदि हन्ति ततो नृपं [1]सचिवः॥३२॥

ध्वजः प्रसिद्धो बहुपटरचितः पताकारूपः। चापं धनुः। भास्करे सूर्ये। ध्वजचापनिभे तदाकृतौ। युद्धानि सङ्ग्रामा भवन्ति। वेपने कम्पमाने रूक्षे वाऽस्निग्धे द्धान्येव भवन्ति। सवितर्यादित्ये कृष्णवर्णरेखा यदि मध्ये दृश्यते तदा नृपं राजानं सचिवो मन्त्री हन्ति घातयति। केचित्पठन्ति नृपं सचिवम्। नृपं सचिवं च हन्ति।

तथा च पराशरः —

विवर्णो भूमिवर्णो वा महाभयाय। श्यामो जनमरणाय। सुवर्णरजतपद्मनिभो विमलः स्निग्धो जनहिताय। धूम्राभो वृष्टिनिग्रहाय। ऊर्ध्वदण्डो जटिलः शस्त्रकोपव्याधिमृत्युकरः। महान् परिमण्डलः कुक्षिमान् विशालो घृतमण्डलनिभः क्षेमारोग्यकरः। संक्षिप्तः क्षयाय। वज्राकारो दुर्भिक्षाय। सर्वतश्छिद्रो द्विधा वा दृश्यमानो मृत्युदेशं विनाशं वाऽऽचष्टे। शिरीषपुष्पसंकाशो वार्षुके निष्प्रभो जनमारकरः। घटसंस्थः क्षुत्कृत्। ताम्रो रुधिराभो वा शस्त्रकोपकरः। खण्डच्छिद्रो भूपालविनाशाय च। पुण्ड्राकारः उलूकसंस्थानः उन्मादापस्मारकरः। विरश्मिर्व्याधिभयकृत्। छत्राकारो देशविपर्ययकरः। शकटाकारश्च कबन्धाकृतिर्महासङ्ग्रामकृत्। तोरणसंस्थानः पुरनाशाय। अवर्णः प्रजानाशाय। प्रतिरूपः स्त्रीभयकारी। परुषो वेपनः सस्यनाशनः। शरासनाकृतिर्ध्वजाभो वा सद्य आहवाय। विजयाकृतिर्गर्भविनाशी। परुषाकारो रुधिरप्रभोऽनेकनृपतिहस्तोत्पाटनकरः। कृष्णवर्णो जगतःक्षयाय। अपर्वण्युपरक्तः सर्वलोकविनाशाय। व्यामिश्रवर्णो यावत्प्रदृश्यते तावत्परस्परं नृपविनाशाय। कृष्णरुधिरपीतवर्णो जगत्क्षयकारी। वैदूर्यकृष्णबभ्रुवर्णः [2]पांशुवर्णोत्सादनकरः। मयूरचन्द्रिकाभो द्वादश वार्षिकीमनावृष्टिं धत्ते। एवमन्योन्यव्यामिश्रवर्णो युगान्तकारी भवतीति॥३२॥

---

१. सचिवमिति पाठान्तरम्।

२. पांशुवर्णच्छादनकर इति अ० क० पु० पाठः।

अन्यदप्याह —

दिनकरमुदयास्तसंस्थितमुल्काशनिविद्युतो यदा हन्युः।
नरपतिमरणं विन्द्यात्तदाऽन्यराजप्रतिष्ठा च ॥३३॥

दिनकरमादित्यमुदयास्तसंस्थितमुदयरेखास्थमस्तस्थमपररेखास्थं वा यदा उल्का अशनिर्विद्युद्वा आसां लक्षणं वक्ष्यति। एता हन्युस्ताडयेयुस्तदा तस्मिन् काले नरपतेर्मरणं मृत्युम्। विन्द्याद्विजानीयात्। तथाऽन्यराजप्रतिष्ठा। अन्यस्य द्वितीयस्य राज्ञो नृपत्वे प्रतिष्ठा स्थितिस्तत्क्षणमेव भवति। तथा च पराशरः —

उदयास्तमये भानुमुल्का हन्यात् समुत्थिता।
प्रज्वलन्ती तदा राजा क्षिप्रं शस्त्रेण बध्यते ॥ इति ॥ ३३॥

अन्यल्लक्षणमाह —

प्रतिदिवसमहिमकिरणः परिवेषी सन्ध्ययोर्द्वयोरथवा।
रक्तोऽस्तमेति रक्तोदितश्च भूपं करोत्यन्यम् ॥३४॥

अहिमकिरण उष्णरश्मिः सूर्यः। प्रतिदिवसम्। दिवसं दिवसं प्रति प्रतिदिवसम्। परिवेषी मण्डलवान् भवति। अथवा द्वयोः सन्ध्ययोरुदयास्तमययोः परिवेषी भवति। अथवा रक्तवर्णोऽस्तमेत्यस्तं गच्छति रक्तवर्णश्चोदेति। एतदुक्तं भवति। यादृश एव लोहितवर्णस्तादृश एव सकलमहर्भूत्वा रक्तवर्ण एवास्तमेति। प्रतिदिवसं सर्वत्र संबध्यते तदा तस्मिन् प्रकारत्रये भूपं राजानमन्यं द्वितीयं करोति ॥३४॥

अर्कस्य सन्ध्याकाले शुभाशुभलक्षणमाह —

प्रहरणसदृशैर्जलदैः स्थगितः सन्ध्याद्वयेऽपि रणकारी।
मृगमहिषविहगखरकरभसदृशरूपैश्च भयदायी ॥३५॥

प्रहरणमायुधं खड्गादि। प्रहरणसदृशैरायुधाकृतिभिर्जलदैर्मेघैर्यदा सन्ध्याद्वये उदयास्तमयकाले स्थगित आच्छादितो भवति सूर्यस्तदा रणकारी सङ्ग्रामकृद्भवति। अपिशब्दः सम्भावनायां वर्तते तेनैकस्यां सन्ध्यायां द्वितीयस्यां वेत्यर्थः। मृग अरण्यप्राणी। महिषः प्रसिद्धः। विहगः पक्षी। खरो गर्दभः। करभ उष्ट्रः। एषां सदृशरूपैस्तुल्याकारैर्यदा सन्ध्याद्वये स्थगितो भवति तदा भयदायी भयं भीतिं ददाति ॥३५॥

अथार्काक्रान्तस्य नक्षत्रस्य सन्तापसंशोधने आह —

दिनकरकराभितापादृक्षमवाप्नोति सुमहतीं पीडाम् ।
भवति तु पश्चाच्छुद्धं कनकमिव हुताशपरितापात् ॥३६॥

यस्मिन्नृक्षे नक्षत्रे दिनकरः सूर्यः स्थितस्तदृक्षं दिनकरकराभितापात्सूर्यरश्मिसन्तापात् सुमहतीं पीडामतिरुजमवाप्नोति लभते। तदेव सूर्यमृक्षं पश्चादनन्तरं शुद्धं निर्दोषं भवति। यथा कनकं सुवर्णं हुताशपरितापादग्निसन्तापेन शुद्धं निर्मलं भवति।

तथा च पराशरः —

ग्रहोपसृष्टं नक्षत्रं सवितुर्योगमागतम् ।
विशोधयति तत्पापं तुषाग्निरिव काञ्चनम् ॥

तथा च वृद्धगर्गः —

यथाग्निना प्रज्वलिते गृहे तप्यन्त्यदूरिणः ।
तथार्कस्याप्यदूरस्थमृक्षं तदपि तप्यते ॥ इति ॥३६॥

अथ [1]प्रति सूर्यलक्षणमाह —

दिवसकृतः प्रतिसूर्य्यो जलकृदुदग् दक्षिणे स्थितोऽनिलकृत् ।
उभयस्थः सलिलभयं नृपमुपरि विहन्त्यधो जनहा ॥३७॥

दिवसकृत इति। उदयात्प्रभृति दिनप्रहरैकं यावत्तनुघनोऽर्कसमीपे यदा भवति तदार्करश्मिवशात्तत्र द्वितीयोऽर्क इव लक्ष्यते स प्रतिसूर्य उच्यते। एवमस्तमयेऽपि सम्भवति दिवसकृतः स प्रतिसूर्यः। आदित्यस्योदगुत्तरे यदा प्रतिसूर्यो दृश्यते तदा जलकृज्जलं पानीयं करोति [2]पर्जन्य वृष्टिर्भवति। दक्षिणस्थोऽर्कस्य वातकरो भवति। उभयस्थ उत्तरदक्षिणभागयोर्द्वयोरपि स्थितः सलिलभयं जलभीतिं करोति। तस्यैवार्कस्योपरि स्थितः प्रतिसूर्यो नृपं राजानं हन्ति घातयति। अधःस्थितः प्रतिसूर्यो जनहा जनान् हन्ति ॥३७॥

अन्यदप्याह —

रुधिरनिभो वियत्यवनिपान्तकरो न चिरात् ।
परुषरजोऽरुणीकृततनुर्यदि वा दिनकृत् ।

---

१. प्रतिसूर्यफलमाहेति पाठः साधुः।

२. वर्षतीत्यर्थः। अथ दक्षिणे तस्यैवार्कस्य स्थितो भवति तदाऽनिलकृद्वातं करोति—इति अ० क० पु० पाठः।

असितविचित्रनीलपरुषो जनघातकरः ।
खगमृगभैरवस्वररुतैश्च निशाद्युमुखे ॥३८॥

दिनकृदादित्यो वियत्याकाशेऽकस्मादेव रुधिरनिभो रक्तवर्णो यदा दृश्यते तदा न चिरात् शीघमेवाऽवनिपस्य राज्ञोऽन्तकरो मृत्युकृद्भवति। वियद्ग्रहणमत्रोदयास्तमयौ विहायान्यत्र ग्रहणार्थम्। परुषरजोऽरुणीकृततनुर्यदि वा। परुषेण रुक्षेण रजसा पांशुनारुणीकृता लोहिता तनुर्मूर्त्तिर्यस्य तथाभूतोऽप्यवनिपान्तकरः शीघ्रमेव भवति। असितः कृष्णः। विचित्रो नानावर्णः। नीलो नीलवर्णः। परुषो रुक्षः। एवम्विधोऽर्को जनघातकरः। जनानां लोकानां घातं करोति। खगाः पक्षिणो मृगा आरण्यजातयः। एतेषां भैरवा भीषणा ये स्वराः शब्दास्तैर्यानि रुतानि तैर्यदा निशामुखेऽस्तमये द्युमुखे उदये च युक्तो भवति तदापि जनघातं करोति॥३८॥

अथ शुभलक्षणमाह ——

अमलवपुरवक्रमण्डलः स्फुटविपुलामलदीर्घदीधितिः ।
अविकृततनुवर्णचिह्नभृज्जगति करोति शिवं दिवाकरः ॥३९॥

अमलवपुरिति। एवम्विधो दिवाकरः सूर्यो जगति जनानां शिवं श्रेयः करोति। कीदृशोऽमलवपुर्निर्मलशरीरः। अवक्रमण्डलः स्पष्टबिम्बः।

तथा च पराशरः ——

श्वेतः शिरीषपुष्पाभः पद्माभो रूप्यसन्निभः ।
वैदूर्यघृतमण्डाभो हेमाभश्च दिवाकरः ॥
वर्णैरेभिः प्रशस्तः स्यान्महास्निग्धः प्रतापवान् ।
भावनः सर्वसस्यानां क्षेमारोग्यसुभिक्षदः ॥

स्फुटविपुलामलदीर्घदीधितिः। स्फुटाः स्पष्टाः। विपुला विस्तीर्णाः। अमला निर्मलाः। दीर्घा आयामिनो रश्मयो यस्य। तथा च पराशरः ——

स्निग्धाः परिपूर्णाः शुक्ला माञ्जिष्ठाः पीता अत्यन्तगामिनो रश्मयः शस्यन्ते। रुक्षा अविच्छिन्नास्तनवो ह्रस्वा धूमाभा लोहितवर्णा विगर्हिता इति। अविकृततनुवर्णचिह्नभृत्। अविकृता निर्विकारा तनुर्मूर्त्तिस्तथाऽविकृतो वर्णः

कान्तिः। अविकृतं चिन्हं लक्ष्म। एतान्यविकृतानि बिभर्ति धारयति तथाभूत इति ॥३९॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावादित्यचारो नामाध्यायस्तृतीयः ॥३॥

—×—

अथ चन्द्रचारो व्याख्यायते। तत्रादावेव रवेरुपरि चन्द्रमसमिच्छन्ति, तान् प्रत्याह —

[1]नित्यमधःस्थस्येन्दोर्भाभिर्भानोः सितं भवत्यर्द्धम् ।
स्वच्छाययाऽन्यदसितं कुम्भस्येवाऽऽतपस्थस्य ॥१॥

इन्दोश्चन्द्रस्य भानोरादित्यादधःस्थस्य भानवीभिर्भाभिः सूर्यरश्मिभिर्नित्यं सर्वकालमेकमर्द्धदलं सितं शुक्लं भवति। यस्मिन् गोलकभागेऽर्करश्मयः पतन्ति तदेवार्द्धं शुक्लं भवति। अन्यद्द्वितीयमर्द्धं स्वच्छायया कृष्णं नित्यमेव भवति। कथम्। उच्यते—कुम्भस्येवाऽऽतपस्थस्य। कुम्भस्य यस्मिन्नर्द्धे रश्मयः पतन्ति तदर्द्धं शुक्लं दृश्यते। अन्यदर्द्धं स्वच्छायया कृष्णं दृश्यतो। तथा च [2]ब्रह्मसिद्धान्ते —

रविदुष्टं सितमर्द्धं कृष्णमदृष्टं यथाऽऽतपस्थस्य ।
कुम्भस्य तथासन्नं रवेरधःस्थस्य चन्द्रस्य ॥

तथा च सूर्यसिद्धान्ते —

[3]महतश्चाप्यधःस्थस्य नित्यं भासयते रविः ।
अर्द्धं शशाङ्कबिम्बस्य न द्वितीयं कथञ्चन ॥ इति ॥१॥

नन्विन्दुप्रकाशकोपलम्भात् स्वच्छाययान्यदसितमित्यस्य प्रत्यक्षबाधां मन्यमान आह—

[4]सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशम् ।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ॥२॥

---

१. पञ्चसिद्धान्तिकायाः १३ अध्यायेऽपीदं पद्यमपलभ्यते ।
२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
३. सम्प्रति प्रचलितसूर्यसिद्धान्ते नोपलभ्यत इदं पद्यम् ।
४. पञ्चसिद्धान्तिकायाः १३ अध्यायेऽपीदं पद्यमुपलभ्यते।

शशिनि चन्द्रमसि सलिलमयेऽम्बुमये रवेरादित्यस्य संबन्धिन्यो दीधितयो रश्मयो मूर्छितास्तत्र संलग्नाः प्रतिफलिता नशं निशाभवं रात्र्युत्पन्नं तमोऽन्धकारं क्षपयन्ति नाशयन्ति। यथा दर्पणोदरे आदर्शमध्ये द्वारप्रवेशे गृहस्य सूर्यरश्मयो निहिताः संरुद्धा मन्दिरस्य गृहस्यान्तर्मध्ये तमः क्षपयन्ति तथेति। तथा च सूर्यसिद्धान्ते —

[1]तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः।
प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिविदीपिताः॥

तथा चार्य्यभटः —

भूग्रहभानां गोलार्द्धानि स्वच्छायया विवर्णानि।
अर्द्धानि यथा सार्द्धं सूर्याभिमुखानि दीप्यन्ते॥इति॥२॥

अथ शशिनः पश्चिमदिग्भागात्सितवृद्धिः किमुपलभ्यते? तदर्थमाह —

त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम्।
दिनकरवशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयः॥३॥

शशिनश्चन्द्रमसोऽर्कतलं सूर्याधोभागं त्यजतो यथा येन प्रकारेण पश्चात्पश्चिमायां दिशि शौक्ल्यं शुक्लत्वमवलम्बते आक्रमते। तथा तेनैव प्रकारेणेन्दोश्चन्द्रस्य दिनकरवशात्सूर्यहेतोरधःप्रभृति बुध्नभागादारभ्योदयः प्रकाशते विराजते इति। एतदुक्तं भवति। रवरधोभागस्थश्चन्द्रमा अमावास्यान्ते भवति तत्र च तस्य चन्द्रलोकस्य सूर्याभिमुखं गोलार्द्धं शुक्लं भवति। अधःस्थितमवनिदृश्यभागं कृष्णवर्णं भवति। ततः प्रतिपदादिषु तिथिषु यथा यथा स्वभोगतुल्येनार्कात्प्राङ्मुखः शीघ्रगतित्वाद्याति तथातथा दृष्टिवर्तिनं सितमधोभागेऽवलम्बते। तथा च सूर्यसिद्धान्ते —

[2]विप्रकर्षं यथा याति ह्यधःस्थश्चन्द्रमा रवेः।
तथातथाऽस्य भूदृश्यमंशं भासयते रवः॥ इति॥३॥

---

१. सम्प्रति प्रचलितसूर्यसिद्धान्ते नोपलभ्यत इदं पद्यम्। परन्तु सिद्धान्ततत्त्वविवेकबिम्बाधिकारे कमलाकरेणापि न्यासीदम्। तत्र प्रदीपिता इति पाठः।

२. सम्प्रति प्रचलितसूर्यसिद्धान्ते नोपलभ्यत इदं पद्यम्।

प्रतिदिनं कथं चन्द्रगोले शुक्लवृद्धिर्भवति तदर्थमाह --

प्रतिदिवसमेवमर्कात्स्थानविशेषेण शौक्ल्यपरिवृद्धिः ।
भवति शशिनोऽपराह्णे पश्चाद्भागे घटस्येव ॥४॥

एवमनेन प्रकारेण शशिनश्चन्द्रस्यार्कादादित्यात् स्थानविशेषेण स्थानान्तरगमनेन शौक्ल्यस्य शुल्कभावस्य परिवृद्धिर्वृद्धिरधिकतरा भवति। यथायथाग्रतो राशिभोगवशेन याति तथातथा तस्य शुक्लाधिक्यं भवति। यथाऽपराह्णे द्वितीये दिनार्द्धे पश्चाद्भागे पश्चिमार्द्धे घटस्य कुम्भस्याऽऽतपस्थस्य शुक्लता भवति तथेति। एतदुक्तं भवति। यथा चन्द्रः प्राङ्मुखो राशिवशेन याति तथातथा शौक्ल्यपरिवृद्धिर्भवति। यावच्छुक्राष्टम्यर्द्धे राशिचयान्तरितस्यार्द्धशुक्लता भवति। पौर्णमास्यन्ते षड्राश्यन्तरितस्य सर्वशुक्लता भवति। ततो यथायथार्कसन्निकर्षमायाति तथातथा शौक्ल्यहानिर्भवति। यावत्कृष्णाष्टम्यर्द्धे कृष्णार्द्धता भवति। अमावास्यान्ते सर्वकृष्णता भवतीति ॥४॥

अथ चन्द्रस्य नक्षत्रगमनेन शुभाशुभत्वमाह --

ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य चायातः ।
याम्येन वीजजलचरकाननहा वह्निभयदश्च ॥५॥

ऐन्द्रं ज्येष्ठा। मूलं नैर्ऋतम्। आषाढाद्वयं पूर्वाषाढोत्तराषाढे। शीतकिरणश्चन्द्रमा ऐन्द्रस्य मूलाषाढाद्वयस्य च यांम्येन दक्षिणेन यदा यातो गतस्तदा बीजानि यान्युप्यन्ते। जलचरा जलप्राणिनः। काननानि वनानि च। हन्ति नाशयति। तथा वह्निभयदश्चाग्निभयदो भवति। अर्थादेवोत्तरेण गतः शोभनः। ततो वक्ष्यति --

भानां[2] यथासम्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः।
प्रदक्षिणं तच्छुभदं नृपाणां याम्येन यातो न शिवः शशाङ्कः॥ इति॥५॥

अन्येषामप्याह --

दक्षिणपार्श्वेन गतः शशी विशाखाऽनुराधयोः पापः ।
मध्येन तु प्रशस्तः पितृदेवविशाखयोश्चापि ॥६॥

---

१. पञ्चसिद्धान्तिकायाः १३ अध्यायेऽपीदं पद्यमुपलभ्यते।
२. बृहत्संहितायाम् १८ अध्यायस्य १ श्लोकः।

विशाखाऽनुराधे प्रसिद्धे नक्षत्रे। अनयोः शशी चन्द्रो दक्षिणपार्श्वेन याम्यभागेन गतो यातः। पापः पापफलदोऽनिष्टदो भवति। अर्थादवोत्तरेण शुभः। पितृदेवो मघा। विशाखा प्रसिद्ध्या। अनयोर्द्वयोमध्येनान्तरेण चन्द्रमा गतः प्रशस्तः। शुभफलदः। अपिशब्दो विशेषं द्योतयति, तेन मघाविशाखयोरुत्तरेणापि गतश्चन्द्रः शुभफलदः। तथा च समाससंहितायाम्—

भवति विशाखाद्यानं षण्णां याम्येन पापदश्चन्द्रः।
उदगिष्टः सर्वेषां पित्र्येशविशाखयोश्चान्तः॥

तथा च पराशरः—

अथ मार्गेष्वाग्नेयादुत्तरोऽतिवर्षकरो मत्रसावित्राभ्यां प्रजाहितकारी। ज्येष्ठाग्नेयमैत्रत्वाष्ट्राणां दक्षिणतश्चरन् पुष्कलाशुभदः। उपरिष्टाद्वैरोधिको धान्यविनाशी। अधो यवसम्पत्करः। मघाऽनुराधाभ्यां मध्येन गमनमतिशोभनम्। शिशिरग्रीष्मयोर्दक्षिणे च शुभदो वर्षास्ववर्षकरः सर्वर्त्तुषु नैर्ऋतेऽपि विश्वदेवानां चेति॥६॥

अथ चन्द्रमसो नक्षत्रयोगमाह—

षडनागतानि पौष्णाद् द्वादश रौद्राच्च मध्ययोगीनि।
ज्येष्ठाद्यानि नवर्क्षाण्युडुपतिनातीत्य युज्यन्ते॥७॥

पौष्ण रेवती तस्मात्प्रभृति षट् नक्षत्राणि रेवत्यश्विनीभरणीकृत्तिकारोहिणीमृगशिराश्चेत्येतानि षट् नक्षत्राणि षट्संख्यानि ऋक्षाणि। उडुपतिना चन्द्रेण सहानागतान्यप्राप्तानि। युज्यन्ते सयोगं यान्ति। यथोत्तरभाद्रपदस्थस्य चन्द्रमसो रैवत्या सह संयोगो दृश्यते। रेवतीसंस्थितस्य अश्विन्या सहैवमन्येषाम्। रौद्रमार्द्रा तस्मात्प्रभृति द्वादशनक्षत्राणि। आर्द्रापुनर्वसुतिष्याश्लेषामघापूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तचित्रास्वातीविशाखानुराधा इति। एतान्युडुपतिना मध्ययोगीनि युज्यन्त। चन्द्रमा यत्र काले एषां मध्यप्राप्तो भवति। अर्द्धभोगं भुक्त इत्यर्थः। यथा आर्द्रायां स्थितः सन् चन्द्र आर्द्रया सह संयोगं याति, एवमन्येषामपि ज्येष्ठाद्यानि नवर्क्षाणि। ज्येष्ठाद्यानि ज्येष्ठात्प्रभृति नवनक्षत्राणि ज्येष्ठामूलपूर्वाषाढोत्तराषाढश्रवणधनिष्ठाशतभिषक्पूर्वभाद्रपदोत्तराभाद्रपदेत्येतान्युडुपतिना चन्द्रेणातीत्यातिक्रम्य युज्यन्ते। यथा मूलस्थस्य चन्द्रमसो ज्येष्ठया सह संयोगो दृश्यते पूर्वाषाढास्थस्य मूलेनैवमन्येषामपि। एतदुक्तं भवति—गर्गादिभिः कानि-

चित्रक्षत्राण्यर्द्धभोगीन्युक्तानि, कानिचिदध्यर्द्धभोगीनि, कानिचित्समभोगीनि। यान्यर्द्धभोगीनि तान्यतीत्य युज्यन्ते। यान्यध्यर्द्धभोगीनि तान्येवानागतानि। यानि समभोगीनि तानि मध्यभोगीनि युज्यन्ते। तथा च गर्गः--

उत्तराश्च तथादित्यं विशाखा चैव रोहिणी ।
एतानि षडध्यर्द्धभोगीनि महाक्षेत्राणि ।
मघाश्विकृत्तिकासोमतिष्यपित्र्यभगाह्वयाः ।
सावित्रचित्राऽनूराधा मूलं तोयं च वैष्णवम् ।
धनिष्ठा चैकपाच्चैव समभागः प्रकीर्तितः ।
एतानि पञ्चदश समभोगीनि मध्यक्षेत्राणि ।
याम्येन्द्ररुद्रवायव्यसार्पवारुणसंज्ञिताः ।
एतानि षडर्द्धभोगीनि स्वल्पक्षेत्राणि ।

नन्वाचार्येणान्यथोक्तानि तान्यन्यथा स्थितानि। उच्यते--आचार्येणातिगोलज्ञतया यष्टियन्त्रेण देवदर्शनदृक्समान्युक्तानि। अथ किम्प्रमाणमध्यर्द्धभोगिनां किं वार्द्धभोगिनां किं च समभोगिनामिति। उच्यते--चन्द्रमध्यमभुक्तिरध्यर्द्धगुणा अध्यर्द्धभोगिनां प्रमाणमर्द्धगुणा अर्द्धभोगिनामेकगुणा समभोगिनामिति। तथा च [1]ब्रह्मसिद्धान्ते--

केशादित्यविशाखाप्रोष्टपदार्यम्णवैश्वदेवानि ।
षट् षड् ज्येष्ठाभरणीस्वात्यार्द्रावारुणाश्लेषाः ॥
पञ्चदशात्रानुक्तान्येकोऽभिजिदुक्तमृक्षभोगोऽन्यः ।
तन्मानं नाक्षत्रं दुरधिगमं मन्दबुद्धीनाम् ॥
अध्यर्द्धार्द्धसमक्षेत्राणां मध्यगतिलिप्तिकाः शशिनः ।
अध्यर्द्धार्द्धैकगुणा भभोगलिप्तास्तदैक्ययोनाः ॥
मण्डललिप्ताः शेषा भोगोऽभिजितः ॥ ॥७॥

अथ चन्द्रमसः संस्थानानि दश भवन्ति। तद्यथा--नौर्लाङ्गलं दुष्टलाङ्गलं समो दण्डः कार्मुकं युगं पार्श्वशाय्यावर्जितं कुण्डाख्यमिति।

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

तत्र नौसंस्थानस्य लक्षणं फलं चाह—

उन्नतमीषच्छृङ्गं नौसंस्थाने विशालता चोक्ता ।
नाविकपीडा तस्मिन् भवति शिवं सर्वलोकस्य ॥८॥

ईषच्छृङ्गम्। ईषत्किञ्चिदुन्नतमुच्चं शृङ्गं यस्य। तथा विशालता विस्तीर्णता च भवति। तन्नौसंस्थानम्। तस्मिन्नौसंस्थाने नाविकानां नौकर्णधारिणां पीडोक्ता कथिता। तथा च सर्वलोकस्य समस्तजनस्य च शिवं श्रेयो भवति ॥८॥

अथ लाङ्गलसंस्थानं सफलमाह—

अर्द्धोन्नते च लाङ्गलमिति पीडा तदुपजीविनां तस्मिन् ।
प्रीतिश्च निर्निमित्तं मनुजपतीनां सुभिक्षं च ॥९॥

शशिनि उच्छृङ्गे चोत्तरे अर्द्धोन्नते लाङ्गलमिति हलनाम तत्स्थानम्। तस्मिन् संस्थाने तदुपजीविनां लाङ्गलोपजीविनां पीडा भवति। तथा मनुजपतीनां राज्ञां निर्निमित्तं कारणं विना प्रीतिः स्नेहो भवति। लोके शिवं श्रेयः सुभिक्षं च भवति। तथा च वृद्धगर्गः—

यदा सोमः प्रतिपदि नौस्थायी सम्प्रदृश्यते ।
उत्तरोज्ज्वलशृङ्गो वा लाङ्गली च मनोहरः ॥
क्षेमं सुभिक्षमारोग्यं सर्वभूतेषु निर्दिशेत् ।
राज्ञां च विजयं ब्रूयाद् वर्द्धन्ते शृङ्गिणस्तथा ॥ इति ॥९॥

अथ दुष्टलाङ्गलसंस्थानं सफलमाह—

दक्षिणविषाणमर्द्धोन्नतं यदा दुष्टलाङ्गलाख्यं तत् ।
पाण्ड्यनरेश्वरनिधनकृदुद्योगकरं बलानां च ॥१०॥

दक्षिणविषाणं याम्यशृङ्गं यदाऽर्द्धोन्नतं भवति तदा दुष्टलाङ्गलं नाम तत्संस्थानम्। तच्च पाण्ड्यनरेश्वरनिधनकृत् पाण्ड्यदेशे योऽसौ नरेश्वरो राजा तस्य निधनं मरणं करोति। तथा बलानां सैन्यानामुद्योगकरं सेनानामुद्योगम् उद्यमं करोति यात्रायाम् ।

तथा च वृद्धगर्गः--

दक्षिणे च भवेत् स्थूलं हीनं शृङ्गमथोत्तरम् ।
दुष्टलाङ्गलसंज्ञं तत्प्रजाक्षयकरं स्मृतम् ॥ इति ॥१०॥

अथ समदण्डसंस्थानमाह--

समशशिनि सुभिक्षक्षेमवृष्टयः प्रथमदिवससदृशाः स्युः ।
दण्डवदुदिते पीडा गवां नृपश्चोग्रदण्डोऽत्र ॥११॥

समशशिनि तुल्यशृङ्गे चन्द्रे। प्रथमदिवससदृशाः प्रथमं दिनं प्रतिपत्तत्सदृशास्तत्तुल्याः सुभिक्षक्षेमवृष्टयः स्युर्भवेयुः। प्रतिपद्दिने यादृशः सुभिक्षो यादृशः क्षेमो यादृशी वृष्टिस्तादृशा एव मासं यावत् स्युर्भवेयुः। दण्डवदुदिते दण्डाकारे। गवां पीडा भवति। तथात्रास्मिन् संस्थाने राजा नृप उग्रदण्डस्तीक्ष्णकरो भवति। तथा च वृद्धगर्गः--

समशृङ्गो यदा दृष्टः शशी क्षेमसुभिक्षकृत् ।
प्रतिपत्सदृशं तत्र वासवो वर्षते तदा ॥
चन्द्ररेखा यदा चोर्ध्वमृज्वी दण्ड इव स्थिता ।
उदक्शृङ्गाधिकसमो दण्डस्थानं तदुच्यते ॥
उद्युक्तदण्डा राजानो विनिघ्नन्ति समन्ततः ।
गवां पीडां विजानीयाद्दण्डस्थाने यदा शशी ॥ इति ॥११॥

अथ कार्मुकयुगसंस्थानयोर्लक्षणं फलं चाह--

कार्मुकरूपे युद्धानि यत्र तु ज्या ततो जयस्तेषाम् ।
स्थानं युगमिति याम्योत्तरायतं भूमिकम्पाय ॥१२॥

कार्मुकं धनुस्तद्रूपे तदाकारे संस्थाने। युद्धानि संग्रामा भवन्ति। यत्र तु ज्या यस्मिन् भागे गुणस्तत्र तस्यां दिशि ये स्थिता राजानस्तेषां जयो भवति। तथा च वृद्धगर्गः--

उदये तु यदा सोमं पश्येद्धनुरिवोदितम् ।
धनुर्द्धराणामुद्योगो जगद्युद्धकरो भवेत् ॥
क्षत्रियाः क्षत्रियान् घ्नन्ति वर्णाश्चैव तथापरे ।
अग्रतश्च जयस्तेषां पृष्ठतश्च पराजयः ॥

12728

स्थानं युगमिति। तत्स्थानं याम्योत्तरायतं दक्षिणसौम्यभागविस्तीर्णं मध्यमं मण्डलं यदि भवति तद्युगं नाम। तच्च भूमिकम्पाय भवति। एतदुक्तं भवति--एवंविधे संस्थाने तन्मासमध्ये भूमिकम्पो वक्तव्यः। तथा च वृद्धगर्गः--

चन्द्ररेखा यदा व्यक्ता दक्षिणोत्तरमायता ।
शुक्लादौ प्रतिपद्येत तद्यो[1]गस्थानलक्षणम् ॥
सैन्योद्योगा भवन्त्यत्र भूमिकम्पश्च जायते ॥ इति ॥१२॥

अथ पार्श्वशायिनः संस्थानं फलं चाह--

युगमेव याम्यकोट्यां किञ्चित्तुङ्गं स पार्श्वशायीति ।
विनिहन्ति सार्थवाहान् वृष्टेश्च विनिग्रहं कुर्यात् ॥१३॥

युगमेव युगसंस्थानं याम्यकोट्यां दक्षिणशृङ्गाग्रे किञ्चिदीषत्तुङ्गमुच्चं यदि भवति तदा स पार्श्वशायीति चन्द्रः। पार्श्वशायीति तत्संज्ञा। स च सार्थवाहान् सार्थप्रधानान् विनिहन्ति घातयति। तथा वृष्टेर्वर्षणस्य च विनिग्रहं विनाशमभावं कुर्यात्। न वर्षतीत्यर्थः। तथा च वृद्धगर्गः--

याम्यकोट्यायतः किञ्चिद्युगकाले यदा शशी ।
पार्श्वशायीति संज्ञोऽयं सार्थहा वृष्टिनाशनः ॥ इति ॥१३॥

अथाऽऽवर्जितलक्षणं सफलमाह—

अभ्युच्छ्रायादेकं यदि शशिनोऽवाङ्मुखं भवेच्छृङ्गम् ।
आवर्जितमित्यसुभिक्षकारि तद् गोधनस्यापि ॥१४॥

अभि मुख्येनोच्छ्रायोऽभ्युच्छ्रायस्तस्मादभ्युच्छ्रायाच्छशिनश्चन्द्रस्य यद्येकशृङ्गमवाङ्मुखमधोमुखं भवति तत्संस्थानमावर्जितं नाम। इतिशब्दः प्रकारार्थैवं प्रकाराय इत्यर्थः। तदसुभिक्षकारि दुर्भिक्षं करोति लोके। न केवलं यावद् गोधनस्यापि तृणानामभावादपि दुर्भिक्षं करोति। तथा च वृद्धगर्गः—

---

१. युगस्वानस्य लक्षणमिति अ० क० पु० पाठः।

अधोमुखं यदा शृङ्गं शशिनो दृश्यते तदा ।
संस्थानमावर्जितकं गोघ्नं दुर्भिक्षकारकम् ॥ इति ॥१४॥

अथ कुण्डाख्यसंस्थाने लक्षणं फलं चाह--

अव्युच्छिन्ना रेखा समन्ततो मण्डला च कुण्डाख्यम् ।
अस्मिन् माण्डलिकानां स्थानत्यागो नरपतीनाम् ॥१५॥

समन्ततः सर्वत्र यद्यव्युच्छिन्ना रेखा खण्डरेखा चन्द्रमसो दृश्यते तदा तत्स्थानं कुण्डाख्यं कुण्डमित्याख्या नाम यस्य। अस्मिन् संस्थाने माण्डलिकानां नरपतीनाम्। मण्डले परिमिते देशे ये राजानस्तेषां स्थानत्यागः स्थानचलनं भवति, स्वस्थानाच्च्युतिरित्यर्थः। तथा च वृद्धगर्गः--

अच्छिन्ना मण्डले रेखा शशिनो दृश्यते यदा ।
कुण्डाख्यं नाम संस्थानं नृपविग्रहदायकम् ॥

नक्षत्रचन्द्रमसोर्यानि संस्थानान्युक्तानि तेषां कानिचिद् गणितविधिना शृङ्गोन्नतिपरिलेखकरणेनोत्पद्यन्ते कानिचिन्नोत्पद्यन्ते। तथा चाऽऽचार्येणोक्तम्---

अपमान्तरसंयुक्तात्तदूनगुणिताच्छशाङ्करविविवरात्।
मूलेनापमविवरे छिन्ने विक्षेपसंगुणिते ॥
फलमिन्द्वर्कविशेषाच्छोध्यं त्वपमानुकूलविक्षिप्ते ।
तद्व्यत्यासे देयं विपरीतं पूर्वसन्ध्यायाम् ॥
दिनकृत्सप्तमभवनात्तेनोदयनाडिकाद्वयं यदि वा ।
वियति विमले तदेन्दोर्लोकस्याऽऽलोकमायाति ॥
द्विगुणेच्छातिथ्यंशः शृङ्गमुदक्तुङ्गमुडुगणाधिपतेः ।
देयं च भुजादेतच्छौक्ल्यं कर्णाद् द्विषट्कांशम् ॥
अपमान्तरविक्षेपावैकान्यत्वे युतोनितौ कोटिः ।
कर्णो रवीन्दुविवरं तत्कृतिविवरात् पदं बाहुः ॥

---

१. पञ्चसिद्धान्तिकायाम् ५ अध्यायस्य १–१० श्लोकाः। तत्र १० श्लोके "निशि दिवसेऽस्तं शशी याति" इति पाठः।

सविता यतः शशाङ्कात् कोट्या परिकल्पितस्ततः कोटिः।
देयांशकार्गुलसमा भुजकर्णौ चाङ्गुलैरेव ॥
शशिमध्यात् प्राक्कर्णः कोटिरतोऽतो भुजः शशाङ्कगतः।
परिधावक्षो नाम शौक्ल्यं मध्याद्धनुस्तत्र ॥
याम्योदग्विक्षेपाद्विषुवत्याघ्नाद्रविभिरवाप्तांशः ।
उदये शशिनो वृद्धिः क्षयो विपर्यस्तमय एवम् ॥
एवं व्यर्काच्चन्द्राद्यद्यूना राशयः षडधिका वा।
तदुदयकालेन दिवा निशि च शशाङ्कोदयो वाच्यः ॥
कृत्वैवं क्षयवृद्धी व्यर्कं चन्द्रं विशोध्य चक्रार्धात्।
शेषोदयकालसमे शशिदिवसार्द्धे शशी मध्ये ॥

एवमत्र तानि नोत्पद्यन्ते किमर्थमाचार्येण फलमुक्तम्। उच्यते—यानि नोत्पद्यन्ते परिलेखविधौ तान्युत्पातरूपाणि कदाचिद्दृश्यन्ते यतस्तेषां भगवद्गर्गादिविरचितशास्त्रेषु फलानि दृश्यन्ते, तानि चाऽऽचार्येण पूर्वशास्त्राऽऽचारेणोक्तानीति। पराशरतन्त्रेऽष्टौ संस्थानान्युक्तानि। तथा च पराशरः—

तत्राऽष्टौ संस्थानानि भवन्ति। तद्यथा—लाङ्गलं नौर्दुष्टलाङ्गलं दण्डो धनुर्युगं सममवाक्शिरः। तत्रैषामीषदुन्नतोत्तरशृङ्गं लाङ्गलसंस्थानं तत्र सुभिक्षक्षेमवृष्टिकारणान्युत्पद्यन्ते। उभयशृङ्गः कुक्षिमान्विशालो नौस्थायी फलतः समः। पूर्वेण दक्षिणोन्नतशृङ्गो दुष्टलाङ्गलं परसैन्योद्योगनाशकृत्। दण्डवद्दण्डस्थायी दण्डकृत्प्रजानाम्। धनुष्प्रख्यो धनुःस्थायी स धनुर्द्धरोद्योगकृद्यतोऽस्य ज्या ततो विजयः। यद्युदगायता दक्षिणेन चास्य लेखा भवति, तद्युगसंस्थानमिच्छन्ति जगद्विद्रवभूकम्पाय। समोभयशृङ्गः समस्तत्स्थानं महाभयकृत्। शस्त्रसारभयदोऽवाक्शिराः। अथैतानि शुक्लप्रतिपदि द्वितीयायां वा लक्ष्याणि भवन्ति।

तथा च समाससंहितायाम्—

उदगुन्नतः शुभफलः समः समो दक्षिणोन्नतो न शुभः ।
युद्धानि चापरूपे ज्यास्य यतस्ते नृपा जयिनः ॥
नाविकपीडा नौवल्लाङ्गलवत्संस्थिते कृषिकराणाम् ।
दण्डाऽवाङ्मुखसङ्कटजर्जरपीठाकृतिर्न शुभः ॥
उत्पाता व्याख्याता येऽर्के चन्द्रेऽपि ते विनिर्देश्याः ।
शुक्ले भवन्ति सौम्याः कृष्णेऽधिकपापफलदास्ते ॥ इति ॥१५॥

अथ सामान्यलक्षणमाह--

प्रोक्तस्थानाभावादुदगुच्चः क्षेमवृद्धिवृष्टिकरः ।
दक्षिणतुङ्गश्चन्द्रो दुर्भिक्षभयाय निर्दिष्टः ॥१६॥

प्रोक्तानि कथितानि यानि संस्थानानि तेषामभावादसम्भवाद्यदुदगुच्च उत्तरोन्नतश्चन्द्रमास्तदा क्षेमवृद्धिवृष्टिकरः। लब्धपालनं क्षेमस्तं च करोति। वृद्धयः सस्यवृद्धयो वृष्टिर्वर्षणं ते च करोतीति।

अथ दक्षिणतुङ्गो याम्योन्नतो भवति दक्षिणविषाणोन्नतस्तदा दुर्भिक्षभयाय निर्दिष्टः कथितः। दुर्भिक्षभयं च करोति ॥१६॥

अन्यदप्याह--

शृङ्गेणैकेनेन्दुर्विलीनमथवाऽप्यवाङ्मुखं शृङ्गम् ।
सम्पूर्णं चाभिनवं दृष्टवैको जीविताद् भ्रश्येत् ॥१७॥

एवंविधमिन्दुं चन्द्रं दृष्ट्वा विलोक्यैको मनुजो जीवितादायुषो भ्रश्येत् पतेत्। य एवैकः पश्यति स म्रियत इत्यर्थः। कीदृशम् ? एकेन शृङ्गेणोपलक्षितम्। अथवा विलीनं गलितमिवैकेन शृङ्गेण। अपिशब्दो विकल्पनार्थः। अथवाऽवाङ्मुखमधोमुखं शृङ्गं चास्य भवति। तथा सम्पूर्णं परिपूर्णमभिनवमभि मुख्येन नवम्। चशब्दः मुच्चये। अथवाऽभि मुख्येन नवं द्वितीयाचन्द्रमेवंविधं पश्यति। तथा च समाससंहितायाम्—

उदयन्तमप्यसदृशं न शुभं बहुरूपताथवैकस्य।
एकश्चन्द्रविकारं यः पश्येन्न स चिरं जीवेत्॥ इति ॥१७॥

अथ चन्द्रमसो रूपाण्याह--

संस्थानविधिः कथितो रूपाण्यस्माद् भवन्ति चन्द्रमसः ।
स्वल्पो दुर्भिक्षकरो महान् सुभिक्षावहः प्रोक्तः ॥१८॥

मध्यतनुर्वज्राख्यः क्षुद्भयदः सम्भ्रमाय राज्ञां च ।
चन्द्रो मृदङ्गरूपः क्षेमसुभिक्षावहो भवति ॥१९॥

ज्ञेयो विशालमूर्तिर्नरपतिलक्ष्मीविवृद्धये चन्द्रः ।
स्थूलः सुभिक्षकारी प्रियधान्यकरस्तु तनुमूर्त्तिः ॥२०॥

संस्थानविधिः संस्थानप्रकारश्चन्द्रमसः कथित उक्तः। अस्मात् परतो रूपाणि भवन्ति, तानि चाह--स्वल्पो दुर्भिक्षकरः, अत्यल्पमूर्त्तिरसुभिक्षं करोति। महान् पृथुमूर्त्तिः सुभिक्षावहः, सुभिक्षमावहति करोतीति सुभिक्षावहः, प्रोक्तः कथितः ॥१८॥

मध्यतनुर्यो मध्यादवनतः स वज्राख्यो वज्रसंज्ञः। क्षुद्भयदः क्षुद्भयं दुर्भिक्षं ददाति। राज्ञां नृपाणां च सम्भ्रमायोद्यमाय भवति। तथा च वृद्धगर्गः--

विलग्नमध्यो मेघाभो वज्रसंस्थानसंस्थितः।
मध्यच्छिद्रो विलीनो वा भयं च जनयेद् महत् ॥

चन्द्रः शशी मृदङ्गरूपो मृदङ्गाकारः क्षेमसुभिक्षावहो भवति। क्षेमं सुभिक्षं च करोति ॥१९॥

चन्द्रः शशी विशालमूर्त्तिर्विस्तीर्णबिम्बो नरपते राज्ञो लक्ष्मीविवृद्धये श्रियो वृद्धचर्थं ज्ञेयो ज्ञातव्यः। स्थूलो घनः सुभिक्षकारी सुभिक्षकृद्भवति। तनुमूर्त्तिरघनदेहः प्रियधान्यकरो दुर्भिक्षकारी च भवति ॥२०॥

अथ चन्द्रस्य कुजादिभिस्ताराग्रहैः शृङ्गे भिन्ने फलमाह--

प्रत्यन्तान् कुनृपांश्च हन्त्युडुपतिः शृङ्गे कुजेनाहते
शस्त्रक्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भिक्षकृत्।
श्रेष्ठान् हन्ति नृपान् महेन्द्रगुरुणा शुक्रेण चाल्पान्नृपान्
शुक्ले याप्यमिदं फलं ग्रहकृतं कृष्णे यथोक्तागमम् ॥२१॥

चन्द्रस्य ताराग्रहैः सह संयोगे समागमाध्यायोक्तगणितविधिना ग्रहणवत्कर्मणि जाते भूत्वाऽधोभागेन भौमादयो बिम्बभेदनं कुर्वन्ति। तत्र शृङ्गभेदने इदं फलं मध्यभेदने च वक्ष्यमाणम्।

प्रत्यन्तानिति। उडुपतिश्चन्द्रः कुजेन भौमेन शृङ्गे विषाणे आहते ताडिते सति प्रत्यन्तान् दूरवासिनः। कुनृपान् कुत्सितनरपतीन्। हन्ति घातयति। यमेन शनैश्चरेणाऽऽहते शृङ्गे शस्त्रक्षुद्भयकृत्। शस्त्रभयं क्षुद्भयं दुर्भिक्षं च करोति। शशिजेन बुधेनाऽऽहते अवृष्टिजं अवृष्ट्युद्भूतं भयं दुर्भिक्षजं भयं च करोति। महेन्द्रगुरुणा बृहस्पतिना हते श्रेष्ठान् नरपतीन् हन्ति घातयति। शुक्रेण सितेनाऽऽहते शृङ्गे अल्पान् नृपान् स्वल्पान् नृपान् हन्ति। चशब्दः समुच्चये सर्वत्राऽत्र।

शुक्ले याप्यमिति। इदं ग्रहकृतं शृङ्गभङ्गफलं शुक्लपक्षे याप्यं भवति किञ्चिद्भवतीत्यर्थः। कृष्णे कृष्णपक्षे यथोक्तागमं यथा निर्दिष्टं सकलं फलं भवतीति। तथा च पराशरः--

अथ शृङ्गाभिमर्दने गुरुः प्रधाननृपविनाशाय। भृगुर्यायिनां कुनृपाणाम्। भौमः सौम्यो दुर्भिक्षायावृष्टये। क्षुच्छस्त्रभयदः सौर इति ।

तथा च समाससंहितायाम्--

प्रत्यन्तविनाशोऽन्नक्षयो महाराजपीडा च।
संग्रामाश्चाभिहिते शृङ्गे भौमादिभिः क्रमशः॥ इति॥२१॥

अधुना शुक्रभिन्नबिम्बस्य चन्द्रमसः फलमाह--

भिन्नः सितेन मगधान् यवनान् पुलिन्दान्
नेपालभृङ्गिमरुकच्छसुराष्ट्रमद्रान् ।
पाञ्चालकैकयकुलूतकपूरुषादान्
हन्यादुशीनरजनानपि सप्त मासान् ॥२२॥

सितेन शुक्रेण यदा भिन्नश्चन्द्रो मध्याद्विदारितस्तदा मगधान् जनान्, यवनान्, पुलिन्दान्, एतान् सर्वान् जनान्। नेपालभृङ्गिमरुकच्छसुराष्ट्रमद्रानेतान् जनान्, पाञ्चालान्, कैकयान्, कुलूतकान् जनानेव। पूरुषादान् पुरुषभक्षान्। उशीनरजनान्, एतान् सर्वान् पाककालादनन्तरं सप्त मासान् यावन्निहन्याद् घातयेत्॥२२॥

अथ जीवभिन्नस्याह--

गान्धारसौवीरकसिन्धुकीरान्
धान्यानि शैलान् द्रविडाधिपांश्च।
द्विजांश्च मासान् दश शीतरश्मिः
सन्तापयेद्वाक्पतिना विभिन्नः ॥२३॥

शीतरश्मिश्चन्द्रो वाक्पतिना गुरुणा विभिन्नो विदारितबिम्बः। गान्धारान्, सौवीरकान्, सैन्धवान्, कीरान्, एतान् सर्वानेव जनान् सन्तापयेत् सम्पीडयेत्। तथा धान्यानि व्रीहीन्, शैलान् पर्वतान्, द्रविडाधिपान् द्रविडदेशीयाधिपतीन्,

द्विजांश्च ब्राह्मणान्, एतान् दश मासान् यावत् सन्तापयेत् सम्पीडयेत्। पाकाध्याय-निर्दिष्टकालात् परत इदं ज्ञेयमिति सर्वत्र ॥२३॥

अथ भौमभिन्नस्याह—

उद्युक्तान् सह वाहनैर्नरपतींस्त्रैगर्तकान् मालवान्
कौलिन्दान् गणपुङ्गवानथ शिबीनायोध्यकान् पार्थिवान्।
हन्यात् कौरवमत्स्यशुक्त्यधिपतीन् राजन्यमुख्यानपि
प्रालेयांशुरसृग्ग्रहे तनुगते षण्मासमर्यादया ॥२४॥

प्रालेयांशुर्हिमरश्मिश्चन्द्रोऽसृग्ग्रहे अङ्गारके तनुगते शरीरस्थे भौमभिन्न इत्यर्थः। षण्मासमर्यादया षण्मासावधि यावदेतान् हन्यात् घातयेत्। उद्युक्तान् सह वाहनैर्नरपतीन्, नरपतीन्नृपान्। उद्युक्तान् उद्योगस्थितान् विजिगीषून् वाहनै-रश्वादिभिः सह हन्यात्। त्रैगर्तान् जनान्, मालवान्, कौलिन्दान् जनानेव। गण-पुङ्गवान् समूहप्रधानान्। अथशब्दः स्वार्थे। अथ शिबीन् जनान्, आयोध्यकान-योध्याभवान्, तथा पार्थिवान्नृपान्, एतानपि हन्यात्। तथा कौरवानां मत्स्यानां शुक्तीनां जनानां चाधिपतयः स्वामिनस्तानपि राजन्यमुख्यान् क्षत्रियप्रधानांश्च हन्यात् ॥२४॥

अथ शनैश्चरभिन्नस्याह—

यौधेयान् सचिवान् सकौरवान् प्रागीशानथ चार्जुनायनान्।
हन्यादर्कजभिन्नमण्डलः शीतांशुर्दशमासपीडया ॥२५॥

शीतांशुश्चन्द्रोऽर्कजभिन्नमण्डलः सौरविदारितबिम्बो दशमासपीडया दशमासोपतापेनैतान् हन्याद् घातयेत्। यौधेयान् जनान्। सचिवान्मन्त्रिणः। सकौर-वान् कौरवैर्जनैः सहितान्। प्रागीशान् पूर्वस्यां दिशि येऽधिपतयस्तान्। अथशब्दः पादपूरणे। चशब्दः समुच्चयार्थे। अर्जुनायनान् जनानिति ॥२५॥

अथ बुधभिन्नस्याह—

मगधान् मथुरां च पीडयेद्वेणायाश्च तटं शशाङ्कजः।
अपरत्र कृतं युगं वदेद्यदि भित्त्वा शशिनं विनिर्गतः ॥२६॥

शशाङ्कजो बुधो यदि शशिनं चन्द्रं भित्त्वा विदार्य विनिर्गतो विनिःसृतस्तदा मगधान् देशान् मथुरां च पीडयेत् हन्ति। तद्वासिनो जनान् विनाशयति। वेणा नाम

नदी तस्यास्तटं तत्तीरे ये निवासिनस्तान् जनानित्यर्थः। एतानुक्तान् वर्जयित्वाऽपरत्र अन्यदेशेषु कृतं युगं वदेत् कृतयुगाकारं ब्रूयात् तद्धर्मानुवृत्तेः ॥२६॥

अथ केतुभिन्नस्याह—

क्षेमारोग्यसुभिक्षविनाशी शीतांशुः शिखिना यदि भिन्नः ।
कुर्यादायुधजीविविनाशं चौराणामधिकेन च पीडाम् ॥२७॥

शीतांशुश्चन्द्रः शिखिना केतुना यदि भिन्नो विदारितबिम्बस्तदा क्षेमारोग्यसुभिक्षविनाशी भवति। क्षेममारोग्यं नीरुजत्वं सुभिक्षं च विनाशयति तच्छीलः। तथाऽऽयुधजीविनामायुधेन ये जीवन्ति तेषां विनाशमुपघातं कुर्यात्। चौराणां तस्कराणामधिकेन चातिशयेन पीडां रुजं कुर्यात्। तथा च पराशरः—

अथ भेदेष्वसुरगुरुभिन्नः पाञ्चालमगधमद्रकुणिन्दकौलूतककैकययवनधू[1]माम्बष्टमार्गणाङ्गनाराज्यभृङ्गमरुकच्छोशीनरपुलिन्दपुरुषादनेपालान् सप्तमासानुपतापयतीति। अमरगुरुणा दशमासान् गान्धारवसतिं सिन्धुवाह्लिकपर्वतकाश्मीरान्। क्षितिसुतभिन्नः कुरुशिबिमालवत्रिगर्तकुलिन्दायोध्याधिपतीन् जयार्थिनः सह षण्मासानुपतापयतीति। अर्कसूनुसम्भेदो नृपविरोधामात्यभेदगणपयौधेयार्जुनायनभयायाऽनावृष्टिप्रादुर्भावाय च दशमासान्। बुधभिन्नः सुभिक्षक्षेमवृष्टिकरः। केतोस्तद्विपर्ययः। प्रवर्द्धमानो वपुष्मानपराजितो ग्रहभिन्नोऽप्यशुभफलसंहर्ता इति ॥२७॥

अथ ग्रहणकाले उल्काहतस्य चन्द्रस्य फलमाह—

उल्कया यदा शशी ग्रस्त एव हन्यते ।
हन्यते तदा नृपो यस्य जन्मनि स्थितः ॥२८॥

शशी चन्द्रः। ग्रस्तो राहुराशिगतो यदोल्कया हन्यते, तदभिमुखी उल्का याति, तदा यस्य नृपस्य यस्य राज्ञः, जन्मनि जन्मगतः स्थितः स हन्यते तदा म्रियत इत्यर्थः। तथा च समाससंहितायाम्—

उल्काभिहतो ग्रहणे तन्नक्षत्रं नृपं हन्ति ॥ इति ॥२८॥

---

१. धूमान्वेष्टमार्गराङ्गनाराज्येति अ० क पु० पाठः।

अथ चन्द्रमसो वर्णलक्षणमाह--

भस्मनिभः परुषोऽरुणमूर्त्तिः शीतकरः किरणैः परिहीणः ।
श्यावतनुः स्फुटितः स्फुरणो वा क्षुड्डमरामयचौरभयाय ॥२९॥

एवंविधः शीतकरश्चन्द्रः क्षुड्डमरामयचौरभयाय भवति। क्षुद्दुर्भिक्षम्। डमरः शत्रुकलहः। आमयो रोगः। चौरास्तस्कराः। एषां संबन्धि भयं भवति। कीदृशः? भस्मनिभो भस्मवर्णः कलुषः। परुषो रूक्षः। अरुणमूर्त्तिर्लोहितशरीरः। किरणै रश्मिभिः परिहीणो वर्जितः। श्यावतनुः श्यामशरीरः। स्फुटितो भग्नः। स्फुरणः कम्पमान इति ॥२९॥

अन्यच्छुभलक्षणमाह--

प्रालेयकुन्दकुमुदस्फटिकावदातो
यत्नादिवाऽद्रिसुतया परिमृज्य चन्द्रः।
उच्चैः कृतो निशि भविष्यति मे शिवाय
यो दृश्यते स भविता जगतः शिवाय ॥३०॥

एवंविधश्चन्द्रो यो दृश्यतेऽवलोक्यते स जगतो जनानां शिवाय श्रेयसे भविता भविष्यतीत्यर्थः। कीदृशः? प्रालेयकुन्दकुमुदस्फटिकावदातः, प्रालेयं हेमम्, कुन्दकुमुदे पुष्पविशेषे शुक्ले तथा स्फटिको मणिस्तद्वदवदातो निर्मल इत्यर्थः। तथा अद्रिसुतया गौर्या यत्नाद्यत्नतः परिमृज्य समन्ततो निर्मलीकृत्योच्चैः कृत इवोपरि न्यस्तः। किमर्थम्? निशि रात्रौ मे शिवाय महेश्वराय भविष्यति श्रेयसे वेति निश्चित्य। तथा च पराशरः--

भस्मारुणवह्निताम्रपीतपाण्डुनीलरूक्षवर्णः क्षुद्भैरकरः। स्निग्धः प्रसन्नो रश्मिवान् श्वेतः क्षेमसुभिक्षवृष्टिकरः॥ इति ॥३०॥

अथ पक्षवृद्धौ वा हानौ वा साम्ये शुभाशुभमाह--

शुक्ले पक्षे सम्प्रवृद्धे प्रवृद्धिं ब्रह्मक्षत्रं याति वृद्धिं प्रजाश्च।
हीने हानिस्तुल्यता तुल्यतायां कृष्णे सर्वं तत्फलं व्यत्ययेन ॥३१॥

शुक्ले पक्षे श्वेतमासार्द्धे सम्प्रवृद्धे सम्यक्प्रवृद्धिं गते ब्रह्मक्षत्रं वृद्धिं याति।

ब्राह्मणा द्विजाः, क्षत्रिया [1]नृपाश्च वृद्धिं गच्छन्ति, तथा प्रजाश्च वृद्धिं यान्ति। हीने हानिरिति, तस्मिन्नेव शुक्लपक्षे हीने क्षयं गते च ब्रह्मक्षत्रप्रजानां हानिर्भवति। तुल्यता तुल्यतायामिति। तुल्यतायां सभत्वे न हानौ न वृद्धौ तेषां ब्रह्मक्षत्रप्रजानां तुल्यता साम्यमेव भवति। कृष्णे सर्वं तत्फलं व्यत्ययेन, कृष्णे कृष्णपक्षे सर्वं प्रागुक्तं फलं व्यत्ययेन विपरीतेन ज्ञेयं ज्ञातव्यम्।

एतदुक्तं भवति--कृष्णपक्षे प्रवृद्धे ब्रह्मक्षत्रप्रजानां हानिर्हीने तस्मिन् पक्ष एव तेषां वृद्धिः। समे पक्षे सभत्वमिति ॥३१॥

अन्यदप्याह--

यदि कुमुदमृणालहारगौर-
स्तिथिनियमात् क्षयमेति वर्द्धते वा।
अविकृतगतिमण्डलांशुयोगी
भवति नृणां विजयाय शीतरश्मिः ॥३२॥

एवंविधः शीतरश्मिश्चन्द्रो नृणां पुंसां विजयाय भवति। कीदृशो यदि कुमुदमृणालहारगौरः, कुमुदं पुष्पविशेषम्, मृणालं विसम्, हारो मुक्ताहार-स्तद्वद्यदि गौरः श्वेत इत्यर्थः। तिथिनियमात्तिथिक्रमेण क्षयमेति क्षयं गच्छति। तिथिक्रमेण वा वर्द्धते वृद्धिं याति। शुक्लकृष्णप्रतिपदाद्यासु तिथिषु वृद्धिक्षयौ तुल्यौ भवतः कदाचिद्धीनाधिकतेत्यर्थः। अविकृतगतिः, अविकृता विकाररहिता गतिर्गमनं यस्य कम्पनादिदोषरहितः। अविकृतं मण्डलं बिम्बं यस्य अविकृतैरंशुभिः किरणैर्योगः संयोगो यस्य तथाभूत इति ॥३२॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ चन्द्रचारो नामाध्यायश्चतुर्थः ॥ ४ ॥

अथ राहुचाराध्यायो व्याख्यायते।

तत्रादावेव राहोर्ग्रहत्वप्रतिपादनाय मतान्तरमाह--

अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदम्।
प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके ॥१॥

किलशब्द आगमप्रदर्शनार्थः। एके केचिदाचार्या एवं वदन्ति कथयन्ति। लोके यो राहुरित्युच्यते स चाऽसुरः सैंहिकेयः। तस्य पुराऽमृतं पिबतो भगवता

---

१. क्षत्रिया राजन्याः प्रवृद्धिमिति अ० क० पु० पाठः।

हरिणा सुदर्शनाख्येन चक्रेण शिरो मूर्द्धा छिन्नं निकृत्तमपि अमृताऽऽस्वादविशेषाद-मृताऽऽस्वादनहेतोः प्राणैरसुभिरपरित्यक्तं नोज्झितं ग्रहतां यातं तदेव ग्रहत्वं प्राप्तमिति। तथा च पुराणकारः—

सिंहिकातनयो राहुरपिबच्चामृतं पुरा।
शिरच्छिन्नोऽपि न प्राणैस्त्यक्तोऽसौ ग्रहतां गतः ॥ इति ॥१॥

यद्येवंविधो राहुस्तत्किमित्याकाशे ग्रहवन्नोपलभ्यते तदर्थमाह—

इन्द्वर्कमण्डलाकृतिरसितत्वात् किल न दृश्यते गगने।
अन्यत्र पर्वकालाद्वरप्रदानात् कमलयोनेः ॥२॥

इन्दुमण्डलस्य चन्द्रबिम्बस्यार्कमण्डलस्य सूर्यबिम्बस्य च यादृश्याकृतिराकारस्तादृगेव राहुमण्डलस्य। यद्येवं तत् किमिति गगने आकाशे न दृश्यते नोपलभ्यते? असितत्वात् किलेति, असितत्वात् कृष्णत्वात् किल न दृश्यते यतोऽसौ तमोमय इति। यदि न दृश्यते तदास्य दर्शनमस्तीत्याह—अन्यत्र पर्वकालादिति। कमलयोनेर्ब्रह्मणो वरप्रदानात् पर्वकालाद् ग्रहणसमयादन्यत्र अन्यस्मिन् काले न दृश्यते, पर्वकाले तु पुनर्दृश्यते। तथा च पराशरः—

पुरा[1] पुरुहूतपितरं कश्यपमपत्यार्थमकाले सिंहिका अभियाचयामास। तस्यै मुनिरकालयाञ्चाकोपाद्दारुणं यमकालान्तकोपमं सुतमदात्, यं राहुमित्याचक्षते कुशलाः। स जातमात्र एवाऽदितिसुतसङ्घरावमर्दादनु विमुखीकृतः क्रोधाद्धिमवति दिव्यमत्युग्रमयुतं वर्षाणां तपोऽतप्यत। स पितामहाद्दिवं चरणममरतां सुरविजयमर्कचन्द्रसम्भक्षणं च वरमभिवरयामास। तस्मै भगवानमरगुरुः स्वयंभूः प्रहसन्नुवाच। अतिवरमशक्तस्त्वमेतौ जरयितुं किन्त्वेवमस्त्वित्युक्त्वान्तर्हिते भगवति दिनकररजनिकरावभिदुद्राव राहुः। ततो हरिररिविमथनं चक्रमुपरि प्रक्षिप्यास्य शिरच्छित्त्वोवाच। सर्वमवितथं पितामहवचो भवतु स्वे स्वे युगे पर्वणि ग्रहणं कुर्वन् जगतः शुभाशुभानां कर्ता भविष्यसीति।

तथा च भगवान् गर्गः—

आदित्यनिलयो राहुः सोमं गच्छति पर्वसु।
आदित्यमेति सोमाच्च पुनश्चान्द्रेषु पर्वसु ॥ इति ॥२॥

---

१. द्रष्टव्ये अस्य ग्रन्थस्य १५-१६ पृष्ठे।

अन्यदपि मतान्तरमाह—

मुखपुच्छविभक्ताङ्गं भुजङ्गमाकारमुपदिशन्त्यन्ये ।
कथयन्त्यमूर्त्तमपरे तमोमयं सैंहिकेयाख्यम् ॥३॥

एके आचार्याः सैंहिकेयाख्यं राहुं मुखपुच्छविभक्ताङ्गमुपदिशन्ति कथयन्ति। मुखपुच्छाभ्यां विभक्तान्यङ्गानि यस्य, एतदेवास्य ज्ञायते नान्यदवयवादिकं मुखपुच्छाभ्यां परतः। तथा च वीरभद्रः—

सिंहिकातनयस्यास्य राहोः पुच्छमुखादृते ।
नान्यदस्ति परं बाहुकटिपादकरादिकम् ॥ इति ।

भुजङ्गमाकारमुपदिशन्त्यन्ये। अन्ये आचार्या भुजङ्गमाकारं सर्पाकृतिं च वदन्ति कथयन्ति। यथा सर्परूपो राहुः। तथा च वसिष्ठः—

भषट्कान्तरितौ राहुः सूर्याचन्द्रमसावुभौ।
छादयत्युरगाकारो वरदानात् स्वयम्भुवः ॥ इति ।

कथयन्त्यमूर्तमपर इति। अपरेऽन्ये पुनरमूर्तं मूर्त्तिरहितं तमोमयमन्धकारमयं राहुं कथयन्ति वदन्ति। तथा च देवलः—

अन्धकारमयो राहुर्मेघखण्ड इवोत्थितः।
आच्छादयति सोमार्कौ पर्वकाले ह्युपस्थिते ॥ इति ॥३॥

अधुनैतत्परमतं दूषयितुमाह—

यदि मूर्त्तो भविचारी शिरोऽथवा भवति मण्डली राहुः ।
भगणार्द्धेनान्तरितौ गृह्णाति कथं नियतचारः ॥४॥

यद्यसौ राहुर्मूर्त्तो मूर्त्तिमान् सावयवः। भविचारी भेषु राशिषु नक्षत्रेषु विचरणशीलः। शिरोऽथवा भवति, शिरोमान् राहुर्मण्डलवान् वा तन्नियतचारो निश्चितगतिर्भूत्वा कथं भगणार्द्धेन राशिषट्केनान्तरितौ व्यवहितौ सूर्याचन्द्रमसौ गृह्णाति। किलास्य तिस्रो लिप्ता एकादशविलिप्ताश्च गणितस्कन्धोक्ता

नियता गतिर्यस्य नियतचारस्तस्य षड्राश्यन्तरिता गतिर्न सम्भाव्यते अर्कादीनां यथेति ॥४॥

अन्यद् दूषणान्तरमाह--

अनियतचारः खलु चेदुपलब्धिः संख्यया कथं तस्य ।
पुच्छाननाभिधानोऽन्तरेण कस्मान्न गृह्णाति ॥५॥

यद्यसौ राहुरनियतचारोऽनिश्चितगतिः केत्वादिरिव तत्कथं तस्य संख्यया गणितेनोपलब्धिरुपलम्भनम्। कथं ज्ञायते यथास्मिन् राशौ राहुरवस्थित इति।

अथवा पुच्छाननाभिधानो मुखपुच्छविभक्ताङ्गस्तदान्तरेण मध्येन कथं न गृह्णाति। यथा षड्राश्यन्तरितौ गृह्णाति तथा राशिद्वयेन राशित्रयेण राशिचतुष्केण राशिपञ्चकेन वा कस्माद्धेतोर्न गृह्णाति॥५॥

अन्यदपि दूषणमाह--

अथ तु भुजगेन्द्ररूपः पुच्छेन मुखेन वा स गृह्णाति ।
मुखपुच्छान्तरसंस्थं स्थगयति कस्मान्न भगणार्द्धम् ॥६॥

अथशब्दो विकल्पार्थे। तुशब्दः पादपूरणे। यदि राहुर्भुजगेन्द्ररूपः सर्पाकारः। स च षड्राश्यन्तरितावर्कचन्द्रौ पुच्छेन लाङ्गूलेन मुखेन वदनेन वा गृह्णाति। एवं चेद् मुखपुच्छान्तरसंस्थं मुखपुच्छमध्यवर्त्ति भगणार्द्धं राशिषट्कं कस्माद्धेतोर्न स्थगयति नाच्छादयति। किलैतदुपपद्यत इति॥६॥

अथ राहुद्वयमप्यस्ति तत्रैको नियतचारः, अन्योऽनियतचारः। यश्चानियतचारः स षड्राश्यन्तरितयोरर्कचन्द्रयोर्मुखेन ग्रहणं करोतीत्येतत्प्रतिषेधयन्नाह--

राहुद्वयं यदि स्याद् ग्रस्तेऽस्तमितेऽथवोदिते चन्द्रे ।
तत्सममतिनान्येन ग्रस्तः सूर्योऽपि दृश्येत ॥७॥

यदि चेद्राहुद्वयं स्वर्भानुयुगम्। स्याद्भवेत्। तच्चन्द्रे शशिनि ग्रस्तेऽस्तमितेऽथवा दिने ग्रस्त उदिते सति सूर्योऽपि रविरपि तत्सममतिना सूर्यतुल्यगतिनान्येनापरेण द्वितीयेन राहुणा ग्रस्तश्छादितो दृश्येत अवलोक्येत च। एतदुक्तं भवति--यदा ग्रस्तश्चंन्द्रमा उदेति ग्रस्तो वास्तमेति तदा पूर्वापरहरिजसक्तस्येन्दोरर्कस्यापि पूर्वापरक्षितिजासक्तिर्भवति षड्राश्यन्तरितत्वादुपपद्यते। द्वावपि क्षितिजादुपरि स्थितौ दृश्यौ भवतः। पर्वकालस्य च सम्भवादेकेनानियतचारेण चन्द्र आच्छाद्यते परेण च नियतचारेण षड्राश्यन्तरितः सूर्य इति॥७॥

एवं मतान्तराणि निराकृत्य स्वसिद्धान्तमाह--

भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः ।
प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्द्धात् ॥८॥

यदि राहुकृतमर्कचन्द्रयोर्ग्रहणं तदिन्दोः प्राक्प्रग्रहणं पश्चात् सूर्यस्येति तत्किमिति राहारेकरूपत्वात् ? अत्राऽऽह भूच्छायामिति। इन्दुश्चन्द्रः स्वग्रहणे। आत्मीयोपरागे भूच्छायां प्रविशति। अर्कग्रहणे सूर्योपरागे भास्करमर्कं प्रविशति, यतोऽर्कात् सप्तमराशौ भूच्छाया भ्रमति चन्द्रश्च पौर्णमास्यन्ते तत्रैव भवति। स च शीघ्रत्वात् पूर्वाभिमुखो भूच्छायां प्रविशति। तत्र प्रविष्टस्य खण्डं नोत्पद्यते। अतस्तस्य पूर्वार्द्धात् प्रग्रहणं भवति। सूर्यग्रहणे चन्द्रार्कावेकराशिगौ भवतः। तत्र चन्द्रमाः शीघ्रगतित्वात् पश्चादागत्यामावास्यान्तेऽर्कतलं प्रविशत्यतोऽविक्षिप्तः स एवाधःस्थोऽर्कमाच्छादयति। अतः पश्चात् सूर्यस्य खण्डं नोत्पद्यते। अतोऽस्माद्धेतोरिन्दोश्चन्द्रस्य पश्चादर्द्धात् प्रग्रहणं न भवति। भानोरादित्यस्य पूर्वार्द्धात् प्रग्रहणं न भवतीति ॥८॥

अथ रात्रौ कुतो भूच्छाया भवत्येतत्प्रतिपादयितुमाह--

वृक्षस्य स्वच्छाया यथैकपार्श्वे भवति दीर्घचया ।
निशि निशि तद्वद्भूमेरावरणवशाद्दिनेशस्य ॥९॥

यथा वृक्षस्य तरोः स्वच्छायाऽऽत्मीया भा दिनेशस्याऽऽदित्यस्याऽऽवरणवशात् छादनहेतोरेकस्मिन् पार्श्वे भवति दीर्घचयाऽऽयामिनी सूर्याद्विपक्षायां दिशि भवति। तद्वत्तेनैव प्रकारेण निशि निशि रात्रौ रात्रौ दिनेशस्याऽऽवरणवशाद् भूर्यतः सूर्यमाच्छादयति। अतो हेतोरेकपार्श्वे भवति दीर्घचया ॥९॥

यद्येवं तत्प्रतिमासं किमिति चन्द्रस्य ग्रहणं न भवतीत्येतत्प्रतिपादयन्नाह--

सूर्यात् सप्तमराशौ यदि चोदग्दक्षिणेन नातिगतः ।
चन्द्रः पूर्वाभिमुखश्छायामौर्वीं तदा विशति ॥१०॥

यदि चन्द्रः शशी सूर्यादादित्यात् सप्तमे राशौ स्थितो भूच्छायात उत्तरेण दक्षिणेन च नात्यर्थं याति। स्वल्पेन विक्षेपेण विक्षिप्तो भवतीत्यर्थः। तदा पूर्वाभिमुखो गच्छन् प्राचीं दिशमनुसरन्नौर्वीं भूच्छायां प्रविशति नान्यथेति। यतो भूच्छाया मूलाद्बृहती भवत्यग्रादल्पा। सा च चन्द्रकक्षाया ऊर्ध्वं याति। तत्रस्थश्चन्द्रमा अत्यल्पविक्षिप्तो यदा भवति तदा सर्वग्रास उत्पद्यते। विक्षेपे सति

तदनुसारेण चतुर्भागग्रासप्रमाणमर्द्धग्रासप्रमाणं पादोनग्रासप्रमाणं ग्रासाभावो वा स्वबुद्धचोह्यमिति। तथा च [1]ब्रह्मसिद्धान्ते--

भूच्छायां शशिकक्ष्यागां रवौ भार्द्धान्तरस्थिते ।
यदा विंशत्यविक्षिप्तश्चन्द्रः स्यात्तद्ग्रहस्तदा ॥ इति ॥१०॥

अथ चन्द्रग्रहणं सर्वत्रैकरूपं दृश्यते अर्कग्रहणं प्रतिदेशमन्यादृशमित्येतत्प्रतिपादयन्नाह--

चन्द्रोऽधःस्थः स्थगयति रविमम्बुदवत् समागतः पश्चात् ।
प्रतिदेशमतश्चित्रं दृष्टिवशाद्भास्करग्रहणम् ॥११॥

आदित्यादधःस्थश्चन्द्रः। स च पश्चात् पश्चिमभागात् समागतोऽम्बुदवन्मेघखण्डवद्रविमादित्यं स्थगयत्याच्छादयति। अतोऽस्माद्धेतोः प्रतिदेशं देशं प्रति भास्करग्रहणं सूर्योपरागं दृष्टिवशाद्दर्शनहेतोश्चित्रं नानाप्रकारं दृश्यतेऽवलोक्यते। क्वचित्सर्वग्रहणं क्वचित्खण्डग्रहणं क्वचिद्ग्रहणाभावः। यथा मेघखण्डाच्छादितमर्कबिम्बं समाधोवर्त्तिनां सर्वमेवादृश्यं पार्श्ववर्त्तिनां केषाञ्चिदर्द्धदृश्यं केषाञ्चिच्चतुर्थभागदृश्यमन्येषां सर्वदृश्यमिति। तथा च सूर्यसिद्धान्ते--

[2]इन्दुना छादितं सूर्यमधोऽविक्षिप्तगामिना ।
न पश्यति यदा लोकस्तदा स्याद्भास्करग्रहः ॥
तमोमयस्य तमसो रविरश्मिपलायिनः ।
भूच्छाया चन्द्रबिम्बं च स्थाने द्वे परिकल्पिते ॥ इति।

तथा च [3]ब्रह्मसिद्धान्ते--

भूच्छायेन्दुं चन्द्रः सूर्यं छादयति मानयोगार्द्धात् ।
विक्षेपो यद्यूनः शुक्लेतरपञ्चदश्यन्ते ॥ इति ॥११॥

अथार्द्धच्छन्नस्य चन्द्रमसः कुण्ठविषाणता भवत्यर्द्धच्छन्नस्यार्कस्य तीक्ष्णविषाणता भवति तत्किमेकत्वाद् ग्राहकस्येत्येतत्प्रतिपादयितुमाह--

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
२. सम्प्रति प्रचलितसूर्यसिद्धान्ते नोपलभ्यत इदं पद्यद्वयम्।
३. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

आवरणं महदिन्दोः कुण्ठविषाणस्ततोऽर्द्धसंछन्नः ।
स्वल्पं रवेर्यतोऽतस्तीक्ष्णविषाणो रविर्भवति ॥१२॥

इन्दोश्चन्द्रस्य महत् अतिबृहत् किञ्चिदावरणमाच्छादकः। ततस्तस्माद्धेतोरर्द्धसंछन्नोऽर्द्धग्रस्तः कुण्ठविषाणो भग्नशृङ्गो भवति।

रवेदादित्यस्य स्वल्पमावरणम्। यतो यस्मादर्द्धसंछन्नो रविस्तीक्ष्णविषाणस्तीक्ष्णशृङ्गो भवति। एतच्च भूच्छायाचन्द्रयोरेव सम्भवति। परिलेखकरणेनात्रोपपत्तिरिति। तथा चाऽऽचार्य एव पञ्चसिद्धान्तिकायाम्--

स्वं[1] भूच्छायामिन्दुः स्पृशत्यतः स्पृश्यते न पश्चार्द्धे ।
भानुग्रहेऽर्कमिन्दोः प्राक् प्रग्रहणं रवेर्नतिः ॥

तथा च [2]ब्रह्मसिद्धान्ते--

महदिन्दोरावरणं कुण्ठविषाणो यतोऽर्द्धसंछन्नः ।
अर्द्धच्छन्नो भानुस्तीक्ष्णविषाणस्ततोऽस्याल्पम् ॥ इति ॥१२॥

राहुकृतमर्कचन्द्रयोर्न ग्रहणमित्येतत्प्रतिपादयितुमाह--

एवमुपरागकारणमुक्तमि दिव्यदृग्भिराचार्यैः ।
राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः ॥१३॥

एवमनेन प्रकारेणेदमुपरागकारणं ग्रहणनिमित्तं दिव्यदृग्भिराचार्यैरुक्तं दिव्यज्ञानसंयुक्ता दृष्टिर्येषां ते दिव्यदृशस्तैर्दिव्यदृग्भिरुक्तं कथितम्। अस्मिन्नुपरागे राहुरकारणमनिमित्तमिति शास्त्रस ावः परमार्थ उक्त कथितः। इतिशब्दो निश्चयार्थे। तथा च [3]ब्रह्मसिद्धान्ते--

यदि राहुः प्राग्भागादिन्दुं छादयति किं तथा नार्कम् ।
स्थित्यर्द्धं महदिन्दोर्यथा तथा किं न सूर्यस्य ॥
किं प्रतिविषयं सूर्यो राहुश्चान्यो यतो रविग्रहणे ।
ग्रासान्यत्वं न ततो राहुकृतं ग्रहणमर्केन्द्वोः ॥इति ॥

---

१. पञ्चसिद्धान्तिकायाम् ६ अध्यायस्य १४ श्लोकः। तत्र "स्पृशति तथा स्पृशति" इति द्वितीयपादे पाठः।
२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।
३. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

ननु यद्येवमर्केन्द्वोर्न राहुकृतं ग्रहणं तच्छ्रुतिसंहितालोकैः सह विरुध्यते। यतो लोके राहुकृतं ग्रहणमित्यागोपालाङ्गनादिप्रसिद्धं स्मृतिपूक्तम्।

अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्।

तथा--

राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु च ॥ इति।

तथा च श्रुतौ--

स्वर्भानुर्ह वा आसुरिः सूर्यं तमसा विव्याधेति।

संहितासु तथा च गर्गः--

यन्नक्षत्रगतौ राहुर्ग्रसते शशिभास्करौ।
तज्जातानां भवेत् पीडा ये नराः शान्तिवर्जिताः ॥ इति।

तथा च [1]ब्रह्मसिद्धान्ते--

राहुकृतं ग्रहणद्वयमागोपालाङ्गनादिसिद्धमिदम्।
बहुफलमिदमपि सिद्धं जपहोमस्नानफलमत्र ॥
स्मृतिपूक्तं न स्नानं राहोरन्यत्र दर्शनाद्रात्रौ।
राहुग्रस्ते सूर्ये सर्वं गङ्गासमं तोयम् ॥
स्वर्भानुरासुरिरिनं तमसा विव्याध वेदवाक्यमिदम्॥ इति॥१३॥

एवं मत्वा लोकश्रुतिस्मृतिसंहितानां यथैक्यं भवति तत्प्रतिपादनाय राहोरेव ग्राहकत्वमाह--

योऽसावसुरो राहुस्तस्य वरो ब्रह्मणाऽयमाज्ञप्तः।
आप्यायनमुपरागे दत्तहुतांशेन ते भविता ॥१४॥
तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुः।
याम्योत्तरा शशिगतिर्गणितेऽप्युपचर्यते तेन ॥१५॥

योऽसावसुर इति। योऽसावसुरः सैंहिकेयाख्यो राहुस्तस्य राहोर्ब्रह्मणा पितामहेन वरोऽयमाज्ञप्तो दत्तः। यथापरागे ग्रहणेऽर्कचन्द्रयोर्दत्तहुतांशेन ग्रहणकाले यद्दानं दीयते यच्च वह्नौ हूयते ततोऽसावंशो भागस्तेन दत्तहुतांशेन ते तव चाप्यायनं तर्पणं भविता भविष्यतीति।

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

तस्मिन् काले ग्रहणसमयेऽस्य राहोः सान्निध्यं सन्निहितत्वं कमलजवरप्रदानाद्भवति तेन कारणेन लोके राहुरित्युपचर्यते कथ्यते। तेन भूच्छायाचन्द्रगोलौ द्वे स्थाने तस्य निवासार्थं परिकल्पिते। तत्र स्थितत्वात् स एवाऽऽच्छादक इति सर्वत्र प्रसिद्धिः। गणिते तु पुनः शशिगतिर्याम्योत्तरा दक्षिणसौम्यविक्षेपवशात्। स च दक्षिणसौम्यविक्षेप उत्पद्यते पातवशात्। यतश्चन्द्रपात एव लोके राहुरिति प्रसिद्धः। भौमादीनां ताराग्रहाणामपि पाता विद्यन्ते। तेषामपि तद्वशात्तद्विक्षेपो भवति। तेन याम्योत्तरा गतिर्ज्ञायते। किमयं ग्रहः क्रान्त्यग्रादुत्तरेण विक्षिप्तः किं वा दक्षिणेनेति। एवं चन्द्रस्य याऽसौ दक्षिणोत्तरा गतिः पातवशात् भिद्यति, सैवापि लोके राह्वर्थेनोपचर्यते व्यवस्थाप्यते। अपिशब्दो निश्चयार्थे। एतदुक्तं भवति——चन्द्रविक्षेपज्ञानार्थं यश्चन्द्रपातः परिकल्पितः स एव लोके राहुरित्युच्यते। तथा च [1]ब्रह्मसिद्धान्ते——

श्रुतिसंहितास्मृतीनां भवति यथैक्यं तदुक्तिरतः।
राहुस्तच्छादयति प्रविशति यच्छुक्लपञ्चदश्यन्ते॥
भूच्छायातमसीन्दुं वरप्रदानात् कमलजस्य।
चन्द्रोऽम्बुमयोऽधःस्थो यदग्निमयभास्करस्य मासान्ते॥
छादयति शमिततापं राहुश्छादयति तत्सवितुः।
भूच्छायाव्याससमः शशिकक्ष्यायां स्थितः शशिग्रहणे॥
राहुश्छादयतीन्दुं सूर्यग्रहणेऽर्कमिन्दुसमः।
यत्तदधिकं तमोमयराहुव्यासस्य सूर्यदृष्टं तत्॥
नश्यति भूच्छायेन्दुव्याससमोऽस्मा वति राहुः॥
भूच्छाया नेन्दुमतो ग्रहणे छादयति नार्कमिन्दुर्वा।
तत्स्थस्तद्व्याससमो राहुश्छादयति शशिसूर्यौ॥ इति॥१४-१५॥

गर्गादिभिरुत्पातैर्ग्रहणज्ञाननिमित्तान्युक्तानि, तैर्ग्रहणज्ञानं स्फुटं न भवतीत्येतत्प्रतिपादयितुमाह——

न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते निमित्तानि।
अन्यस्मिन्नपि काले भवन्त्यथोत्पातरूपाणि॥१६॥

निमित्तैश्चिह्नैरुत्पातरूपैर्ग्रहणपरिज्ञानं न कथञ्चिदपि विज्ञायते। यतो निमित्तान्यन्यस्मिन्नपि काले परसमये सम्भवन्ति। तत्र च तान्युत्पातरूपाणि

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

उत्पातभूतानि गण्यन्ते। गर्गादिभिरुत्पातवशेन यद्ग्रहणज्ञानमुक्तं तन्न शोभनम्। निमित्तानि ग्रहणकाल एव न सम्भवन्ति। अन्यस्मिन्नपि काले सम्भवन्ति। तत्र च तान्युत्पातरूपाणि गण्यन्ते न ग्रहणकारणानीति। तथा च पराशरः--

तद्यथा--ग्रहणनिमित्तानि। चन्द्रमसस्तावत्प्रस्पन्दनं सव्यावृत्तिर्दैन्यं पाण्डुत्वं सततपरिवेषणं चिरोत्पादितज्योत्स्नाप्रभाभङ्गः क्षीणता क्षामता दक्षिणशृङ्गतैमिर्येतिरस्यात्यर्थं तुङ्गताविभाविश्च।

आदित्यस्यापि वेपनं परिवेषणं दीनमन्दरश्मिता कृष्णकलमाषता। उभयोरपि सन्ध्ययोश्चोल्कापातदिग्दाहभूमिकम्पाशनिवज्रनिर्घातस्तनयित्नुपांशुवृष्टिविषमवातशीतोष्णविकृतानि। वज्रकनकरजतमणीनां प्रभाभङ्गः। अभ्रलेखासन्दर्शनम्। अर्कमण्डलोत्थितायाः कृष्णराज्याः सोमानुप्रवेशश्च। शिवाखगगणरुतविकृतनीचैरभ्रपरिसर्पणरश्मिजालव्याकुलत्वम्। तप्ताम्भसां शीतता क्षीरिणां क्षीरक्षयः। अकस्मान्माल्यग्लानिः। पञ्चताराग्रहादिभी रोहिणीपीडनमिति चन्द्रग्रहणेऽर्कविकृतिः।

अर्कग्रहणे चन्द्रमसो बलवन्मध्यतनुनिमित्तहेतुकानि सर्वार्धाकिञ्चिद्ग्रहणेऽप्यानुपूर्व्या। यतो निमित्तोत्पातस्ततः प्रग्रहणम्। यत एषामपसरणं ततो मोक्ष इति॥१६॥

अथान्यद् दूषणमाह--

पञ्चग्रहसंयोगान्न किल ग्रहणस्य सम्भवो भवति।
तैलं च जलेऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः॥१७॥

किलेत्यागमसूचने शास्त्रान्तरेष्वेवमुक्तम्। यथा पञ्चानां ग्रहाणां संयोगात् सभागमाद् ग्रहणस्य सम्भवो न भवति। एतदुक्तं भवति--पौर्णमास्याममावास्यायां वा पञ्चग्रहसंयोगो यदि भवति तदा ग्रहणाभाव इति। तथा च वृद्धगर्गः--

ग्रहपञ्चकसंयोगं दृष्ट्वा न ग्रहणं वदेत्।
यदि न स्याद् बुधस्तत्र तं दृष्ट्वा ग्रहणं वदेत्॥

एतदसत्। अत्रापि दिक्परिज्ञानार्थमाह--तैलं च जलेऽष्टम्यामिति सोमग्रहणं सूर्यग्रहणं वा यदा भावि तदाष्टम्यां समीपवर्त्तिन्यां तिथौ जलमध्ये तैलं क्षिप्तं यस्यां दिशि तत्प्रसरति तस्यामेव दिशि ग्रहणं वक्तव्यम्। पुनरपि मोक्षार्थं

भूयो जलमध्ये तैलं क्षिप्तं यस्यामेव दिशि न प्रसरति तस्यामेव मोक्षो वक्तव्यः। तथा च वृद्धगर्गः--

अष्टम्यां परिवेषः स्यात्तैले जलगते यदा ।
प्रसारिते विजानीयाद्यतः खण्डस्ततस्तमः ॥इति।

एतदप्यसत्। यतोऽन्यस्मिन् भाण्डगते जले तैलं क्षिप्तं किमन्यस्यां दिशि न प्रसरति। अन्यत्र सर्वत्र प्रसरति तस्मात् सर्वमेव तदसत्। तथा च गर्गः--

दिग्दाहोल्कामहीकम्पतमोधूमरजांसि च ।
सूचयन्त्यागमं राहोः पुनः पर्वण्युपस्थिते ॥
तत्राष्टम्यां जले तैलं क्षिप्त्वा स्थानं विनिर्दिशेत् ।
परिवेषो यतः खण्डस्तत्र ज्ञेयौ समागमौ ॥
पञ्चग्रहसमायोगं दृष्ट्वा सौम्यविवर्जितम् ।
ग्रहणं नु वदेत्तत्र सबुधं न ग्रहं वदेत् ॥

तस्माद्विपश्चिद्भिः पण्डितैरिदं न विचिन्त्यं नाङ्गीकार्यं पञ्चग्रहसंयोगात्तैलं च जलेऽष्टम्यामिति ॥१७॥

अथ ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानं चाह--

अवनत्यार्के ग्रासो दिग्ज्ञेया वलनयाऽवनत्या च ।
तिथ्यवसानाद्वेला करणे कथितानि तानि मया ॥१८॥

अवनतिरिति स्फुटविक्षेपस्य नाम। तयाऽवनत्या तेन स्फुटविक्षेपेणार्के सूर्ये ग्रासो ज्ञेयः। अत्यल्पे विक्षेपे महाग्रहणं महति विक्षेपेऽल्पमिति। चन्द्रार्कमानयोगार्द्धादवनतिमपास्य शेषे रविमानादधिके सर्वग्रहणमूने खण्डग्रहणमशुद्धे ग्रहणाभावः। एवमवनत्यार्के ग्रासो ज्ञेयः।

दिग् ज्ञेया वलनयाऽवनत्या च, अवनत्या तत्कालोत्पन्नयाऽवनत्या स्फुटविक्षेपेण च परिलेखकरणेन प्रग्रहणादीनां दिग् ज्ञेया।

तिथ्यवसानाद्वेला, तिथेरमावास्याया योऽवसानोऽस्य हरिजसंस्कारेण मध्याह्नमप्राप्य निवृत्तिर्मध्याह्नादूर्ध्वं वा तत्र मध्यग्रहणम्। तस्मिन्नेव प्राग्रहणिकं स्फुटस्थित्यर्द्धं संशोध्य प्रग्रहणकालो भवति। तत्रैव मोक्षस्फुटस्थित्यर्द्धं संयोज्य मोक्षकालो भवति। एवं तिथ्यवसानाद्वेला। अत्रार्कग्रहणमुपलक्षणार्थम्। चन्द्रग्रहणेऽपि स्वोपकरणैः।

एतान्युपकरणानि करणे पञ्चसिद्धान्तिकायां मया कथितान्यवतानीति। तथा च पञ्चसिद्धान्तिकायाम्--

[1]दिनमध्यमसम्प्राप्ता यावत्यो नाडिका व्यतीता वा ।
ताभ्यः षड्गुणिताभ्यो ज्यात्रिंशांशस्तिथेर्नाम ॥
उदयात् प्रभृति च नाड्यो याः स्युः प्राग्लग्नमानयेत्ताभिः ।
तस्मात्तु नवसमेतादपक्रमांशान् विनिश्चित्य ॥
लग्नत्र्यगुविवरज्यां द्विगुणां खरसांशसंमितामपमात् ।
जह्याद्विच्यत्यासे विक्षेपैक्ये तयोर्योगः ॥
उत्तरमक्षाच्छुद्धं याम्यं साक्षं च दक्षिणं विन्द्यात् ।
उत्तरमक्षाद्यदधिकमुत्तरमेवं विजानीयात् ॥
तज्ज्याघ्नीं शशिभुक्तिं हृत्वा धृतिभिः शतैः स्फुटाऽवनतिः ।
मध्यममानं त्रिंशद्भानोः शशिनश्चतुस्त्रिंशत् ॥
समलिप्तराहुविवरज्याभ्यस्ता मूर्छिता नवहृताश्च ।
अवनत्या युतविश्लेषिता च दिक्साम्यवैलोम्ये ॥
मध्यममानाभ्यस्ता स्फुटभुक्तिर्मध्यभुक्तिभक्ता च ।
भवति कलापरिमाणं तत्कालीनं रविहिमांश्वोः ॥
अवनतिवर्गं जह्याद्रवीन्दुपरिमाणयोगदलवर्गात् ।
तन्मूलात्तु [illegible]त्तिथिभुक्तवदादिशेत् कालम् ॥
रविशशिमानयुतदलादवनतिहीनाद्भवन्ति या लिप्ताः ।
तान्यङ्गुलानि विन्द्याद्भानोश्छन्नानि चन्द्रमसा ॥
अर्द्धेनाऽऽलिख्य रविं दत्वावनतिं यथादिशं मध्यात् ।
अवनत्यन्ताच्चन्द्रं विलिखेद्ग्रासार्थमर्द्धेन ॥इति॥

एवमेव चन्द्रस्य स्वोपकरणैरुदाहार्यम् । तथा च--

[2]तिथ्यन्ते ग्रहमध्यं प्राक्परतः स्थितिदलेन चाद्यन्तौ ।
रक्तकपिलौ च वर्णाविच्चाधःस्थे परे नितराम् ॥

---

१. पञ्चसिद्धान्तिकायाम् ८ अध्यायस्य ९-१८ श्लोकाः। तत्र १० श्लोके "अपमांशा विनिश्चित्याः," १३ श्लोके च "स्मृतावनतिः" इति पाठः।

२. इदं पद्यं मुद्रितपञ्चसिद्धान्तिकायां नास्ति तत्रादर्श एव त्रुटिरित्यनुमीयते।

[1]सर्वग्रासिन्येवं वर्णविशेषं वदेन्निशानाथे ।
उदयास्तमये धूम्रं खण्डग्रहणे सलिलदाभम् ॥इति।

एवं पञ्चग्रहसंयोगादित्यादि यदुक्तं तत्सर्वमसदिति ॥१८॥

इदानीं कल्पादेः षण्मासोत्तरया वृद्धया सप्त पर्वाणि ब्रह्मादीनां भवन्ति। तेषां देवानां नामानि चाह—

षण्मासोत्तरवृद्धया पर्वेशाः सप्त देवताः क्रमशः ।
ब्रह्मशशीन्द्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः ॥१९॥

कल्पादारभ्य षण्मासोत्तरया वृद्धया षड्भिः षड्भिर्मासैर्गतैः पर्व भवति। तानि च सप्त पर्वाणि। तेषां पर्वणां क्रमशः क्रमेण सप्तदेवता ब्रह्माद्याः। तद्यथा—ब्रह्मा कमलजः, शशी चन्द्रः, इन्द्रः शक्रः, कुबेरो वैश्रवणः, वरुणो यादसाम्पतिः, अग्निर्हुताशनः, यमः पितृपतिः—एते सप्त यथासंख्यं सप्तानां पर्वणामधिपतयो विज्ञेया विज्ञातव्याः एतेषामानयनं गणितसिद्धम्। तथा च [2]खण्डखाद्यके करणेऽस्मदीयं वचनम्—

दिनवृन्दात् खशर५०ध्नात् षण्णवरविभि१२९६र्विभाजितादाप्तम् ।
रामर्तुखेन्दु १०६३ सहितं क्षिपेद् द्युवृन्दे भजेत् खधृतिभि१८०स्तत् ॥

लब्धः कमलजपूर्वः पर्वगणः सप्तभाजितः शेषः ।
गतगम्ये ते शून्यधृत्यूने चन्द्रसूर्यपर्व स्यात् ॥

अत्र यल्लब्धं तदतीतं स्यात्ततः परं वर्तमानं भवति[3] । इति॥ १९॥

---

१. पञ्चसिद्धान्तिकायाम् ६ अध्याये ९ श्लोकः। तत्र "सर्वग्रासे पीतम्" इति प्रथमपादे, "उदयास्तग्रासधूम्रम्" इति तृतीयपादे, "खण्डग्रहणे च सलिलाभम्" इति चतुर्थपादे च पाठः।

२. ब्रह्मगुप्तकृतं खण्डखाद्यकाख्यं करणं (द्रष्टव्या मत्कृता गणकतरङ्गिणी)। तत्र भट्टोत्पलेन या टीका कृता तत्र पर्वेशप्रसङ्गे स्ववचनमिदं पद्यद्वयमुपनिबद्धमिति। मन्निकटे यत्पुस्तकमस्ति तत्र मूल एव लेखकाध्यापकाध्येतृदोषैरिदं पद्यद्वयमुपन्यस्तमस्ति।

३. रवि १२ गुणिते शककाले माससमेतेऽक्षिसागर ४२ विभक्ते।
यल्लब्धं ते भगणाः शेषे षड्भाजिते पर्व॥
इति क० पु० अधिकः पाठः।

अथ तेषां फलान्याह--

ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणि सस्यसम्पच्च
तद्वत्सौम्ये तस्मिन् पीडा विदुषामवृष्टिश्च ॥२०॥

ऐन्द्रे भूपविरोधः शारदसस्यक्षयो न च क्षेमम् ।
कौबेरेऽर्थपतीनामर्थविनाशः सुभिक्षं च ॥२१॥

वारुणमवनीशाशुभमन्येषां क्षेमसस्यवृद्धिकरम् ।
आग्नेयं मित्राख्यं सस्यारोग्याभयाम्बुकरम् ॥२२॥

याम्यं करोत्यवृष्टिं दुर्भिक्षं संक्षयं च सस्यानाम् ।
यदतः परं तदशुभं क्षुन्मारावृष्टिदं पर्व ॥२३॥

ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणीति। ब्राह्मे पर्वणि द्विजानां ब्राह्मणादीनां पशूनां चतुष्पदानां वृद्धिर्वर्द्धनम्, तथा क्षेमं लब्धपालनम्, आरोग्यं नीरोगत्वम्, एतानि भवन्ति। सस्यानां च सम्पद्वृद्धिर्भवति।

तद्वत्सौम्य इति। सौम्ये पर्वणि चान्द्रे तद्वद् द्विजपशुवृद्धिक्षेमारोग्याणि भवन्ति। सस्यसम्पच्च भवति। तस्मिन् सौम्ये तु पुनर्विदुषां पण्डितानां पीडा। अवृष्टिरवर्षणं भवति॥

ऐन्द्रे भूपविरोध इति। ऐन्द्रे पर्वणि भूपानां राज्ञां परस्परं विरोधः कलहम्, तथा शारदानां सस्यानां धान्यानां क्षयो विनाशः, लोके क्षेमं न च भवति।

कौबेरे पर्वण्यर्थपतीनामीश्वराणामर्थविनाशो वित्तक्षयः सुभिक्षं च भवति॥

वारुणमवनीशाशुभमिति। वारुणं नाम यत्पर्व तदवनीशानां राज्ञामशुभमश्रेयस्करमन्येषां सर्वजनानां क्षेमकरं तथा सस्यानां वृद्धिकरं भवति।

आग्नेयं मित्राख्यमिति। आग्नेयस्य पर्वणो मित्राख्यमित्यपरं नाम तत्पर्व सस्यारोग्यकरं सस्यानि करोति निष्पादयति, आरोग्यं च करोति। तथा अम्बु जलमभयं भयरहितं नातिबहुलं नात्यल्पं मध्यमं यथाकालोपयोग्यं च करोति॥

याम्यमिति। याम्यं पर्वावृष्टिमवर्षणं दुर्भिक्षं क्षुद्भयं सस्यानां च संक्षयं विनाशं करोति।

यदतः परमिति। अतोऽस्मात् पर्वसप्तकाद्यत्परमन्यत्पर्व तदशुभमनिष्टदम्।

षण्मासोत्तरवृद्ध्या पर्वेशा उक्ताः। तत्र कदाचिदुत्पातवशात् पञ्चभिर्मासैः सार्द्धैः पञ्चभिर्वा षड्भिः सार्द्धैः सप्तभिर्वा पर्व भवति। तत्पर्व ब्राह्मादि न भवति। तच्च क्षुन्मारावृष्टिदम्, क्षुद् दुर्भिक्षम्, मारं मरणम्, अवृष्टिमवर्षणं च ददाति॥

तथा च पराशरः--

शुक्लकृष्णाष्टमीपञ्चदश्योरन्तराद् ग्रहणनिमित्तानीन्दुभान्वोः प्रबलानि भवन्ति। तानि च निशामय। षण्मासात् चन्द्रमसस्ततोऽर्द्धषष्ठेत्यादि[1] चादित्यस्यापि पूजितमाहुराचार्याः। सप्तदशत्रयोदशपञ्चत्रिंशन्मासिकानि चेन्दोस्त्रीणि विसन्धिग्रहणानि क्षुद्व्याधिमरकदुर्भिक्षोपद्रवाय वेदितव्यानि। एवमेवैतानि प्राकृतवैकृतग्रहणानि। अतः परं सप्त विधेः पर्वेशान् कथयिष्यामः। ब्राह्मसौम्यैन्द्रकौबेरवरुणाऽऽग्नेययाम्यानि षण्मासान्तरितानि सप्त भवन्ति। तत्र ब्राह्मं सस्यजननं तद्वत्सौम्यम्। ऐन्द्रं भूपालविरोधाक्षेमदुर्भिक्षकरम्। कौबेरमीश्वराणामैश्वर्यविनाशकरं क्षेमसस्यकृच्च। वारुणं वृष्टिसस्यक्षेमारोग्यकरम्। आग्नेयमन्नक्षयदम्। दुर्भिक्षायाल्पवृष्टये याम्यं चेति॥

तथा च गर्गः--

चन्द्रात् पञ्चममासे तु मासे त्वेकादशे तथा।
[2]सप्तादशे वा सूर्यस्य ग्रहणं क्षुद्भयाय तत्॥ इति॥२०-२३॥

अथ वेलाहीनेऽतिवेले च पर्वणि फलमाह--

वेलाहीने पर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च।
अतिवेले कुसुमफलक्षयो भयं सस्यनाशश्च॥२४॥

गणिताऽऽगतप्रग्रहणात् पूर्वं यदि दृक्प्रग्रहणं दृश्यते तदा तत्पर्व वेलाहीनम्। अथ गणिताऽऽगतप्रग्रहणकालात् पश्चाद्दृक्प्रग्रहणं भवति तदा तत्पर्वाऽतिवेलम्। वेलाहीने पर्वणि गर्भाणां विपत्तिर्नाशो भवति। गर्भागर्भलक्षणमग्रतो वक्ष्यति। ते तत्र विज्ञेयाः। तथा शस्त्रकोपो युद्धं च भवति।

अतिवेले पर्वणि कुसुमानां पुष्पाणां फलानां च क्षयो विनाशः। लोके भयं सस्यानां नाशश्च भवति॥

---

१. अर्द्धषष्ठेत्यादि अर्द्धषष्ठसप्तमासानन्तरं ग्रहणमिति।

२. सप्तादश इत्यार्षप्रयोगः। आङुपसृष्टस्यास्य लोकेऽपि साधुत्वं भवति।

तथा च गर्गः--

वेलाहीने शस्त्रभयं गर्भिणां स्रावणं तथा ।
अतिवेल[1] फलानां तु सस्यानां क्षयमादिशेत् ।
दृक्समे पर्वणि नृपा निर्वैरा विगतज्वराः ।
प्रजाश्च सुखिताः सर्वा भयरोगविवर्जिताः ।

तथा च काश्यपः--

अनागतमतीतं वा ग्रहणे पर्व दृश्यते ।
गर्भस्रावमनावृष्टि फलं पुष्पं विनश्यति ॥इति॥२४॥

एतन्मया पूर्वशास्त्राणि निरीक्ष्योक्तं न स्वमतेनेत्याह--

हीनातिरिक्तकाले फलमुक्तं पूर्वशास्त्रदृष्टत्वात् ।
स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति ॥२५॥

हीनातिरिक्तकाले पर्वणि यन्मया फलमुक्तं कथितं तत्पूर्वशास्त्रदृष्टत्वात्। पूर्वशास्त्रेषु भगवद्गर्गादिप्रणीतेषु दृष्टम्। यतः स्फुटगणितविदः स्फुटं गणितं वेत्ति जानातीति स्फुटगणितज्ञस्य कालः प्रग्रहणादीनां समयः कथञ्चिदप्यन्यथा न भवति। यतो देशान्तरकर्मणा विना तिथिचलनं न भवति। तच्च गणितज्ञ एव जानाति। उक्तं च--

गणितग्रग्रहात् पश्चाद्यदि दृक्ग्रग्रहो भवेत् ।
स प्राग्देशोऽन्यथा पश्चाद्रेखायाः स च मेरुतः ॥
उज्जयिन्यां गता यावल्लङ्कातो दक्षिणोत्तरा ।
तदन्तर्घटिका भुक्तिवधात् षष्ट्या हृतात् फलम् ॥
मध्ये धनणं पश्चात्प्राग्घटिका द्युगणेऽथवा ।

एवं संस्कृता ग्रहा दृक्समा भवन्तीत्यर्थः। पूर्वागमतः परीक्ष्योक्तम्। यथा--

[2]ज्यौतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम् ।
स्वयमेव विकल्पयितुं किं तु बहूनां मतं वक्ष्ये ॥इति॥२५॥

---

१. फलपुष्पौषधीनां चातिवेले भयमादिशेत्-इति अ० क० पुस्तके पाठः।
२. बृहत्संहितायाम् ९ अध्यायस्य शुक्रचाराख्यस्य ७ श्लोकः।

अधुनैकमासे चन्द्रसूर्यग्रहणयोः फलमाह--

यद्येकस्मिन् मासे ग्रहणं रविसोमयोस्तदा क्षितिपाः ।
स्वबलक्षोभैः संक्षयमायान्त्यतिशस्त्रकोपश्च ॥२६॥

एकस्मिन् मासे रविसोमयोः सूर्य्याचन्द्रमसोर्यदि ग्रहणमुपरागो भवति, तदा क्षितिपा राजानः स्वबलक्षोभैरात्मीयसैन्यानां क्षोभणैः संक्षयं विनाशमायान्ति प्राप्नुवन्ति। अतिशस्त्रकोपोद्योगः संग्रामाश्च भवन्ति। तथा च काश्यपः--

चन्द्रार्कयोरेकमासे ग्रहणं न प्रशस्यते ।
परस्परं वधं कुर्युः स्वबलक्षुभिता नृपाः ॥इति॥

नन्वत्रोक्तं यद्येकस्मिन् मासे ग्रहणं रविसोमयोरिति। तदत्र वक्ष्यमाणेन--

सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद् ग्रहोऽर्कस्य ।
तत्रामयः प्रजानां दम्पत्योर्वैरमन्योन्यम् ॥

इत्यनेनैव सह पुनरुक्ततादोषः स्यात् । यस्माज्ज्योतिःशास्त्रे मासः शुक्लादिरुक्तः। प्रथमपक्षान्ते सोमग्रहो द्वितीयपक्षान्तेऽमावास्यायामर्कग्रहात् तथैकमासः सञ्जायते तस्मादयं महान् दोषः ।

अन्य एवं[1] व्याचक्षते-- यथाधिकमास एवैतत्सम्भवति। यदि समाने मासाद्वये सूर्येन्द्वोर्ग्रहणं भवति तदैकमासोक्तफलमन्यत्र पक्षान्तरितग्रहणफलमर्केन्द्वोर्वक्तव्यम्। एतत् सत्यमौत्पातिकं भवति। यस्मादाचार्येणाऽऽदित्यचारे सूर्यस्योपरक्तस्यापर्वणि फलमुक्तम्--

सतमस्कं पर्व विना त्वष्टा नामार्कमण्डलं कुरुते ।
स निहन्ति सप्त भूपान् जनांश्च शस्त्राग्निदुर्भिक्षैः ॥इति॥

तथा च व्यास आह--

[2]ततो ववौ महाराज मारुतो लोमहर्षणः ।
राहुरग्रसताऽऽदित्यं युगपत् सोममेव च ॥

---

१. अस्यैव ग्रन्थस्य ३ अध्यायस्य ६ श्लोकः।
२. भारतस्य अश्वमेधपर्वणि ७७ अध्याये १५ श्लोकः।

यद्येकस्मिन् मासे ग्रहणं रविसोमयोरित्यस्यामायामौत्पातिकं पर्व विना रविसोमयोरप्येकस्मिन्नेव मासे ग्रहणफलमुक्तम्। कुत एतल्लभ्यते। तथा च भगवान् व्यासः—

[1]चन्द्रसूर्यावुभौ ग्रस्तावेकमासे त्रयोदशे।
अपर्वणि ग्रहावेतौ प्रजाः संक्षपयिष्यतः ॥इति।

तथा च पराशरः—

अपर्वणि शशाङ्कार्कौ त्वष्टा नाम महाग्रहः।
आवृणोति तमःश्यामः सर्वलोकविपत्तये ॥

तथा च वृद्धगर्गः—

मासि त्रयोदशे दृश्यौ सोमार्कौ ग्रहणं गतौ।
छत्राण्यनेकानि तदा मृज्यन्ते भूमिपक्षये ॥
सपुत्रदारा गच्छन्ति संग्रामे लोमहर्षणे।
अनेन वनितायाः स वैधव्यान्तकरोऽधिकम् ॥
कालशोकावहः पुंसां देशानेकविनाशनः।
स्वचक्रपरचक्रैश्च विनश्यन्ति बहुप्रजाः ॥इति।

सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद् ग्रहोऽर्कस्येत्यत्र पक्षान्ते मासान्ते पर्वनियममाह—तस्मात् पुनरुक्ततादोषोऽन्यत्रावगम्यत इति।

अन्य एवं व्याचक्षते। यथा—कथमेकस्मिन् मासे रविसोमयोर्ग्रहणं स्याद् यावच्चैत्रसिताद्या मासा इति शास्त्रस्थितिः। अत्रोच्यते—यदि पञ्चदश्यां ग्रहणं भवति ततः पुरस्तादमावास्यायामर्कग्रहणं भवति, तत्प्राग्लम्बनमृणगतं भवति तदैको मासो भवति। अथवा लम्बनं धनगतं भवति, ततः पुरस्तात् पौर्णमास्यां चन्द्रग्रहणं भवति। तत्राप्येको मासो युज्यते नान्यथेति।

एवमत्राधिकमासके यदुक्तं तदेव शोभनमृषिवचनादेकमासे त्रयोदश इति ॥२६॥

अथ ग्रस्तोदितयोर्ग्रस्तास्तयोश्चार्कचन्द्रयोः फलमाह—

ग्रस्तावुदितास्तमितौ शारदधान्यावनीश्वरक्षयदौ।
सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसन्दृष्टौ ॥२७॥

---

१. भारतस्य भीष्मपर्वणि ३ अध्याये ३२ श्लोकः। तत्र "एकमासौ त्रयोदशीम्" इति प्रामादिकः पाठो विभाति।

ग्रस्तावुदितास्तमितावित्यत्र शशिरव्योः प्रत्येकस्य फलेन सह संबन्धः। चन्द्रो यदा ग्रस्तोदितो ग्रस्तास्तमितो वा भवति तदा शारदधान्यस्य क्षयदो विनाशकर्ता भवति। एवमर्को ग्रस्तोदितो ग्रस्तास्तमितश्चावनीश्वरस्य राज्ञः क्षयदो भवति। ननु सूर्येन्द्वोर्यथासंख्येन कस्मात् फलं न संबध्यते। ग्रस्तोदितौ सूर्येन्दू शारदधान्यक्षयदौ ग्रस्तास्तमितावनीश्वरक्षयदौ भवत इति। अत्रोच्यते नैतद्युक्तम्। यस्माद्वृद्धगर्गः—

उद्गच्छति गृहीतश्चेदस्तं वा यदि गच्छति।
शारदं तु तदा सस्यं जातं जातं विपद्यते॥
ग्रैष्मेण तत्र जीवन्ति नरा मूलफलेन वा।
भयदुर्भिक्षरोगैश्च तदा सम्पीड्यते जगत्॥इति।

तथा च ऋषिपुत्रः—

यावतोंऽशान् ग्रसित्वेन्दोरुदयत्यस्तमेति वा।
तावतोंऽशान् पृथिव्यास्तु तम एव विनाशयेत्॥
उदयेऽस्तमये वापि सूर्यस्य ग्रहणं भवेत्।
तदा नृपभयं विन्द्यात् परचक्रस्य चागमम्॥

तथा च—

चिरं गृह्णाति सोमार्कौ सर्वं वा ग्रसत यदा।
हन्यात् स्फीतान् जनपदान् वरिष्ठांश्च जनाधिपान्॥
ग्रैष्मेण तत्र जीवन्ति नराश्चाम्बुफलेन वा।
भयदुर्भिक्षरोगैश्च सम्पीड्यन्ते प्रजास्तथा॥इति।

सर्वग्रस्ताविति। सूर्येन्दू सर्वग्रस्तौ निःशेषाच्छादितौ तावेव यदि पापसन्दृष्टौ पापग्रहयोरङ्गारकसौरयोरन्यतरेण दृष्टौ भवतस्तदा दुर्भिक्षं मरकं च ददाते इति॥२७॥

अथोदयात् प्रभृत्यस्तमयं यावद् ग्रस्तयोश्चन्द्रार्कयोः सप्तस्वाकाशभागेषु फलं श्लोकचतुष्टयेनाह—

अर्द्धोदितोपरक्तो नैकृतिकान् हन्ति सर्वयज्ञांश्च।
अग्न्युपजीविगुणाधिकविप्राश्रमिणो युगेऽभ्युदितः॥२८॥
कर्षकपाखण्डिवणिक्क्षत्रियबलनायकान् द्वितीयांशे।
कारुकशूद्रम्लेच्छान् खतृतीयांशे समन्त्रिजनान्॥२९॥

मध्याह्ने नरपतिमध्यदेशहा शोभनश्च धान्यार्घः ।
तृणभुगमात्यान्तःपुरवैश्यघ्नः पञ्चमे खांशे ॥३०॥

स्त्रीशूद्रान् षष्ठेंऽशे दस्युप्रत्यन्तहाऽस्तमयकाले ।
यस्मिन् खांशे मोक्षस्तत्प्रोक्तानां शिवं भवति ॥३१॥

चन्द्रोऽर्को वाऽर्द्धोदितो यद्युपरक्तो भवति ग्रस्त इत्यर्थः। तदा नैकृतिकान्निषादान् सर्वयज्ञान् निःशेषान् यागांश्च हन्ति नाशयति। ग्राह्याद्दिनप्रमाणस्य सप्तभिर्भागमपहृत्य यल्लभ्यते तच्छास्त्रप्रमाणम्। अनेनाऽऽकाशमपि सप्तधाकृतं भवति।

स्पार्शिकं मौक्षिकं वान्यं कालं सप्तगुणं हरेत् ।
दिनमानेन यल्लब्धं खांशमानं युगस्य तत् ॥

एवं कृत्वा विचारयेत्। कस्मिन्नाकाशभागे प्रग्रहणं मोक्षो वा। तत्र यदाभ्युदित उद्गत एव चन्द्रः सूर्यो वा युगे प्रथमभागे। प्रथमदिनसप्तभागे यद्यर्कस्य चन्द्रस्य ग्रहणं भवति वा तदा स एवाकाशभागः प्रथम इत्यर्थः। तत्र ग्रस्तो दृश्यते तदाग्न्युपजीविनः सुवर्णकारप्रभृतयः। गुणाधिका गुणिनः। विप्रा ब्राह्मणाः। आश्रमिण आश्रमवासिनश्चैतान् हन्ति।

कर्षकाः कृषिकराः। पाखण्डिनो वेदबाह्याः। वणिजः क्रयविक्रयकारकाः। क्षत्रिया राजन्याः। बलनायकाः सेनापतयः। एतान् द्वितीयांशे द्वितीयभागे निहन्ति। कारुकाः शिल्पिनः। शूद्राः शूद्रजातयः। म्लेच्छा म्लेच्छजातयः। एतान् समन्त्रिजनान् मन्त्रिजनैः सह तृतीयेंऽशे तृतीय आकाशविभागे निहन्ति।

तथा मध्याह्ने चतुर्थे खांशे नरपतिमध्यदेशहा नरपतिं राजानं मध्यदेशं च निहन्ति मध्यदेशे यो राजा तमेव हन्ति। धान्यस्यार्घः शोभनो भवति सममर्घं धान्यं भवतीत्यर्थः। तृणभुजश्चतुष्पदान्। अमात्यान् मन्त्रिणः। अन्तःपुराणि राजदारान्। वैश्यान् वैश्यजातीयांश्च पञ्चमे खांशे आकाशभागे निहन्ति।

स्त्रीशूद्रानिति। स्त्रियो योषितः। शूद्राः शूद्रजातयः। एतान् षष्ठेंऽशे आकाशभागे निहन्ति। दस्यवश्चौराः। प्रत्यन्ता गह्वरवासिनः। एतानस्तमयकाले निहन्ति। यस्मिन् खांशे आकाशभागे मोक्षो भवति तत्प्रोक्तानामग्न्युपजीविप्रभृतीनां शिवं श्रेयो भवति। अथ यस्मिन्नंशे प्रग्रहस्तस्मिन् मोक्षस्तदा यदुक्तं फलं तन्न भवति शुभाशुभं समं स्यात्।

तथा च काश्यपः--

उदितास्तमितौ ग्रस्तौ सर्वसस्यक्षयङ्करौ।
सर्व[1]ग्रस्तौ यदा पश्येद्दुर्भिक्षं तत्र जायते॥
प्रथमांशे विप्रपीडा क्षत्रियाणां द्वितीयके।
शूद्राणां च तृतीयेंऽशे चतुर्थे मध्यदेशिनाम्॥
वैश्यानां पञ्चमे खांशे षष्ठांशे प्रमदाभयम्।
[2]दस्युप्रत्यन्तकम्लेच्छविनाशः सप्तमांशके॥
येषामंशे भवेन्मोक्ष[3]स्तज्जातानां शुभं भवेत्।

तथा च वृद्धगर्गः --

येषां सोमो युगे ग्रस्तो विमर्दो यत्र वा भवेत्।
तेषां पीडां विजानीयात् [4]मोक्षे शुभमथादिशेत्॥इति॥२८-३१॥

अथायनफलं दिक्फलं चाह श्लोकत्रयेण--

द्विजनृपतीनुदगयने विट्शूद्रान् दक्षिणायने हन्ति।
राहुरुदगादिदृष्टः प्रदक्षिणं हन्ति विप्रादीन्॥३२॥
म्लेच्छान् विदिक्स्थितो यायिनश्च हन्याद्भुताशसक्तांश्च।
सलिलचरदन्तिघाती याम्येनोदग्गवामशुभः॥३३॥
पूर्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्यः।
पश्चात् कर्षकसेवकबीजविनाशाय निर्दिष्टः॥३४॥

मकरादिराशिषट्कस्थेऽर्के उत्तरमयनम्। कर्कटादिराशिषट्कस्थेऽर्के क्षिणमयनमिति। उदगयने उत्तरायणे राहुर्दृष्टो द्विजान् ब्राह्मणान् नृपतीन् त्रियांश्च निहन्ति। तथा विट्शूद्रान् वैश्यान् शूद्रांश्च दक्षिणायने हन्ति घातयति। था च गर्गः--

उत्तरायणसन्दृष्टो ब्रह्मक्षत्रविनाशनः।
दक्षिणायनगो राहुर्वैश्यशूद्रविनाशनः॥

---

१. सर्वग्रस्तावर्कचन्द्रौ दुर्भिक्षक्षयकारकौ-इति अ० क० पु० पाठः।
२. दस्युप्रत्यन्तिका म्लेच्छाः पीडयन्ते सप्तमांशके-इति अ० क० पु० पाठः।
३. तत्प्रोक्तानाम्-इति अ० क० पु० पाठः।
४. मोक्षे तु शुभमादिशेत्-इति अ० क० पु० पाठः।

राहुरुदगादिदृष्ट इति। उदगादिषूत्तराद्यासु चतसृषु दिक्षु प्रदक्षिणेन राहुर्दृष्टो विप्रादीन् ब्राह्मणादीन् हन्ति। एतदुक्तं भवति—सूर्ये चन्द्रे वा यद्युत्तरस्यां दिशि राहुः प्रग्रहणं करोति तदा ब्राह्मणान् हन्ति। पूर्वस्यां दृष्टः क्षत्रियान् निहन्ति। दक्षिणस्यां दृष्टो वैश्यान् हन्ति। पश्चिमायां दृष्टः शूद्रान्निहन्ति। [1]अत्र यद्यप्यर्क-चन्द्रयोर्दक्षिणोत्तरदिग्भागात् प्रग्रहणं न सम्भवति, तथाप्याचार्येण पूर्वशास्त्रदृष्ट-त्वात् कृतम्। तथा च काश्यपः—

सौम्यायामागतो विप्रान् पूर्वस्यां [2]क्षत्रजातयः ।
वैश्यान् दक्षिणतो राहुर्हन्ति पश्चिमतोऽपरान् ॥

तथा च पराशरः—

उदक्प्राग्दक्षिणप्रत्यग् ब्राह्मणक्षत्रियविट्शूद्रोच्छेदनायाऽऽनुपूर्व्याऽपि च॥

म्लेच्छान् विदिक्स्थित इति। विदिक्स्थितो राहुः। ऐशान्याग्नेयनैर्ऋत्य-वायव्येषु स्थित इत्यर्थः। म्लेच्छान् म्लेच्छजनांस्तथा यायिनः प्रोद्यतान्। हुताश-

---

१. अत्र—

नन्वत्र यदुक्तमुदगादिदृष्टो राहुः प्रदक्षिणं विप्रादीन् निहन्ति तदुत्तरदक्षिणदिग्भागात् कदाचिदपि रविशशिनोः प्रग्रहणमोक्षौ न भवतस्तत्किमुक्तमेतदसत्यं गणितगोल विरुद्धमिति। अत्रोच्यते—पूर्वशास्त्रेषु भगवत्पराशरगर्गादिविरचितेषु दृश्यते। तैश्चौत्पातिकं पर्वाधिकृत्योक्तं फलमेतत्। यथा च पराशरः—"अपर्वणि शशाङ्कार्कौ" इति। तदेव पूर्वशास्त्रदृष्टत्वादाचार्येणाप्युक्तमिति। यतस्तस्य प्रतिज्ञेयम्—

ज्यौतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम् ।
स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये ॥

इति अ० क० पु० अधिकः पाठः।

भट्टोत्पलस्यायं प्रामादिको लेखो गोलयुक्त्या षट्षष्टिपललवदेशेषु दक्षिणोत्तरयोः प्रग्रहणसम्भवात्। अत एव सिद्धान्तशिरोमणौ गणिताध्याये भास्कराचार्याः—

यत्राक्षोऽङ्गरसा लवा दिनमणेस्तत्रोदयं गच्छतो
मेषे वा वृषभेऽपि वाप्यनिमिषे कुम्भे स्थितस्यापि वा।
स्पर्शो दक्षिणतस्तदा क्षितिजवत् स्यात् क्रान्तिवृत्तं यत-
स्तद्ब्रूह्युत्क्रमजीवयात्र वलनं व्यासार्द्धतुल्यं कथम्॥

इति प्राहुः।

षट्षष्टिपलाधिकदेशा नृगोचरा न। अतस्तदल्पपललवदेशेषु भट्टोत्पलव्याख्यानं समीचीनं भवतीति।

२. ये क्षत्रजातयस्तान् हन्तीति व्याख्याऽऽर्षवचनस्य कार्या।

सक्तानग्निरतानग्निहोत्रिणो हन्यात्। दक्षिणोत्तरयोः पुनरपि विशेषमाह––सलिलचरेति। याम्येन दक्षिणेन दृष्टः सलिलचरान् जलचरान् तथा दन्तिनो हस्तिनो घातयति हन्ति। उदगुत्तरेण दृष्टो गवामशुभः क्षयकृत्।

अथ पूर्वपश्चिमयोर्दिशोः पुनरपि विशेषफलमाह––पूर्वेणेति। दैत्यो राहुः पूर्वेण पूर्वस्यां दिशि समागतो दृष्टो वसुधां भूमिं सलिलपूर्णां तोयपूर्णां करोति। पश्चादागतः कर्षकाणां कृषिकाराणां सेवकानां पराऽऽराधनरतानां बीजानां च विनाशाय निर्दिष्ट उक्तः। उप्यन्ते यानि तानि बीजानि। तथा च काश्यपः––

पूर्वे सलिलघाती स्यात् पश्चाद्धान्यकृषीवलान्।
याम्ये जलचरान् हन्ति सौम्ये गोनाशकः स्मृतः॥
म्लेच्छान् यायिनृपान् हन्ति विदिक्स्थः सिंहिकासुतः॥इति।

तथा च समाससंहितायाम्––

उदगादिषु दिक्ष्वशुभो विप्रादीनां सितादिवर्णस्य।
विदिगादिगतो हन्याद्राहुर्म्लेच्छान् सविजिगीषून्॥
द्विजराजन्यान् हन्यादुदगयने दक्षिणे तु विट्शूद्रान्।
समरामयाय राहुर्यदि पक्षान्ते पुनर्दृश्यः॥इति॥३२–३४॥

अथ चन्द्रार्कयोर्मेषादिषु राशिषु ग्रस्तयोः फलान्याह––

पाञ्चालकलिङ्गशूरसेनाः काम्बोजोड्रकिरातशस्त्रवार्त्ताः।
जीवन्ति च ये हुताशवृत्त्या ते पीडामुपयान्ति मेषसंस्थे॥३५॥

पाञ्चालाः पाञ्चालजनाः, कलिङ्गाः, शूरसेनाः, काम्बोजाः, उड्राः, किराता एते सर्वे जनाः। तथा शस्त्रवार्ताः शस्त्रवृत्तयः शस्त्रं वर्तनं येषाम्। ये च हुताशवृत्त्या अग्निवृत्त्या च जीवन्ति सुवर्णकारादयः। ते सर्वे पीडामुपयान्ति प्राप्नुवन्ति मेषसंस्थितेऽर्के चन्द्रे वा ग्रस्ते॥३५॥

अथ वृष आह––

गोपाः पशवोऽथ गोमिनो मनुजा ये च महत्त्वमागताः।
पीडामुपयान्ति भास्करे ग्रस्ते शीतकरेऽथवा वृषे॥३६॥

गाः पान्ति रक्षन्तीति गोपाः। पशवश्चतुष्पदाः। गोमिनो गोमन्तो गावो विद्यन्ते येषां ते। [1]ज्योत्स्नातमिस्रेति गोमिन्शब्दः। ये च मनुजा मनुष्या महत्त्व-

---

१. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्वानूर्जस्वलगोमिन्मलिनमलीमसाः (५।२।११४) इति पाणिनिसूत्रेण सूत्रस्थाः शब्दा मत्वर्थे निपात्यन्ते।

मागताः पूज्यतां प्राप्तास्ते सर्व एव भास्करे सूर्ये शीतकरे चन्द्रे वा वृषस्थे ग्रस्ते पीडामुपयान्ति प्राप्नुवन्ति ॥३६॥

मिथुन आह--

मिथुने प्रवराङ्गना नृपा नृपमात्रा बलिनः कलाविदः ।
यमुनातटजाः सबाह्लिका मत्स्याः सुह्मजनैः समन्विताः ॥३७॥

प्रवराङ्गनाः प्रधानस्त्रियः । नृपा राजानः । नृपमात्रा नृपसदृशा अमात्याः । बलिनः प्राणिनः । कलाविदश्चित्रगीतनृत्यवाद्याभिज्ञाः । यमुना नदी तस्यास्तटे तीरे ये जातास्ते च सबाह्लिका बाह्लिकैर्जनैः सहिताः । तथा मत्स्या जनास्ते च सुह्मजनैः समन्विताः सहिता एते सर्व एव मिथुनस्थे सूर्ये चन्द्रे वा ग्रस्ते पीडामुपयान्ति ॥३७॥

कर्कटक आह--

आभीराञ्छबरान् सपल्लवान्
मल्लान् मत्स्यकुरूञ्छकानपि ।
पाञ्चालान् विकलांश्च पीडय-
त्यन्नं चापि निहन्ति कर्कटे ॥३८॥

आभीरान् जनान्, शबरानपि जनांश्च, सपल्लवान् पल्लवैर्जनैः सहितान्, मल्लान् बाहुयुद्धज्ञान्, मत्स्यान्, कुरूंश्च, शकानपि, पाञ्चालानपि, विकलानङ्गहीनान् एतान् सर्वानेव जनान् पीडयत्युपतापयति तथाऽन्नं च निहन्ति धान्यमहार्घाधिक्यं भवतीति कर्कटे यद्यर्कचन्द्रौ ग्रस्तौ भवतः ॥३८॥

सिंहकन्ययोराह--

सिंहे पुलिन्दगणमेकलसत्त्वयुक्तान्
राजोपमान्नरपतीन् वनगोचरांश्च ।
षष्ठे तु सस्यकविलेखकगेयसक्तान्
हन्त्यश्मकत्रिपुरशालियुतांश्च देशान् ॥३९॥

पुलिन्दा निषादा जनाः, गणाः समूहाः, मेकला जनाः, सत्त्वयुक्ताः सत्त्वप्रधानाः, राजोपमा राजन्यतुल्या वित्तप्रतिपत्तियुक्ताः, नरपतयो राजानः, वनगोचरा वनमरण्यं गोचरो विषयो येषां ते वनगोचरा वनवासिन इत्यर्थः । एतान् सिंहे हन्ति ।

षष्ठ इति। सस्यानि प्रसिद्धानि, कवयः पण्डिताः, लेखका लेखज्ञाः, गेयसक्ता गेयरताः, अश्मका जनाः, त्रिपुरा देशाः, शालियुता देशा येषु शालयो धान्यानि बहूनि भवन्ति, एतान् सर्वान् षष्ठे कन्यायां हन्ति ॥३९॥

अथ तुलावृश्चिकयोराह—

तुलाधरेऽवन्त्यपरान्त्यसाधून्
वणिग्दशार्णान् मरुकच्छपांश्च ।
अलिन्यथोदुम्बरमद्रचोलान्
द्रुमान् सयौधेयविषायुधीयान् ॥४०॥

अवन्ती आवन्त्या जनाः, अपरान्त्या जना एव, साधवः सज्जनाः, वणिजः [1]किराटाः, दशार्णा जना एतान् मरुकच्छपाञ्जनांश्च, एतान् सर्वान् तुलाधरे तुले हन्ति।

अलिन्यथेति, उदुम्बरा जनाः, मद्राः, चोला एतानपि जनान्, द्रुमान् वृक्षान्, यौधेयान् जनान्, विषायुधीयान् विषमायुधं येषां तान् सह यौधेयैर्विषायुधीयान् एतानलिनि वृश्चिके हन्ति ॥४०॥

अथ धनुर्मकरयोराह—

धन्विन्यमात्यवरवाजिविदेहमल्लान्
पाञ्चालवैद्यवणिजो विषमायुधज्ञान् ।
हन्यान्मृगे तु झषमन्त्रिकुलानि नीचान्
मन्त्रौषधीषु कुशलान् स्थविरायुधीयान् ॥४१॥

अमात्या मन्त्रिणः, वराः प्रधानाः, अथवाऽमात्यवराः प्रधानाः, वाजिनोऽश्वाः, विदेहा जनाः, मल्ला बाहुयुद्धज्ञाः, पाञ्चाला जनाः, वैद्याः कायचिकित्सकाः, वणिजः क्रयविक्रयिणः, विषमाः क्रूराः, आयुधज्ञा आयुधवेत्तार एतान् धन्विनि हन्यात्।

हन्यान्मृगे त्विति। झषा मत्स्याः, मन्त्रिणश्चाणक्यविदः सचिवाः, कुलानि वंशाः, अथवा मन्त्रिणां सचिवानां कुलानि, नीचा अधमकर्मकराः, एतान्

---

१. कतिपयपुस्तकेषु किराटस्थाने किरात इत्युपलभ्यते। व्याकरणेन पदद्वयस्य साधुत्वं भवति।

तथा मन्त्रौषधीषु च कुशलान् मन्त्रेषु शैववैष्णवसौरेषु औषधीषु च कुशलान् शक्तान्, स्थविरान् वृद्धान्, आयुधीयानायुधजीविन एतान् मृगे मकरे हन्याद् ॥४१॥

अथ कुम्भमीनयोराह--

कुम्भेऽन्तर्गिरिजान् [1]सपश्चिमजनान् भारोद्वहांस्तस्करा-
नाभीरान् दरदाऽऽर्यसिंहपुरकान् हन्यात्तथा बर्बरान् ।
मीने सागरकूलसागरजलद्रव्याणि [2]वन्यान् जनान्
प्राज्ञान् वार्युपजीविनश्च भफलं कूर्मोपदेशाद्वदेत् ॥४२॥

अन्तर्मध्ये गिरौ पर्वते जाता अन्तर्गिरिजास्तान् पर्वतमध्यजातान् जनान् सपश्चिमजनान् पश्चिमदिग्वासिभिर्जनैः सह। केचिदन्तर्गिरिजान् स पश्चिमानिति पठन्ति। गिरेरन्तरे जातान् जनान् पश्चिमजनान् पश्चिमदिग्वासिनः। प्राक्पाठोऽत्र शोभनः। भारोद्वहान् भारवाहिनः, तस्करान् चौरान्, आभीरान् जनान्, दरदान् जनानेव, आर्यान् प्रधानजनान्, सिंहपुरकान्, बर्बरान् जनान् तथा तेनैव प्रकारेण एतान् सर्वान् कुम्भे हन्यात्।

सागरकूलं समुद्रतटम्। सागरजलद्रव्याणि समुद्रोत्पन्नानि द्रव्याणि रत्नादीनि। [3]वन्यान् वनभवान् जनान्, प्राज्ञान् बुद्धियुक्तान्, वार्युपजीविनो जलोपजीविनः, उदकविक्रयेण जीवन्ति ये एतान् मीने हन्यात्। भफलं नक्षत्रफलं कूर्मोपदेशात् कूर्मविभागकथितात् वदेद् ब्रूयात्। यन्नक्षत्रस्थावर्कचन्द्रौ ग्रहणसमये भवतस्तन्नक्षत्रं कूर्मविभागेन यस्मिन् देशे उक्तं तज्जनानां पीडा भवति। तच्च वक्ष्यति--

[4]नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा ।
भारतवर्षे मध्यात् प्रागादिविभाजिता देशाः ॥इति।

तथा च पराशरः--

अथ कृत्तिकासु कलिङ्गानामधिपतीन् पीडयति। रोहिण्यां हृच्छस्त्रकोपैः प्रजानाम्, मृगशिरसि सालनिषादकैकयान्, आर्द्रायां शुकान् कुकुरान् पल्वलोप-

---

१. स पश्चिमजनान्--इति पाठान्तरम्।
२. मान्यानिति-अ० क० पु० पाठः।
३. मान्यान् पूज्यान्। केचिद्वन्यान् जनानिति पठन्ति। वने भवा वन्यास्तान्। पूर्वपाठ एव श्रेयानिति अ० क० पु० अधिकः पाठः।
४. बृहत्संहितायाम् १४ अध्यायस्य १ श्लोकः।

जीविनश्च। पुनर्वसौ पण्यान् रुरुकर्पासं च। पुष्ये गोमतिसिन्धुसौवीरकुरुपाञ्चालान्। सार्पे काशिकलिङ्गसिंहलकराजन्यान्। पित्र्ये दण्डकनिवासिनः पितृधान्यं च। भाग्ये सुभगान् काम्बोजान् सुराष्ट्राधिपतींश्च। अर्यम्णे मगधान् यवनान्। हस्ते दशार्णान्। त्वाष्ट्रे मद्रान् कुरुक्षेत्रं च। वायव्ये काश्मीरोशीनरान् वाजिनश्च। विशाखायां वृक्षाश्मकान्। मैत्रे काशिकोशलान्। ज्येष्ठायां ज्येष्ठनृपतीन् दरदांश्च। मूले क्षुद्रमालवकयौधेयान्। आप्ये पञ्चनदान् सुवीराधिपतिं च। वैश्वदेवे आर्जुनायनपौण्ड्रशिबिमालवान्। श्रवणे सत्त्वावतंसकांश्च। वासवे धनिनः शकानण्डजांश्च। वारुणे कैकयपाञ्चालराजांश्च। अजे वङ्गमगधकुकुरान्। अहिर्बुध्नेऽश्मकेक्षुक्षुद्रकत्रिगर्त्तान्। पौष्णे च वैदेहानर्त्तकसिन्धुसौवीरान्। आश्विनेऽश्वानश्वजीविनश्च। याम्ये कलिङ्गान् दक्षिणानुपतापयति। तथा च समाससंहितायाम्--

कूर्मविभागेन वदेत् पीडां देशस्य वीक्ष्य नक्षत्रम्।
सहितं ग्रहणं येन तद्देशश्चाप्नुयात् पीडाम् ॥ इति ॥४२॥

अथार्कशशिनोर्दश ग्रासा भवन्ति तेषां संज्ञामाह--

सव्यापसव्यलेहग्रसननिरोधावमर्दनारोहाः।
आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः ॥४३॥

सव्यः, अपसव्यः, लेहः, ग्रसनम्, निरोधः, अवमर्दनम्, आरोहः, आघ्रातम्, मध्यतमः, तमोऽन्त्य इत्येवं प्रकारास्ते दश ग्रासा इति ॥४३॥

अथैतेषां लक्षणानि सफलानि। तत्र सव्यापसव्ययोराह--

सव्यगते तमसि जगज्जलप्लुतं भवति मुदितमभयं च।
अपसव्ये नरपतितस्करावमर्दैः प्रजानाशः ॥४४॥

तमसि राहौ सव्यगते चन्द्रस्यार्कस्य वा दक्षिणभागगते जगज्जलप्लुतं वारिणा प्लावितं मुदितं हृष्टमभयं भयरहितं च भवति। अपसव्ये वामभागगते राहौ नरपते राज्ञस्तस्कराणां चौराणामवमर्दैः पीडनैः प्रजानाशः संक्षयो भवति।

अथ चन्द्रग्रहणे आग्नेय्यां राहोरागमनं सव्यः। ऐशान्यामपसव्यः। अर्कग्रहणे वायव्ये सव्यो नैर्ऋत्यामपसव्य इति ॥४४॥

अथ लेहस्याह--

जिह्वोपलेढि परितस्तिमिरनुदो मण्डलं यदि स लेहः।
प्रमुदितसमस्तभूता प्रभूततोया च तत्र मही ॥४५॥

तिमिरनुदः। चन्द्रस्यार्कस्य वा तिमिरमन्धकारं नुदति प्रेरयतीति तिमिरनुदस्तस्य परितः सभन्ततो मण्डलं बिम्बं जिह्वोपलेढि, जिह्वया रसनयोपलीढमिव दृश्यते तथा स ग्रासो लेह इति। तत्र तस्मिन् ग्रासे मही भूः प्रमुदितसभस्तभूता प्रकर्षेण मुदिता हर्षिताः समस्ता भूता जना यस्यां तथा प्रभूततोया वारिबहुला च भवति ॥४५॥

अथ ग्रसनस्याह--

ग्रसनमिति यदा त्र्यंशः पादो वा गृह्यतेऽथवाऽप्यर्द्धम् ।
स्फीतनृपवित्तहानिः पीडा च स्फीतदेशानाम् ॥४६॥

त्र्यंशस्त्रिभागः। पादश्चतुर्भागः। अर्द्धं वा बिम्बार्द्धं गृह्यते तमसाऽऽच्छाद्यते तदा स ग्रासो ग्रसनमिति। तस्मिन् ग्रासे स्फीतानामतिविभवयुक्तानां नृपाणां राज्ञां वित्तहानिर्धननाशो भवति। तथा स्फीतानां सधनानां च देशानां पीडा भवति ॥४६॥

अथ निरोधस्याह--

पर्यन्तेषु गृहीत्वा मध्ये पिण्डीकृतं तमस्तिष्ठेत् ।
स निरोधो विज्ञेयः प्रमोदकृत् सर्वभूतानाम् ॥४७॥

तमो राहुः पर्यन्तेषु गृहीत्वा सभन्ततः संछाद्य मध्ये मध्यभागे पिण्डीकृतं घनतरं भूत्वा यदि तिष्ठेत्तदा स ग्रासो निरोधसंज्ञो विज्ञेयो ज्ञातव्यः। स च सर्वभूतानां निःशेषप्राणिनां प्रमोदकृत् हर्षकृत् ॥४७॥

अथावमर्दनमाह --

अवमर्दनमिति निःशेषमेव सञ्छाद्य यदि चिरं तिष्ठेत् ।
हन्यात् प्रधानभूपान् प्रधानदेशांश्च तिमिरमयः ॥४८॥

तिमिरमयो राहुर्निःशेषं सभग्रमेव मण्डलं सञ्छाद्य स्थगयित्वा यदि चिरं बहुकालं तिष्ठेत् तदाऽवमर्दनं नाम ग्रासस्तेन ग्रासेन प्रधानभूपान् प्रधानान् नृपान् प्रधानांश्च देशान् हन्याद् घातयेत् ॥४८॥

अथाऽऽरोहणस्याह--

वृत्ते ग्रहे यदि तमस्तत्क्षणमावृत्य दृश्यते भूयः ।
आरोहणमित्यन्योऽन्यमर्दनैर्भयकरं राज्ञाम् ॥४९॥

ग्रहे ग्रहणे वृत्ते निवृत्तेऽतिक्रान्ते भूयः पुनर्यदि चेत्तमो राहुस्तत्क्षणमावृत्य पुनश्छादयन् तिष्ठेत् तदाऽऽरोहणं नाम ग्रासः। तच्च राज्ञां नृपाणामन्योऽन्यमर्दनैः परस्परावमर्दनैर्भयं भीतिं करोति। इतिशब्दः प्रकारार्थे। एतदौत्पातिकम्। यतो नोत्पद्यते गणितगोलवासनया। आचार्येण पूर्वशास्त्रानुसारेणोक्तम् ॥४९॥

अथाऽघ्रातस्याह--

दर्पण इवैकदेशे सबाष्पनिःश्वासमारुतोपहतः ।
दृश्येताऽऽघ्रातं तत् सुवृष्टिवृद्ध्यावहं जगतः ॥५०॥

दर्पण आदर्श इवैकदेशे एकस्मिन् स्थाने सबाष्पेण सोष्मणा निःश्वासमारुतेन श्वासवायुना चोपहतो दृश्येतावलोक्येत तदाऽऽघ्रातं नाम ग्रासः। तच्च जगतः सुवृष्टिवृद्ध्यावहं शोभनां वृष्टिं वृद्धिं च वहति जगतो जनपदस्य ॥५०॥

अथ मध्यतमस आह----

मध्ये तमः प्रविष्टं वितमस्कं मण्डलं च यदि परितः ।
तन्मध्यदेशनाशं करोति कुक्ष्यामयभयं च ॥५१॥

तमो राहुर्मध्येऽन्तर्यदि प्रविष्टो दृश्यते परितः समन्ततो मण्डलं वितमस्कं तमोरहितं निर्मलं भवति तदा ग्रासो मध्यतमो नाम। तच्च मध्यदेशस्य नाशं विघातं करोति तथा कुक्ष्यामयभयं कुक्षिरोगभयं च।

अस्य ग्रासस्य संस्थानमर्कग्रहण एव सम्भवति छादकस्येन्दोरल्पत्वात्। चन्द्रग्रहणे छाद्यस्याल्पत्वाच्छादकस्य च भूच्छायाया महत्त्वान्न सम्भवति ॥५१॥

अथ तमोऽन्त्याख्यस्याह--

पर्य्यन्तेष्वतिबहुलं स्वल्पं मध्ये तमस्तमोऽन्त्याख्ये ।
सस्यानामीतिभयं भयमस्मिंस्तस्करााणां च ॥५२॥

तमः पर्यन्तेषु बिम्बपरिध्यन्तभागेषु। अतिबहुलमतिघनं मध्ये मध्यभागे स्वल्पमत्यल्पं दृश्यते तदा स ग्रासस्तमोऽन्त्याख्यो नाम। अस्मिंस्तमोऽन्त्याख्ये ग्रासे सस्यानामीतिभयं भवति। ईतयः सस्योपद्रवाः। तथा च--

अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ।
अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥

आभ्यः सस्यानां भयं तथा तस्कराणां चौराणां भयं भवति। चौरकृता भीतिर्भवतीत्यर्थः। तथा च पराशरः—

तद्यथा—देशोपप्लवा ग्रसनारोहणोपघ्रातोन्मर्दननिरोधपरिलेहनापसव्य-सव्यान्तर्मध्यतम उपप्लवाश्च। तत्रार्धत्रिभागग्रहणं ग्रसनं प्रख्यातनृपतिविप्रच्युताय। मण्डलमध्ये ग्रहावर्त्तनमारोहणं नरपतिक्षोभकरं प्रजानाशनम्। ईषद्ग्रहणमुपघ्रातं जगद्धिताय। उन्मर्दनं चिरमर्केन्दुसकलमण्डलाक्रमणं प्रजाविद्रवकरम्। सर्वमण्डल-धूमावरणं निरोधस्तदरोगक्षेमसुभिक्षलक्षणम्। समन्ताद् जिह्वयेवाभिलेहनं परिलेहनं समानफलम्। पूर्वेण दक्षिणमपसव्यं प्रजाभयाय। अप्रदक्षिणं सव्यमभयाय। मण्डलान्तर्मध्ययोर्ग्रहणमन्तर्मध्यं नृपतिक्षोभकरम्। महातमसाऽऽवरणं तम उपप्लवः परस्परं म्लेच्छसङ्गरकृदिति।

तथा च कश्यपः—

सव्यगे तु सुभिक्षं स्यादपसव्ये तु तस्कराः।
लीढे प्रजाः प्रहृष्टाः स्युर्ग्रसनं लोकनाशनम्॥
निरोधे जनहर्षः स्यादारोहे नृपसंक्षयः।
आमर्दितं चापमर्दे स्वयं क्षुभ्यन्ति पार्थिवाः॥
स्वच्छं वर्णप्रदेशं यदाघ्रातं तद्विघातयेत्।
मध्ये तमसि सन्दृष्टे पीडयेद् मध्यदेशजान्॥
दृष्टे तमसि पर्यन्ते सस्यानामीतिजं भयम्॥ इति॥ ५२॥

अथ राहोर्वर्णान् वक्तुकाम आह—

श्वेते क्षेमसुभिक्षं ब्राह्मणपीडां च निर्दिशेद्राहौ।
अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम्॥५३॥

हरिते रोगोल्बणता सस्यानामीतिभिश्च विध्वंसः।
कपिले। शीघ्रगसत्त्वम्लेच्छध्वंसोऽथ दुर्भिक्षम्॥५४॥

अरुणकिरणानुरूपे दुर्भिक्षावृष्टयो विहगपीडा।
आधूम्रे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिं च॥५५॥

कापोतारुणकपिलश्यावाभे क्षुद्भयं विनिर्देश्यम्।
कापोतः शूद्राणां व्याधिकरः कृष्णवर्णश्च॥५६॥

विमलकमणिपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय ।
सार्चिष्मत्यग्निभयं गैरिकरूपे तु युद्धानि ॥५७॥

दूर्वाकाण्डश्यामे हारिद्रे वापि निर्दिशेन्मरकम् ।
अशनिभयसम्प्रदायी पाटलकुसुमोपमो राहुः ॥५८॥

पांशुविलोहितरूपः क्षत्रध्वंसाय भवति वृष्टेश्च ।
बालरविकमलसुरचापरूपभृच्छस्त्रकोपाय ॥५९॥

राहौ तमसि श्वेते शुक्लवर्णे दृष्टे क्षेमसुभिक्षं ब्राह्मणानां च पीडां विनिर्दिशेत्। अग्निवर्णेऽनलवर्णे अग्निसदृशे अग्निभयं हुताशभीतिस्तथा हुताशवृत्तीनामग्निवार्त्तानां लोहकारसुवर्णकारादीनां पीडा भवति।

हरित इति। हरिते हरितवर्णे शुकाभे राहौ रोगाणामुल्बणता रोगप्राचुर्यम्। सस्यानामीतिभिरतिवृष्टिप्रभृतिभिरुपद्रवैश्च विध्वंसो विनाशो भवति। कपिले पिङ्गलाभे राहौ शीघ्रगाणां सत्त्वानामुष्ट्रादीनां तथा म्लेच्छानां ध्वंसो विनाशो दुर्भिक्षं च भवति। अथशब्दः स्वार्थे।

अरुणकिरणानुरूपे अरुणरश्मिसदृशे ईषल्लोहितवर्णे इत्यर्थः। दुर्भिक्षावृष्टयो भवन्ति। विहगानां पक्षिणां च पीडा भवति। आधूम्रे धूम्रवर्णे क्षेमं सुभिक्षं चादिशेत्। मन्दां स्वल्पां च वृष्टिमादिशेत्।

कापोतः कपोतवर्णः, तस्मिंस्तथा अरुणे लोहितवर्णे। कपिले कपिलवर्णे। श्यावे श्यामवर्णे क्षुद्भयं दुर्भिक्षभयं विनिर्द्देश्यं वक्तव्यम्। कापोतः कपोतवर्णः कृष्णवर्णश्च शूद्राणां व्याधिकरः पीडावहः।

विमलकमणेरिव पीता आभा कान्तिर्यस्य स विमलकमणिपीताभः, नीलपीत इत्यर्थः। एवंविधे वैश्यध्वंसी वैश्यहन्ता भवेत् स्यात्। सुभिक्षाय भवेत् सुभिक्षकृद्भवेत्। सार्चिष्मति सज्वाले राहावग्निभयं भवति। तथा गैरिकरूपे गैरिकसदृशे युद्धानि संग्रामा भवन्ति।

दूर्वाकाण्डश्यामे दूर्वाकाण्डवत् श्यामे शाद्वलप्रणालतुल्यवर्णे हारिद्रे वा अतिपीतवर्णे मरकं निर्दिशेद्वदेत्। राहुर्यदि पाटलकुसुमोपमः पाटलपुष्पसदृशः श्वेतलोहित इत्यर्थः। तथाभूतोऽशनिभयसम्प्रदायी अशनिभयं ददाति।

पांशुरूपो विलोहितरूपश्च व्यामिश्रवर्णः क्षत्रध्वंसाय क्षत्रियाणां नाशाय वृष्टेश्च नाशाय भवति। तथा बालरवेर्बलिार्कस्य कमलस्य पद्मस्य च सुरचापस्येन्द्रधनुषः सदृशं तुल्यं रूपं कान्तिं यदा बिभर्त्ति धारयति तदा शस्त्रकोपाय भवति शस्त्रकोपं करोति। युद्धानि भवन्तीत्यर्थः।

तथा च पराशरः--

वर्णः कृष्णकपोतोऽतिवर्षाय शूद्रकुक्षिरोगाय तिलतोयवृद्धये दैत्यनाशाय च। पांशुधूमलोहितः क्षत्रियविनाशाय। बालार्कांशुकपिलो दुर्भिक्षाय। हारिद्रो व्याधये। दूर्वाङ्कुरसदृशो जनमरकाय। पाटलकुसुमसन्निकाशोऽशनिभयदो भवतीति ॥५३-५९॥

अधुनार्कचन्द्रयोर्ग्रहदृष्टिफलान्याह--

पश्यन् ग्रस्तं सौम्यो घृतमधुतैलक्षयाय राज्ञां च ।
भौमः समरविमर्दं शिखिकोपं तस्करभयं च ॥६०॥
शुक्रः सस्यविमर्दं नानाक्लेशांश्च जनयति धरित्र्याम् ।
रविजः करोत्यवृष्टिं दुर्भिक्षं तस्करभयं च ॥६१॥

सौम्यो बुधो ग्रस्तमर्कं चन्द्रं वा पश्यति तदा घृतमधुतैलानां राज्ञां नृपाणां च क्षयाय नाशाय भवति। भौमश्चेत् पश्यति तदा समरविमर्दं युद्धं शिखिकोपमग्निप्रकोपं तस्करभयं चौरभयं च करोति ॥६०॥

शुक्रश्चेत् पश्यति तदा सस्यविमर्दं सस्यविनाशं धरित्र्यां भूमौ नानाक्लेशान् अनेकान् कृच्छ्रान् जनयत्युत्पादयति। रविजः सौरिश्चेत् पश्यति तदाऽवृष्टिमवर्षणं दुर्भिक्षं तस्करभयं चौरभीतिं च करोति ॥६१॥

अधुना शुभदृष्टेः प्रशंसार्थमाह--

यदशुभमवलोकनाभिरुक्तं
ग्रहजनितं ग्रहणे प्रमोक्षणे वा ।
सुरपतिगुरुणावलोकिते त-
च्छममुपयाति जलैरिवाग्निरिद्धः ॥६२॥

पश्यन् ग्रस्तं सौम्य इत्यादिकाभिरवलोकनाभिर्दृष्टिभिर्ग्रहजनितं ग्रहोत्पादितं यदुक्तमशुभं फलं ग्रहणकाले वा तत्सर्वं सुरपतिगुरुणा बृहस्पतिनाऽवलोकिते दृष्टे शमं शान्तिमुपयाति गच्छति। यथा जलैरम्बुभिरिद्धः प्रज्वलितोऽग्निर्हुतवह इति। ग्रहणे प्रमोक्षणे वेत्यत्र विकल्पः कृतः। यदि कदाचिद् ग्रहणकाले योऽसौ दृश्यो द्रष्टा च ग्रहः स एव राश्यन्तरं संक्रामति, तदा तानि फलानि न भवन्ति। तेन ग्रहणे मोक्षान्तदृष्टिफलमभिमतमिति ॥६२॥

अथ प्रग्रहणकालाद् मोक्षान्तं यावद् ग्रहणसमयस्तन्मध्ये उत्पातैर्दृष्टैरन्यस्य ग्रहणस्य परिज्ञानमाह--

ग्रस्ते क्रमान्निमित्तैः पुनर्ग्रहो मासषट्कपरिवृद्धया ।
पवनोल्कापातरजः क्षितिकम्पतमोऽशनिनिपातैः ॥६३॥

अर्के चन्द्रे वा ग्रस्ते गृहीते सति यद्येत उत्पाता दृश्यन्ते तदा पुनर्भूयो मासषट्कपरिवृद्धया षड्भिः षड्भिर्मासैर्ग्रहणं भवति। तद्यथा--प्रग्रहणकाले यदि पवनो वायुर्भवति तदा तेनोत्पातेन पुनः षड्भिर्मासैर्ग्रहणं भवति। एवमुल्कापातेन द्वादशभिः। रजसा पांशुवर्षेणाष्टादशभिः। क्षितिकम्पेन भूचलनेन मासचतुर्विंशत्या तमसा मासत्रिंशता। अशनिपातेन मासषट्त्रिंशता। तथा च पराशरः--

उपरक्ते यदा 'सूर्ये प्रबलाद्वाति मारुतः ।
मासषट्के तदा विन्द्याद्राहोरागमनं ध्रुवम् ॥
उल्कायां द्वादशे मासे रजसाष्टादशे तथा ।
भूकम्पे च चतुर्विंशे त्रिंशे तमसि निर्दिशेत् ॥
षट्त्रिंशेऽशनिपाते स्यात् सर्वेषु स्यात् षडुत्तरे ॥इति ॥६३॥

अधुना भौमादीनां ग्रस्तानां फलमाह--

आवन्तिका जनपदाः कावेरीनर्मदातटाश्रयिणः ।
दृप्ताश्च मनुजपतयः पीड्यन्ते क्षितिसुते ग्रस्ते ॥६४॥

अत्रादौ तावत्ताराग्रहाणां ग्रस्तत्वं व्याख्यायते--

यो ग्रहोऽर्केण चन्द्रेण वा सहैकराशौ भवति तत्र चेति विक्षिप्तो न भवति, तदा छादनात् ग्राहकस्य ग्रस्त इत्युच्यते। एवं क्षितिसुतेऽङ्गारके ग्रस्ते आवन्तिका इत्यवन्तिदेशभवा जनपदाः। तथा कावेरी नदी नर्मदा च तयोस्तटं तीरं ये सभाश्रितास्तन्निवासिनः। तथा दृप्ता दर्पिष्ठा ये मनुजपतयो मनुष्याणां मनुजानां पतयो राजानः, एते सर्व एव पीड्यन्ते ॥४६॥

अथ बुधस्याह--

अन्तर्वेदीं सरयूं नेपालं पूर्वसागरं शोणम् ।
स्त्रीनृपयोधकुमारान् सह विद्वद्भिर्बुधो हन्ति ॥६५॥

अन्तर्वेदी गङ्गायमुनयोर्मध्यम्। सरयू पूर्वनदी। नेपालदेशः। पूर्वसागरः पूर्वसमुद्रः। शोणो नदः। स्त्रियो योषितः। नृपा राजानः। योधाः संग्राम-

१. चन्द्रे-इति अ० क० पु० पाठः।

कुशलाः। कुमारा बालाः। प्रथमवयसश्च। एतान् सर्वान् विद्वद्भिः पण्डितैः सह बुधो ग्रस्तो हन्ति घातयन्ति ॥६५॥

अथ जीवस्याह--

ग्रहणोपगते जीवे विद्वन्नृपेमन्त्रिगजहयध्वंसः।
सिन्धुतटवासिनामप्युदग्दिशं संश्रितानां च ॥६६॥

जीवे बृहस्पतौ ग्रहणोपगते ग्रहणं प्राप्ते विदुषां पण्डितानां नृपाणां राज्ञां मन्त्रिणां सचिवानां गजानां हस्तिनां हयानामश्वानां च ध्वंसो विनाशो भवति। तथा सिन्धुर्नाम नदी तत्तटवासिनो ये तेषामपि। तथोदग्दिशं संश्रितानामुत्तर-दिग्वासिनां जनानां च ध्वंस एव भवति ॥६६॥

अथ शुक्रस्याह--

भृगुतनये राहुगते दाशेरककैकयाः सयौधेयाः।
आर्यावर्त्ताः शिबयः स्त्रीसचिवगणाश्च पीड्यन्ते ॥६७॥

भृगुतनये शुक्रे राहुगते ग्रस्ते सति दाशेरका जनाः। कैकयाः सयौधेयाः सह यौधेयैर्जनैः। आर्यावर्त्ताः प्रधानदेशजनाः। शिबयो जनाः। स्त्रियो योषितः। सचिवा मन्त्रिणः। गणाः समूहाः। एते सर्व एव पीड्यन्ते उपतप्यन्ते ॥६७॥

अथ सौरस्याह--

सौरे मरुभवपुष्करसौराष्ट्रिकधातवोऽर्बुदान्त्यजनाः।
[1]गोमन्तपारियात्राश्रिताश्च नाशं व्रजन्त्याशु ॥६८॥

सौरे शनैश्चरे ग्रस्ते मरुभवा मरुभूमावुत्पत्तिर्येषां ते। पुष्करजनाः। सौराष्ट्रिकाः। धातवो धातुद्रव्याणि। अर्बुदजनाः अर्बुदः पर्वतस्तत्र ये निवसन्ति। अन्त्यजना निकृष्टजनाः। गोमन्तो गोमिनः, केचिद् गोनन्द इति पठन्ति, गोनन्दा जनाः। पारियात्राश्रिताश्च पारियात्रः पर्वतस्तत्र ये आश्रिताः स्थिता एते सर्व आशु क्षिप्रमेव नाशं व्रजन्ति गच्छन्ति ॥६८॥

अथ मासफलं वक्तुकामस्तत्रादावेव कार्त्तिकस्याह--

कार्त्तिक्यामनलोपजीविमगधान् प्राच्याधिपान् कोशलान्
कल्माषानथ शूरसेनसहितान् काशींश्च सन्तापयेत्।

---

१. गोनन्द इति पाठान्तरम्।

हन्यादाशु कलिङ्गदेशनृपतिं सामात्यभृत्यं तमो।
दृष्टं क्षत्रियतापदं जनयति क्षेमं सुभिक्षान्वितम् ॥६९॥

कार्त्तिकस्येयं पौर्णमास्यामावास्या वा कार्त्तिकी। तस्यां कार्त्तिक्यां तमो दृष्टं राहुर्यदि दृश्यते तदाऽनलोपजीविनोऽग्निवार्त्ताः सुवर्णकारप्रभृतयः। मगधा जनाः। प्राच्याधिपाः पूर्वस्यां दिशि ये अधिपतयो राजानस्तान् तथा कोशलाञ्जनान्, कल्माषान् जनान्। अथशब्दः स्वार्थे, तांश्च शूरसेनसहितान् शूरसेना जनास्तैः सहितान् तथा काशींश्च जनान् एतांश्च सर्वान् सन्तापयेदुपतापयेत्। तथा कलिङ्गदेशे यो नृपती राजा तं सामात्यभृत्यम्। अमात्यैर्मन्त्रिभिर्भृत्यैश्च सर्वकर्मकरैः सहितमाश्वेव क्षिप्रं हन्यान्नाशयेत्[1]। तथा क्षत्रियतापदं क्षत्रियाणां राजन्यानां तापं ददाति। क्षेमं सुभिक्षान्वितं सुभिक्षसंयुक्त जनयत्युत्पादयति ॥६९॥

अथ मार्गशीर्षस्याह--

काश्मीरकान् कौशलकान् सपुण्ड्रान्
मृगांश्च हन्यादपरान्तकांश्च।
ये सोमपास्तांश्च निहन्ति सौम्ये
सुवृष्टिकृत् क्षेमसुभिक्षकृच्च ॥७०॥

सौम्ये मार्गशीर्षमासे राहुर्दृष्टः काश्मीरकान् जनान्। कोशलांश्च सपुण्ड्रान् पुण्ड्रैर्जनैः सहितान्। मृगा अरण्यप्राणिनस्तानपि। अपरान्तकान् जनान्। एतानपि हन्यान्नाशयेत्। तथा ये सोमपाः सोमं पीतं यैस्ते कृतयज्ञास्तांश्च निहन्ति। सुवृष्टिकृत् शोभनां वृष्टिं करोति। क्षेमसुभिक्षकृच्च क्षेमं सुभिक्षं च करोति ॥७०॥

अथ पौषस्याह--

पौषे द्विजक्षत्रजनोपरोधः
ससैन्धवाख्याः कुकुरा विदेहाः।
ध्वंसं व्रजन्त्यत्र च मन्दवृष्टि
भयं च विन्द्यादसुभिक्षयुक्तम् ॥७१॥

पौषे मासे तमसि दृष्टे द्विजानां ब्राह्मणानां क्षत्रजनानां चोपरोध उपद्रवो भवति। तथा सैन्धवा जनाः सैन्धवेत्याख्या नाम येषां ते। कुकुराश्च जना एव

---

१. घातयेत्–इति अ० क० पु० पाठः।

सह सैन्धवाख्यैर्ये कुकुरा वर्त्तन्ते ते ससैन्धवाख्याः कुकुराः। तथा विदेहजनाः। एते सर्वे ध्वंसं विनाशं व्रजन्ति गच्छन्ति। अत्र च मन्दामल्पां वृष्टिं तथाऽसुभिक्ष-युक्तं दुर्भिक्षसहितं भयं विन्द्याज्जानीयात् ॥७१॥

अथ माघ आह—

माघे तु मातृपितृभक्तवसिष्ठगोत्रान्
स्वाध्यायधर्मनिरतान् करिणस्तुरङ्गान् ।
वङ्गाङ्गकाशिमनुजांश्च दुनोति राहु-
र्वृष्टिं च कर्षकजनाभिमतां करोति ॥७२॥

माघमासे राहुर्दृष्टो मातृपितृभक्तान् जननीजनकतत्परान्, तथा वसिष्ठ-गोत्रान् वसिष्ठो गोत्रं येषां द्विजातीनां तान्, तथा स्वाध्याये पाठे धर्मे च निरतान् सक्तान्, करिणो हस्तिनः, तुरङ्गानश्वान्, वङ्गान् जनान्, अङ्गानपि, काशिमनुजान् काशिदेशे मनुष्यान्, अथवा मनुजशब्दः प्रत्येकं संबध्यते। वङ्गान् मनुजानङ्गमनुजान् काशिमनुजांश्च सर्वान् दुनोत्युपतापयति। तथा कर्षकजनानां कृषिकराणामभिमतामभीष्टां वृष्टिं च करोति ॥७२॥

अथ फाल्गुन आह—

पीडाकरं फाल्गुनमासि पर्व वङ्गाश्मकावन्तिकमेकलानाम् ।
नृत्यज्ञसस्यप्रवराङ्गनानां धनुष्करक्षत्रतपस्विनां च ॥७३॥

फाल्गुने मासि पर्वं ग्रहणं वङ्गानां जनानामश्मकानामावन्तिकानां मेक-लानां पीडाकरमुपतापजनकम्। तथा नृत्यज्ञानां नाट्यविदां सस्यानां प्रवराङ्गनानां प्रधानस्त्रीणां धनुष्कराणां शिल्पिनां क्षत्राणां क्षत्रियाणां तपस्विनां तपोनिरताना-मेषां सर्वेषां पीडाकरमेव ॥७३॥

अत्र चैत्र आह—

चैत्र्यां तु चित्रकरलेखकगेयसक्तान्
रूपोपजीविनिगमज्ञहिरण्यपण्यान् ।
पौण्ड्रौड्रकैकयजनानथ चाश्मकांश्च
तापः स्पृशत्यमरपोऽत्र[1] विचित्रवर्षी ॥७४॥

---

१. अमरराडपि चित्रकर्म इति पाठान्तरम्।

चैत्र्याममावास्यायां पौर्णमास्यां वा चित्रकराश्चित्रज्ञाः शिल्पिनः, लेखका लिपिज्ञाः, गेयसक्ता गीतरता एतान्। तथा रूपोपजीविनो वेश्याजनाः। निगमज्ञा वेदपाठकाः। हिरण्यपण्याः सुवर्णविक्रयिणः एतानपि। तथा पौण्ड्रा जनाः। औड्राः कैकया एते सर्व एव जनाः। अथशब्दः पादपूरणे। अश्मकाश्च जना एव, एतान् सर्वान् तापः सन्तापः स्पृशति। एते पीडिता भवन्तीत्यर्थः। अत्रास्मिन् वर्षे अमरप इन्द्रो विचित्रवर्षी। विचित्रं नानाप्रकारं वर्षति। क्वचिन्न वर्षति क्वचिद्वर्षतीत्यर्थः। केषाञ्चित् पाठः--अमरराडपि चित्रवर्णः ॥७४॥

अथ वैशाख आह—

वैशाखमासे ग्रहणे विनाशमायान्ति कर्पासतिलाः समुद्गाः ।
इक्ष्वाकुयौधेयशकाः कलिङ्गाः सोपप्लवाः किन्तु सुभिक्षमस्मिन् ॥७५॥

वैशाखमासे ग्रहणे कर्पासास्तिलाः समुद्गा मुद्गसहिता एते विनाशमायान्ति गच्छन्ति। तथेक्ष्वाकवो जना यौधेयाः शका कलिङ्गा एते सर्वे सोपप्लवाः सोपद्रवाः। किन्तु पुनरस्मिन् ग्रहणे सुभिक्षं च भवति ॥७५॥

अथ ज्येष्ठ आह—

ज्येष्ठे नरेन्द्रद्विजराजपत्न्यः सस्यानि वृष्टिश्च महागणाश्च ।
प्रध्वंसमायान्ति नराश्च सौम्याः साल्वैः समेताश्च निषादसङ्घाः ॥७६॥

ज्येष्ठे मासि पर्वणि ग्रहणे नरेन्द्रा राजानो द्विजा ब्राह्मणा राजपत्न्यो राजस्त्रियः। सस्यानि प्रसिद्धानि। वृष्टिर्वर्षणं च। महागणा महासमूहाश्च। एते सर्वे प्रध्वंसं नाशमायान्ति नाशं प्राप्नुवन्ति। तथा च ये नराः सौम्या दर्शनीया उत्तरदिग्वासिन इति। एते साल्वैः समेताः सहिताश्च निषादानां प्राणिघातकानां संघाः समूहा प्रध्वंसमायान्ति ॥७६॥

अथाऽऽषाढ आह--

आषाढपर्वण्युदपानवप्रनदीप्रवाहान् फलमूलवार्त्तान् ।
गान्धारकाश्मीरपुलिन्दचीनान् हतान् वदेद् मण्डलवर्षमस्मिन् ॥७७॥

आषाढपर्वण्याषाढे मासे ग्रहणे उदपानं जलाधारो वापीकूपतडागादिस्तस्य चोदपानस्य वप्रस्तटः। नदीप्रवाहः पुलिनविस्तरम्। फलमूलवार्त्ताः फलानि मूलानि वार्त्ता वर्तनं वृत्तिर्येषां ते। तथा गान्धारा जनाः। काश्मीराः। पुलिन्दाः।

चीनाः। एतान् सर्वान् हतान् नष्टानिति वदेत्। सर्व एव नश्यन्तीत्यर्थः। अस्मिन् पर्वणि मण्डलवर्षं भवति। क्वचित् क्वचिद्वर्षतीत्यर्थः ॥७७॥

अथ श्रावण आह—

काश्मीरान् सपुलिन्दचीनयवनान् हन्यात् कुरुक्षेत्रजान्
गान्धारानपि मध्यदेशसहितान् दृष्टो ग्रहः श्रावणे ।
काम्बोजैकशफांश्च शारदमपि त्यक्त्वा यथोक्तानिमा-
नन्यत्र प्रचुरान्नहृष्टमनुजैर्धात्रीं करोत्यावृताम् ॥७८॥

श्रावणे मासि ग्रहो ग्रहणं दृष्टः काश्मीरान् जनान् सपुलिन्दचीनयवनान् पुलिन्दचीनजा जना यवनास्तैः सहितान्। तथा कुरुक्षेत्रजान् जनान्। गान्धारानपि। मध्यदेशसहितानेतान् सर्वान् हन्यात् नाशयेत्। तथा काम्बोजान् जनान्। एकशफांश्च अश्वगर्दभान्। चशब्दः समुच्चये। न केवलं यावत् शारदमपि शारदं धान्यादिकान् एतानपि हन्ति। इमान् यथोक्तान् काश्मीरादीन् त्यक्त्वा विहायान्यत्र देशेषु प्रचुरेण प्रभूतेनान्नेन ये हृष्टाः प्रहर्षिता मनुजा नरास्तैर्धात्रीं भूमिमावृतां व्याप्तां करोति ॥७८॥

अथ भाद्रपद आह—

कलिङ्गवङ्गान् मगधान् सुराष्ट्रान्
म्लेच्छान् सुवीरान् [1]दरदाश्मकांश्च ।
स्त्रीणां च गर्भानसुरो निहन्ति
सुभिक्षकृद् भाद्रपदेऽभ्युपेतः ॥७९॥

असुरो राहुर्भाद्रपदे मास्यभ्युपेत आगतः कलिङ्गान् जनान्। वङ्गान्। मगधान्। सुराष्ट्रान्। म्लेच्छान्। सुवीरान्। दरदान्। अश्मकान्। एतान् सर्वान्निहन्ति घातयति। केचिद्दरदाञ्छकानिति पठन्ति। तथा स्त्रीणां योषितां गर्भान् निहन्ति। सुभिक्षकृत् सुभिक्षं करोति ॥७९॥

अथाश्वयुज्याह—

काम्बोजचीनयवनान् सह शल्यहृद्भि-
र्बाह्लीकसिन्धुतटवासिजनांश्च हन्यात्।

---

१. दरदाञ्छकांश्च—इति पाठान्तरम्।

आनर्त्तपौण्ड्रभिषजश्च तथा किरातान्
दृष्टोऽसुरोऽश्वयुजि भूरिसुभिक्षकृच्च ॥८०॥

असुरो राहुरश्वयुजि मासि दृष्टः काम्बोजान् जनान्। चीनान् यवनान् एतान् सर्वान् सह शल्यहृद्भिः शल्यहर्तृभिर्व्रणचिकित्सकैः सह। तथा वाह्लीकान् जनान्। सिन्धोर्नद्यास्तटे ये निवसन्ति जनास्तांश्च। हन्यात् घातयेत्। चशब्दः सर्वत्रात्र समुच्चये। आनर्त्ता जनाः। पौण्ड्राः। भिषजो वैद्याः। तथा किराता जनाः। एतान् सर्वान् हन्यान्नाशयेत्। तथा भूरिसुभिक्षकृच्च। भूर्यतिबाहुल्येन सुभिक्षं करोति। तथा च सप्तासंहितायाम्—

अश्वयुग्माघकार्त्तिकभाद्रपदेष्वागतः सुभिक्षकरः।
राहुरवशिष्टमासेष्वशुभकरो वृष्टिधान्यानाम् ॥

तथा च पराशरः—

तत्र कार्त्तिके सुभिक्षक्षेमाय काशिकोशलशूरसेनाऽभावाय च। मार्गशीर्षे मृगपौण्ड्रसोमभयाय वृष्टये च। पौषे भयदुर्भिक्षब्रह्मक्षत्रोपरोधाय। माघे शस्त्रप्रकोपाय प्रावृड्वृद्धये वङ्गानर्त्तकयवनकाशिदेशोत्सादनकृत्। फाल्गुनेऽन्नसम्पच्च। नटनर्त्तकधनुष्करसस्यविनाशाय चैत्रे। वैशाखेऽश्मकपौण्डौड्रम्लेच्छवृक्षसस्याभावाय। ज्येष्ठे ज्येष्ठपत्नीगणमुख्यसस्योपद्रवाय। साल्वनिषादवृष्टिसस्यघ्नमाषाढे। श्रावणे क्षेमसुभिक्षमन्यत्र चीनकाश्मीरपुलिन्दगान्धारेभ्यः। भाद्रपदे मगधदरदकलिङ्गवङ्गाऽनयाय सस्यक्षेमाय च। आश्वयुग्ग्रहणे सुभिक्षक्षेमाय आवन्तिवाह्लीकानर्त्तकाम्बोजसैन्धवाऽऽमयायेति ॥८०॥

अथार्कशशिनोर्दश मोक्षा भवन्ति तेषां नामान्याह—

हनुकुक्षिपायुभेदा द्विर्द्विः सञ्छर्दनं च जरणं च।
मध्यान्तयोश्च विदरणमिति दश शशिसूर्ययोर्मोक्षाः ॥८१॥

हनुकुक्षिपायुभेदा द्विर्द्विः। द्वौ द्वौ वारौ द्विर्द्विः। हनुभेदौ द्वौ। कुक्षिभेदौ द्वौ। पायुभेदौ द्वाविति षट्। सञ्छर्दनं च जरणं च। चकारः समुच्चये। तथा मध्यविदरणमन्त्यविदरणम्। इत्येवंप्रकाराः शशिसूर्ययोश्चन्द्रार्कयोर्दश मोक्षाः ॥८१॥

अथैतेषां लक्षणं सफलं वक्तुकामस्तत्रादावेव दक्षिणहनुभेदस्य लक्षणं फलं चाह —

आग्नेय्यामपगमनं दक्षिणहनुभेदसंज्ञितं शशिनः।
सस्यविमर्दो मुखरुग् नृपपीडा स्यात् सुवृष्टिश्च ॥८२॥

आग्नेय्यां पूर्वदक्षिणस्यां दिशि यद्यपगमनं निवर्त्तनं तमः करोति तदा स मोक्षो दक्षिणहनुभेदसंज्ञितो दक्षिणहनुभेद इति तस्य संज्ञा। कस्य मोक्षः शशिनश्चन्द्रस्य। चन्द्रग्रहणमत्रोपलक्षणार्थमर्कस्यापि यतो वक्ष्यति। "[1]एते सर्वे मोक्षा वक्तव्या भास्करस्यापि" इति। अस्मिन् मोक्षे सस्यविमर्दः सस्यनाशो भवति। तथा मुखरुग्वदनपीडा। नृपस्य राज्ञः पीडा स्याद्भवेत्। सुवृष्टिः वृष्टिश्च भवेत्। तथा च कश्यपः—

दक्षिणो हनुभेदः स्याच्चाग्नेय्यां यदि गच्छति।
सस्यनाशं च कुरुते नृपभङ्गं सुदारुणम्॥ इति ॥८२॥

अथ वामहनुभदलक्षणं सफलमाह—

पूर्वोत्तरेण वामो हनुभेदो नृपकुमारभयदायी।
मुखरोगं शस्त्रभयं तस्मिन् विन्द्यात् सुभिक्षं च ॥८३॥

पूर्वोत्तरेणैशान्यां दिशि अपगमनं राहोर्यदि भवति तदा स वामो हनुभेदो नाम मोक्षः। स च नृपकुमाराणां नृपपुत्राणां भयदायी भवति भीतिं ददाति। तस्मिंश्च मोक्षे मुखरोगं वक्त्रपीडां शस्त्रभयं संग्रामभीतिं च विन्द्याज्जानीयात्। सुभिक्षं च भवति। तथा च कश्यपः—

पूर्वोत्तरेऽपरो भेदो नृपपुत्रभयप्रदः॥ इति ॥८३॥

अथ दक्षिणकुक्षिविभेदलक्षणं सफलमाह—

दक्षिणकुक्षिविभेदो दक्षिणपार्श्वेन यदि भवेन्मोक्षः।
पीडा नृपपुत्राणामभियोज्या दक्षिणा रिपवः ॥८४॥

दक्षिणपार्श्वेन दक्षिणभागेन यदि मोक्षो भवेत् स दक्षिणकुक्षिविभेदो नाम मोक्षः। तस्मिन्मोक्षे नृपपुत्राणां राजसुतानां पीडा भवति। तथा दक्षिणा रिपवो दक्षिणदिक्स्थाः शत्रवोऽभियोज्याः। तेषामुद्योगः कार्य इत्यर्थः। एतदौत्पातिकम्।

---

१. अस्यैवाध्यायस्य ९१ श्लोकः।

यतो गणितगोलवासनया दक्षिणोत्तरयोर्दिशोर्ग्रासमोक्षौ न भवतः। कदाचिदपि आचार्येण पूर्वशास्त्रानुसारेणोक्तम्। तथा च कश्यपः—

दक्षिणः कुक्षिभेदः स्याद्वामे मोक्षो भवेद्यदि ।
राजपुत्रभयं तत्र दक्षिणाशाद्विषां वधः ॥ इति ॥८४॥

अथ वामकुक्षिभेदं सफलमाह—

वामस्तु कुक्षिभेदो यद्युत्तरमार्गसंस्थितो राहुः ।
स्त्रीणां गर्भविपत्तिः सस्यानि च तत्र मध्यानि ॥८५॥

राहुर्यद्युत्तरमार्गसंस्थितः उत्तरस्यां दिशि संस्थितो भवति तदा स वामकुक्षिभेदो नाम मोक्षः। तस्मिन् मोक्षे स्त्रीणां योषितां गर्भविपत्तिर्गर्भविनाशो भवति। तथा सस्यानि मध्यानि भवन्ति नाल्पानि न बहूनीत्यर्थः। एतदौत्पातिकम्। तथा च कश्यपः—

सौम्यायां तु यदा मोक्षो वामकुक्षिविभेदतः ।
स्त्रीणां गर्भविनाशाय सौम्याशाधिपतेर्वधः ॥ इति ॥८५॥

अथ दक्षिणवामौ पायुभेदौ सफलावाह—

नैर्ऋतवायव्यस्थौ दक्षिणवामौ तु पायुभेदौ द्वौ ।
गुह्यरुगल्पा वृष्टिर्द्वयोस्तु राज्ञीक्षयो वामे ॥८६॥

नैर्ऋत्यां दक्षिणपश्चिमायां दिशि व्यवस्थिते तमसि दक्षिणपायुभेदः। वायव्यस्थे पश्चिमोत्तरस्यामवस्थिते वामपायुभेदः। पायुशब्देनापानस्थानमुच्यते। अनयोर्द्वयोरपि गुह्यरुग् गुदरोगो भवति। गुह्यं लिङ्गं वा तत्र रोगो भवति। अल्पा स्वल्पा वृष्टिर्वर्षणं भवति। वामस्य विशेषमाह—राज्ञीक्षयो वाम इति। वामकुक्षिभदे राज्ञ्या राजपत्न्याः क्षयो मरणं भवति। तथा च कश्यपः—

पायुभेदगते राहौ वायवीनैर्ऋताशयोः ।
गुह्यरोगभयं विन्द्याद्वामे राज्ञीभयं तथा ॥ इति ॥८६॥

अथ सञ्छर्दनलक्षणमाह—

पूर्वेण प्रग्रहणं कृत्वा प्रागेव चापसर्पेत ।
सञ्छर्दनमिति तत्क्षेमसस्यहार्दिप्रदं जगतः ॥८७॥

पूर्वेण पूर्वस्यां दिशि प्रग्रहणं कृत्वा प्रागेव पूर्वस्यामेव यद्यपसर्पेत गमनं करोति स मोक्षः सञ्छर्दनमिति। तच्च जगतो लोकस्य क्षेमप्रदं सस्यप्रदं हार्दिप्रदं तुष्टिप्रदं च भवति। तथा च कश्यपः—

ग्रासमोक्षौ यदा पूर्वे छर्दनं तु तदा भवेत्।
क्षेमहार्दिप्रदं ज्ञेयं सस्यनिष्पत्तिकारकम्॥ इति॥८७॥

अथ जरणं सफलमाह—

प्राक्प्रग्रहणं यस्मिन् पश्चादपसर्पणं तु तज्जरणम्।
क्षुच्छस्त्रभयोद्विग्ना न शरणमुपयान्ति तत्र जनाः॥८८॥

यस्मिन् प्रग्रहणे प्राक् पूर्वस्यां दिशि प्रग्रहणं कृत्वा पश्चात् पश्चिमायां दिशि अपसर्पणं गमनं यदि करोति तदा तज्जरणं नाम मोक्षः। तत्र तस्मिन् मोक्षे जना मर्त्याः क्षुच्छस्त्रभयोद्विग्नाः। क्षुद्भयं दुर्भिक्षभयम्। शस्त्रभयं संग्रामभीतिः। तेनोद्विग्ना दुःखिता न शरणमुपयान्ति शरणं न प्राप्नुवन्ति। निःशरणा भवन्तीत्यर्थः। तथा च कश्यपः—

पूर्वेण ग्रसते राहुरपरस्यां विमुञ्चति।
क्षुत्तस्करभयं तत्र मोक्षस्तु जरणं स्मृतम्॥ इति॥८८॥

अथ मध्यविदरणं सफलमाह—

मध्ये यदि प्रकाशः प्रथमं तन्मध्यविदरणं नाम।
अन्तःकोपकरं स्यात् सुभिक्षदं नातिवृष्टिकरम्॥८९॥

प्रथममादौ मध्यभागे यदि प्रकाशो बिम्बस्य प्राकाश्यमुत्पद्यते तन्मध्यविदरणं नाम मोक्षः। तदन्तःकोपकरम्। अन्तरभ्यन्तरे राजगृहे कोपकरम्। स्वयमेव सैन्यक्षोभकरं स्याद्भवेत्। तथा सुभिक्षदं सुभिक्षं ददाति। नातिवृष्टिकरं भवति प्रभूतं न वर्षतीत्यर्थः। एतदप्यौत्पातिकम्। यतो गणितगोलविरुद्धम्। तथा च कश्यपः—

यदा प्रकाशो मध्ये स्याद् दुर्भिक्षमरकं तदा॥ इति॥८९॥

अथान्त्यविदरणाख्यं सफलमाह—

पर्यन्तेषु विमलता बहुलं मध्ये तमोऽन्त्यदरणाख्यः ।
मध्याख्यदेशनाशः शारदसस्यक्षयश्चास्मिन् ॥९०॥

पर्यन्तेषु बिम्बान्तभागेषु यदि विमलता निर्मलत्वं भवति मध्ये मध्यभागे बहुलं सन्ततं तमस्तदान्त्यदरणाख्यो मोक्षः। अस्मिन् मोक्षे मध्याख्यस्य देशस्य नाशो भवति। मध्यदेशो विनश्यतीत्यर्थः। तथा शारदानां सस्यानां च क्षयः। एतदप्यौत्पातिकम्। यतो गणितगोलविरुद्धमिति। तथा च कश्यपः—

पर्यन्ते विमलत्वं स्यात्तमो मध्ये यदा भवेत् ।
मध्याख्यदेशनाशः स्याच्छरत्सस्यं विनश्यति ॥ इति ॥९०॥

अथैत एव मोक्षा भास्करस्य ज्ञेया इत्येतदाह—

एते सर्वे मोक्षा वक्तव्या भास्करेऽपि किन्त्वत्र ।
पूर्वा दिक् शशिनि यथा तथा रवौ पश्चिमा कल्प्या ॥९१॥

एते सर्वे मोक्षा ये चन्द्रमस्युक्तास्ते सर्वे भास्करे सूर्येऽपि वक्तव्याः कथनीयाः। किन्त्वत्रायं विशेषः—यथा शशिनि चन्द्रे पूर्वा दिक् तथा रवावादित्ये पश्चिमा दिक् कल्प्या। एतदुक्तं भवति—आदित्यस्य पश्चिमा दिक् पूर्वा, पूर्वा च पश्चिमा। दक्षिणा उत्तरा। उत्तरा च दक्षिणा। विदिशश्चानेनैव वैलोम्येन परिकल्प्य चन्द्रवद् मोक्षा वाच्या इति ॥९१॥

अथ ग्रहणे मुक्ते सप्ताहान्तःफलान्याह श्लोकपञ्चकेन—

मुक्ते सप्ताहान्तः पांशुनिपातोऽन्नसंक्षयं कुरुते ।
नीहारो रोगभयं भूकम्पः प्रवरनृपमृत्युम् ॥९२॥
उल्का मन्त्रिविनाशं नानावर्णा घनाश्च भयमतुलम् ।
स्तनितं गर्भविनाशं विद्युन्नृपदंष्ट्रिपरिपीडाम् ॥९३॥
परिवेषो रुक्पीडां दिग्दाहो नृपभयं च साग्निभयम् ।
रूक्षो वायुः प्रबलश्चौरसमुत्थं भयं धत्ते ॥९४॥
निर्घातः सुरचापं दण्डश्च क्षुद्भयं सपरचक्रम् ।
ग्रहयुद्धे नृपयुद्धं केतुश्च तदेव सन्दृष्टः ॥९५॥

अविकृतसलिलनिपातैः सप्ताहान्तः सुभिक्षमादेश्यम् ।
यच्चाशुभं ग्रहणजं तत्सर्वं नाशमुपयाति ॥९६॥

मुक्ते ग्रहणे सप्ताहान्तर्दिनसप्तकमध्ये यदि पांशुनिपातो भवति पांशुवर्षणं दृश्यते तदान्नसंक्षयं दुर्भिक्षं कुरुते। एवं नीहारो रोगभयं करोति। भूकम्पः प्रवरस्य प्रधानस्य नृपस्य राज्ञो मृत्युं मरणं करोति।

उल्का पतिता मन्त्रिणः सचिवस्य विनाशं करोति। नानावर्णा विविधकान्तयो घना मेघा अतुलमतिभयं भीतिं कुर्वन्ति। स्तनितं मेघशब्दस्तच्च गर्भविनाशं करोति। गर्भा [1]गर्भलक्षणोक्ता अत्र ज्ञेयाः। विद्युत्तडित्। नृपो राजा। दंष्ट्रिणः सर्पादयः। तेभ्यः परिपीडां करोति।

परिवेषो रुक्पीडां रोगव्यथां करोति। दिग्दाहो दिशां दाहो नृपभयमग्निभयेन सहितं करोति। रूक्षः परुषः प्रबलश्चण्डो वायुश्चौरसमुत्थं तस्करोत्पन्नं भयं धत्ते ददाति।

निर्घातः शब्दस्तस्य च लक्षणं वक्ष्यति—"पवनः[2] पवनाभिहतः" इति। सुरचापमिन्द्रधनुः। दण्डश्च रविकिरणजलदमरुतां संघातः। एतेषामन्यतमं क्षुद्भयं दुर्भिक्षभयं सपरचक्रं परचक्रभयसहितं करोति। ग्रहयोर्युद्धे नृपाणां राज्ञां युद्धं भवति। केतुः शिखी च सन्दृष्टस्तदेव नृपयुद्धं करोति।

सप्ताहान्तर्दिनसप्तमध्येऽविकृतस्याविकारस्य सलिलस्य पानीयस्य निपातैः सुभिक्षमादेश्यं वक्तव्यम्। यच्च ग्रहणजं फलमशुभं तत्सर्वं नाशमुपयाति नश्यतीत्यर्थः। तथा च समाससंहितायाम् ––

परुषपवनाभ्रगर्जितविद्युत्परिवेषभूप्रकम्पाद्याः ।
सप्ताहान्तर्न शुभा ग्रहणनिवृत्तौ शुभा वृष्टिः ॥

तथा च वृद्धगर्गः ––

अथेन्दुग्रहनिर्मुक्ते सप्ताहान्तर्भवेद्यदि ।
पांशुवर्षोऽन्ननाशः स्यान्नीहारो रोगवृद्धये ॥
नृपनाशाय भूकम्प उल्का मन्त्रिविपत्तये ।
रोगाय परिवेषः स्याद्भ्रयायैवाभ्रसंप्लवः ॥

---

१. बृहत्संहितायाम् २१ अध्याये ।
२. बृहत्संहितायाम् ३७ अध्यायस्य १ श्लोकः ।

विद्युद्गर्भविनाशाय दिग्दाहोऽग्निविवृद्धये ।
निर्घातेन्द्रधनुर्दण्डा दुर्भिक्षाय भयाय च ॥
पवनः प्रबलो रूक्षश्चौरोपद्रवसूचकः ।
सर्वोपद्रवनाशः स्यात् सम्यग्वृष्टिर्भवेद्यदि ॥
यद्राहुचरितं प्रोक्तं चन्द्रग्रहणहेतुकम् ।
तदेव सकलं सूर्ये वेदितव्यं शुभाशुभम् ॥ इति ॥९२–९६॥

चन्द्रग्रहणानन्तरं यद्यर्कग्रहणं दृश्यते तदा फलमाह —

सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद् ग्रहोऽर्कस्य ।
तत्रानयः प्रजानां दम्पत्योर्वैरमन्योन्यम् ॥९७॥

सोमग्रहे चन्द्रग्रहणे निवृत्तेऽतीते पक्षान्ते दिनपञ्चदशकात्परतो यदि ग्रहो ग्रहणमर्कस्याऽऽदित्यस्य भवति तत्र तस्मिन् प्रजानां लोकानामनयो दुर्नयो भवति। दम्पत्योर्जायापत्योरन्योन्यं परस्परं वैरं द्वेषो भवति ॥९७॥

अथार्कग्रहाच्छशिग्रहणं दृष्टं फलमाह —

अर्कग्रहात्तु शशिनो ग्रहणं यदि दृश्यते ततो विप्राः ।
नैकक्रतुफलभाजो भवन्ति मुदिताः प्रजाश्चैव ॥९८॥

अर्कग्रहादादित्यग्रहणादनन्तरं पक्षान्ते यदि शशिनश्चन्द्रमसो ग्रहणं दृश्यते अवलोक्यते। ततो विप्रा ब्राह्मणा नैकक्रतुफलभाजो नैकानां बहूनां क्रतूनां यज्ञानां फलभागिनो भवन्ति। तथा सर्वाः प्रजा मुदिता हृष्टा भवन्तीति ॥९८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ राहुचारो
नाम पञ्चमोऽध्यायः ॥५॥

अथ भौमचाराध्यायो व्याख्यायते ।
तत्र भौमस्य पञ्चमुखानि भवन्ति । तद्यथा —

उष्णमश्रुमुखं व्यालं रुधिराननमेव च ।
निस्त्रिंशमुशलं चेति पञ्च वक्त्राणि भूसुते ॥

एतेषां लक्षणानि सफलानि वक्ष्यति। तत्रादावेवोष्णमुखस्य लक्षणं सफलमाह —

यद्युदयर्क्षाद्वक्रं करोति नवमाष्टसप्तमर्क्षेषु ।
तद्वक्त्रामुष्णमुदये पीडाकरमग्निवार्त्तानाम् ॥१॥

यस्मिन्नक्षत्रे स्थितोऽङ्गारक आदित्यमण्डलादुदयं करोति तदुदयर्क्षादुदयनक्षत्राद् नवमाष्टसप्तमर्क्षेषु नवमे ऋक्षे नक्षत्रे अष्टमे वा सप्तमे वा यदि वक्रं प्रतीपगमनं करोति तदा तद्वक्त्रमुष्णं नाम। तच्च भौमस्योदये रविमण्डलात् पुनरपि निर्गमेऽग्निवार्त्तानामग्निवृत्तीनां सुवर्णकारलोहकारादीनां पीडाकरमुपतापकरम्। वक्रादनन्तरं यदार्ऽकमण्डलेऽस्तमेष्यति तदैतत्फलमेषां सर्वेषां ज्ञेयम्। यत्र यद्यप्यसम्भवस्तत्रापि पूर्वशास्त्रानुसारेणाऽऽचार्येणोक्तम्। तथा च वृद्धगर्गः—

उदयात् नवमे कुर्यादष्टमे सप्तमेऽपि वा ।
निवृत्ति लोहिताङ्गस्तु तदुष्णं वक्त्रमुच्यते ॥
नरोऽग्निजीविनो ये च पचन्ति च दहन्ति च ।
तेषामुत्पद्यते तापो जायते धनसंक्षयः ॥

तथा च पराशरः—

तस्य पञ्चवक्त्राणि क्रमेणोपदिशन्ति। उष्णमश्रुमुखं व्यालं लोहिताख्यं निस्त्रिंशमुशलं चेति। तत्रोदयर्क्षात् सप्तमाष्टनवमेषु नक्षत्रेषु निवृत्तः प्रजासंक्षयं विशेषतः पचतां दहतां च पीडां धत्ते ॥१॥

अथाश्रुमुखस्याह—

द्वादशदशमैकादशनक्षत्राद्वक्रिते कुजेऽश्रुमुखम् ।
दूषयति रसानुदये करोति रोगानवृष्टिं च ॥२॥

उदयनक्षत्राद् द्वादशे नक्षत्रे दशमे वैकादशे वा कुजेऽङ्गारके वक्रिते प्रतीपगतौ अश्रुमुखं नाम वक्त्रम्। तच्चोदये पुनरर्कमण्डलान्निर्गमे रसान् मधुराम्ललवणतिक्तकटुकषायान् दूषयति सदोषान् करोति। ते च दुष्टा नराणां भक्षणमात्रात् पीडामुत्पादयन्ति। एवं रोगान् करोति। तथा अवृष्टिमवर्षणं च करोति। तथा च गर्गः—

दशमैकादशे वापि द्वादशे वापि वक्रिते ।
लोहिताङ्गे ग्रहे ज्ञेयं वक्त्रमश्रुमुखं च तत् ॥
तत्र वर्षति पर्जन्यो दूषयित्वा शुभान् रसान् ।
ते दुष्टा दूषयन्त्याशु नृणां धातून् तथा भृशम् ॥
बहवो व्याधयः क्रूरा उत्पद्यन्ते शरीरिणाम् ।
बहुभिः कारणैरेतैस्ततो लोकः प्रलीयते ॥

तथा च पराशरः—

दशमैकादशद्वादशेषु प्रदुष्टवातैरद्रव्यरसान् प्रजानां धातून् कोपयन् व्याधीन् प्रवर्त्तयति ॥२॥

अथ व्यालस्याह—

व्यालं त्रयोदशर्क्षाच्चतुर्दशाद्वा विपच्यतेऽस्तमये ।
दंष्ट्रिव्यालमृगेभ्यः करोति पीडां सुभिक्षं च ॥३॥

उदयापेक्षया त्रयोदशर्क्षात् त्रयोदशनक्षत्राच्चतुर्दशाद्वा कुजे वक्रिते व्यालं नाम वक्रम्। तच्चास्तमये विपच्यते। यस्मिन् काले भौमोऽर्कमण्डले पुरस्तादस्तमेति तत्र परिपाकमायाति। दंष्ट्रिणः सूकरकुक्कुरादयः। व्यालाः सर्पाः। मृगा आरण्यजातयः। तेभ्यः सकाशात् पीडां लोकानां करोति सुभिक्षं च करोति।

तथा च गर्गः—

त्रयोदशे च नक्षत्रे यदि वापि चतुर्दशे ।
निवृत्तिं कुरुते भौमस्तद्वक्त्रं व्यालमुच्यते ॥
भवन्ति प्रचुरा व्यालास्तेभ्यो लोकभयं वदेत् ।
नृपाणामशुभं विन्द्यात् सस्यसम्पत्तिमादिशेत् ॥

तथा च पराशरः—

त्रयोदशचतुर्दशयोः सस्यदंष्ट्रिव्यालप्राबल्यं हिरण्यसंचयं च ॥ इति ॥३॥

अथ रुधिराननस्याह—

रुधिराननमिति वक्त्रं पञ्चदशात् षोडशाच्च विनिवृत्ते ।
तत्कालं मुखरोगं सभयं च सुभिक्षमावहति ॥४॥

उदयापेक्षया पञ्चदशान्नक्षत्रात् षोडशाच्च विनिवृत्ते वक्रितेऽङ्गारके रुधिराननमिति नाम वक्त्रम्। तच्च तत्कालं यावद्वक्त्रं तावन्मुखरोगं वक्त्रंपीडितं सभयं भयसहितं च सुभिक्षमावहत्युत्पादयति। तथा च गर्गः—

यदि पञ्चदशर्क्षे तु भूसुतः षोडशेऽपि वा ।
निवृत्तिं कुरुते वक्त्रस्तद्विदुर्लोहिताननम् ॥

दीप्तिमन्तः पार्थिवाश्च भवन्ति प्रथिता भुवि ।
क्षत्रकोपश्च सुमहान् मुखरोगा भवन्ति च ॥

तथा च पराशरः—

पञ्चदशषोडशयोर्मुखरोगो नृपक्षोभः शस्त्रकोपश्च॥ इति ॥४॥

अथासिमुशलस्याह—

असिमुशलं सप्तदशादष्टादशतोऽपि वा तदनुवक्रे ।
दस्युगणेभ्यः पीडां करोत्यवृष्टिं सशस्त्रभयाम् ॥५॥

उदयापेक्षया सप्तदशान्नक्षत्रादष्टादशतोऽपि वा वक्रितेऽङ्गारके तद्वक्त्रमसिमुशलं नाम। तच्चानुवक्रे स्पष्टगत्याऽऽश्रिते भौमे दस्युगणेभ्यश्चौरसंघेभ्यः सकाशात् प्रजानां पीडां करोति। तथाऽवृष्टिं सशस्त्रभयां शस्त्रभयेन सहितां च करोति। तथा च गर्गः—

सप्तादशेऽष्टादशे वा लोहिताङ्ग निवर्तिते ।
निस्त्रिंशमुशलं नाम तद्वक्त्रं परिकीर्तितम् ॥
पशुपुत्रधनं धान्यमाहरन्ते तु दस्यवः ।
प्राणिनां जीवनं हन्ति जायते शस्त्रसम्भ्रमः ॥

तथा च पराशरः—

सप्तदशेऽष्टादशे वा दस्युगणैः प्रजानामुपद्रवमवृष्टिं शस्त्रभयं च इति ॥५॥

अथात्रैव योगवशेन विशेषफलमाह—

भाग्यार्यमोदितो यदि निवर्तते वैश्वदैवते भौमः ।
प्राजापत्येऽस्तमितस्त्रीनपि लोकान्निपीडयति ॥६॥

भाग्यं पूर्वफल्गुनी। अर्यमा उत्तरफल्गुनी। भौमोऽङ्गारकोऽनयोरेकतरे यद्युदितो भवति रविमण्डलनिर्गतः। ततोऽग्रतो वैश्वदैवते उत्तराषाढायां निवर्तते वक्रं करोति तथा प्राजापत्ये रोहिण्यामस्तमितो यदि भवति तदा त्रीनपि भूर्भुवःस्वराख्यांल्लोकान्निपीडयत्युपतापयति। तथा च पराशरः—

---

१. द्रष्टव्याऽस्य ग्रन्थस्य १२४ पृष्ठे २ टिप्पणी ।

फल्गुन्यामुदयं कृत्वा वक्रं स्याद्वैश्वदैवते ।
प्राजापत्ये प्रवासश्च त्रैलोक्यं तत्र पीडयते ॥ इति ॥६॥

अन्यदपि विशेषमाह--

श्रवणोदितस्य वक्रं पुष्ये मूर्द्धाभिषिक्तपीडाकृत् ।
यस्मिन्नृक्षेऽभ्युदितस्तद्दिग्व्यूहान् जनान् हन्ति ॥७॥

श्रवणस्थस्याङ्गारकस्यार्कमण्डलादुदितस्य यद्यग्रतः पुष्ये वक्रं भवति तदा मूर्द्धाभिषिक्तानां राज्ञां पीडां करोति। तथा च पराशरः--

उदितः श्रवणे भौमः पुष्ये वक्रं चरेद्यदि ।
मूर्द्धाभिषिक्ता राजानो विनश्येयुः परस्परम् ॥

यस्मिन्नृक्षेऽभ्युदित इति। सूर्यमण्डलस्थो यस्मिन्नृक्षे यत्र नक्षत्रे स्थितोऽभ्युदितः सूर्यमण्डलादुद्गतस्तस्य नक्षत्रस्य या दिक् नक्षत्रकूर्मोक्ता यश्च तस्य व्यूहो नक्षत्रव्यूहोक्तस्तत्र ये जनास्तान् हन्ति घातयति। तथा च पराशरः--

यथा जनपदव्यूहे दिग्विभागः प्रदर्शितः ।
तस्य वै मोहितं कुर्याल्लोहिताङ्गस्तथा मुखम् ॥ इति ॥७॥

अन्यदपि विशेषफलमाह--

मध्ये न यदि मघानां गतागतं लोहितः करोति ततः ।
पाण्ड्यो नृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः ॥८॥

लोहितोऽङ्गारको यदि चेन्मघानां मध्ये न गतागतं करोति स्पष्टगतेस्तन्मध्ये तारकाणां गत्वा पुनर्वक्रगतेरागमनं तन्मध्ये नैव करोति ततस्तस्माद्धेतोः पाण्ड्यो नृपः पाण्ड्यदेशे यो राजा स विनश्यति विनाशमायाति। लोके च शस्त्रोद्योगाद्भयं भवति। शस्त्राणामुद्योगः संग्रामः। अवृष्टिरवर्षणं च भवति ॥८॥

अन्यदपि योगवशेनाह--

भित्त्वा मघा विशाखां भिन्दन् भौमः करोति दुर्भिक्षम् ।
मरकं करोति घोरं यदि भित्त्वा रोहिणीं याति ॥९॥

भौमोऽङ्गारको मघां भित्त्वा मघायोगतारकाभेदं कृत्वा यदि विशाखां भिन्दन् तामपि पुनर्भिनत्ति तदा दुर्भिक्षं क्षुद्भयं करोति। यदि रोहिणीं भित्वा याति रोहिण्या योगतारकभेदनं कृत्वा गच्छति तदा घोरं तीव्रं मरकं जनानां करोति विदधाति ॥९॥

अन्यदप्याह—

दक्षिणतो रोहिण्याश्चरन्महीजोऽर्घवृष्टिनिग्रहकृत्।
धूमायन् सशिखो वा विनिहन्यात् पारियात्रस्थान् ॥१०॥

महीजोऽङ्गारको रोहिण्या दक्षिणतश्चरन् रोहिण्या योगतारकस्य दक्षिणभागेन गच्छन् अर्घस्य वृष्टेश्च निग्रहं करोति विनाशयतीत्यर्थः। अर्घस्य निग्रहः स्वल्पत्वम्। वृष्टेर्निग्रहश्चाभावः। धूमायन् सशिखो वेति। धूमायन् धूममुद्वहन् सशिखः सचूडो वा यदि दृश्यते तदा पारियात्रस्थान् विनिहन्यात्। पारियात्रः पर्वतः। तत्र स्थितान् जनान् हन्याद् घातयेत् ॥१०॥

अथ भौमस्य वार्षिकाणि नक्षत्राण्याह—

प्राजापत्ये श्रवणे मूले [1]त्रिषु चोत्तरेषु शाक्रे च।
विचरन् घननिवहानामुपघातकरः क्षमातनयः ॥११॥

क्षमातनयोऽङ्गारकः प्राजापत्ये रोहिण्यां स्थितः श्रवणे मूले त्रिषु नक्षत्रेषूत्तरेषु उत्तरशब्द आदौ येषाम्। उत्तरफल्गुन्युत्तराषाढोत्तरभद्रपदासु च। त्रिसृषूत्तरासु वा पाठः। शाक्रे ज्येष्ठायाम्। चशब्दः समुच्चये। एतेष्वेकतमे विचरन्निवसन् घननिवहानां मेघवृन्दानामुपघातकरो विनाशकर्ता भवत्यवृष्टिकृदित्यर्थः ॥११॥

अथास्य नक्षत्रेषु स्थितस्योदितस्य वा विशेषफलमाह—

चारोदयाः प्रशस्ताः श्रवणमघादित्यहस्तमूलेषु।
एकपदाश्विविशाखाप्राजापत्येषु च कुजस्य ॥१२॥

"[2]यस्मिन्नृक्षेऽभ्युदितस्तद्विग्व्यूहान् जनान् हन्ति" तथा "[3]प्राजापत्ये श्रवण" इत्यस्यापवादोऽयम्। कुजस्याङ्गारकस्य श्रवणे मघायामादित्ये पुनर्वसौ हस्ते मूले एकपदायां पूर्वभद्रपदायामश्विन्यां विशाखायां प्राजापत्ये रोहिण्याम्। चशब्दः समु-

---

१. तिसृषूत्तरासु—इति पाठान्तरम्।
२. अस्यैवाध्यायस्य ७ श्लोकः।
३. अस्यैवाध्यायस्य ११ श्लोकः।

च्चये। एतेषु नक्षत्रेषु चारोदयाः। चारश्चरणमवस्थितिः। उदयः सूर्यमण्डलादुद्गमनम्। प्रशस्ताः शोभनाः। पूर्वोक्तमशुभफलमत्र न भवतीत्यर्थः ॥१२॥

अथ वर्णलक्षणमाह--

विपुलविमलमूर्त्तिः किंशुकाशोकवर्णः
स्फुटरुचिरमयूखस्तप्ततामप्रभाभः ।
विचरति यदि मार्गं चोत्तरं मेदिनीजः
शुभकृदवनिपानां हार्दिदश्च प्रजानाम् ॥१३॥

मेदिनी भूस्तस्या जातो मेदिनीजोऽङ्गारको विपुलविमलमूर्तिः। विपुला विस्तीर्णा विमला निर्मला मूर्त्तिर्यस्य। तथा किंशुकाशोकवर्णः। किंशुकाशोकौ पुष्पविशेषौ अतिलोहितौ तत्सदृशवर्णः अतिलोहित इत्यर्थः। स्फुटरुचिरमयूखः। स्फुटा स्पष्टा रुचिरा दीप्तिमन्तो मयूखा रश्मयो यस्य। तप्ततामप्रभाभः। तप्तस्य गलितस्य ताम्रस्य यादृशी प्रभा कान्तिस्तत्तुल्या आभा बिम्बच्छाया यस्य। यदि चोत्तरं मार्गं विचरति यस्मिन्नक्षत्रे स्थितस्तस्योत्तरभागेन यदि याति तदाऽवनिपानां राज्ञां शुभकृत् श्रेयस्करः। प्रजानां लोकानां च हार्दिदस्तुष्टिदो भवति। तथा च पराशरः—

वर्णरश्मिप्रभाप्रमाणतेजोयुक्त उदग्मार्गगः स्नेहवान् सर्वलोकहितायापि च ।

प्रदक्षिणगतिः कान्तः स्निग्धश्च कलशोपमः ।
तप्तकाञ्चनसङ्काशो भवेल्लोकविवृद्धये ॥

अन्ये एवं व्याचक्षते—यथा भरण्यादिमघान्तमुत्तरो मार्गस्तत्र यदा विचरति तदावनिपानां शुभकृत् प्रजानां च हार्दिदः।

तथा च गर्गः—

याम्यादिपितृपर्यन्तं नवर्क्षं मार्गमुत्तरम् ।
भाग्यादिनैर्ऋतान्तं तु मध्यमं मार्गमुच्यते ॥
आषाढाद्याश्विनान्तं तु दक्षिणं समुदाहृतम् ।
सौम्यमार्गस्थितो भौमः प्रजानामुपकारकः ॥
मध्यमे मध्यफलदो याम्ये तु भयदः स्मृतः॥ इति ॥१३॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ भौमचारो नाम षष्ठोऽध्यायः ॥ ६ ॥

अथ बुधचारो व्याख्यायते—
तत्रादावेव बुधस्योदितस्य फलमाह—

नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम् ।
जलदहनपवनभयकृद् धान्यार्घक्षयविवृद्धौ वा ॥१॥

चन्द्रजो बुध उत्पातपरित्यक्त उत्पातविरहितो न कदाचिदपि न जात्वप्युदयं सन्दर्शनं व्रजति गच्छति। अपि तु यदा यदोद्गच्छति तदा तदा सोत्पातरूप एवेति। किमुत्पातं करोति। जलदहनपवनभयकृत्। जलमुदकम्, दहनोऽग्निः, पवनो वायुः, एभ्यो भयं करोति। तथा धान्यार्घस्य क्षयाय भवति। विवृद्धचै विवृद्धये च भवति। बहुमूल्यता अर्घवृद्धिः, स्वल्पमूल्यता अर्घक्षयः। तथा च समाससंहितायाम्—

उदयं याति शशिसुतो नोत्पातविवर्जितः कदाचिदपि।
पवनाग्निसलिलभयदो धान्यार्घवृद्धिक्षयकृद्वा ॥

ननु जलदहनादिभिरुत्पातैः परित्यक्तश्चन्द्रजः कदाचिदप्युदयं नो गच्छति। किमेतेषां जलदहनादीनामन्यतम उत्पातसमेत उदयं करोति किं वा सर्वैरेव युक्त इत्यत्रोच्यते।

येनोत्पातेन सहास्तगस्तत्प्रतिलोमगश्चन्द्रज उदयं याति। अमुमेवार्थं वृद्धगर्ग आह —

अवर्षे कुरुते वर्षं वर्षे वर्षं न गच्छति ।
भये च कुरुते क्षेमं सर्वत्र प्रतिलोमगः ॥

उदयोक्तं फलमेतद्विशेषतश्चारजं फलं ब्रूयात्। तथा च कश्यपः —

नाकस्माद्दर्शनं याति विनोत्पातेन सोमजः ।
भयवातातपहिमैरर्घवृद्धिक्षयादिभिः ॥ इति ॥ १ ॥

अधुना नक्षत्रावस्थितस्य बुधस्य फलमाह —

विचरन् श्रवणधनिष्ठाप्रजापत्येन्दुवैश्वदेवानि ।
मृद्नन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम् ॥२॥

श्रवणम्। धनिष्ठा। प्राजापत्यं रोहिणी। इन्दुर्मृगशिरः। वैश्वदेवमुत्तराषाढा। हिमकरश्चन्द्रस्तत्तनयो बुधः। एतानि नक्षत्राणि। विचरन्निवसन्नेतेषामन्यतमस्य मृद्नन्नुपमर्दयन् विचरति। मर्दनं भेदः। तदा अवृष्टिमवर्षणं सरोगभयां गदभीत्या सहितां करोति। मर्दनमत्र श्रवणमध्यात् केषाञ्चित् सम्भवति केषाञ्चिन्न सम्भवति। आचार्येणोक्तं पूर्वशास्त्रानुसारेणेति। तथा च कश्यपः —

रोहिणीं वैश्वदेवं च सौम्यवैष्णववासवान्।
शशिजश्च यदा हन्ति प्रजा रोगैश्च पीडयेत् ॥इति॥२॥

अन्येषु नक्षत्रेष्वाह —

रौद्रादीनि मघान्तान्युपाश्रिते चन्द्रजे प्रजापीडा।
शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः ॥३॥

रौद्रमार्द्रा तदादीनि मघान्तानि पञ्च नक्षत्राणि। आर्द्रापुनर्वसुतिष्याश्लेषामघाश्चेति। चन्द्रजे उपाश्रिते व्यवस्थिते तानि चोपमृद्नन् यदि विचरति तदा प्रजानां पीडा भवति। कैः शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः। शस्त्रनिपातेन युद्धेन। क्षुद्भयेन दुर्भिक्षभीत्या। रोगैर्गदैः। अनावृष्टचा अवर्षणेन। सन्तापेनोपतापेन च। तथा च कश्यपः —

रौद्रादीनि यदा पञ्च नक्षत्राणीन्दुनन्दनः।
भिनत्ति शस्त्रदुर्भिक्षव्याधिभिः पीडयते जगत् ॥इति॥३॥

अन्येष्वाह —

हस्तादीनि चरन् षड्क्षाण्युपपीडयन् गवामशुभः।
स्नेहरसार्घविवृद्धिं करोति चोर्वीं प्रभूतान्नाम् ॥४॥

हस्तादीनि षड् नक्षत्राणि हस्तचित्रास्वातीविशाखानुराधाज्येष्ठा इति एतानि षड् नक्षत्राणि विचरन् बुध एतेषु व्यवस्थितस्तथोपपीडयन् योगतारकां भिन्दन् गवामशुभो भवति, गा हन्ति। स्नेहानां तैलघृतानाम्। रसानां मधुरादीनामर्घवृद्धिं सामर्घ्यम्। तथोर्वीं भूमिं प्रभूतान्नां पर्याप्तसस्यां करोति। तथा च कश्यपः—

हस्तादीनि चरन् षड् वै नक्षत्राणीन्दुनन्दनः।
गवामशुभदः प्रोक्तः सुभिक्षक्षेमकारकः ॥इति॥४॥

अन्येष्वाह—

आर्यम्णं हौतभुजं भद्रपदामुत्तरां यमेशं च ।
चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुसंक्षयकृत् ॥५॥

आर्यम्णमुत्तरफल्गुनी। हौतभुजं कृत्तिकाः। हुतं भुक्त इति हुतभुगग्निस्तस्येदं हौतभुजम्। भद्रपदा उत्तरा उत्तरभद्रपदा। यमेशं भरणी। चशब्दः समुच्चये। एतानि नक्षत्राणि चन्द्रस्य सुतो बुधो निघ्नन्नुपमर्दयन् प्राणभृतां देहिनां धातूनां संक्षयं विनाशं करोति। वसासृङ्मांसमेदास्थिमज्जाशुक्राणि धातव इति। तथा च कश्यपः—

भरणी कृत्तिकार्यम्णमहिर्बुध्नं च चन्द्रजः ।
चरन् धातुविनाशाय प्राणिनां परिकीर्तितः ॥ इति ॥५॥

अन्येष्वप्याह—

आश्विनवारुणमूलान्युपमृद्नन् रेवतीं च चन्द्रसुतः ।
पण्यभिषग्नौजीविकसलिलजतुरगोपघातकरः ॥६॥

आश्विनमश्विनी, वारुणं शतभिषक्, मूलम्। एतानि नक्षत्राणि तथा रेवतीं च चन्द्रसुतो बुधश्चरन् तथोपमृद्नन् पण्यजीविनां पण्यवृत्तीनां वणिक्प्रभृतीनाम्। भिषजां वैद्यानाम्, नौजीविकानां नाविकानाम्, सलिलजानां जलोत्पन्नानां द्रव्याणां मुक्ताफलादीनाम्, तुरगाणामश्वानामुपघातं करोति नाशकर्ता भवति। तथा च कश्यपः—

रेवतीं वारुणं मूलमश्विनीं चोपमर्दयन् ।
बुधो वणिग्भिषग्वाहान् जलोत्थांश्च विनाशयेत् ॥ इति ॥६॥

अन्येष्वाह—

पूर्वाद्यृक्षत्रितयादेकमपीन्दोः सुतोऽभिमृद्नीयात् ।
क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः ॥७॥

पूर्वशब्द आदिर्यस्य तत्पूर्वाद्यृक्षत्रितयम्—पूर्वफल्गुनी, पूर्वाषाढा, पूर्वभद्रपदेति। अस्मान्नक्षत्रत्रितयादिन्दोः सुतो बुधश्चरन्नेकमभिमृद्नीयात् पीडयेत् तदा जगतो लोकस्य क्षुच्छस्त्रतस्करामयभयप्रदायी भवति। क्षुद् दुर्भिक्षम्, शस्त्रं संग्रामः, तस्कराश्चौराः, आमयो रोगः। एभ्यो भयं भीतिं प्रददाति तच्छीलः। तथा च कश्यपः—

पूर्वात्रये चरन् सौम्यो भेदं कृत्वा यदि व्रजेत् ।
क्षुच्छस्त्रतस्करभयैः करोति प्राणिनां वधम् ॥ इति ॥७॥

अथ बुधस्य सप्तगतय उक्ताः पराशरतन्त्रे । तासां च तन्मतेनैव नामान्याह—

प्राकृतविमिश्रसंक्षिप्ततीक्ष्णयोगान्तघोरपापाख्याः ।
सप्त पराशरतन्त्रे नक्षत्रैः कीर्तिता गतयः ॥८॥

प्राकृता, विमिश्रा, संक्षिप्ता, तीक्ष्णा, योगान्तिका, घोरा, पापाख्या, एताः सप्तगतयः पराशराख्ये तन्त्रे नक्षत्रैः कीर्तिता उक्ताः ॥८॥

अथैतासां नक्षत्रवशेन नामान्याह —

प्राकृतसंज्ञा वायव्ययाम्यपैतामहानि बहुलाश्च ।
मिश्रा गतिः प्रदिष्टा शशिशिवपितृभुजगदेवानि ॥९॥
संक्षिप्तायां पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति ।
तीक्ष्णायां भद्रपदाद्वयं सशाक्राश्वयुक् पौष्णम् ॥१०॥
योगान्तिकेति मूलं द्वे चाषाढे गतिः सुतस्येन्दोः ।
घोरा श्रवणस्त्वाष्ट्रं वसुदैवं वारुणं चैव ॥११॥
पापाख्या सावित्रं मैत्रं शक्राग्निदैवतं चेति ।

प्राकृतसंज्ञेति । वायव्यं स्वाती, याम्यं भरणी, पैतामहं रोहिणी, बहुलाः कृत्तिकाश्चैतानि नक्षत्राणि प्राकृतसंज्ञा गतिः । एतेषां नक्षत्राणामन्यतमे स्थितो बुधः प्राकृतगत्या स्थितो भवति ।

मिश्रा गतिरिति । शशिदेवो मृगशिरः, शिवदेव आर्द्रा, पितृदेवो मघा, भुजगदेव आश्लेषा, एतानि नक्षत्राणि बुधस्य मिश्रा नाम्नी गतिः प्रदिष्टा उक्ता ।

संक्षिप्तायामिति । पुष्यः पुनर्वसुः, फल्गुनीद्वयं पूर्वफल्गुनी, उत्तरफल्गुनी एतानि नक्षत्राणि संक्षिप्तायां गतौ ।

तीक्ष्णायामिति । भद्रपदाद्वयं पूर्वभद्रपदोत्तरभद्रपदे, शाक्रं ज्येष्ठा, अश्वयुगश्विनी, पौष्णं रेवती, तच्च सशाक्राश्वयुक् शाक्रेणाश्वयुजा च सह पौष्णमित्यर्थः । एतानि नक्षत्राणि तीक्ष्णायां गतौ ।

योगान्तिकेति । मूलम्, द्वे आषाढे पूर्वाषाढोत्तराषाढे एतानि नक्षत्राणि इन्दुसुतस्य बुधस्य योगान्तिका नाम्नी गतिः ।

घोरेति। श्रवणम्, त्वाष्ट्रं चित्रा, वसुदैवं धनिष्ठा, वारुणं शतभिषग्, एतानि नक्षत्राणि घोरा नाम्नी गतिः॥

पापाख्येति। सावित्रं हस्तः, मैत्रमनुराधा, इन्द्राग्निदैवतं विशाखा, एतानि नक्षत्राणि पापा नाम्नी गतिः। इतिशब्दः प्रकाराय। तथा च पराशरः --

अथास्य गतयः सप्त च प्राकृता विमिश्रा संक्षिप्ता तीक्ष्णा घोरा पापा योगान्तिका च। तत्र प्राकृता याम्याग्नेयरोहिणीवायव्यानि। मिश्रा सौम्यार्द्रा मघाश्लेषा च। संक्षिप्ता पुष्यार्यमणभाग्यादित्यानि। तीक्ष्णा अजपादतश्चत्वारि ज्येष्ठा च। घोरा त्रीणि श्रवणादीनि त्वाष्ट्रं च। पापा सावित्रेन्द्राग्निमैत्राणि। योगान्तिका मूलमापाढे॥९-११॥

अथ पराशरमतेनाऽऽसामेवोदयास्तलक्षणमाह--

उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह॥१२॥
चत्वारिंशत्४० त्रिंशद्३० द्विसमेता विंशति२२ द्विनवकं च १८।
नव९ मासार्द्ध१५ दश चैकसंयुताः ११ प्राकृताद्यानाम्॥१३॥

स एव पराशरमुनिर्गतिलक्षणं प्राह--उदयदिवसैः प्रवासदिवसैः। उदयः सूर्यमण्डलान्निर्गमः। प्रवासस्तत्रैवास्तमयः। तैश्च दिवसैर्गतिलक्षणं प्राहोक्तवान्।

चत्वारिंशदिति। एतानि चत्वारिंशदादीनि प्राकृताद्यानां गतीनामुदये प्रवासे च प्रमाणम्। तद्यथा--प्राकृतायां गतौ यदि बुधः स्थित उदेति तदा चत्वारिंश४०द्दिनान्युदित एव तिष्ठति। अथास्तमेति तदा चत्वारिंश४०द्दिनान्यस्तमित एव तिष्ठति। एवं मिश्रायां त्रिंशत् ३०। संक्षिप्तायां द्विसमेता विंशतिर्द्वाविंशतिः २२। तीक्ष्णायां द्विनवकमष्टादश १८। योगान्तिक्यां नव ९। घोरायां पञ्चदश १५। पापाख्यायां च दश चैकसंयुता एकादश११दिनानीति। यद्यपि गणितवासनयैतन्नोपपद्यते तथापि पराशरमङ्गीकृत्याऽऽचार्येणोक्तम्। तथा च पराशरः --

अथ [1]चत्वारिंशत्त्रिंशद्द्वाविंशत्यष्टादशपञ्चदशैकादशनवरात्राणि गतिक्रमादुदितोऽभिदृश्यते तान्येवास्तमितो भवति। उष्णशीतवाय्वभ्रसूर्येन्दुग्रहणायोदयति सस्यविघाताय चेति॥

न केवलं पराशरेणोक्तं यावद् गर्गादिभिरपि। तथा च वृद्धगर्गः --

---

१. अत्रैवोपरिस्थे पराशरवचने यथा गतिक्रमस्तत्क्रमेणैवात्र दिवसाः पठिताः सन्ति।

चत्वारिंशत्प्राकृतायां गतावालक्ष्यते बुधः ।
मासमेकं विमिश्रायां दर्शयित्वास्तमर्हति ॥
अह्नां द्वाविंशतिं सार्द्धं संक्षिप्तामेत्य लक्ष्यते ।
अष्टादशाहं तीक्ष्णायां घोरायां दश पञ्च च ॥
पापायां पादहीनानि तथैकादश तिष्ठति ।
योगान्तिक्यामिन्दुसूनुर्नवाहं लक्ष्यते तथा ॥
चारकालो य एवोक्तः सोमपुत्रस्य भागशः ।
अस्तकालः स एव स्यात् सूर्यमण्डलचारिणः ॥

तथा च कश्यपः —

चत्वारिंशत्तथा त्रिंशद्दिनानि द्वौ च विंशतिः ।
अष्टादशार्द्धमासं च दश चैकयुतानि च ॥
नव च प्राकृताद्यासु सोमजस्तूदितस्तथा ।
अस्तं गतः सर्वकालं तिष्ठतीति विनिश्चयः ॥

आचार्यस्यैतन्नाभिमतम् । यतः समाससंहितायामनेनैवोक्तम् —

प्राकृतविमिश्रसंक्षिप्ततीक्ष्णयोगान्तघोरपापाख्याः ।
गतयो लक्षणमासां नोदयदिवसैः स्फुटं भवति ॥
स्पष्टा पराशरमते स्वाती च प्राकृता त्रिभं याम्यात् ।
मिश्रा गतिः शशिशेखरभुजगपितृदेवतासौम्यैः ॥
संक्षिप्ता नाम गतिः पुनर्वसुः फल्गुनीद्वयं पुष्यः ।
तीक्ष्णा भद्रपदाद्यं नक्षत्रचतुष्टयं ज्येष्ठा ॥
मूलत्र्यृक्षं योगा घोरा श्रवणत्रिभं च सत्वाष्ट्रम् ।
पापाख्या तु विशाखा हस्तो मैत्रं च शशिसूनोः ॥ इति ॥१२–१३॥

अथैतासां फलान्याह —

प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमम् ।
संक्षिप्तमिश्रयोर्मिश्रमेतदन्यासु विपरीतम् ॥१४॥

प्राकृतगत्यां स्थिते बुधे आरोग्यं नीरोगता, वृष्टिर्वर्षणम्, प्रकृष्टा अभिप्रभूता सस्यानां वृद्धिरेतानि भवन्ति, तथा लोके क्षेमं च भवति। संक्षिप्त-

मिश्रयोर्द्वयोर्गत्योरेतदेव पूर्वोक्तं फलं मिश्रम्। आरोग्यवृष्टिसस्यप्रवृद्धयः क्षेमं च मध्यं भवति। अन्यासु परिशेषासु तीक्ष्णयोगान्तघोरपापाख्यासु विपरीतम्। अनारोग्यमनावृष्टिः सस्यानामवृद्धिरक्षेममिति। तथा च पराशरः —

तासां प्रथमा गतिः क्षेमारोग्याम्बुसस्यवती। इतरे द्वे व्यामिश्रफले। शेषाश्चतस्रो दुर्भिक्षाक्षेमाय। विशेषतस्तु सौम्यादिषड्नक्षत्रचारी सुवृष्टये। श्रविष्ठावारुणयोश्च। दक्षिणतो नैर्ऋतेन्द्रपूर्वासु भयकृत्। अश्विन्यां वणिग्विनाशाय। त्वाष्ट्रे शरत्सस्यानाम्। रोहिणीश्रवणाग्नेयब्रह्मराशिष्वम्भोदविनाशः। हस्तोदितो मैत्रमनुचरन् पशुगोकोशलानभिहन्ति। विशाखामध्यगश्च सस्यमिति। तथा च गर्गः —

क्षेमारोग्यसुभिक्षेषु लक्षणा प्राकृता गतिः।
संक्षिप्ता च विमिश्रा च शुभाशुभफलोदये ॥
तीक्ष्णा घोरा च पापा च तथा योगान्तिकापरा।
एताश्चतस्रः सौम्यस्य दुर्भिक्षाक्षेमलक्षणाः ॥ इति ॥१४॥

अधुना देवलमतेन बुधस्य गतिचतुष्टयमाह —

ऋज्व्यतिवक्रावक्रा विकला च मतेन देवलस्यैताः।
पञ्चचतुर्द्व्येकाहा ऋज्व्यादीनां षडभ्यस्ताः ॥१५॥

आकृत्येव या स्वाभाविकी गतिः सा ऋज्वी अवक्रा। कुटिलगतित्वमाश्रित्य तन्मध्ये ग्रहस्य यदा भुक्त्यभावो भवति तदा अतिवक्रा गतिरुच्यते। ऋजुं मार्गं परित्यज्य निवृत्तिं करोति सा वक्रा। विकला वैकारिकी गतिर्या न्यूना। ऋज्वी चातिवक्रा च वक्रा च यास्ता ऋज्व्यतिवक्रावक्राः। न केवलं ऋज्व्यतिवक्रावक्राः। यावद्विकला। चकारः समुच्चये। देवलस्य मतेनैताश्चतस्रो गतयः। तथा च वृद्धगर्गः —

ऋजुर्गच्छति चेद् मार्गमविकारं प्रदक्षिणम्।
ग्रहो यस्मात्तु तस्मात् सा ऋज्वी तु गतिरुच्यते ॥
कुर्वन्ति वक्रं वक्रायां यस्मान्नित्यं महाग्रहाः।
अङ्गारकप्रभृतयस्तस्माद्वक्रेति सा गतिः ॥
वक्राद् भूयो महावक्रमनुकुर्वन्ति चेद् ग्रहाः।
अनेनैवानुमानेन सातिवक्रोच्यते गतिः ॥

विस्खलन्ति यथा चारान्मार्गादस्तमयोदयात् ।
गतेस्तस्माद्धि विकला सा गतिः परिकीर्तिता ॥

तथा चाऽऽचार्येण विकला गतिः प्रदर्शितैव —

[1]अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां याम्याम् ।
कर्कटकमसम्प्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम् ॥

तथा च ऋषिपुत्रेणोक्तम् —

उन्मार्गस्थानमार्गस्था ग्रहाः कुर्वन्ति पार्थिवान् ।
मार्गवन्तश्च मार्गस्थान् कुर्वन्ति वसुधाधिपान् ॥
सत्पथप्रतिपन्नेषु पार्थिवेषु भवन्ति हि ।
प्रजाः सत्पथमापन्ना विपर्यासे विपर्ययः ॥

आसां प्रमाणमाह—

पञ्चचतुर्द्व्येकाहा इति। उदयप्रवासदिवसैरित्यनुवर्तते। पञ्चचतुर्द्व्येकाहाः षडभ्यस्ताः षड्गुणितास्त्रिंशदादीनि भवन्ति। एतानि ऋज्व्यादीनां प्रमाणम्। एतदुक्तं भवति—यदा बुधस्त्रिंश३०द्दिनानि उदितस्तिष्ठत्यस्तमितो वा तदा सा ऋज्वीनाम्नी बुधस्य गतिः। एवमन्यासामपि ज्ञेयम्। तेन चत्वारः षडभ्यस्ताः चतुर्विंशतिः २४। चतुर्विंशद्दिनान्यतिवक्रायाः प्रमाणम्। द्वौ षडभ्यस्तौ द्वादश १२। द्वादशदिनानि वक्रायाः प्रमाणम्। एकाहः षडभ्यस्तः षड्दिनानि ६ भवन्ति। एतानि विकलायाः प्रमाणम् ॥१५॥

अथाऽऽसां फलान्याह —

ऋज्वी हिता प्रजानामतिवक्राऽर्घं गतिर्विनाशयति ।
शस्त्रभयदा च वक्रा विकला भयरोगसंजननी ॥१६॥

ऋज्वी गतिः प्रजानां हिता शुभकरी। अतिवक्रा गतिरर्धं विनाशयति दुर्भिक्षं करोति। वक्रा शस्त्रभयदा शस्त्रभयं संग्रामभीतिं करोति। विकला भयं भीतिं रोगान् गदांश्च संजनयत्युत्पादयति। तथा च देवलः —

दिनानि त्रिंशदुदितस्तिष्ठेद्यदि च सोमजः ।
ऋज्वी गतिः सा विज्ञेया प्रजानां हितकारिणी ॥

---

१. आदित्यचारस्य ४ श्लोकः। द्रष्टव्यमस्य ग्रन्थस्य ८४ पृष्ठम्।

चतुर्विंशद्दिनान्येवं यदि तिष्ठेच्च सोमजः ।
अतिवक्रा गतिर्ज्ञेया दुर्भिक्षगतिलक्षणा ॥
अहानि द्वादश यदा बुधस्तिष्ठेत्तथोद्गतः ।
वक्राः गतिः सा विज्ञेया शस्त्रसम्भ्रमकारिणी ॥
षड् दिनानि यदा तिष्ठेदुद्गतः सोमनन्दनः ।
विकला सा गतिर्ज्ञेया भयरोगविवर्धिनी ॥
एवमस्तमये सर्वं गतिजं सोमजस्य तु ।
भावाभावाय लोकानां फलं वाच्यं शुभाशुभम् ॥ इति ॥१६॥

अथोदयास्तमयोः शुभाशुभलक्षणमाह—

पौषाषाढश्रावणवैशाखेष्विन्दुजः समाघेषु ।
दृष्टो भयाय जगतः शुभफलकृत्प्रोषितस्तेषु ॥१७॥

पौषाऽऽषाढश्रावणवैशाखेषु मासेषु माघसहितेषु इन्दुजो बुधो दृष्ट उदित इत्यर्थः। जगतो लोकस्य भयाय भीत्यै भवति। तेष्वेव पौषादिषु मासेषु प्रोषितोऽस्तं गतः शुभफलकृद् भवति जगतः शुभफलं करोति। अमुमेवार्थं वृद्धगर्ग आह—

वैशाखपौषमाघेषु श्रावणाषाढयोरपि ।
न दृश्यते बुधः प्रायो मासेष्वन्येषु दृश्यते ॥
यदाऽदृश्येषु दृष्टः स्याद् दृश्येषु च न दृश्यते ।
गवां रोगमनावृष्टिं दुर्भिक्षं चापि निर्दिशेत् ॥

तथा च पराशरः—

वैशाखाषाढयोर्माघे पौषश्रावणयोस्तथा ।
बुधो न दृश्यते जातु दृश्येत भयमादिशेत् ॥
पौषे करोति मरकं माघे वातं तथा च सोमसुतः ।
वैशाखे जनमरकमाषाढे श्रावणे च दुर्भिक्षम् ॥ इति ॥१७॥

अन्येष्वप्याह—

कार्तिकेऽश्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशोः ।
शस्त्रचौरहुतभुग्गदतोयक्षुद्भयानि च तदा विदधाति ॥१८॥

कार्तिके अश्वयुजि मासे वा यदि शिशिरांशोश्चन्द्रस्य तनुभवः पुत्रो दृश्यते उद्गच्छतीत्यर्थः। भयशब्दः प्रत्येकमपि संबध्यते। तदा शस्त्रभयं संग्रामभयम्,

चौरभयं तस्करभयम्, हुतभुग्भयमग्निभयम्, गदभयं रोगभयम्, तोयभयं जलभयम्, क्षुद्भयं दुर्भिक्षभयमेतानि विदधाति करोति ॥१८॥

अन्यदुदयास्तमयवशेनेन्दुजस्य फलमाह—

रुद्धानि सौम्येऽस्तगते पुराणि यान्युद्गते तान्युपयान्ति मोक्षम् ।
अन्ये तु पश्चादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः ॥१९॥

सौम्ये बुधेऽस्तगते सूर्यमण्डलस्थे यानि पुराणि नगराणि रुद्धानि शत्रुभिर्वेष्टितानि तानि तस्मिन्नेवोद्गते उदिते रविमण्डलान्निष्क्रान्ते मोक्षमुपयान्ति प्राप्नुवन्ति, ततो रोद्धा चलतीत्यर्थः। अन्ये त्विति। अन्ये तु पुनस्तज्ज्ञाः पण्डिता नन्दिप्रभृतयः पश्चादुदिते बुधे पश्चिमायां दिश्युद्गते पुराणां लाभो लब्धिर्भवतीति वदन्ति कथयन्ति। लाभश्चाभियोक्तुर्भवति। अन्यथोदिते पुरपतेरेव। तथा च नन्दी—

पश्चाद्धुदिते सौम्ये लभते पुररोधकः ।
पुनः प्रागुदिते तस्मिन् पुरमोक्षं विनिर्दिशेत् ॥ इति ॥१९॥

अथास्य बिम्बलक्षणमाह—

हेमकान्तिरथवा शुकवर्णः सस्यकेन मणिना सदृशो वा ।
स्निग्धमूर्तिरलघुश्च हिताय व्यत्यये न शुभकृच्छशिपुत्रः ॥२०॥

हेमकान्तिः सुवर्णाभः, अथवा शुकवर्णः शुककान्तिर्नीलपीतवर्ण इत्यर्थः। सस्यकेन मणिना नीलवर्णेन सदृशस्तुल्यो वा। तथा स्निग्धमूर्तिर्निर्मलदेहः। अलघुश्च विस्तीर्णबिम्बः। एवंविधः शशिपुत्रो बुधो लोकानां हिताय श्रेयसे भवति। व्यत्यये उक्तविपर्यये न शुभकृन्न शुभकरः। तथा च पराशरः—

विमलजलरजतस्फटिकाभः प्रशस्यते ॥ इति ॥२०॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ बुधचारो
नाम सप्तमोऽध्यायः ॥७॥

अथ बृहस्पतिचारो व्याख्यायते

तत्रादावेव महाकार्तिकादीनां षष्टयब्दवर्षाणां संज्ञाज्ञापनार्थमाह—

नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री ।
तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव ॥१॥

येन नक्षत्रेण सहोदयं याति सुरमन्त्री गुरुर्यस्मिन्नक्षत्रे स्थितः सूर्यमण्डलादुदयं दर्शनं याति तन्नक्षत्रं गुरुसहितम्। अथवा येन नक्षत्रेण सहास्तं याति यस्मिन्नक्षत्रे स्थितः सूर्यमण्डले प्रविशति तत्संज्ञं तन्नामधेयं वर्षं वक्तव्यं लोके वाच्यम्। तच्च मासक्रमेणैव मासपरिपाट्या। अनन्तरोक्तस्यार्थस्य नक्षत्रेण सहोदयमस्तं चेत्यस्य सन्देहव्युदासार्थमाह—मासक्रमेणैव। अन्यमासनक्षत्रेण सहास्तं गतोऽन्यमासनक्षत्रेण सहोदितः। यथा रोहिणीस्थोऽस्तं गतो मृगशिरःस्थश्चोदयं गतस्तदानन्तराक्रान्तमाससंज्ञितक्रमेण वर्षं बोद्धव्यमिति। ऋषिपुत्रादिभिरुदयनक्षत्रमाससंज्ञितक्रमेण वर्षं वक्तव्यमित्युक्तम्। तथा च ऋषिपुत्र आह—

यत्रोत्तिष्ठति नक्षत्रे सह येन प्रवर्धते ।
संवत्सरः स विज्ञेयस्तन्नक्षत्रविधायकः ॥

तथा च काश्यपः—

संवत्सरे युगे चैव षष्टचब्देऽङ्गिरसः सुतः ।
यन्नक्षत्रोदयं कुर्यात्तत्संज्ञं वत्सरं विदुः ॥

प्रभवादीनामब्दानां प्रवृत्तिर्गुरोरुदयकालादित एव। यतो गुरुरत्राबाधितत्वेन स्थितः। तथा च ऋषिपुत्र आह—

तिष्यादि च युगं प्राहुर्वसिष्ठात्रिपराशराः ।
बृहस्पतेस्तु सौम्यान्तं सदा द्वादशवार्षिकम् ॥
उदेति यस्मिन् मासे तु प्रवासोपगतोऽङ्गिराः ।
तस्मात् संवत्सरो मासो बार्हस्पत्योऽथ गम्यते ॥ इति।

तथा च गर्गः—

प्रवासान्ते सहर्क्षेण तूदितो युगपच्चरेत् ।
तस्मात् कालादृक्षपूर्वो गुरोरब्दः प्रवर्तते ॥

कचित् कृत्तिकादियुक्ते गुरौ यच्चन्द्रयुक्तं नक्षत्रं चैत्रमासादितो भवति, ततो महाकार्तिकादीनि संवत्सराणि प्रभवादीनि च गणयन्ति। अपरे सौरमानेन गणयन्ति। तदयुक्तम्। यस्मात् सौरं मानमधिकं गुरुमानात्। यदुत्कृष्टं मानं तत्स्वल्पतरमानेनानुमीयमानं बहुतरं भवति। यथा—अष्टयवेनाङ्गुलेन ये पादोना

[1]एकाशीतिहस्तास्त एव सप्तयवेनानुमीयमाना हस्तशतं भवन्ति। एवं सौरं मानं गुरुमानाच्चतुर्युगेण न्यूनं भवति। आचार्याऽऽर्यभटेन च प्रदर्शितम्—

गुरुभगणा राशिगुणा आश्वयुजाद्या गुरोरब्दाः ।
गुरुभगणानां संख्या जिनयमवेदर्तुहव्यभुक्तुल्याः ३६४२२४॥

राशिगुणा इति। भगणे द्वादश राशयो भवन्ति तैर्गुणा द्वादशगुणा इत्यर्थः। द्वादशगुणा गुरोरब्दाः। वस्वष्टरसाम्बराद्रिगुणवेदतुल्याः ४३७०६८८। रविभगणा एव रव्यब्दाः खचतुष्टयरदवेदतुल्याः ४३२०००० । गुरोरब्दानां रव्यब्दानां चान्तरे कृते गुरोरब्दाः समधिका जाता वस्वष्टर्तुखेषवः ५०६८८। अत्र च त्रैराशिकम्—यदि चतुर्युगरव्यब्दानामनन्तरप्रदर्शितगुरुरव्यब्दान्तरं लभ्यते तदैकस्य रव्यब्दस्य कियदिति। न्यासः—४३२०००० । ५०६८८। १॥ फलं रविवर्षभोग इति। रव्यब्दानां कृतखगुणयमै२३०४रपवर्तितानां शरागाष्टेन्दवो लभ्यन्ते १८७५। तावद्भागेन रविगुरुवर्षान्तरस्य द्व्यधिका विंशतिर्भवति २२। सप्तत्यधिकेऽब्दशते एकादशभागैः पञ्चभिरधिके १७०$\frac{५}{११}$ गते गुरुयुक्तनक्षत्रमाससंज्ञवर्षद्वयमधिकं भवति। तथा च गर्ग आह—

युगानि द्वादशाब्दानि तत्र तानि बृहस्पतेः ।
तत्र सावनसौराभ्यां सावनाब्दो निरुच्यते ॥
एवमाश्वयुजं चैव चैत्रं चैव बृहस्पतिः।
संवत्सरं नाशयते सप्तत्यब्दशतेऽधिके॥

एवं नष्टजातकेऽपि—

"[2]लग्नत्रिकोणेषु गुरुस्त्रिभागैर्विकल्प्य वर्षाणि वयोऽनुमानात्" इत्यनेन गणितेन यान्यतीतवर्षाण्यागतानि तानि द्व्यधिकया विंशत्या २२ गुणयित्वा पादोनैरेकोनविंशतिशतै १८७५ विभज्य लब्धमनन्तरोक्तश्लोकानीतगुर्वतीतजन्मवर्षाणां विशोध्य शेषं स्फुटतरमतीतजन्मवर्षपिण्डं भवतीति। अत्र गुणकारभागहारयोराचार्येण द्विगुणतोपनिबद्धा। यत आचार्यप्रणीतकालेऽतीतं षष्ट्यब्दादेर्वर्षद्वयं त्रयो मासाश्चतुर्दश दिनानि दिनशेषं खद्विदश १०२०। अक्षागाष्टरूपाणि १८७५

---

१. अर्द्धोना अष्टाशीतिहस्ता इति पाठः साधुः।
२. बृहज्जातके २६ अध्यायस्य नष्टजातकाख्यस्य २ श्लोकः।

छेदः। तत्परिणामाय छेदं तेन वर्षद्वयेन सङ्गुण्य ततो मासत्रयं दिनीकृत्य सदिनं कृत्वा तेन छेदेन सङ्गुण्य शेषं युक्तं कृत्वा खर्त्वग्निभि ३६० विभज्यावाप्तं शतपञ्चकं चतुश्चत्वारिंशदधिकं सार्द्धम् ५४४½। तच्च वर्षघ्ने छेदे संयोज्यते। तस्य च सविकलत्वात् सवर्णनाय द्वाभ्यां गुणना क्रियते। स्वाधःस्थं रूपार्द्धं योज्यते। ततः सवर्णीकृतो भवति। एवं क्षेपस्य द्विगुणत्वाद् गुणकारभागहारावप्याचार्येण द्विगुणावुपनिबद्धाविति। तदर्थं [1]चतुश्चत्वारिंशद् गुणकारः। शून्यशरागरामा ३७५० भागहार इति ॥१॥

यदुक्तं वर्षं मासक्रमेणैव तत् कथमित्यत आह—

वर्षाणि कार्तिकादीन्याग्नेयाद् भद्रयानुयोगीनि।
क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम् ॥२॥

कार्तिकादीनि कार्तिकमासपूर्वाणि वर्षाणि भवन्ति मासससमानि द्वादश। तानि चाग्नेयात् कृत्तिकातः प्रभृति भद्रयानुयोगीनि। भद्रयेनानुयोगो येषाम्। नक्षत्रद्वयानुयोगीनि क्रमशः क्रमेण परिपाट्या भवन्ति।

त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षमिति। पञ्चमं फाल्गुनं वर्षम्। त्रिभं नक्षत्रत्रयानुयोगि। अन्त्यं द्वादशं चाश्वयुजं त्रिभम्। तस्य समीपमुपान्त्यमित्येकादशं च त्रिभम्। एवं पञ्चममुपान्त्यमन्त्यं च वर्षत्रयं त्रिभम्। तद्यथा—कृत्तिकारोहिणीभ्यां कार्तिकः। मृगशिरआर्द्राभ्यां मार्गशीर्षः। पुनर्वसुतिष्याभ्यां पौषः। आश्लेषामघाभ्यां माघः। पूर्वफल्गुन्युत्तरफल्गुनीहस्तैः फाल्गुनः। चित्रास्वातीभ्यां चैत्रः। विशाखानुराधाभ्यां वैशाखः। ज्येष्ठामूलाभ्यां ज्यैष्ठः। पूर्वाषाढोत्तराषाढाभ्यामाषाढः। श्रवणधनिष्ठाभ्यां श्रावणः। शतभिषक्पूर्वभद्रपदोत्तरभद्रपदाभिर्भाद्रपदः। रेवत्यश्विनीभरणीभिश्चाश्वयुज इति। एतदुक्तं भवति—यदा कृतिकायां रोहिण्यामवस्थितो वा गुरुरुदयं याति तदा कार्तिकं वर्षं ज्ञेयम्। एवमन्येषामपि। अत्रान्ये एवं व्याचक्षते—यथोपान्त्यमन्त्यं चेत्यत्रान्त्यशब्दः समीपवाची। उपान्त्यस्यैकादशस्य समीपं दशमं श्रावणं न तु द्वादशमाश्वयुजमिति। यतस्तत्र गर्गादिवचनैः सह विरोधो भवति। तथा च गर्ग आह—

फल्गुनी चैव हस्तं च चरेद्यदि बृहस्पतिः।
स फाल्गुनोऽब्दः क्रूरः स्याद्धान्यमुच्चाटतां व्रजेत् ॥

---

१. द्रष्टव्योऽस्यैवाध्यायस्य २० श्लोकः।

श्रवणादीनि च त्रीणि चरेद्यदि बृहस्पतिः ।
श्रावणो नाम सोऽब्दः स्यात् क्षेमसौभिक्षमूर्तिमान् ॥
पूर्वोत्तरे प्रोष्ठपदे चरेद्रेवतिमेव च ।
प्रौष्ठपाद इति ज्ञेयो मध्यमो वत्सरो हि सः ॥
आश्विनं चैव याम्यं च चरेद्यदि बृहस्पतिः ।
संवत्सरः सोऽश्वयुक् स्यात् सर्वभूतहितावहः ॥

तथा च पराशरः—

कृत्तिकारोहिणीपूदिते क्षुच्छस्त्राग्निना वृष्टिव्याधिप्रावल्यं गोशाकटिकपीडा च। सौम्यरौद्रयोरेतदेव गवादिवर्ज्जम्। तिष्यपुनर्वस्वोरुक्तविपर्ययः। पुष्यवन्मघाश्लेषासु राज्ञामुपतापश्च। फल्गुनीसावित्रेषु क्वचित्क्षेमसुभिक्षं नारीदौर्भाग्यं च। चित्रास्वात्योरुदितो नृपसस्यवर्षक्षेमारोग्यकरः। एवमेव मैत्रेन्द्राग्न्योरैन्द्रनैर्ऋतयोर्वनस्पतिसस्यवर्षश्रेष्ठनृपतिप्रधानजनविनाशायेतरवृद्धये । अषाढयोः प्राक्परसस्यानां वृद्धये मध्यमक्षेमवर्षणमन्योन्यभेदश्च। श्रवणधनिष्ठावारुणेषु यज्ञनृपसस्यवर्षारोग्यवृद्धये। अजाहिर्बुध्न्यपौष्णेष्वाषाढवत्फलं प्राक्परसस्यविपर्ययः। प्रभूतजलसस्यर्द्धिजलक्षेमाण्यश्वयुग्भरण्योरिति ॥

एवमत्रान्त्यशब्देन समीपं दशमं वर्षं श्रावणमन्त्येनाऽऽश्वयुजमिति न शोभनम्। अत्र केचिदृषिपुत्रस्य मतभेदं मन्यन्ते—

त्रिनक्षत्रास्त्रयस्तत्र स्युः सौम्यत्वाप्ट्रवैष्णवाः ।
द्विनक्षत्राः स्मृताः शेषाः पूर्वपश्चिमयोगतः ॥ इति ।

स्वमतेनैतद्विरुध्यते। यदि त्रिनक्षत्रो मार्गशीर्षस्तदा माघस्त्वेकनक्षत्रो भवति "द्विनक्षत्राः स्मृताः शेषाः" इत्यनेन सह विरुद्धचते। यस्मात् त्रयस्त्रिनक्षत्राः शेषा द्विनक्षत्राः स्मृतास्त्वेकनक्षत्रो नास्त्येव। तस्मात् पुस्तकपाठेऽयं सिद्धान्तपाठः कथ्यते।

त्रिनक्षत्रास्त्रयस्तत्र ज्ञेया भाग्याजवैष्णवाः ।
द्विनक्षत्राः स्मृताः शेषाः पूर्वपश्चिमयोगतः ॥ इति ।

[1]तथा च गर्गः—

नववारा द्विनक्षत्रा गुरोर्द्वादशमासिकाः ।
शेषास्त्रयस्त्रिनक्षत्राः पञ्चमैकादशान्तिमाः ॥

---

१. तथा च वृद्धगर्ग इति अ० क० पु० पाठः।

तथा च काश्यपः—

कार्तिकादिसभा ज्ञेया द्विनक्षत्रविचारिणा ।
त्रिभं भाद्रपदे ज्ञेयं फाल्गुने श्रावणे तथा ॥

तस्मात् "क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम्" इत्यत्र पञ्चमैकादशदशास्त्रिनक्षत्रांश्चेति शोभनम् ॥२॥

अथैतेषां कार्तिकादीनां वर्षाणां फलानि विवक्षुरादौ कार्तिक आह—

शकटानलोपजीवकगोपीडा व्याधिशस्त्रकोपश्च ।
वृद्धिस्तु रक्तपीतककुसुमानां कार्तिके वर्षे ॥३॥

कार्तिके वर्षे शकटोपजीविनां शकटेन गन्त्र्या य उपजीवन्ति तेषाम्। तथा अनलोपजीविनां सुवर्णकारलोहकारा[1]यस्कारादीनाम्। गवां च पीडा भवति। तथा व्याधयो रोगाः शस्त्रकोपश्च युद्धानि भवन्ति। तथा रक्तपीतककुसुमानां द्रव्याणां रक्तं पीतं च पुष्पं येषां सम्भवति तेषां च वृद्धिर्भवति। तथा च गर्गः—

कार्तिकः प्रचुरातङ्कः क्षुच्छस्त्राग्निभयप्रदः ।
गोशाकटिकपीडां च करोत्येवमवृष्टिदः ॥ इति ॥३॥

अथ मार्गशीर्ष आह—

सौम्येऽब्देऽनावृष्टिर्मृगाखुशलभाण्डजैश्च सस्यवधः ।
व्याधिभयं मित्रैरपि भूपानां जायते वैरम् ॥४॥

सौम्ये मार्गशीर्षेऽब्दे अनावृष्टिर्भवति। मृगा अरण्यपशवः, आखवो मूषकाः, शलभाः प्राणिनः कीटजातयः, अण्डजाः पक्षिणः, एतैः सस्यानां वधो नाशो भवति। तथा व्याधिभयं रोगभीतिः। भूपानां राज्ञां मित्रैरपि सुहृद्भिरपि वैरमप्रीतिर्जायत उत्पद्यते। किं पुनः शत्रुभिः सह न भवेदिति। तथा च गर्गः—

वर्षहन्ता व्याधिकरो मिथो भेदभयावहः ।
शलभाद्याकुलः सौम्यो दुर्भिक्षभयकारकः ॥ इति ॥४॥

---

१. अयस्कारो विशिष्टलोहकार इति।

अथ पौष आह—

शुभकृज्जगतः पौषो निवृत्तवैराः परस्परं क्षितिपाः ।
द्वित्रिगुणो धान्यार्घः पौष्टककर्मप्रसिद्धिश्च ॥५॥

पौषोऽब्दो जगतो लोकस्य शुभकृच्छुभमिष्टं करोति। क्षितिपा राजानः परस्परमन्योन्यं निवृत्तवैरा निगतद्वेषा भवन्ति। धान्यस्यार्घो द्विगुणस्त्रिगुणो वा भवति। धान्यस्य यन्मूल्यमासीत्तेनैव द्विगुणं त्रिगुणं वा धान्यं लभ्यते। तथा पौष्टककर्मणां पुष्टिदानां कार्याणां प्रसिद्धिर्भवति। अतिशयेन भवतीत्यर्थः। तथा च गर्गः—

प्रशान्तव्याधिदुर्भिक्षदुर्वर्षाशनितस्करः ।
सर्वलक्षणसम्पन्नः पौषः संवत्सरोत्तमः ॥इति॥५॥

अथ माघ आह—

पितृपूजापरिवृद्धिर्माघे हार्दिश्च सर्वभूतानाम् ।
आरोग्यवृष्टिधान्यार्घसम्पदो मित्रलाभश्च ॥६॥

माघे पितॄणां पूजापरिवृद्धिर्भवति। अत्यर्थं जनाः पितृपूजाकर्मणि रता भवन्तीत्यर्थः। मघायाः पितृदैवतत्वात् सर्वभूतानां च हार्दिश्चित्ततुष्टिर्भवति। तथा आरोग्यं नीरोगता, वृष्टिर्वर्षणम्, धान्यस्यार्घसम्पत्समर्घता, एते भवन्ति। तथा मित्रलाभश्च भवति। यत्किञ्चिन्मित्रत्वमापद्यत इत्यर्थः। तथा च गर्गः—

क्षेमारोग्यं सुभिक्षं च वर्षणं शिवमेव च ।
पितृपूजाः प्रवर्तन्ते माघे राज्ञां च सन्धयः ॥इति॥६॥

अथ फाल्गुन आह—

फाल्गुनवर्षे विन्द्यात् क्वचित्क्वचित्क्षेमवृष्टिसस्यानि ।
दौर्भाग्यं प्रमदानां प्रबलाश्चौरा नृपाश्चोग्राः ॥७॥

फाल्गुनवर्षे क्वचित्क्वचित्क्षेमवृष्टिसस्यानि विन्द्याज्जानीयात्। क्वचित्क्षेमं क्वचिद् वृष्टिः क्वचिच्च सस्यं भवति न सर्वत्र। तथा प्रमदानां स्त्रीणां दौर्भाग्यं दुर्भाग्यत्वं तन्नृणामवाल्लभ्यं भवति। प्रबलाश्चौरास्तस्करा बहवो भवन्ति। तथा नृपाश्च राजान उग्राः क्रूरा भवन्ति। तथा च गर्गः—

नारीदौर्भाग्यकृच्चौरः फाल्गुनः सस्यवर्षदः ।
क्वचित् क्षेमं सुभिक्षं च क्वचिदक्षेमकारकः ॥ इति ॥७॥

अथ चैत्र आह—

चैत्रे मन्दा वृष्टिः प्रियमन्नं क्षेममवनिपा मृदवः ।
वृद्धिश्च कोशधान्यस्य भवति पीडा च रूपवताम् ॥८॥

चैत्रेऽब्दे वृष्टिर्मन्दा अल्पा भवति। प्रियमन्नं सुदुर्लभमन्नं भवति। लोके क्षेमं लब्धपालनं तथा अवनिपा राजानो मृदवोऽक्रूरा भवन्ति। कोशधान्यस्य शिम्बिधान्यस्य मुद्गादेर्वृद्धिर्बाहुल्यम्। तथा रूपवतां सुरुपाणां पीडा भवति। चशब्दः समुच्चये। तथा च गर्गः—

मृदुप्रचारा राजानः प्रियमन्नं जनस्य च।
क्षेमारोग्यं च मृदुता चैत्रवर्षस्तथा मृदुः ॥ इति ॥८॥

अथ वैशाख आह—

वैशाखे धर्मरता विगतभयाः प्रमुदिताः प्रजाः सनृपाः ।
यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः सर्वसस्यानाम् ॥९॥

वैशाखेऽब्दे सनृपाः प्रजा नृपेण राज्ञा सहिताः सर्वजनपदा धर्मरता धर्मसक्ता विगतभया भयरहिताः प्रमुदिताः प्रहृष्टाश्च भवन्ति। तथा यज्ञक्रियाणां यागकर्मणां प्रवृत्तिः प्रवर्तनं भवति। सस्यानां सर्वेषां च निष्पत्तिरशेषाणां सस्यानां समृद्धिर्भवति। तथा च गर्गः—

ईतयः प्रथमं यान्ति सन्धिं कुर्वन्ति पार्थिवाः ।
वैशाखे तु सस्यजन्या वृष्टयः सम्भवन्ति हि ॥ इति ॥९॥

अथ ज्येष्ठ आह—

ज्यैष्ठे जातिकुलधनश्रेणीश्रेष्ठा नृपाः सधर्मज्ञाः ।
पीड्यन्ते धान्यानि च हित्वा कङ्गुं [1]शमीजातिम् ॥१०॥

---

१. सबीजानीति पाठान्तरम्।

ज्यैष्ठेऽब्दे जातिकुलधनश्रेणीश्रेष्ठा जातीनां ये श्रेष्ठाः प्रधानाः, कुलश्रेष्ठाः सत्कुलजाः, धनश्रेष्ठा अतिधनिनः, श्रेणीश्रेष्ठा बहूनां समानजातीयानां संज्ञा श्रेणी, ततः श्रेष्ठाः प्रधानाः, नृपा राजानस्ते च सधर्मज्ञा धर्मज्ञैर्जनैः सहिताः, ते सर्व एव पीड्यन्ते। तथा धान्यानि च पीड्यन्ते सर्वाण्येव। किन्तु हित्वा कङ्गुं शमीजातिम्। कङ्गुः प्रियङ्गुः, शमीजातिस्तिलादिः, एतद्धित्वा वर्जयित्वा। केचित् सबीजानीति पठन्ति। तथा च गर्गः--

वृक्षगुल्मलतासस्यक्षेमवर्षविनाशनः ।
क्रूराज्ञादीप्तिजननो ज्यैष्ठो ज्येष्ठनृपान्तकृत् ॥ इति ॥१०॥

अथाऽऽषाढ आह--

आषाढे जायन्ते सस्यानि क्वचिदवृष्टिरन्यत्र ।
योगक्षेमं मध्यं व्यग्राश्च भवन्ति भूपालाः ॥११॥

आषाढेऽब्दे क्वचित्क्वचित्सस्यानि जायन्ते उत्पद्यन्ते न सर्वत्र। अन्यत्रान्यत्र देशेषु अवृष्टिरवर्षणं भवति। तथा लोके योगक्षेमं मध्यमं भवति। अलब्धलाभो योगः, लब्धपालनं क्षेमम्, तच्च मध्यमं भवति। न चात्युत्कृष्टं न चातिनिकृष्टमित्यर्थः। भूपाला राजानो व्यग्राः सोद्यमा भवन्ति। तथा च गर्गः----

दुर्भिक्षाक्षेमजननश्चाषाढोऽन्योन्यभेदकृत् ।
भूपालयुद्धजननो मध्यमक्षेमकारकः ॥ इति ॥११॥

अथ श्रावण आह----

श्रावणवर्षे क्षेमं सम्यक् सस्यानि पाकमुपयान्ति ।
क्षुद्रा ये पाखण्डाः पीड्यन्ते ये च तद्भक्ताः ॥१२॥

श्रावणवर्षे क्षेमं भवति। तथा सर्वाणि सस्यानि सम्यग् निश्चितं पाकं निष्पत्तिमुपयान्ति। तथा ये क्षुद्राः क्रूरा ये च पाखण्डा वेदबाह्यास्ते सर्वे पीड्यन्ते। ये च तद्भक्तास्तेषां क्षुद्राणां पाखण्डानां भक्ताः सेवकास्ते पीड्यन्ते बाध्यन्ते। तथा च [1]गर्गः---

श्रावणः सस्यसम्पन्नः क्षेमारोग्यकरः शिवः।

---

१. बृद्धगर्ग इति अ० क० पु० पाठः ।

धान्यं समर्घतां याति सम्यग् वर्षति वासवः ।
क्षुद्रान् पाखण्डिनः सर्वान् तद्भक्तांश्चोपतापयेत् ॥ इति ॥१२॥

अथ भाद्रपद आह--

भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्वसस्यं च ।
न भवत्यपरं सस्यं क्वचित्सुभिक्षं क्वचिच्च भयम् ॥१३॥

भाद्रपदेऽब्दे वल्लीजं मुद्गादिकं निष्पत्तिं परिपाकं याति प्राप्नोति। तथा च पूर्वं प्रथममुप्तं सस्यं निष्पत्तिं याति। अपरं पश्चादुप्तं सस्यं न भवति। क्वचित् सुभिक्षं क्वचिच्च भयं भीतिर्भवति। तथा च गर्गः—

प्रौष्ठपात् सस्यजननो नाशयत्यपरं च यत् ।
करोति च क्वचित् क्षेमं क्वचिदक्षेमकारकः ॥ इति ॥१३॥

अथाऽऽश्वयुज आह—

आश्वयुजेऽब्देऽजस्रं पतति जलं प्रमुदिताः प्रजाः क्षेमम् ।
प्राणचयः प्राणभृतां सर्वेषामन्नबाहुल्यम् ॥१४॥

आश्वयुजेऽब्दे वर्षेऽजस्रं सततं जलं पतति सततं वर्षतीत्यर्थः। तथा प्रजाः सर्वाः प्रमुदिताः प्रहृष्टाः। क्षेमं च भवति। तथा प्राणभृतां शरीरिणां सर्वेषामवशेषाणां प्राणचयो बलोपचयो भवति। तथाऽन्नबाहुल्यमतिसुभिक्षं च। तथा च वृद्धगर्गः—

पर्याप्तसस्यान्नजलक्षेमश्चाश्वयुजः शिवः ।
सम्प्रवृत्तोत्सवः श्रीमान् सर्वकामसुखावहः ॥ इति ।

तथा च समाससंहितायाम्—

गुरुरुदयति नक्षत्रे यस्मिंस्तत्संज्ञितानि वर्षाणि ।
द्विभयोगीन्याग्नेयात्त्रिभमन्त्यं पञ्चममुपान्त्यम् ॥

अनेन वाक्येनाऽऽचार्यस्य प्रथमैव व्याख्या साध्वी। उपान्त्यमेकादशमन्त्यं च द्वादशमिति। तथा च--

फाल्गुनचैत्राषाढा मध्याः सौम्योऽधमस्तथा ज्यैष्ठः ।
वैशाखपौषमाघाः शुभफलदाः श्रावणाद्याश्च ॥ इति ॥१४॥

अथ नक्षत्रेषु चरतो गुरोर्विशेषफलमाह--

उदगारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन् भानाम् ।
याम्ये तद्विपरीतो मध्येन तु मध्यफलदायी ॥१५॥

वाक्पतिर्बृहस्पतिर्भानां नक्षत्राणामुदगुत्तरेण चरन् गच्छन्नारोग्यसुभिक्षक्षेमकरः आरोग्यं सुभिक्षं क्षेमं च करोति। याम्ये दक्षिणेन चरंस्तद्विपरीतः अनारोग्यमसुभिक्षमक्षेमं च करोति। मध्येन तु चरन् मध्यभागेन नक्षत्रस्य गच्छन् मध्यफलदायी भवति। मध्यमं फलं ददाति न शुभं नाशुभमिति ॥१५॥

अन्यदप्याह--

विचरन् भद्वयमिष्टस्तत्सार्द्धं वत्सरेण मध्यफलः ।
सस्यानां विध्वंसी विचरेदधिकं यदि कदाचित् ॥१६॥

वत्सरेण वर्षेण भद्वयं नक्षत्रद्वयं विचरन् गच्छन् गुरुरिष्टः शोभनः। एतदुक्तं भवति-बृहस्पतिर्यदा वर्षेण नक्षत्रद्वयं भुङ्क्ते तदा स प्रजानां शुभकरो भवति। तत्सार्द्धं वत्सरेण मध्यफल इति। तन्नक्षत्रद्वयं सार्द्धं यदि वत्सरेण विचरति तदा मध्यफलो मध्यमं फलं करोति। न शुभं नाप्यशुभमित्यर्थः। सस्यानां विध्वंसीति। अधिकं भद्वयात् सार्द्धाद्यदि कदाचिद्विचरेद्वर्षेण तदा सस्यानां विध्वंसी भवति। सस्यानि विनाशयतीत्यर्थः। तथा च पराशरः--

मध्यदक्षिणोत्तरमार्गप्रविचारी मध्यदारुणोत्तमप्रजाभावकरः। श्वेतरक्तपीतकृष्णवर्णो ब्राह्मणादिवर्णजयाय। सपादमृक्षद्वयमब्देन प्रविचरन् सस्यसम्पत् करोति। विपर्ययाद्विपरीतः ॥१६॥

अथ गुरोर्वर्णलक्षणमाह--

अनलभयमनलवर्णे व्याधिः पीते रणागमः श्यामे ।
हरिते च तस्करेभ्यः पीडा रक्ते तु शस्त्रभयम् ॥१७॥

धूमाभेऽनावृष्टिस्त्रिदशगुरौ नृपवधो दिवा दृष्टे ।
विपुलेऽमले सुतारे रात्रौ दृष्टे [1]प्रजाः स्वस्थाः ॥१८॥

त्रिदशगुरौ देवाचार्ये बृहस्पतावनलवर्णेऽग्निप्रभेऽनलभयमग्निभीतिर्भवति। पीते पीतवर्णे व्याधिः पीडा। श्यामे श्यामवर्णे रणागमः संग्रामः। हरिते हरितवर्णे शुकाभे तस्करेभ्यश्चौरेभ्यः पीडोपतापो लोकानां भवति। रक्ते लोहितवर्णे शस्त्रभयम् ॥१७॥

धूमाभे धूमप्रभे अनावृष्टिरवर्षणम्। दिवा दिवसभागे दृष्टे नृपवधो राज्ञो मृत्युर्भवति। तथा च पराशरः--

कदाचिद्यत्र दृश्येत दिवा देवपुरोहितः ।
राजा वा म्रियते तत्र स देशो वा विनश्यति ॥

विपुले महाबिम्बे। अमले निर्मले। सुतारे शोभनतारे। रात्रौ निशि। दृष्टे प्रजा लोकाः स्वस्था नीरोगा भवन्ति। केचिन्नृपाः स्वस्था इति पठन्ति ॥१८॥

अथ संवत्सरपुरुषमाह--

रोहिण्योऽनलभं च वत्सरतनुर्नाभिस्त्वषाढाद्वयं
सार्पं हृत्पितृदैवतं च कुसुमं शुद्धैः शुभं तैः फलम् ।
देहे क्रूरनिपीडितेऽग्न्यनिलजं नाभ्यां भयं क्षुत्कृतं
पुष्पे मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम् ॥१९॥

रोहिण्योऽनलभं कृत्तिकाः। एते द्वे नक्षत्रे संवत्सरतनुः संवत्सरपुरुषस्य शरीरम्। अषाढाद्वयं पूर्वाषाढोत्तराषाढे तस्यैव नाभिः। सार्पमाश्लेषा हृत् हृदयम्। पितृदैवतं मघा कुसुमं पुष्पमिति। प्रयोजनमप्याह--शुद्धैः शुभं तैः फलमिति। तैस्तन्वादिभिः शुद्धैः पापग्रहविरहितैर्लोके शुभं फलं भवति। देहे क्रूरनिपीडित इति। क्रूरग्रहा रविभौमसौराः। देहे तनौ कृत्तिकारोहिण्योरित्यर्थः। क्रूरनिपीडिते क्रूरहते तयोर्यदि पापाः स्थितास्तदा अग्न्यनिलजं भयं भवति। अग्निर्हुतवहः, अनिलो वायुः, अनयोर्जातम्। तथा नाभ्यां पीडितायामषाढाद्वय इत्यर्थः। क्षुत्कृतं दुर्भिक्षभयं भवति। पुष्पे मघायां पीडितायां मूलफलक्षयः, मूलानां मूलद्रव्याणां फलानां चाम्रादीनां क्षयो

---

१. नृपाः स्वस्था इति पाठान्तरम्।

विनाशो भवति। अथशब्दः स्वार्थे। हृदये आश्लेषायां पीडितायां ध्रुवमवश्यं सस्यस्य धान्यस्य नाशः क्षयो भवति। तथा च काश्यपः--

कृत्तिका रोहिणी चोभे संवत्सरतनुः स्मृता ।
अषाढाद्वितयं नाभी सार्पं हृत्कुसुमं मघा ।।
क्रूरग्रहहते देहे दुर्भिक्षानलमारुताः ।
क्षुद्भयं तु भवेन्नाभ्यां पुष्पे मूलफलक्षयः ।।
हृदये सस्यहानिः स्यात् सौम्यैः पुष्टिः प्रकीर्तिता। इति ।।१९।।

अधुना षष्टयब्दानयनमाह--

गतानि वर्षाणि शकेन्द्रकाला-
द्धतानि रुद्रैर्गुणयेच्चतुर्भिः ।
नवाष्टपञ्चाष्ट ८५८९ युतानि कृत्वा
विभाजयेच्छून्यशरागरामैः ३७५० ।।२०।।
लब्धेन युक्तं शकभूपकालं
संशोध्य षष्टया विषयैर्विभज्य ।
युगानि नारायणपूर्वकाणि
लब्धानि शेषाः क्रमशः समाः स्युः ।।२१।।

शका नाम म्लेच्छजातयो राजानस्ते यस्मिन् काले विक्रमादित्यदेवेन व्यापादिताः स कालो लोके शक इति प्रसिद्धः। तस्माच्छकेन्द्रकालात् शकनृपवधादारभ्याभीष्टवर्षं यावद् यानि वर्षाणि गतान्यतीतानि तानि संस्थाप्य हतानि रुद्रैरेकादशभिर्गुणयेत्, ततः पुनरपि चतुर्भिर्गुणयेत्। एवं चतुश्चत्वारिंशता गुणितानि भवन्तीत्यर्थः। ततो नवाष्टपञ्चाष्टयुतानि कार्याणि। अष्टभिः सहस्रैः पञ्चभिः शतैरेकोननवत्याधिकैरित्यर्थः ८५८९। एवं कृत्वा ततः शून्यशरागरामैर्विभाजयेत्। त्रिभिः सहस्रैः सप्तभिः शतैः सार्द्धैरित्यर्थः ३७५०। एतैर्भागमपहरेत्, लब्धं फलं वर्षाणि। तान्येव बृहस्पतिराशयः। शेषं त्रिंशता सङ्गुण्य तेनैव छेदेन विभज्यावाप्तं भागा राशीनामधः स्थाप्याः। भागशेषं षष्टया सङ्गुण्य तेनैव छेदेन भागमपहृत्यावाप्तं लिप्ता भागानामधः स्थाप्याः। शेषं षष्टया सङ्गुण्य तेनैव छेदेन भागमपहृत्यावाप्तं विलिप्ता लिप्तानामधः स्थाप्याः ।।२०।।

लब्धेन युक्तमिति। ततस्तेन लब्धेन राश्यादिना फलेन शकभूपकालं शकनृपसमयं युक्तं कार्यम्। वर्षेषु राशयः क्षेप्याः शेषमधः स्थापयेत्। यतस्तानि वर्ष-

रूपाण्येव गुरो राशयः सम्पन्नाः। ततः संशोध्य षष्ट्या। वर्षस्थाने योऽसौ राशिस्ततः षष्ट्या भागमपहरेत्। लब्धमतीतषष्ट्यब्दाः। शेषं वर्तमानषष्ट्यब्दस्य गतवर्षाणि। यतो गुरो राशिभोग एव वर्षम्। ततस्तान्यब्दान्यत्र विषयैः पञ्चभिर्विभज्य लब्धं वर्तमानषष्ट्यब्दस्यातीतयुगानि। एतानि नारायणपूर्वकाणि विष्णुप्रभृतीनि भवन्ति। पञ्चभिर्भागे हृते यच्छेषं तदेव वर्तमानयुगस्याब्दाः सविकला गताः। शेषं पञ्चभ्यः संशोध्य यदवशिष्यते तावन्ति वर्षाणि तत्र भवन्ति ॥२१॥

अथ बृहस्पतिनक्षत्रज्ञानं तद्वशेन वर्षज्ञानमप्याह--

एकैकमब्देषु नवाहतेषु दत्त्वा पृथग् द्वादशकं क्रमेण।
हृत्वा चतुर्भिर्वसुदेवताद्यान्युडूनि शेषांशकपूर्वमब्दम् ॥२२॥

वर्तमानषष्ट्यब्दस्य ये गताः सविकला अब्दा अनष्टाः पृथक् स्थापिताः। तान् सविकलान् पृथगेकत्र नवभिर्गुणयेत्, ततो द्वितीयस्थानस्थेभ्यो वर्तमानषष्ट्यब्द-गतवर्षेभ्यो द्वादशभागं वर्षादिकं गृहीत्वा नवगुणितेष्वब्देषु योजयेत्। यत उक्तम्— एकैकमब्देषु नवाहतेषु दत्त्वा पृथग् द्वादशकं क्रमेणेति। द्वादशभिर्द्वादशभिर्वर्षैरेकैकं योजयेत्। वर्षस्थाने द्वादशभिर्भागमपहृत्य लब्धं वर्षाणि त एव राशयः। शेषं त्रिंशता षष्ट्या षष्ट्या च सङ्गुण्य विकलासहितं कृत्वा प्राग्वद् भागाद्यानीय तत्र राशीनामधः स्थापयित्वा द्वादशभागं नवाहतेष्वब्देषु योजयेद्यथास्थानमेव। ततः स्वच्छेदैर्भागमपहृत्यावाप्तं यथास्थानमुपर्युपरि योजयेत्। ततस्तत्र चतुर्भिर्भागमपहृत्य यल्लब्धं तान्युडूनि नक्षत्राणि वसुदेवताद्यानि धनिष्ठादीनि भवन्ति। शेषं स्थाप्यम्। लब्धस्य सप्तविंशत्यावशेषाङ्कसमं धनिष्ठादिकं नक्षत्रं वक्तव्यम्। तत्र चतुर्भिर्भागे हृते यच्छेषं स्थापितं तदंशकपूर्वमब्दं भवति। लब्धसंख्यनक्षत्रात् परस्य नक्षत्रस्य तावद्भिरंशैश्चतुर्भागैर्गुरुणा भुक्तेर्वर्तमानात् पूर्वस्य कार्तिकादेः प्रवृत्तिरिति। यदुक्तम्--[1]वर्षाणि कार्तिकादीन्याग्नेयाद् भद्रयानुयोगीनीत्यादि। एतन्मध्यगत्या ज्ञेयम्, न स्फुटगत्येति। अत्राऽऽनयनमाचार्येण स्फुटतरं पञ्चसिद्धान्तिकाया-मुक्तम्। तथा च--

[2]रविशशिनोः पञ्च युगं वर्षाणि पितामहोपदिष्टानि।
अधिमासास्त्रिंशद्भिर्मासैरवमो द्विषष्ट्या ह्नाम् ॥

---

१. अस्यैवाध्यायस्य २ श्लोकः। द्रष्टव्यमस्य ग्रन्थस्य १७३ पृष्ठम्।

२. पञ्चसिद्धान्तिकायाम् १२ अध्यायस्य पैतामहसिद्धान्ताख्यस्य १–३ श्लोकाः। तत्र १ श्लोके "द्विषष्ट्या तु", २ श्लोके "कुर्याद् द्युगणं तदह्नयुदयात्", ३ श्लोके च "सैकषटघंशे मणे" इति पाठः।

ऊनं शकेन्द्रकालं पञ्चभिरुद्धृत्य शेषवर्षाणाम् ।
युगणं माघसिताद्यं कुर्याद्युगभानि वह्न्युदयात् ॥
सैकत्रिंशे युगणे तिथिर्भमार्कं नवाहतेऽक्ष्यर्कैः ।
दिग्रसभागैः सप्तभिरूनं शशिभं धनिष्ठाद्यम् ॥इति।

गतानि वर्षाणीत्यत्रोत्पत्तिः प्रदर्श्यते--

पूर्वमेव रव्यब्दानां गुरुवर्षाणां चान्तरे कृते त्रैराशिकेन प्रतिवर्षमन्तरं[1] प्रदर्शितम्। तत्र फलभागाद्भाज्यभाजकराशी द्वावप्यपवर्तितौ। तत्र भाज्यराशिर्जातो द्वाविंशतिः २२। भाजकराशिः शरागाष्टेन्दवः १८७५। तत्र च शकेन्द्रकालाद् गतवर्षाणि सौराणि यातानि यानि तानि च बार्हस्पत्यानि क्रियन्ते। कथम् ?उच्यते--पृथक्स्थानि द्वाविंशत्या सङ्गुण्य शरागाष्टेन्दुभिर्विभज्य लब्धं वर्षाणि त एव राशयः कल्प्याः। शेषार्त्रिंशदादिगुणकारगुणितात् प्राग्वद्विभज्याऽऽप्तमंशादिकं वर्षाणामधः स्थापयेत्। तच्च वर्षादिफलं तत्रैव शककाले संयोज्य बार्हस्पत्येन मानेन तानि वर्षाणि भवन्ति। एवं स्थिते सति तत्र शककालात् प्राग्गतस्य षष्टचब्दस्य छेदपरिणतं शेषमस्ति वेदनवयमाब्धयः सार्द्धाः ४२९४½। एतान्यत्र योज्यानि भवन्तीति तदर्थं सवर्णीक्रियते। स्वच्छेदेन द्विकेन गुणयित्वा रूपं च संयोज्य जातो राशिर्नवाष्टपञ्चाष्टाख्यः ८५८९। एवं क्षेपसवर्णिते सति गुणकभाजकावपि सवर्णीकृतौ यतः, तेनैवात्र गुणकारश्चतुश्चत्वारिंश ४४ दङ्को जातः। भागहारः शून्यशरागरामाख्यः ३७५०। लब्धेन फलेन शककालं संयुतं कृत्वा बार्हस्पत्येन मानेनाब्दगणो भवति। तस्य षष्टचा भागे हृते अतीताः षष्टचब्दा भवन्ति। शेषस्य पञ्चभिर्भागे हृते युगानि लभ्यन्ते। यतः पञ्चवार्षिकं युगम्। ततो नवाहता अब्दा नक्षत्रपदा भवन्ति, राश्यात्मकत्वात्। अत्र द्वादशकक्रमेणैकैको नक्षत्रपादो दीयते पृथक्स्थादब्दसमूहात्। यतस्तत्र वर्षद्वादशके नक्षत्रे पादमन्तरं भवति। चतुर्भिर्भागे हृते नक्षत्राणि सविकलानि भवन्ति। तेषां च धनिष्ठादिका गणना। यतो धनिष्ठास्थे गुरौ षष्टचब्दप्रवृत्तिः। यतो वक्ष्यति "[2]आद्यं धनिष्ठांशम्" इत्यादि। अर्थादेवाशेषं भोग्यनक्षत्रपादा भवन्तीति ॥२२॥

अधुना द्वादशानां षष्टचब्दावस्थितानां युगानां नामान्याह--

विष्णुः सुरेज्यो बलभिद्धुताशस्त्वष्टोत्तरप्रोष्ठपदाधिपश्च ।
क्रमाद्युगेशाः पितृविश्वसोमशक्रानलाख्याश्विभगाः प्रदिष्टाः ॥२३॥

---

१. द्रष्टव्ये अस्य ग्रन्थस्य १७१–१७२ पृष्ठे।
२. अस्यैवाध्यायस्य २७ श्लोकः।

विष्णुर्नारायणः प्रथमयुगम्। सुरेज्यो बृहस्पतिर्द्वितीययुगम्। बलभिदिन्द्रस्तृतीयम्। हुताशोऽग्निश्चतुर्थम्। त्वष्टा नाम प्रजापतिः पञ्चमम्। उत्तरप्रोष्ठपदाधिपोऽहिर्बुध्न्यः षष्ठम्। पिता सप्तमम्। विश्वौऽष्टमम्। सोमो नवमम्। शक्रानल इन्द्राग्निर्दशमम्। अश्विसंज्ञमेकादशम्। भगः सूर्यो द्वादशम्। एते देवविशेषा द्वादश क्रमादानुपूर्व्येण युगेशा युगस्वामिनः प्रदिष्टा उक्ताः। तथा च समाससंहितायाम्—

विष्णुगुरुशक्रहुतभुक्त्वष्टाहिर्बुध्न्यपित्र्यविश्वानि ।
सौम्यमथेन्द्राग्न्याख्यं त्वाश्विनमपि भाग्यसंज्ञं च ॥ इति ॥२३॥

अत्र युगे युगे पञ्च वर्षाणि भवन्ति। तेषां नाम दैवतं च प्रत्येकस्याह—

संवत्सरोऽग्निः परिवत्सरोऽर्क इदादिकः शीतमयूखमाली ।
प्रजापतिश्चाप्यनुवत्सरः स्यादिद्वत्सरः शैलसुतापतिश्च ॥२४॥

संवत्सरपरिवत्सरेदाद्यनुवत्सरेद्वत्सराख्यानि पञ्च वर्षाणि भवन्ति। तत्र यः संवत्सरः प्रथमोऽब्दः सोऽग्निदैवत्यः। परिवत्सरो द्वितीयः सोऽर्कदैवत्यः सूर्याधिपः। यश्चेदादिकः इदाशब्द आदौ यस्य स इदावत्सरस्तृतीयस्तस्य शीतमयूखमाली चन्द्रोऽधिपतिः। योऽनुवत्सरश्चतुर्थस्तस्य प्रजापतिर्ब्रह्माऽधिपतिः। य इद्वत्सरः पञ्चमस्तस्य शैलसुतापतिरुमाभर्ता रुद्र इति। अत्र दैवतकथनेन किं प्रयोजनम्? उच्यते—यथा युगानामधिपतय उक्तास्तथा वर्षाणामपि। तस्मिन् वर्षे तस्या देवताया यागः सम्पत्यर्थं वेदे पठ्यते। तदर्थं दैवतकथनमिति ॥२४॥

अथैतेषां फलान्याह—

वृष्टिः समाद्ये प्रमुखे द्वितीये प्रभूततोया कथिता तृतीये ।
पश्चाज्जलं मुञ्चति यच्चतुर्थं स्वल्पोदकं पञ्चममब्दमुक्तम् ॥२५॥

आद्ये संवत्सराख्ये वर्षे समा वृष्टिर्भवति, न चातिबह्वी न चात्यल्पा। श्रावणभाद्रपदाऽश्वयुजकार्तिकमासेषु चतुर्ष्वपि तुल्या भवतीत्यर्थः। द्वितीये परिवत्सरे प्रमुखे प्रथमभागे आदावेव वृष्टिर्भवति न पश्चात्। श्रावणभाद्रपदयोर्भवति नाश्वयुजकार्तिकयोरित्यर्थः। तृतीये इदावत्सरे प्रभूततोया बहुजला वृष्टिर्भवति चतुर्ष्वपि मासेषु। यच्चतुर्थवर्षमनुवत्सराख्यं तत्पश्चादन्ते जलं मुञ्चति वर्षति। न प्रथममाश्वयुजकार्तिकयोर्न श्रावणभाद्रपदयोरित्यर्थः। यत्पञ्चममब्दं वर्षमिद्वत्सराख्यं तत्स्वल्पोदकमल्पजलमुक्तं कथितं चतुर्ष्वपि मासेषु ॥२५॥

अधुना युगान्युत्तममध्यमाधमान्याह--

चत्वारि मुख्यानि युगान्यथैषां विष्ण्विन्द्रजीवानलदैवतानि।
चत्वारि मध्यानि च मध्यमानि चत्वारि चान्त्यान्यधमानि विन्द्यात् ॥२६॥

एषां द्वादशानां युगानां मध्याच्चत्वारि युगानि मुख्यानि उत्तमफलानि प्रयच्छन्ति। अथशब्दः पादपूरणे चार्थे वा। कानि तानि ? विष्णुः। इन्द्रः। जीवो बृहस्पतिः। अनलोऽग्निः। विष्णुदैवतं प्रथमम्। इन्द्रदैवतं तृतीयम्। बृहस्पतिदैवतं द्वितीयम्। अग्निदैवतं चतुर्थम्। एतानि मुख्यानि। तथा चत्वारि युगानि मध्यानि मध्यमान्येव मध्यफलानि न शुभानि नाप्यशुभानि। कानि च तानि ? त्वष्टृदैवतम्। अहिर्बुध्न्यदैवतम्। पितृदैवतम्। विश्वदैवतम्। एतानि मध्यफलानि। तथा चान्त्यानि चत्वारि। सोमदैवतम्। इन्द्राग्निदैवतम्। अश्विदैवतम्। भगाख्यदैवतम्। एतान्यधमानि दुष्टफलानि विन्द्याज्जानीयात्। तथा च समाससंहितायाम्--

चत्वारि युगान्यादौ शुभानि मध्यानि मध्यमफलानि।
चत्वार्यन्त्यानि न शोभनानि वर्षैर्विशेषोऽत्र ॥ इति ॥२६॥

अधुना षष्टयब्दपूर्वस्य प्रभवाख्यस्याब्दस्य प्रवृत्तिकालमाह--

आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदा यात्युदयं सुरेज्यः।
षष्टयब्दपूर्वः प्रभवः स नाम्ना प्रपद्यते भूतहितस्तदाब्दः ॥२७॥

सुरेज्यो बृहस्पतिः। आद्यं प्रथमं धनिष्ठांशं धनिष्ठायाः प्रथमपादमभिप्रपन्नस्तत्र स्थितो माघे मासे यदा यस्मिन् काले उदयं याति सूर्यमण्डलादुद्गच्छति तदा तस्मिन् काले षष्टयब्दपूर्वः षष्टयब्दस्य प्रथमोऽब्दः। स च प्रभवो नाम्ना प्रभवसंज्ञः प्रपद्यते प्रवर्तते। तस्य प्रारम्भो भवतीत्यर्थः। एतच्चान्द्रेण मानेन यो मासस्तत्र सम्भवति न सौरमानेन। यतः [1]कृतदृक्कर्मद्वयो गुरुर्यदा राशिनवकाद्भागत्रयोविंशते-

---

१. कृतदृक्कर्मद्वयो गुरुरायनाक्षजदृक्कर्मसंस्कृतो गुरुर्यदा धनिष्ठादिवर्थाद् राशिनवकाद् भागत्रयेविंशतेर्लिप्तार्विंशतेश्चार्वाक् तदैव रविश्च राशिदशकं षड्भागान् विंशतिलिप्तांश्च भुक्त्वा भोगं कृत्वा स्थितो भवति, तदाऽवश्यं तयोरन्तरे त्रयोदश कालांशा उत्पद्यन्तेऽतस्तदा गुरोरुदयः। यत आचार्येणापि पञ्चसिद्धान्तिकायां सप्तदशाध्यायस्य १२ श्लोकेन गुरोरुदये स्फुटगुरुरव्यन्तरं १३ अंशा उदिताः। अतो यदि वराहमिहिरमतानुसारिण्येव भट्टोत्पलस्य व्याख्या कल्प्यते, तर्हि द्वादशलिप्ता इत्यत्र विंशतिलिप्ता इति पाठं साधुं मन्त्र इति। अथ यदा रवेः कुम्भसंक्रान्तिस्तदैव चान्द्रो माघः। सौरश्च तदा फाल्गुन एव। अत इयं संस्था चान्द्रमानेनैव सम्भवतीति।

लिप्ताविंशतेश्चार्वाग्भवति, सूर्यश्च राशिदशकं षड् भागान् द्वादशलिप्ताश्च भुक्त्वा स्थितो भवति, तदैतत्सम्भवति नान्यत्रेति। कीदृशोऽब्दः ? भूतहितो भूतानां सत्त्वानां हितोऽनुकूल इति ॥२७॥

तथा च स्वरूपमाह--

क्वचित्स्ववृष्टिः पवनाग्निकोपः सन्तीतयः श्लेष्मकृताश्च रोगाः ।
संवत्सरेऽस्मिन् प्रभवे प्रवृत्ते न दुःखमाप्नोति जनस्तथापि ॥२८॥

अस्मिन् प्रभवाख्ये संवत्सरे वर्षे प्रवृत्ते प्रतिपन्ने सति क्वचित्स्ववृष्टिरवर्षणं भवति न सर्वत्र। तथा पवनाग्निकोपः। पवनो वायुः। अग्निर्हुताशनः। वायुप्रकोपोऽग्निप्रकोपश्च क्वचिद् भवति। तथा ईतयोऽतिवृष्ट्यादय उपद्रवाः सन्ति भवन्ति। श्लेष्मकृताः कफोत्पन्नाश्च रोगा गदाश्च क्वचिद् भवन्ति। तथापि जनो लोको न दुःखं कृच्छ्रमाप्नोति लभते ॥२८॥

अथान्येष्वब्देषु नामानि फलं चाह—

तस्माद् द्वितीयो विभवः प्रदिष्टः शुक्लस्तृतीयः परतः प्रमोदः ।
प्रजापतिश्चेति यथोत्तराणि शस्तानि वर्षाणि फलान्यथैषाम् ॥२९॥
निष्पन्नशालीक्षुयवादिसस्यां भयैर्विमुक्तामुपशान्तवैराम् ।
संहृष्टलोकां कलिदोषमुक्तां क्षत्रं तदा शास्ति च भूतधात्रीम् ॥३०॥

तस्मात् प्रभवाद् द्वितीयोऽब्दो विभवनामा प्रदिष्ट उक्तः। तृतीयः शुक्लः। परतोऽनन्तरं चतुर्थः प्रमोदः। प्रजापतिः पञ्चमश्चेति। इतिशब्दः प्रकाराय। एतानि वर्षाणि यथोत्तराणि उत्तरोत्तराणि। शस्तानि शुभानि। अथानन्तरमेषां वर्षाणां फलानि भवन्ति ॥२९॥

निष्पन्नेत्यादि। तदा तस्मिन् युगे क्षत्रं राजवर्गो भूतधात्रीं वसुन्धरामेवंविधां शास्ति पालयति। किंभूताम् ? निष्पन्ना निष्ठाः प्राप्ताः शालय इक्षवो यवादयः सस्यानि च यस्यां ताम्। आदिग्रहणाद् गोधूममसूरचणकमुद्गमाषा गृह्यन्ते। तथा भयैर्दुःखैर्विमुक्तां वर्जिताम्। उपशान्तवैरां नष्टद्वेषाम्। संहृष्टलोकां प्रहृष्टजनाम्। कलिदोषमुक्तां कलियुगे ये दोषा अधर्मव्याधिदारिद्र्यशोककालमृत्युप्रभृतयस्तैर्मुक्तां रहिताम्। अथवा कलिः कलहः। दोषा राष्ट्रोपतापाः ॥३०॥

अथ द्वितीययुगस्याह—

आद्योऽङ्गिराः श्रीमुखभावसाह्वौ युवा सुधातेति युगे द्वितीये ।
वर्षाणि पञ्चैव यथाक्रमेण त्रीण्यत्र शस्तानि समे परे द्वे ॥३१॥
त्रिष्वाद्यवर्षेषु निकामवर्षी देवो निरातङ्कभयश्च लोकः ।
अब्दद्वयेऽन्त्येऽपि समा सुवृष्टिः किन्त्वत्र रोगाः समरागमश्च ॥३२॥

द्वितीये बार्हस्पत्ययुगे आद्यः प्रथमोऽब्दोऽङ्गिराः, द्वितीयः श्रीमुखः, तृतीयो भावसाह्वो भावसेत्याह्वः संज्ञा यस्य, चतुर्थो युवा, पञ्चमः सुधाता। एतानि पञ्च वर्षाणि यथाक्रमेण परिपाट्या स्थितानि। अत्रास्मिन् युगे त्रीणि प्रथमानि वर्षाणि शस्तानि शोभनानि। परे पश्चिमे चतुर्थपञ्चमे द्वे समे न शुभे नाप्यशुभे इति ॥३१॥

त्रिष्वाद्यवर्षेष्विति। आद्येषु प्रथमेषु त्रिषु वर्षेषु अङ्गिरःश्रीमुखभावसाह्वेषु देव इन्द्रो निकामवर्षी निकामं पर्याप्तं वर्षति। लोको जनो निरातङ्कभयः, आतङ्क उपद्रवो भयं भीतिश्च निर्गता अविद्यमाना यस्य। तथा अन्त्ये पश्चिमे अब्दद्वये वर्षयुग्मे सुवृष्टिः शोभना वृष्टिः समा तुल्या भवति, नातिबह्वी नात्यल्पा यथाकालोपयोग्या। किन्तु अत्रास्मिन् वर्षद्वये रोगा गदा भवन्ति। तथा समरागमश्च। समरः संग्रामस्तस्यागमः प्राप्तिः ॥३२॥

अथ तृतीययुगस्याह—

शाक्रे युगे पूर्वमथेश्वराख्यं वर्षं द्वितीयं बहुधान्यमाहुः ।
प्रमाथिनं विक्रममप्यथान्यद् वृषं च विन्द्याद् गुरुचारयोगात् ॥३३॥
आद्यं द्वितीयं च शुभे तु वर्षे कृतानुकारं कुरुतः प्रजानाम् ।
पायः प्रमाथी वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च ॥३४॥

शाक्रे इन्द्रे युगे पूर्वं प्रथमं वर्षमीश्वरसंज्ञम्। अथशब्दः पादपूरणे। द्वितीयं वर्षं बहुधान्यसंज्ञमाहुरुक्तवन्तः। प्रमाथिनं तृतीयम्। विक्रमं चतुर्थम्। अपिशब्दश्चार्थे। अथशब्द आनन्तर्ये। अन्यत् पञ्चमं वृषं नाम गुरुचारयोगाद् बृहस्पतिचारसंयोगाद्विन्द्याज्जानीयात्। यतो बार्हस्पत्येनैव मानेनैतानि वर्षाणि भवन्ति। यस्मिन् काले गुरुरादित्यमण्डलादुदेति तस्मिन्नेव कालेऽब्दप्रवृत्तिः। अत उक्तं गुरुचारयोगादिति ॥३३॥

आद्यं द्वितीयं चेति। आद्यं वर्षं द्वितीयं च एते द्वे वर्षे शुभे प्रशस्तफले प्रजानां लोकानां कृतानुकारं कृतयुगस्यानुकारं कुरुतः। तद्धर्मानुष्ठानात् तत्सदृशमित्यर्थः। धर्मरताः सुखिता दीर्घजीविन्यः प्रजा भवन्तीति यावत्। प्रमाथी नाम

तृतीयोऽब्दः स पापोऽनिष्टफलः। वृषविक्रमौ तु द्वावब्दौ सुभिक्षदौ सुभिक्षं ददतः, किन्तु रोगभयप्रदौ रोगभयं कुरुतः ॥३४॥

अथ चतुर्थस्य युगस्याह--

श्रेष्ठं चतुर्थस्य युगस्य पूर्वं यच्चित्रभानुं कथयन्ति वर्षम् ।
मध्यं द्वितीयं तु सुभानुसञ्ज्ञं रोगप्रदं मृत्युकरं [1]नतं च ॥३५॥
तारणं तदनु भूरिवारिदं सस्यवृद्धिमुदितातिपार्थिवम् ।
पञ्चमं व्ययमुशन्ति शोभनं मन्मथप्रबलमुत्सवाकुलम् ॥३६॥

श्रेष्ठमिति। चतुर्थस्य युगस्य हुताशाख्यस्य पूर्वं प्रथमं वर्षं यच्चित्रभानुसंज्ञं तच्छ्रेष्ठं शुभं कथयन्ति प्रवदन्ति। तस्यैव द्वितीयं सुभानुसंज्ञं तच्च मध्यं मध्यफलम्। तृतीयं नतं नाम तच्च रोगप्रदं रोगान् ददाति। मृत्युकरं मृत्युं च करोति ॥३५॥

तदनु तस्य तृतीयस्य वर्षस्य पश्चाच्चतुर्थं वर्षं तारणं नाम, तच्च भूरिवारिदम्, भूरि बहु वारि जलं ददाति। तथा सस्यवृद्धिमुदितातिपार्थिवम्, सस्यानां वृद्धिः, मुदितातिपार्थिवं मुदितो हृष्टोऽतीवात्यर्थं पार्थिवो राजा च यत्र। तथा पञ्चमं वर्षं व्ययसंज्ञं तच्च श्रेष्ठमुशन्ति कथयन्ति। मन्मथप्रबलम्, मन्मथः कामः प्रबल उद्धतो यस्मिन् वर्षे तत्। तथोत्सवैर्विवाहादिभिराकुलं सोद्यमम् ॥३६॥

अथ पञ्चमस्य युगस्याह--

त्वाष्ट्रे युगे सर्वजिदाद्य उक्तः संवत्सरोऽन्यः खलु सर्वधारी ।
तस्माद्विरोधी विकृतः खरश्च शस्तो द्वितीयोऽत्र भयाय शेषाः ॥३७॥

त्वाष्ट्रे युगे आद्यः प्रथमः संवत्सरोऽब्दः सर्वजिन्नामा उक्तः कथितः। अन्यो द्वितीयः सर्वधारी। खलुशब्दो वाक्यालङ्कारे आगमद्योतनार्थे वा। तस्माद् द्वितीयात् परतस्तृतीयो विरोधी नाम। चतुर्थो विकृतः। पञ्चमः खरः। शस्तो द्वितीयोऽत्र भयाय शेषा इति। अत्रास्मिन् युगे द्वितीयोऽब्दः शस्तः शुभः। शेषाः प्रथमतृतीयचतुर्थपञ्चमा भयाय भवन्ति भयं कुर्वन्ति। अनिष्टफलदा इत्यर्थः ॥३७॥

---

१. सम्प्रति प्रसिद्धज्यौतिषफलग्रन्थेषु सर्वेष्वस्य वत्सरस्य पार्थिवेति नाम। तदर्थं मूले आधुनिका विद्वांसो 'न तच्च' इति पाठं कल्पयन्ति। अस्माभिर्भट्टोत्पलव्याख्यानुसारेणात्र पाठ उपन्यस्त इति।

अथ षष्ठस्य युगस्याह--

नन्दनोऽथ विजयो जयस्तथा मन्मथोऽस्य परतश्च दुर्मुखः ।
[1]कान्तमत्र युग आदितस्त्रयं मन्मथः समफलोऽधमोऽपरः ॥३८॥

अहिर्बुध्न्ये युगे प्रथमोऽब्दो नन्दनः। अथानन्तरं द्वितीयो विजयः। तथा तेनैव प्रकारेण तृतीयो जयः। चतुर्थो मन्मथः। अस्य चतुर्थस्य परतोऽनन्तरं दुर्मुखः पञ्चमः। अत्रास्मिन् युगे आदित आदौ प्रथमं वर्षत्रयं कान्तं शुभमित्यर्थः। केचित् 'कान्तमत्र युगमादितस्त्रये' इति पठन्ति। अत्रास्मिन् युगमादित आदौ प्रथमवर्षत्रये कान्तम्। मन्मथः समफलः, न शुभो नाप्यशुभ इत्यर्थः। अपरश्च दुर्मुखोऽधमः, अशुभफल इत्यर्थः ॥३८॥

अथ सप्तमस्य युगस्याह--

हेमलम्ब इति सप्तमे युगे
स्याद्विलम्बि परतो विकारि च ।
शर्वरीति तदनु प्लवः स्मृतो
वत्सरो गुरुवशेन पञ्चमः ॥३९॥
ईतिप्राया प्रचुरपवना वृष्टिरब्दे तु पूर्वे
मन्दं सस्यं न बहुसलिलं वत्सरेऽतो द्वितीये ।
अत्युद्वेगः प्रचुरसलिलः स्यात्तृतीयश्चतुर्थो
दुर्भिक्षाय प्लव इति ततः शोभनो भूरितोयः ॥४०॥

सप्तमे पैत्रे युगे हेमलम्ब इति प्रथमो वत्सरः स्यात्। विलम्बि द्वितीयः। परतोऽनन्तरं तृतीयो विकारि। चशब्दः समुच्चये। शर्वरीति चतुर्थः। तदनु तत्पश्चात् पञ्चमो वत्सरोऽब्दः प्लवः इति स्मृत उक्तः। गुरुवशेन बृहस्पतिचारयोगात् ॥३९॥

ईतिप्रायेति। पूर्वे प्रथमेऽब्दे वर्षे ईतिप्रायाऽतिवृष्ट्याद्युपद्रवबहुला। प्रचुरपवना बहुवाता वृष्टिर्भवति। अतोऽब्दाद् द्वितीये वत्सरे मन्दमल्पं सस्यं न बहुसलिलं प्रभूतजलं भवति। तृतीयो वत्सरोऽत्युद्वेगकरः प्रभूतदोषदस्तथा प्रचुरसलिलः प्रभूतजलः स्याद् भवेत्। चतुर्थो दुर्भिक्षाय भवति। ततोऽनन्तरं प्लव इति पञ्चमः शोभनः श्रेष्ठ इति। स च भूरितोयो बहुजलश्च भवति ॥४०॥

---

१. कान्तमत्र युगमादितस्त्रय इति पाठान्तरम् ।

अथाष्टमस्य युगस्याह--

वैश्वे युगे [1]शोक[2]हृदित्यथाद्यः संवत्सरोऽतः शुभकृद् द्वितीयः ।
क्रोधी तृतीयः परतः क्रमेण विश्वावसुश्चेति पराभवश्च ॥४१॥
पूर्वापरौ प्रीतिकरौ प्रजानामेषां तृतीयो बहुदोषदोऽब्दः ।
अन्त्यौ समौ किन्तु पराभवेऽग्निः शस्त्रामयार्तिर्द्विजगोभयं च ॥४२॥

वैश्वे युगे इति। अथानन्तरं वैश्वे अष्टमे युगे आद्यः प्रथमः संवत्सरोऽब्दः शोकहृदिति। केचिच्छोककृदिति पठन्ति। शोकं कृन्तति छिनत्तीति शोककृत्। यतोऽस्य शोभनं फलमाचार्यो वक्ष्यति--"पूर्वापरौ प्रीतिकरौ प्रजानाम्" इति। तस्माच्छोकहृदिति निःसन्देहः पाठः। अतोऽन्यो द्वितीयः शुभकृत्। तृतीयः क्रोधी। परतोऽनन्तरं क्रमेण विश्वावसुश्चेति चतुर्थः। इतिशब्दः प्रकारे। पराभवश्च पञ्चमः ॥४१॥

पूर्वापराविति। प्रथमद्वितीयावब्दौ प्रजानां प्रीतिकरौ। एषां सर्वेषां पञ्चानां क्रोधी योऽब्दस्तृतीयः स बहुदोषदः, बहुदोषानशुभान् ददाति। अन्त्यौ पश्चिमौ चतुर्थपञ्चमौ समौ समफलौ न शुभौ नाप्यशुभौ भवतः। किन्त्वत्र वर्षद्वये पराभवेऽग्निरग्निभयं भवति। तथा शस्त्रामयार्तिः शस्त्रेण आमयैश्च रोगैरार्तिः पीडा भवति। तथा द्विजगोभयं च द्विजानां ब्राह्मणानां गवां च भयं भवति ॥४२॥

अथ नवमस्य युगस्याह—

आद्यः प्लवङ्गो नवमे युगेऽब्दः स्यात् कीलकोऽन्यः परतश्च सौम्यः ।
साधारणो [3]रोधकृदित्यथैवं शुभप्रदौ कीलकसौम्यसंज्ञौ ॥४३॥
कष्टः प्लवङ्गो बहुशः प्रजानां साधारणेऽल्पं जलमीतयश्च ।
यः पञ्चमो रोधकृदित्यथाब्दश्चित्रं जलं तत्र च सस्यसम्पत् ॥४४॥

आद्यः प्लवङ्ग इति। नवमे युगे सौम्ये आद्यः प्रथमोऽब्दः प्लवङ्गसंज्ञः स्याद्भवेत्। अन्यो द्वितीयः कीलकः। परतस्तृतीयः सौम्यः। साधारणश्चतुर्थः। रोधकृत् पञ्चमः। इत्येवं प्रकारे। अथशब्द आनन्तर्ये। तत्र कीलकसौम्यसंज्ञौ द्वावब्दौ शुभप्रदौ श्रेष्ठौ ॥४३॥

---

१. सम्प्रति सर्वत्रास्य 'शुभकृत्' द्वितीयस्य च 'शोभकृत्' इति प्रसिद्धं नाम।
२. शोककृद् इति पाठान्तरम्।
३. सम्प्रत्यस्य 'विरोधी' इति प्रसिद्धं नाम।

कष्ट इति। प्लवङ्गसंज्ञः प्रजानां बहुशो बहुप्रकारं कष्टोऽशुभः। अब्दे साधारणे अल्पं जलं स्वल्पमुदकम्। ईतय अतिवृष्ट्यादय उपद्रवाः। अथानन्तरं यः पञ्चमोऽब्दो रोधकृदिति तत्र तस्मिन्नब्दे चित्रं नानाप्रकारं जलं क्वचित्क्वचिद्वर्षति। तथा सस्यानां सम्पच्च भवति ॥४४॥

अथ दशमस्य युगस्याह--

इन्द्राग्निदैवं दशमं युगं यत्तत्राद्यवर्षं परिधाविसंज्ञम्।
प्रमादिनं [1]विक्रममप्यतोऽन्यत् स्याद्राक्षसं चानलसंज्ञितं च ॥४५॥
परिधाविनि मध्यदेशनाशो नृपहानिर्जलमल्पमग्निकोपः।
अलसस्तु जनः प्रमादिसंज्ञे डमरं रक्तकपुष्पबीजनाशः ॥४६॥
विक्रमः सकललोकनन्दनो राक्षसः क्षयकरोऽनलस्तथा।
ग्रीष्मधान्यजननोऽत्र राक्षसो वह्निकोपमरकप्रदोऽनलः ॥४७॥

इन्द्राग्निदैवमिति। दशमं युगमिन्द्राग्निदैवतं यत्तत्र तस्मिन्नाद्यवर्षं प्रथमवर्षं परिधाविसंज्ञम्। प्रमादिनं द्वितीयम्। अतोऽस्मादन्यत्तृतीयं विक्रमं स्याद् भवेत्। राक्षसं चतुर्थम्। अनलसंज्ञितं पञ्चमम्। चशब्दोऽत्रोभयत्र समुच्चये ॥४५॥

परिधाविनीति। परिधाविनि वर्षे मध्यदेशनाशो भवति। तत्रैव नृपहानी राज्ञो मरणम्। जलमुदकमल्पं स्तोकम्। अग्निकोपो वह्निभयम्। प्रमादिसंज्ञे जनो लोकः। अलसः सालसो भवति। तथा डमरं कलहः सशस्त्रः। रक्तकपुष्पाणां येषां वृक्षाणां लोके रक्तपुष्पं भवति, तथा रक्तकबीजानां च नाशो भवति ॥४६॥

विक्रम इति। विक्रमः सकललोकानां नन्दनोऽब्दः समस्तजनसमृद्धिकरः। राक्षसः समस्तलोकानां क्षयकरो विनाशकरो भवति। अनलस्तेनैव प्रकारेण क्षयकर एव। अत्रास्मिन् युगे राक्षसोऽब्दो ग्रीष्मधान्यानां यवगोधूमादीनां जननः सम्पत्करः। अनलो वह्निकोपमरकप्रदः। अग्निकोपं मरकं च ददाति ॥४७॥

---

१. सम्प्रति प्रसिद्धज्यौतिषग्रन्थेषु सर्वेष्वस्य 'आनन्द' इति संज्ञा। तदर्थं नव्या अत्र "प्रमाद्यथानन्दमतः परं यत्", ४७ श्लोकादौ च 'तत्परः' इति पाठं कल्पयन्ति। यद्यप्यत्र तृतीययुगे ३३ श्लोके चतुर्थवर्षस्यापोदमेव नाम, तथापि सर्वेष्वादर्शपुस्तकेष्वेकरूपां तदर्थप्रतिपादिकां व्याख्यां मूलं चैतादृशमेव विलोक्यायमेव पाठ उपन्यस्तो मयेति।

अथैकादशस्य युगस्याह—

एकादशे पिङ्गलकालयुक्तसिद्धार्थरौद्राः खलु दुर्मतिश्च ।
आद्ये तु वृष्टिर्महती सचौरा श्वासो हनूकम्पयुतश्च कासः ॥४८॥
यत्कालयुक्तं तदनेकदोषं सिद्धार्थसंज्ञे बहवो गुणाश्च ।
रौद्रोऽतिरौद्रः क्षयकृत् प्रदिष्टो यो दुर्मतिर्मध्यमवृष्टिकृत् सः ॥४९॥

एकादशेति। एकादशो आश्विने युगे प्रथमोऽब्दः पिङ्गलः। द्वितीयः कालयुक्तः । तृतीयः सिद्धार्थः। चतुर्थो रौद्रः। पञ्चमो दुर्मतिः। खलुशब्द आगमद्योतनार्थः। आद्ये प्रथमे वर्षे महती चण्डा अतिवृष्टिर्भवति सा तु सचौरा चौरयुक्ता। तस्करा भवन्तीत्यर्थः। तथा श्वासो भवति जनानां हनूकम्पयुतश्च कासः। कासपीडा च भूतानां भवति यया हनू कम्पेते।

यत्कालयुक्तमिति। यदब्दं कालयुक्तं तदनेकदोषं बहुदोषप्रदम्। सिद्धार्थसंज्ञे वहवः प्रभूता गुणाः सम्पदादयो भवन्ति। यो रौद्रः सोऽतिरौद्रः। अतिदुष्टफलः। तथा क्षयकृत् प्रजानां क्षयकरः प्रदिष्ट उक्तः। यो दुर्मतिः स मध्यमवृष्टिकृत् मध्यमां वृष्टिं करोतीति ॥४८-४९॥

अथ द्वादशस्य युगस्याह—

भाग्ये युगे दुन्दुभिसंज्ञमाद्यं सस्यस्य वृद्धिं महतीं करोति।
[1]अङ्गारसंज्ञं तदनु क्षयाय नरेश्वराणां विषमा च वृष्टिः ॥५०॥
रक्ताक्षमब्दं कथितं तृतीयं तस्मिन् भयं दंष्ट्रिकृतं गदाश्च।
क्रोधं बहुक्रोधकरं चतुर्थं राष्ट्राणि शून्यीकुरुते विरोधैः ॥५१॥

भाग्ये युगे इति। भाग्यसंज्ञे द्वादशे युगे आद्यं प्रथमं वर्षं दुन्दुभिसंज्ञं तच्च महतीमतिबह्वीं सस्यवृद्धिं करोति। तदनु तत्पश्चात् द्वितीयमङ्गारसञ्ज्ञं तच्च नरेश्वराणां राज्ञां क्षयाय नाशाय भवति। वृष्टिश्च विषमा अतुला अतिचण्डा वा भवति ॥५०॥

तथा तृतीयमब्दं वर्षं रक्ताक्षसंज्ञं कथितमुक्तम्। तस्मिन्नब्दे दंष्ट्रिकृतं भयं भवति। दंष्ट्रिणः सूकरादयस्तत्कृतं भयं भवति। तथा गदा रोगाश्च भवन्ति। चतुर्थं क्रोधसंज्ञं तच्च बहुक्रोधकरं बहुप्रकारं लोकानां क्रोधं करोति। तथा राष्ट्राणि विरोधैः कलहैः शून्यीकुरुते। अशून्यानि शून्यानि करोतीति शून्यीकुरुते। उद्वासयतीत्यर्थः ॥५१॥

---

१. सम्प्रत्यस्य 'रुधिरोद्गारि' इतिप्रसिद्धं नाम। तदर्थं केचित् 'उद्गारिसंज्ञं' इति पठन्ति।

अथ पञ्चमस्य वर्षस्य फलं षष्टयब्दलक्षणं मया- संक्षेपतः कृतमित्येतच्चाह—

क्षयमिति युगस्यान्त्यस्यान्त्यं बहुक्षयकारकं
जनयति भयं तद्विप्राणां कृषीबलवृद्धिदम् ।
उपचयकरं विट्शूद्राणां परस्वहृतां तथा
कथितमखिलं षष्टयब्दे यत्तदत्र समासतः ॥५२॥

अन्त्यस्य युगस्य द्वादशस्य अन्त्यं पञ्चमं वर्ष क्षयमिति क्षयसंज्ञम्। तच्च बहुक्षयकरं बहुविधं जनानां क्षयं करोति। विप्राणां ब्राह्मणानां भयं भीतिं जनयत्युत्पादयति। कृषीबलानां कर्षकाणां वृद्धिदम्। विट्शूद्राणां वैश्यानां शूद्राणां चोपचयकरं वृद्धिकरम्। तथा परस्वहृतां परधनहर्तृणामप्युपचयकरम्। अखिलं निःशेषं षष्टयब्दे षष्टयब्दाख्ये।

[1]माघशुक्लप्रवृत्तस्य पौषकृष्णसमापिनः ।
युगस्य पञ्चकस्येह कालज्ञानं निबोध्यते ॥

इति तस्मिन् शास्त्रे यत्कथितमुक्तं तदत्रास्मिन् बृहस्पतिचारे सर्वं समासतः संक्षेपतः कथितमुक्तम्। तथा च समाससंहितायाम्—

ऐन्द्रे तृतीयमशुभं द्वितीयवर्जानि पञ्चमे तु युगे ।
पित्र्ये युगे तृतीयं चतुर्थमपि पापदं वर्षम् ॥
वैश्वे तृतीयमशुभं शुभदान्युक्तानि चावशेषाणि ।
सौम्ये द्वितीयवर्षं शुभावहं यत्तृतीयं तु ॥
प्रथितं शुभमैन्द्राग्नौ तृतीयवर्षं तथाश्विदैवत्ये ।
भाग्ये प्रथमं वर्षं षष्टयब्दस्यैष संक्षेपः ॥इति ॥५२॥

अथ बिम्बलक्षणमाह—

अकलुषांशुजटिलः पृथुर्मूर्तिः कुमुदकुन्दकुसुमस्फटिकाभः ।
ग्रहहतो न यदि सत्पथवर्ती हितकरोऽमरगुरुर्मनुजानाम् ॥५३॥

एवंविधोऽमरगुरुर्बृहस्पतिर्मनुजानां मनुष्याणां हितकरः शिवप्रदः। कीदृशः ? अकलुषांशुर्निर्मलरश्मिः। जटिलः समन्ततो रश्मिभिर्व्याप्तः। पृथु-

---

१. ज्योतिषवेदाङ्गस्यायं ५ श्लोकः। तत्र प्रथमपादे 'माघशुक्लप्रपन्नस्य' तथोत्तरार्द्धे 'युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते' इति पाठः।

मूर्तिर्विस्तीर्णदेहः। तथा कुमुदस्य कुमुदपुष्पस्य कुन्दकुसुमस्य स्फटिकस्य च मणेः सदृशी आभा कान्तिर्यस्य। अतिस्निग्धः श्वेतवर्ण इत्यर्थः। यदि च ग्रहहतो न भवति ग्रहयुद्धे अन्येन ग्रहेण विजितो न भवति। तथा सत्पथवर्ती ग्रहनक्षत्राणामुत्तरमार्गगोचराणामधिकृतश्चेति ॥५३॥

इति श्रीभट्टोत्पलविरचितायां संहितावितौ बृहस्पतिचारो नामाष्टमोऽध्यायः ॥८॥

अथ शुक्रचारो व्याख्यायते

तस्य च नव वीथयस्त्रयो मार्गा उदङ्मध्यदक्षिणा . वात[1]व्याडवैश्वानरास्त्रयो मार्गभेदाः षड् मण्डलानि भवन्ति। तत्रादावेव परमतेन वीथीनां लक्षणमाह—

नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः ।
अश्विन्याद्याः कैश्चित्त्रिभाः क्रमाद्वीथयः कथिताः ॥१॥

नागवीथी प्रथमा। गजवीथी द्वितीया। ऐरावतवीथी तृतीया। वृषभवीथी चतुर्थी। गोवीथी पञ्चमी। जरद्गववीथी षष्ठी। मृगवीथी सप्तमी। अजवीथी अष्टमी। दहनवीथी नवमी। एता नव वीथयः कैश्चिदाचार्यैर्देवलप्रभृतिभिरश्विन्याद्यास्त्रिभास्त्रिभिर्भैर्नक्षत्रैः कथिताः। अश्विनीभरणीकृत्तिका नागवीथी। रोहिणीमृगशिरआर्द्रा गजवीथी। पुनर्वसुतिष्याश्लेषा ऐरावतवीथी। एवं क्रमेण त्रिभिस्त्रिभिर्नक्षत्रैरन्या अपि ज्ञेयाः। एताः क्रमात् परिपाट्या वीथयः कथिता उक्ताः। तथा च देवलः—

अश्विन्यादित्रिभाः सर्वा नागाद्या दहनान्तिकाः ।
वीथयो भृगुपुत्रस्य नव प्रोक्ताः पुरातनैः ॥

तथा च काश्यपः—

त्रिष्वश्विन्यादिषु यदा चरति[2] भृगुनन्दनः ।
नागवीथीति सा ज्ञेया प्रथमान्या निबोधत ॥
रोहिण्यादिगजा ज्ञेयाऽदित्याद्यैरावती स्मृता ।
मघाद्या वृषभा ज्ञेया हस्ताद्या गौः प्रकीर्तिता ॥
जारद्गवी विशाखाद्या मूलाद्या मृगवीथिका ।
अजवीथी विष्णुभाद्याऽजाद्या तु दहना स्मृता ॥ इति ॥१॥

---

१. व्याडः सर्प इति। द्रष्टव्यमस्यैवाध्यायस्य २२ श्लोकटीकायां पराशरवाक्यम्।

२. अत्र छन्दोभङ्गदोषः। स चार्षत्वान्न हानिकरः।

अथ स्वमतेन प्रविभागमाह--

नागा तु पवनयाम्यानलानि पैतामहात्त्रिभास्तिस्रः ।
गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भद्रपदे ॥२॥
जारद्गव्यां श्रवणात्त्रिभं मृगाख्या त्रिभं तु मैत्राद्यम् ।
हस्तविशाखात्वाष्ट्राण्यजेत्यषाढाद्वयं दहना ॥३॥

पवनः स्वातिः। याम्यं भरणी। अनलः कृत्तिकाः। एतानि नक्षत्राणि नागवीथी। पैतामहात्त्रिभास्तिस्रः। पैतामहं रोहिणी तत आरभ्य त्रिभास्त्रिभिस्त्रिभिर्भैर्नक्षत्रैस्तिस्रो वीथयो भवन्ति। तद्यथा--रोहिणीमृगशिरआर्द्रा गजवीथी। पुनर्वसुतिष्याश्लेषा ऐरावती। मघा पूर्वफल्गुनी उत्तरफल्गुनी चेति वृषभा। गोवीथ्यामिति। अश्विन्यः पौष्णं रेवती द्वे भद्रपदे पूर्वभद्रपदोत्तरभद्रपदे। एतानि चत्वारि नक्षत्राणि गोवीथी ॥२॥

जारद्गव्यामिति। श्रवणात्प्रभृति त्रिभं नक्षत्रत्रयं श्रवणा धनिष्ठा शतभिषगिति जारद्गव्याम्। मृगाख्या त्रिभं तु मैत्राद्यम्। मैत्रमनुराधा तदाद्यं त्रिभं नक्षत्रत्रितयम्। अनुराधा ज्येष्ठा मूलमिति मृगाख्या। तुशब्दः पादपूरणे। हस्तो विशाखा त्वाष्ट्रं चित्रा। एतानि नक्षत्राण्यजा अजवीथी। अषाढाद्वयं पूर्वाषाढोत्तराषाढा चेति दहनवीथी ॥३॥

अथ तासां मार्गप्रविभागमाह-

तिस्रस्तिस्रस्तासां क्रमादुदङ्मध्ययाम्यमार्गस्थाः ।
तासामप्युत्तरमध्यदक्षिणेन स्थितैकैका ॥४॥

तासां नागाद्यानां नवानां वीथीनां क्रमात् परिपाट्या तिस्रस्तिस्रो वीथय उदङ्मध्ययाम्यमार्गस्थाः। उत्तरे मार्गे मध्ये मध्यमे याम्ये दक्षिणे च स्थिताः। तद्यथा--नागगजैरावत्य उत्तरमार्गस्थाः। वृषभगोजारद्गव्यो मध्यममार्गस्थाः। मृगाजदहना दक्षिणमार्गस्थाः। तासामपि वीथीनामुत्तरमध्यमदक्षिणमार्गस्थानामुत्तरमध्यदक्षिणेनैकैका स्थिता। तद्यथा--नागा उत्तरोत्तरा। गजा उत्तरमध्यमा। ऐरावती उत्तरदक्षिणा। तथा वृषभा मध्योत्तरा। गोवीथी मध्यमध्या। जरद्गववीथी मध्यदक्षिणा। तथा मृगा दक्षिणोत्तरा। अजा दक्षिणमध्या। दहना दक्षिणदक्षिणा इति। तथा च पराशरः--

अथ मार्गास्त्रयो भवन्त्युत्तरमध्यमदक्षिणाः। पुनरेकैकशस्त्रिधा नव वीथय इत्याचक्षते। तत्रोत्तरे नागगजैरावत्यः। मध्ये वृषभगोजारद्गव्यः। दक्षिणे

मृगाजदहनाः। तासां नागाऽग्नेययाम्यवायव्यानि। गजवीथी रोहिण्यादीनि त्रीणि। चत्वारि परमैरावती। वृषभा फल्गुन्यौ। गोवीथी प्राक्प्रोष्ठपदादीनि चत्वारि। श्रवणधनिष्ठावारुणानि जारद्गवी। मृगवीथी त्वाष्ट्रहस्तम्। आजी मैत्रमिन्द्राग्न्यधिपमैन्द्रम्। मूलमषाढाद्वयं च वैश्वानरीमितीच्छन्ति।

अत्र वराहमिहिरेण सह भेदः। तथा च गर्गः--

कृत्तिका भरणी स्वाती नागवीथी प्रकीर्तिता।
रोहिण्याद्यास्त्रिभास्तिस्रो गजैरावतवार्षभाः[1] ॥
अहिर्बुध्न्याश्विपौष्णं च गोवीथीति प्रकीर्तिता।
श्रवणत्रितयं ज्ञेया वीथी जारद्गवीति सा ॥
मैत्रत्रिभा मृगाख्या स्याद्धस्तचित्राविशाखिका।
अजवीथी तु दहनाषाढायुग्ममिति स्मृता ॥
पूर्वोत्तरा नागवीथी गजवीथी तदुत्तरा।
ऐरावती ततो याम्या एतास्तूत्तरतः स्मृताः ॥
आर्षभी तु चतुर्थी स्याद् गोवीथी पञ्चमी स्मृता।
षष्ठी जारद्गवी ज्ञेया तिस्रस्ता मध्यमाश्रिताः ॥
सप्तमी मृगवीथी स्यादजवीथी तथाष्टमी।
दहना नवमी ज्ञेया दक्षिणं मार्गमाश्रिताः ॥

तथा च समाससंहितायाम्--

वीथी नागा नाम्नी स्वातिर्भरणी च कृत्तिका चैव।
स्वायम्भुवस्त्रिभाः स्युर्गजवीथ्यैरावती वृषभा ॥
एकपदादिचतुष्कं गौः स्याज्जारद्गवी त्रिभा श्रवणात्।
मैत्रात्त्रिभं मृगाऽजा हस्तश्चित्रा विशाखा च ॥
द्वे चाषाढे दहना तिस्र उदग्वीथयः क्रमाच्छुभदाः।
मध्या मध्यास्तिस्रो याम्याः पापा मृगाद्यास्ताः ॥इति॥४॥

अत्रैव मतान्तरमाह--

वीथीमार्गानपरे कथयन्ति यथास्थितान् भमार्गस्य।
नक्षत्राणां तारा याम्योत्तरमध्यमास्तद्वत् ॥५॥

अपरे आचार्या भमार्गस्य नक्षत्रपथस्य यथास्थितान् येनैव प्रकारेण व्यवस्थितान् वीथीमार्गान् तैनेव प्रकारेण कथयन्ति प्रवदन्ति। यतस्तद्वत्तेनैव प्रकारेण

---

१. 'वार्षभी' इत्यत्र 'वार्षभा' इत्यार्षप्रयोगः।

नक्षत्राणां तारा याम्योत्तरमध्यमाः स्थिताः। याम्यास्तारा दक्षिणो मार्गः। उत्तराः उत्तरो मार्गः। मध्यमा मध्यमो मार्गः। अथवा नक्षत्राद्दक्षिणभागस्थो ग्रहो दक्षिणमार्गगः। उत्तरमार्गस्थ उत्तरमार्गगः। मध्यममार्गस्थो मध्यममार्गगः। तथा च काश्यपः--

नक्षत्राणां त्रयो मार्गा दक्षिणोत्तरमध्यमाः ।
उदक्स्थास्तारकाः सौम्यो मध्यमो मध्यमाः स्मृतः ॥
दक्षिणा दक्षिणो मार्गो नक्षत्रेषु प्रकीर्तितः ।
नक्षत्रात् सौम्यगः सौम्यमार्गस्थो ग्रह उच्यते ॥
दक्षिणे दक्षिणो मार्गो मध्ये मध्य इति स्मृतः ॥ इति ॥५॥

पुनरपि मतान्तरमाह--

उत्तरमार्गो याम्यादि निगदितो मध्यमस्तु भाग्याद्यः ।
दक्षिणमार्गोऽषाढादि कैश्चिदेवं कृता मार्गाः ॥६॥

कैश्चिदाचार्यैरेवमनेन प्रकारेण मार्गाः कृताः। ते च गर्गादयः। याम्या भरणी तदादिको नवनक्षत्रान्त उत्तरो मार्गो निगदित उक्तः। यथा--भरणीकृत्तिकारोहिणीमृगशिरआर्द्रापुनर्वसुतिष्याश्लेषामघा उत्तरो मार्गः। मध्यमस्तु भाग्याद्यः। भाग्यं पूर्वफल्गुनी तदादिको नवनक्षत्रान्तो मध्यमो मार्गः। तद्यथा-- पूर्वफल्गुन्युत्तरफल्गुनीहस्तचित्रास्वातीविशाखानुराधाज्येष्ठामूलमिति मध्यमो मार्गः। दक्षिणमार्गोऽषाढादि। अषाढा पूर्वाषाढा तदादिको नवनक्षत्रान्तो दक्षिणमार्गः। तद्यथा—पूर्वाषाढोत्तराषाढा श्रवणा धनिष्ठा शतभिषक्पूर्वभद्रपदोत्तरभद्रपदा रेवती अश्विनी दक्षिणो मार्ग इति। तथा च गर्गः—

अश्वयुग्भोगपर्यन्तेऽषाढादौ नवके गणे ।
वर्तमानः सदा क्रूरो दक्षिणे पथि वर्तते ॥
शुक्रो निर्ऋतिपर्यन्ते भाग्यादौ नवके गणे ।
वर्तमानश्च मध्यस्थो मध्यमेपथि वर्तते ॥
भरण्यादौ मघान्ते च तृतीये नवके गणे ।
वर्तमानः शुभो ज्ञेय उत्तरे पथि वर्तते ॥इति॥६॥

ननु संग्रहकर्त्रा यत्सारं तदेव वक्तव्यं किं मतान्तरैः प्रयोजनमित्येतदाशङ्क्याऽऽह—

ज्यौतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम् ।
स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये ॥७॥

ज्योतींषि ग्रहनक्षत्रादीनि तान्यधिकृत्य कृतं शास्त्रं ज्यौतिषं तच्चागमशास्त्रमागमेन विना न ज्ञायते। अस्माकं विप्रतिपत्तौ विषये स्वयमेवाऽऽत्मना विकल्पयितुं न योग्यं न न्याय्यम्। इदं शोभनमिदमशोभनमिति। यतः सर्व एव मुनयस्त्रिकालदर्शिनः। न ज्ञायते कस्य मुनेः कीदृश आगमः। तस्मादस्माकं विकल्पयितुं न न्याय्यम्। किन्तु बहूनां प्रभूतानां मतं वक्ष्ये कथयिष्ये ॥७॥

अधुना वीथीनां फलमाह--

उत्तरवीथिषु शुक्रः सुभिक्षशिवकृद् गतोऽस्तमुदयं वा ।
मध्यासु मध्यफलदः कष्टफलो दक्षिणस्थासु ॥८॥

शुक्र उत्तरवीथीषु नागगजैरावताख्यासु स्थितो यद्यर्कमण्डले अस्तमयं गतस्तस्मादेवोदयं वा गतस्तदा सुभिक्षशिवकृत्। सुभिक्षं श्रेयश्च करोति। एवं मध्यासु मध्यमासु वीथिषु ऋषभगोजारद्गवाख्यासु मध्यमफलदः। न शुभं नाप्यशुभं फलं करोति। तथा च दक्षिणस्थासु वीथिषु मृगाजदहनाख्यासु कष्टफलोऽनिष्टफल इति। तथा च गर्गः--

उदयास्तमयं कुर्यान्मार्गमुत्तरमाश्रितः ।
सुभिक्षं च सुवृष्टिं च योगक्षेमं विनिर्दिशेत् ॥
उदयास्तमयं कुर्यात् मध्यमं मार्गमाश्रितः ।
मध्यमं चार्घसस्यं च योगक्षेमं विनिर्दिशेत् ॥
उदयास्तमयं कुर्याद्दक्षिणं मार्गमाश्रितः ।
धान्यस्य संग्रहं कृत्वा केदारेषु तिलान् वपेत् ॥

तथा च पराशरः--

तत्र नागवीथीगतो नागाश्रितांश्च पीडयति गजकुलानि गजवीथ्याम्। ऐरावत्यां नृपतिबलविरोधः। आर्षभ्यां वयोवित्तज्ञानबलाधिकसस्यपीडा श्लेष्मव्याधिप्रादुर्भावश्च। गोवीथ्यां सस्यगोमतां हानिर्जरद्गववीथ्यां शास्त्रविदाम्। मृगवीथ्यां मृगव्याधिः सस्यतपस्विनामपि रोगोद्भवश्च। अजवीथ्यां सस्यवर्षब्रह्मचारिणामाधिक्यम्। दहनवीथ्यां सस्यविलयनमग्निपित्तव्याधिसम्भवश्च ॥८॥

अथाऽऽसामपि विशेषफलमाह--

अत्युत्तमोत्तमोनं सममध्यन्यूनमधमकष्टफलम् ।
कष्टतरं सौम्याद्यासु वीथिषु यथाक्रमं ब्रूयात् ॥९॥

सौम्याद्यासु उदगाशाद्यासु वीथिषु नागाद्यासु नवसु यथाक्रमं परिपाट्याऽनेन प्रकारेण फलमिदं ब्रूयाद्वदेत्। तद्यथा--नागायामत्युत्तममतिशुभं फलम्।

गजाख्यायां वीथ्यामुत्तमं शुभफलं किञ्चिदूनं पूर्वापेक्षया। एवमूनं किञ्चिच्छुभफलमैरावत्याम्। समं मध्यमं फलमृषभवीथ्याम्। मध्यममेव गोवीथ्याम्। न्यूनमीषदशुभं जारद्गव्याम्। अधममनिष्टं मृगवीथ्याम्। कष्टमशुभमजवीथ्याम्। कष्टतरमतिकष्टं दहनवीथ्याम् ॥९॥

अथ शुक्रस्य षण्मण्डलानि भवन्ति। तेषां लक्षणं सफलमाह--

भरणीपूर्वं मण्डलमृक्षचतुष्कं सुभिक्षकरमाद्यम्।
वङ्गाङ्गमहिषबाह्लिककलिङ्गदेशेषु भयजननम् ॥१०॥
अत्रोदितमारोहेद् ग्रहोऽपरो यदि सितं ततो हन्यात्।
भद्राश्वशूरसेनकयौधेयककोटिवर्षनृपान् ॥११॥

आद्यं प्रथममण्डलं भरणीपूर्वमृक्षचतुष्कम्। भरणी पूर्वा प्रथमा यस्य ऋक्षचतुष्कस्य तद्भरणीपूर्वम्। भरणी कृत्तिका रोहिणी मृगशिरश्चेति। तच्च सुभिक्षकरं सुभिक्षं करोति। तथा वङ्गा अङ्गा महिषा बाह्लिकाः कलिङ्गाः। एषां ये देशास्तेषु देशेषु भयजननं भीतिं जनयत्युत्पादयति।

अत्रास्मिन् मण्डले सितं शुक्रमुदितं सूर्यमण्डलादुद्गतं यद्यपि परोऽन्यो ग्रह आरोहेदुपरि पतेत्। अग्रतस्तिष्ठतीत्यर्थः। तदा भद्राश्वा जनाः। शूरसेनकाः। यौधेयकाः। कोटिवर्षाः। एतेषां ये नृपा राजानस्तान् हन्यान्नाशयेत् ॥१०-११॥

अथ द्वितीयमण्डलं सफलमाह—

भचतुष्टयमार्द्राद्यं द्वितीयममिताम्बुसस्यसम्पत्त्यै।
विप्राणामशुभकरं विशेषतः क्रूरचेष्टानाम् ॥१२॥
अन्येनात्राक्रान्ते म्लेच्छाटविकश्वजीविगोमन्तान्।
गोनर्दनीचशूद्रान् वैदेहांश्चानयः स्पृशति ॥१३॥

आर्द्राद्यमार्द्राप्रथमं भचतुष्टयं नक्षत्रचतुष्कं द्वितीयं मण्डलं तच्चामिताम्बुसस्यसम्पत्त्यै भवति। अमितमपरिमितमम्बु जलं सस्यानां च सम्पदं करोति। विप्राणां ब्राह्मणानामशुभकरमनिष्टफलदम्। क्रूरचेष्टानां विषमस्वभावानां विशेषतो न शुभकरम् ॥१२॥

अत्रास्मिन् मण्डले अन्येन परेण ग्रहेणाऽऽक्रान्ते रुद्धे शुक्रे म्लेच्छा जनाः। आटविका अरण्यवासिनः। श्वजीविनश्च श्वभिर्ये जीवन्ति। गोमन्तो विद्यमानगावः। गोनर्दा जनाः। नीचा अधमकर्मकराः। शूद्राः। वैदेहा जनाः। एतान् सर्वाननयः स्पृशति। सोपद्रवा भवन्तीत्यर्थः ॥१३॥

अथ तृतीयं मण्डलं सफलमाह--

विचरन् मघादिपञ्चकमुदितः सस्यप्रणाशकृच्छुक्रः ।
क्षुत्तस्करभयजननो नीचोन्नतिसङ्करकरश्च ॥१४॥
पित्र्याद्येऽवष्टब्धो हन्त्यन्येनाविकान् शबरशूद्रान् ।
पुण्ड्रापरान्त्यशूलिकवनवासिद्रविडसामुद्रान् ॥१५॥

तृतीयमण्डलं मघादिपञ्चकम्। मघा आदौ यस्य ऋक्षपञ्चकस्य तत्। तत्र शुक्र उदितः सूर्यमण्डलादुद्गतो विचरंस्तिष्ठन् सस्यप्रणाशकृत् सस्यानां प्रणाशं करोतीति सस्यप्रणाशकृत्। तथा क्षुद् दुर्भिक्षम्। तस्करश्चौरः। आभ्यां भयं जनयति उत्पादयति। तथा नीचानामुन्नतिं प्राधान्यं करोति। सङ्करकरश्च वर्णसङ्करं करोति ॥१४॥

पित्र्याद्ये मघाद्ये। अन्येनापरेणावष्टब्धो रुद्धो यदि भवति तदाऽऽविकानविसम्भूतान् शबरान् जनान्। शूद्रान्। पुण्ड्रा अपरान्त्याः शूलिका जनाः। वनवासिनो वनेचराः। द्रविडा जनाः। सामुद्राः समुद्रतीरवासिनः। एतान् हन्ति घातयति ॥१५॥

अथ चतुर्थं मण्डलं सफलमाह—

स्वात्याद्यं भत्रितयं मण्डलमेतच्चतुर्थमभयकरम् ।
ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय ॥१६॥
अत्राक्रान्ते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकून् ।
प्रत्यन्तावन्तिपुलिन्दतङ्गणान् शूरसेनांश्च ॥१७॥

स्वात्याद्यं स्वातिपूर्वकं भत्रितयं चतुर्थं मण्डलम्। एतदभयकरं भयं न करोति + व्याध्यादिकृतां भीतिं नोत्पादयति। ब्राह्मणानां क्षत्रियाणां च सुभिक्षस्याभिवृद्धये भवति। एतेषां वृद्धिं करोति। तथा मित्रभेदाय भवति मित्राणां सुहृदां परस्परं भेदमप्रीतिं जनयति ॥१६॥

अत्रास्मिन् मण्डले अन्येन ग्रहेणाक्रान्ते शुक्रे मृत्युः किरातभर्तुः किराताधिपस्य। पिनष्टि संचूर्णयति तथा चेक्ष्वाकून् जनान्। प्रत्यन्ता गह्वरवासिनः। अवन्तयो जनाः। पुलिन्दाः। तङ्गणाः। शूरसेनाः। एतांश्च पिनष्ट्येव ॥१७॥

अथ पञ्चममण्डलं सफलमाह—

ज्येष्ठाद्यं पञ्चर्क्षं क्षुत्तस्कररोगदं प्रबाधयते ।
काश्मीराश्मकमत्स्यान् सचारुदेवीनवन्तींश्च ॥१८॥

अत्रारोहेद् द्रविडाभीराम्बष्ठत्रिगर्तसौराष्ट्रान् ।
नाशयति सिन्धुसौवीरकांश्च काशीश्वरस्य वधः ॥१९॥

ज्येष्ठाद्यं ज्येष्ठापूर्वकं पञ्चर्क्षं पञ्चनक्षत्रं पञ्चमं मण्डलम्। तच्च क्षुत्तस्करोगदम्। क्षुद् दुर्भिक्षम्। तस्कराश्चौराः। रोगा गदाश्च। एतान् ददाति। अथ काश्मीरान् जनान्। अश्मकान्। मत्स्यान्। एतान् जनान्। चारुदेवीन्। चारुदेवी नदी तत्तटनिवासिन इत्यर्थः। अवन्तीन् जनान् सचारुदेवीन् चारुदेव्या सहितान् एतान् प्रबाधयते उपतापयति ॥१८॥

अत्रास्मिन् मण्डले यद्यपरो ग्रहः सितं शुक्रमारोहेत् तदा द्रविडान् जनान्। आभीरान्। अम्बष्ठान्। त्रिगर्तान्। सौराष्ट्रान्। एतान्नाशयति क्षयं नयति। तथा सिन्धुसौवीरकांश्च जनान् नाशयत्येव। काशीश्वरस्य काशिराजस्य च वधो मरणं भवति ॥१९॥

अथ षष्ठं मण्डलं सफलमाह—

षष्ठं षण्नक्षत्रं शुभमेतन्मण्डलं धनिष्ठाद्यम्।
भूरिधनगोकुलाकुलमनल्पधान्यं क्वचित् सभयम् ॥२०॥
अत्रारोहेच्छूलिकगान्धारावन्तयः प्रपीडयन्ते।
वैदेहवधः प्रत्यन्तयवनशकदासपरिवृद्धिः ॥२१॥

धनिष्ठाद्यं धनिष्ठापूर्वकं षण्नक्षत्रम्—धनिष्ठा, शतभिषक्, पूर्वभद्रपदोत्तरभद्रपदा, रेवती, अश्विनीति। एतत् षष्ठं मण्डलम्। तच्च शुभं शुभफलप्रदम्। भूरिधनगोकुलाकुलम्। भूरि बहुलम्। धनं वित्तम्। गोकुलानि गोवाटाः। एतैराकुलं सोद्यमं व्याप्तम्। अनल्पधान्यं प्रभूतशालिसंयुक्तम्। क्वचित् क्वचिच्च सभयं भीतिसंयुक्तं न सर्वत्र ॥२०॥

अत्रास्मिन् मण्डले यद्यपरो ग्रहः सितं शुक्रमारोहत्तदा शूलिकाः। गान्धाराः। अवन्तयः। एते जनाः प्रपीडयन्ते। तथा वैदेहानां जनानां वधो मरणम्। प्रत्यन्ता गह्वरवासिनः। यवनाः। शकाः। दासाः कर्मकराः। एतेषां परिवृद्धिर्भवति ॥२१॥

अथैषां मण्डलानां विशेषफलमाह—

अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम्।
पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि ॥२२॥

अपरस्यां पश्चिमायां दिशि स्वात्याद्यं मण्डलं ज्येष्ठाद्यं च तच्छुभदम्। एतदुक्तं भवति—अस्मिन् मण्डलद्वये शुक्र उदितः पश्चिमायां शुभफलदः। एवमेव

पित्र्याद्यं मघाद्यं मण्डलं पूर्वस्यां दिशि शुभदम्। शेषाण्यन्यानि मण्डलानि यथोक्तफलदानि यथा प्रागुक्तं फलं तदेव प्रयच्छन्तीत्यर्थः। तथा च पराशरः—

आद्यरोहितदारुणविरोचनोर्ध्वदण्डतीक्ष्णान्येतानि षण्मण्डलानि। तत्र भरण्यादीनि चत्वारि चतुर्नक्षत्राणि। ज्येष्ठाद्ये द्वे पञ्चनक्षत्रे। आद्यमेव मण्डलचतुष्टयं वातमाहुस्तीक्ष्णं व्याडमार्गम्। ऊर्ध्वदण्डं वैश्वानरमृते श्रवणात्। अथ मण्डलेषु विचरन क्रमाद् गोब्रह्मचारिनृपतनयसुहृद्भूपालप्रजानामुपतापायेति। तेष्वेवोदयास्तमयौ कुर्वन् प्रथमेऽती वसुभिक्षायाङ्गवङ्गशबरकलिङ्गाननयैः स्पृशति। अत्रैवान्यग्रहारूढोऽसौ माञ्जिष्ठपुरुषादशूरसेनपटच्चरपण्यागाराभावाय। द्वितीयेऽन्नसम्पत्प्रदोऽवन्त्यश्मकमालवपाण्ड्यकैकयोपद्रवाय च। तृतीये शकसौराष्ट्रनृपानयायान्यग्रहारूढः काश्मीरयवनक्षुद्रमालवकिरातशकाननयेन स्पृशति। चतुर्थे सुवर्षसस्यक्षेमाणि विधत्तेऽन्यग्रहारूढः सुभगांश्चित्रांश्चोपतापयति। पञ्चमे मगधान् शूद्रान् जनाननयैः स्पृशति। अत्रैवान्यग्रहारूढो व्याधिभयशस्त्रदुर्भिक्षावर्षाणि सृजति। विशेषतस्तु कुरुपाञ्चालशाल्वेयशूरसेनपटच्चराहारभूतयोऽभिपीड्यन्ते। षष्ठे बालगर्भान् बालान् शूद्रांश्च हिनस्ति। यद्यारोहेत तदा काम्बोजैः सैन्धवो नृपतिः पराजयेत आवन्त्याश्मकाधिपती चोपसृज्येते॥

अत्र मतभेदो वराहमिहिरेण सहास्ति। तथा च समाससंहितायाम्—

भरणीरौद्रमघाऽनिलशक्रधनिष्ठादिसम्प्रवृत्तेषु।
चारोदयः शुभो मण्डलेषु हित्वैन्द्र्यपित्र्याद्ये॥ इति॥२२॥

अथ दिवादृष्टस्य शुक्रस्य विशेषफलमाह—

दृष्टोऽनस्तमितेऽर्के भयकृत् क्षुद्रोगकृत्समस्तमहः।
अर्द्धदिवसे च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः॥२३॥

शुक्रो भार्गवोऽनस्तमिते नास्तमितेऽर्के सूर्ये दृष्टोऽवलोकितो भयकृद् भयं करोति। तथा समस्तमहः सकलं दिनं दृष्टः क्षुद्रोगकृत्। क्षुद् दुर्भिक्षम्। रोगान् गदांश्च करोति। तथा अर्द्धदिवसे मध्याह्नसमये सेन्दुः सचन्द्रः शुक्रो दृष्टो नृपबलपुरभेदकृद् भवति। नृपस्य राज्ञो बलस्य सेनायाः परस्य नगरस्य भेदं पृथग्भावं करोति तथा च पराशरः—

अहः सर्वं यदा शुक्रो दृश्यतेऽथ महाग्रहः।
तदा ग्वागन्तुभिर्ग्रामा बाध्यन्ते नगराणि च॥इति॥२३॥

अथ शुक्रस्य नक्षत्राणां भेदनात् फलमाह—

भिन्दन् गतोऽनलक्षं कूलातिक्रान्तवारिवाहाभिः ।
अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री ॥२४॥

अनलक्षं कृत्तिकां भिन्दन् भित्त्वा यदि शुक्रो गतस्तदा सरिद्भिर्नदीभिः कूलातिक्रान्तवारिवाहाभिः कूलातिक्रान्तं वारि जलं वहन्ति याः। आत्मीयं प्रवाहमतिक्रम्यातिप्रभूतं जलं वहन्तीत्यर्थः। तथाभूताभिः। धात्री भूरव्यक्ततुङ्गनिम्ना समा भवति। न व्यक्तमव्यक्तम्। तुङ्गमुच्चम्। निम्नं नीचम्। अव्यक्तौ तुङ्गनिम्नौ यस्याः। अलक्षितोच्चनीचप्रदेशेत्यर्थः ॥२४॥

अथ रोहिण्याः शकटभेदे फलमाह—

प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा ।
केशास्थिशकलशबला कापालमिव व्रतं धत्ते ॥२५॥

प्राजापत्ये शकटे रोहिण्याः शकटे भिन्ने। शकटभेदलक्षणं गणितकारैरुक्तम्। तथा च [1]ब्रह्मसिद्धान्ते—

विक्षेपोंऽशद्वितयादधिको वृषभस्य सप्तदशभागे ।
यस्य ग्रहस्य याम्यो भिनत्ति शकटं स रोहिण्याः ॥

तथा च भानुभट्टः—

वृषस्यांशे सप्तदशे विक्षपो यस्य दक्षिणः ।
अंशद्वयाधिको भिन्द्याद्रोहिण्याः शकटं तु सः ॥

एवं रोहिण्याः शकटे शुक्रेण भिन्ने वसुधा भूः पातकं ब्रह्महत्यामिव कृत्वा केशैर्मूर्द्धजैरस्थिशकलैरस्थिखण्डैः शबला मिश्रितशुक्लकृष्णा भवति। अतः कापालं व्रतमिव धत्ते धारयति। [2]ब्रह्महत्यायाः कापालं व्रतं प्रायश्चित्तम्। कापालिकश्च केशास्थिशकलैः शबलो भवति ॥२५॥

अथ मृगशिरआर्द्रयोराह—

सौम्योपगतो रससस्यसंक्षयायोशनाः समुद्दिष्टः ।
आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः ॥२६॥

---

१. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्त इत्यर्थः।

२. महापातकब्रह्महत्याप्रायश्चित्ते मनुस्मृतौ ११ अध्याये ७२ श्लोके "कृत्वा शवशिरोध्वजम्" इत्यनेन कपालव्रतमुक्तम्।

उशनाः शुक्रः। सौम्योपगतो मृगशिरसि प्राप्तो रसानां मधुरादीनां सस्यानां च संक्षयाय विनाशाय समुद्दिष्टः कथितः। आर्द्रागतस्तु कोशलान् कलिङ्गांश्च हन्ति तथा सलिलं जलं निकरं निवहं करोति। अतिवृष्टिं करोतीत्यर्थः ॥२६॥

अथ पुनर्वसुतिष्ययोराह—

अश्मकवैदर्भाणां पुनर्वसुस्थे सिते महाननयः।
पुष्ये पुष्टा वृष्टिर्विद्याधररणविमर्दश्च ॥२७॥

पुनर्वसुस्थे सिते। अश्मकानां जनानां वैदर्भाणां च महाननय उपद्रवो भवति। तथा पुष्ये तिष्यस्थे सिते पुष्टा बह्वी वृष्टिर्भवति। तथा विद्याधराणां देवयोनीनां रणे संग्रामे विमर्दो भवति ॥२७॥

अथाश्लेषामघयोराह—

आश्लेषासु भुजङ्गमदारुणपीडावहश्चरन् शुक्रः।
भिन्दन् मघां महामात्रदोषकृद् भूरिवृष्टिकरः ॥२८॥

शुक्र आश्लेषासु चरंस्तिष्ठन् भुजङ्गमेभ्यः सर्पेभ्यो लोकानां दारुणां तीव्रां पीडां वहेत् कुर्यात्। मघां भिन्दन् विदारयन् महामात्राणां हस्तिसाधनपतीनां दोषकृद् दोषं करोति। केचिन्महामात्याः प्रधाना इतीच्छन्ति। भूरिवृष्टिकरो बहुवर्षकरः।

भेदलक्षणं गणितकारैरुक्तम्—

छादयति योगतारां मानार्द्धोनाधिकाद् भविक्षेपात्[2]।
स्फुटविक्षेपो यस्याधिकोनको भवति समदिक्स्थः ॥
विक्षेपेऽन्त्ये सौम्ये तृतीयतारां भिनत्ति पित्र्यस्य।
इन्दुर्भिनत्ति पुष्यं पौष्णं वारुणमविक्षिप्तः ॥इति॥२८॥

अथ पूर्वोत्तरफल्गुन्योराह—

भाग्ये शबरपुलिन्दप्रध्वंसकरोऽम्बुनिवहमोक्षाय।
आर्यम्णे कुरुजाङ्गलपाञ्चालघनः सलिलदायी ॥२९॥

---

१. महामात्य इति पाठान्तरम्।

२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्ते तारागृहसमागमाधिकारस्येमौ श्लोकौ। भिन्नदिक्स्थयोरपि ग्रहतारयोर्यदा दक्षिणोत्तरमन्तरं मानार्द्धलिप्तं तदा ग्रहो योगतारां छादयति। अत्र "यदाऽपममण्डलादेको दक्षिणदिशि विक्षिप्तो भवति द्वितीयश्चोत्तरविक्षिप्तस्तदा शङ्कुर्व नास्ति" इति वदतां मधुसूदनसुतचतुर्वेदाचार्यपृथूदकस्वामिनां भ्रान्तिरेवेति। मघातृतीयतारोत्तरशरः पृथूदकस्वामिमते चन्द्रपरमशरसमः, तेन चन्द्रस्यान्त्ये परमे विक्षेपे भेद उत्पद्यते। एवं शतभिषजोऽष्टादशकलाः शरः, तत्राविक्षिप्तश्चन्द्रः स्वल्पान्तरेण भेदमुत्पादयतीति सुधीभिर्भृशं विचिन्त्यम्।

भाग्ये पूर्वफल्गुन्यां शबरा जनाः पुलिन्दाश्च। एतेषां प्रध्वंसकरो विनाशकरः। अम्बुनिवहमोक्षाय। अम्बुनो जलस्य निवहं वेगं मुञ्चति। बहुजलं वर्षतीत्यर्थः। आर्यम्णे उत्तरफल्गुन्यां कुरून् जनान्। जाङ्गलं स्वल्पोदकस्थानम्। तत्र ये निवसन्ति प्राणिनः। पाञ्चालान् जनान्। एतान् हन्ति। सलिलं जलं ददातीति सलिलदायी। वर्षतीत्यर्थः ॥२९॥

अथ हस्तचित्रयोराह—

कौरवचित्रकराणां हस्ते पीडा जलस्य च निरोधः।
कूपकृदण्डजपीडा चित्रास्थे शोभना वृष्टिः ॥३०॥

हस्ते स्थिते शुक्रे कौरवा जनाः। चित्रकराश्चित्रज्ञाः शिल्पिनः। एषां पीडा भवति जलस्योदकस्य च निरोधोऽवर्षणम्। चित्रास्थे शुक्रे कूपकृतां कूपकराणां खे अण्डजानां पक्षिणां च पीडा भवति। वृष्टिश्च शोभना कालोपयोग्या भवति ॥३०॥

अथ स्वातिविशाखयोराह—

स्वातौ प्रभूतवृष्टिर्दूतवणिग्नाविकान् स्पृशत्यनयः।
ऐन्द्राग्नेऽपि सुवृष्टिर्वणिजां च भयं विजानीयात् ॥३१॥

स्वातौ स्थिते शुक्रे प्रभूता बह्वी वृष्टिर्भवति। दूता गमागमिनः। वणिजः क्रयविक्रयज्ञाः। नाविका नौकर्णधाराः। एताननयः स्पृशति। सोपद्रवा भवन्तीत्यर्थः। ऐन्द्राग्ने विशाखायां स्थिते सुवृष्टिः शोभना वृष्टिर्भवति। तथा वणिजां [1]किराटानां च भयं भीतिं विजानीयाद् विन्द्यात् ॥३१॥

अथानुराधाज्येष्ठामूलेष्वाह—

मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसन्तापः।
मौलिकभिषजां मूले त्रिष्वपि चैतेष्वनावृष्टिः ॥३२॥

मैत्रेऽनुराधायां क्षत्रविरोधः क्षत्रियाणामुपद्रवः। ज्येष्ठायां स्थिते शुक्रे क्षत्रमुख्यानां क्षत्रियप्रधानानां सन्ताप उपद्रवः। मूले मौलिकानां मूलद्रव्यविक्रयिणां भिषजां वैद्यानां च सन्तापः। एतेषु त्रिष्वप्यनुराधाज्येष्ठामूलेष्वनावृष्टिरवर्षणं भवति। ३२॥

अथ पूर्वाषाढोत्तराषाढश्रवणधनिष्ठास्वाह—

आप्ये सलिलजपीडा विश्वेशे व्याधयः प्रकुप्यन्ति।
श्रवणे श्रवणव्याधिः पाखण्डिभयं धनिष्ठासु ॥३३॥

---

१. द्रष्टव्यास्य ग्रन्थस्य १३४ पृष्ठे १ टिप्पणी।

आप्ये पूर्वाषाढायां सलिलजैर्जलोद्भवैश्च प्राणिभिर्द्रव्यैश्च प्राणिनां पीडा भवति। सलिलजानां पीडा भवति इति केचित्। विश्वेशे उत्तराषाढायां स्थिते शुक्रे व्याधयो रोगाः प्रकुप्यन्ति बाहुल्येन भवन्ति। श्रवणे स्थिते श्रवणव्याधिः कर्णे रोगो भवति। धनिष्ठासु स्थिते पाखण्डिभयम्। पाखण्डिनो वेदबाह्याः तेषु भयं भवति ॥३३॥

अथ शतभिषक्पूर्वभद्रपदयोराह—

शतभिषजि शौण्डिकानामजैकभे द्यूतजीविनां पीडाम्।
कुरुपाञ्चालानामपि करोति चास्मिन् सितः सलिलम् ॥३४॥

सितः शुक्रः शतभिषजि स्थितः शौण्डिकानां मद्यपानप्रसक्तानां पीडाकरः। अजैकभे पूर्वभद्रपदायां स्थितो द्यूतजीविनां द्यूतेन छलेन ये जीवन्ति तेषां पीडाकरः। कुरवः पाञ्चालाश्च जनास्तेषामपि पीडां करोति। अपिशब्दो वार्थे। अस्मिन्नक्षत्रे स्थितः सितः शुक्रः सलिलं जलं करोति ॥३४॥

अथोत्तरभद्रपदारेवत्यश्विनीभरणीष्वाह—

आहिर्बुध्न्ये फलमूलतापकृद्यायिनां च रेवत्याम्।
अश्विन्यां हयपानां याम्ये तु किरातयवनानाम् ॥३५॥

आहिर्बुध्न्ये उत्तरभद्रपदायां फलानां मूलानां च तापकृत् पीडाकरः। रेवत्यां यायिनां पथिकानां च पीडाकरः। अश्विन्यां हयपानामश्वपतीनां तापकृत्। याम्ये भरण्यां किरातानां यवनानां जनानां च तापकृत् तापकरः। तथा च काश्यपः—

भेदयेत् कृत्तिकां शुक्रो बहुतोयं विमुञ्चति।
रोहिण्यां मरणं घोरं गृध्राकुलभयाकुलम् ॥
मृगे तु सर्वसस्यानां क्षयं कुर्याद् भृगोः सुतः।
आर्द्रासु च कलिङ्गानां कोशलानां भयावहः ॥
पुनर्वसौ विदर्भाणां पीडयत्युशनास्तथा।
पुष्ये पुष्टिं समायान्ति जनाः सस्यानि वृष्टयः ॥
आश्लेषासूशना भेदात् पीडयेद् भुजगैः प्रजाः।
मघाभेदकरः शुक्रो महामात्रांश्च पीडयेत् ॥
भाग्ये शबरविध्वंसं बहुवृष्टिं प्रमुञ्चति।
आर्यम्णे तु कुरुक्षेत्रं पाञ्चालांश्चोपतापयेत् ॥
हस्ते चित्रकराणां तु पीडा वृष्टिक्षयो भवेत्।
सुवृष्टिं कूपकृत्पीडां चित्राभेदं यदा व्रजेत् ॥

स्वास्तिभेदे सुवृष्टि च वणिग्नाविकभीतिदः ।
विशाखायां सुवृष्टि च मैत्रे मित्रं विरुध्यति ॥
ऐन्द्रे पौरविरोधः स्यान्मूले तु भिषजां भयम् ।
आप्ये वैश्वे व्याधिभयं वैष्णवे कर्णवेदना ॥
धनिष्ठासु कुकर्मस्थान् वारुणे शौण्डिकक्षयम् ।
प्रोष्ठपादे पूर्वसक्तानहिर्बुध्न्ये फलक्षयः ॥
यायिनां सनृपाणां च पौष्णे ज्ञेयं महद्भयम् ।
अश्विन्यां हयपीडाकृद् भरण्यां कृषिजीविनाम् ॥इति।

तथा च पराशरः—

भाग्यार्यमानिलेन्द्राग्निप्रोष्ठपदरौद्रयाम्यतिष्यगतः स्निग्धो रश्मिवान् वर्षकरः। तत्र प्राजापत्यत्वाष्ट्रेन्द्राग्निमैत्राणामुदग्मध्यदक्षिणेन व्रजेत् क्षेमसस्यवृष्टीनां प्रकृष्टमध्यान्तफलो भवति। पित्र्याग्नेययोरुदग्मध्यगतः प्रजाहिताय। एवमेवाषाढादित्यरोहिणीषु मध्यगः पुररोधाय च ॥३५॥

अथ शुक्रस्य तिथिष्वस्तगयोदयफलमाह—

चतुर्दशीं पञ्चदशीं तथाष्टमीं तमिस्रपक्षस्य तिथिं भृगोः सुतः ।
यदा व्रजेद् दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते ॥३६॥

भृगोः सुतः शुक्रस्तमिस्रपक्षस्य कृष्णपक्षस्य चतुर्दशीं तिथिं पञ्चदशीममावस्यामष्टमीं वा समाश्रित्य यदा दर्शनमुदयं व्रजेत् सूर्यमण्डलादुद्गच्छति, अथवा अस्तमयमेति तत्रैवादर्शनमायाति तदा मही भूः, वारिमयीव जलमयीव लक्ष्यते दृश्यते। अतिवृष्टिर्भवतीत्यर्थः। तथा च काश्यपः—

कृष्णपक्षे ह्यमावस्याचतुर्दश्यष्टमीषु च ।
उदयं भार्गवः कुर्यात्तदा वृष्टिं प्रमुञ्चति ॥

पराशरश्चात्र विशेषमाह—

कार्तिके तु यदा मासि कुरुतेऽस्तमयोदयौ ।
तदा ह्यां नवतिं पूर्णां देवो भुवि न वर्षति ॥
वर्तमाने यदा शुक्रे कृत्तिकासु बृहस्पतिः ।
उदेति तु तदा देवस्तां समां वर्षते समाम् ॥
अस्तोदये तु शुक्रस्य यदि चन्द्रदिवाकरौ ।
आवृत्तिमार्गं कुर्वाते तदा वर्षति भार्गवः ॥

अवार्षके भे विचरन् यदि वर्षति भार्गवः ।
वार्षकर्क्षगतो व्यक्तं षोडशार्चिर्न वर्षति ॥ इति ॥३६॥

अथ गुरुशुक्रयोरन्योन्यं सप्तमस्थयोः फलमाह —

गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा ।
तदा प्रजा रुग्भयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम् ॥३७॥

गुरुर्जीवः। भृगुः शुक्रः। एतावपरपूर्वकाष्ठयोः। अपरा पश्चिमा। पूर्वा प्राची। काष्ठा दिक्। पश्चिमपूर्वयोर्दिशोः परस्परमन्योन्यं यदि च सप्तमराशिगौ भवतः। कदाचित् पूर्वकाष्ठागतः शुक्रोऽपरकाष्ठागतो गुरुः। कदाचित् पूर्वकाष्ठागतो गुरुरपरकाष्ठागतः शुक्रः। नन्वत्रापरपूर्वकाष्ठयोरित्यनेनैव सिद्धे सप्तमराशिग्रहणं किमर्थम्? उच्यते। यदि सप्तमराशिग्रहणं न क्रियते तदापरपूर्वस्थावन्येनापि प्रकारेण भवतः। एकः प्राक्कपाले स्थितोऽपरोऽपरकपालस्थः। तदापरपूर्वकाष्ठास्थौ भवत इत्यतः सप्तमराशिग्रहणं कृतम्। तेनैतज्ज्ञापयति—यथोदयास्तयो रेखासक्तयोरयं योगो भवति नान्यथा। एवं परस्परं सप्तमराशिगौ यदा तस्मिन् काले प्रजा जनाः। रुग्भयशोकपीडिताः। रोगैर्भयेन शोकेन दुःखेन च पीडिता उपहताः। पुरन्दरोज्झितमिन्द्रोत्सृष्टं वारि जलं न पश्यन्ति नावलोकयन्ति। अवृष्टिर्भवतीत्यर्थः॥

नन्वत्र यथासंख्येनैवापरपूर्वकाष्ठागौ गुरुभृगू यदा भवतस्तदायं योगो भवति यथा, तथा भृगुर्गुरुश्चेत्यनया पाठविप्रतिपत्त्या वा। यथासंख्येनैव कस्माद्योगो न भवति कथमनियमेन भवति। तथा च पराशरेण गुरुभृगू अपरपूर्वकाष्ठास्थावभिहतौ। तथा च —

उदयास्तमयस्थौ तु यदा शुक्रबृहस्पती ।
पूर्वसन्ध्यागतौ स्यातां जनयेतां तदा भयम् ॥

ऋषिपुत्रेण च भृगुगुरू अपरपूर्वकाष्ठास्थावभिहितौ । तथा चाह—

पृष्ठतस्तूशना यत्र पुरस्ताच्च बृहस्पतिः ।
न च कश्चिद् ग्रहो मध्ये बुधो वाप्यथ दृश्यते ॥
एकमार्गसमापन्नौ प्रेक्षमाणौ परस्परम् ।
ते दिशौ पीडिते विन्द्यात् त्रीन् पक्षानभियोजयत् ॥

अत उभयदर्शनान्निश्चीयते यथा ऋषीणामत्रैकवाक्यता नास्त्येवेति स्वयमेवमङ्गीकृतं तैरिति।

वयं त्वत्र ब्रूमः--

उभयदर्शनाद् गुरुभृगुभ्यामनियमोऽत्राऽऽचार्यस्याभिप्रेतस्तथा बृहज्जातकेऽपि[1] प्रयोगः कृत इति। "शूरस्तब्धौ' विषमवधकौ सद्गुणाढ्यौ सुविज्ञौ चार्वङ्गेष्टौ रविशशियुतेष्वारपूर्वांशकेषु" इत्यत्र च नियमव्याख्यैव यथा तथा कृतैव। अत्रापि यथा तथा गुरुभृग्वोरपरपूर्वकाष्ठास्थयोरित्यनियमव्याख्यैव ज्यायसी। सति वा नियमे पाठविप्रतिपत्तिचोदने नावतरतीति।

तथा च भद्रबाहौ पठ्यते --

प्रत्यूषे प्राक्स्थितः शुक्रः पृष्ठतश्च बृहस्पतिः।
यदाऽन्योन्यं निरीक्षेते तदा चक्रं प्रवर्तते॥
धर्मार्थकामा लुप्यन्ते प्रस्तावा वार्णसङ्कराः।
नृपाणां च समुद्योगो यतः शुक्रस्ततो जयः॥
अवृष्टिश्च भयं रोगं दुर्भिक्षं च तदा भवेत्।
आढकेन तु धान्यस्य ग्राहकः स्यात्तदा प्रियः॥
यदा तु पृष्ठतः शुक्रः पुरतश्च बृहस्पतिः।
यदा वालोकयेतां तौ तावदेव फलं भवेत्॥

तथा च गर्गः --

अन्योन्यमस्तसंस्थौ तु यदि शुक्रबृहस्पती।
पूर्वसन्ध्यागतौ घोरं जनयेतां महद्भयम्॥

तस्मात् साधूक्तं गुरुः शुक्रः पृष्ठतः पुरतो वेति॥३७॥

अथ सर्वैर्ग्रहैः शुक्रस्याग्रवर्तिभिः फलमाह —

यदा स्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽग्रपथानुवर्तिनः।
नृनागविद्याधरसङ्गरास्तदा भवन्ति वाताश्च समुच्छ्रितान्तकाः॥३८॥
न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यग् न रता द्विजातयः।
न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम्॥३९॥

यदा यस्मिन् काले जीवबुधारसूर्यजाः। जीवो बृहस्पतिः। बुधः सौम्यः। आरो भौमः। सूर्यजः शनैश्चरः। एते सर्व एव सितस्य शुक्रस्याग्रपथानुवर्तिनः स्थिताः। पुरःसरा भवन्तीत्यर्थः। तदा तस्मिन् काले नृणां मनुष्याणां नागानां पन्नगानां विद्याधराणां देवयोनीनां सङ्गराः संग्रामा भवन्ति। तथा वाता वायवः समुच्छ्रितान्तकाः। समुच्छ्रितानां पर्वतानां वृक्षादीनामन्तकाः शृङ्गाग्रपातिनो भवन्तीति॥३८॥

---

१. बृहज्जातके २१ अध्यायस्य १० श्लोकः।

न मित्रभाव इति। सुहृदो मित्राणि न मित्रभावे सुहृद्भावे व्यवस्थिताः संस्थिता भवन्ति। मित्रतां न भजन्त इत्यर्थः। तथा द्विजातयो ब्राह्मणाः सम्यग्यथावद्विहितासु क्रियास्वग्निहोत्राद्यासु न रताः सक्ता न भवन्ति। तथा वासव इन्द्रोऽल्पं स्तोकमप्यम्बु जलं न ददाति न प्रयच्छति। न किञ्चिद्वर्षतीत्यर्थः। भूभृतां पर्वतानां वज्रेणोल्कया शिरांसि मस्तकानि भिनत्ति विदारयतीत्यर्थः ॥३९॥

एवं सर्वेषूक्त्वाऽधुनैकैकस्याग्रगतस्य वक्तुकामः शनैश्चरस्य तावदाह—

शनैश्चरे म्लेच्छविडालकुञ्जराः खरा महिष्योऽसितधान्यशूकराः ।
पुलिन्दशूद्राश्च सदक्षिणापथाः क्षयं व्रजन्त्यक्षिमरुद्गदोद्भवैः ॥४०॥

शनैश्चरे शुक्रस्याग्रतः स्थिते म्लेच्छा जनाः। विडाला मार्जाराः। कुञ्जरा गजाः। खरा गर्दभाः। महिष्यः प्रसिद्धाः। असितधान्यं कृष्णधान्यम्। शूकरा वराहाः। पुलिन्दा निषादजनाः। शूद्रा जनाः। ते च सदक्षिणापथा दक्षिणदिग्निवासिभिर्जनैः सहिताः। एते सर्व एव क्षयं विनाशं व्रजन्ति। कैः? अक्षिमरुद्गदोद्भवैः। अक्षिषु नेत्रेषु ये गदा रोगा मरुता वायुना च ये गदास्तदुद्भवैस्तदुत्पन्नैर्दोषैरिति ॥४०॥

अथ भौमेऽग्रतः स्थिते फलमाह—

निहन्ति शुक्रः क्षितिजेऽग्रतः प्रजां हुताशशस्त्रक्षुदवृष्टितस्करैः ।
चराचरं व्यक्तमथोत्तरापथं दिशोऽग्निविद्युद्रजसा च पीडयेत् ॥४१॥

शुक्रो भार्गवः क्षितिजे भौमे अग्रतः पुरतः स्थिते सत्येवं प्रजां निहन्ति नाशयति। कैः? हुताशशस्त्रक्षुदवृष्टितस्करैः। हुताशोऽग्निः। शस्त्रमायुधं संग्राम इत्यर्थः। क्षुद् दुर्भिक्षम्। अवृष्टिरवर्षणम्। तस्कराश्चौराः। एतैः। तथोत्तरां दिशम्। चराचरम्। चरं जङ्गमाख्यमचरं स्थावराख्यं व्यक्तं निःशेषं निहन्ति। तथा दिश आशाः। अग्निविद्युद्रजसा च पीडयेत्। अग्निना हुतवहेन। विद्युता तडिता। रजसा पांशुना। एतैः पीडयेद् उपतापयेत् ॥४१॥

अथ बृहस्पतावग्रतः स्थिते फलमाह—

बृहस्पतौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विजगोसुरालयान् ।
दिशं च पूर्वां करकासृजोऽम्बुदा गले गदा भूरि भवेच्च शारदम् ॥४२॥

सितः शुक्रो बृहस्पतौ पुरःस्थिते अग्रवर्तिनि सति समस्तं निःशेषं यत्किञ्चित्सितं शुक्लवर्णम्। तथा द्विजगोसुरालयान्। द्विजा ब्राह्मणाः। गावः। सुरा देवाः। एषामालयं स्थानं हन्ति नाशयति। तथा दिशमाशां च पूर्वामैन्द्रीं हन्ति। अम्बुदा मेघाः करकासृजः करकावृष्टिं सृजन्ति मुञ्चन्ति। गले कण्ठे गदा रोगा लोकानां भवन्ति। शारदं च सस्यं भूरि बहु भवेत् ॥४२॥

अथ बुधे अग्रतः स्थिते फलमाह--

सौम्योऽस्तोदययोः पुरो भृगुसुतस्यावस्थितस्तोयकृद्
रोगान् पित्तजकामलांश्च कुरुते पुष्णाति च ग्रैष्मिकान् ।
हन्यात् प्रव्रजिताग्निहोत्रिकभिषग्रङ्गोपजीव्यान् हयान्
वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पञ्चाद्दिशम् ॥४३॥

सौम्यो बुधो भृगुसुतस्य शुक्रस्य पुरोऽग्रतः। अस्तोदययोः। अस्तमितः सूर्यमण्डले स्थित उदितस्तन्निर्गतो वा यथा तथावस्थितस्तोयकृद्भवति, तोयं जलं करोति। तथा रोगान् ज्वरादीन् करोति। पित्तजकामलांश्च पित्तजै रोगैः सहिताः कामलाः पित्तजकामलास्तांश्च कुरुते। ग्रैष्मिकान् ग्रीष्मजातांश्च सस्यादीन् पुष्णाति पुष्टिं नयति। तथा प्रव्रजितान् वनस्थान्। आग्निहोत्रिकान् अग्निहोत्रे सक्तान्। भिषजो वैद्यान्। रङ्गोपजीव्यान् मल्लादीन्। हयानश्वान्। वैश्यान् वैश्यजातीयान्। गास्तथा वाहनैरश्वादिभिश्च सह नरपतीन् नृपान्। पीतानि पीतवर्णानि सर्वाणि द्रव्याणि। पञ्चाद्दिशमपरां चाऽऽशां हन्यान्नाशयेत् ॥४३॥

अथ वर्णलक्षणमाह--

शिखिभयमनलाभे शस्त्रकोपश्च रक्ते
कनकनिकषगौरे व्याधयो दैत्यपूज्ये ।
हरितकपिलरूपे श्वासकासप्रकोपः
पतति न सलिलं खाद् भस्मरूक्षासिताभे ॥४४॥

दैत्यपूज्ये शुक्रे अनलाभे अग्निसदृशकान्तौ शिखिभयमग्निभीतिर्भवति। रक्ते लोहितवर्णे शस्त्रकोपः संग्रामा भवन्ति। कनकस्य सुवर्णस्य याऽसौ निकषरेखा तद्वद् गौरवर्णे व्याधयो रोगा भवन्ति। हरितरूपे शुकाभे कपिलरूपे च पिङ्गवर्णे श्वासकासप्रकोपो भवति। श्वासेन च कासेन च पीडा जनानां भवति। भस्माभे भस्मवर्णे। रूक्षाभे स्नेहरहिते। असिताभे कृष्णकान्तौ। खादाकाशात् सलिलं जलं न पतति। देवो न वर्षतीत्यर्थः ॥४४॥

अन्यदप्याह--

दधिकुमुदशशाङ्ककान्तिभृत् स्फुटविकसत्किरणो बृहत्तनुः।
सुगतिरविकृतो जयान्वितः कृतयुगरूपकरः सिताह्वयः ॥४५॥

ईदृग्रूपः सिताह्वयः सितनामा शुक्रः कृतयुगरूपकरः, कृतयुगस्य रूपं करोति, तद्धर्मानुप्रवृत्तेर्जना व्याधिदारिद्र्यशोकवर्जिता भवन्तीत्यर्थः। कीदृशः ? दधिकुमुदशशाङ्ककान्तिभृत्। दध्नः क्षीरविकारस्य। कुमुदस्य पुष्पविशेषस्य।

शशाङ्कस्य चन्द्रस्य सदृशीं कान्तिमाभां बिभर्ति धारयति। स्फुटविकसत्किरणः, स्फुटाः स्पष्टा विकसन्तो विस्तीर्णाः किरणा रश्मयो यस्य तथाभूतः। बृहत्तनुर्विस्तीर्णदेहः। सुगतिः शोभनगतिः। अवक्रो ग्रहर्क्षाणामुत्तरभागगतश्च। अविकृतो विकारवर्जित उत्पातरहितः। जयान्वितो जययुक्त इति। तथा च पराशरः--

हिमकनकरजतशङ्खस्फटिकवैदूर्यमुक्तामधुघृतमण्डकुमुदशशाङ्कच्छविस्निग्धदीप्तप्रकान्तिप्रकाशः प्रसन्नार्चिरवनिपतिहितकरः प्रशान्तवैरो दुर्भिक्षारोगवृष्टिकरश्च। श्यावनीलरूक्षकपिलरक्तध्वस्तदीनाल्पलोष्टसन्निभः शस्त्रवैरव्याधिवर्षान्नक्षयकरः।

तथा च--

कूटाकारनिभः स्निग्धो मार्गस्थो रजतप्रभः।
भार्गवो विस्तृतार्चिश्च प्रजाभावकरः स्मृतः ॥इति॥
प्रावृषि शुक्रः प्राच्यां दिशि स्थितोऽल्पं जलं सृजति नित्यम्।
धान्यं च भूरि कुरुते तृणं च बहु जायते तत्र॥
अपरां निषेव्यमाणः काष्ठां शुक्रो जलं सृजति भूरि।
धान्यं कुरुते चाल्पं तृणं न बहु जायते तत्र॥ इति ॥४५॥
इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शुक्रचारो
नाम नवमोऽध्यायः ॥९॥

अथ शनैश्चरचारो व्याख्यायते। तत्रादावेव शनैश्चरस्य नक्षत्रावस्थितिवशेन फलमाह--

श्रवणानिलहस्तार्द्राभरणीभाग्योपगः सुतोऽर्कस्य।
प्रचुरसलिलोपगूढां करोति धात्रीं यदि स्निग्धः ॥१॥
अहिवरुणपुरन्दरदैवतेषु सुक्षेमकृन्न चाति जलम्।
क्षुच्छस्त्रावृष्टिकरो मूले प्रत्येकमपि वक्ष्ये ॥२॥

श्रवणानिलेति। श्रवणम्। अनिलः स्वातिः। हस्तः। आर्द्रा। भरणी। भाग्यं पूर्वफल्गुनी। एतेषु नक्षत्रेष्वर्कस्य सुतः शनैश्चर उपगः प्राप्तः स्थित इत्यर्थः। तत्र यदि स्निग्धो विमलमूर्तिर्भवति तदा धात्रीं भूमिं प्रचुरसलिलोपगूढां प्रचुरेण प्रभूतेन सलिलेन पानीयेन उपगूढां छन्नां करोति। तथा च गर्गः--

याम्यवायव्यसावित्ररौद्रश्रवणसंस्थितः।
भवेत् स्निग्धवपुः सौरो भाग्ये चैवातिवर्षदः॥ इति ॥१॥

अहिवरुणपुरन्दरदैवतेष्विति। अहिदैवतमाश्लेषा। वरुणदैवतं शतभिषक्। पुरन्दर इन्द्रस्तद्दैवतं ज्येष्ठा। एतेष्ववस्थितः सौरः सुक्षेमकृत् शोभनं क्षेमं करोति। न चाति जलम्, अति प्रभूतं जलमुदकं न करोति। क्षुच्छस्त्रावृष्टिकरो मूले। मूले स्थितः क्षुद् दुर्भिक्षम्। शस्त्रं संग्रामः। अवृष्टिरवर्षणम्। एताः करोति। प्रत्येकमपि वृक्ष्ये। एकमेकं प्रति प्रत्येकम्। इदानीं प्रत्येकं नक्षत्रमधिकृत्य वक्ष्ये कथयिष्ये। तथा च गर्गः—

सार्पवारुणमाहेन्द्रनक्षत्रेषु च संस्थितः।
स्निग्धः सौरः क्षेमकरो नातिवृष्टिं प्रमुञ्चति॥
क्षुच्छस्त्रवृष्टिदो मूले सूर्यपुत्रः समास्थितः॥ इति॥ २॥

अथाऽश्विनीभरण्योः समवस्थितस्य सौरस्य फलमाह—

तुरगतुरगोपचारककविवैद्यामात्यहार्कजोऽश्विगतः।
याम्ये नर्तकवादकगेयज्ञक्षुद्रनैकृतिकान् ॥३॥

अर्कजः सौरः। अश्विगतः। अश्विन्यामवस्थितः। तुरगानश्वान्। तुरगाणां य उपचारकास्तान् तुरगोपचारकान्। तथा कवीन् काव्यकुशलान्। वैद्यान् कायचिकित्सकान्। अमात्यान् मन्त्रिणश्च। हन्ति नाशयति। याम्ये भरण्यां नर्तनं शिल्पमस्येति नर्तकः। वादनं शिल्पमस्येति वादकः। गेयं जानातीति गेयज्ञः। क्षुद्रोऽन्यायवर्ती। नैकृतिको निषादः। एतान् हन्ति नाशयति॥३॥

अथ कृत्तिकारोहिण्योराह—

बहुलास्थे पीडयन्ते सौरेऽग्न्युपजीविनश्चमूपाश्च।
रोहिण्यां कोशलमद्रकाशिपाञ्चालशाकटिकाः ॥४॥

सौरे शनैश्चरे बहुलासु कृत्तिकास्ववस्थिते अग्न्युपजीवनोऽग्निवार्ताः सुवर्णकारलोहकारायस्कारप्रभृतयः। चमूपाः सेनापतयः। एते पीडयन्ते। रोहिण्यां स्थिते सौरे कोशला जनाः। मद्राः। काशयः। पाञ्चालाः। एते जनाः। शाकटिकाः शकटोपजीविनः। एते पीडयन्ते॥४॥

अथ मृगशिरआर्द्रयोराह—

मृगशिरसि वत्सयाजकयजमानार्यजनमध्यदेशाश्च।
रौद्रस्थे पारतरमठास्तैलिकरजकचौराश्च ॥५॥

मृगशिरसि स्थिते सौरे वत्सजनाः। याजकाः। यजन्तीति याजका ऋत्विजः। यजमाना याज्ञिकाः। आर्यजनाः प्रधानजनाः। मध्यदेशाः प्रसिद्धाः। एते पीडयन्ते।

---

१. द्रष्टव्यास्य ग्रन्थस्य १७५ पृष्ठस्था टिप्पणी।

रौद्रस्थे आर्द्रास्थे पारतरा जनाः। मठा जना एव। तैलिकाः प्रसिद्धाः। रजका वस्त्र-रागकृतः। चौरास्तस्कराः। एते पीडयन्ते ॥५॥

अथ पुनर्वसुतिष्ययोराह--

आदित्ये पाञ्चनदप्रत्यन्तसुराष्ट्रसिन्धुसौवीराः ।
पुष्ये घाण्टिकघौषिकयवनवणिक्किंतवकुसुमानि ॥६॥

आदित्ये पुनर्वसौ स्थिते सौरे पाञ्चनदा जनाः। प्रत्यन्ता गह्वरवासिनः। सुराष्ट्रो देशः। सैन्धवाः। सौवीराः। एते पीडयन्ते। पुष्ये स्थिते सौरे घाण्टिका घण्टावादनं शिल्पमस्येति घाण्टिकाः। घोषः शब्दोच्चारणं शिल्पमस्येति घौषिकाः श्रावका इत्यर्थः। अथवा घोषे गह्वरे निवसन्ति ते घौषिकाः। यवना जनाः। वणिजः किराताः[1]। कितवा द्यूतकराः। कुसुमानि पुष्पाणि। एतानि पीडयन्ते ॥६॥

आश्लेषामघयोराह--

सर्पे जलरुहसर्पाः पित्र्ये बाह्लीकचीनगान्धाराः ।
शूलिकपारतवैश्याः कोष्ठागाराणि वणिजश्च ॥७॥

सर्पे आश्लेषायां जलरुहा जलोद्भवाः प्राणिनो द्रव्याणि वा। सर्पा उरगाश्च पीडयन्ते। तथा च गर्गः।

भुजङ्गकच्छपग्राहनागमत्स्यसरीसृपान् ।
हन्यादर्कसुतस्तिष्ठन्नक्षत्रे सर्पदैवते ॥

पित्र्ये मघायां बाह्लीकाः। चीनाः। गान्धाराः। शूलिकाः। पारताः। सर्व एव जनाः। वैश्या वैश्यवर्णाः। कोष्ठागाराण्यविलयग्रामाः। वणिजश्च किराताः[1] पीडयन्त इति सर्वत्र योज्यम् ॥७॥

अथ पूर्वफल्गुन्युत्तरफल्गुन्योराह--

भाग्ये रसविक्रयिणः पण्यस्त्रीकन्यकामहाराष्ट्राः ।
आर्यम्णे नृपगुडलवणभिक्षुकाम्बूनि तक्षशिला ॥८॥

भाग्ये पूर्वफल्गुन्यां रसविक्रयिणः। रसाः षट् मधुराम्ललवणतिक्तकटु-कषायाः। एषां विक्रयकारिणः। पण्यस्त्रियो वेश्याः। कन्यकाः कुमार्यः। महाराष्ट्रा महाराष्ट्रदेशे ये जना निवसन्ति। एते सर्व एव पीडयन्ते। आर्यम्णे उत्तरफल्गुन्यां नृपा राजानः। गुडमिक्षुविकारः। लवणं प्रसिद्धम्। भिक्षुका यतयः। अम्बु पानीयम्। एतानि। तक्षशिला नगरी। एते सर्व एव पीडयन्ते ॥८॥

---

१. द्रष्टव्याऽस्य ग्रन्थस्य १३४ पृष्ठे १ टिप्पणी।

अथ हस्ते स्थितस्याह —

हस्ते नापितचाक्रिकचौरभिषक्सूचिका द्विपग्राहाः ।
बन्धक्यः कौशलका मालाकाराश्च पीड्यन्ते ॥९॥

हस्तस्थे सौरे नापिताः श्मश्रुकर्मविदः। चाक्रिकाश्चक्रेण चरन्ति चाक्रिकाः, कुम्भकारतैलिकप्रभृतयः। चौरास्तस्कराः। भिषजो वैद्याः। सूचिकाः प्रसिद्धाः शिल्पिनः। द्विपा हस्तिनस्तेषां ग्राहा बन्धकाः। बन्धक्यो वेश्याः। कौशलका जनाः। मालाकाराः पुष्पप्रदायकाः। एते सर्व एव पीड्यन्ते ॥९॥

अथ चित्रास्वात्योराह—

चित्रास्थे प्रमदाजनलेखकचित्रज्ञचित्रभाण्डानि ।
स्वातौ मागधचरदूतसूतपोतप्लवनटाद्याः ॥१०॥

चित्रास्थे सौरे प्रमदाजनः स्त्रीलोकः। लेखका लिपिज्ञाः। चित्रज्ञाश्चित्रकर्मविदः। चित्रभाण्डानि नानावर्णानि भाण्डानि। बहुवर्णानीत्यर्थः। एतानि पीड्यन्ते। स्वातौ स्थिते सौरे मागधा नाम श्रावका जना वा मगधवासिनः। चरा गूढपुरुषाः। दूता गमागमकारिणः। सूताः सारथयः कथाश्रावका वा। पोतप्लवाः पोतः समुद्रो येनोत्तीर्यते तत्र ये प्लवन्ते, पोतेन यान्तीत्यर्थः। नटा नृत्यज्ञाः। आदिग्रहणादन्येऽपि ये गीतवाद्यज्ञास्ते सर्व एव पीड्यन्ते ॥१०॥

अथ विशाखास्थिते आह—

ऐन्द्राग्नाख्ये त्रैगर्तचीनकौलूतकुङ्कुमं लाक्षा ।
सस्यान्यथ माञ्जिष्ठं कौसुम्भं च क्षयं याति ॥११॥

ऐन्द्राग्नाख्ये विशाखायां स्थिते सौरे त्रैगर्ता जनाः। चीनाः। कौलूताः कुलूतनिवासिनः। कुङ्कुमं काश्मीरम्। लाक्षा जतु। सस्यानि प्रसिद्धानि। अथ माञ्जिष्ठम्। अथशब्दः स्वार्थे। माञ्जिष्ठया रक्तं माञ्जिष्ठम्। कौसुम्भं च। एतत्सर्वं क्षयं याति नश्यतीत्यर्थः ॥११॥

अथाऽनुराधायामाह—

मैत्रे कुलूततङ्गणखसकाश्मीराः समन्त्रिचक्रचराः ।
उपतापं यान्ति च घाण्टिका विभेदश्च मित्राणाम् ॥१२॥

मैत्रेऽनुराधायां कुलूतो देशस्तत्र ये जनाः। तङ्गणा जनाः। खसाः पर्वतवासिनः। काश्मीरा जनाः। किंभूताः ? समन्त्रिचक्रचराः, मन्त्रिभिः सचिवैश्चक्रचरैः कुम्भकारप्रभृतिभिः सहिताः। एते सर्वे उपतापं यान्ति उपद्रवं प्राप्नुवन्ति। तथा

घाण्टिका घण्टावादिनः शिल्पिनस्तेऽप्युपतापं यान्ति। तथा मित्राणां सुहृदां च परस्परं विभेदो विश्लेषो भवति ॥१२॥

अथ ज्येष्ठामूलयोराह--

ज्येष्ठासु नृपपुरोहितनृपसत्कृतशूरगणकुलश्रेण्यः ।
मूले तु काशिकोशलपाञ्चालफलौषधीयोधाः ॥१३॥

ज्येष्ठासु स्थिते सौरे नृपा राजानः। पुरोहितास्तदाचार्याः। नृपसत्कृता राजपूजिताः। शूराः संग्रामवीराः। गणाः समूहा मठप्रायाः। कुलानि प्रधानकुलानि। श्रेणी बहूनां समानजातीयानां सङ्घः। एते सर्व एवोपतापं यान्ति। मूले तु स्थिते सौरे काशयो जनाः। कोशलाः। पाञ्चालाः। फलान्याम्रादीनि। ओषध्यः प्रसिद्धाः। योधाः संग्रामकुशलाः। एत एवोपतापं यान्ति ॥१३॥

अथ पूर्वाषाढायामाह--

आप्येऽङ्गवङ्गकौशलगिरिव्रजा मगधपुण्ड्रमिथिलाश्च ।
उपतापं यान्ति जना वसन्ति ये ताम्रलिप्त्यां च ॥१४॥

आप्ये पूर्वाषाढायां स्थिते सौरे अङ्गा जनाः। वङ्गाः। कौशलाः। गिरिव्रजा जना एव। मगधाः। पुण्ड्राः। मिथिलाश्च। एते सर्व एवोपतापं यान्ति उपद्रवं प्राप्नुवन्ति। ये च जनास्ताम्रलिप्त्यां नगर्यां वसन्ति तेऽप्युपतापं यान्ति ॥१४॥

अथोत्तराषाढायामाह--

विश्वेश्वरेऽर्कपुत्रश्चरन् दशार्णान्निहन्ति यवनांश्च ।
उज्जयिनीं शबरान् पारियात्रिकान् कुन्तिभोजांश्च ॥१५॥

विश्वेश्वरे उत्तराषाढायामर्कपुत्रः शनैश्चरश्चरंस्तिष्ठन् जनान् यवनांश्च निहन्ति नाशयति। चशब्दः समुच्चये। उज्जयिनीं देशम्। शबरान् जनान्। पारियात्रिकान् पारियात्रे गिरौ ये निवसन्ति तान्। कुन्तिभोजांश्च जनानेतांश्च निहन्ति नाशयति ॥१५॥

अथ श्रवणधनिष्ठयोराह--

श्रवणे राजाधिकृतान् विप्राग्र्यभिषक्पुरोहितकलिङ्गान् ।
वसुभे मगधेशजयो वृद्धिश्च धनेष्वधिकृतानाम् ॥१६॥

श्रवणे स्थितः सौरो राजाधिकृतान्। राज्ञा नृपेणाधिकारे स्थापितान् नियोगिन इत्यर्थः। विप्राग्र्यान् ब्राह्मणप्रधानान्। भिषजो वैद्याः। पुरोहिता आचार्याः। कलिङ्गा जनाः। एतांश्च निहन्ति। वसुभे धनिष्ठायां स्थितः सौरो मगधेशस्य मगधाधिपतेर्जयः। तथा धनेष्वधिकृतानां वित्तरक्षणे विनियुक्तानां वृद्धिर्भवति ॥१६॥

अथ शतभिषक्पूर्वभद्रपदोत्तरभद्रपदास्वाह--

साजे शतभिषजि भिषक्कविशौण्डिकपण्यनीतिवृत्तीनाम् ।
आहिर्बुध्न्ये नद्यो यानकराः स्त्रीहिरण्यं च ॥१७॥

शतभिषजि साजे पूर्वभद्रपदासहिते स्थितः सौरो भिषजो वैद्याः। कवयः काव्यज्ञाः। शौण्डिका मद्यपानप्रसक्ताः। पण्यवृत्तयः क्रयविक्रयजीविनः। नीतिवृत्तयो नीतिशास्त्रज्ञाः। एतान् पीडयति। आहिर्बुध्न्ये उत्तरभद्रपदायां नद्यः सरितः। नदीतीरे ये निवसन्ति। तथा यानकरा रथाधिकारकाः शिल्पिनस्तक्षकाः। स्त्रियो योषितः। हिरण्यं सुवर्णादि। एतान् निहन्ति ॥१७॥

अथ रेवत्यामाह--

रेवत्यां राजभृताः क्रौञ्चद्वीपाश्रिताः शरत्सस्यम् ।
शबराश्च निपीड्यन्ते यवनाश्च शनैश्चरे चरति ॥१८॥

रेवत्यां शनैश्चरे चरति स्थिते सति राजभृता राज्ञा नृपेण ये भृताः पोषिता धृता वा। तथा क्रौञ्चद्वीपे य आश्रिताः स्थिताः। शरत्सस्यं धान्यानि। शबरा जनाः। यवना म्लेच्छजातयः। एते पीडयन्ते। तथा च पराशरः--

आग्नेये प्रविचरन्नग्निस्थूलशूरसेनाहिताग्निलोहकारधातुकाराङ्गनाशौण्डिकाग्न्युपजीविन उपतापयति। प्राजापत्ये मद्रकपाञ्चालकाशिकोशलाङ्गशाकटिकाः कन्यकाश्चोपतप्यन्ते। सौम्ये यजमानयाजकार्यजनमध्यदेशवत्सजनपदाः। रौद्रे पारतरमठतैलिकरजकदस्यवः। आदित्ये सुराष्ट्रसिन्धुसौवीरपञ्चनदप्रत्यन्ता विधवाश्च। पुष्ये पुष्पमानकघाण्टिकघौषिकपोतयात्रिकयवनवणिग्दूताः। आश्लेषासु सर्पाः सलिलजाश्च। मघासु शूलिकवाल्लिकतैलिकगान्धारवैद्यपारतदरदशिल्पिकोष्ठागाराणि। भाग्ये रसविक्रयिपण्यस्त्रीकन्यामहाराष्ट्राः। आर्यम्णे नृपनृपपत्नीसुततिललवणगुडभिक्षुककूपकूर्चधरतक्षशिलादर्शनिवासिनः। हस्ते हस्तिहस्तिग्राहकस्तेनभिषग्रजकसूचिकनापितमालाकारबन्धकीकोशलाः। त्वाष्ट्रे प्रमदालेखकचित्रकरचित्रभाण्डानि। स्वातौ दूतचरसूतमागधप्लवकनटनर्तकगायनवादकपोतयात्रिकाः। ऐन्द्राग्ने त्रैगर्तचीनकौलूतलाक्षाकुङ्कुमकुसुम्भमाञ्जिष्ठपीतकुसुमसस्यानि विग्रहकामाश्च। अनुराधासु खसतङ्गणकुलूतकाश्मीरचक्रचरमन्त्रिघाण्टिकाः। अस्मिन् मित्रभेदं च विन्द्यात्।

ऐन्द्रे जातिगणकुलश्रेणीश्रेष्ठनृपनृपतिसत्कृतपुरोहितान्। मूले काशिकोशलपाञ्चालमूलफलौषधियोधान्। पूर्वाषाढास्वङ्गमगधवङ्गपुण्ड्रकौशलमिथिलागिरिव्रजताम्रलिप्तिनिवासिनः। उत्तराषाढास्ववन्तिशबरकुन्तिभोजदाशार्णेयपारिया-

त्रिकान् । वैष्णवेऽग्निदेशकलिङ्गेशविद्वद्विप्राश्रमभिषग्राजाधिकृतपुरोहितान् । श्रविष्ठासु मगधाधिपतिविजयाय विविधवसुनिचयाय तदधिकृतानामर्थेशांश्च पीडयति । शतभिषजि भिषङ्मद्यसुरासवक्रयविक्रयवनितोपजीविदस्युपाखण्डिनिवासिनः । प्राक्प्रोष्ठपदायां द्रविडकर्णाटवर्तिचोलपाण्ड्यसिंहलमहेन्द्रनगरनिवासिनः । उत्तरभद्रपदायां स्त्रीहिरण्यनिचयतक्षकशमीधान्यनदनदीपान् युग्यकरान् । रेवत्यां शरत्सस्यराजभृतशबरवनवासिक्रौञ्चद्वीपनिवासिनः । अश्विन्यामश्वारोहाश्वपालवैद्यामात्यकविनायकान् । भरणीषु वादकगायननर्तकक्षुद्रनैकृतिकान् पीडयति ॥१८॥

अथ विशाखास्थस्य गुरोः कृत्तिकास्थस्य सौरस्य तथानयोरेकर्क्षगतयोः फलमाह--

यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः ।
तदा प्रजानामनयोऽतिघोरः पुरप्रभेदो गतयोर्भमेकम् ॥१९॥

यदा यस्मिन् काले महेन्द्रमन्त्री बृहस्पतिर्विशाखासु यातः प्राप्तस्तथा भानोरादित्यस्य सुतः पुत्रः सौरो दहनर्क्षे कृत्तिकायां यातस्तदा तस्मिन् काले प्रजानां लोकानामनयो दुर्नयोऽतिघोरो भयावहो भवति । तयोरेवं गुरुसौरयोरेकं भमेकनक्षत्रं गतयोः पुरस्य नगरस्य प्रभेदो भवति । तथा च पराशरः—

कृत्तिकासु शनैश्चारी विशाखासु बृहस्पतिः ।
तिष्ठेद्यदा तदा घोरः प्रजानामनयो भवेत् ॥
एकं नक्षत्रमासाद्य दृश्यते युगपद्यदि ।
अन्योन्यभेदं जानीयात्तदा पुरनिवासिनाम् ॥

गुरुसौरावेकस्थौ द्विस्वभावराशिस्थौ तदाप्यनिष्टफलमभिहितम् । तथा च देवलः—

मीनं धनुषि कन्यायां मिथुने सगुरुः शनिः ।
तिष्ठेद्यदा तदा घोरः प्रजानामनयो भवेत् ॥ इति ॥ १९॥

अथ वर्णस्वरूपमाह—

अण्डजहा रविजो यदि चित्रः क्षुद्भयकृद्यदि पीतमयूखः ।
शस्त्रभयाय च रक्तसवर्णो भस्मनिभो बहुवैरकरश्च ॥२०॥

रविजः शनैश्चरो यदि चित्रश्चित्रवर्णो नानाकारो दृश्यते । तदा अण्डजहा अण्डजान् पक्षिणो हन्ति । यदि पीतमयूखः पीतरश्मिर्दृश्यते तदा क्षुद् दुर्भिक्षं करोति । रक्तसवर्णो रक्ताभः शस्त्रभयाय संग्रामाय भवति । भस्मनिभो भस्मसदृशकान्तिर्बहुवैरकरः प्रजानां भवति । तथा च पराशरः—

नीलपीतः क्षुधे । रक्तभस्मचित्रवर्णः शस्त्रवैरकरोऽण्डजाभिहन्ता । यद्वर्णस्तद्वर्णविनाशी भवति ।

अन्यद्वर्णलक्षणमाह—

वैदूर्यकान्तिविमलः शुभकृत् प्रजानां
बाणातसीकुसुमवर्णनिभश्च शस्तः ।
यं चापि वर्णमुपगच्छति तत्सवर्णान्
सूर्यात्मजः क्षपयतीति मुनिप्रवादः ॥२१॥

सूर्यात्मजः सौरो वैदूर्यकान्तिविमलो वैदूर्यस्य मणेरिव कान्तिः प्रभा विमला निर्मला यस्य स तथाभूतः प्रजानां लोकानां शुभकृत् । शुभं श्रेयः करोति । तथा बाणपुष्पाणामतिकृष्णवर्णानामतसीकुसुमानां चातिनीलवर्णानां वर्णनिभस्तत्सदृशकान्तिः शस्तः प्रशस्तः । यं चापि वर्णमुपगच्छतीति । यादृशं वर्णं सितं रक्तं पीतं कृष्णमुपगच्छति समाश्रयति तत्सवर्णांस्तत्समानवर्णान् द्विजादीन् क्षपयति नाशयति । तद्यथा—श्वेतवर्णो ब्राह्मणान्नाशयति । रक्तः क्षत्रियान् । पीतो वैश्यान् । कृष्णः शूद्रानिति । इत्येवंप्रकारो मुनीनां गर्गादीनां प्रवादो वचनमित्यर्थः । तथा च गर्गः—

भवत्यर्कात्मजे रूक्षे श्यावपीतारुणप्रभे ।
तदात्मकानां भावानां क्षुच्छस्त्राग्निकृतं भयम् ॥

तथा पराशरश्च—

पाण्डुः स्निग्धोऽमलः श्यामो विस्तृतार्चिः शनैश्चरः ।
मार्गस्थश्च प्रसव्यश्च नक्षत्राद्धित इष्यते ॥इति॥२१॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शनैश्चरचारो नाम दशमोऽध्यायः ॥१०॥

अथ केतुचारो व्याख्यायते

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह—

गार्गीयं शिखिचारं पाराशरमसितदेवलकृतं च ।
अन्यांश्च बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः ॥१॥

गार्गीयं गर्गप्रोक्तम् । शिखिचारं केतुचारम् । तथा पाराशरं पराशरकृतम् । असितनामाचार्यस्तत्कृतम् । देवलकृतं देवलविरचितं च । एतान् केतुचारान् दृष्ट्वा अवलोक्य । तथा अन्यानपि काश्यपऋषिपुत्रनारदवज्रादिविरचितान् बहून् प्रभूतान् दृष्ट्वा मया अयमनाकुलो निःसन्देहः केतुचारः क्रियते विरच्यत इति ॥१॥

अथोदयास्तमयलक्षणमाह--

दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् ।
दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात् ॥२॥

अस्य केतोर्दर्शनमुदयोऽस्तमयोऽदर्शनं वा गणितविधिना गणितविधानेन न ज्ञातुं वेदितुं शक्यते। यस्मात् केतवस्त्रिविधास्त्रिप्रकारा दिव्यान्तरिक्षभौमाः। दिव्याकाशे भवा दिव्याः। अन्तरिक्षे भवा आन्तरिक्षाः। ग्रहनक्षत्रस्थानं विहायान्यत्राऽऽकाशे ये दृश्यन्ते ते आन्तरिक्षाः। भूमौ भवा भौमाः। इति हेतोरुत्पातरूपत्वादेषामुदयास्तमयौ न ज्ञायेते इति ॥२॥

अथ केतूनां दिव्यवर्जितानामन्येषां स्वरूपमाह--

अहुताशेऽनलरूपं यस्मिंस्तत्केतुरूपमेवोक्तम् ।
खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य ॥३॥

अहुताशेऽग्निवर्जिते यस्मिन् देशेऽनलरूपमग्निरूपं दृश्यते तदेव केतुरूपमुक्तं कथितम्। किन्तु खद्योत इन्द्रगोपकः कृमिविशेषः। पिशाचालयो यक्षस्थानम्। मणयश्चन्द्रकान्तप्रभृतयः। रत्नानि मरकतप्रभृतीनि। आदिग्रहणादन्यान्यपि काचप्रभृतीनि तेजोरूपाणि। एतानि परित्यज्य त्यक्त्वा। यत एषां स्वभावादेवानलरूपं दृश्यते। एतानि परित्यज्यान्यद्यदनलरूपमहुताशे दृश्यते तत्केतुरूपमिति ॥३॥

अथ दिव्यान्तरिक्षभौमानां केतूनां लक्षणमाह--

ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वथान्तरिक्षास्ते ।
दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः ॥४॥

ध्वजश्चिह्नम्। शस्त्रमायुधादि। भवनं गृहम्। तरुर्वृक्षः। तुरगोऽश्वः। कुञ्जरो हस्ती। आदिग्रहणादन्येषु चतुष्पदादिषु दृश्यन्तेऽनलरूपास्ते केतव आन्तरिक्षाः। तथा नक्षत्राणां तारकाणां च मध्ये ये केतवो दृश्यन्ते ते दिव्या नक्षत्रस्थाः अतोऽस्मादुक्ताद्येऽन्यथा अन्ये भूमौ दृश्यन्ते ते भौमाः शिखिनः केतव इति ॥४॥

अथ केतूनां मतान्तरेण संख्यामाह--

शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥५॥

एके मुनयः पराशरादय एकाधिकं शतं केतूनां वदन्ति कथयन्ति। तथा च पराशरः--

तद्यथा--'शतमेकोत्तरं केतूनां भवति। तेषां षोडश मृत्युनिःश्वासजाः।

---

१. १६+१२+१०+७+१५+१७+५+३+१+१४+१=१०१।

द्वादशाऽऽदित्यसम्भवाः। दश दक्षमखविलयने रुद्रक्रोधजाः। सप्त पैतामहाः। पञ्चदश उद्दालकऋषेः पुत्राः। सप्तदश मरीचिकश्यपललाटजाः। पञ्च प्रजापतिहास्यजाः। त्रयो विभावसुजाः। धूमोद्भवश्चैकः। चतुर्दश मथ्यमानेऽमृते सोमेन सह सम्भूताः[1]। एकस्तु ब्रह्मकोपजः इति।

सहस्रमपरे वदन्तीति। अपरे अन्ये गर्गादयः सहस्रं केतूनां वदन्ति। तथा च गर्गः--

अतीतोदयचाराणामशुभानां च दर्शने।
आगन्तूनां सहस्रं स्याद् ग्रहाणां तन्निबोध मे॥

बहुरूपमेकमेवेति। नारदाख्यो मुनिरेकमेव केतुं प्राहोक्तवान्। तन्मते एक एव केतुस्तस्य च बहूनि रूपाणि। स एव दिव्यान्तरिक्षभौम इत्यर्थः। तथा च नारदः—

दिव्यान्तरिक्षगो भौम एकः केतुः प्रकीर्तितः।
शुभाशुभफलं लोके ददात्यस्तमयोदयैः॥इति॥५॥

एवं मतान्तराण्युक्ता स्वसिद्धान्तमाह–

यद्येको यदि बहवः किमनेन फलं तु सर्वथा वाच्यम्।
उदयास्तमयैः स्थानैः स्पर्शैराधूमनैर्वर्णैः॥६॥

फलं शुभाशुभम्। वाच्यं वक्तव्यम्। उदयास्तमयौ यथा—कस्यां दिशि उदितः कस्यामेवास्तमितः। स्थानं यथा–कस्मिन्नाकाशभागे कस्य ग्रहस्य नक्षत्रस्य वा समीपे उदितोऽस्तमितश्च। स्पर्शनकम्। तेन ग्रहो नक्षत्रं वा स्पृष्टम्। आधूमनः शिखयाऽभिधूमितः। वर्णः सितरक्तपीतकृष्णादिकः। एवमादिभिस्तस्य फलं वाच्यम्। तस्माद्यद्येको बहवो यदि वा भवन्तु किमनेन का नः क्षतिरिति॥६॥

अथ केतुचारे येषां केतूनां नाम निर्दिष्टं कियन्तं कालं यावत्फलपाको भविष्यति तेषामिति फलपाकनियमार्थमाह—

यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः।
मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः॥७॥

यावन्त्यहानि यावन्ति दिनानि दृश्यो दर्शनपथं गतः। कः केतुरिति संबध्यते। फलपाकः। फलस्य पाकः फलपाकः। तस्य तावन्तो मासाः। तस्य केतोस्तावतो मासान् दृश्यदिनतुल्यांस्तावत्संख्यान् मासान् फलपाकं वदेद् ब्रूयात्। मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परत इति। मासैः पुनरब्दान् संवत्सरान् वदेत्। मासंख्यादर्शने

---

१. संजाताः इति अ० क० पु० पाठः।

मासतुल्यानि वर्षाणि वदेत्। यावत्संख्यान् मासान् दृश्यो भवति तावत्संख्यानि वर्षाणि तस्य फलपाकं वदेत्। कस्मात् कालात् प्रभृति? इत्यत आह—प्रथमात् पक्षत्रयात् परतः। सर्वेषां केतूनां त्विदं सामान्यम्। यावन्ति दिनानि दृश्यः केतुस्तस्माद्दर्शनादूर्ध्वं प्रथमं पक्षत्रयं पञ्चचत्वारिंशद्दिनानि यावन्ति निष्फलानि। तस्मात् पक्षत्रयात् परतस्तावतो मासान् फलपाकः। अथ मासा दृश्यन्ते तदा तस्मादेव दर्शनात् परतः पक्षत्रयमतिक्रम्य मासतुल्यानि वर्षाणि वदेत्। प्रथमात् पक्षत्रयात् परत इति यदुक्तं तत्सर्वत्र फलपाके। दर्शनादूर्ध्वं प्रथमं पक्षत्रयं यावन्निष्फलं भवति।

अत्र केचिद् व्याख्याविप्रतिपत्तिं प्रदर्शयन्ति। यदुक्तं मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः। तत्र पक्षत्रयं यावद्दिनसंख्या गृह्यते। पक्षत्रयादूर्ध्वं यदा दृश्यते केतुस्तदा माससंख्यातुल्यानि वर्षाणि वदेत्।

अत्र सन्देहव्युदासार्थं गर्गोक्तं नियामकमभिलिख्यते। तथा च गर्गः—

यावन्त्यहानि दृश्यः स्यात्तावन्मासान् फलं भवेत्।
मासांस्तु यावद् दृश्येत तावतोऽब्दांश्च वैकृतम्॥
त्रिपक्षात् परतः कर्म पच्यतेऽस्य शुभाशुभम्।
सद्यस्कमुदिते केतौ फलं नेहाऽऽदिशेद् बुधः॥

तथा च वृद्धगर्गः—

यावतो दिवसांस्तिष्ठेत्तावन्मासान् विनिर्दिशेत्।
त्रिपक्षात् परतश्चापि कर्म केतोः प्रपच्यते॥
तस्मात् कालात् परं ब्रूयात् फलमस्य शुभाशुभम्।
सद्यस्कमुदिते केतौ फलं नेहाऽऽदिशेद् बुधः॥

यद्येवं तदा द्वितीयव्याख्यानं न घटते, प्रथमव्याख्यानमेव ज्याय इति। यथा प्रथमात् पक्षत्रयात् परतः। दर्शनादूर्ध्वं पक्षत्रयं यावन्निष्फलम्। पक्षत्रयात् परतः फलपाकस्य कालसंख्या प्रवर्तते। यस्मादुक्तं सद्यस्कमुदिते केतौ फलं नेहाऽऽदिशेद् बुधः इति।

यच्चोक्तं मासैरब्दांश्च वदेत् तदेकदेशेनापि मासप्रतिमासमेकद्वित्र्यादिदिनस्पर्शनेनापि मासंसंख्या लभ्यत एव सर्वथा किमनेनास्माकमसद्विकल्पेन। दिवसैः पक्षत्रयात् परतो मासान् वदेत् मासैस्तस्मादेव पक्षत्रयात् परतोऽब्दान् वदेत्। मासात् परतो दिनाधिक्ये दृष्टेऽनुपातवशाद्वक्तव्यम्। यदि दिनत्रिंशता वर्षं लभ्यते तदेष्टदिनैः किमिति?

तथा च समाससंहितायाम्--

केचित् केतुसहस्रं शतमेकसमन्वितं वदन्त्येके ।
नारदमत एकोऽयं त्रिस्थानसमुद्भवो विविधरूपः ॥
दिव्यग्रहर्क्षजातास्तीव्रफला मन्दफलकरा भौमाः ।
प्राणिध्वजादितुङ्गेषु चान्तरिक्षा न चान्यशुभाः ॥
उदयास्तमयाधूमनसंयोगाकारमार्गदिग्यातैः ।
फलनिर्देशो दिवसैर्मासा मासैस्तु वर्षाणि ।। इति ।।७।।

अथ शुभस्य केतोर्लक्षणमाह—

ह्रस्वस्तनुः प्रसन्नः स्निग्धस्त्वृजुरचिरसंस्थितः शुक्लः ।
उदितोऽथवाभिवृष्टः सुभिक्षसौख्यावहः केतुः ।।८।।

एवंविधः केतुर्दृष्टः सुभिक्षसौख्यावहः सुभिक्षं सौख्यमावहति करोति। कीदृशः ? ह्रस्वोऽदीर्घः। तनुरस्थूलः। प्रसन्नो निर्मलः। स्निग्धः सुस्नेहः। ऋजुः स्पष्टः। अकुटिल इत्यर्थः। अचिरसंस्थितः शीघ्रमेवादर्शनं यातः। शुक्लः श्वेतवर्णः। अथवोदित एवाभिवृष्टस्तस्मिन्नुदितमात्रे यदि वृष्टिर्भवति ।।८।।

अथाशुभस्य केतोर्लक्षणमाह--

उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः ।
इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा ।।९।।

ह्रस्वस्तनुः प्रसन्न इत्यस्मादुक्ताद्यो विपरीतरूपः केतुरुत्पन्नः स धूमकेतुः । स च न शुभकरः शुभं फलं न करोति। पापं करोतीत्यर्थः। तथेन्द्रायुधानुकारी, इन्द्रायुधं शक्रचापं तत्सदृशो न शुभकर एव। तथा द्वित्रिचूलो द्विशिखस्त्रिशिखश्च विशेषतो न शुभकर एव। तथा च समाससंहितायाम्—

अचिरस्थितोऽभिवृष्टस्त्वृजुः स्मितः स्निग्धमूर्तिरुदगुदितः ।
ह्रस्वस्तनुः प्रसन्नः केतुर्लोकस्य भावाय।।
न शुभो विपरीतोऽतो विशेषतः शक्रचापसङ्काशः ।
द्वित्रिचतुश्चूलो वा दक्षिणसंस्थश्च मृत्युकरः ।। इति ।।९।।

अधुना केतुसहस्रस्य लक्षणं सफलं विवक्षुस्तत्रादावेव रविजाः पञ्चविंशतिः केतवो भवन्ति तेषां लक्षणमाह--

हारमणिहेमरूपाः किरणाख्याः पञ्चविंशतिः सशिखाः ।
प्रागपरदिशोर्दृश्या नृपतिविरोधावहा रविजाः ।।१०।।

हारो मुक्ताहारः। मणयश्चन्द्रकान्तिप्रभृतयः। हेम सुवर्णम्। एतेषां सदृशरूपाः सभानवर्णा ये केतवस्ते किरणाख्याः किरणसंज्ञाः। सशिखाः सचूलाः। ते च पञ्चविंशतिः। रविजाः सूर्यपुत्राः प्रागपरदिशोर्दृश्याः। प्राक् पूर्वस्यामपरस्यां पश्चिमायां दिशि दृश्यन्ते। एतेषां मध्य, एक एव दृश्यते न सर्वे युगपदिति सर्वत्रेयं परिभाषा। ते च नृपतिविरोधावहाः, नृपते राज्ञो विरोधावहा विरोधप्रदाः। अनिष्टा इत्यर्थः। तथा च गर्गः--

शुद्धस्फटिकसङ्काशमृणालरजतप्रभाः ।
मुक्ताहारसुवर्णाभाः सशिखाः पञ्चविंशतिः ।।
किरणाख्या रवेः पुत्रा दृश्यन्ते प्राग्दिशि स्थिताः।
तथा चापरभागस्था नृपतेर्भयदाश्च ते।। इति ।।१०।।

अथाग्निपुत्रांस्तावत आह--

शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः ।
आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिभयदाः ।।११।।

शुकः पक्षिविशेषो नीलपीतवर्णः। दहनोऽग्निः। बन्धुजीवकः पुष्पविशेषोऽतिलोहितः। लाक्षा वृक्षनिर्यासः। क्षतजं रक्तम्। तदुपमास्ततुल्यवर्णाः। ते च तावन्तः पञ्चविंशतिः। हुताशसुता अग्निपुत्राः। आग्नेय्यां पूर्वदक्षिणस्यां दिशि दृश्यन्ते। ते च दृष्टाः शिखिभयदा अग्निभयप्रदा इत्यर्थः। तथा च गर्गः--

नानावर्णाग्निसङ्काशा दीप्तिमन्तो विचूलिनः ।
सृजन्त्यग्निमिवाकाशात् सर्वे ज्यौतिषनाशनाः ।।
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः ।
आग्नेय्यां दिशि दृश्यन्ते [1]पञ्चविंशत्प्रकीर्तिताः ।। इति ।।११।।

अथ मृत्युसुतांस्तावत एवाऽऽह--

वक्रशिखा मृत्युसुता रूक्षाः कृष्णाश्च तेऽपि तावन्तः ।
दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च ।।१२।।

वक्रशिखा अस्पष्टचूडास्ते च रूक्षा अस्निग्धाः। कृष्णाश्चासितास्तेऽपि तावन्तः पञ्चविंशतिरेव। ते च मृत्युसुता मृत्योः पुत्राः। याम्यायां दक्षिणस्यां दिशि दृश्यन्ते विलोक्यन्ते। ते च जनमरकावेदिनः। जनानां मरकमावेदयन्ति कथयन्ति। तथा च गर्गः--

---

१. 'पञ्चविंशतिः' इत्यस्य स्थाने 'पञ्चविंशत्' इत्यार्षप्रयोगः।

कृष्णा रूक्षा वक्रशिखा दृश्यन्ते याम्यदिक्स्थिताः ।
पञ्चविंशा मृत्युसुताः प्रजाक्षयकराः स्मृताः ॥इति॥१२॥

अथ भूपुत्रा द्वाविंशतिस्तानाह--

दर्पणवृत्ताकारा विशिखाः किरणान्विता धरातनयाः ।
क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः ॥१३॥

दर्पणवद् वृत्तः परिवर्तुल आकारो येषां ते दर्पणवृत्ताकाराः। विशिखा विचूलाः। किरणान्विता रश्मिसंयुक्ताः। धरातनया भूमिपुत्रास्ते च द्वाविंशतिरैशान्यां पूर्वोत्तरस्यां दिशि दृश्यन्ते। अम्बुतैलनिभाः। अम्बु जलम्। तैलं प्रसिद्धम्। तन्निभाः। जलस्य तैलस्य वा सदृशयः कान्तयः। एते दृष्टा क्षुद्भयदाः क्षुद्भयं दुर्भिक्षं ददति। तथा च गर्गः—

समस्तवृत्ता विशिखा रश्मिभिः परिवारिताः ।
अम्बुतैलप्रतीकाशा[1] द्वाविंशद् भूसुताः स्मृताः ॥
ऐशान्यां दिशि दृश्यन्ते दुर्भिक्षभयदास्तु ते ॥ इति ॥१३॥

अथ चन्द्रसुतास्त्रयस्तानाह--

शशिकिरणरजतहिमकुमुदकुन्दकुसुमोपमाः सुताः शशिनः ।
उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः ॥१४॥

शशिकिरणाश्चन्द्ररश्मयः। रजतं रूप्यम्। हिमं तुषारम्। कुमुदकुन्दकुसुमे पुष्पविशेषे अतिशुक्लवर्णे। तदुपमास्तत्तुल्यवर्णास्त्रयः शिखिनः केतवश्चन्द्रस्य सुताः पुत्राः। उत्तरतः सौम्यायां दिशि दृश्यन्ते अवलोक्यन्ते। ते च सुभिक्षावहाः सुभिक्षमावहन्ति कुर्वन्तीत्यर्थः। तथा च गर्गः —

चन्द्ररश्मिसवर्णाभा हिमकुन्देन्दुसप्रभाः।
त्रयस्ते शशिनः पुत्राः सौम्याशास्थाः शुभावहाः॥ इति ॥१४॥

अथ ब्रह्मदण्डाख्यस्य लक्षणमाह--

ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः ।
अनियतदिक्सम्प्रभवो विज्ञेयो ब्रह्मदण्डाख्यः ॥१५॥

ब्रह्मसुतो ब्रह्मणः पुत्र एक एव। स च त्रिशिखस्त्रिचूडः। वर्णैः सितादिभिस्त्रिभिरुपलक्षितास्ताश्च शिखाः। स तु ब्रह्मदण्डस्यो ब्रह्मदण्डसंज्ञो विज्ञेयो

---

१. 'द्वाविंशतिः' इत्यस्य स्थाने 'द्वाविंशत्' इत्यार्षप्रयोगः।

विज्ञातव्यः। अनियतदिक्सम्प्रभवः। अनियतायामनिश्चितायां दिशि सम्प्रभव उत्पत्तिर्यस्य। सर्वासु दिक्षु दृश्यत इत्यर्थः। स तु युगान्तकरो युगस्यान्तं करोति। सर्वत्र क्षयकर इत्यर्थः तथा च गर्गः—

एको ब्रह्मसुतः क्रूरस्त्रिवर्णस्त्रिशिखान्वितः।
सर्वास्वाशासु दृश्यः स्याद् ब्रह्मदण्डः क्षयावहः॥ इति॥१५॥

एकाधिकं शतं कथितमन्यानि नवशतान्येकोनानि कथयामीत्याह—

शतमभिहितमेकसमेतमेतदेकेन विरहितान्यस्मात्।
कथयिष्ये केतूनां शतानि नव लक्षणैः स्पष्टैः॥१६॥

एतदेकसमेतमेकेनाधिकं केतूनां शतमभिहितमुक्तम्। अस्मादेकाधिकाच्छतात् परत एकेन विरहितान्येकेनोनानि नव शतानि केतूनां स्पष्टैः स्फुटैर्लक्षणैश्चिह्नैः कथयिष्ये वक्ष्ये॥१६॥

अथ शुक्रपुत्राश्चतुरशीतिसंख्यास्तांश्चाह—

सौम्यैशान्योरुदयं शुक्रसुता यान्ति चतुरशीत्याख्याः।
विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः॥१७॥

शुक्रसुता भार्गवपुत्राश्चतुरशीत्याख्याः। चतुरशीतिसंज्ञाश्चतुरशीतिसंख्याश्च। सौम्यैशान्योरुदयं यान्ति। सौम्या उत्तरा। ऐशानी पूर्वोत्तरा। तत उदयं यान्ति गच्छन्ति। ते च विपुलसिततारका विपुला विस्तीर्णाः सिताः शुक्लास्तारका येषाम्। स्निग्धा निर्मलदेहाः। ते तीव्रफला भवन्ति। अनिष्टफला इत्यर्थः। तथा च गर्गः—

स्थूलैकतारकाः श्वेताः स्नेहवन्तश्च सप्रभाः।
आर्चिष्मन्तः प्रसन्नाश्च तीव्रेण वपुषान्विताः॥
एते विसर्पका नाम शुक्रपुत्राः पुरोदयाः।
अशीतिश्चतुरश्चैव[1] लोकक्षयकराः स्मृताः॥इति॥१७॥

अथ षष्टिः शनैश्चरपुत्रास्तानाह—

स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः।
अतिकष्टफला दृश्याः सर्वत्रैते कनकसंज्ञाः॥१८॥

स्निग्धा निर्मलाः। प्रभासमेताः कान्त्यन्विता दीप्तमन्तः। द्विशिखा

---

१. 'चत्वारः' इत्यस्य स्थाने 'चतुरः' इत्यार्षप्रयोगः।

द्विचूडास्ते च षष्टिसंख्याः शनैश्चराङ्गरुहाः शनैश्चरपुत्राः। एते कनकसंज्ञाः कनककेतवः। सर्वत्र सर्वासु दिक्षु दृश्याः। अतिकष्टफला अत्यशुभफलाश्च ते। तथा च गर्गः—

सुस्निग्धा रश्मिसंयुक्ता द्विशिखाः सप्ततारकाः ।
षष्टिस्ते कनका घोराः शनैश्चरसुता ग्रहाः ॥ इति ॥१८॥

अथ गुरुसुताः पञ्चषष्टिस्तानाह—

विकचा नाम गुरुसुताः सितैकतारा: शिखापरित्यक्ताः ।
षष्टिः पञ्चभिरधिका स्निग्धा याम्याश्रिताः पापाः ॥१९॥

षष्टिः पञ्चभिरधिका पञ्चषष्टिः केतवो विकचा नाम विकचसंज्ञा गुरुसुता बृहस्पतिपुत्राः। ते च सितैकताराः। सितः श्वेत एकस्तारको येषाम्। शिखापरित्यक्ताश्चूडारहिताः। ते च स्निग्धा निर्मलदेहा याम्याश्रिता दक्षिणस्यां दिशि दृश्यन्ते। पापाः पापफला अनिष्टफला इत्यर्थः। तथा च गर्गः—

शुक्लाः स्निग्धाः प्रसन्नाश्च महारूपाः प्रभान्विताः।
एकतारा वपुष्मन्तो विशिखा रश्मिभिर्वृताः ॥
एते बृहस्पतेः पुत्राः प्रायशो दक्षिणाश्रयाः ।
नामतो विकचा घोराः पञ्चषष्टिर्भयावहाः ॥ इति ॥१९॥

अथैकपञ्चाशद बुधपुत्रास्तानाह—

नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः ।
बुधजास्तस्करसंज्ञाः पापफलास्त्वेकपञ्चाशत् ॥२०॥

तस्करसंज्ञास्तस्करनामान एकपञ्चाशत्केतवो बुधजाः सौम्यपुत्राः। नातिव्यक्ता नातिस्फुटाः। सूक्ष्मा अल्पदेहाः। दीर्घा आयामिनः। शुक्लाः श्वेतवर्णाः। यथेष्टदिक्प्रभवा यथेष्टायां दिशि प्रभव उत्पत्तिर्येषाम्। सर्वासु दिक्षु दृश्यन्त इत्यर्थः। ते च पापफला अनिष्टफलाः। तथा च गर्गः—

अरुन्धतिसमा रूक्षाः केचिदव्यक्ततारकाः ।
सपाण्डुवर्णाः श्वेताभाः सूक्ष्मा रश्मिभिरावृताः ॥
एते बुधात्मजा ज्ञेयास्तस्कराख्या भयावहाः ।
एकाधिकास्ते पञ्चाशदथोत्पथचरा ग्रहाः ॥ इति ॥२०॥

अथ षष्टिभौमपुत्रास्तानाह--

क्षतजानलानुरूपास्त्रिचूलताराः कुजात्मजाः षष्टिः ।
नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः ॥२१॥

कौङ्कुमनामानः षष्टिः केतवः कुजात्मजा अङ्गारकपुत्राः। क्षतजानलानुरूपाः। क्षतजं रक्तमनलोऽग्निस्तदनुरूपास्तत्सदृशाः। अतिलोहिता इत्यर्थः। त्रिचूलतारास्त्रिचूलास्त्रिशिखास्त्रितारका येषाम्। ते च सौम्याशासंस्थिता उत्तरस्यां दिशि दृश्यन्ते। पापाः पापफलाश्च तथा च गर्गः—

त्रिशिखाश्च त्रिताराश्च रक्ता लोहितरश्मयः ।
प्रायशश्चोत्तरामाशां सेवन्ते नित्यमेव ते ॥
लोहिताङ्गात्मजा ज्ञेया ग्रहाः षष्टिः समासतः ।
नामतः कौङ्कुमा ज्ञेया राज्ञां संग्रामकारकाः ॥ इति ॥२१॥

अथ त्रयस्त्रिंशद्राहुपुत्रास्तानाह--

त्रिंशत्यधिका राहोस्ते तामसकीलका इति ख्याताः ।
रविशशिगा दृश्यन्ते तेषां फलमर्कचारोक्तम् ॥२२॥

त्रिंशत्यधिकास्त्रयस्त्रिंशत्केतवो राहोः सुताः स्वर्भानुपुत्राः। ते च नामतस्तामसकीलका इति ख्याताः प्रसिद्धाः। ते च रविशशिगा अर्कचन्द्रमण्डलस्था दृश्यन्ते अवलोक्यन्ते। तेषां च फलं शुभाशुभमर्कचारोक्तं सूर्यचारे कथितम्--"[1]तामसकीलकसंज्ञा राहुसुताः केतवः" इति।

तथा च गर्गः—

कृष्णाभाः कृष्णपर्यन्ताः सङ्कुलाः कृष्णरश्मयः।
राहुपुत्रास्त्रयस्त्रिंशत् कीलकाश्चातिदारुणाः ॥
रविमण्डलगाश्चैते दृश्यन्ते चन्द्रगास्तथा ॥

तथा च पराशरः—

अपर्वण्येव दृश्यन्ते ह्यङ्गिरःकाककीलकाः ।
रवेरेवाङ्गिरा मध्ये ह्यभयोः काककीलकौ ॥
अङ्गिराः सरथो धन्वी दृश्यते पुरुषाकृतिः ।
काकः कालाकृतिर्घोरस्त्रिकोणो वापि लक्ष्यते ॥
मण्डलं कीलके मध्ये मण्डलस्यासितो ग्रहः ।
महानृपविरोधाय यस्यर्क्षे तस्य मृत्यवे ॥ इति ॥२२॥

---

१. द्रष्टव्योऽस्य ग्रन्थस्य ३ अध्यायस्य ७ श्लोकः।

अथ विंशत्यधिकं शतमग्निपुत्राणामाह--

विंशत्याधिकमन्यच्छतमग्नेर्विश्वरूपसंज्ञानाम् ।
तीव्रानलभयदानां ज्वालामालाकुलतनूनाम् ॥२३॥

अन्यदपरं शतं विंशत्याधिकं केतूनामग्नेरग्निपुत्राणां विश्वरूपसंज्ञानां विश्वरूपनाम्नाम्। कीदृशानाम् ? ज्वालामालाकुलतनूनां ज्वालामालाभिराकुला व्याप्तास्तनवो मूर्तयो येषाम्। तथा तीव्रानलभयदानां तीव्रं घोरमनलभयमग्निभीतिं ये ददति। तथा च गर्गः--

[1]नानावर्णा हुताशाभा दीप्तिमन्तो विचूलिनः ।
सृजन्त्यग्निमिवाकाशे सर्वे ज्योतिर्विनाशनाः ॥
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः ।
विंशं ग्रहशतं घोरं विश्वरूपेति नामतः ॥ इति ॥२३॥

अथ सप्तसप्ततिर्वायुपुत्रास्तानाह--

श्यामारुणा विताराश्चामररूपा विकीर्णदीधितयः ।
अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः ॥२४॥

अरुणाख्या अरुणसंज्ञाः सप्तसप्ततिः केतवो वायोः सुता अनिलपुत्राः। श्यामारुणाः श्यामलोहितवर्णाः। वितारास्तारकवर्जिताः। चामररूपा बालव्यजनाकृतयः। विकीर्णदीधितयो व्याक्षिप्तरश्मयः। परुषा रूक्षाः। ते च पापदा दुष्टफलदाः। अत्र येषां दिङ्नियमो नास्ति तेऽनियतदर्शनाः सर्वास्वपि दिक्षु दृश्यन्ते। तथा च गर्गः--

अतारूपप्रतिमा धूमरक्तसवर्णिनः ।
वातरूपा इवाभान्ति शुष्कविस्तीर्णरश्मयः ॥
सप्ततिः सप्त चैवान्ये वायुपुत्रान् प्रचक्षते ।
लोकविध्वंसना रूक्षा नामतस्त्वरुणा ग्रहाः ॥ इति ॥२४॥

अथाष्टौ प्रजापतिसुता द्वे च शते चतुरधिके ब्रह्मणः पुत्रास्तानाह--

तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ ।
द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः ॥२५॥

अष्टौ केतवो गणका नाम प्रजापतेः सुताः पुत्राः। ते च तारापुञ्जनिकाशास्ताराणां नक्षत्राणां पुञ्जाः समूहास्तदाकाराः। ते च पापफला अशुभफलदायिनः।

---

१. अस्यैवाध्यायस्य ११ श्लोकटीकायां यौ गर्गश्लोकौ तदनुकल्पावेवैतौ श्लोकौ।

तथा द्वे च शते चतुरधिके केतूनां च ते चतुरस्राश्चतुरस्रसंज्ञाश्चतुरस्राकारा आकृतयश्च। ते च ब्रह्मसन्ताना ब्रह्मणः पुत्राः पापफला एव ज्ञेयाः। ते चानियतदिक्सम्प्रभवाः। तथा च गर्गः—

तारापुञ्जप्रतीकाशास्तारामण्डलसंस्थिताः।
प्राजापत्या ग्रहास्त्वष्टौ गणका भयवेदिनः॥
त्र्यस्रा वा चतुरस्रा वा सशिखाः श्वेतरश्मयः॥
द्वे शते [1]चतुरश्चैव ब्रह्मजा भयदाश्च ते॥ इति ॥२५॥

अथ द्वात्रिंशद्वरुणपुत्रानाह—

कङ्का नाम वरुणजा द्वात्रिंशद्वंशगुल्मसंस्थानाः।
शशिवत्प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः ॥२६॥

द्वात्रिंशत्केतवः कङ्कनामानः। ते च वरुणजा यादसाम्पतेः पुत्राः। वंशगुल्मसंस्थाना वंशगुल्मवत्संस्थानमाकृतिर्येषाम्। गुल्म एकमूलजो लतासमूहः। शशिवच्चन्द्रवत्प्रभया कान्त्या समेताः संयुक्ताः। ते च तीव्रफलाः कष्टफलाः। प्रोक्ताः कथिताः। ते चानियतदिक्सम्प्रभवाः। तथा च गर्गः—

वंशगुल्मप्रतीकाशा महान्तः पूर्णरश्मयः।
काकतुण्डनिभैश्चापि रश्मिभिः केचिदावृताः॥
मयूखानुत्सृजन्तीव सुस्निग्धाः सौम्यदर्शनाः।
एते कष्टफलाः प्रोक्ता द्वात्रिंशद्वारुणा ग्रहाः॥ इति ॥२६॥

अथ षण्णवतिकालपुत्रानाह—

षण्णवतिः कालसुताः कबन्धसंज्ञाः कबन्धसंस्थानाः।
पुण्ड्राभयप्रदाः स्युर्विरूपताराश्च ते शिखिनः ॥२७॥

कालसुताः कालपुत्राः कबन्धसंज्ञाः कबन्धनामानः। षण्णवतिः केतवः। ते च कबन्धसंस्थानाः। कबन्धश्छिन्नशिराः पुरुषस्तद्वत्संस्थानमाकृतिर्येषाम्। ते च विरूपताराः। विरूपा अस्फुटास्तारका येषाम्। ते शिखिनः केतवः पुण्ड्राभयप्रदाः। पुण्ड्रा नाम जनपदास्तेषामभयप्रदाः श्रेयस्कराः। स्युर्भवेयुः। अन्यत्र पुनर्भयदाः। ते चानियतदिक्सम्प्रभवाः। तथा च गर्गः—

---

१. 'चत्वारः' इत्यस्य स्थाने 'चतुरः' इत्यार्षप्रयोगः।

तारापुञ्जविरूपाश्च कबन्धाकृतिसंस्थिताः ।
पीतारुणसवर्णाश्च भस्मकर्पूररश्मयः ॥
कालपुत्राः कबन्धाश्च नवतिः षट् च ते स्मृताः ।
लोके मृत्युकरा घोराः पुण्ड्राणामभयप्रदाः ॥ इति ॥२७॥

अथ नव विदिक्पुत्रान् सर्वेषां च संख्यानमन्येषां विशेषं च वक्ष्यामीत्याह—

शुक्लविपुलैकतारा नव विदिशां केतवः समुत्पन्नाः ।
एवं केतुसहस्रं विशेषमेषामतो वक्ष्ये ॥२८॥

विदिशां दिगन्तरालानां नव समुत्पन्ना विदिक्पुत्रा इत्यर्थः । किंभूताः शुक्लविपुलैकताराः । शुक्लः श्वेतवर्णो विपुलो विस्तीर्ण एकस्तारको येषाम् । ते च विदिक्ष्वेव दृश्यन्ते । दृष्टाश्च पापफलाः । तथा च गर्गः—

शुक्लैकतारा विपुला विदिक्पुत्रा नव ग्रहाः ।
विदिक्षु संस्थितास्ते च दृश्यन्ते भयदायकाः ॥

एवं केतुसहस्रमिति । एवं केतूनां सहस्रं कथितमुक्तम् । अतोऽनन्तरमेतेषामेव केतूनां विशेषं विशेषलक्षणं वक्ष्ये कथयिष्ये ॥२८॥

एषां मध्यात् केचिद् दृश्यन्ते न सर्व एव । तत्र ये दृश्यन्ते तेषां लक्षणं वक्तुकामस्तत्रादावेव वसाकेतुलक्षणमाह—

उदगायतो महान् स्निग्धमूर्तिरपरोदयी वसाकेतुः ।
सद्यः करोति मरकं सुभिक्षमप्युत्तमं कुरुते ॥२९॥

उदगायत उत्तरस्यां दिशि आयतो दीर्घः । महानतिस्थूलः । स्निग्धमूर्तिर्निर्मलतनुः । अपरोदयी पश्चिमायां दिशि उदयं याति । स च नाम्ना वसाकेतुर्दृष्टः सद्य एव तस्मिन्नेवाहनि मरकं करोति । उत्तममपि प्रधानं सुभिक्षं च कुरुते ॥२९॥

अथास्थिकेतोः शस्त्राख्यस्य च लक्षणमाह—

तल्लक्षणोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः प्रोक्तः ।
स्निग्धस्तादृक् प्राच्यां शस्त्राख्यो डमरमरकाय ॥३०॥

तदित्यनेन वसाकेतोः परामर्शः । अस्थिकेतुर्नाम केतुः स तल्लक्षणः । तल्लक्षणैर्वसाकेतोः सदृशैर्युक्तः—"उदगायतो महान् स्निग्धमूर्तिरपरोदयी" इति । किन्त्वयं विशेषः—स तु रूक्षो भवति स्नेहरहितः । दृष्टश्च क्षुद्भयावहो दुर्भिक्ष-

भयप्रदः प्रोक्तः कथितः। स्निग्धस्तादृगिति। तादृग् वसाकेतुसदृशः स्निग्धो निर्मलदेहः प्राच्यां पूर्वस्यां दिशि दृश्यते। स तु शस्त्राख्यः शस्त्रकेतुसंज्ञो दृष्टो डमरमरकाय भवति। डमरं शस्त्रकलहं मरकं च करोति। तथा च पराशरः—

एते षड्विंशतिरुदयैः फलमावेदयन्ति। तान् नामतो रूपतः फलतः कालतोऽभिधास्यामः। तत्र भार्गवास्त्रय उदयं यान्ति। एकैकशो वसास्थिशस्त्रकेतवः। तत्र वसाकेतुः स्निग्धो महानुदगायतशिखस्त्रिशद्वर्षशतं प्रोष्य संप्लवे युगे पश्चिमोदितः सद्यो मरकफलः सौभिक्षकरस्तु। रूक्षोऽस्थिकेतुरसौ भिक्षुकतुल्यप्रवासकालफलः। पूर्वेण स्निग्ध एव तु शस्त्रकेतुः। राजविरोधमरकफलः समो रूक्षः ॥३०॥

अथ कपालकेतोर्लक्षणमाह—

दृश्योऽमावास्यायां कपालकेतुः सधूम्ररश्मिशिखः।
प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकरः ॥३१॥

कपालकेतुर्नाम केतुः स त्वमावास्यायां कृष्णपञ्चदश्यां प्राक् पूर्वस्यां दिशि दृश्य उदयं याति। किंभूतः? सधूम्ररश्मिशिखः। सधूम्रा रश्मिशिखा यस्य। किरणकान्तिर्धूम्रवर्णेत्यर्थः। नभसोऽर्द्धविचारी। नभस आकाशस्यार्द्धं यावद्विचरति गच्छति। स च क्षुन्मरकावृष्टिरोगकरः। क्षुद् दुर्भिक्षम्। मरकं जनक्षयम्। अवृष्टिरोगांश्च करोति। तथा च पराशरः—

अथादित्यजानां कपालकेतुरुदयतेऽमावास्यायां पूर्वस्यां दिशि सधूम्रार्चिशिखो नभसोऽर्द्धचरो दृश्यते। पञ्चविंशवर्षशतं प्रोष्य त्रींश्च पक्षानमृतजस्य कुमुदकेतोश्चारान्ते स दृष्ट एव दुर्भिक्षानावृष्टिव्याधिभयमरणोपद्रवान् सृजति। जगति यावतो दिवसान् दृश्यते तावन्मासान् मासैर्वत्सरान् पञ्चप्रस्थं च शारदधान्यार्घं कृत्वा प्रजानामपयुङ्क्ते ॥३१॥

तथा रौद्रकेतुमाह—

प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरूक्षताम्रार्चिः।
नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः ॥३२॥

रौद्रनामा केतुः प्राक् पूर्वस्यां दिशि वैश्वानरमार्गे दहनवीथ्यां दृश्यते। वैश्वानरसंज्ञितमार्गे पूर्वाषाढोत्तराषाढयोः समीप इत्यर्थः। कीदृशः? शूलाग्रः। शूलाकृतिरग्रं यस्य केतोः स शूलाग्रः। त्रिशिख इत्यर्थः। तस्यैव विशेषणं श्यावरूक्षताम्रार्चिः। रूक्षमस्निग्धमर्चिस्तेजः, श्यावरूक्षं ताम्रं चार्चिस्तेजो यस्य स श्यावरूक्षताम्रार्चिः। नभसस्त्रिभागगामी नभस आकाशस्य त्रिभागगमनशीलः।

स च कपालतुल्यफलः कपालकेतोः समानफलः। एतदुक्तं भवति--क्षुन्मरकावृष्टिरोगकर इति। आचार्येण शुक्रचारे वैश्वानरमार्गः प्रदर्शित एव "अषाढाद्वयं वहना" इति। तथा च पराशरः—

अथ दक्षयज्ञरुद्रक्रोधोद्भवः कलिकेतुस्त्रीणि वर्षशतानि नव च मासान् प्रोष्योदयते पूर्वेण वैश्वानरमार्गे ह्यमृतजस्य मणिकेतोश्चारान्ते श्यावरूक्षताम्रारुणां शूलाकारसदृशीं शिखां कृत्वा नभसस्त्रिभागचारी स शस्त्रभयरोगदुर्भिक्षाऽनावृष्टिमरकैर्यावन्मासान् दृश्यते तावद्वर्षाणि त्रिभागशेषां प्रजां कृत्वार्धं च शारदधान्यमाढकमस्तं व्रजति॥

तथा च वृद्धगर्ग आह—

ज्येष्ठामूलमनूराधा या वीथी सम्प्रकीर्तिता।
तां च वीथीं समारुह्य केतुश्चेत् क्रीडते भृशम्॥
दक्षिणाभिनतां कृत्वा शिखां घोरां भयङ्करीम्।
शूलाग्रसदृशीं तीक्ष्णां श्यावताम्रारुणप्रभाम्॥
पूर्वेण चोदितश्चैष नक्षत्राण्युपधूमयेत्।
घोरं प्रजासु सृजति फलं मासे त्रयोदशे॥
त्रिभागं नभसो गत्वा ततो गच्छत्यदर्शनम्।
यावतो दिवसांस्तिष्ठेत्तावद्वर्षाणि तद्भयम्॥
शस्त्राग्निभयरोगैश्च दुर्भिक्षमरणैर्हताः।
पूर्यमाणाः प्रजा सर्वा विद्रवन्ति दिशो दश इति॥ इति॥ ३२॥

अथ चलकेतोर्लक्षणमाह—

अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुलोच्छ्रितया।
गच्छेद्यथा यथोदक् तथा तथा दैर्घ्यमायाति॥३३॥
सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव च प्रतिनिवृत्तः।
नभसोऽर्द्धमात्रमित्वा याम्येनास्तं समुपयाति॥३४॥
हन्यात् प्रयागकूलाद्यावदवन्तीं च पुष्करारण्यम्।
उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यम्॥३५॥
अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः।
दश मासान् फलपाकोऽस्य कैश्चिदष्टादश प्रोक्तः॥३६॥

---

१. द्रष्टव्योऽस्य ग्रन्थस्य शुक्रचाराध्यायोयः ३ श्लोकः।

अपरस्यां पश्चिमायां दिशि चलकेतुर्नाम दृश्यते। स च कीदृशः? शिखया याम्याग्रया अङ्गुलोच्छ्रितयोपलक्षितः। शिखा चूडा तया याम्याग्रया याम्यायां दक्षिणस्यां दिश्यग्रं यस्याः। तथा अङ्गुलोच्छ्रितया अङ्गुलप्रमाणोच्चया। यथा यथा येन येन प्रकारेणोदगुत्तरां दिशं गच्छेद्याति तथा तथा तेन तेन प्रकारेण दैर्घ्यं दीर्घतामायाति प्राप्नोति॥

सप्तमुनीनिति। सप्तमुनीन् वसिष्ठादीन् संस्पृश्य तथा ध्रुवं ध्रुवतारकमभिजितं च नक्षत्रं संस्पृश्य ततः प्रतिनिवृत्तः प्रत्यागतः। नभस आकाशस्यार्द्धमात्रमित्वा गत्वा प्राप्य याम्येन दक्षिणस्यां दिशि अस्तमदर्शनं समुपयाति गच्छति॥

हन्यात् प्रयागकूलादिति। स एव चलकेतुः प्रयागकूलादारभ्य यावदवन्तीं चोज्जयिनीं तथा पुष्करारण्यं नाम स्थानं तावद्धन्यान्नाशयेत्। उदगपि चोत्तरस्यां दिश्यपि च यावद्देविकां नदीं तावद्धन्यात्। मध्यदेशाख्यं मध्यदेशं भूयिष्ठमतिशयेन हन्यात्॥

अन्यानपि च स देशानिति। स चलकेतुरन्यानपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचिद्धन्ति नाशयति न सर्वत्र। अस्य केतोर्दश मासान् यावत्फलपाकः। दर्शनात् त्रिपक्षात् परतो यावद्दशमासांस्तावदशुभं फलं ददाति। कैश्चिदन्यैर्गर्गादिभिरष्टादश मासान् यावत् फलपाकः प्रोक्तः कथितः। तथा च पराशरः—

अथ पैतामहश्चलकेतुः पञ्चदशवर्षशतं प्रोष्योदितः पश्चिमेनाङ्गुलिपर्वमात्रां शिखां दक्षिणाभिगतां कृत्वा जलकेतोश्चारान्ते नभसस्त्रिभागमनुचरन् यथा यथा चोत्तरेण व्रजति तथा तथा शूलाग्राकारां शिखां दर्शयन् ब्रह्मनक्षत्रमुपसृत्य मनाग् ध्रुवं ब्रह्मराशिं सप्तर्षीन् स्पृशन् नभसोऽर्द्धमात्रं दक्षिणमनुक्रम्यास्तं व्रजति। स स्वर्गे दारुणकर्मा। स्वर्गप्राप्तत्वादेव च कृत्स्नमभिहिनस्ति लोकम्। अपि च भूमिं कम्पयित्वा दश मासान्मध्यदेशे भूयिष्ठं जनपदमनवशेषं कुरुते। तेष्वपि क्वचित् क्वचिच्छस्त्रदुर्भिक्षव्याधिमरकभयैः क्लिश्नात्यष्टादश मासानिति॥

तथा च गर्गः—

क्षुच्छस्त्रमरकव्याधिभयैः सम्पीडयेत् प्रजाः।
मासान् दश तथाष्टौ च चलकेतुः सुदारुणः॥ इति॥३३-३६॥

अथ श्वेतकेतुलक्षणमाह—

प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च।
क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥३७॥

स्निग्धौ सुभिक्षशिवदावथाधिकं दृश्यते कनामा यः ।
दश वर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम् ॥३८॥

श्वेतकेतुर्नाम केतुः प्राक् पूर्वस्यां दिशि अर्द्धरात्रदृश्यः अर्द्धरात्रकाले दृश्यते। याम्याग्रो दक्षिणदिक्शिखः। अन्यश्च द्वितीयः क इति कनामा केतुः। अपरे पश्चिमायां दृश्यते। तौ च द्वावपि युगपत्तुल्यकालं सप्तदिनदृश्यौ सप्तदिनानि दृश्येते॥

तौ च द्वावपि स्निग्धावतिनिर्मलौ दृष्टौ च सुभिक्षशिवदौ सुभिक्षं शिवं श्रेयश्च ददतः। अथ यः कनामा स च यदि सप्तभ्यो दिनेभ्योऽधिकं दृश्यते तदा दशवर्षाणि शस्त्रप्रकोपकृतं संग्रामजमुपतापमुपद्रवं जनयत्युत्पादयति। तथा च पराशरः—

अथौद्दालकः श्वेतकेतुर्दशोत्तरं वर्षशतं प्रोष्य भटकेतोश्चारान्ते पूर्वस्यां दिशि दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यः। तेनैव सह द्वितीयः कः प्रजापतिपुत्रः पश्चिमेन ग्रहकेतोर्यूपसंस्थायी युगपद् दृश्यते। तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीडयन्ते। कः प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्यात्तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः॥३७-३८॥

अथ श्वेतलक्षणमाह—

श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतः।
विनिवर्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते ॥३९॥

श्वेतनामा केतुर्जटाकारो जटासदृशः। रूक्षः परुषः। श्यावः कृष्णवर्णः। वियत्त्रिभागगतो वियत्याकाशे त्रिभागं यावद् गच्छति ततोऽपसव्यमप्रदक्षिणं वामभागे विनिवर्तते विनिवृत्तिं करोति। त्रिभागशेषास्तृतीयांशावशेषाः प्रजाः कुरुते। द्वौ भागौ क्षयं नयतीत्यर्थः। तथा च पराशरः—

अथ काश्यपः श्वेतकेतुः पञ्चदशवर्षशतं प्रोष्यैन्द्रांशः सहजस्य पद्मकेतोश्चारान्ते श्यावरूक्षो नभसस्त्रिभागमात्रम्याग्रसव्यं निवृत्योर्ध्वं प्रदक्षिणजटाकारशिखः। स यावन्मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेश आर्यगणानामौदीच्यैश्च भूयिष्ठं वहुशस्त्रिभागशेषां प्रजामवशेषयति॥३९॥

अथ रश्मिकेतोर्लक्षणमाह—

आधूम्रया तु शिखया दर्शनमायाति कृत्तिकासंस्थः ।
ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते ॥४०॥

आधूम्रवर्णया शिखयोपलक्षितस्तथा कृत्तिकासंस्थः समीपे दर्शनमुदयमायाति गच्छति स रश्मिकेतुर्नाम केतुर्ज्ञेयो ज्ञातव्यः। स च श्वेतसमानं श्वेतकेतुसदृशं फलं धत्ते ददाति। त्रिभागशेषा प्रजाः कुरुत इत्यर्थः। तथा च पाराशरः—

अथ रश्मिकेतुर्विभावसुजः प्रोष्य वर्षशतमावर्तकेतोश्चारान्ते उदितः कृत्तिकासु धूम्रशिखः श्वेतकेतोः सदृशफलः ॥४०॥

अथ ध्रुवकेतोर्लक्षणमाह—

ध्रुवकेतुरनियतगतिप्रमाणवर्णाकृतिर्भवति विष्वक्[1] ।
दिव्यान्तरिक्षभौमो भवत्ययं स्निग्ध इष्टफलः ॥४१॥
सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापि देशानाम् ।
गृहिणामुपस्करेषु च विनाशिनां दर्शनं याति ॥४२॥

ध्रुवकेतुर्नाम केतुः स त्वनियतगतिप्रमाणवर्णाकृतिः। अनियता अनिश्चिता गतिर्गमनम्। प्रमाणं स्थूलसूक्ष्ममध्यभावम्। वर्णः शुक्लकृष्णादिः। आकृतिराकारो यस्य स तथाभूतः। स च विष्वक् समन्ततो भवति। सर्वासु दिक्ष्वित्यर्थः। स च दिव्यान्तरिक्षभौमस्त्रिप्रकारो भवति। केचिद्विश्वे नानाकारो भवतीतीच्छन्ति। स च स्निग्धो निर्मलशरीरः। इष्टफलः शुभफलो भवति॥

एष चैवंविधानां विनाशानां मुमूर्षूणां दर्शनमुदयं याति गच्छति। नृपाणां राज्ञां विनाशिनां सेनाङ्गेषु अश्वोपकरणेषु खलीनपर्याणादिषु दर्शनं याति। देशानां विनाशिनां गृहतरुशैलेषु। गृहेषु वेश्मसु। तरुषु वृक्षेषु। शैलेषु पर्वतेषु च दृश्यते। तथा गृहिणां गृहस्थानामुपस्करेषु भाण्डेषु दर्वीशूर्पमार्जन्यादिषु विनाशिनामेव दर्शनं याति। तथा च पराशरः—

अथानियतदिक्कालरूपवर्णप्रमाणसंस्थानो ध्रुवकेतुः पराभवमिच्छतां देशानां राज्ञां जनपदानां च वृक्षपुरपर्वतवेश्मध्वजपताकाशस्त्रवर्मायुधावरणरथनागोष्ट्रपुरुषशयनासनभाण्डेषु वा दृश्यते। स एव च स्निग्धो विमलः प्रदक्षिणशिखो गोगजाजनागवीथीश्चोत्तरेण व्रजन् सुभिक्षं क्षेमारोग्यं चावहति। दशैकविंशतिद्वि[2]षष्टिशतधा वा दर्शनमिच्छन्ति मुनयो ध्रुवकेतोः। तस्य प्रागुदयनिमित्तानि—अवनिचलनम्। अग्नेः प्रभामान्द्यम्। प्रधूपनं दिशाम्। शीतोष्णविपर्ययः। अतिरूक्षवायुसम्भवश्च ॥४१-४२॥

---

१. विश्वे नानाकारो भवत्ययमिति पाठान्तरम्।
२. त्रिषष्टिरिति अ० क० पु० पाठः।

अथ कुमुदकेतोर्लक्षणमाह--

कुमुद इति कुमुदकान्तिर्वारुण्यां प्राक्शिखो निशामेकाम् ।
दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति ॥४३॥

कुमुद इति कुमुदनामा केतुः। स तु कुमुदकान्तिः कुमुदाभः। श्वेतवर्ण इत्यर्थः। स तु वारुण्यां पश्चिमायां दिशि। प्राक्शिखः पूर्वाग्रो निशां रात्रिमेकामेव दृश्यते। किलेत्यागमसूचने। स तु दृष्टो दशवर्षाण्यतुलमसमं सुभिक्षं करोति। तथा च पराशरः--

अथामृतजः कुमुदो मणिः। जलोद्भवः पद्मः। आवर्तः। ऊर्मिः। शङ्खः। हिमः। रक्तः। कुक्षिः। कामः। विसर्पणः। शीतश्चेति।

तत्र कुमुदकेतुर्वसाकेतोश्चारसमाप्तौ वारुण्यां दर्शनमुपैति। गोक्षीरविमलस्निग्धप्रभां पूर्वेणाभिनतां शिखां कृत्वैकरात्रचरः। स दृष्ट एव सुभिक्षमुत्पादयति। दशवर्षाणि प्रजानामविरोधं च। प्रतीच्यानां च मुखरोगारोचकप्रतिश्यायपाण्डुरोगजननैः प्रजा बाधत इति ॥४३॥

अथ मणिकेतोर्लक्षणमाह—

सकृदेकयामदृश्यः सुसूक्ष्मतारोऽपरेण मणिकेतुः ।
ऋज्वी शिखास्य शुक्ला स्तनोद्गता क्षीरधारेव ॥४४॥
उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान् ।
प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम् ॥४५॥

मणिकेतुर्नाम केतुः स त्वपरेण पश्चिमायां दिशि सुसूक्ष्मतारोऽत्यल्पतारकः। सकृदेकवारम्। एकयामदृश्यः। यामशब्देन रात्रिचतुर्भाग उच्यते। अस्य केतोः। ऋज्वी स्पष्टा। शिखा चूडा। शुक्ला श्वेतवर्णा दृश्यते। कीदृशी? स्तनोद्गता क्षीरधारेव। स्तनात् कुचादुद्गता निःसृता क्षीरधारा यथा दृश्यते तद्वच्छिखा ॥

असौ केतुरुदयन्नेवोदितमात्र एव चतुरः सार्द्धान् अर्द्धपञ्चमान् मासान् क्षेमं सुभिक्षमुत्पादयति करोति। प्रायो बाहुल्येन क्षुद्रजन्तूनां नकुलादीनां प्रादुर्भावमुत्पत्तिं करोति। तथा च पराशरः—

मणिकेतुरपि कपालकेतोश्चारावसाने प्रतीच्यामुदयमुपयाति। सूक्ष्मोऽरुन्धतीतारकामात्रः क्षीरप्रसेककान्त्या पूर्वाभिनतया स्निग्धशिखया शर्वर्यामेकयामदृश्यः। स उदयात् प्रभृत्यर्द्धपञ्चमान् मासान् क्षेमसुभिक्षमुत्पादयति। क्षुद्रजन्तूनां प्रादुर्भावं करोत्यतिमात्रकालदृष्टः ॥४४-४५॥

अथ जलकेतोर्लक्षणमाह—

जलकेतुरपि च पश्चात् स्निग्धः शिखयापरेण चोन्नतया ।
नव मासान् स सुभिक्षं करोति शान्तिं च लोकस्य ॥४६॥

जलकेतुर्नाम केतुः सोऽपि पश्चात् पश्चिमायां दिशि दृश्यते। स्निग्धो निर्मलदेहः। अपरेण पश्चिमेन। चोन्नतया उन्नयया शिखया चूडया युतः। स च दृष्टो नव मासान् यावत् सुभिक्षं करोति। लोकस्य जनपदस्य च शान्तिं श्रेयः करोति। तथा च पराशरः—

अथ जलकेतुः पैतामहजस्य चलकेतोर्नवमासावशिष्टे कर्मणि कृतं प्रवर्तयति। पश्चिमेनोदितः स्निग्धः सुजातोऽनुपश्चिमाभिनतशिखः। स च नव मासान् क्षेम-सुभिक्षारोग्याणि प्रजाभ्यो धत्ते। अन्यग्रहकृतानां चाशुभानां व्याघातायेति ॥४६॥

अथ भवकेतोर्लक्षणमाह—

भवकेतुरेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः ।
हरिलाङ्गूलोपमया प्रदक्षिणावर्तया शिखया ॥४७॥
यावत एव मुहूर्तान् दर्शनमायाति निर्दिशेन्मासान् ।
तावदतुलं सुभिक्षं रूक्षे प्राणान्तिकान् रोगान् ॥४८॥

भवकेतुर्नाम केतुः स च प्राक् पूर्वस्यां दिशि एकरात्रमेकां निशां दृश्यः। सूक्ष्मतारकः सूक्ष्मोऽत्यल्पस्तारको यस्य। स्निग्धो निर्मलदेहः। अन्यत्र शिख-योपलक्षितः। कीदृश्या ? हरिलाङ्गूलोपमया प्रदक्षिणावर्तया। हरिः सिंहस्तस्य लाङ्गूलं पुच्छस्तदुपमया तदाकारया प्रदक्षिणेनावर्तो यस्यास्तथाभूतया ॥

स च यावत एव मुहूर्त्तान् यावत्संख्यान् क्षणान् दर्शनमायाति दृश्यते तावन्मासानतुलमसमं सुभिक्षं निर्दिशेद्वदेद्यदि स्निग्धः। रूक्षे तु पुनः प्राणान्तिकान् रोगान् गदान् वदेत्। तथा च पराशरः—

अथ जलकेतोः कर्मसमाप्तावूर्म्यादयः शीतान्ता अष्टौ प्रादुर्भवन्ति। ते त्रयोदशचतुर्दशाष्टादशवर्षान्तरिता दृश्यन्ते। स्निग्धाः सुभिक्षक्षेम्या विपर्यया विप-रीताः। क्षुद्रजन्तूनां वधाय। तेषामष्टानां कर्मण्यतीते भवकेतुर्दृश्यते पूर्वेणैक-रात्रम्। या कृत्तिकानामग्रतमा तारा तत्प्रमाणया स्निग्धयाऽरूक्षाभया सिंह-लाङ्गूलसंस्थानया प्रदक्षिणनताग्रया शिखयोदितः। स यावन्मुहूर्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षाय। रूक्षः प्राणहराणां रोगाणां प्रादुर्भावायेति ॥४७-४८॥

अथ पद्मकेतोर्लक्षणमाह--

अपरेण पद्मकेतुर्मृणालगौरो भवेन्निशामेकाम् ।
सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि ॥४९॥

पद्मकेतुर्नाम केतुः। अपरेण पश्चिमायां दिशि निशां रात्रिमेकां दृश्यते। कीदृशः? मृणालगौरः, मृणालवद् गौरो मृणालगौरः। मृणालं बिसतन्तु। तद्वद् गौरः। श्वेत इत्यर्थः। स तु दृष्टः सप्त वर्षाण्यतिहर्षयुक्तानि सुभिक्षं करोति। तथा च पराशरः—

अथ पद्मकेतुः श्वेतकेतुफलसमाप्तौ पश्चिमेनाह्लादयन्निव मृणालकुमुदाभया शिखयैकरात्रचरः। सप्त वर्षाण्यभ्युच्छ्रितं[1] हर्षमावहति जगतः ॥४९॥

अथावर्तकेतोर्लक्षणमाह—

आवर्त इति निशार्धे सव्यशिखोऽरुणनिभोऽपरे स्निग्धः।
यावत्क्षणान् स दृश्यस्तावन्मासान् सुभिक्षकरः ॥५०॥

आवर्तनामेति यः केतुः स निशार्धे रात्र्यर्धे। अपरे पश्चिमायां दिशि। सव्यशिखो दक्षिणदिगाश्रितशिखः। अरुणनिभो रक्तवर्णः। स्निग्धो निर्मलवपुर्दृश्यते। स तु यावत्क्षणान् यावत्संख्यान् मुहूर्तान् दृश्यते तावन्मासान् सुभिक्षं करोति। तथा च पराशरः —

अथावर्तकेतुः श्वेतकेतोः कर्मण्यतीतेऽपरस्यामर्द्धरात्रे शङ्खावदातोऽरुणाभया प्रदक्षिणनताग्रया शिखयोदितः। स यावन्मुहूर्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षं नित्ययज्ञोत्सवं जगत् ॥५०॥

अथ संवर्तकेतोर्लक्षणमाह--

पश्चात् सन्ध्याकाले संवर्तो नाम धूम्रताम्रशिखः ।
आक्रम्य वियत्त्र्यंशं शूलाग्रावस्थितो रौद्रः ॥५१॥
यावत एव मुहूर्तान् दृश्यो वर्षाणि हन्ति तावन्ति ।
भूपान् शस्त्रनिपातैरुदयक्षं चापि पीडयति ॥५२॥

पश्चात् पश्चिमायां दिशि। सन्ध्याकाले सन्ध्यासमये। संवर्तो नाम केतुः। कीदृशः? धूम्रताम्रशिखः। धूम्राताम्रवर्णा च शिखा चूडा यस्य। वियत आकाशस्य त्र्यंशं तृतीयभागमाक्रम्य प्राप्य दृश्यते। शूलाग्रावस्थितः। शूलमग्रे शिरस्यवस्थितं यस्य। त्रिचूड इत्यर्थः। स च रौद्रो भयावहः ॥५१॥

---

१. अभ्युत्थितं हर्षमिति भ० क० पु० पाठः।

स च केतुर्यावतो मुहूर्तान् दृश्यो भवति तावत्संख्यानि वर्षाणि हन्ति नाशयति। अशुभफलप्रदो भवतीत्यर्थः। तथा भूपान् नृपान्। शस्त्रनिपातैः संग्रामैर्हन्ति नाशयति। तथोदयर्क्षम्। यस्मिन्नक्षत्रे उदितो दृश्यते तच्च पीडयत्युपतापयति। तथा च पराशरः—

अथ संवर्तो [1]वर्षसहस्रमष्टोत्तरं प्रोष्य पश्चिमेनास्तं गते सवितरि सन्ध्यायां दृश्यते तन्वीं ताम्ररूक्षां शूलाभां धूम्रं विमुञ्चन्तीं दारुणां शिखां कृत्वा नभस्त्रिभागमाक्रम्य। स यावन्मुहूर्तान् निशि तिष्ठति तावद्वर्षाणि परस्परं शस्त्रैर्घ्नन्ति पार्थिवाः। यानि नक्षत्राणि धूपयति यत्र चोदेति तानि दारुणतरं पीडयति। तदाश्रितांश्च देशानिति॥

तथा च[2]—

येषां नक्षत्रविषये रूक्षः सज्वाललोहितः।
दृश्यते बहुमूर्तिश्च तेषां विन्द्यान्महाभयम्॥
अवर्षं शस्त्रकोपं च व्याधिं दुर्भिक्षमेव च।
कुर्यान्नृपतिपीडाश्च स्वचक्रपरचक्रतः॥
यत्रोत्तिष्ठति नक्षत्रे प्रवासं यत्र गच्छति।
धूपयेद्वा स्पृशेद्वापि हन्याद्देशांस्तदाश्रितान्॥
यस्याभिषेकनक्षत्रं जन्मभं कर्मभं तथा।
देशर्क्षं पीडयेद्वापि स शान्त्युपरमो भवेत्॥
स्निग्धः प्रसन्नो विमलः प्रदक्षिणशिखस्तथा।
दृश्यते येषु देशेषु शिवं तेषु विनिर्दिशेत्॥
[3]गगनार्द्धचरः सद्यः प्रधानदेशान् विनाशयेदचिरात्।
निखिलगगनानुचारी त्रैलोक्यविनाशकः केतुः॥ इति॥५२॥

अथ शुभान् केतून् वर्जयित्वाऽशुभानां नक्षत्रस्पर्शधूपनाद् दुष्टफलं वक्ष्यामीत्याह—

ये शस्तास्तान् हित्वा केतुभिराधूपितेऽथवा स्पृष्टे।
नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्॥५३॥

---

१. वर्षसहस्रं प्रोष्य इति अ० क० पु० पाठः।
२. तथा च गर्ग इति ग० घ० पु० पाठः।
३. इदं पद्यं नान्येषु पुस्तकेषु।

ये केतवः शस्ताः प्रशस्तफलाः। तान् हित्वा त्यक्त्वा। अन्यैः केतुभिः शिखिभिर्नक्षत्रे यस्मिन्नाधूपितेऽथवा स्पृष्टे येषां राज्ञां नृपाणां वधो मरणं भवति तान्नृपान् वक्ष्ये कथयिष्ये ॥५३॥

तांश्चाधुनाऽऽह—

अश्विन्यामश्मकपं भरणीषु किरातपार्थिवं हन्यात् ।
बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम् ॥५४॥

अश्विन्यामभिधूपितायां स्पृष्टायां वा केतुना। अश्मकपमश्मकानां जनानामधिपतिं राजानं हन्यान्नाशयेत्। एवं भरणीषु किरातपार्थिवं किराताधिपतिं हन्यात्। बहुलासु कृत्तिकासु कलिङ्गेशं कलिङ्गाधिपतिम्। रोहिण्यां शूरसेनपतिं शूरसेना जनास्तेषां पतिम् ॥५४॥

अन्येष्वाह—

औशीनरमपि सौम्ये जलजाजीवाधिपं तथार्द्रासु ।
आदित्येऽश्मकनाथान् पुष्ये मगधाधिपं हन्ति ॥५५॥

सौम्ये मृगशिरसि केतुनाभिधूपितें स्पृष्टे वा औशीनरमुशीनराधिपतिं हन्यात्। तथा आर्द्रासु जलजाजीवाधिपं जलजा मत्स्यादयस्तैर्ये आजीवन्ति ते च जलजाजीवाः। ग्रामदेशवासिन इत्यर्थः। तेषामधिपं नृपं हन्यात्। आदित्ये पुनर्वसावश्मकनाथानश्मकाधिपतीन्। पुष्ये मगधाधिपं मागधं नृपं हन्ति ॥५५॥

अन्येष्वाह—

असिकेशं भौजङ्गे पित्र्येऽङ्गं पाण्ड्यनाथमपि भाग्ये ।
औज्जयिनिकमार्यम्णे सावित्रे दण्डकाधिपतिम् ॥५६॥

भौजङ्गे आश्लेषायामसिकेशम्। असिका जनास्तेषामीशं पतिं हन्ति। पित्र्ये मघायामङ्गाधिपतिम्। भाग्ये पूर्वफल्गुन्यां पाण्ड्यनाथम्। आर्यम्णे उत्तरफल्गुन्यामौज्जयिनिकमुज्जयिनीपतिम्। सावित्रे हस्ते दण्डकाधिपतिं दण्डकारण्यनाथं हन्ति ॥५६॥

अन्येष्वाह—

चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्तज्ज्ञः ।
काश्मीरककाम्बोजौ नृपती प्राभञ्जने न स्तः ॥५७॥

चित्रासु केतुनाभिधूपितासु स्पृष्टासु वा कुरुक्षेत्राधिपस्य मरणं वधम्। तज्ज्ञः केतूपघातज्ञः। समादिशेद्वदेत्। प्राभञ्जने स्वातौ काश्मीरककाम्बोजौ नृपती राजानौ न स्तो न भवतः ॥५७॥

अन्येष्वाह—

इक्ष्वाकुरलकनाथश्च हन्यते यदि भवेद्विशाखासु ।
मैत्रे पुण्ड्राधिपतिर्ज्येष्ठासु च सार्वभौमवधः ॥५८॥

विशाखासु यदि केतूपघातो भवेत्तदा इक्ष्वाकुनाथोऽलकनाथश्च हन्यते। इक्ष्वाकवो जनाः। अलका नाम नगरी। तन्नाथो राजा। मैत्रेऽनुराधायां पुण्ड्राधिपतिर्हन्यते। ज्येष्ठासु च सार्वभौमस्य राज्ञः कान्यकुब्जाधिपतेर्वधो मरणं भवति ॥५८॥

अन्येष्वाह—

मूलेऽन्ध्रमद्रकपती जलदेवे काशिपो मरणमेति ।
यौधेयकार्जुनायनशिविचैद्यान् वैश्वदेवे च ॥५९॥

मूले केतूनाभिधूपिते हते वा अन्ध्रपतिं मद्रकपतिं च हन्ति। जलदेवे पूर्वाषाढायां काशिपः काश्यधिपतिर्मरणमेति प्राप्नोति। वैश्वदेवे उत्तराषाढायां यौधेयकः। अर्जुनायनः। शिविः। चैद्यः। एतान्नृपतीन् हन्ति ॥५९॥

अथान्येष्वाह—

हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वाङ्गम् ।
नैमिषनृपं किरातं श्रवणादिषु षट्स्विमान् क्रमशः ॥६०॥

षट्सु श्रवणादिषु नक्षत्रेषु हतेषु षडिमान्नृपान् क्रमशः क्रमेण हन्यात्। तद्यथा—श्रवणे हते कैकयनाथं केकयजनाधिपं हन्यात्। धनिष्ठासु पाञ्चनदं पञ्चनदाधिपतिम्। शतभिषजि सिंहलाधिपतिम्। पूर्वभद्रपदायां वाङ्गं वङ्गाधिपतिम्। उत्तरभद्रपदायां नैमिषनृपं नैमिषारण्याधिपतिम्। रेवत्यां किरातं किरातधिपतिं हन्यात् ॥६०॥

अथ केतोर्विशेषमाह—

उल्काभिताडितशिखः शिखी शिवः शिवतरोऽतिदृष्टो यः ।
अशुभः स एव चोलावगाणसितहूणचीनानाम् ॥६१॥

यः शिखी केतुः। उल्काभिताडितशिखः। उल्कया अभिमुख्येन ताडिता हता शिखा चूडा यस्य। स शिवः श्रेयस्करः। योऽतिदृष्ट उदितमात्र एव दृष्टः स शिवतरोऽतिशयेन शुभप्रदः। स एव केतुरेवंविधश्चोलानामावगाणानां सितानां हूणानां चीनानां चाशुभोऽश्रेयस्करः। चोलाद्याः सर्व एव जनाः ॥६१॥

अन्यद्विशेषमाह—

नम्रा यतः शिखिशिखाभिसृता यतो वा
ऋक्षं च यत् स्पृशति तत्कथितांश्च देशान् ।
दिव्यप्रभावनिहतान् स यथा गरुत्मान्
भुङ्क्ते गतो नरपतिः परभोगिभोगान् ॥६२॥

यतो यस्यां दिशि। शिखिशिखा केतुशिखा। नम्रा वक्रा। शिखिनः शिखा शिखिशिखा। अभिसृता यतो वा। यस्यां दिशि। अभिसृता गन्तुं प्रवृत्ता। अथवा यदृक्षं नक्षत्रं स्पृशति स्पर्शयति। तत्कथितांश्च देशान्। यस्यां दिशि शिखा नम्रा तत्र ये देशाः। यस्यां वा गन्तुं प्रवृत्ता तत्र ये देशा यन्नक्षत्रं स्पृशन्ति तस्य च नक्षत्रस्य ये देशा वक्ष्यमाणास्तान् कथितांस्तदुक्तान् देशान् नरपती राजा गतो भुङ्क्ते स्वीकरोति। कीदृशान् देशान्? दिव्यप्रभावनिहतान्। दिव्येनाप्रतिहतेन प्रभावेण विक्रमेण निहतान् निर्जितान्। कीदृशान्? परभोगिभोगान्। परैरन्यैर्भोगिभिर्भुज्यन्ते ये भोगा ग्रामास्तान्। कथं स राजा भुङ्क्ते? यथा गरुत्मान् गरुडो दिव्यप्रभावनिहतान् परभोगिभोगान् भुङ्क्ते? परा उत्कृष्टा ये भोगिनः सर्पास्तेषां भोगाः शरीराण्यङ्गानि वा तान्। यथा येन प्रकारेण। तथा तेन प्रकारेणेति। तथा च पराशरः—

यस्यां दिशि समुत्तिष्ठेत्तां दिशं नाभियोजयेत् ।
यतः शिखा यतो धूमस्ततो यायान्नराधिपः ॥
प्रतिलोमे यतः केतोर्जयार्थी याति पार्थिवः ।
सामात्यवाहनबलः स नाशमधिगच्छति[1] ॥

---

१. केतूदयं शुक्रफलं संक्रान्त्या वृष्टिलक्षणम्। कथयामि समासेन लोकानां हितकाम्यया॥
वरुणस्य दशपुत्राश्चतुर्विंशा रवेः स्मृताः। अष्टादश कुबेरस्य यमस्य नव कीर्तिताः॥
अग्निपुत्राश्चतुर्विंशद्वायोर्विंशतिरेव राट्। एवं संख्या च केतूनां शतं पञ्चोत्तरं स्मृतम्॥
श्रावणे भाद्रपदे च वरुणस्य सुतोदयः। आवाहयेन्महामेघांस्तोयपूर्णा वसुन्धरा॥
उन्मार्गे सरितो यान्ति जलवेगसमाहताः। समर्घाण्यपि धान्यानि वरुणस्य सुतोदये॥
आश्विने कार्तिके चैव सूर्यपुत्रं विनिर्दिशेत्। नदीकूपतडागानि सर्वाणि परिशोषयेत्॥
म्रियन्ते च तदा गावस्तथान्ये च चतुष्पदाः। देवो न वर्षते तत्र दुर्भिक्षं च महाभयम्॥
मार्गशीर्षे च पौषे च अग्निपुत्रान् विनिर्दिशेत्। अग्निदग्धानि राष्ट्राणि हारितानि धनानि च॥
विद्रवन्ति तथा देशाः समस्ता भयपीडिताः। अग्निचौरभयं तत्र प्रजानां व्याधयस्तथा॥
माघफाल्गुनयोर्मध्ये यमपुत्रं विनिर्दिशेत्। दुर्भिक्षं जायते घोरं सर्वधान्यानि संक्षयेत्॥
चैत्रवैशाखयोर्मासि कुबेरसुतमादिशेत्। यादृशा उदिता मेघा जलं पतति तादृशम्॥
हविर्धूमाकुलं सर्वं नन्दते च मुहुर्मुहुः। वसुन्धरा शुभाभ्राढ्या धनधान्यसमाकुला॥

[1]दृष्ट्वा षोडश वासरान्न शुभदः कैश्चित् प्रदिष्टः शिखी
सर्वारम्भफलप्रदो हि नियतं चैत्रेऽथवा माधवे।
ऋक्षं यत्परिभुक्तपीडितहतं यच्चाऽऽशिखाभेदितं
तत्सर्वं परिवर्ज्य शुद्धमपरं पाणिग्रहे वास्तुषु ॥ इति ॥६२॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ केतुचारो
नामैकादशोऽध्यायः ॥११॥

अथागस्त्यचारो व्याख्यायते। तत्रादावेवागस्त्यस्य मुनेः प्राधान्यद्वारेण समुद्रशोभामुपवर्णयितुमाह—

समुद्रोऽन्तः शैलैर्मकरनखरोत्खातशिखरैः
कृतस्तोयोच्छित्त्या सपदि सुतरां येन रुचिरः।
पतन्मुक्तामिश्रैः प्रवरमणिरत्नाम्बुनिवहैः
सुरान् प्रत्यादेष्टुं मितमुकुटरत्नानिव पुरा ॥१॥

येन भगवतागस्त्यमुनिना। पुरा पूर्वम्। तोयोच्छित्त्या जलापहरणेन। सपदि तत्क्षणमेव। समुद्रः सागरः। सुतरामतिशयेन। रुचिरो रम्यः। कृतः सम्पादितः। तस्य मुनेरुदयः श्रूयतामिति वक्ष्यमाणेन संवन्धः। रम्यः कैः कृतः? अन्तः शैलैः। अन्तर्मध्ये ये स्थिता मैनाकप्रभृतयः शैलाः पर्वतास्तैः। ते किलेन्द्रभयात्तत्र पूर्वं प्रविष्टाः। कीदृशैः? मकरनखरोत्खातशिखरैः। मकरा जलप्राणिविशेषाः। तेषां ये नखाः कठिनत्वात् त एव नखराः। तैर्मकरनखरैरुत्खातानि शिखराणि येषां तैः। ते किल कण्डूमपनेतुं परुषत्वात्तान्युत्खनन्ति। तथा यः समुद्रः सुरान् देवान्। प्रत्यादेष्टुं प्रत्याख्यातुमभिभवितुमिव दृष्टान्तीकर्तुमिव। कीदृशान् सुरान्? मितमुकुटरत्नान्। मितानि परिमितानि मुकुटेषु मौलिषु रत्नानि येषां तान्। तथाभूतान्। कैः प्रत्यादेष्टुमिव? पतन्मुक्तामिश्रैः प्रवरमणिरत्नाम्बुनिवहैः। अम्बुनिवहैः पानीयौघैः। कीदृशैः? पतन्मुक्तामिश्रैः पतन्तीभिर्मुक्ताभिर्मिश्रास्तैः। तथा प्रवराणि विकचानि च तानि मणिरत्नानि प्रधानरत्नानि। प्रवरमणिरत्नानि चाम्बुनिवहाश्च प्रवरमणिरत्नाम्बुनिवहास्तैः ॥१॥

ज्येष्ठाषाढयोर्मध्ये वायुपुत्रोदयो भवेत्। उच्चा मेघाः प्रदृश्यन्ते वायुना सह प्रेरिताः॥
तरुप्रासादशिखराः पतन्ति पवनाहताः। विरोधे च महीपाला भवन्ति च समन्ततः॥
अ० क० पुस्तकयो रेतानि केतुचारसम्बन्धीनि भ्रष्टपद्यान्यगस्त्यचारस्य प्रथमश्लोकटीकायां केनचित् संहितानभिज्ञेनाधिकानि प्रक्षिप्तानीति।

१. अ० क० ग० घ० पुस्तकेष्विदं पद्यं नास्ति।

अन्यदप्याह—

येन चाम्बुहरणेऽपि विद्रुमैर्भूधरैः समणिरत्नविद्रुमैः ।
निर्गतैस्तदुरगैश्च राजितः सागरोऽधिकतरं विराजितः ॥२॥

येनागस्त्यमुनिना। अम्बुहरणे जलापहरणे कृतेऽपि सति सागरः समुद्रः। अधिकतरमतिशयेन विराजितः शोभितः। कैः ?, भूधरैः पर्वतैः। कीदृशैः ? विद्रुमैः। विगता द्रुमा वृक्षा येभ्यस्तैः। वृक्षरहितैः। जलमध्यगतत्वात्तेषु वृक्षाः क्लिन्ना यतः। तथा समणिरत्नविद्रुमैः। मणिरत्नैः प्रधानरत्नैर्विद्रुमेण प्रवालेन सह वर्तन्ते ये तैः। निर्गतैस्तदुरगैश्च। तदिति भूधराणां परामर्शः। तदुरगैः। तेभ्यः पर्वतेभ्यो ये उरगाः सर्पा निर्गता निष्क्रान्तास्तैः। कथं च ते निर्गताः ? राजितः पङ्क्तिस्तैस्तथाभूतैः ॥२॥

अन्यदाह—

प्रस्फुरत्तिमिजलेभजिह्मगः क्षिप्तरत्ननिकरो महोदधिः ।
आपदां पदगतोऽपि यापितो येन पीतसलिलोऽमरश्रियम् ॥३॥

येन महोदधिः समुद्रः। आपदां पदगतोऽपि विपदां स्थानं प्राप्तोऽपि। पीतसलिलः पीतजलोऽपि। अमरश्रियं सुरलक्ष्मीम्। यापितः प्रापितः। कीदृशः ? प्रस्फुरत्तिमिजलेभजिह्मगः। प्रस्फुरन्तस्तिमयश्चलन्तो मत्स्याः। जलेभा जलहस्तिनः। जिह्मगाः सर्पा यस्मिन्। जिह्मं कुटिलं गच्छन्तीति जिह्मगाः। एते जलप्राणिनो जलाभावात् प्रस्फुरन्ति। तथा क्षिप्तरत्ननिकरः क्षिप्रः परिक्षिप्तो रत्नानां मणीनां निकरः समूहो यस्मिन्। तथा सुरलोकः प्ररफुरत्तिमिजलेभजिह्मगः। प्रस्फुरन्तश्चलन्तो ये सुरास्तिमिजलेभजिह्मगाः। तिमिगा मत्स्यवाहनाः केचित्। यथा वितस्ता नदी। केचिज्जलगाः पानीयस्थाः। यथा समुद्रे भगवान्नारायणः। केचिदिभगा हस्तिनो गताः। यथेन्द्र ऐरावतस्थः। केचिज्जिह्मं कुटिलं गच्छन्तीति जिह्मगाः कुटिलगतयः। यथा भौमादयस्ताराग्रहा वक्रिताः। तथा क्षिप्तरत्ननिकरः सोऽपि ॥३॥

अथान्यदाह—

प्रचलत्तिमिशुक्तिजशङ्खचितः सलिलेऽपहृतेऽपि पतिः सरिताम् ।
सतरङ्गसितोत्पलहंसभृतः सरसः शरदीव बिभर्ति रुचिम् ॥४॥

सरितां नदीनाम्। पतिः प्रभुः समुद्रः। सलिले जलेऽपहृतेऽपि सति। शरदि शरत्काले। सरसो महोदकाधारस्य संबन्धिनीं रुचिं दीप्तिं। बिभर्ति धारयति इव। कीदृशस्य सरसः ? सतरङ्गसितोत्पलहंसभृतः। सतरङ्गाणि तरङ्गेण वीचिसमूहेन सहितानि सितोत्पलानि श्वेतकुवलयानि पुष्पविशेषान् हंसान् पक्षिविशेषांश्च

बिभर्ति धारयति यत् तस्य। समुद्रः कीदृशः? प्रचलत्तिमिशुक्तिजशङ्खचितः। प्रचलद्भिस्तिमिभिर्मत्स्यैः। शुक्तिजैः प्राणिभिः शङ्खैश्च चितो व्याप्तः। प्रचलन्तो मत्स्यास्त एव तरङ्गाः। शुक्तिजाः सितोत्पलानि। शङ्खा हंसा इति ॥४॥

अथान्यत्—

तिमिसिताम्बुधरं मणितारकं स्फटिकचन्द्रमनम्बुशरद्द्युतिः।
फणिफणोपलरश्मिशिखिग्रहं कुटिलगेशवियच्च चकार यः ॥५॥

यः कुटिलगेशं समुद्रम्। वियदाकाशम्। चकार कृतवान्। कुटिलमस्पष्टं गच्छन्तीति कुटिलगा नद्यः। तासामीशं स्वामिनम्। तिमयो मत्स्याः। त एव सिताः शुक्ला अम्बुधरा मेघा यस्मिन् तत्तथाभूतम्। मणयो रत्नानि तान्येव दीप्तिमत्त्वात्तारका यस्मिन्। स्फटिको मणिविशेषः। स एव स्थूलत्वाच्चन्द्रः शशी यस्मिन्। अनम्बु जलाभावः। तदेव शरद्द्युतिः शरत्कान्तिः। अभिव्यक्तत्वाद्यस्मिन्। फणिफणोपलरश्मिशिखिग्रहम्। फणिनः सर्पाः। तेषां फणासु मूर्धसु यान्युपला रत्नानि चन्द्रकान्तसूर्यकान्तप्रभृतीनि। तेषु ये रश्मयः। त एव तत्सदृशवाच्छिखिग्रहाः केतवो यस्मिन्। यत आकाश एत एव सम्भवन्तीति ॥५॥

अथ समुद्रवर्णनानन्तरं विन्ध्यवर्णनामाह—

[1]**दिनकररथमार्गविच्छित्तयेऽभ्युद्यतं यच्चलच्छृङ्गमुद्भ्रान्तविद्याधरांसावसक्तप्रियाव्यग्रदत्ताङ्कदेहावलम्बाम्बरात्युच्छ्रितोद्धूयमानध्वजैः शोभितम्।**

करिकटमदमिश्ररक्तावलेहानुवासानुसारिद्विरेफावलीनोत्तमाङ्गैः कृतान् बाणपुष्पैरिवोत्तंसकान् धारयद्भिर्मृगेन्द्रैः सनाथीकृतान्तर्दरीनिर्झरम्।

गगनतलमिवोल्लिखन्तं प्रवृद्धैर्गजाकृष्टफुल्लद्रुमत्रासविभ्रान्तमत्तद्विरेफावलीहृष्टमन्द्रस्वनैः शैलकूटैस्तरक्षर्क्षशार्दूलशाखामृगाध्यासितैः।

रहसि मदनसक्तया रेवया कान्तयेवोपगूढं सुराध्यासितोद्यानमम्भोऽशनान्नमूलानिलाहारविप्रान्वितं विन्ध्यमस्तम्भयद्यश्च तस्योदयः श्रूयताम् ॥६॥

एवंविधं विन्ध्यं विन्ध्यपर्वतम्। योऽगस्त्यमुनिरस्तम्भयत् स्तम्भितवान् तस्योदयो दर्शनम्। श्रूयतामाकर्ण्यताम्। कीदृशं विन्ध्य? दिनकरस्यादित्यस्य।

---

१. सप्तदशरगणविशिष्टं समुद्रदण्डकनाम वृत्तमेतत्।

योऽसौ रथः स्यन्दनम्, तस्य मार्गः पन्थाः। तद्विच्छित्तये तन्निवारणाय। अभ्युद्यतमाभिमुख्येनोद्यतं यत्। अत एवाभ्युद्यतत्वाच्चलच्छृङ्गम्। चलिता न कम्पमानानि शृङ्गाणि शिखराणि यस्य तम्। उद्भ्रान्ता भ्रान्तिमापन्नाः। तेषु च शृङ्गेषु ये स्थिता विद्याधरा देवयोनयः स्तेषां येऽसाः स्कन्धाः। तेष्वंसेषु या अवसक्ता अवलग्नाः प्रिया वल्लभाः स्त्रियः। ताभिर्व्यग्राभिः सोद्यमाभिः। दत्ता विन्यस्ताः। अङ्गेषूत्सङ्गेषु विद्याधराणां ये देहाः शरीराणि। तेषु यान्यवलम्बन्ते अम्बराणि वस्त्राणि। तान्यतिशयेनोच्छ्रितान्युच्चतराणि। तानि चोद्धूयमानानि कम्पमानानि। तान्येव ध्वजाः सादृश्याद् ध्वजरूपाणि। तैः शोभितं भूषितम्।

करिकटेति। मृगेन्द्रैः सिंहैः सनाथीकृतमधिष्ठितम्। अन्तर्मध्ये या दर्यो गुहाः, तासु यन्निर्झरम्। जलं नियतं झरति स्रवतीति निर्झरम्। गुहाप्रदेशे प्रपातपानीयम्। यस्मिन् विन्ध्ये तं तथाभूतम्। कीदृशैः सिंहैः ? करिणो हस्तिनः। तेषां ये कटाः कुम्भाः, तेषु यो मदो दानाम्बु, तेन मिश्रं संयुक्तम्। यद्रक्तमसृक् तस्य योऽवलेह आस्वादः, तेन योऽनुवासः सौरभ्यम्। तदनुसारिणस्तदन्वेषणपरा ये द्विरेफा भ्रमराः। ते अवलीनाः संलग्ना उत्तमाङ्गेषु शिरःसु येषां तैः सिंहैः। वाणपुष्पैर्वर्णिकुसुमैः कृतान् रचितान्। उत्तंसकान् शिरोमाला धारयद्भिरिव।

गगनतलमिति। शैलकूटैः पर्वतशृङ्गैः। गगनतलमाकाशतलम्। उल्लिखन्तमिव। कीदृशैः शैलकूटैः ? प्रवृद्धैर्वृद्धिमद्भिः। गजैर्हस्तिभिः। आकृष्टा आकर्षिताः फुल्लाः कुसुमिता ये द्रुमा वृक्षास्तैर्यस्त्रासः कम्पः, तस्माद्ये विभ्रान्ता भ्रान्तिमापन्ना मत्तद्विरेफा भ्रमराः, तेषामावली पङ्क्तिः। तस्या हृष्टाया ये मन्द्रा मधुराः स्वनाः शब्दाः। ते विद्यन्ते येषां तैस्तथाभूतैः शैलकूटैः। अत्र भ्रमरपङ्क्तिर्वर्णपङ्क्तिरिव। तथा तरक्षैर्वनश्वभिः। ऋक्षैर्वानरैः प्राणिविशेषैर्वा। शार्दूलैः सिंहजातिभिः। शाखामृगैर्मर्कटैः। अध्यासिताः सेविता ये शैलकूटास्तैः।

रहसीति। कीदृशं विन्ध्यम् ? रहसि निर्जने। रेवया मदनसक्तया कान्तया वल्लभया कामिन्येवोपगूढं परिष्वक्तम्। रेवा नर्मदा। यतः सा तत्रैव बहुशो गता। सा च मदनसक्ता। मदनवृक्षावृतत्वादिति। सुरैर्देवैरध्यासितानि निषेवितानि, उद्यानानि उपवनानि यस्मिन्। तथाम्भोऽशनैर्जलाहारैः। अनन्नैर्निराहारैः। मूलाहारैर्मूलभक्षैः। अनिलाहारैर्वायुभक्षैश्च। विप्रैर्ब्राह्मणैर्मुनिभिरन्वितं संयुक्तं विन्ध्यम् ॥६॥

तथाऽगस्त्योदयप्रभावमाह—

उदये च मुनेरगस्त्यनाम्नः कुसमायोगमलप्रदूषितानि ।
हृदयानि सतामिव स्वभावात् पुनरम्बूनि भवन्ति निर्मलानि ॥७॥

अगस्त्यनाम्नो मुनेरुदये उद्गमे। पुनर्भूयः अम्बूनि पानीयानि। स्वभावात् प्रकृत्यैव। निर्मलानि प्रसन्नानि भवन्ति। कीदृशानि? कुसमायोगमलप्रदूषितानि। कोर्भूम्याः समायोगः संश्लेषः कुसमायोगः। तस्मात् कुसमायोगाद्यन्मलं पङ्कः। तेन प्रदूषितानि दुष्टानि यानि तान्यगस्त्यदर्शनान्निर्मलानि भवन्ति। वर्षासु कुसमायोगस्तेषाम्। यथा सतां साधूनां उदये दर्शने हृदयानि पुनर्निर्मलानि भवन्ति। कीदृशानि? कुसमायोगमलप्रदूषितानि। कुत्सितैर्जनैर्योऽसौ समायोगस्तस्माद्यन्मलं पापं तेन प्रदूषितानि दुष्टानि। पुनः स्वभावादेव निर्मलानि भवन्ति। साधुदर्शनात् पापक्षय उत्पद्यते यावत् ॥७॥

अथ विन्ध्यवर्णनानन्तरं शरद्वर्णनमाह—

पार्श्वद्वयाधिष्ठितचक्रवाकामापुष्णती सस्वनहंसपङ्क्तिम्।
ताम्बूलरक्तोत्कषिताग्रदन्ती विभाति योषेव शरत् सहासा ॥८॥

शरत् सहासा हासयुक्ता योषा स्त्रीव विभाति शोभते। कीदृशी योषा? ताम्बूलरक्तोत्कषिताग्रदन्ती। ताम्बूलेन रक्ता रञ्जिता ये दन्ता रदाः। तेभ्योऽग्रदन्ताः पुरोवर्तिनो रदा उत्कषिता उद्घृष्टा यया सा तथाभूता स्त्री। शरत्कीदृशी? पार्श्वद्वयाधिष्ठितचक्रवाकामापुष्णती सस्वनहंसपङ्क्तिम्। पार्श्वद्वयमधिष्ठितं संयुक्तम्। चक्रवाकैः पक्षिविशेषैर्लोहितवर्णैर्यस्याः सस्वनायाः शब्दयुक्ताया हंसपङ्क्तेस्तामापुष्णती आपोषयमाणा। नदीनां प्रत्यहं जलाल्पत्वात् पुलिनानि व्यक्तानि भवन्ति। तानि च हंसैः सेव्यन्ते। अत एवोत्प्रेक्ष्यते—[1]'ताम्बूलरक्तोत्कषिताग्रदन्ती योषा सहासेव ॥८॥

अन्यदप्याह—

इन्दीवरासन्नसितोत्पलान्विता शरद् भ्रमत्षट्पदपङ्क्तिभूषिता।
सभ्रूलताक्षेपकटाक्षवीक्षणा विदग्धयोषेव विभाति सस्मरा ॥९॥

शरत् सस्मरा सकामा विदग्धयोषा प्रौढाङ्गनेव विभाति शोभते। कीदृशी विदग्धयोषा? सभ्रूलताक्षेपकटाक्षवीक्षणा। भ्रूलतयोर्योऽसावाक्षेपश्चलनम्। तेन यः कटाक्षो नयनविभ्रमः। तेन सहितं वीक्षणमवलोकनं यस्याः। शरत् कीदृशी? इन्दीवरासन्नसितोत्पलान्विता। इन्दीवरं नीलोत्पलम्। तस्यासन्ने उभयपार्श्वस्थे ये सितोत्पले। तथाभूतेनेन्दीवरेणान्विता संयुक्ता। अनेन नेत्रस्थ सादृश्यमुक्तम्। यतो नेत्रमपि मध्यभागात् कृष्णमुभयपार्श्वयोः सितं भवति। तथा भ्रमन्तश्चलन्तः। ये षट्पदा भ्रमराः। तेषां या पङ्क्तिरवलिः। तया भूषिता संयुक्ता। अनेन

---

१. शरदि हंसपङ्क्तिर्दन्तपङ्क्तिस्तत्र चक्रवाकास्ताम्बूलरक्तोपमा इति भावः।

भ्रूसादृश्यमुक्तम्। यतो नयनस्योर्ध्वभागस्था भ्रूलता भवति। अत एवोत्प्रेक्ष्यते—सभ्रूलताक्षेपकटाक्षवीक्षणा विदग्धयोषा सस्मरेव ॥९॥

अथान्यदाह—

इन्दोः पयोदविगमोपहितां विभूतिं
द्रष्टुं तरङ्गवलया कुमुदं निशासु ।
उन्मूलयत्यलिनिलीनदलं सुपक्ष्म
वापी विलोचनमिवासिततारकान्तम् ॥१०॥

इन्दोश्चन्द्रमसः। पयोदानां मेघानाम्। विगमाद्विशेषोपगमात्। उपहिता वृता व्याप्ता या विभूतिः कान्तिः। तां द्रष्टुमवलोकयितुम्। वापी नलिनी। निशासु रात्रिषु। कुमुदं कैरवम्। विलोचनं नेत्रमिवोन्मूलयति विकाशयति। कीदृशी वापी? तरङ्गवलया। तरङ्गा ऊर्मिसंमूहाः। त एव वलयः प्रकोष्ठभूषणं यस्याः। कीदृक् कुमुदम्? अलिनिलीनदलम्। अलिर्भ्रमरः स निलीनः संलग्नो दलेषु पत्रेषु यस्मिन्। सुपक्ष्म शोभनं पत्रम्। तदेवासितं कृष्णम्। तारकमन्तर्मध्ये यस्मिन्। अत एवोत्प्रेक्ष्यते—नयनमिव। यतो नयनं सुपक्ष्म भवति। शोभनानि पक्ष्माणि अक्षिलोमानि यस्य तत्तथा। असिततारकान्तं कृष्णतारकामध्यम्। नायिका चिरदर्शनाद्वल्लभास्यं सोत्कण्ठा समुद्वीक्षत इति ॥१०॥

अथ भूमेः शोभामुपवर्णयितुमाह—

नानाविचित्राम्बुजहंसकोककारण्डवापूर्णतडागहस्ता ।
रत्नैः प्रभूतैः कुसुमैः फलैश्च भूर्यच्छतीवार्घमगस्त्यनाम्ने ॥११॥

भूर्भूमिः। अगस्त्यनाम्ने अर्घं यच्छतीव ददाति इव। कीदृशी भूः? नानाविचित्राम्बुजहंसकोककारण्डवापूर्णतडागहस्ता। नानाप्रकारा विचित्रा ये अम्बुजाः पद्मादयः। तथा हंसकोककारण्डवाः पक्षिविशेषाः। तैर्यान्यापूर्णानि तडागानि। तान्येव हस्ता यस्याः। कैरर्घं यच्छतीव? रत्नैः प्रभूतैः कुसुमैः फलैश्चेति। त एवाम्बुजादयो हस्तस्थिता रत्नादीन्युपलक्ष्यन्ते। तै रत्नैः। प्रभूतैर्बहुभिः। तथा कुसुमैः पुष्पैः फलैश्चेति। यतो भगवते रत्नादिभिरर्घो दीयत इति ॥११॥

अथ भगवतः प्राधान्यमाह—

सलिलममरपाज्ञयोज्झितं यद् घनपरिवेष्टितमूर्तिभिर्भुजङ्गैः ।
फणिजनितविषाग्निसम्प्रदुष्टं भवति शिवं तदगस्त्यदर्शनेन ॥१२॥

अमरप इन्द्रः। तदाज्ञया यत्सलिलं जलम्। उज्झितमुत्सृष्टम्। भुजङ्गैः सर्पैः। कीदृशैः? घनपरिवेष्टितमूर्तिभिः। घनैर्मेघैः। परिवेष्टिता मूर्तयो देहा येषां तैः। कीदृशं जलम्? फणिजनितविषाग्निसम्प्रदुष्टम्। फणिनः सर्पाः। तेभ्यो जनित-

मुत्पादितं यद्विषम्। तदेवाग्निर्वह्निः। तेन सम्प्रदुष्टं सम्यग् दूषितम्। तदगस्त्यदर्शनेन शिवं श्रेयस्करं भवति ॥१२॥

अथान्यदप्याह—

स्मरणादपि पापमपाकुरुते किमुत स्तुतिभिर्वरुणाङ्गरुहः।
मुनिभिः कथितोऽस्य यथार्घविधिः कथयामि तथैव नरेन्द्रहितम् ॥१३॥

वरुणस्याङ्गरुहः पुत्रोऽगस्त्यमुनिः स्मरणादपि स्मरणमात्रादपि नामसङ्कीर्तनमात्रात्पापमेनोऽपाकुरुते निवर्तयतीति। किमुत किं पुनः स्तुतिभिः स्तोत्रैः। मुनिभिर्गर्गादिभिर्यथा येन प्रकारेणास्यार्घविधिः कथित उक्तः। तथा तेनैव प्रकारेण नरेन्द्रस्य राज्ञो हितं कथयामि वच्मि। तथा च समाससंहितायाम्—

भानोर्वर्त्मविघातवृद्धशिखरो विन्ध्याचलस्तम्भितो
वातापिर्मुनिकुक्षिभृत् सुररिपुर्जीर्णश्च येनासुरः।
पीतश्चाम्बुनिधिस्तपोम्बुनिधिना याम्या च दिग्भूषिता
तस्यागस्त्यमुनेः पयश्च्युतिकृतश्चारः समासादयम् ॥ इति ॥१३॥

अथास्योदयलक्षणमाह—

संख्याविधानात् प्रतिदेशमस्य विज्ञाय सन्दर्शनमादिशेज्ज्ञः।
तच्चोज्जयिन्यामगतस्य कन्यां भागैः स्वराख्यैः स्फुटभास्करस्य ॥१४॥

अस्यागस्त्यमुनेः संख्याविधानाद् गणितविधानात् प्रतिदेशं देशं देशं प्रति सन्दर्शनमुदयं विज्ञाय ज्ञात्वा ज्ञः पण्डित आदिशेद् वदेत्। तच्च दर्शनमुज्जयिन्यां स्फुटभास्करस्य स्फुटादित्यस्य कन्यां कुमारीं स्वराख्यैर्भागैः सप्तभिरंशैरगतस्याप्राप्तस्य भवति। सिंहस्य भागत्रयोविंशतिं भुक्त्वेत्यर्थः। तथा च समाससंहितायाम्—

सप्तभिरंशैः कन्यामप्राप्ते रोमके तु दिवसकरे।
दृश्योऽगस्त्योऽवन्त्यां तत्समपूर्वापरेऽप्येवम् ॥ इति ॥१४॥

अथार्घदानलक्षणमाह—

ईषत्प्रभिन्नेऽरुणरश्मिजालैर्नैशेऽन्धकारे दिशि दक्षिणस्याम्।
सांवत्सरावेदितदिग्विभागे भूपोऽर्घमुर्व्यां प्रयतः प्रयच्छेत् ॥१५॥

भूपो राजा प्रयतः संयत उर्व्यां भूम्यामर्घं प्रयच्छेद् दद्यात्। कस्मिन् काले? अरुणरश्मिजालैररुणकरनिकरैर्नैशे रात्रिभवेऽन्धकारे तमसि ईषत् किञ्चित् प्रभिन्ने नष्टे। कस्यां दिश्यर्घं दद्यात्? दक्षिणस्यां याम्यायां दिशि। कीदृशो राजा? सांव-

त्सरावेदितदिग्विभागः। सांवत्सरेण कालविदा आवेदितः प्रदर्शितो दिग्विभागो यस्य स तथाभूतः। यथेयं दक्षिणदिगस्यां भगवतो दर्शनमिति ॥१५॥

कैरर्घं प्रयच्छेदित्याह--

कालोद्भवैः सुरभिभिः कुसुमैः फलैश्च
रत्नैश्च सागरभवैः कनकाम्बरैश्च ।
धेन्वा वृषेण परमान्नयुतैश्च भक्ष्यै-
र्दध्यक्षतैः सुरभिधूपविलेपनैश्च ॥१६॥

कालोद्भवैः सुकालजातैः। सुरभिभिः सुगन्धैः। कुसुमैः पुष्पैः। फलैश्च जातीफलादिभिः। तथा रत्नैर्मणिभिः। सागरभवैः समुद्रजातैः। कनकेन सुवर्णेनाम्बरैर्वस्त्रैः। तथा धेन्वा पयस्विन्या गवा वृषेण दान्तेन। परमान्नेन पायसेन युतैश्च भक्ष्यैरपूपादिभिस्तथा दध्ना क्षीरविकारेण। अक्षतैर्यवैः। सुरभिधूपैः सुगन्धधूपैर्विलेपनैरनुलेपनैः सुगन्धिभिश्च ॥१६॥

अथार्घं दातुर्नृपस्य फलमाह--

नरपतिरिममर्घं श्रद्दधानो दधानः
प्रविगतगददोषो निर्जितारातिपक्षः ।
भवति यदि च दद्यात् सप्त वर्षाणि सम्यग्
जलनिधिरशनायाः स्वामितां याति भूमेः ॥१७॥

नरपती राजा श्रद्दधानः श्रद्धावानिममर्घं दधानः प्रयच्छमाणः। प्रविगतगददोषो निर्जितारातिपक्षो भवति। प्रविगताः प्रनष्टा गदा रोगा दोषाश्च यस्य। तथा निर्जितोऽरातिपक्षः शत्रुपक्षो येन। यदि चानेन विधिना सम्यगविच्छिन्नं सप्त वर्षाणि दद्यात्तदा जलनिधिरशनाया भूमेः समुद्रमेखलाया उर्व्याः स्वामितां प्रभुतां याति गच्छति ॥१७॥

अथ ब्राह्मणविट्शूद्राणां फलमाह--

द्विजो यथालाभमुपाहृतार्घः प्राप्नोति वेदान् प्रमदाश्च पुत्रान् ।
वैश्यश्च गां भूरि धनं च शूद्रो रोगक्षयं धर्मफलं च सर्वे ॥१८॥

द्विजो ब्राह्मणो यथालाभं यथासम्भवमुपाहृतार्घो दत्तार्घः प्राप्नोति लभते वेदान्। प्रमदाः स्त्रीः। पुत्रानपत्यानि च। तथा वैश्यो यथालाभमुपहृतार्घो गां लभते। शूद्रो भूरि बहु धनं वित्तं प्राप्नोति। सर्वे ब्राह्मणवैश्यशूद्रा रोगक्षयं गदोपशमं धर्मफलं च प्राप्नुवन्ति ॥१८॥

अथोदितस्य लक्षणमाह—

रोगान् करोति परुषः कपिलस्त्ववृष्टिं
धूम्रो गवामशुभकृत् स्फुरणो[1] भयाय ।
माञ्जिष्ठरागसदृशः क्षुधमाहवांश्च
कुर्यादणुश्च पुररोधमगस्त्यनामा ॥१९॥

अगस्त्यनामा अगस्त्यमुनिः परुषो रूक्षो रोगान् करोति। कपिलः कपिलवर्णोऽवृष्टिमवर्षणं करोति। धूम्रो धूम्रवर्णो गवामशुभकृदनिष्टफलं करोति। स्फुरणः चलनो भयाय भवति। माञ्जिष्ठरागसदृशो लोहितवर्णः क्षुधं दुर्भिक्षं करोति। आहवान् संग्रामांश्च करोति। अणुः सूक्ष्मः पुररोधं नगरवेष्ठनं करोति ॥१९॥

अथ वर्णलक्षणमाह—

शातकुम्भसदृशः स्फटिकाभस्तर्पयन्निव महीं किरणाग्रैः ।
दृश्यते यदि तदा प्रचुरान्ना भूर्भवत्यभयरोगजनाढ्या ॥२०॥

यदि शातकुम्भसदृशो रूप्यसदृशाभो दृश्यते। शातकुम्भशब्दः सुवर्णरजतयोर्द्वयोरपि वाचकः। अथवा स्फटिकाभः स्फटिककान्तिः। महीं भूमिं किरणाग्रै रश्मिप्रान्तैस्तर्पयन्निव दृश्यते। केचित् किरणौघैरिति पठन्ति। किरणौघै रश्मिसमूहैः। तदा भूर्मही प्रचुरान्ना प्रभूतसस्या। तथा अभयरोगजनाढ्या अभयैर्भयरहितैररोगैर्विगतगदैर्जनैर्जन्तुभिराढ्या बहुला भवति। तथा च गर्गः—

शङ्खकुन्देन्दुगोक्षीरमृणालरजतप्रभः ।
दृश्यते यद्यगस्त्यः स्यात् सुभिक्षक्षेमकारकः ॥
वैश्वानरार्चिप्रतिमैर्मांसशोणितकर्दमैः ।
रणैर्भयैश्च विविधैः किञ्चिच्छेषायते प्रजा ॥ इति ॥२०॥

अथोदयास्तमयलक्षणं शुभाशुभं चाह—

उल्कया विनिहतः शिखिना वा क्षुद्भयं मरकमेव विधत्ते ।
दृश्यते स किल हस्तगतेऽर्के रोहिणीमुपगतेऽस्तमुपैति ॥२१॥

उल्कया विनिहतोऽभिताडितः शिखिना केतुना वा विनिहतः। तदा क्षुद्भयं दुर्भिक्षम्। मरकं जनक्षयं च विधत्ते ददाति। किलेत्यागमसूचने। सोऽगस्त्यमुनिः

---

१. अत्र कर्तरि ल्युर्न तु भावे ल्युडिति बोध्यम्।
२. किरणौघैरिति पाठान्तरम्।

हस्तगतेऽर्के हस्तस्थे सूर्ये दृश्यते उदयं याति। तथा रोहिणीमुपगते रोहिण्यां संस्थितेऽर्केऽस्तमुपैति अदर्शनमायाति। यद्यप्यत्र गणितसाम्यं न भवति, तथाप्याऽऽचार्येण पूर्वशास्त्रदृष्टत्वात् कृतम्। तथा च पञ्चसिद्धान्तिकायाम्—

विषुवच्छायाद्गुणा [1]पञ्चकृतिस्तत्कलास्ततश्चापम् ।
छायात्रिसप्तकयुतं दशभिर्गुणितं विनाडयस्ताः ॥
ताभिः कर्कटकाद्याद्यल्लग्नं तादृशे सहस्रांशौ ।
याम्याशावनितामुखविशेषतिलको मुनिरगस्त्यः ॥

एवं पूर्वशास्त्रदृष्टत्वादाचार्येणात्रोक्तम्। तथा च पराशरः—

हस्तस्थे सवितर्युदेति रोहिणीसंस्थे प्रविशति।

अथास्य त्रिविधश्चारोदयकालो दृष्टः—आश्वयुग्बहुलाष्टमीपञ्चदश्योः कार्तिकाष्टम्यां वा। तत्राश्वयुग्बहुलोदितः सुवृष्टिक्षेमान्नसम्पत्करः। वर्णश्चावेदयति। अग्निपरुषरूक्षाभो रोगाय कपिलो वृष्टिनिग्रहाय। धूमाभो गवामभावाय। माञ्जिष्ठः कुङ्कुमच्छविः क्षुच्छस्त्रदः। नीलोऽतिवर्षाय। संवृतः पुररोधाय। स्पन्दनो भयाय।

अपि च—

हन्यादुल्का यदागस्त्यं केतुर्वाप्युपधूपयेत् ।
दुर्भिक्षं जनमारश्च तदा जगति जायते ॥
सुस्निग्धवर्णः श्वेतश्च शातकुम्भसमप्रभः ॥
मुनिः क्षेमसुभिक्षाय प्रजानामभयाय च ॥ इति ॥२१॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावगस्त्यचारो नाम द्वादशोऽध्यायः ॥१२॥

अथ सप्तर्षिचारो व्याख्यायते। तत्रादावेव तेषां मुनीनां दिक्संस्थानलक्षणमाह—

सैकावलीव राजति ससितोत्पलमालिनी सहासेव ।
नाथवतीव च दिग् यैः कौवरी सप्तभिर्मुनिभिः ॥१॥

यैः सप्तभिर्मुनिभिः कौवेरी उत्तरा दिग् नाथवतीव च विराजते शोभते। यथा नाथवती प्रभुणा युक्ता नायिका विराजते तद्वत् कौवेरीति। नाथवती कीदृशी

---

१. पञ्चकृतिस्तिथियुतं ततश्चापमिति पाठः साधुर्विभाति। द्रष्टव्यौ पञ्चसिद्धान्तिकायां चतुर्दशाध्यायस्य ३९–४० श्लोकौ।

भवति ? सैकावलीव। सह एकावल्या वर्तते या। एकावलीत्याभरणविशेषस्य संज्ञा। एवं ससितोत्पलमालिनी सहासेव। सह सितया श्वेतयोत्पलमालया वर्तते सह हासेन च। मुनिपङ्क्तेः कुटिलत्वादेतानि विशेषणान्युपपद्यन्त इति ॥१॥

ध्रुववशाद् भ्रमद्भिर्यैरुत्तरा दिगेवंविधा लक्ष्यते तेषां चारं वक्ष्यामीत्याह—

ध्रुवनायकोपदेशान्नरिनर्तीवोत्तरा भ्रमद्भिश्च ।
यैश्चारमहं तेषां कथयिष्ये वृद्धगर्गमतात् ॥२॥

यैर्मुनिभिर्भ्रमद्भिरुत्तरा कौवेरी दिग् नरिनर्तीव। अत्यर्थं नृत्यति नरिनर्ति। कथं ध्रुवनायकोपदेशात्। ध्रुव एव नायको ध्रुवनायकस्तदुपदेशात्। यतो नर्तक्या उपदेशो नायक आचार्यो भवति। तस्या ध्रुवनायकोपदेशः। यस्मात् सकलज्योतिश्चक्रस्य ध्रुव एव भ्रामकः। तथा च भट्टब्रह्मगुप्तः—

ध्रुवयोर्बद्धं सव्यगममराणां क्षितिजसंस्थमुडुचक्रम् ।
अपसव्यगमसुराणां भ्रमति प्रवहानिलक्षिप्तम् ॥ इति।

तेषां मुनीनां चारमहं वृद्धगर्गमतात् कथयिष्ये। वृद्धगर्गो नाम महामुनिस्तन्मतात्तत्कृताच्छास्त्रादिति ॥२॥

अधुनैतेषां चारनक्षत्रानयनमाह—

आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ ।
षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्च ॥३॥

मुनयो मरीच्यादयः सप्तर्षयो युधिष्ठिरे पाण्डुतनये नृपतौ राजनि पृथ्वीं महीं शासति परिपालयति मघासु मघानक्षत्रेष्वासन्नध्यतिष्ठन्। तथा च वृद्धगर्गः—

कलिद्वापरसन्धौ तु स्थितास्ते पितृदैवतम् ।
मुनयो धर्मनिरताः प्रजानां पालने रताः ॥

तस्य च युधिष्ठिरस्य राज्ञः षड्द्विकपञ्चद्वियुतः शककालो गतः। सहस्रद्वयेन पञ्चभिः शतैः षड्विंशत्यधिकैः २५२६ शकनृपकालो युक्तः कार्यः। एवं कृते यद्भवति तावद्वर्षवृन्दं वर्तमानकालं यावद् गतम्। तस्य च शतेन भागमाहृत्य यदवाप्यते तानि नक्षत्राणि मघादीनि भुक्तानि यच्छेषं तानि वर्षाणि भुज्यमाने नक्षत्रे तेषां प्रविष्टानां गतानि। तानि च शताद्विशोध्य यदवशिष्यते तावन्त्येव वर्षाणि तस्मिन्नक्षत्रे स्थितानीति। लब्धनक्षत्राणामपि सप्तविंशत्या भागमपहृत्यावशेषाङ्कसमं मघादिनक्षत्रं भुक्तमिति वाच्यम् ॥३॥

अथ तेषां नक्षत्रभोगप्रमाणकालं नक्षत्रावस्थितिं चाह—

एकैकस्मिन्नृक्षे शतं शतं ते चरन्ति वर्षाणाम् ।
[1]प्रागुदयतोऽप्यविवरादृजून्नयति तत्र संयुक्ताः ॥४॥

ते मुनय एकैकस्मिन्नृक्षे नक्षत्रे शतं शतं वर्षाणां चरन्ति। तथा च कश्यपः—

शतं शतं तु वर्षाणामेकैकस्मिन् महर्षयः ।
नक्षत्रे निवसन्त्येते ससाध्वीका महातपाः ॥

अविवरान्निरन्तरं प्रागुदयतः प्राक् पूर्वस्यां दिशि उदयतो यन्नक्षत्रं तेषामृजून्नयति स्पष्टतां सप्तर्षिपङ्क्त्या नयति तत्र तस्मिन्नक्षत्रे ते संयुक्ताः स्थिता इति। एतदुक्तं भवति—यस्य नक्षत्रस्य प्रागुदयतः सप्तर्षिपङ्क्तिः [2]स्पष्टा भवति तस्मिन्नेव स्थिता इति। केचित् प्रागुत्तरतश्चैते सदोदयन्ते ससाध्वीका इति पठन्ति। ते च प्रागुत्तरतश्चैशान्यां दिशि सदा सर्वकालं ससाध्वीकाः सारुन्धतिका उदयन्ते ॥४॥

अथ संस्थानलक्षणमाह—

पूर्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽस्मात् ।
तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च ॥५॥
पुलहः क्रतुरिति भगवानासन्ना अनुक्रमेण पूर्वाद्यात् ।
तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी ॥६॥

पूर्वे भागे पूर्वस्यां दिशि भगवान् मरीचिर्नाम महर्षिः स्थितः। अस्मान्मरीचेरपरे पश्चिमे भागे वसिष्ठः स्थितः। तस्य वसिष्ठस्यापरे अङ्गिराः स्थितः। ततस्तस्मादङ्गिरसोऽत्रिः स्थितः। तस्यात्रेरासन्नो निकटवर्ती पुलस्त्यश्च ॥५॥

ततः पुलहस्ततः क्रतुरिति भगवान्। अनुक्रमेण परिपाट्या पूर्वाद्यात् पूर्वादित आसन्ना निकटस्थिताः। तत्र च तन्मध्ये अरुन्धती साध्वी सच्छीला मुनिवरं मुनिप्रधानं वसिष्ठमुपाश्रिता संश्रितेत्यर्थः ॥६॥

अथैतैः शुभाशुभफलमाह—

उल्काशनिधूमाद्यैर्हता विवर्णा विरश्मयो ह्रस्वाः ।
हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तद्वृद्धयै ॥७॥

---

१. प्रागुत्तरतश्चैते सदोदयन्ते ससाध्वीकाः इति पाठान्तरम्।

२. सर्वास्तारा यथा उदिता भवेयुः। यदा मरीचिः प्राक् क्षितिजे समायाति तदैव वक्ष्यमाणमुनिसंस्थानानुसारेण सर्वे ऋषय आकाशे स्पष्टा भवन्ति। तेन प्राक्क्षितिजे आयनाक्षजदृक्कर्मसंस्कृतो मरीचिध्रुवको मघा तद्ध्रुवकसमः। ऋजुः स्पष्ट इति सर्वत्रैव भट्टोत्पलव्याख्या। द्रष्टव्याऽस्यैव ग्रन्थस्य २३८ पृष्ठे केतुचारे ४४ श्लोकस्य व्याख्या।

एते मुनय उल्कया अशन्या धूमेन वा। आदिग्रहणाद्रजोनीहारपांशुभिर्हताः। तथा विवर्णाः कलुषाः। विरश्मयो विगतकिरणाः। ह्रस्वाः स्वल्पबिम्बाः स्वं स्वलमात्मीयवर्गं वक्ष्यमाणं हन्युर्नाशयेयुः। तथा विपुला विस्तीर्णाः। स्निग्धा निर्मलाश्च तद्वृद्धचै स्ववर्गसिद्धये भवन्ति। तथा च वृद्धगर्गः—

उल्कया केतुना वापि धूमेन रजसापि वा ।
हता विवर्णाः स्वल्पा वा किरणैः परिवर्जिताः ॥
स्वं स्वं वर्गं तदा हन्युर्मुनयः सर्व एव ते ।
विपुलाः स्निग्धवर्णाश्च स्ववर्गपरिपोषकाः ॥ इति ॥७॥

अथैतेषां स्ववर्गमाह—

गन्धर्वदेवदानवमन्त्रौषधिसिद्धयक्षनागानाम् ।
पीडाकरो मरीचिर्ज्ञेयो विद्याधराणां च ॥८॥

शकयवनदरदपारतकाम्बोजांस्तापसान् वनोपेतान् ।
हन्ति वसिष्ठोऽभिहतो विवृद्धिदो रश्मिसम्पन्नः ॥९॥

अङ्गिरसो ज्ञानयुता धीमन्तो ब्राह्मणाश्च निर्दिष्टाः ।
अत्रेः कान्तारभवा जलजान्यम्भोनिधिः सरितः ॥१०॥

रक्षःपिशाचदानवदैत्यभुजङ्गाः स्मृताः पुलस्त्यस्य ।
पुलहस्य तु मूलफलं क्रतोस्तु यज्ञाः सयज्ञभृतः ॥११॥

गन्धर्वा अश्वमुखा नरदेवयोनयः। देवाः सुराः। दानवा दनुपुत्राः। मन्त्राः। औषधयः। सिद्धा देवयोनयः। यक्षाः। नागा एतेषां सर्वेषाम्। तथा विद्याधराणां देवयोनीनां मरीचिरुपतप्तः पीडाकरः। स्निग्धो विपुलश्च वृद्धिप्रदः॥

शकयवनेति। शका जनाः। यवनाः। दरदाः। पारताः। काम्बोजाः। तापसाः तपोनिरताः। वनोपेता वनस्था एतान् वसिष्ठोऽभिहत उपतप्तो हन्ति। रश्मिसम्पन्नो निरुपहतो विवृद्धिदो वृद्धिप्रदः॥

अङ्गिरस इति। ज्ञानयुता ज्ञानोपेताः। धीमन्तो बुद्धिमन्तः। ब्राह्मणा द्विजा एते अङ्गिरसो विनिर्दिष्टाः कथिताः।

अत्रेरिति। कान्तारमटवी। तत्र भवो जन्म येषां ते कान्तारभवाः। जलजानि। जले यानि द्रव्याणि जायन्ते। अम्भोनिधिः समुद्रः। सरितो नद्यः। एते अत्रेः॥

राक्षसाः। पिशाचाः। दानवाः। दैत्याः। भुजङ्गाः सर्पाः। एते पुलस्त्यस्य स्मृताः कथिताः। मूलफलं यत्किञ्चित्तत्तु पुलहस्य। यज्ञा मखाः। यज्ञभृतो यज्ञकर्तारः। तैः सह यज्ञाः क्रतोरिति॥ तथा च वृद्धगर्गः—

देवदानवगन्धर्वाः सिद्धपन्नगराक्षसाः।
नागा विद्याधराः सर्वे मरीचेः परिकीर्तिताः॥

यवनाः पारताश्चैव काम्बोजा दरदाः शकाः।
वसिष्ठस्य विनिर्दिष्टास्तापसा वनमाश्रिताः॥

धीमन्तो ब्राह्मणा ये च ज्ञानविज्ञानपारगाः।
रूपलावण्यसंयुक्ता मूनेरङ्गिरसः स्मृताः॥

कान्तारजास्तथाम्भोजा अत्रेर्ये सरिदाश्रिताः।
पिशाचा दानवा दैत्या भुजङ्गा राक्षसास्तथा॥

पुलस्त्यस्य विनिर्दिष्टाः पुष्पं मूलं फलं च यत्।
तत्सर्वं पुलहस्योक्तं यज्ञा यज्ञभृतश्च ये॥

क्रतोरेव विनिर्दिष्टा वेदज्ञा ब्राह्मणास्तथा॥ इति॥८-११॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ सप्तर्षिचारो नाम त्रयोदशोऽध्यायः॥१३॥

वराहमिहिराचार्यग्रहचारोदधौ कृते।
अर्थिनामुत्पलश्चक्रे स्वार्थाय विवृतिप्लवम्॥

इति ग्रहचाराः समाप्ताः॥

———

अथ नक्षत्रकूर्माध्यायो व्याख्यायते

तत्रादावेव तत्प्रविभागमाह—

नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा ।
भारतवर्षे मध्यप्रागादिविभाजिता देशाः ॥१॥

नक्षत्रत्रयेण नववर्गास्तैर्नक्षत्रत्रयवर्गैः। आग्नेयाद्यैः कृतिकाद्यैर्नवधा नवभिः प्रकारैर्व्यवस्थितैः। क्व भारतवर्षे। मेरोर्दक्षिणभागो भारतवर्षं तत्र व्यवस्थितैः। तत्र च मध्यप्रागादिविभाजिता देशाः। मध्यदेशे मध्यभागे भारतवर्षेऽन्ये देशाः प्रागादिना पूर्वादिक्रमेण विभाजिता विभागेन स्थापिता वक्ष्यमाणविधानेनेति। तथा च गर्गः—

कृत्तिकाद्यैस्त्रिनक्षत्रैर्भवर्गैर्नवभिः क्षितिः ।
कल्पिता मध्यदेशादौ प्रागादिक्रमयोगतः ॥
कृत्तिकाद्यस्त्रिनक्षत्रो मध्यदेशे गणो यदा ।
पापैरुपहतो हन्ति मध्यदेशाऽखिलांस्तदा ॥
रौद्रादिको हन्ति पूर्वां सार्पाद्यः पूर्वदक्षिणाम् ।
आर्यम्णाद्यस्तथा याम्यां स्वात्याद्यो दक्षिणापराम् ॥
ज्येष्ठाद्यः पश्चिमामाशां वैश्वाद्यश्चापरोत्तराम् ।
वारुण्याद्यो हन्ति सौम्यां पौष्णाद्यः शूलिनो दिशम् ॥ इति ॥१॥

अथ मध्यदेशप्रविभागमाह—

भद्रारिमेदमाण्डव्यसाल्वनीपोज्जिहानसंख्याताः ।
मरुवत्सघोषयामुनसारस्वतमत्स्यमाध्यमिकाः ॥२॥
माथुरकोपज्योतिषधर्मारण्यानि शूरसेनाश्च ।
गौरग्रीवोद्देहिकपाण्डुगुडाश्वत्थपाञ्चालाः ॥३॥
साकेतकङ्कुरुकालकोटिकुकुराश्च पारियात्रनगः ।
औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम् ॥४॥

एते देशा मध्यदेशे प्रधानाः परिगणितास्तत्रैव कृत्तिकादिनक्षत्रत्रितयम्। तद्यथा देशास्तेषु च जनपदाः। भद्राः। अरिमेदाः। माण्डव्याः। साल्वाः। नीपाः। उज्जिहानाः। संख्याताः। मरुभूः। वत्साः। घोषो देशविशेषः। यामुनाः। सारस्वताः। मत्स्याः। माध्यमिकाः॥

माथुरकाः। उपज्योतिषाः। धर्मारण्यं पुण्यक्षेत्रम्। शूरसेनाः। गौरग्रीवाः। उद्देहिकाः। पाण्डुगुडाः। अश्वत्थाः। पाञ्चालाः॥

साकेतदेशः। कङ्काः। कुरवः। कालकोटिः। कुकुराश्च। पारियात्रो नगः पर्वतः। औदुम्बराः। कापिष्ठलाः। गजाह्वयो हस्तिनापुरमित्येवं प्रकारा मध्यमिदम्। मध्यदेशविभाग इत्यर्थः। तथा च भगवान् पराशरः—

चत्वारिंशोत्तरं योजनसहस्रं जम्बूद्वीपस्तत्र पूर्वादापश्चिमार्णवमवगाढाः षण्महागिरयः। हिमवान् हेमकूटो निषधो नीलः श्वेतः शृङ्गवांश्च। शतं सहस्राणामितरेषां षष्टिसहस्राणि काञ्चनमयानां गिरीणां चत्वारिंशन्महानद्यश्चत्वार उदधयः। कुनदीनां षष्टिसहस्राणि या महार्णवमनुप्रविशन्ति। एकनवती राज्यानामेकोनशतं कुराज्यानां दश जाङ्गलानि मरवोऽष्टावशीतिः[1] कच्छास्तावन्त एव द्वीपाः। पञ्च जनपदसहस्राणि। तत्र कृत्तिकादीनि त्रीणि मध्यदेशेऽस्मिन् वर्षे भवन्त्यार्द्रादीनि त्रीणि त्रीण्युक्तवर्जं क्रमात् पूर्वादिष्वष्टासु दिक्षु। दिङ्नक्षत्रेषूपसृष्टेषु दिग्जनपदानामेवोपतापो भवति विशेषतस्तु शूरसेनमगधकलिङ्गावन्तिसौवीरसैन्धवहाररभूतिमन्दकुणिन्दाधिपतीनाम्। अतः परं दिग्जनपदान् व्याख्यास्यामः।

अथ मध्यदेशे आर्यावर्त इति य आख्यायते तत्र जनपदाः--शूरसेनोद्देहिकपाण्डुगुडाश्वत्थनीपकाञ्चनकौरवोत्तमज्योतिषभद्रारिमेदमाध्यमिकसाल्वसाकेतमत्स्यकापिष्ठलचक्रदौलेपमाण्डव्यपाण्डुनगरगौरग्रीवपारियात्रिककुकुरराज्यौदुम्बरयामुनगजाह्वयोज्जिहानकालकोटिमाथुरोत्तरदक्षिणपाञ्चालकुरुक्षेत्रधर्मारण्यसारस्वताः-॥२-४॥

अथ पूर्वस्यां दिशि देशान् जनपदांश्चाह—

अथ पूर्वस्यामञ्जनवृषभध्वजपद्ममाल्यवद्गिरयः।
व्याघ्रमुखसुह्मकर्वटचान्द्रपुराः शूर्पकर्णाश्च ॥५॥
खसमगधशिबिरगिरिमिथिलसमतटोड्राश्ववदनदन्तुरकाः।
प्राग्ज्योतिषलौहित्यक्षीरोदसमुद्रपुरुषादाः ॥६॥
उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः।
एकपदताम्रलिप्तककोशलका वर्धमानाश्च ॥७॥

अथानन्तरं पूर्वस्यां दिशि देशप्रविभागः। तद्यथा—अञ्जनम्। वृषभध्वजः। पद्मम्। माल्यवान्। एते सर्वे एव गिरयः पर्वताः। तथा व्याघ्रमुखा जनाः। सुह्माः। कर्वटाः। चन्द्रपुरं पत्तनं तत्र भवाश्चान्द्रपुराः। शूर्पकर्णा जनाः॥

---

१. ष्टाविंशतिरिति अ० क० पु० पाठः।

खसाः। मगधाख्यो देशः। शिबिरो गिरिः पर्वतः। मिथिलाख्यो देशः। समतटो देशः। उड्रा जनाः। अश्ववदनाः। दन्तुरकाः। प्राग्ज्योतिषः। लौहित्याख्यो नदः। क्षीरोदसमुद्रः। पुरुषादाः पुरुषभक्षा जनाः॥

उदयगिरिः पर्वतः। भद्रा जनाः। गौडकाः। पौण्ड्रा जनाः। उत्कलाः। काशयः। मेकलाः। अम्बष्ठाः। एकपदाः। ताम्रलिप्तकाः। कोशलकाः। वर्धमानाश्चेति। एते आर्द्रादिके नक्षत्रत्रये देशाः। तथा च पराशरः—

अथ पूर्वस्यां माल्यवच्छिबिराञ्जनपद्मवृषभध्वजोदयशिखरिदन्तुरकाः काशिकोशलमिथिलमेकलोत्कलपुण्ड्रकर्वटसमतटोड्रगौडकभद्रद्रविडसुह्मताम्रलिप्तप्राग्ज्योतिषवर्द्धमानवाजिमुखाम्बष्ठपुरुषादकर्णिकोष्ठाधिश्रोत्रव्याघ्रमुखलौहित्यार्णवक्षीरोदार्णवमीनाशनकिरातसौवीरमहीधराविवसनैकपादोदयानुवासिनश्चेति॥५-७॥

अथाग्नेय्यां दिशि देशान् जनपदांश्चाह—

आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः।
शौलिकविदर्भवत्सान्ध्रचेदिकाश्चोर्ध्वकण्ठाश्च॥८॥
वृषनालिकेरचर्मद्वीपा विन्ध्यान्तवासिनस्त्रिपुरी।
श्मश्रुधरहेमकुडचव्यालग्रीवा महाग्रीवाः॥९॥
किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णाः।
सह नग्नपर्णशबरैराश्लेषाद्ये त्रिके देशाः॥१०॥

आग्नेय्यां पूर्वदक्षिणस्यां दिशि देशप्रविभागः। तद्यथा—कोशला जनाः। कलिङ्गाः। वङ्गाः। उपवङ्गाः। जठराङ्गाः। शूलिकाः। विदर्भाः। वत्साः। अन्ध्राः। चेदिकाश्च। ऊर्ध्वकण्ठाश्च॥

वृषः वृषस्थानम्। नालिकेरः। चर्मद्वीपः। विन्ध्यान्तवासिनः। विन्ध्यपर्वते ये निवसन्ति। त्रिपुरी नगरी। श्मश्रुधरा जनाः। हेमकुडचं स्थानम्। व्यालग्रीवा जनाः। महाग्रीवाः॥

किष्किन्धो देशः। कण्टकस्थलम्। निषादराष्ट्रम्। पुरिकाः। दाशार्णाः। नग्नशबराः। पर्णशबराः। एते प्रागुक्ताः सह नग्नपर्णशबरैः। एते देशा आश्लेषाद्ये नक्षत्रत्रिके ज्ञेयाः। तथा च पराशरः—

अथ प्राग्दक्षिणस्यां विन्ध्यान्तवासिनश्चेदिवत्सदशार्णाङ्गवङ्गोपवङ्गकलिङ्गजठरपुण्ड्रशूलिकविदर्भनग्नपर्णशबरविन्ध्यक्षेत्रपुरपुरिककण्टकस्थलवृषद्वीपकौश-

लौध्विककाम्बोजवर्मलूतकाककाचहेमकुडचव्यालग्रीवमहाग्रीवश्मश्रुधरनालिकेरद्वीप-किष्किन्धाधिवासिनः ॥८-१०॥

अथ दक्षिणस्यां दिशि देशजनपदप्रविभागमाह—

अथ दक्षिणेन लङ्काकालाजिनसौरिकोर्णतालिकटाः ।
गिरिनगरमलयदर्दुरमहेन्द्रमालिन्द्यभरुकच्छाः ॥११॥
कङ्कटकङ्कणवनवासिशिबिकफणिकारकोङ्कणाभीराः ।
आकरवेणावर्तकदशपुरगोनर्दकेरलकाः ॥१२॥
कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः ।
क्रौञ्चद्वीपजटाधरकावेर्यो रिष्यमूकश्च ॥१३॥
वैदूर्यशङ्खमुक्तात्रिवारिचरधर्मपट्टनद्वीपाः ।
गणराज्यकृष्णवेल्लूरपिशिकशूर्पाद्रिकुसुमनगाः ॥१४॥
तुम्बवनकार्मणयकयाम्योदधितापसाश्रमा ऋषिकाः ।
काञ्चीमरुचीपट्टनचेर्यार्यकसिंहला ऋषभाः ॥१५॥
बलदेवपट्टनं दण्डकावनतिमिङ्गिलाशना भद्राः ।
कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः ॥१६॥

अथानन्तरं दक्षिणेन दक्षिणस्यां दिशि देशाः । तद्यथा—लङ्का । कालाजिनम् । सौरिकीर्णाः । तालिकटाः । गिरिनगरम् । मलयः पर्वतः । दर्दुरः । महेन्द्रः । मालिन्द्यः । एते पर्वताः । भरुकच्छा जनाः ॥

कङ्कटाः । कङ्कणाः । वनवासिनः । शिबिकाः । फणिकाराः । कोङ्कणाः । आभीराः । आकरः स्थानं यत्र सर्वद्रव्याणां परिच्छित्तिः क्रियते । वेणा नदी । आवर्तका जनाः । दशपुरम् । गोनर्दाः । केरलकाः ॥

कर्णाटः । महाटविः । चित्रकूटः पर्वतः । नासिक्यो देशः । कोल्लगिरिः । चोला जनपदाः । क्रौञ्चद्वीपो द्वीपविशेषः । जटाधरा जनाः । कावेरी नदी । रिष्यमूकः पर्वतः ॥

वैदूर्यशङ्खमुक्ता यत्रोत्पद्यन्ते । अत्रिः आश्रमस्थानं भगवतोऽत्रेः । वारिचरः । धर्मपट्टनम् । द्वीपाः । गणराज्यकृष्णवेल्लूरा राजानः । पिशिकाः । शूर्पाद्रिः पर्वतः । कुसुमनगः पर्वतः ॥

तुम्बवनम् । कार्मणेयकाः । याम्योदधिर्दक्षिणः समुद्रः । तापसाश्रमास्तापसानामाश्रमाः । ऋषिका जनाः । काञ्ची देशः । मरुचीपट्टनम् । चेर्यार्यकाः । सिंहलाः । ऋषभाः ।

वलदेवपट्टनम् । दण्डकावनम् । तिमिङ्गिलाशनाः । भद्राः । कच्छः । अथानन्तरम् । कुञ्जरदरी हस्तिखण्डा । सताम्रपर्णी ताम्रपर्ण्या नद्या सहिता । इत्येवं प्रकारा देशा उत्तरफल्गुन्याद्ये त्रिके विज्ञेया ज्ञातव्याः । तथा च पराशरः—

अथ दक्षिणस्यां विन्ध्यकुसुमापीडददुरमहेन्द्रशूर्पवत्समलयमालिन्द्यावन्तिसाम्ववतिदशपुरैककच्छभरुकच्छर्द्धिवनवासोपगिरिभद्रगिरिनगरदण्डकगणराज्यत्रिराजकर्कोटकञ्चनतिमिङ्गिलाहाररिष्यमूकतापसाश्रमशङ्खमुक्ताप्रवालवैदूर्याकरोद्रक्त्रात्रिवारिचरार्णवचोलककौवेरकावेरिकपाशिकधर्मपट्टनपट्टिकाशकृष्णवेल्लूरताम्रपर्णनार्मदगोनर्दचाञ्चीकपट्टनतालिकटसौरिकीर्णसहकारिवेणातटतुम्बवनकालाजिनद्वीपकर्णिकारशिविकोङ्कणचित्रकूटकर्णाटमहाटविकान्ध्रकोल्लगिरिनासिक्यकार्मणेयकावेर्वारुकवेधिनिकबलदेवपट्टनकौञ्चद्वीपसिंहलाः परमतदर्दुरमलयमरीचित्रकूठशिखरालङ्कतालङ्कारशूर्पपर्वतकुञ्जरदरीसम्भोगवतिनृणां गिरिसाराश्रमाः ॥११-१६॥

अथ नैर्ऋत्यां दिशि देशप्रविभागमाह—

नैर्ऋत्यां दिशि देशाः पल्लवकाम्बोजसिन्धुसौवीराः ।
वडवामुखारवाम्बष्ठकपिलनारीमुखानर्ताः ॥१७॥

फेणगिरियवनमार्गरकर्णप्रावेयपारशवशूद्राः ।
बर्बरकिरातखण्डक्रव्यादाभीरचञ्चूकाः ॥१८॥

हेमगिरिसिन्धुकालकरैवतकसुराष्ट्रबादरद्रविडाः ।
स्वात्याद्ये भत्रितये ज्ञेयश्च महार्णवोऽत्रैव ॥१९॥

नैर्ऋत्यां दक्षिणपश्चिमायां दिशि देशाः। तद्यथा—पल्लवाः। काम्बोजाः। सिन्धुसौवीराः। वडवामुखाः। अरवाः। अम्बष्ठाः। कपिलाः। नारीमुखाः। आनर्ताः ॥

फेणगिरिः। यवनाः। मार्गराः। कर्णप्रावेयाः। पारशवाः। शूद्राः। बर्बराः। किराताः। खण्डाः। क्रव्यादाः। आभीराः। चञ्चूकाः ॥

हेमगिरिः। सिन्धुर्नदः। कालकाः। रैवतकाः। सुराष्ट्राः। बादराः। द्रविडाः। अत्रैव नैर्ऋत्यां दिशि महार्णवो ज्ञेयो ज्ञातव्यः। एते स्वात्याद्ये भत्रितये स्वातिपूर्वके नक्षत्रत्रितये ज्ञेयाः। तथा च पराशरः—

अथ प्रत्यग्दक्षिणस्यां सुराष्ट्रमहाराष्ट्रसिन्धुसौवीरशूद्राभीरद्रविडकनक-

खण्डसिन्धुकालकफेणगिरिरैवतकनर्तकबाह्लीकयवनपह्लवमार्गरारवरथकाराम्बष्ठ-कालाजकर्णप्रवरगिरिवासिनोऽतः परं महार्णवोर्वकोपजोऽग्निर्वडवामुख इति ॥१७-१९॥

अथ पश्चिमायां दिशि देशान् जनपदांश्चाह—

अपरस्यां मणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः ।
अपरान्तकशान्तिकहैहयप्रशस्ताद्रिवोक्काणाः ॥२०॥
पञ्चनदरमठपारततारक्षितिजृङ्गवैश्यकनकशकाः ।
निर्मर्यादा म्लेच्छा ये पश्चिमदिक्स्थितास्ते च ॥२१॥

अपरस्यां पश्चिमायां दिशि देशाः। तद्यथा। मणिमान् पर्वतः। मेघवान्। वनौघः। क्षुरार्पणः। अस्तगिरिः। अपरान्तकाः। शान्तिकाः। हैहयाः। प्रशस्ताद्रिः। वोक्काणाः॥

पञ्चनदः। रमठः। पारतः। तारक्षितिः। जृङ्गाः। वैश्याः। कनकाः। शकाः। अन्ये च ये म्लेच्छा निर्मर्यादा मर्यादारहिताः। पश्चिमदिक्स्थिताः पश्चिमायां दिशि निवासिनस्ते सर्वेऽत्रैव ज्येष्ठाद्ये नक्षत्रत्रितये ज्ञेयाः। तथा च पराशरः—

अथ पश्चिमायां दिशि मणिमान् क्षुरार्पणो मेघवान् वनौघः। चक्रवदस्त-गिरिप्रशस्तमण्डितारः। पञ्चनदकाशिब्रह्मवसतितारक्षितिपारतशान्तिकशिबिर-मठजृङ्गवायव्यगुडवासिजहैहयसत्कङ्गताजिकहूणपार्श्ववैतककवोक्काणाः। अन्ये च गिरिवनवासिनस्त्यक्तधर्मदण्डमर्यादा म्लेच्छजातयः॥२०-२१॥

अथ वायव्यां दिशि देशान् जनपदानाह—

दिशि पश्चिमोत्तरस्यां माण्डव्यतुषारतालहलमद्राः ।
अश्मककुलूतहलडाः स्त्रीराज्यनृसिंहवनखस्थाः ॥२२॥
वेणुमती फल्गुलुका गुलुहा मरुकुच्चचर्मरङ्गाख्याः ।
एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च ॥२३॥

पश्चिमोत्तरस्यां वायव्यां दिशि देशाः। तद्यथा—माण्डव्याः। तुषाराः। तालाः। हलाः। मद्राः। अश्मकाः। कुलूतदेशाः। हलडाः। स्त्रीराज्यम्। नृसिंह-वनम्। खस्थाः॥

वेणुमती नदी। फल्गुलुकाः। गुलुहाः। मरुकुच्चाः। चर्मरङ्गाख्याः। एक-विलोचनाः। शूलिकाः। दीर्घग्रीवाः। दीर्घास्याः। दीर्घकेशाः। एते उत्तराषाढाद्ये त्रिके ज्ञेया देशाः। तथा च पराशरः—

अथ पश्चिमोत्तरस्यां दिशि गिरिमतिवेणुमतिरलमतिफल्गुलुकमाण्डव्यैकनेत्रमरुकुच्चतुषारतालमल्लहलडहलातवर्दिलीनविलीनदीर्घकेशग्रीवान्याङ्गशरगविषवेषशूलिकगुलुहाः। परमतः स्त्रीराज्यमिति ॥२२-२३॥

अथोत्तरस्यां दिशि देशप्रविभागमाह--

उत्तरतः कैलासो हिमवान् वसुमान् गिरिर्धनुष्मांश्च ।
क्रौञ्चो मेरुः कुरवस्तथोत्तराः क्षुद्रमीनाश्च ॥२४॥
कैकयवसातियामुनभोगप्रस्थार्जुनायनाग्नीध्राः ।
आदर्शान्तर्द्वीपित्रिगर्ततुरगाननाः श्वमुखाः ॥२५॥
केशधरचिपिटनासिकदासेरकवाटधानशरधानाः ।
तक्षशिलपुष्कलावतकैलावतकण्ठधानाश्च ॥२६॥
अम्बरमद्रकमालवपौरवकच्छारदण्डपिङ्गलकाः ।
माणहलहूणकोहलशीतकमाण्डव्यभूतपुराः ॥२७॥
गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च ।
यौधेयदासमेयाः श्यामाकाः क्षेमधूर्ताश्च ॥२८॥

उत्तरतः उत्तरस्यां दिशि देशाः। तद्यथा—कैलासः पर्वतः। हिमवान्। वसुमान् गिरिः। धनुष्मांश्च गिरिरेव। क्रौञ्चः। मेरुः। कुरवस्तथोत्तरा उत्तरकुरवः। क्षुद्रमीनाः॥

कैकयाः। वसातयः। यामुनाः। भोगप्रस्थाः। अर्जुनायनाः। आग्नीध्राः। आदर्शाः। अन्तर्द्वीपिनः। त्रिगर्ताः। तुरगाननाः। श्वमुखाः॥

केशधराः। चिपिटनासिकाः। दासेरकाः। वाटधानाः। शरधानाः। तक्षशिलाः शिलाः। पुष्कलावताः। कैलावताः। कण्ठधानाः॥

अम्बरावताः। मद्रकाः। मालवाः। पौरवाः। कच्छाराः। दण्डपिङ्गलकाः। माणहलाः। हूणाः। कोहलाः। शीतकाः। माण्डव्याः। भूतपुराः॥

गान्धाराः। यशोवति नगरी। हेमतालाः। राजन्याः। खचराः। गव्याः। यौधेयाः। दासमेयाः। श्यामाकाः। क्षेमधूर्ताः। एते शतभिषगाद्ये नक्षत्रत्रये देशाः। तथा च पराशरः—

अथोत्तरस्यां हिमवान् क्रौञ्चो मधुमान् कैलासो वसुमानुत्तरोत्तरस्यां मद्रपौरवयौधेयमालवशूरसेनराजन्यार्जुनायनत्रैगर्तकैकयक्षुद्रमाचेलूकमत्स्यवसातिदर्भफलाफलप्रस्तलक्षेमधूर्ताशाकलदाशधानहव्यमुरदण्डगव्यशरधानदासेरकवाटधानान्तर्द्वीपिगान्धारववन्धिषुवास्तुतक्षशिलालवणवतिपुष्कलावतियशोवतिमणिवतिश्यामा-

कखचरकोहलकनगरशरभूतपुरकैरातकादर्शकान्तारदण्डपिङ्गलमाण्डव्ययामुनेयमाण-हलहूणहेमतालाश्वमुखा हिमवद्वसुमत्कैलासक्रौञ्चात् परमभिजना इति ॥२४-२८॥

अथैशान्यां प्रविभागमाह —

ऐशान्यां मेरुकनष्टराज्यपशुपालकीरकाश्मीराः ।
अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः ॥२९॥

ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौणिन्दाः ।
भल्लाः पटोलजटासुरकुनटखसघोषकुचिकाख्याः ॥३०॥

एकचरणानुविद्धाः[1] सुवर्णभूर्वसुधनं[2] दिविष्ठाश्च ।
पौरवचीरनिवासित्रिनेत्रमुञ्जाद्रिगान्धर्वाः ॥३१॥

ऐशान्यां दिशि देशाः । तद्यथा—मेरुकः । नष्टराज्यम् । पशुपालाः । कीराः । काश्मीराः । अभिसाराः । दरदाः । तङ्गणाः । कुलूतदेशाः । सैरिन्ध्राः । वनराष्ट्राः ॥

ब्रह्मपुरम् । दार्वाः । डामराः । वनराज्यम् । किराताः । चीनाः । कौणिन्दाः । भल्लाः । पटोलदेशाः । जटासुराः । कुनटाः । खसाः । घोषाः । कुचिकाख्याः ॥

एकचरणाः । [3]अनुविद्धाः । सुवर्णभूः । [4]वसुधनम् । दिविष्ठाश्च । पौरवाः । चीरनिवासिनः । त्रिनेत्राः । मुञ्जाद्रिः । गान्धर्वाः । एते रेवत्याद्ये त्रिके देशाः । तथा च पराशरः—

अथ प्रागुत्तरस्यां कौलूतब्रह्मपुरकुणिन्ददिवादिनपारतनष्टराज्यवनराष्ट्र-वैमकैणभल्लसिंहपुरचामरतङ्गणसार्यकपर्वतककाश्मीरदरददर्वाभिमुरजटासुरपटोल-सैरिन्ध्रकुचिन्तनकिरातपशुपालचीनसुवर्णभूमिदेवस्थलदेवोद्यानानि ॥

एतदाचार्येण समाससंहितायां स्पष्टतरमुक्तम् । तथा च—

भत्रयमाग्नेयाद्यं मध्यं प्राक्प्रभृति च प्रदक्षिणतः ।
कथयामि प्रविभागं रौद्रात् प्रागादिदेशानाम् ॥
मध्यमुदक्पाञ्चाला वङ्गा यमुनान्तरं कुरुक्षेत्रम् ।
उदगपि च पारियात्रात् परमथवाऽयोग्यमत्स्याश्च ॥

---

१. विश्वा इति अ० क० पु० पाठः ।
२. वसुवनमिति अ० क० पु० पाठः ।
३. अनुविश्व इति अ० क० पु० पाठः ।
४. वसुवनमिति अ० क० पु० पाठः ।

सारस्वतयामुनवत्सघोषसंख्याननीपमाण्डव्याः ।
भद्रारिमोदनैमिषसाल्वोपज्योतिषाश्वत्थाः ॥
औदुम्बरोऽथ कुकुरोज्जिहानगजसाह्वकङ्कपाण्डुगुडाः ।
माध्यमिकोद्देहिककालकोटिकापिष्ठलाश्चेति ॥
मध्येऽयं प्रविभागः शेषक्षर्णां तथादिशेद्देशान् ।
प्रख्यातदेशमध्यानन्यांश्चैवाभिधास्यामि ॥
आर्द्रादिकाशिकोशलमिथिलोत्कलवर्धमानपाण्डचोड्राः ।
लौहित्यमगधसमतटमेककलाम्बष्ठताम्रलिप्ताख्याः ॥
आश्लेषाद्ये त्रिपुरी निषादराष्ट्राणि चेदिकदशार्णाः ।
शूलिकविन्ध्यान्तःस्था वत्सान्ध्रविदर्भकालिङ्गाः ॥
आर्यम्णाद्ये चैदिककोङ्कणवनवासिकोल्लगिरिमलयाः ।
उज्जयिनीभरुकच्छा दिशा च याम्यार्णवो यावत् ॥
स्वात्याद्ये सिन्धुसौवीरकापिलवनितास्यमार्गरानर्ताः ।
बर्बरयवनसुराष्ट्रककाम्बोजद्रविडरैवतकाः ॥
ज्येष्ठादितोऽपरान्तकशकहैहयजङ्घपाञ्चनदकतकाः ।
निर्मर्यादा म्लेच्छाः शान्तिकवोक्काणवैश्याश्च ॥
विश्वेश्वरादिशूलिकतालतुषारैकनेत्रमाण्डव्याः ।
स्त्रीराज्यचर्मरङ्गाश्मकलडहारुहकफाल्गुलुकाः ॥
शतभिषगाद्ये केकयगान्धारादर्शयामुनाग्नीध्राः ।
दासेयचिपिटनासार्जुनायना दण्डपिङ्गलकाः ॥
पौष्णाद्ये काश्मीरत्रिगर्तदरदाभिसारचीनखसाः ।
तङ्गणकिरातकीरा ब्रह्मपुरजटासुराश्चेति ॥ इति॥२९-३१॥

कृत्तिकाद्यैः प्रयोजनमाह—

वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः ।
पाञ्चालो मागधिकः कालिङ्गश्च क्षयं यान्ति ॥३२॥
आवन्तोऽथानर्तो मृत्युं चायाति सिन्धुसौवीरः ।
राजा च हारहौरो मद्रेशोऽन्यश्च कौणिन्दः ॥३३॥

आग्नेयाद्यैः कृत्तिकाद्यैर्वर्गैः । क्रूरग्रहपीडितैः । क्रूरैरादित्याङ्गारकशनैश्चरैः पीडितैः । क्रमेण परिपाट्या । एते नृपा राजानः क्षयं नाशं यान्ति । तद्यथा— कृत्तिकाद्ये पाञ्चालः । आर्द्राद्ये मागधिकः । आश्लेषाद्ये कालिङ्गश्च । आर्यम्णाद्ये आवन्तः । स्वात्याद्ये आनर्तः । अथशब्द आनन्तर्ये । ज्येष्ठाद्ये सिन्धुसौवीरो मृत्युं मरणं चायाति

प्राप्नोति। उत्तराषाढाद्ये राजा हारहौरः। शतभिषगाद्ये मद्रेशो मद्राधिपः। रेवत्याद्ये अन्यश्चापरः कौणिन्द इति ॥३३॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ नक्षत्रकूर्मो नाम चतुर्दशोऽध्यायः।१४॥

अथ नक्षत्रव्यूहो व्याख्यातें

कस्मिन्नक्षत्रे के पदार्था आश्रिता इत्येतद्यत्र निरूप्यते स नक्षत्रव्यूहः। तत्रादावेव कृत्तिकायामाह—

आग्नेये सितकुसुमाहिताग्निमन्त्रज्ञसूत्रभाष्यज्ञाः।
आकरिकनापितद्विजघटकारपुरोहिताब्दज्ञाः ॥१॥

सितकुसुमानि श्वेतपुष्पाणि। आहिताग्निराहित आरोपितोऽग्निर्येन, अग्नित्रयोपचारकाः। मन्त्रज्ञा मन्त्रविदः। एवं सूत्रज्ञा यज्ञशास्त्रविदः। भाष्यज्ञा वैयाकरणाः। आकरः अर्थोत्पत्तिस्थानम्, तत्र नियुक्त आकरिकः। नापितः श्मश्रुकर्मकरः। द्विजो ब्राह्मणः। घटकारः कुम्भकारः। पुरोहितः पुरोधाः। अब्दज्ञो ज्यौतिषिकः। एते आग्नेये कृत्तिकायां समाश्रिताः ॥१॥

अथ रोहिण्यामाह—

रोहिण्यां सुव्रतपण्यभूपधनियोगयुक्तशाकटिकाः।
गोवृषजलचरकर्षकशिलोच्चयैश्वर्यसम्पन्नाः ॥२॥

सुव्रताः शोभनव्रताः। पण्याः पण्यवृत्तयः। भूपा राजानः। धनिनः। योगयुक्ता योगरताः। शाकटिकाः शकटजीविनः। गावः। वृषा दान्ताः। जलचराः प्राणिनः। कर्षकाः कृषिकराः। शिलोच्चयाः पर्वताः। ऐश्वर्यसम्पन्ना ऐश्वर्ययुक्ताः। एते रोहिण्यामाश्रिताः ॥२॥

अथ मृगशिरस्या

मृगशिरसि सुरभिवस्त्राब्जकुसुमफलरत्नवनचरविहङ्गाः।
मृगसोमपोथिगान्धर्वकामुका लेखहाराश्च ॥३॥

सुरभीणि सुगन्धद्रव्याणि। वस्त्राण्यम्बराणि। अब्जं यत्किञ्चिज्जलोद्भवम्। कुसुमानि पुष्पाणि। फलानि प्रसिद्धान्याम्रादीनि। रत्नानीन्द्रनीलप्रभृतीनि। वनचरा वनवासिनः। विहङ्गाः पक्षिणः। मृगा अरण्यप्राणिनः। सोमपीथयः सोमपाः। गान्धर्वा गेयज्ञाः। कामुकाः कामिनः। लेखहारा लेखवाहाः। एते सर्व एव मृगशिरसि ॥३॥

अथार्द्रायामाह—

रौद्रे वधबन्धानृतपरदारस्तेयशाठ्यभेदरताः ।
तुषधान्यतीक्ष्णमन्त्राभिचारवेतालकर्मज्ञाः ॥४॥

वधरता घातकाः । बन्धरताः प्राणिनां ये बन्धं कुर्वन्ति । अनृतरता असत्यभाषिणः । परदाररताः परस्त्रीषु सक्ताः । स्तेयरताश्चौराः । शठाः परकार्यविमुखाः । तथा चोक्तम्—

मनसा वचसा यश्च दृश्यतेऽकार्यतत्परः ।
कर्मणा विपरीतश्च स शठः सद्भिरिष्यते ॥

तस्य भावः शाठ्यम् । तत्र ये रताः । एकीभूतानां पदार्थानां पृथक्करणं भेदाः । तत्र ये रताः । तुषधान्यं शालयः । तीक्ष्णाः क्रूराः । मन्त्रज्ञा मन्त्रविदः । अभिचारज्ञा वशीकरणादिकर्मविदः । वेतालकर्मज्ञा वेतालोत्थापनविद्यास्वभिज्ञाः । एते सर्वे रौद्रे आर्द्रायाम् ॥४॥

अथ पुनर्वसावाह—

आदित्ये सत्यौदार्यशौचकुलरूपधीयशोऽर्थयुताः ।
उत्तमधान्यं वणिजः सेवाभिरताः सशिल्पिजनाः ॥५॥

सत्ययुताः सत्यभाषिणः । औदार्ययुता दानशीलाः । शौचयुताः शुद्धाः परधनादिष्वलुब्धाः । कुलयुताः कुलीनाः । रूपयुताः सुरूपाः । धीयुता बुद्धिमन्तः । यशोयुता यशस्विनः । अर्थयुता धनिनः । उत्तमधान्यं कलमशाल्यादि । वणिजः किराटाः[1] । सेवाभिरताः सेवकाः । ते च सशिल्पिजनाः शिल्पिजनैः कुम्भकारप्रभृतिभिः सहिताः । एते सर्व एवाऽऽदित्ये पुनर्वसौ ॥५॥

अथ पुष्ये आह—

पुष्ये यवगोधूमाः शालीक्षुवनानि मन्त्रिणो भूपाः ।
सलिलोपजीविनः साधवश्च यज्ञेष्टिसक्ताश्च ॥६॥

यवाः । गोधूमाः । शालयो धान्यानि । इक्षवः । वनान्यरण्यानि । मन्त्रिणः सचिवाः । भूपा राजानः । सलिलोपजीविनः सलिलं जलं तेनोपजीवन्ति तेनैवार्जनं ये कुर्वन्ति धीवरप्रायाः । साधवश्च सज्जनाः । यज्ञसक्ता यागेष्वनुरक्ताः । इष्टयः पुत्रकाम्यादयः, तासु च ये सक्ता निरताः । एते सर्व एव पुष्ये ॥६॥

---

१. द्रष्टव्याऽस्य ग्रन्थस्य १३४ पृष्ठे १ टिप्पणी।

अथाऽऽश्लेषायामाह—

अहिदेवे कृत्रिमकन्दमूलफलकीटपन्नगविषाणि ।
परधनहरणाभिरतास्तुषधान्यं सर्वभिषजश्च ॥७॥

कृत्रिमाणि द्रव्याणि यानि युक्त्या क्रियन्ते। यन्मूलमेव बीजं स कन्दः। केचिदभिनवाङ्कुरमिच्छन्ति। मूलानि प्रसिद्धानि। फलानि च प्रसिद्धान्येव। कीटाः कृमिजातयः। पन्नगाः सर्पाः। विषं प्रसिद्धम्। परधनहरणे ये अभिरताः सक्ताः। तुषधान्यं शाल्यः। सर्वभिषजो निःशेषाः शल्यहर्तृशालाकिकाः कायचिकित्सकादयः। एते सर्व एवाहिदेवे आश्लेषायाम् ॥७॥

अथ मघायामाह—

पित्र्ये धनधान्याढ्याः कोष्ठागाराणि पर्वताश्रयिणः ।
पितृभक्तवणिक्शूराः क्रव्यादाः स्त्रीद्विषो मनुजाः ॥८॥

धनधान्याढ्या वित्तशालिबहुलाः। कोष्ठागाराणि विपुलग्रामाः। पर्वताश्रयिणः पर्वतनिवासिनः। पितृभक्ताः पितॄणां पूजाभिरताः। वणिजः क्रयविक्रयनिरताः। शूराः संग्रामप्रियाः। क्रव्यादा मांसाशिनः, पक्वमपक्वं वा मांसमश्नन्ति। स्त्रीणां द्विषो ये मनुजा मनुष्याः। एते सर्व एव पित्र्ये मघायाम् ॥८॥

अथ पूर्वफल्गुन्यामाह—

प्राक्फल्गुनीषु नटयुवतिसुभगगान्धर्वशिल्पिपण्यानि ।
कर्पासलवणमक्षिकतैलानि कुमारकाश्चापि ॥९॥

नटा ये नृत्यन्ति। युवतयः स्त्रियः। सुभगाः सर्वजनवल्लभाः। गान्धर्वा गेयप्रवीणाः। शिल्पिनश्चित्रकारप्रभृतयः। पण्यं यत्किञ्चिद्विक्रयद्रव्यं क्रेयं वा। कर्पासः प्रसिद्धः। लवणं सैन्धवम्। माक्षिकं क्षौद्रम्। तैलं तिलतैलम्। एतानि। तथा कुमारका बालकाः। एते सर्व एव प्राक्फल्गुनीषु पूर्वफल्गुन्याम् ॥९॥

अथोत्तरफल्गुन्यामाह—

आर्यम्णे मार्दवशौचविनयपाखण्डिदानशास्त्ररताः ।
शोभनधान्यमहाधनकर्मानुरताः समनुजेन्द्राः ॥१०॥

मार्दवरता मृदुभावसमेताः। शौचरताः शुद्धाः परधनादिष्वलुब्धाः। विनयरता नीतिज्ञाः। पाखण्डिनो वेदबाह्यास्तेषु ये रताः सक्ताः। दानरता दानसक्ताः। शास्त्ररताः पठनशीलाः। शोभनं धान्यं कलमशाल्यादि। महाधना अतिधनिनः। कर्मानुरताः कर्मस्वतिसक्ताः। ते च समनुजेन्द्रा मनुजेन्द्रैर्नृपैः सहिताः। एते सर्व एवाऽऽर्यम्णे उत्तरफल्गुन्याम् ॥१०॥

अथ हस्त आह--

हस्ते तस्करकुञ्जररथिकमहामात्रशिल्पिपण्यानि ।
तुषधान्यं श्रुतयुक्ता वणिजस्तेजोयुताश्चात्र ॥११॥

तस्कराश्चौराः । कुञ्जरा हस्तिनः । रथिका रथेन गन्त्र्यादिना ये गच्छन्ति । महामात्रा हस्तिसाधनपतयः । शिल्पिनश्चित्रकारप्रभृतयः । पण्यं यत्किञ्चिद्विक्रयद्रव्यम् । तुषधान्यं शालयः । श्रुतयुक्ताः श्रुताभिनिरताः । वणिजः [1]क्रयविक्रयनिरताः । तेजोयुतास्तेजस्विनः । अत्रास्मिन् हस्ते सर्व एवैते ॥११॥

अथ चित्रायामाह--

त्वाष्ट्रे भूषणमणिरागलेख्यगान्धर्वगन्धयुक्तिज्ञाः ।
गणितपटुतन्तुवायाः शालाक्या राजधान्यानि ॥१२॥

भूषणज्ञा अलङ्कारादिषु कुशलाः । मणिज्ञा मणिलक्षणज्ञाः । रागज्ञा यैर्वस्त्रादिषु रागः क्रियते । लेख्यज्ञा लिपिवेत्तारः । गान्धर्वज्ञा गीतविदः । गन्धयुक्तिज्ञा बहुभिर्द्रव्यैर्मिश्रितैर्विशिष्टतरं सुगन्धद्रव्यं ये उत्पादयन्ति । गणितपटवो गणितदक्षाः । तन्तुवायाः कौलिकाः । शालाक्या अक्षिरोगचिकित्सकाः । राजधान्यं राजोपयोगि यद्धान्यं षष्टिकादि । एतत्सर्वं त्वाष्ट्रे चित्रायाम् ॥१२॥

अथ स्वातावाह--

स्वातौ खगमृगतुरगा वणिजो धान्यानि वातबहुलानि ।
अस्थिरसौहृदलघुसत्त्वतापसाः [2]पण्यकुशलाश्च ॥१३॥

खगाः पक्षिणः । मृगा अरण्यप्राणिनः । तुरगा अश्वाः । वणिजः क्रयविक्रयनिरताः । धान्यानि शालयः । वातबहुलानि चणकप्रभृतीनि । अस्थिरसौहृदः अस्थिरमित्राणि । लघुसत्त्वा अल्पसत्त्वाः । तापसास्तपोनिरताः । पण्यकुशलाः पण्यप्रवीणाः । केचिद्वन्यकुशला इति पठन्ति । वने भवा वन्यास्तेषु कुशलाः । एते सर्व एव स्वातौ ॥१३॥

अथ विशाखायामाह--

इन्द्राग्निदैवते रक्तपुष्पफलशाखिनः सतिलमुद्गाः ।
कर्पासमाषचणकाः पुरन्दरहुताशभक्ताश्च ॥१४॥

रक्तपुष्पा लोहितपुष्पा रक्तफलाश्च ये शाखिनो वृक्षास्ते च सतिलमुद्गाः तिलैर्मुद्गैश्च सहिताः । कर्पासाः प्रसिद्धाः । माषाश्चणकाश्च प्रसिद्धा एव । ये पुरन्दर-

---

१. क्रयविक्रयिण इति अ० क० पु० पाठः ।
२. वन्यकुशलाश्चेति पाठान्तरम् ।

स्येन्द्रस्य हुताशस्याग्नेर्भक्ता अनुरक्ताः। एते सर्व एवेन्द्राग्निदैवते विशाखायाम् ॥१४॥

अथाऽनुराधायामाह--

मैत्रे शौर्यसमेता गणनायकसाधुगोष्ठियानरताः ।
ये साधवश्च लोके सर्वं च शरत्समुत्पन्नम् ॥१५॥

शौर्यसमेता बलसंयुक्ताः। गणनायका गणप्रधानाः। साधूनां ये रताः। गोष्ठिरता नर्मसक्ताः। यानरता वाहनसक्ता गमनसक्ता वा। ये च लोके जनपदे साधवः सज्जनाः। शरत्समुत्पन्नं शारदं सर्वमशेषं यत्किञ्चिद्धान्यादि। एतन्मैत्रेऽनुराधायाम् ॥१५॥

अथ ज्येष्ठायामाह--

पौरन्दरेऽतिशूराः कुलवित्तयशोऽन्विताः परस्वहृतः ।
विजिगीषवो नरेन्द्राः सेनानां चापि नेतारः ॥१६॥

अतिशूरा अतिसंग्रामधीराः। कुलेनाभिजनेन वित्तेन धनेन यशसा कीर्त्या च अन्विताः संयुक्ताः। परस्वहृतः परधनहन्तारः। ये च नरेन्द्रा राजानो विजिगीषवः परान् जेतुमिच्छवः। ये च सेनानां नेतारः सेनापतयः। एते सर्व एव पौरन्दरे ज्येष्ठायाम् ॥१६॥

अथ मूल आह--.

मूले भेषजभिषजो गणमुख्याः कुसुममूलफलवार्ताः ।
बीजान्यतिधनयुक्ताः फलमूलैर्ये च वर्तन्ते ॥१७॥

भेषजमौषधम्। भिषजो वैद्याः। गणमुख्याः समूहप्रधानाः। कुसुममूलफलवार्ताः। कुसुमानि पुष्पाणि, मूलानि फलानि च वार्ता वृत्तिर्येषाम्। बीजानि सर्वाणि यान्युप्यन्ते। ये चातिधनयुक्ताः प्रभूतवित्तसमन्विताः। ये च फलमूलैर्वर्तन्ते जीवन्ति। ते सर्व एव मूले ॥१७॥

अथ पूर्वाषाढायामाह--

आप्ये मृदवो जलमार्गगामिनः सत्यशौचधनयुक्ताः ।
सेतुकरवारिजीवकफलकुसुमान्यम्बुजातानि ॥१८॥

मृदवो मार्दवयुक्ताः। जलमार्गगामिनो जलमार्गेण ये गच्छन्ति ते जलमार्गगामिनो धीवरा जलप्राणिनश्च। सत्ययुक्ताः सत्यभाषिणः। शौचयुक्ताः परधनादिष्वलुब्धाः। धनयुक्ता ईश्वराः। सेतुकराः सेतुं ये कुर्वन्ति। वारिजीवका वारिणा जलेन ये जीवन्ति तेनैवार्थार्जनं कुर्वन्ति। यानि चाम्बुजातानि जलसम्भूतानि फलानि कुसुमानि च। ते सर्व एवाऽप्ये पूर्वाषाढायाम् ॥१८॥

अथोत्तराषाढायामाह—

विश्वेश्वरे महामात्रमल्लकरितुरगदेवतासक्ताः ।
स्थावरयोधा भोगान्विताश्च ये तेजसा युक्ताः ॥१९॥

महामात्रा हस्तिसाधनपतयः। मल्ला बाहुयुद्धज्ञाः। करिणो हस्तिनः। तुरगा अश्वाः। देवतासक्ता देवताभक्ताः। स्थावरा वृक्षादयः। योधा युद्धकुशलाः। भोगान्विता भोगसमेताः। ये च जनास्तेजसा युक्तास्तेज़स्विनः। ते सर्व एव विश्वेश्वर उत्तराषाढायाम् ॥१९॥

अथ श्रवण आह—

श्रवणे मायापटवो नित्योद्युक्ताश्च कर्मसु समर्थाः ।
उत्साहिनः सधर्मा भागवताः सत्यवचनाश्च ॥२०॥

मायापटवो मायाविनः प्रपञ्चकुशलाः। नित्योद्युक्ताः सर्वकालं सोद्यमाः कर्मसु व्यापारेषु समर्थाः सक्ताः। उत्साहिनः सोत्साहाः। सधर्मा धर्मसंयुक्ताः। भागवता भगवद्भक्ताः। सत्यवचनाः सत्यभाषिणः। एते सर्व एव श्रवणे ॥२०॥

अथ धनिष्ठायामाह—

वसुभे मानोन्मुक्ताः क्लीबाचलसौहृदाः स्त्रियां द्वेष्याः ।
दानाभिरता बहुवित्तसंयुताः शमपराश्च नराः ॥२१॥

मानोन्मुक्ता मानवर्जिता निरहङ्काराः। क्लीबाः षण्ढाः। अचलसौहृदाः स्थिरमैत्राः। स्त्रियां द्वेष्याः स्त्रीष्वप्रियाः। दानाभिरता दानशीलाः। बहुवित्तसंयुताः प्रभूतधनान्विताः। ये च नरा मनुष्याः शमपरा जितेन्द्रियाः। एते सर्व एव वसुभे धनिष्ठायाम् ॥२१॥

अथ शतभिषज्याह—

वरुणेशे पाशिकमत्स्यबन्धजलजानि जलचराजीवाः ।
सौकरिकरजकशौण्डिकशाकुनिकाश्चापि वर्गेऽस्मिन् ॥२२॥

पाशिकाः। पाशा बन्धनरज्जवः। पाशैः प्राणिनो बध्नन्तीति पाशिकाः। मत्स्यबन्धो मत्स्यान् मीनान् बध्नाति यः। जलजानि जलोद्भवानि सर्वद्रव्याणि मुक्ताफलादीनि। जलचराजीवाः। जलचरैर्मत्स्यादिभिर्ये आजीवन्ति। सौकरिकाः। सूकरान् वराहान् ये बध्नन्ति। रजका वस्त्ररागकर्तारः। शौण्डिकाः पानसक्ताः। शाकुनिकाः शकुनीन् घ्नन्तीति शाकुनिकाः पक्षिघातिनः। एते सर्व एवास्मिन् वर्गे वरुणेशे शतभिषजि ॥२२॥

अथ पूर्वभद्रपदायामाह—

आजे तस्करपशुपालहिंस्रकीनाशनीचशठचेष्टाः ।
धर्मव्रतैर्विरहिता नियुद्धकुशलाश्च ये मनुजाः ॥२३॥

तस्कराश्चौराः। पशुपालाः छागादिपु रक्षकाः। हिंस्राः क्रूराः। कीनाशाः कदर्याः। नीचा अधमकर्मकराः। शठचेष्टाः शठः परकार्यविमुखस्तस्येव चेष्टा येषां ते शठचेष्टाः। धर्मव्रतैर्विरहिता धर्मविवर्जिताः। व्रतैः कृच्छ्रपराकैश्चान्द्रायणादिभिश्च वर्जिताः। ये च मनुजा मनुष्या नियुद्धकुशला बाहुयुद्धज्ञाः। एते सर्व एवाऽऽजे पूर्वभद्रपदायाम् ॥२३॥

अथोत्तरभद्रपदायामाह—

आहिर्बुध्न्ये विप्राः क्रतुदानतपोयुता महाविभवाः ।
आश्रमिणः पाखण्डा नरेश्वराः सारधान्यं च ॥२४॥

विप्रा द्विजाः। क्रतुर्यज्ञः। दानं सत्पात्रेप्वर्थप्रतिपादनम्। तपो व्रतानुसेवनम्। एतैर्ये युताः समन्विताः। महाविभवा अत्यैश्वर्ययुक्ताः। आश्रमिणश्चतुर्थाश्रमिणः। पाखण्डा वेदबाह्याः। नरेश्वरा राजानः। सारधान्यं श्रेष्ठाः शालयः। एतत्सर्वमेवाहिर्बुध्न्ये उत्तरभद्रपदायाम् ॥२४॥

अथ रेवत्यामाह—

पौष्णे सलिलजफलकुसुमलवणमणिशङ्खमौक्तिकाब्जानि ।
सुरभिकुसुमानि गन्धा वणिजो नौकर्णधाराश्च ॥२५॥

सलिलजानि जलोद्भवानि यानि द्रव्याणि मृणालादीनि यानि च फलानि। तथा कुसुमानि पुष्पाणि। लवणं सैन्धवम्। मणयो रत्नानि। शङ्खः प्रसिद्धः। मौक्तिकं मुक्ताफलानि। अब्जानि पद्मप्रभृतीनि। सुरभि सुगन्धद्रव्यम्। कुसुमानि। अथवा सुरभीणि सुगन्धानि कुसुमानि। गन्धाः सुगन्धद्रव्याणि। वणिजः क्रयविक्रयिणः। नौकर्णधारा नाविकाः। एते सर्व एव पौष्णे रेवत्याम् ॥२५॥

अथाश्विन्यामाह—

अश्विन्यामश्वहराः सेनापतिवैद्यसेवकास्तुरगाः ।
तुरगारोहा वणिजो रूपोपेतास्तुरगरक्षाः ॥२६॥

अश्वहरा अश्वग्राहकाः। सेनापतयश्चमूनाथाः। वैद्याः कायचिकित्सकाः। सेवकाः सेवानिरताः। तुरगा अश्वाः। तुरगारोहा अश्वगामिनः। वणिजः [1]किराताः

---

१. द्रष्टव्याऽस्य ग्रन्थस्य १३४ पृष्ठे १ टिप्पणी।

क्रयविक्रयनिरताः। रूपोपेताः रूपसम्पन्नाः सुरूपाः। तुरगरक्षा अश्वपतयः। एते सर्व एवाऽश्विन्याम् ॥२६॥

अथ भरण्यामाह—

याम्येऽसृक्पिशितभुजः क्रूरा वधबन्धताडनासक्ताः ।
तुषधान्यं नीचकुलोद्भवा विहीनाश्च सत्त्वेन ॥२७॥

असृग्रक्तं पिशितं मांसं तद्भुञ्जते ये तेऽसृक्पिशितभुजो रक्तमांसादाः। क्रूराः उग्राः। वधे मारणे बन्धे बन्धनें ताडने कुट्टने चासक्ता रताः। तुषधान्यं शालयः। नीचकुलोद्भवा निकृष्टवंशजाताः। ये च सत्त्वेनौदार्येण विहीना रहिताः। एते सर्व एव याम्ये भरण्याम् ॥२७॥

अधुना जातिनक्षत्राण्याह—

पूर्वात्रयं सानलमग्रजानां राज्ञां तु पुष्येण सहोत्तराणि ।
सपौष्णमैत्रं पितृदैवतं च प्रजापतेर्भं च कृषीवलानाम् ॥२८॥
आदित्यहस्ताभिजिदाश्विनानि वणिग्जनानां प्रवदन्ति तानि ।
मूलत्रिनेत्रानिलवारुणानि भान्युग्रजातेः प्रभविष्णुतायाः ॥२९॥
सौम्यैन्द्रचित्रावसुदैवतानि सेवाजनस्वाम्यमुपागतानि ।
सार्पं विशाखा श्रवणो भरण्यश्चण्डालजातेरभिनिर्दिशन्ति ॥३०॥

पूर्वात्रयं पूर्वफल्गुनी पूर्वाषाढा पूर्वभद्रपदेति। एतच्च सानलमनलेन कृत्तिकया सहितम्। एतन्नक्षत्रचतुष्टयमग्रजानां ब्राह्मणानाम्। पुष्येण सहोत्तराणि राज्ञां पुष्यमुत्तरात्रयमुत्तरफल्गुन्युत्तराषाढोत्तरभद्रपदा इति। एतद्राज्ञां क्षत्रियाणां नक्षत्रचतुष्टयम्। सपौष्णमैत्रं पितृदैवतं चेति। मैत्रमनुराधा। सपौष्णं पौष्णेन रेवत्या सहितम्। पितृदैवतं मघा। प्रजापतेर्भं प्राजापत्यं नक्षत्रं रोहिणी। चशब्दः समुच्चये। एतत्कृषीवलानां कर्षकाणां वैश्यानां नक्षत्रचतुष्टयम् ॥२८॥

आदित्येति। आदित्यं पुनर्वसुर्हस्तोऽभिजित्। आश्विनमश्विनी। एतानीमानि वणिग्जनानां [1]किराटलोकानां चत्वारि प्रवदन्ति कथयन्ति। मूलम्। त्रिनेत्रो रुद्र आर्द्रा। अनिलः स्वातिः। वारुणं शतभिषग्। एतानि [2]चत्वारि प्रभविष्णुतायाः **प्रभावशीलाया** उग्रजातेः क्रूरजनस्य ॥२९॥

सौम्यं मृगशिराः। ऐन्द्रं ज्येष्ठा। त्वाष्ट्रं चित्रा। वसुदैवतं धनिष्ठा। **एतानि चत्वारि** नक्षत्राणि सेवाजनस्य सेवाभिरतस्य स्वाम्यं प्रभुत्वमुपगतानि

---

१. द्रष्टव्याऽस्य ग्रन्थस्य १३४ पृष्ठे १ टिप्पणी ।

२. चत्वारि उग्रजातेः क्रूरजातेः प्रभविष्णुतायाः प्रभुत्वस्येति भ० क० पु० पाठः।

प्राप्तानि। सार्पमाश्लेषा। विशाखा। श्रवणः। भरणी। एतानि चत्वारि नक्षत्राणि चण्डालजातेश्चण्डालानामभिनिर्दिशन्ति कथयन्ति मुनयः ॥३०॥

अथ क्रूरग्रहप्रयोजनमाह—

रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदूषितम् ।
ग्रहणगतमथोल्कया हतं नियतमुषाकरपीडितं च यत् ॥३१॥
तदुपहतमिति प्रचक्षते प्रकृतिविपर्ययमातमेव वा ।
निगदितपरिवर्गदूषणं कथितविपर्ययगं समृद्धये ॥३२॥

रविरादित्यः। रविसुतः शनैश्चरः। अनयोरेकस्य यन्नक्षत्रं भोगमागतं भोगं प्राप्तम्। क्षितिसुतो भौमस्तद्भेदनन मध्यगमनेनाच्छादनेन वा तद्वक्रेण वा दूषितं दुष्टम्। ग्रहणगतं यन्नक्षत्रं यत्र स्थितोऽर्कश्चन्द्रो वा राहुणा ग्रस्यते तद्ग्रहणगतम्। अथोल्कया हतमुल्कानिपीडितम्। नियतं सर्वकालमुषाकरेण चन्द्रेण यत्पीडितम्। यस्य नक्षत्रस्य चन्द्रमा योगतारकाभेदेन आच्छादनं मध्यगमनं दक्षिणभागगमनं वा करोति तदुषाकरपीडितम् ॥

तदुपहतमिति प्रचक्षत इति। एवंविधं यन्नक्षत्रं तदुपहतमिति प्रचक्षते कथयन्ति मुनयः। अथवा प्रकृतेः स्वभावाद्विपर्ययं विपरीतं यातं प्राप्तं तदप्युपहतम्। एवंविधं नक्षत्रं निगदितस्य कथितस्य परिवर्गस्य प्रागुक्तस्य दूषणं दुष्टतां विनाशं करोति। कथितविपर्ययगं समृद्धये। रविरविसुतमागतमित्यादि यदुक्तं तद्विपरीतगं यन्नक्षत्रं तत्कथितस्योक्तस्य परिवर्गस्य समृद्धये भवति पुष्णातीत्यर्थः। तथा च कश्यपः—

शनैश्चरस्य सूर्यस्य यदृक्षं भोगमागतम् ।
धरित्रीतनयेनापि भिन्नं वक्रप्रदूषितम् ॥

राहुग्रस्तमथोल्काभिर्हतमुत्पातदूषितम् ।
चन्द्रेण पीडितं यच्च प्रकृतेरन्यथास्थितम् ॥

तच्चोपहतकं विन्द्यान्नक्षत्रं हन्ति सर्वदा ।
स्ववर्गमन्यथा नित्यं पुष्णाति निरुपद्रवम् ॥ इति ॥३१-३२॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ नक्षत्रव्यूहो
नाम पञ्चदशोऽध्यायः ॥१५॥

अथ ग्रहभक्तियोगो व्याख्यायते

कस्मिन् देशे केषां जनानां को ग्रहाऽधिपतिरित्येतद्यत्र निरूप्यते। तत्रादावेवाऽऽदित्यस्याह—

प्राङ्नर्मदार्द्धशोणोड्रवङ्गसुह्माः कलिङ्गबाह्लीकाः ।
शकयवनमगधशबरप्राग्ज्योतिषचीनकाम्बोजाः ॥१॥
मेकलकिरातविटका बहिरन्तःशैलजाः पुलिन्दाश्च ।
द्रविडानां प्रागर्द्धं दक्षिणकूलं च यमुनायाः ॥२॥
चम्पोदुम्बरकौशाम्बिचेदिविन्ध्याटवीकलिङ्गाश्च ।
पुण्ड्रा गोलाङ्गूलश्रीपर्वतवर्द्धमानानि ॥३॥
इक्षुमतीत्यथ तस्करपारतकान्तारगोपबीजानाम् ।
तुषधान्यकटुकतरुकनकदहनविषसमरशूराणाम् ॥४॥
भेषजभिषक्चतुष्पदकृषिकरनृपहिंस्रयायिचौराणाम् ।
व्यालारण्ययशोयुततीक्ष्णानां भास्करः स्वामी ॥५॥

नर्मदानाम्नी नदी तस्याः प्रागद्ध पूर्वभागः। शोणो नदः। उड्रा जनाः। वङ्गाः। सुह्माः। कलिङ्गाः। बाह्लीकाः। शकाः। यवनाः। मगधाः। शवराः। प्राग्ज्योतिषाः। चीनाः। काम्बोजाः॥

मेकलाः। किराताः। विटकाः। वहिरन्तःशैलजाः। शैलाः पर्वतास्तत्र ये बहिः बाह्यभागे जाताः समवस्थिताः, अन्तः पर्वतमध्ये ये जाताः। पुलिन्दा जनाः। चशब्दः सर्वत्र समुच्चये। तथा द्रविडानां जनानां प्रागर्द्धं पूर्वार्द्धम्। यमुना कालिन्दी नदी तस्या दक्षिणकूलम्॥

चम्पो देशः। उदुम्बरः। कौशाम्बी नगरी। चेदयो जनाः। विन्ध्याटवी विन्ध्यमध्यम्। कलिङ्गाः। पुण्ड्रा जनाः। गोलाङ्गूलाः। श्रीपर्वतः। वर्द्धमानम्॥

इक्षुमतीनाम्नी नदी। इतिशब्दः प्रकारे। अथानन्तरम्। तस्करो देशो जना वा। पारता जनाः। कान्तारमटवी। गोपा गोपालकाः। बीजानि प्रसिद्धानि। तुषधान्यं शालयः। कटुकं द्रव्यं मरिचादि। तरवो वृक्षाः। कनकं सवर्णम्। दहनोऽग्निः। विषं महौषधम्। समरशूराः संग्रामवीराः॥

भेषजमौषधम्। भिषजो वैद्याः। चतुष्पादाः पशवः। कृषिकराः

कार्षकाः। नृपा राजानः। हिंस्राः पापाः। [1]यायिनो विजिगमिषवः। चौरास्तस्कराः। व्यालाः सर्पाः। अरण्यं निर्जनो देशः। यशोयुता यशस्विनः। तीक्ष्णं निम्बादि, तीक्ष्णा वा जनाः। एषां सर्वेषां भास्कर आदित्यः स्वामी प्रभुरिति। तथा च काश्यपः—

प्रागर्द्धं नर्मदायाश्च शोणः शबरमागधाः ।
उड्रा वङ्गा कलिङ्गाश्च बाह्लीका यवनाः शकाः ॥
काम्बोजा मेकलाः सुह्माः प्राग्ज्योतिषकिरातकाः ।
चीनाः सर्वे सुशैलेयाः पार्वता बहिरन्तजाः ॥
यमुनाया याम्यकूलं कौशाम्व्यौदुम्बराणि च ।
विन्ध्याटवी च पुण्ड्राश्च वर्द्धमानाश्च पर्वताः ॥
श्रीपर्वतश्चेदिपुरं गोलाङ्गूलं तथैव च ।
इक्षुमत्याश्रिता ये च जनाः शूराः मदोत्कटाः ॥
कान्तारमथ गोपाश्च कन्दरास्तस्करास्तथा ।
समरे विषमाः शूरास्तरवः कटुका अपि ॥
चतुष्पदा भेषजं च धान्यं वा भिषजस्तथा ।
अरण्यवासिव्यालाश्च कार्षका बालकास्तथा ॥
गौरपत्यं च किञ्जल्कं पुंसंज्ञा ये च जन्तवः ।
सर्वेषां भास्करः स्वामी तेजस्तेजस्विनामपि ॥ इति ॥१–५॥

अथ चन्द्रस्याह—

गिरिसलिलदुर्गकोशलभरुकच्छसमुद्ररोमकतुषाराः ।
वनवासितङ्गणहलस्त्रीराज्यमहार्णवद्वीपाः ॥६॥
मधुररसकुसुमफलसलिललवणमणिशङ्खमौक्तिकाब्जानाम् ।
शालियवौषधिगोधूमसोमपाक्रन्दविप्राणाम् ॥७॥
सितसुभगतुरगरतिकरयुवतिचमूनाथभोज्यवस्त्राणाम् ।
भृङ्गिनिशाचरकार्षकयज्ञविदां चाधिपश्चन्द्रः ॥८॥

गिरिदुर्गं पर्वतदुर्गम्। सलिलदुर्गं जलदुर्गम्। कोशला जनाः। भरुकच्छाः। समुद्राः सागराः। रोमकाः। तुषाराः। वनवासिनः। तङ्गणाः। हलाः। स्त्रीराज्यम्। महार्णवद्वीपा वडवामुखद्वीपाः॥

---

१. यायिन पान्था इति अ० क० पु० पाठः।

'मधुररसं यत्किञ्चित् कुसुमानि फलानि सर्वाणि। सलिलं जलम्। लवणं सैन्धवम्। मणयः। शङ्खः। मौक्तिकम्। अब्जाः सलिलसम्भवाः पद्मप्रभृतयः। शालयो धान्यानि। यवाः। औषधयः। गोधूमाः। सोमपा याज्ञिकाः। आक्रन्दः पार्ष्णिग्राहान्तरितो राजा। विप्रा ब्राह्मणाः॥

सितं श्वेतवर्णं यत्किञ्चित् रूप्यं वा। सुभगाः सर्वजनप्रियाः। तुरगा अश्वाः। रतिकराः कामिनः। युवतयः स्त्रियः। चमूनाथाः सेनापतयः। भोज्यं प्रसिद्धम्। वस्त्राण्यम्बराणि। शृङ्गिणः प्रसिद्धाः प्राणिनः। निशाचरा रात्रिचराः। कार्षकाः कृषिकाराः। यज्ञविदो यज्ञसूत्रज्ञाः। एतेषां चाधिपश्चन्द्रः शशी। तथा च काश्यपः—

पर्वता जलदुर्गाश्च कोशलास्तङ्गणा हलाः।
स्त्रीराज्यं भरुकच्छश्च तुषारा वनवासिनः॥
मौक्तिकं मणिशङ्खाब्जमौषधं कुसुमं फलम्।
द्वीपा महार्णवे ये च मधुरा लवणादयः॥
गोधूमाः शालयः शृङ्गिकार्षकाश्च यवा अपि।
सोमपा ब्राह्मणा ये च यज्ञज्ञास्तु सुरासवम्॥
स्त्रीसौभाग्यसमेताश्च लास्यहास्येक्षितानि च।
निशाचराधिपश्चन्द्रो हृष्टानां च प्रकीर्तितः॥इति॥ ६-८॥

अथ भौमस्याह—

शोणस्य नर्मदाया भीमरथायाश्च पश्चिमार्द्धस्थाः।
निर्विन्ध्या वेत्रवती सिप्रा गोदावरी वेणा॥९॥
मन्दाकिनी पयोष्णी महानदी सिन्धुमालतीपाराः।
उत्तरपाण्ड्यमहेन्द्राद्रिविन्ध्यमलयोपगाश्चोलाः॥१०॥
द्रविडविदेहान्ध्राश्मकभासापरकौङ्कणाः समन्त्रिषिकाः।
कुन्तलकेरलदण्डककान्तिपुरम्लेच्छसङ्करिणः॥११॥
नागरकृषिकरपारतहुताशनाजीविशस्त्रवार्तानाम्।
आटविकदुर्गकर्वटवधिकनृशंसावलिप्तानाम्॥१२॥
नरपतिकुमारकुञ्जरदाम्भिकडिम्भाभिघातपशुपानाम्।
रक्तफलकुसुमविद्रुमचमूपगुडमद्यतीक्ष्णानाम्॥१३॥
कोशभवनाग्निहोत्रिकधात्वाकरशाक्यभिक्षुचौराणाम्।
शठदीर्घवैरबह्वाशिनां च वसुधासुतोऽधिपतिः॥१४॥

शोणो नदः। नर्मदा नदी। भीमरथा च नद्येव। शोणस्य तथा नर्मदाया भीमरथायाश्च ये पश्चिमार्द्धस्था पश्चिमभागे समवस्थिता देशाः। तथा निर्विन्ध्या नदी। वेत्रवती। सिप्रा। गोदावरी। वेणा॥

मन्दाकिनी गङ्गा। पयोष्णी महानदी। सिन्धुमालतीपारा एताः सर्वा एव नद्यः। उत्तरपाण्ड्या जनाः। महेन्द्राद्रिर्महेन्द्रपर्वत एव। विन्ध्यो मलयश्च। एतेषु ये उपगाः समीपस्थिता जनाः। तथा चोला जनाः॥

द्रविडाः। विदेहाः। अन्ध्राः। अश्मकाः। भासापराः। कौङ्कणाः। समन्त्रिषिकाः। कुन्तलाः। केरलाः। दण्डकं दण्डकारण्यम्। कान्तिपुरम्। म्लेच्छाः। सङ्करिणः सङ्करजातयः॥

नागरा जनाः। कृषिकराः कार्षकाः। पारताः। हुताशनाजीविनः सुवर्णकारप्रभृतयः। शस्त्रवार्ताः शस्त्रवृत्तयः। आटविका अटव्यां ये निवसन्ति। दुर्गः कोटः। कर्वटा जनाः। वधिका वधरताः। नृशंसाः पापाः। अवलिप्ताः कार्येष्वस्थिराः॥

नरपतयो राजानः। कुमारा बालकाः। कुञ्जरा हस्तिनः। दाम्भिका दम्भरता मिथ्याध्वजधर्मिणः। डिम्भाभिघातः। अशस्त्रः कलहो डिम्भस्तत्राभिघातः। अथवा डिम्भानां बालानां योऽभिघातं करोति। पशुपः पशुपालः। रक्तं लोहितवर्णं यत्किञ्चित् फलम्। रक्तं च कुसुमम्। विद्रुमाः प्रवालकाः। चमूपः सेनापतिः। गुड इक्षुविकारः। मद्यं मदिरा। तीक्ष्णं निम्बादि॥

कोशभवनं भाण्डगृहम्। अग्निहोत्रिका अग्निहोत्रसेविनः। धात्वाकरो धातूनां गैरिकादीनामाकरः स्थानं सुवर्णादीनां वा। शाक्यो [1]रक्तपटिकः। भिक्षुर्यतिः। चौरस्तस्करः। शठः परकार्यविमुखः। दीर्घवैरो दृढद्वेषः। बह्वाशी बहुभुक्। एतेषां सर्वेषां वसुधासुतोऽङ्गारकोऽधिपतिः स्वामी। तथा च काश्यप--

महेन्द्रविन्ध्यमलयाः सिप्रा वेणा महानदी।
गोदावर्या नर्मदाया भीमायाः पश्चिमा दिशः॥
चेदिकाः कौङ्कणा दुर्गा द्रविडा वेत्रवन्नदी।
मन्दाकिनी पयोष्णी च मालती सिन्धुपारकाः॥
पाण्ड्याश्चोत्तरदेशस्था विदेहान्ध्राश्मकास्तथा।
भासापराः कुन्तलाश्च केरला दण्डकास्तथा॥
नागराः पौरवाश्चैव कार्षकाः शस्त्रवृत्तयः।
हुताशनाजीविनो ये कुञ्जराः पशुपास्तथा॥

---

१. रक्तपट इति अ० क० पु० पाठः।

सांग्रामिका नृशंसाश्च सङ्करांश्चोपघातकाः ।
कुमारा भूमिजस्योक्ता दाम्भिकास्तस्करास्तथा ॥ इति ॥९-१४॥

अथ बुधस्याह—

लोहित्यः सिन्धुनदः सरयूर्गाम्भीरिका रथाख्या च ।
गङ्गाकौशिक्याद्याः सरितो वैदेहकाम्बोजाः ॥१५॥
मथुरायाः पूर्वार्द्धं हिमवद्गोमन्तचित्रकूटस्थाः ।
सौराष्ट्रसेतुजलमार्गपण्यबिलपर्वताश्रयिणः ॥१६॥
उदपानयन्त्रगान्धर्वलेख्यमणिरागगन्धयुक्तिविदः ।
आलेख्यशब्दगणितप्रसाधकायुष्यशिल्पज्ञाः ॥१७॥
चरपुरुषकुहकजीवकशिशुकविशठसूचकाभिचाररताः ।
दूतनपुंसकहास्यज्ञभूततन्त्रेन्द्रजालज्ञाः ॥१८॥
आरक्षकनटनर्तकघृततैलस्नेहबीजतिक्तानि ।
व्रतचारिरसायनकुशलवेसराश्चन्द्रपुत्रस्य ॥१९॥

लोहित्यो नदः। सिन्धुनदश्च। सरयूर्नदी गाम्भीरिका रथाख्या च। गङ्गा जाह्नवी। कौशिकी। आदिग्रहणाद्विपाशा सरस्वती चन्द्रभागा च ज्ञेया। एताः सरितो नद्यः। वैदेहा जनाः। काम्बोजा जनाः॥

मथुरायाः पूर्वमर्द्धम्। हिमवान् पर्वतः। गोमन्तो गोमिनः पर्वतो वा। चित्रकूटश्च पर्वतः। एतेषु ये स्थिता जनाः। [1]सौराष्ट्रा जनाः। सेत्वाश्रयिणः सेतुगामिनः। जलमार्गाश्रयिणो जलमार्गेण ये गच्छन्ति। पण्याश्रयिणः पण्यवृत्तयः। बिलाश्रयिणो बिलनिवासिनः। पर्वताश्रयिणः पर्वतवासिनः॥

उदपानं वापीकूपतडागादि। यन्त्रविदो यन्त्रज्ञाः। गान्धर्वविदो गेयज्ञाः। लेख्यविदो लेख्यज्ञाः। मणिविदो मणिलक्षणज्ञाः। रागयुक्तिविदो रागो रञ्जनं तद्युक्तिज्ञाः। गन्धयुक्तिविदो गन्धयुक्तिज्ञाः। आलेख्यं चित्रकर्म तज्ज्ञाः। शब्दज्ञा वैयाकरणाः। गणितज्ञाः। एषां प्रसाधका निरताः। आयुषो हितमायुष्यं रसायनवाजीकरणादि तज्ज्ञाः। शिल्पज्ञास्तक्षकारलेखकलेपकरकुम्भकारायस्कारकर्मविदः॥

चरपुरुषा गूढार्थवेदिनः। कुहकजीवकाः कुहकेनाद्भुतेन प्रसेनादिदर्शनेन ये जीवन्ति। शिशुर्बालः। कविः काव्यकर्ता। शठः परकार्यविमुखः।

---

१. सौराष्ट्रो देश इति अ० क० पु० पाठः।

सूचकः पिशुनः। अभिचारो वश्योच्चाटनविद्वेषणमारणादिकस्तत्र ये रताः। दूता गमागमिनः। नपुंसकाः क्लीबाः। हास्यज्ञा उपहासकुशलाः। भूततन्त्रज्ञाः। इन्द्रजालज्ञाः॥

आरक्षको रक्षाधिकृतः। नटाः प्रसिद्धाः। नर्तको नर्तनं शिल्पमस्य स नर्तकः। घृतमाज्यम्। तैलं प्रसिद्धम्। स्नेहस्तिलाक्षोटादि। बीजानि प्रसिद्धानि। तिक्तं निम्बादि। व्रतचारिणो ब्रह्मचारिप्रभृतयः। रसायनकुशला रसायनसाधने शक्ताः। वेसरा अश्वविशेषाः। एते सर्वे चन्द्रपुत्रस्य बुधस्य॥ तथा च काश्यपः —

चित्रकूटगिरी रम्यो हिमवान् कौशिकी तथा।
मथुरायाश्च पूर्वार्द्धं लोहित्यः सिन्धुरेव च॥
गाम्भीरिका च सरयू रथाख्या गण्डकी नदी।
गान्धर्वा लेखहाराश्च तथोदाराश्च कृत्रिमाः॥
वैदेहाः सर्वजलजाः काम्बोजाश्च सुराष्ट्रिकाः।
गन्धयुक्तिविदो ये च सौगन्धिपदलेपनाः॥
सुवर्णरजतं रत्नं मातङ्गतुरगादि यत्।
पौरा जनपदाः सौम्याः सोमपुत्रवशे स्थिताः॥ इति॥१५-१९॥

अथ गुरोराह—

सिन्धुनदपूर्वभागो मथुरापश्चार्द्धभरतसौवीराः।
स्रुघ्नौदीच्यविपाशासरिच्छतद्रू रमठशाल्वाः॥२०॥
त्रैगर्तपौरवाम्बष्ठपारता वाटधानयौधेयाः।
सारस्वतार्जुनायनमत्स्यार्द्धग्रामराष्ट्राणि॥२१॥
हस्त्यश्वपुरोहितभूपमन्त्रिमाङ्गल्यपौष्टिकासक्ताः।
कारुण्यसत्यशौचव्रतविद्यादानधर्मयुताः॥२२॥
पौरमहाधनशब्दार्थवेद[1]विदुषोऽभिचारनीतिज्ञाः।
मनुजेश्वरोपकरणं छत्रध्वजचामराद्यं च॥२३॥
शैलेयकुष्ठमांसीतगररससैन्धवानि वल्लीजम्।
मधुररसमधूच्छिष्टानि चोरकश्चेति जीवस्य॥२४॥

---

१. सर्वेषु पुस्तकेषु 'विदुषः' इत्येव पाठ उपलभ्यते। तेन षान्तोऽपि कश्चन शब्द इति सिध्यति।

सिन्धुनदस्य पूर्वभागः। मथुरायाः पश्चार्द्धम्। भरता जनाः। सौवीराः। स्रुघ्नो देशः। औदीच्या उत्तरदिङ्निवासिनो जनाः। विपाशा सरिन्नदी। शतद्रूः। रमठा जनाः। शाल्वाः॥

त्रैगर्ताः। पौरवाः। अम्बष्ठाः। पारताः। वाटधानाः। यौधेयाः। सारस्वताः। अर्जुनायनाः। मत्स्या जनास्तद्विषयाद् ग्रामराष्ट्रार्द्धम्॥

हस्ती। अश्वस्तुरगः। पुरोहितो नृपाचार्यः। भूपो राजा। मन्त्री सचिवः। मङ्गलकार्येषु विवाहोपनयनादिषु पौष्टिकेषु य आसक्ता रताः। कारुण्ययुता अनुकम्पाशीलाः। सत्ययुताः सत्यभाषिणः। शौचयुताः शौचरताः परधनादिष्वलुब्धाः। व्रतयुतास्तपस्विनः। विद्यायुताः। दानयुताः। धर्मयुताः॥

पौराः पुरे भवाः। महाधना ईश्वराः। शब्दविदुषो वैयाकरणाः। अर्थविदुषः पण्डिताः। वेदविदुषो वेदज्ञाः। अभिचारज्ञाः। नीतिज्ञा नीतिशास्त्रविदः। मनुजेश्वरोपकरणं मनुजेश्वरो राजा तदुपकरणमायुधसन्नाहादि। छत्रमातपत्रम्। ध्वजो बहुपटविनिर्मितं चिह्नम्। चामरं बालव्यजनम्। आदिग्रहणात्तालवृन्तादिकम्॥

शैलेयं सुगन्धद्रव्यम्। कुष्ठम्। मांसीतगरम्। रसं वोलम्। सैन्धवं लवणम्। वल्लीजं मुद्गादि। मधुरा ये च रसाः। मधूच्छिष्टं सिक्थकम्। चोरकं सुगन्धद्रव्यम्। एतं सर्व एव जीवस्य गुरोः॥ तथा च काश्यपः—

त्रैगर्तसिन्धुसौवीराः शतद्रूमथुरे अपि।
स्रुघ्नौदीच्यविपाशाश्च पारताम्बष्ठकास्तथा॥
राजा पुरोहितो मन्त्री माङ्गल्यं पौष्टिकं व्रतम्।
कारुण्यं कर्म सिद्धानां विद्याशौचतपस्विनाम्॥
मत्स्याश्च वाटधानाश्च यौधेयाश्चार्जुनायनाः।
सारस्वताश्च रमठा हस्त्यश्वध्वजचामराः॥
शब्दार्थविदुषः पौरा नीतिज्ञाः शीलसंयुताः।
मांसीतगरकुष्ठं च शैलेयं लवणं रसाः॥
मधुरस्वादवल्लीजं विप्राणां चाधिपो गुरुः। इति॥२०-२४॥

अथ शुक्रस्याह—

तक्षशिलमर्तिकावतबहुगिरिगान्धारपुष्कलावतकाः।
प्रस्थलमालवकैकयदाशार्णोशीनराः शिबयः॥२५॥

ये च पिबन्ति वितस्तामिरावतीं चन्द्रभागसरितं च ।
रथरजताकरकुञ्जरतुरगमहामात्रधनयुक्ताः ॥२६॥
सुरभिकुसुमानुलेपनमणिवज्रविभूषणाम्बुरुहशय्याः ।
वरतरुणयुवतिकामोपकरणमृष्टान्नमधुरभुजः ॥२७॥
उद्यानसलिलकामुकयशःसुखौदार्यरूपसम्पन्नाः ।
विद्वदमात्यवणिग्जनघटकृच्चित्राण्डजास्त्रिफलाः ॥२८॥
कौशेयपट्टकम्बलपत्रौर्णिकरोध्रपत्रचोचानि ।
जातीफलागुरुवचापिप्पल्यश्चन्दनं च भृगोः ॥२९॥

तक्षशिला नगरी। मार्तिकावतो देशः। बहुगिरिः। गान्धारा जनाः। पुष्कलावतको देशः। प्रस्थलाः। मालवाः। कैकयाः। दाशार्णाः। उशीनराः। शिबयः॥

ये च पिबन्ति वितस्तां नदीम्। तथेरावतीं ये च पिबन्ति। चन्द्रभागसरितं चन्द्रभागां सरितं ये च पिबन्ति। रथा [1]गन्त्र्यः। रजतं रूप्यम्। आकरमर्थोत्पत्तिस्थानम्। कुञ्जरा हस्तिनः। तुरगा अश्वाः। महामात्रा हस्त्यधिपतयः। धनयुक्ता ईश्वराः॥

सुरभिः सुगन्धद्रव्यम्। कुसुमानि पुष्पाणि। अनुलेपनं समालम्भनम्। मणयः पद्मरागप्रभृतयः। वज्रं हीरकम्। विभूषणान्यलङ्करणानि। अम्बुरुहः पद्मादि। शय्या आस्तरणम्। वराः प्रधानाः। तरुणा यौवनोपेताः। युवतयः स्त्रियः। कामोपकरणं मदनोपयोग्यं यद्वस्तु पुष्पधूपमाल्यानुलेपनादि। मृष्टान्नभुजो ये नराः। तथा मधुरभुजः॥

उद्यानमुपवनम्। सलिलं जलम्। कामुकाः कामिनः। यशःसम्पन्ना यशस्विनः। सुखसम्पन्नाः सुखिनः। औदार्यसम्पन्ना दातारः। रूपसम्पन्नाः सुरूपाः। विद्वांसः पाठकाः। अमात्या मन्त्रिणः। वणिग्जनाः क्रयविक्रयजीविनः। घटकृत् कुम्भकारः। चित्राण्डजा नानाप्रकाराः पक्षिणः। त्रिफलाः फलत्रयमेलालवङ्गकक्कोला इति॥

कौशेयपट्टो लोके नेत्रपट्ट इति प्रसिद्धः। कम्बल और्णिकः। पत्रौर्णिकं धौतकौशेयम्। रोध्रं प्रसिद्धं सुगन्धद्रव्यम्। पत्रं सुगन्धपत्रम्। चोचं मलिनपत्रं नारिकेलं च। जातीफलं प्रसिद्धम्। अगुरु सुगन्धद्रव्यम्। वचा प्रसिद्धा। पिप्पल्यः कणाः। चन्दनं मलयजम्। एतद् भृगोः शुक्रस्य। तथा च काश्यपः।

---

१. गन्त्रिण इति अ० क० पु० पाठः।

चन्द्रभागां वितस्तां चैरावतीं च पिबन्ति ये ।
पुष्करावतकैकेया गान्धारप्रस्थलास्तथा ॥
दशार्णा मालवास्तक्षशिला मौक्तिकमेव च ।
धनाढ्याः कुञ्जरा अश्वाः प्रस्थलं च विलेपनम् ॥
सुरूपसुभगोद्यानकामुकाः कामचारिणः ।
वेसरा मधुरा हृद्याः सलिलाशयजीविनः ॥
तरुणा योषितः क्रीडाविदुषो जनगोष्ठिकाः ।
चित्राण्डजाश्च कौशेयं पत्रौर्णं काशिकौशिकाः ॥
पिप्पल्यश्चन्दनं जातीफलमामलकानि च ।
गन्धपत्रस्य लोध्रस्य शुक्रश्चाधिपतिः स्मृतः ॥ इति ॥२५-२९॥

अथ शनैश्चरस्याह—

आनर्ताबुंदपुष्करसौराष्ट्राभीरशूद्ररैवतकाः ।
नष्टा यस्मिन् देशे सरस्वती पश्चिमो देशः॥३०॥
कुरुभूमिजाः प्रभासं विदिशा वेदस्मृती महीतटजाः।
खलमलिननीचतैलिकविहीनसत्त्वोपहतपुंस्त्वाः ॥३१॥
बान्धनशाकुनिकाशुचिकैवर्तविरूपवृद्धसौकरिकाः ।
गणपूज्यस्खलितव्रतशबरपुलिन्दार्थपरिहीनाः ॥३२॥
कटुतिक्तरसायनविधवयोषितो भुजगतस्करमहिष्यः।
खरकरभचणकवातलनिष्पावाश्चार्कपुत्रस्य ॥ ॥३३॥

आनर्ता जनाः। आर्बुदाः। पुष्कराः। सौराष्ट्राः। आभीराः। शूद्राः। रैवतकाः। यस्मिन् देशे सरस्वती नष्टा अदर्शनं गता। स पश्चिमो देशः॥

कुरुभूमिजा जनाः। स्थानेश्वरे ये निवसन्ति। प्रभासं स्थानम्। विदिशा नगरी। वेदस्मृती नदी। महीनदीतटे ये जाताः। खला दुर्जनाः। मलिना मलोपेताः। नीचा अधमकर्मकराः। तैलिकाः प्रसिद्धाः। विहीनसत्त्वा निःसत्त्वाः। उपहृतपुंस्त्वा उपहतो नष्टः पुम्भावो येषां षण्ढप्राया इत्यर्थः॥

बान्धना बन्धनपाला बन्धनस्थाश्च। शाकुनिकाः पक्षिघातकाः। अशुचिरताः। कैवर्ता नाविका धीवराश्च। विरूपा दुराकृतयः। वृद्धाः स्थविराः। सौकरिकाः सूकरबन्धकाः। गणपूज्या गणप्रधानाः। स्खलितव्रताश्चलितनियमाः। शबरा जनाः। पुलिन्दाश्च। अर्थपरिहीना दरिद्राः॥

कटुद्रव्यं मरिचादि। तिक्तं निम्बादि। रसायनं प्रसिद्धम्। विधवयोषितो भर्तृहीनाः स्त्रियः। भुजगाः सर्पाः। तस्कराश्चौराः। महिष्यः प्रसिद्धाः। खराः गर्दभाः। करभा उष्ट्राः। चणकाः प्रसिद्धाः। वातला राजमाषप्रभृतयः। निष्पावाः शालयः। एते सर्व एव अर्कपुत्रस्य शनैश्चरस्य। तथा च काश्यपः--

अर्बुदो रैवतगिरिः सौराष्ट्राभीरकास्तथा ।
सरस्वतीपश्चिमाशा प्रभासं कुरुजाङ्गलम् ॥
आनर्तशूद्रा विदिशा खलतैलिकनीचकाः ।
वेदस्मृती सौकरिकाः मलिनश्च महीतटम् ॥
दुःशीलशाकुना हीनाः पशुबन्धनकास्तथा ।
पाखण्डिनश्च वैतण्डा निर्ग्रन्थाः शवराः कृशाः ॥
विरूपाः कटुतिक्तानि रसायनविषादिनः ।
पुलिन्दास्तस्कराः सर्पा महिषोष्ट्रखराः शुनी ॥
चणका वातला वल्लाः पुंस्त्वसत्त्वविवर्जिताः ।
काकगृध्रशृगालानां वृकाणां च प्रभुः शनिः ॥ इति ॥३०-३३॥

अथ राहाराह—

गिरिशिखरकन्दरदरीविनिविष्टा म्लेच्छजातयः शूद्राः ।
गोमायुभक्षशूलिकवोक्काणाश्वमुखविकलाङ्गाः ॥३४॥
कुलपांसनहिंस्रकृतघ्नचौरनिःसत्यशौचदानाश्च ।
खरचरनियुद्धवित्तीव्ररोषगर्त्ताश्रिया[1] नीचाः ॥३५॥
उपहतदाम्भिकराक्षसनिद्राबहुलाश्च जन्तवः सर्वे ।
धर्मेण च संत्यक्ता माषतिलाश्चार्कशशिशत्रोः ॥३६॥

गिरिशिखरेषु पर्वतशृङ्गेषु। कन्दरेषु गिरिखातासु नीचस्थानेषु। दरीषु गुहासु च ये विनिविष्टाः स्थिता म्लेच्छजातय एकवर्णाः। शूद्राः। गोमायुभक्षाः शृगालादाः। शूलिका जनाः। वोक्काणाः। अश्वमुखाः । विकलाङ्गा अङ्गहीनाः॥

कुलपांसनाः कुलकलङ्ककारिणः। हिंस्राः क्रूराः। कृतघ्ना अनुपकारशीलाः। चौरास्तस्कराः। निःसत्याः सत्यरहिताः। निःशौचाः शौचरहिताः। निर्दानाः

---

१. गर्भाश्रया इति अ० क० पु० पाठः।

कदर्याः। खरा गर्दभाः। चराश्चरपुरुषाः। नियुद्धविदो बाहुयुद्धज्ञाः। तीव्ररोषा अतिक्रोधिनः। [1]गर्ताश्रया गर्तस्थाः। नीचा अधमकर्मकराः ॥

उपहताः कुत्सिताः। दाम्भिका मिथ्याधर्मिणः। राक्षसा रक्षोजातयः। ये च निद्राबहुलाः सर्व एव जन्तवः। धर्मेण च संत्यक्ता रहिताः। तथा माष-तिलाः। एते सर्वे अर्कशशित्रो राहौ ॥ तथा च काश्यपः—

बुभुक्षितास्तीक्ष्णरोषा विभिन्नाः कुलपांसनाः ।
नीचा म्लेच्छोत्सादकाश्च गर्तस्थाः पारदारिकाः ॥
सत्यधर्मविहीनाश्च गिरिस्थाः कन्दराश्रिताः ।
प्रतापसत्यहीनाश्च शृगालादा महाशनाः ॥
तिलाश्च बाहुयुद्धज्ञा माषाश्चौराः खराश्चराः ।
यज्ञान् हिंसन्ति ये नित्यं राहुस्तेषामधीश्वरः ॥इति॥३४-३६॥

अथ केतोराह—

गिरिदुर्गपल्लवश्वेतहूणचोलावगाणमरुचीनाः
प्रत्यन्तधनिमहेच्छव्यवसायपराक्रमोपेताः ॥३७॥
परदारविवादरताः पररन्ध्रकुतूहला मदोत्सिक्ताः ।
मूर्खाधार्मिकविजिगीषवश्च केतोः समाख्याताः ॥३८॥

गिरिदुर्गः पर्वतदुर्गः। पल्लवा जनाः। श्वेताः। हूणाः। चोलाः। आवगाणाः। मरुभूः। चीनाः। प्रत्यन्ता गह्वरवासिनः। धनिन ईश्वराः। महेच्छा विपुलाशाः। व्यवसायोपेता निपुणाः। पराक्रमोपेता बलिनः॥

परदाररताः। विवादरताः। पररन्ध्रे कुतूहलो विस्मयो येषां ते पर-रन्ध्रकुतहलाः। मदोत्सिक्ता मत्ताः। मूर्खा अज्ञाः। अधार्मिका धर्मरहिताः। विजिगीषवो विजेतुमिच्छवः। एते सर्व एव केतोः शिखिनः समाख्याता उक्ताः। तथा च काश्यपः —

प्राकाराभ्युच्छ्रिताः शृङ्गगिरिस्था विजिगीषवः ।
प्रत्यन्तवासाभिरताः परच्छिद्रविशारदाः ॥
मूर्खा विज्ञानहीनाश्च निर्मर्यादा नरास्तथा ।
परदाररता नीचाः केतोरिति विनिर्दिशेत् ॥

---

१. गर्भाश्रया गर्भस्था इति अ० क० पु० पाठः।

तथा च समाससंहितायाम्--

भानोरङ्गकलिङ्गवङ्गयमुनाः श्रीपर्वताः पारता
बाह्लीकोत्कटसुह्मशोणमगधाः प्राङ्नर्मदार्धांशकाः।
कौशाम्बी शबरान्ध्रपौण्ड्रयवना याम्याश्रिता मेकला-
श्चीनोदुम्बरवर्धमानविकटाश्चम्पेक्षुमत्याश्रिताः ॥
जलपर्वतदुर्गकोशला वनिताराज्यतुषारतङ्गणाः।
वनवासहलाः सरस्वती शीतांशोर्भरुकच्छरोमकाः ॥
क्षितिजस्य महानदी पयोष्णी वेणा वेत्रवती च मालती।
मलयद्रविडाश्मकान्ध्रचोला भीमार्धे त्वपरे च ये स्थिताश्च ॥
पारेविन्ध्यं पश्चिमः शोणभागो गोदावर्याः कूलमद्रिर्महेन्द्रः।
सिप्रा सिन्धुर्भूमिजस्येति देशा वैदेहाख्याः कोङ्कणाः केरलाश्च ॥
सौम्यस्य सौराष्ट्रिकभोजदेशा गङ्गाश्रिताश्चोत्तरकूलनद्यः।
विन्ध्यार्धमन्त्यं मथुरापुरस्तात् सुवास्तुसिन्ध्वद्रिगुहाश्रिताश्च ॥
जीवस्य सारस्वतमत्स्यशाल्वाः प्राक्सिन्धुभागो मथुरापरार्धम्।
स्रुघ्नः शतद्रू रमठा विपाशा त्रैगर्तयौधेयकपारताश्च ॥
देशा भृगोस्तक्षशिला वितस्ता गान्धारकाः कैकयमालवाश्च।
दाशार्णकौशीनरचन्द्रभागाश्चेद्याह्वसिप्रास्थलकालकाख्याः ॥
सरस्वती यत्र गता प्रणाशं वेदस्मृती मालवकाः सुराष्ट्राः।
पाश्चात्यदेशा विदिशा मही च सौरेः स्मृताः पुष्करमर्बुदश्च ॥
राहोः कृतघ्नकुलपांसननीचशूद्रा वोक्काणशूलिकनियुद्धविदुग्रकोपाः।
गोमायुभक्षगिरिदुर्गनिवासिनश्च गर्भस्थहिंस्रपरदाररताः खलाश्च ॥
शिखिनो वनसंस्थिताव्रगाणा मरुभूपह्लवचोलहूणचीनाः।
व्यवसायपराक्रमोपपन्नाः परदारानुरता मदोत्कटाश्च ॥इति॥३७-३८॥

अथैतेषां प्रयोजनमाह--

उदयसमये यः स्निग्धांशुर्महान् प्रकृतिस्थितो
यदि च न हतो निर्घातोल्कारजोग्रहमर्दनैः।
स्वभवनगतः स्वोच्चप्राप्तः शुभग्रहवीक्षितः
स भवति शिवस्तेषां येषां प्रभुः परिकीर्तितः ॥३९॥

यो ग्रह उदयसमये क्षितिजात् प्रत्युद्गमकाले स्निग्धांशुर्निर्मलरश्मिर्दृश्यते। महान् विस्तीर्णबिम्बः। प्रकृतिस्थितः स्वभावस्थः। यदि वा निर्घातेन न हतो न चोल्कया न च रजसा न ग्रहयुद्धेन हतः। तथा यश्च स्वभवने स्वराशौ गतः प्राप्तः।

स्वोच्चे आत्मीयोच्चराशौ च प्राप्तः। शुभग्रहैः सौम्यग्रहैः शशिबुधजीवशुक्राणामन्यतमेन वीक्षितो दृष्टः स ग्रहो येषां प्रभुः स्वामी परिकीर्तित उक्तस्तेषां शिवः श्रेयस्करो भवति ॥३९॥

अन्यदप्याह—

अभिहितविपरीतलक्षणे क्षयमुपगच्छति तत्परिग्रहः ।
डमरभयगदातुरा जना नरपतयश्च भवन्ति दुःखिताः ॥४०॥
यदि न रिपुकृतं भयं नृपाणां स्वसुतकृतं नियमादमात्यजं वा ।
भवति जनपदस्य चाप्यवृष्ट्या गमनमपूर्वपुराद्रिनिम्नगासु ॥४१॥

उदयसमये यः स्निग्धांशुरित्यनेन यल्लक्षणमभिहितमुक्तं तस्मिन् विपरीतलक्षणे दृष्टे तत्परिग्रहस्तस्य ग्रहस्य यः परिग्रह उक्तः स क्षयमुपगच्छति विनाशं प्राप्नोति। तथा जना लोका डमरगदभयातुराः। डमरः शस्त्रकलहः। गदो रोगः। भयं भीतिः। एतैरातुराः पीडिता भवन्ति। तथा नरपतयो राजानो दुःखिताश्च भवन्ति ॥

एवंविधे उत्पाते सति नृपाणां राज्ञां यदि रिपुकृतं भयं न भवति स्वसुतकृतमात्मीयपुत्रकृतं वा नियमान्निश्चयादमात्यजं मन्त्रिकृतं वा भयं न भवति। यतोऽस्मिन् ग्रहोत्पाते दृष्टे एत एवोपसर्गा नृपाणामाशङ्क्यन्ते। एषां मध्यादन्यतमो न भवति तदा जनपदस्य लोकस्यापि यथा तथा भयं न भवति। तदा अवृष्ट्या अवर्षणेन। पुरेषु नगरेषु। अद्रिषु पर्वतेषु। निम्नगासु नदीषु। अपूर्वं गमनं भवति। यत्र न कदाचिज्जनपदो गतस्तत्र गच्छति। एतदुक्तं भवति—अवृष्ट्या सर्वमुत्साद्यते। अतो हेतोरन्नशाकजलार्थी जनोऽपूर्वपुराद्रिनिम्नगामुपगच्छति यत्र न कदाचिदपि गत इति। तथा च गर्गः—

स्निग्धरश्मिविशालश्च प्रकृतिस्थश्च यो ग्रहः ।
ग्रहयुद्धरजोधूमनिर्घातोल्काघनाहतः ॥
स यदा स्वोच्चराशिस्थो मित्रभे स्वगृहेऽपि वा ।
स्थितः शुभग्रहैर्दृष्टः स पुष्णाति परिग्रहम् ॥
स्वमन्यथा हन्ति वर्गं जननाशं करोति च ।
नृपाणां भयदः प्रोक्तस्त्ववृष्टिभयकारकः ॥इति ४०–४१॥

इति श्रीभट्टोत्पलविरचितायां संहितावितौ ग्रहभक्तियोगो नाम षोडशोऽध्यायः ॥१६॥

अथ ग्रहयुद्धाध्यायो व्याख्यायते

तत्रादावेवोपोद्घातमाह—

युद्धं यथा यदा वा भविष्यमादिश्यते त्रिकालज्ञैः ।
तद्विज्ञानं करणे मया कृतं [1]सूर्यसिद्धान्ते ॥१॥

यदा यस्मिन् काले यथा वा येन प्रकारेण वा ताराग्रहाणां युद्धं जयपराजयं त्रिकालज्ञैस्त्रिकालविद्भिरतीतवर्तमानानागतकालज्ञैर्भविष्यं भावि यदादिश्यते कथ्यते तद्विज्ञानं तस्य ग्रहयुद्धस्य विज्ञानं यथा ज्ञायते तथा मया करणे पञ्चसिद्धान्तिकायां सूर्यसिद्धान्ते कृतमिति। केचित् सूर्यसिद्धान्तादिति पठन्ति। सूर्यसिद्धान्ताद् भगवद्रविप्रणीतात् सिद्धान्तादानीय कृतमिति ॥१॥

अथ युद्धकारणमाह—

वियति चरतां ग्रहाणामुपर्युपर्यात्ममार्गसंस्थानाम् ।
अतिदूराद् दृग्विषये समतामिव सम्प्रयातानाम् ॥२॥
आसन्नक्रमयोगाद् भेदोल्लेखांशुमर्दनासव्यैः ।
युद्धं चतुष्प्रकारं पराशराद्यैर्मुनिभिरुक्तम् ॥३॥

ग्रहाणां भौमादीनां वियत्याकाशे चरतां गच्छतामुपर्युपर्यूर्ध्वाधः स्थित्या आत्ममार्गे स्ववर्त्मनि प्रतिमण्डलवशेन संस्थितानां दृग्विषये दृष्टिगोचरे अतिदूरादत्यासन्ननिकृष्टत्वात् समतां तुल्यतामिव सम्प्रयातानां प्राप्तानाम् ॥

आसन्नक्रमयोगात्। आसन्नोऽतिनिकटः। क्रमोऽनुपरिपाटी। आसन्नक्रमाद्यो योगस्तस्माद्युद्धं भवति। तच्च युद्धं पराशराद्यैर्मुनिभिः पराशरगर्गकाश्यपवज्रादिभिश्चतुष्प्रकारं चतुर्विधमुक्तं कथितम्। कैर्भेदोल्लेखांशुमर्दनासव्यैः। भेदेनोल्लेखेनांशुमर्दनेनापसव्येन। यत्र ग्रहद्वयमप्येकबिम्बमिव लक्ष्यते स भेदः। अधःस्थेनोर्ध्वस्थश्छाद्यत इति यावत्। यत्र ग्रहस्य ग्रहेण बिम्बपरिधिसंस्पर्शः क्रियते स उल्लेखः। अंशवो रश्मयस्तेषामंशूनां किरणानां परस्परं मर्दनम्। मृद् क्षोदे। भेदोल्लेखस्य व्यतिरेकेण आसन्नयोर्द्वयोर्ग्रहयोः परस्परं रश्मयः संयुक्ता विहन्यमाना इव लक्ष्यन्ते तदंशुमर्दनं कथ्यते। अपसव्यः प्रदक्षिण उच्यते समं कृत्वा दक्षिणोत्तरावस्थानमपसव्यमुच्यते। आचार्येण चन्द्रग्रहसमागमे अपसव्यलक्षणं कृतम्—[2]"शशिनि फलमुदक्स्थे यद् ग्रहस्योपदिष्टं भवति तदपसव्ये सर्वमेव प्रतीपम्" इति। एतदुक्तं भवति—ग्रहस्योत्तरदिक्स्थे शशिनि क्वचित्—

---

१. सूर्यसिद्धान्तादिति पाठान्तरम्।
२. बृहत्संहितायाम् १८ अध्यायस्य ८ श्लोकः।

हस्तमात्रं भवेद्युद्धं बाहुमात्रं समागमः ।
वितस्तिमात्रमुल्लेखो भेदश्चैव निरङ्कुलः ॥ इति ।

नियतफलमपसव्ये दक्षिणदिक्स्थे तदेव फलं विपरीतम्। अमुमेवार्थमृषिपुत्र आह —

दक्षिणेनापसव्यं स्यादुत्तरेण प्रदक्षिणम् ।
ग्रहाणां चन्द्रमा ज्ञेयो नक्षत्राणां तथैव च ॥

ननु ग्रहाणां नक्षत्राणां च चन्द्रमाः प्रदक्षिणश्चापसव्यश्च पठितो न परस्परं ग्रहाणामपसव्यता प्रदक्षिणता च। अत्र वृद्धगर्ग आह —

ग्रहाणां विजये भङ्गे नक्षत्राणां च संश्रये ।
कथं प्रदक्षिणं ज्ञेयमपसव्यं तथैव च ॥
नक्षत्राणां ग्रहाणां वा यदा तूत्तरगः शशी ।
तत्प्रदक्षिणमित्याहुर्भवेत् क्षेमसुवृष्टये ॥
नक्षत्राणां ग्रहाणां वा यदा दक्षिणतो व्रजेत् ।
अपसव्यं तदैव स्यादवृष्टिभयलक्षणम् ॥

सर्वेषां सामान्यमपसव्यलक्षणमपसव्ये वायं न भवति। अपसव्येऽर्थे यदेवापसव्यं तदेव सव्यमिति। भेदश्चोल्लेखश्चांशुमर्दनं चाऽसव्यं च भेदोल्लेखांशुमर्दनासव्यानि, तैश्चतुर्भिर्गतिविशेषैर्ग्रहाणां चतुष्प्रकारमेव युद्धं पराशराद्यैर्मुनिभिरुक्तं पराशरगर्गकाश्यप[1]वज्रवसिष्ठैरभिहितम्।

पराशराद्यैरित्यनेन मुनीनां वचनभेदं प्रदर्शयति। यथा ऋषिपुत्रादिभिर्ग्रहयुद्धं पञ्चदशप्रकारमुक्तम्।

पराशरादीनामेव यन्मतं तच्चाऽऽचार्यस्यापि स्वसिद्धान्ते येन स्थानस्थानेष्वाह—गर्गवसिष्ठपराशरमतमेतदिति। तथा च पराशरः —

भेदनमारोहणमुल्लेखनं रश्मिसंसर्गश्चेति ग्रहयुद्धं चतुर्विधमाचक्षते कुशलाः। तेषां पूर्वात् पूर्वो गरीयान्।

तथा च गर्गः—

छादनं रोधनं चैव रश्मिमर्दस्तथैव च ।
अपसव्यं ग्रहाणां च चतुर्धा युद्धमुच्यते ॥

---

१. वत्स इति अ० क० पु० पाठः।

तथा च काश्यपः —

सर्वग्रहेभ्यः शीघ्रेन्दुस्ततस्तस्यैव चात्मजः।
भार्गवो रविभौमौ च जीवो मन्दः शनैश्चरः॥
शीघ्रगा मन्दगाश्चैते काले त्वेकर्क्षगामिनः।
ततो योगो भवेदेषां यतोंऽशत्वैकमाश्रिताः॥
उपर्युपरिसंस्थास्ते दृश्यन्ते युगपत् स्थिताः।
भेदोल्लेखांशुमर्दाश्चापसव्यश्च तथापरः॥
चतुष्प्रकारः संयोगो युद्धे तु दिविचारिणाम्॥ इति।

एवमन्योन्यापेक्षयाऽपसव्यमुच्यते॥२-३॥

अथ चतुष्प्रकारस्य युद्धस्य प्रत्येकं फलमाह —

भेदे वृष्टिविनाशो भेदः सुहृदां महाकुलानां च।
उल्लेखे शस्त्रभयं मन्त्रिविरोधः प्रियान्नत्वम्॥४॥
अंशुविरोधे युद्धानि भूभृतां शस्त्ररुक्क्षुदवमर्दाः।
युद्धे चाप्यपसव्ये भवन्ति युद्धानि भूपानाम्॥५॥

भेदसंज्ञिते युद्धे वृष्टिविनाशोऽवर्षणं भवति। सुहृदां मित्राणां महाकुलानां च प्रधानानां परस्परं भेदो भवति। उल्लेखे उल्लेखसंज्ञिते युद्धे शस्त्रभयं शस्त्राद्भयम्। मन्त्रिविरोधः सचिवविग्रहः। प्रियान्नत्वं दुर्भिक्षभयमित्यर्थः।

अंशुविरोधसंज्ञिते युद्धे भूभृतां राज्ञां युद्धानि भवन्ति। तथा शस्त्ररुक्क्षुदवमर्दाः। अवमर्दशब्दः प्रत्येकमभिसंबध्यते। शस्त्रेण रुग्भिश्च क्षुधा चावमर्दा भवन्ति। एतैर्जना उपताप्यन्ते। अवमर्दोऽतीव पीडा इत्यर्थः। युद्धे चापसव्य इति। न केवलमंशुविरोधे युद्धानि भूभृतां भवन्ति यावदपसव्ये च ग्रहयुद्धे भूपानां युद्धान्येव भवन्ति। नन्वपसव्यसंज्ञितं युद्धं तदतिरिच्यते यस्माद्भेदोल्लेखयोर्यदन्यत्तदंशुमर्दनं भेदोल्लेखांशुमर्दनान्येव त्रयो गतिविशेषा अवगम्यन्ते। तस्मात् त्रय एव युद्धभेदा वक्तव्या इति। अत्रोच्यते—ग्रहाद् ग्रहस्य दक्षिणदिक्स्थितता परुषता कम्पनं विवर्णता विकृतता अधिरूढता सूक्ष्मता प्रतिनिवर्तनमिति पराभवलिङ्गानि। उत्तरदिक्स्थितता स्निग्धता वैपुल्यादीनि जयलिङ्गानि। दक्षिणदिक्स्थितोऽपि यदा वैपुल्यस्निग्धतादिभिर्विजय लिङ्गैर्युक्तो भवति स जेता कल्प्यते। यदा दक्षिणदिक्स्थो जेता भवति तदा किमुत्तरदिक्स्थिते ग्रहे जेतरि यत्फलम् "शुक्रे[1] बृहस्पतिजिते यायी श्रेष्ठो विनाशमुपयाति" इत्येवमादिकं तदेव फलमुत चन्द्रग्रहसंागमोक्तेन "शशिनि[2] फलमुदक्स्थे

---

१. अस्यैवाध्यायस्य २१ श्लोकः।

२. बृहत्संहितायाम् १८ अध्यायस्य ८ श्लोकः

यद्ग्रहस्योपदिष्टं भवति तदपसव्ये सर्वमेव प्रतीपम्''। यस्य येनार्थसंबन्धो दूरस्थस्यापि तदित्यनेन न्यायेन फलं वैपरीत्येन कल्प्यत इत्याचार्याऽऽर्यभटोपनिबद्धापसव्यसंस्थाने च ग्रहयुद्धस्यापसव्यसंज्ञितस्य फलं कल्प्यत इति। आचार्याऽऽर्यभटश्च प्राग्दक्षिण-परोत्तरानुक्रमेण द्रष्टुर्ग्रहाणां परिभ्रमो यस्तमपसव्यमाह—

देवाः पश्यन्ति भगोलार्द्धमुदङ्मेरुसंस्थिताः सव्यम् ।
अपसव्यगं तथार्द्धं दक्षिणवडवामुखे प्रेताः ॥ इति ।

एतैरनेकाकारैराचार्याणां दर्शनैर्मन्दधियां शिष्याणां खिलीभूतचित्तानां विकल्पिताविकल्पमाशङ्क्याऽऽचार्येणेदमपसव्यसंज्ञितं चतुर्थं युद्धभेदं कल्पयित्वा फलमुक्तं पराशरादिभिर्बहुभिरुक्तं न स्वमनीषया यथा यदेवोत्तरे स्थिते ग्रहे जेतरि फलं दक्षिणदिक्स्थेऽप्यपसव्यसंज्ञिते ग्रहे जेतरि तदेव फलम्। किमत्राप्येवं मन्यसे यथा सव्यापसव्यमाचार्येणानियमेनैवाभिहितम्। तथा चाह—

[1]गन्धर्वनगरमुत्थितमापाण्डुरमशनिपातवातकरम् ।
दीप्ते नरेन्द्रमृत्युर्वामेऽरिभयं जयः सव्ये ॥

वामपार्श्वस्थे अरिभयं जयः सव्ये। लोके च वामपार्श्वं यत्तत्सव्यमुच्यते। तथा च भगवान् व्यास आह—

[2]युध्यतः प्राङ्मुखस्यास्तु सुपर्णोऽयं ममाग्रतः ।
सव्ये पार्श्वे च प्रद्युम्नस्तथा मे दक्षिणो भवान् ॥

तथा च बादरायणः—

तत्रापि हरेर्नयनं दक्षिणमर्कः शशी सव्यम्।

'वामेऽरिभयं जयः सव्ये' इत्यस्यान्य एवार्थ उच्यते—क्षितिस्थानामन्यथा सव्याऽपसव्यं ग्रहर्क्षाणामन्यथा। प्राचीं दिशं गच्छतां यियासूनामुत्तरदिक्स्थः शकुनः प्राचीं दिशमासादयन् दक्षिणं पर्येति यः स प्रदक्षिण उच्यते। सव्यश्च प्रदक्षिणम्। सव्याऽपसव्ययोरभेद एवाऽऽचार्य आह—

[3]ऐन्द्रानलदिशोर्मध्ये त्रिभागेषु व्यवस्थिताः।
कोशाध्यक्षानलाजीवितपोयुक्ताः प्रदक्षिणम् ॥इत्यादि।

---

१. बृहत्संहितायाम् ३६ अध्यायस्य ४ श्लोकः।
२. हरिवंशे १७७ अध्याये ६३ श्लोकस्योत्तरार्द्धम्, ६४ श्लोकस्य पूर्वार्द्धमित्युत्तरार्द्ध-पूर्वार्द्धरूपः श्लोकोऽयम्।
३. बृहत्संहितायां सर्वशाकुने षडशीतिसंख्यस्य प्रथममिश्रकाध्यायस्य २९ श्लोकः।

आचार्यार्यभटेन सव्यापसव्यं भूगतानां सत्त्वानामुक्तमतः कस्माद् ग्रहर्क्षाणामुक्तमप्युच्यते। मेरुमूलनिवासीनि यानि सत्त्वानि तानि मिथुनान्तगमप्यर्कं क्षितिजलेखासन्नमेव पश्यन्ति तथैव वडवामुखनिवासीनि। अत्रोक्तमेवाऽऽचार्येण—

[1]यन्मात्रं भूवृत्तात् क्षणद्वयेनोन्नतिं व्रजत्यर्कः ।
तन्मात्रान्तरचारिणममराः पश्यन्ति नोर्ध्वमधः ॥

तस्मात् क्षितिजलेखासन्नव्यवहारमेवाङ्गीकृत्याऽऽचार्याऽऽर्यभटेनोक्तम्।

सर्व एव शकुनादयो यातुर्वामपार्श्वादग्रत आगत्य दक्षिणपार्श्वेन क्रामन्ति यत्तत्प्रदक्षिणं सव्यं च। एतद्विपरीतं दक्षिणपार्श्वाद्वामपार्श्वगमनं यत्तदपसव्यमेष निश्चयः। "वामेऽरिभयं जयः सव्ये" तदुक्तं प्रदक्षिणेन जयः। आचार्येणेदं प्रदर्शितमेव "प्रदक्षिणं तु यात्रायां जयदं नेष्टमन्यथा" इति। वामेऽरिभयमिति सव्याद्यदन्यथा वामं विपरीतं ग्रहाणां सव्यापसव्यता। उत्तरदिक्स्थः प्रदक्षिणो दक्षिणदिक्स्थो जेता यदा तदा तदपसव्यमिति। नन्वनुक्तं कथमवगम्यते इदम् ? अत्रोच्यते—उक्तमेवेदम्। यतोऽनुलोमेन प्रतिलोमेन वा गत्या भेदेन ग्रहाणां फलं प्रतिभेदान्न प्रदर्शितम्। तत्र एकमेव फलं तथा चानुलोमगः प्रतिलोमगो वा दक्षिणेनोत्तरेण वोल्लेखं करोति। तत्राप्येकमेव फलम्। तथांशुविमर्दस्याप्यनुलोमेन प्रतिलोमेनापि फलस्याभेदः। एवं संस्थानत्रयं चैतद्यदंशुमर्दनस्य फलमपसव्यसंज्ञितस्य तदेव फलम्।

एतदुक्तं भवति—यस्य ग्रहस्योत्तरदिक्स्थस्य यत्फलमभिहितं तस्य ग्रहस्य दक्षिणदिक्स्थस्यापसव्यसंज्ञितस्य जयसंयुक्तस्य तदेव फलम्। तस्मादपसव्यनिर्देशो यः स नातिरिच्यत इति ॥४-५॥

अधुना ग्रहाणां यायिनागराक्रन्दसंज्ञा आह—

रविराक्रन्दो मध्ये पौरः पूर्वेऽपरे स्थितो यायी ।
पौरा बुधगुरुरविजा नित्यं शीतांशुराक्रन्दः ॥६॥
केतुकुजराहुशुक्रा यायिन एते हता घ्नन्ति ।
आक्रन्दयायिपौरान् जयिनो जयदाः स्ववर्गस्य ॥७॥

रविः सूर्यो मध्ये मध्याह्नसमये आक्रन्दसंज्ञो भवति। यातुः पश्चात् स्थितः पार्ष्णिग्राहस्तस्य पश्चात् स्थित आक्रन्दः। पौरः स एव पूर्वे पूर्वाह्णे दिनस्य प्रथमत्रिभागे रविः पौरो नागरो भवति। अपरे अपराह्णे दिनस्य पश्चिमत्रिभागे यायी भवति। यायी यो यातव्यस्याग्रतो याति। बुधगुरुरविजाः सौम्यजीवसौरा नित्यं सर्वकालं पौरा नागराः। शीतांशुश्चन्द्रः सर्वकालमाक्रन्दः ॥६॥

---

१. पञ्चसिद्धान्तिकायाम् १५ अध्यायस्य १५ श्लोकः।

केतुकुजराहुशुक्रा यायिनः। केतुः शिखी। कुजोऽङ्गारकः। राहुः सैंहिकेयः। शुक्रो भार्गवः। एते ग्रहा यायिनः। एत एव हता घ्नन्ति आक्रन्दयायिपौरान्। आक्रन्दयायिपौरा ग्रहा हताः पराजिता आक्रन्दयायिपौरान्नृपान् घ्नन्ति। एत एव जयिनः स्ववर्गस्यात्मीयवर्गस्य जयदा भवन्ति ॥७॥

अत्रैव विशेषमाह--

पौरे पौरेण हते पौराः पौरान् नृपान् विनिघ्नन्ति ।
एवं याय्याक्रन्दा नागरयायिग्रहाश्चैव ॥८॥

पौरेण नागरेण ग्रहेण पौरे ग्रहे हते विजिते सति पौरा नृपाः पौरान् नृपानेव विनिघ्नन्ति नाशयन्ति। एवमनेन प्रकारेण याय्याक्रन्दाः परस्परं विनिघ्नन्ति। नागरयायिग्रहाश्चैवमपि जिताः परस्परं विनिघ्नन्ति। तथा च पराशरः—

तेषां तज्जयाद्विजयो वधाद् वधोऽन्योन्यभेदाद्भेदः साम्यात् साम्यम् ॥८॥

अथ जितलक्षणमाह—

दक्षिणदिक्स्थः परुषो वेपथुरप्राप्य सन्निवृत्तोऽणुः ।
अधिरूढो विकृतो निष्प्रभो विवर्णश्च यः स जितः ॥९॥

यो ग्रहो दक्षिणदिक्स्थो याम्याशास्थः। परुषो रूक्षो निःस्नेहः। वेपथुः सकम्पः। अन्यग्रहमप्राप्य सन्निवृत्तो निवर्तितः। विपरीतां गतिमापन्नः। अणुः सूक्ष्मः। अधि रूढोऽन्येनाऽऽक्रान्तः। विकृतो विकारं गतः। निष्प्रभो दीप्तिरहितः। विवर्णो विगतवर्णः। स जित इति। तथा च पराशरः—

दशभिर्लक्षणैर्ग्रहं जितं विन्द्यात्। विवर्णः परुषः सूक्ष्मो याम्याशामार्गस्थोऽधिरूढो निष्प्रभो विकृतोऽभिहतोऽप्राप्य निवृत्तो वेपनश्च। अन्यथा विजयी।

तथा च गर्गः—

अरश्मिर्लोहितः श्यामः परुषः सूक्ष्म एव च ।
अपसव्यगतो यश्च चक्रान्तःपतितस्तथा ॥
च्युतः स्थानाद्धतो यश्च प्रतिस्तब्धस्तथैव च ।
निष्प्रभो विकृतश्चापि जवेनाभिहतश्च यः ॥
अप्राप्य वा निवृत्तो यो वेपनः कृष्ण एव च ।
लक्षणैः सप्तदशभिर्ग्रहं विन्द्यात् पराजितम् ॥

अथ जयिनो लक्षणमाह—

उक्तविपरीतलक्षणसम्पन्नो जयगतो विनिर्देश्यः ।
विपुलः स्निग्धो द्युतिमान् दक्षिणदिक्स्थोऽपि जययुक्तः ॥१०॥

दक्षिणदिक्स्थः परुष इत्यादिना ग्रन्थेन यल्लक्षणमुक्तं तस्माद्विपरीतलक्षणसम्पन्नः। तद्यथोत्तरदिक्स्थः स्निग्धोऽवेपथुः सम्यक्प्राप्तो विपुल उपरिस्थितः। अविकृतस्तेजस्वी स जययुक्तः। तथा च गर्गः—

द्युतिमान् रश्मिसम्पन्नः प्रसन्नो रजतप्रभः ।
बृहद्रूपधरश्चैव यः समेत्य ग्रहो भवेत् ॥
प्रभावर्णाधिको यश्च ग्रहमावृत्य तिष्ठति ।
तादृशं जयिनं विन्द्याद् ग्रहं ग्रहसमागमे ॥

एवंविधो ग्रहो जयगतो विनिर्देश्यो वक्तव्यः। तथा यो विपुलो बृहद्बिम्बः। स्निग्धो निर्मलः। द्युतिमान् कान्तियुक्तः। स दक्षिणस्यां दिशि स्थितोऽपि जययुक्त इति। एतत् शुक्रस्य प्रायः सम्भवति। तथा च पुलिशाचार्यः—

सर्वे जयिन उदक्स्था दक्षिणदिक्स्थो जया शुक्रः ॥ इति ॥१०॥

अन्यदप्याह—

द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः ।
तत्रान्योन्यं प्रीतिर्विपरीतावात्मपक्षघ्नौ ॥११॥

द्वावपि ग्रहौ मयूखयुक्तौ रश्मिजालेन महता संयुक्तौ। विपुलौ विस्तीर्णौ। स्निग्धौ निर्मलौ। यदि समागमे संयोगे भवतः। तत्र तस्मिन् समागमे। अन्योन्यं परस्परं प्रीतिस्थौ ग्रहौ येषामुक्तौ रविराक्रन्दो मध्य इत्यनेन तेषां प्रीतिर्मैत्री भवति। तावेव ग्रहौ विपरीतौ रश्मिरहितौ। अल्पौ रूक्षौ। यदि समागमे भवतस्तदात्मीयपक्षघ्नौ स्वं स्वं पक्षं हतः ॥११॥

अत्रापि विशेषमाह—

युद्धं समागमो वा यद्यव्यक्तौ स्वलक्षणैर्भवतः ।
भुवि भूभृतामपि तथा फलमव्यक्तं विनिर्देश्यम् ॥१२॥

युद्धं ताराग्रहाणां भौमादीनां परस्परम्। समागम एषामेव चन्द्रमसा सह। युद्धं समागमो वा यदि स्वलक्षणैर्युद्धसमागमोक्तैरव्यक्तावलक्ष्यौ भवतः। युद्धमात्रं जयपराजयरहितमित्यर्थः। यथा द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ विपरीतलक्षणस्थितौ वा तत्र न ज्ञायते को जितः कश्च जयी। समागमे ग्रहाणां चन्द्रे ग्रहादुत्तरगते दक्षिणदिग्गते वा यच्छुभाशुभफलमुक्तं तन्न यद्यव्यक्तः समागमो भवति। एतदुक्तं भवति—ग्रहाच्चन्द्रो नोत्तरेण न च दक्षिणेन वा याति मध्येन गमनं करोति तदा तत्र भेदफलं वक्तव्यं न समागमोक्तं फलं तदव्यक्तं समागमस्य। तथा तेनैव प्रकारेण भूमौ भूभृतां राज्ञामव्यक्तमलक्षमेव फलं विनिर्देश्यं वक्तव्यम्। जये सत्यव्यक्तो जय

आदेश्यः। पराजये पराजयः। एवं चन्द्रस्योत्तरगमनेन शुभं फलं वक्तव्यम्। दक्षिणेनाशुभं मध्येन मध्यफलमिति ॥१२॥

अथ भौमस्य सर्वग्रहविजितस्य फलमाह—

गुरुणा जितेऽवनिसुते बाह्लीका यायिनोऽग्निवार्ताश्च ।
शशिजेन शूरसेनाः कलिङ्गशाल्वाश्च पीड्यन्ते ॥१३॥
सौरेणारे विजिते जयन्ति पौराः प्रजाश्च सीदन्ति ।
कोष्ठागारम्लेच्छक्षत्रियतापश्च शुक्रजिते ॥१४॥

अवनिसुतेऽङ्गारके गुरुणा बृहस्पतिना जिते पराजिते पराभूते बाह्लीका जनाः। यायिनो जिगमिषवः। अग्निवार्ताः सुवर्णकारप्रभृतयः। एते पीड्यन्ते उपताप्यन्ते। शशिजेन बुधेन जिते भौमे शूरसेना जनाः। कलिङ्गाः शाल्वाश्च पीड्यन्ते ॥१३॥

सौरेण शनैश्चरेणाऽऽरेऽङ्गारके विजिते पौरा नागरा जयन्ति विजयं प्राप्नुवन्ति। प्रजाश्च सीदन्त्यवसादयन्ति। शुक्रजिते भौमे कोष्ठागाराणामवलम्बग्रामाणां म्लेच्छानां क्षत्रियाणां च तापः सन्तापो भवति। पीडा भवतीत्यर्थः ॥१४॥

अथ बुधस्य सर्वग्रहविजितस्य फलमाह—

भौमेन हते शशिजे वृक्षसरित्तापसाश्मकनरेन्द्राः ।
उत्तरदिक्स्थाः क्रतुदीक्षिताश्च सन्तापमायान्ति ॥१५॥
गुरुणा जिते बुधे म्लेच्छशूद्रचौरार्थयुक्तपौरजनाः ।
त्रैगर्तपार्वतीयाः पीड्यन्ते कम्पते च मही ॥१६॥
रविजेन बुधे ध्वस्ते नाविकयोधाब्जसधनगर्भिण्यः ।
भृगुणा जितेऽग्निकोपः सस्याम्बुदयायिविध्वंसः ॥१७॥

शशिजे बुधे भौमेनाङ्गारकेण हते वृक्षास्तरवः। सरितो नद्यः। तापसा स्तपस्विनः। अश्मका जनाः। नरेन्द्रा राजानः। उत्तरदिक्स्थाः सौम्याशानिवासिनो जनाः। क्रतुदीक्षिताः सम्यग्यज्ञयाजिनः। एते सर्व एव सन्तापं पीडामायान्ति प्राप्नुवन्ति ॥१५॥

गुरुणा बृहस्पतिना जिते पराजिते बुधे म्लेच्छा जनाः। शूद्राः शूद्रजातयः। चौरास्तस्कराः। अर्थयुक्ताः सधनाः। पौरजनाः पुरवासिनः। त्रैगर्ता जनाः। पार्वतीयाः पर्वतवासिनः। एते सर्व एव पीड्यन्ते उपताप्यन्ते। मही भूश्च कम्पते चलति ॥१६॥

रविजेन शनैश्चरेण बुधे ध्वस्ते विजिते नाविकाः कैवर्ताः। योधाः शत्रुवृत्तयः। अब्जाः जलजाः। सधना ईश्वराः। गर्भिण्यः सगर्भाः स्त्रियः। एते सर्व एव पीडयन्ते। भृगुणा शुक्रेण विजिते बुधे। अग्निकोपो वह्निप्रकोपः। सस्यानां धान्यादीनामम्बुदानां च मेघानां यायिनां यियासूनां च विध्वंसो विनाशो भवति ॥१७॥

अथ जीवस्य सर्वग्रहविजितस्य फलमाह--

जीवे शुक्राभिहते कुलूतगान्धारकैकया मद्राः ।
शाल्वा वत्सा वङ्गा गावः सस्यानि पीडयन्ते ॥१८॥
भौमेन हते जीवे मध्यो देशो नरेश्वरा गावः ।
सौरेण चार्जुनायनवसातियौधेयशिबिविप्राः ॥१९॥
शशितनयेनापि जिते बृहस्पतौ म्लेच्छसत्यशस्त्रभृतः ।
उपयान्ति मध्यदेशश्च संक्षयं यच्च भक्तिफलम् ॥२०॥

जीवे बृहस्पतौ शुक्राभिहते कुलूता जनाः। गान्धाराः। कैकयाः। मद्राः। शाल्वाः। वत्साः। वङ्गाः। गावो धेनवः। सस्यानि धान्यादीनि पीडयन्ते ॥१८॥

भौमेनाङ्गारकेण हते जीवे मध्यो देशः। तथा नरेश्वरा राजानः। गावो धेनवश्च पीडयन्ते। सौरेण शनैश्चरेण हते जीवे अर्जुनायना जनाः। वसातयः। यौधेयाः। शिबयः। विप्रा ब्राह्मणाः। एते सर्व एव पीडयन्ते ॥१९॥

शशितनयेन बुधेन जिते बृहस्पतौ गुरौ। अपिशब्दः स्वार्थे। म्लेच्छा जनाः। सत्यभृतः सत्यवादिनः। शस्त्रभृतः शस्त्रवृत्तयः। मध्यदेशश्च। एते सर्वे संक्षयं विनाशमुपयान्ति। अन्यच्च [1]गुरुभक्तिफलं यत्प्रागुक्तं तच्चापि संक्षयं याति ॥२०॥

अथ शुक्रस्य सर्वग्रहविजितस्य फलमाह--

शुक्रे बृहस्पतिजिते यायी श्रेष्ठो विनाशमुपयाति ।
ब्रह्मक्षत्रविरोधः सलिलं च न वासवस्त्यजति ॥२१॥
कोशलकलिङ्गवङ्गा वत्सा मत्स्याश्च मध्यदेशयुताः ।
महतीं व्रजन्ति पीडां नपुंसकाः शूरसेनाश्च ॥२२॥
कुजविजिते भृगुतनये बलमुख्यवधो नरेन्द्रसंग्रामाः ।
सौम्येन पार्वतीयाः क्षीरविनाशोऽल्पवृष्टिश्च ॥२३॥

---

१. गुरुभक्तिफलं ग्रहभक्तियोगाध्याये यद्गुरुभक्तिफलमित्यर्थः।

रविजेन सिते विजिते गुणमुख्याः शस्त्रजीविनः क्षत्रम् ।
जलजाश्च निपीड्यन्ते सामान्यं भक्तिफलमन्यत् ॥२४॥

बृहस्पतिजिते शुक्रे यायी नायकः। श्रेष्ठः प्रधानो विनाशं क्षयमुपयाति प्राप्नोति। तथा ब्रह्मक्षत्रविरोधः। ब्राह्मणानां क्षत्रियाणां च विरोध उपद्रवः। वासव इन्द्रः सलिलं जलं न त्यजति। न वर्षतीत्यर्थः ॥२१॥

तथा कोशला जनाः। कलिङ्गाः। वङ्गाः। वत्साः। मत्स्याश्च। एत एव मध्यदेशयुता मध्यदेशेन समन्विता महतीं पीडां व्रजन्ति प्राप्नुवन्ति। नपुंसकाः क्लीवाः। शूरसेनाश्च जना महतीं पीडां व्रजन्ति ॥२२॥

भृगुतनये शुक्रे कुजविजिते भौमहते बलमुख्यः सेनापतिस्तस्य वधो मरणं भवति। नरेन्द्राणां राज्ञां सङ्ग्रामा युद्धानि भवन्ति। सौम्येन बुधेन जिते शुक्रे पार्वतीयाः पर्वतवासिनो नाशमायान्ति। गवां च क्षीरविनाशो भवति। अल्पा वृष्टिश्च भवत्येव ॥२३॥

रविजेन शनैश्चरेण सिते शुक्रे विजिते गणमुख्या गणप्रधानाः। शस्त्रजीविनः शस्त्रवृत्तयः। क्षत्रं क्षत्रियवर्गः। जलजा जलोद्भवाश्च। निपीड्यन्ते पीडामुपयान्ति। तद्विशेषफलम्। सामान्यं भक्तिफलमन्यत्। अन्यदपरं यत्स्वभक्तिफलमुक्तं तदपि हन्ति ॥२४॥

अथ सौरस्य ग्रहविजितस्य फलमाह—

असिते सितेन निहतेऽर्घवृद्धिरहिविहगमानिनां पीडा ।
क्षितिजेन तङ्गणान्ध्रोड्रकाशिबाह्लीकदेशानाम् ॥२५॥
सौम्येन पराभूते मन्देऽङ्गवणिग्विहङ्गपशुनागाः ।
सन्ताप्यन्ते गुरुणा स्त्रीबहुला महिषकशकाश्च ॥२६॥

असिते सौरे सितेन शुक्रेण निहते विजिते अर्घवृद्धिर्भवति सर्वद्रव्याणां सुलभत्वं भवति। अहीनां सर्पाणां विहगानां पक्षिणां मानिनां मानयुक्तानां जनानां च पीडा भवति। क्षितिजेनाङ्गारकेण सौरे विजिते सति तङ्गणा जनाः। अन्ध्राः। उड्राः। काशयः। बाह्लीकाः। एतेषां जनानां ये देशास्तेषां पीडा भवति ॥२५॥

सौम्येन बुधेन मन्दे शनैश्चरे पराभूते। अङ्गा जनाः। वणिजः क्रयविक्रयजीविनः। विहङ्गाः पक्षिणः। पशवश्चतुष्पदाः। नागा हस्तिनः। एते सन्ताप्यन्ते पीड्यन्ते। तथा गुरुणा बृहस्पतिना जिते सौरे स्त्रीबहुला ये देशाः। महिषकशकाश्च जनाः। सन्ताप्यन्ते पीड्यन्ते ॥२६॥

अत्रैव विशेषमाह—

अयं विशेषोऽभिहितो हतानां कुजज्ञवागीशसितासितानाम् ।
फलं तु वाच्यं ग्रहभक्तितोऽन्यद्यथा तथा घ्नन्ति हताः स्वभक्तीः ॥२७॥

कुजोऽङ्गारकः। ज्ञो बुधः। वागीशो बृहस्पतिः। सितः शुक्रः। असितः शनैश्चरः। एषां हतानां जितानामयं विशेषोऽभिहित उक्तः। अन्यदपरं यत्फलं तद्ग्रहस्य भक्तितो वाच्यम्। यथा येन प्रकारेण व्यक्तेनाऽव्यक्तेन वा हता जितास्तथा तेनैव प्रकारेण व्यक्तमव्यक्तं वा कृत्वा स्वभक्तीर्घ्नन्ति विनाशयन्तीत्यर्थः। तथा च पराशरः—

ग्रहस्य ये यस्य हताः स्वदेशाः पीडांशमृच्छन्ति त एव तस्य ।
सम्प्राप्तवीर्यस्य जये समर्था भवन्ति तस्यार्द्धचतुष्पदाढ्याः ॥ इति ॥२८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ ग्रहयुद्धं
नाम सप्तदशोऽध्यायः ॥१७॥

अथ शशिग्रहसमागमाध्यायो व्याख्यायते

तत्रादावेव चन्द्रमसो गतिलक्षणमाह—

भानां यथासम्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः ।
प्रदक्षिणं तच्छुभदं नृपाणां याम्येन यातो न शिवः शशाङ्कः ॥१॥

शशाङ्कश्चन्द्रः। भानां नक्षत्राणां यथासम्भवमुत्तरेण यातो गतः। यथासम्भवमिति निकटवर्तिनं प्रदर्शयति। येषां चन्द्रविक्षेपादूनो विक्षेपस्तत्तुल्यो वा तेषां प्रायेण सम्भवति। यथा कृत्तिकारोहिणीपुष्यमघाचित्राविशाखानुराधाज्येष्ठाशतभिषग्रेवतीनां सम्भवति। अन्येषां कदाचित् सम्भवति दूरवर्तिनामुत्तरेण तस्य गमनं न सम्भवति। यथा स्वातिश्रवणधनिष्ठादिषु। स्वातेः सप्तत्रिंशद् भागा उत्तरो विक्षेपः। चन्द्रस्य सार्द्धत्रिचत्वारस्तस्य सर्वकालं दक्षिणेन याति चन्द्रः। येषां चन्द्रविक्षेपादधिक उत्तरतो विक्षेपस्तेषां सदैव दक्षिणेन याति। येषां चन्द्रविक्षेपादधिको दक्षिणो विक्षेपस्तेषां सदैवोत्तरेण याति चन्द्रः। एवं भौमादीनां यथासम्भवमपि योज्यम्। एवं येषां सम्भवति तेषां योज्यम्। ग्रहाणां भौमादीनां वोत्तरेण यातः प्रदक्षिणं कृत्वा। तच्च प्रदक्षिणगमनं नृपाणां राज्ञां शुभं श्रेयस्करम्। याम्येन दक्षिणेन शशाङ्को यातो न शिवो न शुभद इत्यर्थः। ग्रहाणामपि यथासम्भवं योज्यम्। तथा च ऋषिपुत्रः—

दक्षिणेनापसव्यं स्यादुत्तरेण प्रदक्षिणम् ।
ग्रहाणां चन्द्रमा ज्ञेयो नक्षत्राणां तथैव च ॥

तथा च वृद्धगर्गः—

नक्षत्राणां ग्रहाणां वा यदा तूत्तरगः शशी ।
तत्प्रदक्षिणमित्याहुर्भवेत् क्षेमसुवृष्टये ॥
नक्षत्राणां ग्रहाणां वा यदा दक्षिणतो व्रजेत् ।
अपसव्यं तदेव स्यादवृष्टिभयलक्षणम् ॥ इति ॥१॥

अथाङ्गारकस्योत्तरगते चन्द्रे फलमाह—

चन्द्रमा यदि कुजस्य यात्युदक् पार्वतीयबलशालिनां जयः ।
क्षत्रियाः प्रमुदिताः सयायिनो भूरिधान्यमुदिता वसुन्धरा ॥२॥

कुजस्याङ्गारकस्य चन्द्रमाः शशी यद्युदगुत्तरेण याति गच्छति तदा पार्वतीयानां पर्वतनिवासिनाम्। बलशालिनां बलेन ये शालन्ते श्लाघ्यन्ते तेषां च जयो भवति। तथा च सयायिनो यायिभिः सहिताः क्षत्रियाः प्रमुदिता हृष्टा भवन्ति। तथा च वसुन्धरा भूः। भूरिधान्येन बहुधान्येन मुदिता हृष्टा भवति ॥२॥

अथ बुधस्याह—

उत्तरतः स्वसुतस्य शशाङ्कः पौरजयाय सुभिक्षकरश्च ।
सस्यचयं कुरुते जनहार्दिं कोशचयं च नराधिपतीनाम् ॥३॥

शशाङ्कश्चन्द्रः । स्वसुतस्यात्मीयपुत्रस्य बुधस्योत्तरत उत्तरेण यदि याति तदा पौराणां नृपाणां जयाय भवति सुभिक्षं च करोति। तथा च सस्यानां चयमुपचयं जनानां लोकानां च हार्द्दिं तुष्टिं नराधिपतीनां राज्ञां कोशचयं भाण्डागारवृद्धिं च करोति ॥३॥

अथ गुरोराह—

बृहस्पतेरुत्तरगे शशाङ्के पौरद्विजक्षत्रियपण्डितानाम् ।
धर्मस्य देशस्य च मध्यमस्य वृद्धिः सुभिक्षं मुदिताः प्रजाश्च ॥४॥

शशाङ्के चन्द्रे बृहस्पतेरुत्तरगे उत्तरस्यां दिशि स्थिते पौराणां जनानां द्विजानां ब्राह्मणानां क्षत्रियाणां राजन्यानां पण्डितानां विदुषां तथा धर्मस्य मध्यमस्य च देशस्य मध्यमदेशाख्यस्य वृद्धिर्भवति । सुभिक्षं च भवति। तथा सर्वाः प्रजा मुदिता हृष्टा भवन्ति ॥४॥

अथ शुक्रस्याह—

भार्गवस्य यदि यात्युदक् शशी कोशयुक्तगजवाजिवृद्धिदः ।
यायिनां च विजयो धनुष्मतां सस्यसम्पदपि चोत्तमा तदा ॥५॥

भार्गवस्य शुक्रस्य शशी चन्द्रो यद्युदगुत्तरेण याति तदा कोशयुक्तानां संचित-भाण्डागाराणां गजानां वाजिनामश्वानां च वृद्धिप्रदो भवति। तथा धनुष्मतां धनुर्भृतां यायिनां च जिगमिषूणां विजयो भवति। सस्यानामपि चोत्तमा तदा तस्मिन् काले सम्पद्भवति। अपिशब्दोऽत्रातीवार्थे ॥५॥

अथ सौरस्याह—

रविजस्य शशी प्रदक्षिणं कुर्याच्चेत्पुरभूभृतां जयः ।
शकबाह्लिकसिन्धुपह्लवा मुदभाजो यवनैः समन्विताः ॥६॥

रविजस्य शनैश्चरस्य शशी चन्द्रः प्रदक्षिणमुत्तरगमनं चेद्यदि कुर्यात्तदा पुरभूभृतां पुरनिवासिनां राज्ञां जयो भवति। तथा शका जनाः। बाह्लिकाः। सैन्धवाः। पह्लवाः। एते सर्वे यवनैः समन्विताः मुदभाजो भवन्ति। मुदं हर्षं भजन्ते सेवन्ते। प्रहृष्टा भवन्तीत्यर्थः ॥६॥

अत्रैव विशेषमाह—

येषामुदग्गच्छति भग्रहाणां प्रालेयरश्मिर्निरुपद्रवश्च ।
तद्द्रव्यपौरेतरभक्तिदेशान् पुष्णाति याम्येन निहन्ति तानि ॥७॥

येषां भानां नक्षत्राणां ग्रहाणां ताराग्रहाणां च भौमादीनां प्रालेयरश्मिर्हिम-दीधितिश्चन्द्रः। उदगुत्तरेण निरुपद्रव उत्पातरहितो गच्छति याति। तद्द्रव्याणि तेषां भग्रहाणां द्रव्याणि यान्युक्तानि ग्रहभक्तिमध्ये नक्षत्रव्यूहे च। तथा ग्रहाणां मध्याद्ये पौरा नागरा ये चेतरे यायिनस्तांस्तथा तद्भक्तिदेशांस्तेषां ग्रहाणां ये स्वभक्तौ देशा उक्तास्तांश्च पुष्णाति पुष्टिं नयति। याम्येन दक्षिणेन गतस्तान्येव द्रव्यादीनि निहन्ति विनाशयति ॥७॥

अत्रैव पुनरपि विशेषमाह—

शशिनि फलमुदक्स्थे यद् ग्रहस्योपदिष्टं
भवति तदपसव्ये सर्वमेव प्रतीपम् ।
इति शशिसमवायाः कीर्तिता भग्रहाणां
न खलु भवति युद्धं साकमिन्दोर्ग्रहर्क्षैः ॥८॥

शशिनि चन्द्रमसि ग्रहस्योदक्स्थे उत्तरस्यां दिशि स्थिते यत्फलमुपदिष्ट-मुक्तम्—"[1]"चन्द्रमा यदि कुजस्य यात्युदक्" इत्यादिकम्, तत्सर्वमेव निःशेषमपसव्ये दक्षिणदिक्स्थे चन्द्रे प्रतीपं विपरीतं भवति। इत्येवंप्रकारा भग्रहाणां भानां नक्षत्राणां

---

१. अस्यैवाध्यायस्य २ श्लोकः।

ग्रहाणां च शशिसमवायाश्चन्द्रसंयोगाः कीर्तिता उक्ताः खलु। खल्वित्ययं शब्दो निश्चयार्थे। इन्दोश्चन्द्रस्य ग्रहैर्भौमादिभिर्ऋक्षैर्नक्षत्रैश्च साकं सह युद्धं न भवतीति किल सूर्यस्य ग्रहैः सह समागमोऽस्तमयशब्दवाच्यः, चन्द्रेण सह समागमशब्दवाच्यः। भौमादीनां परस्परं युद्धशब्दवाच्य इत्ययमस्मिन् शास्त्रे सिद्धान्तः। तथाऽऽचार्य-विष्णुचन्द्रः—

दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम् ।
कुसुतादीनां युद्धं निगद्यतेऽन्योन्ययुक्तानाम् ।। इति।

यैश्चोक्तमादित्यस्य जयपराजयं ते गोलवासनावाह्याः ॥८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शशिग्रहसमागमो नामाष्टादशोऽध्यायः ॥१८॥

अथ ग्रहवर्षफलाध्यायो व्याख्यायते

कस्य ग्रहस्य कस्मिन् वर्षे कीदृशानि शुभाशुभानि फलानि भवन्तीति। यत आचार्येण पूर्वमेव प्रतिज्ञातमासीत्—

[1]वर्षे यद्यस्य फलं मासे च मुनिप्रणीतमालोक्य ।
तत्तद्वृत्तैर्वक्ष्ये होरातन्त्रोत्तरविधाने ।। इति ।

तत्रादावेवादित्यस्य वर्षफलमाह—

सर्वत्र भूर्विरलसस्ययुता वनानि
दैवाद् बिभक्षयिषुदंष्ट्रिसमावृतानि ।
नद्यश्च नैव हि पयः प्रचुरं स्रवन्ति
रुग्भेषजानि न तथातिबलान्वितानि ॥१॥
तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले
नात्यम्बुदा जलभुचोऽचलसन्निकाशाः ।
नष्टप्रभर्क्षगणशीतकरं नभश्च
सीदन्ति तापसकुलानि सगोकुलानि ॥२॥

---

१. पञ्चसिद्धान्तिकायाम् १ अध्यायस्य २२ श्लोकः। तत्र तृतीयचरणोऽतीवभ्रष्टोऽत्रत्येन तृतीयपदेन शोधनीय इति।

हस्त्यश्वपत्तिमदसह्यबलैरुपेता
बाणासनासिमुशलातिशयाश्चरन्ति ।
घ्नन्तो नृपा युधि नृपानुचरैश्च देशान्
संवत्सरे दिनकरस्य दिनेऽथ मासे ॥३॥

दिनकरस्यादित्यस्य संवत्सरे वर्षे दिने वा तद्वारे मासे वा ईदृशानि फलानि भवन्ति। तथा च यवनेश्वरः—

अब्दाश्रयं लक्षणमीरितं यद् ग्रहस्वभावप्रभवं जनानाम् ।
तदेव तन्मासदिनर्तुषूक्तं तदीश्वरस्थानविकल्पितं च ॥

एवं वर्षजं फलं मासदिवसहोरास्वपि बोद्धव्यम्।

तत्र रविवर्षे मासे दिने वा कीदृशानि फलानि ? सर्वत्र सर्वस्मिन् देशे भूरवनिविरलैस्तनुभिः स्वल्पैः सस्यैर्धान्यादिभिर्युता संयुक्ता भवति। तथैव वनानि अरण्यानि दंष्ट्रिभिः सर्पवराहादिभिः समावृतानि संयुक्तानि भवन्ति। कीदृशैर्दंष्ट्रिभिः ? दैवाद्दैवहेतोर्ये बिभक्षयिषवो भक्षयितुमिच्छवस्तथाभूतैः। दैवशब्देन प्राक्कर्मोच्यते। तथा चोक्तम्—

प्राग्जन्मनि कृतं कर्म शुभं वा यदि वाऽशुभम् ।
दैवशब्देन निर्दिष्टमिह जन्मनि तद्बुधैः ॥ इति ।

तस्माद्वनानि दैवाद् बिभक्षयिषुदंष्ट्रिसमावृतानि भवन्ति। नद्यः सरितः प्रचुरं प्रभूतं पयो जलं न स्रवन्ति न स्यन्दन्ति। रुजां रोगाणामुपशमार्थं यानि च भैषजानि द्रव्याणि तानि न तथा तेनैव प्रकारेणातिबलान्वितानि वीर्ययुक्तानि भवन्ति। रोगोपशान्तिं सम्यग् न कुर्वन्तीत्यर्थः ॥१॥

तथा अदितिज आदित्यः। शिशिरेऽपि काले माघफाल्गुनमासयोः शीतकालेऽपि तीक्ष्णमतिचण्डं तपति सन्तापयति। अम्बुदा मेघा अचलसन्निकाशाः पर्वताकारा अपि नातिजलमुचो न प्रभूतं जलं मुञ्चन्ति त्यजन्ति। तथा नभ आकाशं कीदृशं नष्टप्रभर्क्षगणशीतकरम्, नष्टप्रभो विगतकान्तिर्ऋक्षगणो नक्षत्रसमूहः शीतकरश्चन्द्रमा यत्र तत्। तापसकुलानि तपस्विनां वंशाः। सगोकुलानि गोकुलेन सहितानि सीदन्त्यवसादयन्ति ॥२॥

तथा नृपा राजानो युधि संग्रामे नृपानुचरैः सचिवैर्लोकपालैः सह साकं देशान् विषयान् घ्नन्तो जिघांसन्तो विचरन्ति गच्छन्ति। कीदृशा नृपाः ? हस्त्यश्वपत्तिमदसह्यबलैरुपेताः। हस्तिनो गजाः। अश्वास्तुरगाः। पत्तयः पदातयो विद्यन्ते

येषु बलेषु तानि। तथाभूतैः हस्त्यश्वपत्तिमद्भिरसह्यैरनभिभवनीयैर्बलैः सैन्यैरुपेताः संयुक्ताः। तथा बाणासनासिमुशलातिशयाः। बाणा अस्यन्ते क्षिप्यन्ते येन तद्बाणासनं धनुः। असिः खड्गः। मुशल आयुधविशेषो मुशलाकार एव। तेषु अतिशयो यत्नो येषां ते तथाभूताः। तथा च यवनेश्वरः—

दिवाकराब्दे रणविग्रहोग्रक्षितीश्वरस्तीव्रविषज्वराग्निः।
अवर्षशुष्कद्रुमशुष्कसस्यप्रचण्डवल्गुग्रविषाक्षिरोगाः॥

तथा च समाससंहितायाम्—

तीक्ष्णोर्कः स्वल्पसस्यश्च गतमेघोऽतितस्करः।
बहूरगव्याधिगणो भास्कराब्दो रणाकुलः॥३॥

अथ चन्द्रमस आह—

व्याप्तं नभः प्रचलिताचलसन्निकाशै-
र्व्यालाञ्जनालिगवलच्छविभिः पयोदैः।
गां पूरयद्भिरखिलाममलाभिरद्भि-
रुत्कण्ठितेन गुरुणा ध्वनितेन चाशाः॥४॥

तोयानि पद्मकुमुदोत्पलवन्त्यतीव
फुल्लद्रुमाण्युपवनान्यलिनादितानि।
गावः प्रभूतपयसो नयनाभिरामा
रामा रतैरविरतं रमयन्ति रामान्॥५॥

गोधूमशालियवधान्यवरेक्षुवाटा
भूः पाल्यते नृपतिभिर्नगराकराढ्या।
चित्राङ्किता क्रतुवरेष्टिविघुष्टनादा
संवत्सरे शिशिरगोरभिसम्प्रवृत्ते॥६॥

शिशिरगोः शीतरश्मेः संवत्सरे वर्षे अभिसम्प्रवृत्ते वर्तमाने मासे दिवसे वा ईदृशानि फलानि भवन्ति। कैः? पयोदैर्मेघैर्नभ आकाशं व्याप्तमाच्छादितं भवति। कीदृशैः पयोदैः? प्रचलिताचलसन्निकाशैः। प्रचलिता ये अचलाः पर्वताः तत्सन्निकाशैः तत्सदृशैः। तथा व्यालाञ्जनालिगवलच्छविभिः। व्यालाः सर्पाः। अञ्जनं प्रसिद्धं कज्जलम्। अलिर्भ्रमरः। गवलं महिषशृङ्गं तद्वच्छविः कान्तिर्येषां तैः। किं कुर्वद्भिः? अमलाभिर्निर्मलाभिरद्भिर्जलैर्गां भूमिमखिलां निःशेषां पूरयद्भिराप्यायमानैः। तथा

ध्वनितेन गर्जितेन चाशा दिशः पूरयद्भिः। कीदृशेन? उत्कण्ठितेन विरहिणामौत्सुक्यजननेन। गुरुणा गौरवसंयुक्तेन दुःसहेनेत्यर्थः

तोयानि जलान्यतीवात्यर्थम् । पद्मकुमुदोत्पलवन्ति। पद्मानि कुमुदानि उत्पलानि च विद्यन्ते येषां तानि। तथाभूतानि उपवनानि उद्यानानि। फुल्लद्रुमाणि फुल्लाः कुसुमिता द्रुमा वृक्षा येषु तानि। अलिभिर्भ्रमरैर्नादितानि कृतशब्दानि। तथा गावो धेनवः प्रभूतपयसो बहुक्षीराः। रामाः स्त्रियः। अविरतमविरामं सन्ततं रामान् वल्लभान् पुरुषान् रतैः सुरतै रमयन्ति क्रीडयन्ति। कीदृश्यो रामाः ? नयनाभिरामाः। नयनाभ्यां नेत्राभ्यामभिमुख्येन रम्यन्ते यास्ताः। तथाभूताः

तथा भूरवनिः। नृपतिभी राजभिः पाल्यते अभिरक्ष्यते। कीदृशी भूः ?गोधूमैः शालिभिर्यवैर्धान्यवरैः कलमशालिप्रभृतिभिरिक्षुवाटैश्च संयुक्ता। तथा नगराकराढ्या। नगरैः पत्तनैराकरैराकरोत्पत्तिस्थानैराढ्या बहुला। चित्यङ्किता। चितिरग्निस्थानम्। ताभिरङ्किता चिह्निता। क्रतुवरेष्टिविघुष्टनादा। क्रतुवरा यज्ञश्रेष्ठाः। इष्टयः पुत्रकाम्यादयस्तेषु विघुष्टो घोषितो यो नादो वेदशब्दस्तेन संयुता। तथा च यवनेश्वरः—

सम्पन्नसस्यक्षुप्रशष्पशालिप्ररूढगुल्मो बहुवर्षधारः ।
रत्नौषधिस्नेहपटुप्रसेकश्चान्द्रो रतिस्त्रीसुखवर्धनोऽब्दः ॥

तथा च समाससंहितायाम्—

बहुवर्षातिसस्यश्च गवां क्षीरप्रदायकः ।
चन्द्राब्दः कामिनामिष्टश्चित्यङ्कितमहीतलः ॥ इति ॥ ४-६॥

अथ भौमस्य वर्षफलमाह—

वातोद्धतश्चरति वह्निरतिप्रचण्डो
ग्रामान् वनानि नगराणि च सन्दिधक्षुः ।
हाहेति दस्युगणपातहता रटन्ति
निःस्वीकृता विपशवो भुवि मर्त्यसंघाः ॥७॥
अभ्युन्नता वियति संहतमूर्तयोऽपि
मुञ्चन्ति कुत्रचिदपः प्रचुरं पयोदाः ।
[1]सोम्नि प्रजातमपि शोषमुपैति सस्यं
निष्पन्नमप्यविनयादपरे हरन्ति ॥८॥

---

१. निम्ने प्रजातमिति पाठान्तरम्।

भूपा न सम्यगभिपालनसक्तचित्ताः
पित्तोत्थरुक्प्रचुरता भुजगप्रकोपः ।
एवंविधैरुपहृता भवति प्रजेयं
संवत्सरेऽवनिसुतस्य विपन्नसस्या ॥९॥

अवनिसुतस्याङ्गारकस्य संवत्सरे वर्षे मासे दिवसे वा फलानीदृशानि भवन्ति। कीदृशानि ? वह्निरग्निर्वातेन मारुतेनोद्धतः संचार्यमाणोऽतिप्रचण्डो दुःसहश्चरति। कीदृशः ? ग्रामान् वनानि नगराणि पत्तनादि च सन्दिधक्षुः सन्दग्धुमिच्छुः। तथा भुवि भूमौ मर्त्यसङ्घा मनुष्यसमूहाः। दस्यूनां चौराणां ये गणाः समूहास्तेषां पातैर्हताः परिपीडिताः सन्तो हाहेति रटन्ति रणन्ति हाहाशब्दं कुर्वन्ति। कीदृशाः ? निःस्वीकृता निर्द्धनीकृताः। विपशवो विगताः पशवश्चतुष्पदा येभ्यः।

तथा पयोदा मेघा वियत्याकाशे अभ्युन्नताः अभिमुख्येनोच्चाः। संहतमूर्तयो घनदेहा अपि कुत्रचिदपो जलं प्रचुरं बहु मुञ्चन्ति त्यजन्ति। तथा सीम्नि जलप्रवेशमार्गेऽपि प्रजातम्। निम्ने प्रजातमिति केचित् पठन्ति। निम्ने प्रजातमुत्पन्नं सस्यं धान्यादिकं शोषं नीरसत्वमुपैति प्राप्नोति। तथा निष्पन्नमति संजातमपि सस्यमपरे अन्ये शत्रव उत्पाता वा अविनयादनीत्या अशनिप्रपातादिना वा हरन्त्यपनयन्ति।

तथा भूपा राजानः सम्यग्धर्मेणाभिपालने रणक्षे सक्तचित्तास्तत्परा न भवन्ति। तथा पित्तोत्थानां रुजां रोगाणां प्रचुरता बाहुल्यं भवति। भुजगेभ्यः प्रकोपो लोकानां पीडा भवति। एवंविधैरीदृशैर्दोषैरियं प्रजा जनसमूहता उपहता पीडिता भवति। तथा विपन्नसस्या च। तथा च यवनेश्वरः—

रणप्रचण्डः क्षितिपोऽल्पसस्यो विशुष्कवारिद्रुम[1]शष्पशीर्णः।
अङ्गारकाब्दः प्रचुरोरगाग्निरातङ्कचौर्यक्षुदवृष्टिदृष्टः॥

तथा च समाससंहितायाम्—

अग्नितस्कररोगाढ्यो नृपविग्रहदायकः।
गतसस्यो बहुव्यालो भौमाब्दो बालहा भृशम्॥ इति ॥७-९॥

अथ बुधस्याह—

मायेन्द्रजालकुहकाकरनागराणां गान्धर्वलेख्यगणितास्त्रविदां च वृद्धिः।
पिप्रीषया नृपतयोऽद्भुतदर्शनानि दित्सन्ति तुष्टिजननानि परस्परेभ्यः ॥१०॥

---

१. सत्यवीरुदिति अ० ४० पु० पाठः।

वार्ता जगत्यवितथा विकला त्रयी च
सम्यक् चरत्यपि मनोरिव दण्डनीतिः ।
[1]अध्यक्षरस्वभिनिविष्टधियोऽपि केचि-
दान्वीक्षिकीषु च परं पदमीहमानाः ॥११॥
हास्यज्ञदूतकविबालनपुंसकानां
युक्तिज्ञसेतुजलपर्वतवासिनां च ।
हार्दिं करोति मृगलाञ्छनजः स्वकेऽब्दे
मासेऽथवा प्रचुरता भुवि चौषधीनाम् ॥१२॥

मृगलाञ्छनश्चन्द्रस्तस्माज्जातो बुधः स च स्वके आत्मीये अब्दे वर्षे मासे दिवसे वा ईदृशानि फलानि करोति । कीदृशानि? मायेन्द्रजालकुहकाकरनागराणाम् । मायाविनां प्रपञ्चकुशलानाम् । इन्द्रजालज्ञानां विस्मयदर्शिनाम् । कुहकविदामाश्चर्यदर्शकानाम् । आकरे अर्थोत्पत्तिस्थाने कुशलानाम् । नागराणां नगरवासिनाम् । गान्धर्वविदां गेयज्ञानाम् । लेख्यविदां चित्रज्ञानाम् । गणितविदां गणितप्रवीणानाम् । अस्त्रविदामायुधज्ञानां तद्वर्षे वृद्धिर्भवति । नृतपयो राजानः पिप्रीषया परितोषेच्छया परस्परस्नेहोत्पादनेन अद्भुतदर्शनान्याश्चर्यवन्ति दर्शनानि परस्परेभ्योऽन्योन्यं दित्सन्ति दातुमिच्छन्ति । कीदृशानि ? तुष्टिजननानि हर्षोत्पादकानि ।

वर्तनं वर्ता कृषिः पशुपाल्यं वाणिज्यं चेति । वार्ता जगति लोके अवितथा सत्यस्वरूपा सफला भवति । तद्वृत्तीनां प्रभूतलाभा भवन्तीति यावत् । त्रयी ऋग्यजुःसामलक्षणा एषा चाविकला सम्पूर्णा भवति । लोकेऽत्यर्थं वेदाः पठन्ति । सम्यग्यथागमं शास्त्रविहिता दण्डनीतिर्मनोरिव चरति । प्रजारक्षणं दण्डनीतिः । मनुर्नाम राजा अभूत् । तत्प्रणीता दण्डनीतिः सम्यक् चरति । तेन यथा प्रजारक्षणं कृतं तथा तद्वर्षेऽपि राजा करोति । उक्तं च—

गोरक्षा कृषिवाणिज्यं सेवावर्जं परिग्रहम् ।
वर्तनं जीवनं वार्ता जीवा तूज्जीवनं स्मृतम् ॥
ऋजो यजूंषि सामानीत्येषा त्रय्यभिधीयते ।
त्रय्यां धर्मस्थितिर्वृत्तौ दण्डनीत्यां च रक्षणम् ॥

केचिदन्ये अध्यक्षरस्वभिनिविष्टधियः । अक्षरं परमात्म, तदधिकृत्य कृतं शास्त्रमध्यक्षरं तत्र स्वभिनिविष्टा अभियुक्ता धीर्बुद्धिर्येषां ते तथाभूताः । केचिदप्यध्यात्मविद्यासु योगशास्त्रेषु सक्ताः । अध्यक्षराः स्वभिनिविष्टधियोऽपि केचिदि-

---

१. अध्यक्षरा इति पाठान्तरम् ।

त्यन्ये पठन्ति। तथा अन्ये आन्वीक्षिकीषु तर्कविद्यासु च परं प्रकृष्टं पदं स्थानं मोक्षाख्यमीहमाना वाञ्छां कुर्वाणास्तर्कनिरता भवन्ति।

तथा हास्यज्ञानामुपहासविदां विदग्धानाम्। दूतानां गमागमिकानाम्। कवीनां पण्डितानां काव्यज्ञानाम्। बालानां शिशूनाम्। नपुंसकानां क्लीबानाम्। युक्तिज्ञानां युक्तिविदां प्रयोगज्ञानाम्। सेतुवासिनां स्थलवासिनां सेतौ ये वसन्ति। जलवासिनां जलसमीपस्थितानाम्। पर्वतवासिनां हार्दिं चित्ते तुष्टिं करोति। तथा भुवि भूमौ औषधीनां प्रचुरता बाहुल्यं भवति। तथा च यवनेश्वरः—

सन्धानदानप्रयतः क्षितीशः स्वाध्यायतीर्थाध्वरभीर्द्विजौघः।
निराधिरुङ्मध्यसस्यवर्षो बौधः सुहृत्स्नेहविवर्धनोऽब्दः॥

तथा च समाससंहितायाम्—

ब्रह्मक्षत्रस्य सस्यानां जनानां च कलाविदाम्।
वृद्धिप्रदोऽब्दो बौधस्तु भूपसाम्यकरः क्षितौ॥इति॥१०-१२॥

अथ गुरोर्वर्षफलमाह—

ध्वनिरुच्चरितोऽध्वरे द्युगामी विपुलो यज्ञमुषां मनांसि भिन्दन्।
विचरत्यनिशं द्विजोत्तमानां हृदयानन्दकरोऽध्वरांशभाजाम्॥१३॥
क्षितिरुत्तमसस्यवत्यनेकद्विपपत्त्यश्वधनोरुगोकुलाढ्या।
क्षितिपैरभिपालनप्रवृद्धा द्युचरस्पर्द्धिजना तदा विभाति॥१४॥
विविधैर्वियदुन्नतैः पयोदैर्वृतमुर्वीं पयसाभितर्पयद्भिः।
सुरराजगुरोः शुभे तु वर्षे बहुसस्या क्षितिरुत्तमर्द्धियुक्ता॥१५॥

सुरराज इन्द्रः। तस्य गुरुर्जीवः। तस्य सुरराजगुरोः शुभे शोभने वर्षे मासे दिवसे वा फलान्येतानि भवन्ति। नन्वत्र सर्वग्रहाणां वर्षफलानि सामान्येनाभिहितानि भवन्ति। अत्र तु किमर्थं शुभग्रहणमित्यत्रोच्यते—अथैकदेशे पिङ्गलकालयुक्तरौद्रसंज्ञानि वर्षाण्यशुभफलान्युक्तानि। तेषु सत्यपि गुरौ वर्षपतित्वे न तथा फलानि परिपूर्णानि भवन्ति। यदा तु पुनः प्रभवविभवशुक्लप्रमोदवर्षाणि शुभानि भवन्ति, तदा तेषु गुरौ वर्षपतित्वे सत्येतानि परिपूर्णानि भवन्त्यत उक्तम्—शुभे तु वर्ष इति। कीदृशानि तानि फलानि? ध्वनिरुच्चरित इति। द्विजोत्तमानां ब्राह्मणप्रधानानामध्वरे यज्ञे ध्वनिः शब्द उच्चरित उद्घोषो विपुलो विस्तीर्णः। अनिशं रात्रिवर्जितम्। द्युगामी स्वर्गामी। विचरति गच्छति। कीदृशो ध्वनिः? यज्ञमुषां यज्ञविघ्नकर्तृणां राक्षसानां

---

१. बृहस्पतिचार इत्यर्थः।

मनांसि चेतांसि भिन्दन् विदारयन्। तथा अध्वरांशभाजां यज्ञभागिनामिन्द्रादीनां हृदये चेतसि आनन्दकरः।

क्षितिर्भूः। क्षितिपैर्भूम्यधिपतिभिः। अभिमुख्येन सम्यक् पालनेन रक्षणेन प्रवृद्धा वृद्धिं गता विभाति शोभते। तदा तस्मिन् वर्षे। कीदृशी ? उत्तमसस्यवती। उत्तमानि प्रधानानि सस्यानि धान्यादीनि विद्यन्ते यस्याम्। अनेकैर्बहुभिर्द्विपैर्गजैः। पत्तिभिः पदातिभिः। अश्वैस्तुरगैः। धनैर्वित्तैः। उरुभिर्विस्तीर्णैः। गोकुलैर्गोवाटैराढ्या समृद्धा भवति। तथा द्युचरस्पर्द्धिजना। द्युचरा देवास्तेषां स्पर्द्धिनः सदृशा जना यस्याम्।

वियदाकाशं पयोदैर्मेघैः। विविधैर्नानाकारैरुन्नतैरुच्चैर्वृतं व्याप्तम्। किं कुर्वद्भिः ? उर्वीं भूमिं पयसा जलेन अभि सामस्त्येन विशेषेण तर्पयद्भिः प्रीणयद्भिः। अनवरतकालानुवर्षणात्। तथा क्षितिर्भूमिर्बहुसस्या प्रभूतधान्या। उत्तमर्द्ध्या प्रधानया समृद्ध्या च युक्ता भवति। तथा च यवनेश्वरः—

सुवर्षयज्ञोत्सवसम्प्रदानो नीरुग्व्यथो धर्मपरोऽवनीशः।
[1]स्फीतानुपानैर्बहुसस्यकर्मा गुरोः स्वकर्मप्रयतप्रजोऽब्दः॥

तथा च समाससंहितायाम्—

बहुयज्ञोऽतिसस्यश्च गोगजाश्वहितस्तथा।
पुरन्दरगुरोरब्दो बहुसस्यप्रदः शिवः॥इति॥१३-१५॥

अथ शुक्रस्याह—

शालीक्षुमत्यपि धरा धरणीधराभ-
धाराधरोज्झितपयःपरिपूर्णवप्रा।
श्रीमत्सरोरुहतताम्बुतडागकीर्णा
योषेव भात्यभिनवाभरणोज्ज्वलाङ्गी॥१६॥

क्षत्रं क्षितौ क्षपितभूरिबलारिपक्ष-
मुद्घुष्टनैकजयशब्दविरावितांशम्।
संहृष्टशिष्टजनदुष्टविनष्टवर्गां
गां पालयन्त्यवनिपा नगराकराढ्याम्॥१७॥

---

१. स्फीतान्नपानैरिति अ० क० पु० पाठः।

पेपीयते मधु मधौ सह कामिनीभि-
र्जेगीयते श्रवणहारि सवेणुवीणम् ।
बोभुज्यतेऽतिथिसुहृत्स्वजनैः सहान्न-
मब्दे सितस्य मदनस्य जयावघोषः ॥१८॥

सितस्य शुक्रस्य अब्दे मासे दिने वा फलानीदृशानि भवन्ति। कीदृशानि ? शालीक्षुमत्यपीति। धरा भूरभिनवाभरणोज्ज्वलाङ्गी योषा स्त्रीव भाति शोभते। अभिनवैर्नूतनैराभरणैरलङ्करणैरुज्ज्वलान्युपशोभितानि अङ्गान्यवयवानि यस्या योषायाः सा। कीदृशी धरा ? शालीक्षुमत्यपि शालयो धान्यादीनि। इक्षवश्च विद्यन्ते यस्यां तथाभूता सती। धरणीधराणां पर्वतानां सदृशी तुल्या आभा आकृतिर्येषां ते तथाभूता ये धाराधरा मेघास्तैर्यदुज्झितं त्यक्तं पयो जलं तेन परिपूर्णा वप्रास्तटा यस्याः। श्रीर्विद्यते येषा सरोरुहाणां पद्मानां तानि श्रीमन्ति। तैः श्रीमत्सरोरुहैः। तथा ततं विस्तीर्णं यदम्बु जलं तच्च येषां तडागानां तैः कीर्णा संयुक्ता अत एव विचित्रवर्ण-त्वाद्योषेव भाति। अभिनवाभरणोज्ज्वलाङ्गी योषा धरासाम्येनोपमानम्।

तथा क्षत्रं राजवर्गः क्षितौ भूमौ कीदृशं भवति ? क्षपितभूरिबलारिपक्षम्। क्षपितं विनाशितं भूरिबलं प्रभूतवीर्यमरिपक्षः शत्रुपक्षश्च येन। तथा योऽसौ उद्घुष्ट उद्घोषितोऽनेको बहुप्रकारो यो जयशब्दस्तेन विराविताः कृतःशब्दा आशा दिशो यस्य तत् तथाभूतम्। तथा गां भूमिमवनिपा राजानः पालयन्ति रक्षन्ति। कीदृशीम् ? संहृष्टशिष्टजनदुष्टविनष्टवर्गाम्। संहृष्टः प्रहर्षितः शिष्टजनः साधुलोको यस्याम्। तथा दुष्टानामसाधूनां विशेषेण नष्टो वर्गः समूहो यस्याम्। तथा नगरैः पत्तनैराकरै-रर्थोत्पत्तिस्थानैश्चाढ्यां समृद्धाम्।

पेपीयत इति। मधौ वसन्ते मधु मद्यं पानविशेषः कामिनीभिर्विलासिनीभिः पेपीयते अत्यर्थं पीयते पुनः पुनर्वा पीयते। वेणुर्वंशः। वीणा वल्लकी। ताभ्यां सह सवेणुवीणं श्रवणहारि कर्णसुखकारि जेगीयते। अत्यर्थं पुनः पुनर्वा गीयते। अतिथिभि-रागतैः सुहृद्भिर्मित्रैः स्वजनैर्बन्धुजनैः सह साकमन्नं भोजनं बोभुज्यते। अत्यर्थं पुनः पुनर्वा भुज्यते। मदनस्य कामस्य जयावघोषो जयशब्दोद्घोषणम्। अतीव कामासक्ता भवन्तीत्यर्थः। तथा च यवनेश्वरः—

पर्याप्तसौख्यस्फुटसस्यमेघाः [1]प्ररूढवल्लीवरशष्पपुष्पः ।
कामप्रकामः क्षितिपो मुदाढ्यः शौक्रोऽङ्गनाहर्षवसुप्रदोऽब्दः ॥

---

१. प्रभूतवर्णावमशष्पपुष्प इति अ० क० पु० पाठः।

तथा च समाससंहितायाम्--

सस्याढ्यो धर्मबहुलो गतातङ्को बहूदकः ।
कामिनां कामदः कामं सिताब्दो नृपशर्मदः[1] ॥इति॥१६-१८॥

अथ सौरस्याह—

उद्वृत्तदस्युगणभूरिरणाकुलानि राष्ट्राण्यनेकपशुवित्तविनाकृतानि ।
रोरूयमाणहतबन्धुजनैर्जनैश्च रोगोत्तमाकुलकुलानि बुभुक्षया च ॥१९॥

वातोद्धताम्बुधरवर्जितमन्तरिक्ष-
मारुग्णनैकविटपं च धरातलं द्यौः ।
नष्टार्कचन्द्रकिरणातिरजोऽवनद्धा
तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः ॥२०॥
जातानि कुत्रचिदतोयतया विनाश-
मृच्छन्ति पुष्टिमपराणि जलोक्षितानि ।
सस्यानि मन्दमभिवर्षति [2]वृत्रशत्रु-
र्वर्षे दिवाकरसुतस्य सदा प्रवृत्ते ॥२१॥

दिनकरसुतस्य सौरस्य वर्षे अब्दे प्रवृत्ते वर्तमाने मासे दिवसे वा सदा सर्वकालमेतानि फलानि भवन्ति। कीदृशानि ? उद्धतदस्युगणभूरिरणाकुलानि । उद्धत उद्गतो योऽसौ दस्युगणो दस्यूनां चौराणां समूहस्तेन भूरि बहुप्रकारा ये रणाः संग्रामास्तैराकुलानि सोद्यमानि राष्ट्राणि नृपकुलानि भवन्ति। तथा अनेके प्रभूता ये पशवश्चतुष्पदाः। वित्तानि धनानि। तैश्च विनाकृतानि वर्जितानि रहितानि। हताः संग्रामे बन्धुजना येषां जनानां ते हतबन्धुजना रोरूयमाणा अत्यर्थं रोदमानाश्च ते हतबन्धुजना जनास्तैस्तथाभूतैर्जनैश्चाकुलानि सोद्यमानि कुलानि वंशाः। तथा रोगोत्तमैर्गदप्रधानैर्बुभुक्षया क्षुधा वाऽऽकुलानि कुलानि भवन्ति।

तथान्तरिक्षमाकाशं वातोद्धताम्बुधरवर्जितम्। वातेनोद्धताश्चालिता येऽम्बुदा मेघास्तैर्वर्जितं रहितम्। धरातलं भूतलम्। आरुग्णनैकविटपम्। आरुग्णा भग्ना नैका बहुप्रकारा विटपाः शाखिनश्च यत्र धरातले तत्तथाभूतम्। द्यौराकाशम्। नष्टार्कचन्द्रकिरणा नष्टा अदर्शनं गता अर्कचन्द्रयोः सूर्यशशिनोः किरणा रश्मयो यस्याम्। अतिरजसा सन्ततपांशुना अवनद्धा स्थगिता तोयाशया जलाधारा वापीकूपतडागादयः। विजला जलरहिताः सरितो नद्यस्तन्व्यः स्वल्पजलाश्च भवन्ति।

---

१. शर्मदः सदेति अ० क० पु० पाठः।
२. वृत्रशत्राविति पाठान्तरम्।

अपिशब्दोऽत्र चार्थे। वृत्रशत्रुरिन्द्रः स्वल्पमभिवर्षति। केचित् सप्तम्यन्तं पठन्ति। वृत्रशत्राविन्द्रे मन्दं स्वल्पमभिवर्षति सति कुत्रचिज्जातान्युत्पन्नानि सस्यान्यतोयतया जलेन विना विनाशमृच्छन्ति यान्ति। तथा अपराण्यन्यानि जलोक्षितान्युदकसिक्तानि पुष्टिं वृद्धिमृच्छन्ति। तथा च यवनेश्वरः—

तुष्टाल्पवर्षः प्रबलानिलाग्निर्विपन्नसस्यश्चलितक्षितीशः।
मृत्युक्षुधातङ्कभयोपजुष्टः शनैश्चरोऽब्दः पशूशुद्रगोघ्नः॥

तथा च समाससंहितायाम्—

दुर्भिक्षमरकं रोगान् करोति पवनं तथा।
शनैश्चरोऽब्दो दोषांश्च विग्रहांश्चैव भूभुजाम्॥
संवत्सरोक्तं सकलमृतुमासायनेषु च।
फलं ग्रहस्य वक्तव्यं बलयुक्तस्य नान्यथा॥ इति॥१९-२१॥

अत्रैव वर्षफलविशेषप्रदर्शनार्थमाह—

अणुरपटुमयूखो नीचगोऽन्यैर्जितो वा
न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः।
यदशुभमशुभेऽब्दे मासजं तस्य वृद्धिः
शुभफलमपि चैवं याप्यमन्योन्यतायाम्॥२२॥

यो ग्रहोऽणुः सूक्ष्मो नभसि दृश्यते। अपटुमयूखोऽस्पष्टरश्मिः। नीचगो नीचराशिस्थितः। अन्यैर्ग्रहैर्वा ग्रहयुद्धे जितः पराजितः। स ग्रहो निःशेषाणां सकलानां फलानां शुभानां दाता न भवति। अतोऽन्यथा अस्मादुक्तात् प्रकाराद्यो विपरीतस्थः। स पुष्टिदः पुष्टिं ददाति। वर्षफलानां शुभानां परिपूर्णानां दाता भवति। एतदुक्तं भवति—विस्तीर्णबिम्बः स्फुटमयूख उच्चस्थः स्वगृहत्रिकोणमित्रक्षेत्राणामन्यतमस्थो जया च परिपूर्णान्युक्तानि शुभानि फलानि ददाति। अन्यथा अनिष्टानि फलानि ददाति। यदशुभमित्यादि। अशुभेऽब्दे अशुभे वर्षे रविभौमसौराणामन्यतमे यन्मासजं मासाधिपतेर्ग्रहस्याशुभं फलं तस्य फलस्य वृद्धिर्भवति। एतदुक्तं भवति—अशुभग्रहवर्षम् अशुभस्यैव ग्रहस्य मासाधिपतित्वं यदा भवति तदा तस्मिन् मासे अतीवाशुभं फलं स ग्रहो ददाति। शुभफलमपि चैवम्। मासाब्दयोः शुभत्वे मासजस्यैव शुभस्य वृद्धिर्भवति। याप्यमन्योन्यतायाम्। अन्योन्यतायां मासाब्दयोरेकस्य शुभत्वे अन्यस्याशुभत्वे याप्यमल्पफलं वाच्यमिति। तथा च देवलः—

बली वर्षपतिः पुष्टं फलं यच्छति शोभनम्।
विबलश्च तथानिष्टं वर्षमासदिनात्मकम्॥ इति॥२२॥

इति श्रीभट्टोत्पलविरचितायां संहितावृतौ ग्रहवर्षफलं
नामैकोनविंशतितमोऽध्यायः॥१९॥

अथ ग्रहशृङ्गाटकाध्यायो व्याख्यायते।

तत्रादावेव दिक्फलप्रतिपादनार्थमाह—

यस्यां दिशि दृश्यन्ते विशन्ति तारा ग्रहा रविं सर्वे।
भवति भयं दिशि तस्यामायुधकोपक्षुधातङ्कैः॥१॥

यस्यां दिशि यत्राशायां सर्वे एव तारा ग्रहा भौमबुधगुरुसितसौरा दृश्यन्ते लोकैरवलोक्यन्ते। तथा रविमादित्यं प्रति यस्यां दिशि विशन्ति अस्तमयं यान्ति तस्यां दिशि भयं भवति। कैः आयुधकोपक्षुधातङ्कैः। आयुधकोपेन शस्त्रकोपेन, क्षुधा दुर्भिक्षेण, आतङ्कैरुपद्रवैः। तथा च काश्यपः—

भूमिपुत्रादयः सर्वे यस्यामस्तमिते रवौ।
दृश्यन्तेऽस्तमये वापि यत्र यान्ति रवेस्ततः॥
दुर्भिक्षं शस्त्रकोपं च जनानां मरकं भवेत्।
अन्योन्यं भूमिपाः सर्वे विनिघ्नन्ति प्रजास्तथा॥ इति॥१॥

अधुना तेषामेव ग्रहाणां संस्थानप्रदर्शनार्थमाह—

चक्रधनुःशृङ्गाटकदण्डपुरप्रासवज्रसंस्थानाः।
क्षुद्वृष्टिकरा लोके समराय च मानवेन्द्राणाम्॥२॥

चक्रं चक्राकारम्। धनुश्चापम्। शृङ्गाटकं त्रिकोणम्। दण्डं दण्डाकारम्। पुरं पुराकारमेव प्रासादसदृशम्। प्रासमायुधविशेषः कुन्ताकारम्। वज्रं वज्राकारं मध्यक्षाममुभयाग्रविस्तीर्णम्। एवं चक्रादिसंस्थाना ग्रहाः। संस्थानमाकृतिः। लोके सर्वत्र जनपदे क्षुद्वृष्टिकराः। क्षुद् दुर्भिक्षमवृष्टिं च कुर्वन्ति। तथा मानवेन्द्राणां राज्ञां समराय संग्रामाय च भवन्ति। अर्थादेवोक्तसंस्थानं विना यथा तथा स्थितानां शुभं फलं कुर्वन्तीति। तथा च काश्यपः—

विहायोक्तं च संस्थानं दृश्यन्ते वै ग्रहा यदा।
तदा न तत्फलं ब्रूयाल्लोके नाशुभदाश्च ते॥ इति॥२॥

अथान्तरिक्षप्रविभागेनाशुभं फलमाह—

यस्मिन् खांशे दृश्या ग्रहमाला दिनकरे दिनान्तगते।
तत्राऽन्यो भवति नृपः परचक्रोपद्रवश्च महान् ॥३॥

दिनकरे सूर्ये दिनान्तगते दिवसस्य पर्यन्तं प्राप्ते अस्तमित इत्यर्थः। तस्मिन् खांशे यत्राकाशभागे ग्रहमाला ग्रहपङ्क्तिर्दृश्या भवति, तत्र तस्मिन्नेव भूभागे अन्यो द्वितीयो नृपो राजा भवति। तथा महानतीवं परचक्रोपद्रवश्च भवति। अपरनृपापमर्दस्तत्र भवतीत्यर्थः ॥३॥

अथ ग्रहाणां नक्षत्रस्थितानां फलमाह—

तस्मिन्नृक्षे कुर्युः समागमं तज्जनान् ग्रहा हन्युः।
अविभेदिनः परस्परममलमयूखाः शिवास्तेषाम् ॥४॥

यस्मिन्नृक्षे यत्र नक्षत्रे ग्रहाः समागमं संप्रयोगं कुर्युस्तस्य नक्षत्रस्य ये जना नक्षत्रकूर्मेण नक्षत्रव्यूहेन च कथितास्तान् हन्युर्नाशयेयुः। यदा चं त एव ग्रहाः परस्परमन्योन्यमविभेदिनश्छाद्यच्छादकभावेन स्थिता अमलमयूखा निर्मलरश्मयस्तेषामेव जनानां शिवाः श्रेयस्करा भवन्ति। तथा च समाससंहितायाम्।

सर्वे यदा दिनकरं विशन्ति कुर्युर्ग्रहास्तदा पीडाम्।
क्षुच्छस्त्रभयातङ्कैरपरैश्च परस्पराघातैः ॥
प्रत्यर्चिषः प्रसन्नाः सम्भृतकिरणाः प्रदक्षिणावर्ताः।
सुस्निग्धामलतनवः क्षेमसुभिक्षावहास्ते स्युः ॥४॥

अथ योगषट्कस्य नामान्याह—

ग्रहसंवर्तसमागमसम्मोहसमाजसन्निपाताख्याः।
कोशश्चेत्येतेषामभिधास्ये लक्षणं सफलम् ॥५॥

ग्रहसंवर्तेति। ग्रहशब्दः प्रत्येकमभिसंबध्यते। ग्रहसंवर्त एकः। ग्रहसमागमो द्वितीयः। ग्रहसम्मोहस्तृतीयः। ग्रहसमाजश्चतुर्थः। ग्रहसन्निपातः पञ्चमः। ग्रहकोशः षष्ठः। इत्येवंप्रकाराः षड्योगाः। एषां सफलं फलसहितं लक्षणमभिधास्ये कथयिष्ये ॥५॥

तच्च लक्षणं सफलमाह—

एकर्क्षे चत्वारः सह पौरैर्यायिनोऽथवा पञ्च।
संवर्तो नाम भवेच्छिखिराहुयुतः स सम्मोहः ॥६॥
पौरः पौरसमेतो यायी सह यायिना समाजाख्यः।
यमजोवस ह्नमेऽन्यो यद्यागच्छेत्तदा कोशः ॥७॥

उदितः पश्चादेकः प्राक् चान्यो यदि स सन्निपाताख्यः।
अविकृततनवः स्निग्धा विपुलाश्च समागमे धन्याः ॥८॥

एकस्मिन् ऋक्षे नक्षत्रे चत्वारो ग्रहाः स्थिता भवन्ति पञ्च वा, ते यदि यायिनः पौरैश्च सह समेता भवन्ति तदा संवर्तो नाम योगो भवति। तत्रैव यदि शिखी केतू राहुर्वा भवति तदा योगः सम्मोहो नाम भवति।

पौरो ग्रहः पौरेण ग्रहेण समेतः संयुक्तो यदि यायी यायिना वा सह यद्येकस्मिन्नृक्षे भवति तदा स समाजाख्यो योगो भवति। समाजेत्याख्या यस्य। यमः सौरो जीवो गुरुः। अनयोः सङ्गमे संयोगे यद्यन्यः कश्चिद् ग्रह आगच्छेत्तदा कोशाख्यो योगः।

एको ग्रहः पश्चात् पश्चिमायां दिश्युदितः। आदित्यमण्डलान्निर्गतः। अन्यो द्वितीयः प्राक् च पूर्वस्यां दिशि अर्कमण्डलादेवोद्गतस्तौ तथाभूतौ यद्येकर्क्षं गतौ भवतस्तदा स सन्निपाताख्यो योगः। एतेषां पञ्चानां संस्थानानामभावे यो ग्रह-संयोगः समागम इति ज्ञेयः। तत्र च समागमे सर्व एव ताराग्रहा अविकृततनवो निर्विकारशरीराः स्निग्धा निर्मला विपुला विस्तीर्णाश्च धन्याः शुभाः अन्यथा अशुभा इति। तथा च समाससंहितायाम्—

ग्रहकोशसन्निपातौ संवर्तसमागमौ समाजश्च।
सम्मोहश्चेति तेषां लक्षणमस्तात् समादेश्यम्॥
सूर्यजगुरुसंयोगे द्वावप्येकोऽपरः समागच्छेत्।
स हि भवति कोशसंज्ञो दुर्भिक्षभयावहो लोके॥

एक उदितः प्रतीच्यामपरः प्राच्यां ग्रहोदितो यदि च।
अन्योन्यमथोस्राभिर्विलिखेत् स हि सन्निपाताख्यः॥
सहः पौरेण च पौरो यायी सह यायिना ग्रहो यश्च॥
दृश्येत समायुक्तः स समाजाख्यः समुद्दिष्टः॥

अथ यायिनागराख्याश्चत्वारः पञ्च वा सह भवेयुः।
एकर्क्षे संवर्तः शिखिराहुयुतः स सम्मोहः॥

अन्यथा समागमो यतः पूर्वमेवोक्तम्—

[1]प्रत्यर्चिषः प्रसन्नाः सम्भृतकिरणाः प्रदक्षिणावर्ताः।
सुस्निग्धामलतनवः क्षेमसुभिक्षावहास्ते स्युः॥६-८॥

---

१. अस्यैवाध्यायस्य ४ श्लोकटीकायां समाससंहिताश्लोकः।

अथैतेषां फलान्याह—

समौ तु संवर्तसमागमाख्यौ
सम्मोहकोशौ भयदौ प्रजानाम्।
समाजसंज्ञे सुसमा[1] प्रदिष्टा
वैरप्रकोपः खलु सन्निपाते ॥९॥

संवर्तसमागमाख्यौ द्वौ योगौ समौ। न शुभं नाप्यशुभं कुर्वाते इत्यर्थः। यादृशा भावाः पूर्वमभूवंस्तादृशा एव संवर्तसमागमयोरिति। सम्मोहकोशौ प्रजानां लोकानां भयदौ भयं ददतः। समाजसंज्ञे समाजाख्ये सुसमा सुशोभना समा प्रदिष्टा उक्ता। तद्वर्षं शोभनं भवतीत्यर्थः। केचिब्दहुवचनं पठन्ति। सुसमाः प्रदिष्टा इति। सुसमा भावाः प्रदिष्टा उक्ताः। यादृशाः पूर्वमभूवन् तदधिका भवन्तीत्यर्थः। सन्निपाते वैरप्रकोपः। लोकानां परस्परं वैरं भवति। खलुशब्द आगमद्योतनार्थः। तथा च काश्यपः —

संवर्तसङ्गमौ मध्यौ सम्मोहो भयदः स्मृतः।
कोशश्चानिष्टफलदः समाजाख्यः सुमध्यमः।
सन्निपाते महावैरमन्योन्यमुपजायते ॥

तथा च समाससंहितायाम्—

संवर्तसमागमयोः साम्यं मोहे भयानि कोशे च।
सुसमा समाजसंज्ञे वैराण्यथ सन्निपाताख्ये ॥

तथा चात्रायं विशेषः समाससंहितायाम्—

दुर्भिक्षरोगतस्करशस्त्रावृष्टिक्षुधं ग्रहाः कुर्युः।
आनलवीथ्यां ज्ञेया अजवीथ्यां नेत्रपरिहानिः ॥
शस्त्रभयं मृगवीथ्यां जारद्गव्यां क्षुधं च रोगांश्च।
पशुनाशं गोवीथ्यामृषभाख्यायां च नृपपीडा ॥
सुसुभिक्षमिरावत्यां गजवीथ्यां च ऋतूत्सवामोदाः।
अतिजलमोक्षं कुर्युर्नागाख्यायां च सर्वे तु ॥
ग्रहोदये प्रवासे च सोमसूर्यग्रहे तथा।
विचार्य वीथीमार्गांश्च लोके ब्रूयाच्छुभाशुभम् ॥ इति ॥९॥

इति श्रीभट्टोत्पलविरचितायां संहितावितौ ग्रहशृङ्गाटकं नाम विंशोऽध्यायः ॥२०॥

---

१. सुसमाः प्रदिष्टा इति पाठान्तरम्।

अथ गर्भलक्षणं नामाध्यायो व्याख्यायते ।

तत्रादावेव प्रयोजनदर्शनार्थमाह--

अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम् ।
यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन ॥१॥

जगतो विश्वस्यान्नं प्राणा असवः । यतः प्राणिनामन्नैर्विना [1]प्राणा न वर्तन्ते । तच्चान्नं प्रावृट्कालस्य वर्षासमयस्यायत्तमाधीनं यस्मादतोऽस्माद्धेतोः प्रयत्नेनातिशयेन प्रावृट्कालः परीक्ष्यो विचार्य इत्यर्थः ॥१॥

अथ तल्लक्षणानि वक्ष्यामीत्याह--

तल्लक्षणानि मुनिभिर्यानि निबद्धानि तानि दृष्ट्वेदम् ।
क्रियते गर्गपराशरकाश्यपवज्रादिरचितानि ॥२॥

तस्य प्रावृट्कालस्य यानि लक्षणानि विज्ञानकारणानि मुनिभिर्वसिष्ठादिभिर्निबद्धानि रचितानि तानि दृष्ट्वा अवलोक्य, तथा गर्गपराशरकाश्यपवज्रादिभिर्यानि रचितानि विरचितानि। आदिग्रहणाद्बादरायणोऽसितदेवला गृह्यन्ते । तानि सर्वाणि दृष्ट्वा मयेदं प्रावृट्काललक्षणं क्रियत इति ॥२॥

अथ गर्भलक्षणज्ञस्य दैवविदः प्रशंसार्थमाह--

[2]दैवविदविहितचित्तो द्युनिशं यो गर्भलक्षणे भवति ।
तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे ॥३॥

यो दैववित् कालज्ञोऽविहितचित्तोऽविक्षिप्तचित्तः, न विहितं चित्तं यस्य, अनन्यमनाः, तत्पर इत्यर्थः । केचिदवहितचित्त इति पठन्ति। अविक्षिप्तचित्तो द्युनिशमहोरात्रं यो गर्भलक्षणे भवति तस्याम्बुनिर्देशे वृष्टिकथने मुनेर्ऋषेरिव वाणी गीर्मिथ्या निष्फला न भवति; अपि तु सत्यस्वरूपा भवति। यस्मिन् दिने यस्यां वेलायां स वृष्टिमादिशति तत्र सत्यस्वरूपा भवतीत्यर्थः ॥३॥

अथ शास्त्रप्रशंसार्थमाह--

किं वातः परमन्यच्छास्त्रज्यायोऽस्ति यद्विदित्वैव ।
प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति ॥४॥

---

१. प्राणा न भवेयुरिति अ० क० पु० पाठः ।
२. दैवविदवहितचित्त इति पाठान्तरम् ।

अतोऽस्माद् गर्भलक्षणशास्त्राज्ज्योतिःशास्त्राद्वा अन्यदपरं शास्त्रं ज्यायः प्रशस्ततरं किं वास्ति विद्यते। यच्छास्त्रं ग्रन्थं विदित्वैव ज्ञात्वा कलौ युगे प्रध्वंसिन्यपि सर्वशास्त्रविनाशकर्तरि सत्यपि। यतः सर्वशास्त्राणां कलौ दिनानुदिनं ध्वंसोऽस्ति। तथाभूतेऽपि त्रिकालदर्शी भूतभविष्यद्वर्तमानकालस्य वेत्ता भवतीत्यर्थः ॥४॥

अथात्रैव परमतं स्वमतं चाह—

केचिद्वदन्ति कार्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युः।
न [1]च तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये ॥५॥

केचिदाचार्याः सिद्धसेनप्रभृतयः कार्तिकमासस्य शुक्लान्तं शुक्लपक्षावसानं पौर्णिमान्तं समतीत्यातिक्रम्य गर्भदिवसाः स्युर्भवेयुरिति वदन्ति कथयन्ति। तथा च सिद्धसेनः—

शुक्लपक्षमतिक्रम्य कार्तिकस्य विचारयेत्।
गर्भाणां सम्भवं सम्यक् सस्यसम्पत्तिकारणम् ॥

न [2]च तन्मतं बहूनामिति। यदेतत्प्रागुक्तं कार्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युरिति, तच्च बहूनां प्रभूतानां मुनीनां न मतम्। तस्माद् गर्गादीनां गर्गवसिष्ठपराशरऋषिपुत्रकश्यपानां मतं वक्ष्ये कथयिष्य इति ॥५॥

तच्चाह—

मार्गशिरःसितपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम्।
पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम् ॥६॥

मार्गशीर्षमासस्य सितपक्षप्रतिपत्प्रभृति शुक्लपक्षप्रतिपदारभ्य क्षपाकरे चन्द्रे अषाढां पूर्वां वा समुपगते पूर्वाषाढां प्राप्ते। वाशब्दोऽत्र चार्थे। मार्गशीर्षशुक्लपक्षे यदा पूर्वाषाढास्थश्चन्द्रमा भवति तदारभ्य गर्भाणां लक्षणं ज्ञेयं ज्ञातव्यमिति। तथा चात्र गर्गः—

शुक्लादौ मार्गशीर्षस्य पूर्वाषाढाव्यवस्थिते।
निशाकरे तु गर्भाणां तत्रादौ लक्षणं वदेत् ॥

कश्यपोऽपि—

सितादौ मार्गशीर्षस्य प्रतिपद्दिवसे तथा।
पूर्वाषाढागते चन्द्रे गर्भाणां धारणं भवेत् ॥ इति ॥६॥

---

१. न तु—अ. क. पु. पाठाः
२. न तु—अ. क. पु. पाठः।

अथ धृतस्य गर्भस्य प्रसवकालज्ञानमाह—

यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात्।
पञ्चनवते दिनशते तत्रैव प्रसवमायाति ॥७॥

यो गर्भो यन्नक्षत्रमुपगते यस्मिन्नक्षत्रे व्यवस्थिते चन्द्रे भवेत् स गर्भश्चन्द्रवशाच्चन्द्रयुक्तनक्षत्रवशात् प्रसवमायाति। कियता कालेनेत्याह—

पञ्चनवते दिनशते अतिक्रान्ते। सार्द्धैः षड्भिर्मासैर्गतैस्तत्रैव तस्मिन्नेव नक्षत्रे प्रसवमायाति प्रसूयत इति। एतदुक्तं भवति—यन्नक्षत्रमुपगते चन्द्रे गर्भः सम्भूतस्तस्मात् पञ्चनवते दिनशते अतीते तन्नक्षत्रस्थिते चन्द्रे प्रसवमायाति। नन्वत्र यदुक्तं चन्द्रवशात् प्रसवमायाति तत्किमत्र चान्द्रमानमासे निर्दिष्टम्? चान्द्रमानवशात् पञ्चनवते दिनशते प्रसवं याति। एतन्न। चन्द्रवशादित्यनेनेदं प्रदर्शयति यन्नक्षत्रे चन्द्रे गर्भः सम्भूतः स सावनमानवशात्तन्नक्षत्रस्थे प्रसवं याति। नन्वत्र चन्द्रवशादित्युक्तं कथं सावनं मानमवगम्यत इति; उच्यते। 'तत्रैव प्रसवमायाति' इतिवचनाद्युगयातदिवसेषु गर्भदिवसात् पञ्चनवतिशतयुक्तेष्वहर्गणे कृते तन्नक्षत्रगतश्चन्द्रमा भवति। अन्यथा पञ्चनवते दिनशते चन्द्रः पुनर्गर्भनक्षत्रे न भवत्येव। तस्मान्निश्चीयते स चन्द्रवशाच्चन्द्रकृतगर्भलक्षणवशात्तत्रैव व्यवस्थिते चन्द्रे गर्भः प्रसवं याति। सावनं मानं [1]प्रागस्माभिर्विशेषेण प्रदर्शितम्। संख्योपदिष्टानि यानि तानि सावनमानेनादेष्टव्यानि। सावनान्याचार्येण प्रदर्शितानि—

[2]युगवर्षमासपिण्डं रविमानं साधिमासकं चान्द्रमित्यादि।

तथा चाचार्येण समाससंहितानिबन्धे स्पष्टतरमुक्तम्—

पौषासितपक्षाद्यैः श्रावणशुक्लादयो विनिर्देश्याः।
सार्द्धैः षड्भिर्मासैर्गर्भविपाकः स नक्षत्रे ॥
तस्मादेवं स्थितं सावनमानवशाद् गर्भप्रसव इति ॥७॥

अथ पुनरपि गर्भाणां धृतानां प्रसवकालज्ञानमाह—

सितपक्षभवाः कृष्णे शुक्ले कृष्णा द्युसम्भवा रात्रौ।
नक्तंप्रभवाश्चाहनि सन्ध्याजाताश्च सन्ध्यायाम् ॥८॥

सितपक्षभवाः शुक्लपक्षसम्भूता गर्भाः पुरतः पञ्चनवते दिनशते गते कृष्णपक्षे प्रसवमायान्ति। एवं कृष्णपक्षोद्भवाः शुक्लपक्षे। द्युसम्भवा दिनसम्भवा

---

१. द्रष्टव्यान्यस्य ग्रन्थस्य २५-३० पृष्ठानि।
२. पञ्चसिद्धान्तिकायाम् १ अध्यायस्य १६ श्लोकः।

गर्भा रात्रौ प्रसवमायान्ति। नक्तम्प्रभवा रात्रिसम्भवाश्चाहनि दिवसे प्रसवमायान्ति। सन्ध्याजाताः सन्ध्यायामेव व्यत्ययाद्भवन्ति। प्राक्सन्ध्यासम्भूता अपरसन्ध्यायामपरसन्ध्यासम्भूताः प्राक्सन्ध्यायामिति। तथा च गर्गः—

दिवा भवति यो गर्भो रात्रौ स इति पच्यते।
शुक्लपक्षे समुद्भूतः कृष्णे पक्षे च वर्षति॥
पौर्णमास्यामथोत्पन्नः सोऽमावास्यां प्रवर्षति।
अमावास्यां समुद्भूतः पूर्णमास्यां प्रवर्षति॥
पूर्वसन्ध्यासमुद्भूतः पश्चिमायां प्रवर्षति।
पश्चिमायां समुद्भूतः पूर्वसन्ध्यां प्रवर्षति॥
पूर्वाह्णे यः समुद्भूतः पश्चाद्रात्रौ प्रवर्षति।
निशायां पश्चिमे यश्च स पूर्वाह्णे प्रसूयते॥
दिनार्द्धे तु समुत्पन्नः स निशार्द्धे प्रसूयते॥ इति॥८॥

अथ गर्भाणां विशेषलक्षणं कालनिर्देशं चाह—

मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च।
पौषस्य कृष्णपक्षेण निर्दिशेच्छ्रावणस्य सितम्॥९॥
माघसितोत्था गर्भाः श्रावणकृष्णे प्रसूतिमायान्ति।
माघस्य कृष्णपक्षेण निर्दिशेद् भाद्रपदशुक्लम्॥१०॥
फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः।
तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयुक्शुक्ले॥११॥
चैत्रसितपक्षजाताः कृष्णेऽश्वयुजस्य वारिदा गर्भाः।
चैत्रासितसम्भूताः कार्तिकशुक्लेऽभिवर्षन्ति॥१२॥

मृगशीर्षौ मार्गशीर्षस्तदाद्याः प्रथमपक्षजाता गर्भा मन्दफलाः स्वल्पवर्षदा भवन्ति। प्रथमः पक्षः शुक्लपक्षस्तत्र जाताः सम्भूताः। तथा पौषशुक्लजाताश्च गर्भा मन्दफला एव। अस्मिन् गर्भलक्षणे चैत्रसिताद्या मासा विज्ञातव्याः। यथा चैत्रस्य शुक्लपक्षो वैशाखस्य कृष्णपक्ष इत्येष चैत्रमासः। एवमन्येषां मासानामपि परिकल्पना कार्या। एवमेतच्चान्द्रमानम्।

पौषस्य कृष्णपक्षेण श्रावणस्य सितं शुक्लपक्षं निर्दिशेद् वदेत्। एतदुक्तं भवति—पौषकृष्णपक्षसम्भूतो गर्भः श्रावणशुक्लपक्षे प्रसूयते इति॥

एवं माघसितोत्था गर्भा माघशुक्लपक्षे सम्भूताः श्रावणस्य कृष्णपक्षे

प्रसूतिमायान्ति प्राप्नुवन्ति। तथा माघस्य कृष्णपक्षेण भाद्रपदशुक्लपक्षं निर्दिशेत्॥

फाल्गुनशुक्लपक्षसम्भूता गर्भा भाद्रपदस्यासिते कृष्णपक्षे विनिर्देश्या वक्तव्याः। तस्यैव फाल्गुनस्य ये तु कृष्णपक्षोद्भवा गर्भास्तेऽश्वयुजः शुक्लपक्षेऽभिवर्षन्ति॥

चैत्रसितपक्षजाताश्चैत्रशुक्लपक्षसम्भूता ये गर्भास्तेऽश्वयुजस्य कृष्णपक्षे वारिदा वृष्टिदाः। चैत्रासितसमुद्भूताश्चैत्रकृष्णोद्भवाः कार्तिकशुक्लपक्षेऽभिवर्षन्ति। तथा च गर्गः—

माघेन श्रावणं विन्द्यान्नभस्यं फाल्गुनेन तु।
चैत्रेणाश्वयुजं प्राहुर्वैशाखेन तु कार्तिकम्॥
शुक्लपक्षेण कृष्णं तु कृष्णपक्षेण चेतरम्।
रात्र्यह्नोश्च विपर्यासं कार्यं काले विनिश्चयम्॥इति॥

पराशरस्याप्येवं मतम्॥९-१२॥

अथ मेघानां वायोश्च लक्षणमाह—

पूर्वोद्भूताः पश्चादपरोत्थाः प्राग्भवन्ति जीमूताः।
शेषास्वपि दिक्ष्वेवं विपर्ययो भवति वायोश्च॥१३॥

जीमूता मेघा गर्भकाले ये पूर्वस्यां दिशि समुद्भूतास्ते प्रसवकाले पश्चात् पश्चिमायां दिशि सम्भवन्ति। ये चापरोत्था गर्भकाले पश्चिमायां दिशि सम्भूतास्ते प्रवर्षणे प्राक्पूर्वस्यां दिशि सम्भवन्ति। शेषास्वन्यास्वपि दिक्ष्वेवमनेन प्रकारेण विपर्ययो विपरीतो भवति। तद्यथा—दक्षिणा उत्तरस्याम्, उत्तरा दक्षिणस्याम्। आग्नेया वायव्याम्, वायव्या आग्नेय्याम्। ऐशानीसम्भूता नैर्ऋत्याम्, नैर्ऋतीसम्भूत ऐशान्यामिति।

वायोरनिलस्य चाप्येवमेव विपर्ययो विपरीतो वाच्यः। यथा मेघानां दिग्व्यत्यय उक्तस्तथा वायोरपि वाच्यः। यथा पूर्वोद्भूताः पश्चात्तथा पूर्वोद्भूतो गर्भकाले वायुः प्रवर्षणकाले पश्चिमायां दिशि भवतीत्येवं सर्वत्र योज्यम्। तथा च पराशरः—

"अथ माघेन श्रावणं फाल्गुनेन भाद्रपदं चैत्रेणाश्वयुजं वैशाखेन तु कार्तिकं शुक्लेन कृष्णं कृष्णेन शुक्लं दिवसेन रात्रिं रात्र्या दिवसं गर्भाः प्रवर्षन्ति" इति॥१३॥

अधुना गर्भसम्भवलक्षणान्याह—

ह्लादिमृदूदक्शिवशक्रदिग्भवो मारुतो वियद्विमलम्।
स्निग्धसितबहुलपरिवेषपरिवृतौ हिममयखार्कौ ॥१४॥
पृथुबहुलस्निग्धघनं घनसूचीक्षुरकलोहिताभ्ययुतम्।
काकाण्डमेचकाभं वियद्विशुद्धेन्दुनक्षत्रम् ॥१५॥
सुरचापमन्द्रगर्जितविद्युत्प्रतिसूर्यका शुभा सन्ध्या।
शशिशिवशक्राशास्थाः शान्तरवाः पक्षिमृगसङ्घाः ॥१६॥
विपुलाः प्रदक्षिणचराः स्निग्धमयूखा ग्रहा निरुपसर्गाः।
तरवश्चः निरुपसृष्टाङ्कुरा नरचतुष्पदा हृष्टाः ॥१७॥
गर्भाणां पुष्टिकराः सर्वेषामेव योऽत्र तु विशेषः।
स्वर्त्तुस्वभावजनितो गर्भविवृद्धचै तमभिधास्ये ॥१८॥

गर्भग्रहणकाले ईदृशानि लक्षणानि शुभफलानि भवन्ति। तद्यथा— मारुतो वायुर्ह्लादिराह्लादकः। मृदुः सुखस्पर्शः। उदगुत्तरा। शिवदिगैशानी। शक्रदिक् पूर्वा। असामन्यतमः. सम्भूतः। तथा वियदाकाशं विमलं निर्मलम्। हिममयूखश्चन्द्रः। अर्क आदित्यः। तौ स्निग्धेनारूक्षेण सितेन शुक्लेन बहुलेन घनेन परिवेषेण परिवृतौ व्याप्तौ॥

वियदाकाशं पृथुबहुलस्निग्धघनम्। पृथवो विस्तीर्णाः, बहुला घनाः, स्निग्धा अरूक्षा घना मेघा यस्मिन्। तथा घनसूची मेघ एव सूच्याकारः। क्षुरकः क्षुराकारो मेघः। लोहिताभ्राणि लोहितवर्णा मेघास्तैर्युतं संयुक्तम्। वियत्काकाण्ड-मेचकाभं काकाण्डो वायसाण्डो नीलवर्णः, मेचको बर्हिकण्ठसमवर्णः। काकाण्ड-मेचकवदाभा कान्तिर्यस्मिन्। विशुद्धो निर्मल इन्दुश्चन्द्रो नक्षत्राणि भानि च यस्मिन्॥

तथा सन्ध्या पूर्वापरा वा सुरचापेनेन्द्रधनुषा मन्द्रेण मधुरेण गर्जितेन। गर्जितं मेघशब्दः, विद्युत्तडित्, प्रतिसूर्यो द्वितीयोऽर्कः, एतैर्युक्ता शुभा शस्ता। तथा पक्षिणां विहङ्गानाम्, मृगाणामारण्यपशूनां च संघाः समूहाः। शशिशिव-शक्राशास्थाः। शशिन आशा उत्तरा दिक्, शिवाया ऐशानी, शक्राशा पूर्वा, एतास्वाशासु स्थिताः। ते च शान्तरवा मधुरस्वनाः, अनर्काभिमुखाश्च॥

तथा ग्रहा विपुला विस्तीर्णबिम्बाः। प्रदक्षिणचरा नक्षत्राणामुत्तरेण मार्गेण चरन्ति। एतत्पूर्वमेवोक्तम्।

'भानां यथासम्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः।
प्रदक्षिणं तत्.....,।।इति।।

अतः प्रदक्षिणचराः। स्निग्धमयूखा निर्मलरश्मयः। निरुपसर्गा निरुत्पाताः। तथा तरवो वृक्षाः। निरुपसृष्टाङ्कुराः। निरुपसृष्टा निर्बाधा अङ्कुराश्च येषाम्। नरचतुष्पदा हृष्टाः। नरा मनुष्याः। चतुष्पदा गवादयः। एते हृष्टाः प्रमुदिताः।।

गर्भाणामिति। एवमनेन प्रकारेण ये गुणा उक्तास्ते सर्वेषामेव गर्भाणां पुष्टिकराः। एते च मार्गशिरःसितपक्षप्रतिपत्प्रभृति वैशाखान्तं यावल्लक्षणीयाः। अत्रास्मिन् गर्भलक्षणे योऽन्यो विशेषः स्वर्तुस्वभावजनितः। स्वेनात्मीयेन ऋतुस्वभावेन जनित उत्पादितस्तं गर्भविवृद्धयै गर्भाणां विवृद्धये विशेषमभिधास्ये कथयिष्ये। तथा च पराशरः——

"अथ गर्भसंस्थासु माघादिषु चतुर्षु मासेषु या शुचौ धारणा। नभोनभस्यौ प्रावृट् तस्या अनु वर्षा येषु प्रसवन्ति। तत्र चापाभ्रविद्युत्स्तनयित्नुवर्षाणि गर्भास्तांल्लक्षयेत् प्रशस्तानप्रशस्तांश्च। प्रशस्ताभाश्च यस्मिन् काले सूर्येन्दुनक्षत्राश्रयाणां वर्षालिङ्गानां प्रादुर्भावः। पञ्चरूपता गर्भाणां धारणा मासेभ शुद्धिः" इति।।१४-१८।।

अधुना तल्लक्षणमाह——

पौषे सभार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः।
नात्यर्थं मृगशीर्षे शीतं पौषेऽतिहिमपातः।।१९।।
माघे प्रबलो वायुस्तुषारकलुषद्युती रविशशाङ्कौ।
अतिशीतं सघनस्य च भानोरस्तोदयौ धन्यौ।।२०।।
फाल्गुनमासे रूक्षश्चण्डः पवनोऽभ्रसम्प्लवाः स्निग्धाः।
परिवेषाश्चासकलाः कपिलस्ताम्रो रविश्च शुभः।।२१।।
पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेषाः।
घनपवनसलिलविद्युत्स्तनितैश्च हिताय वैशाखे।।२२।।

पौषे मासे सभार्गशीर्षे मार्गशीर्षसहिते सन्ध्यारागः सन्ध्ययो रक्तत्वम्। अम्बुदा मेघाः सपरिवेषाः परिवेषयुक्ताः। तथा मार्गशीर्षे मासि नार्थं नातिबहु शीतम्। पौषे नातिहिमपातः शुभः।।

---

१. द्रष्टव्योऽस्य ग्रन्थस्य ३०० पृष्ठे १ श्लोकः।

माघे मासि प्रबलश्चण्डो वायुः। तथा रविशशाङ्कावर्कचन्द्रौ तुषारकलुषद्युती। तुषारद्युतिर्हिमकान्तिः सूर्यः। कलुषद्युतिरनिर्मलकान्तिश्चन्द्र इत्यर्थः। अतिशीतमत्यर्थं शीतम्। भानोरादित्यस्य सघनस्य समेघस्यास्तोदयौ धन्यौ द्वावपि शुभावित्यर्थः॥

फाल्गुनमासे पवनो वायू रूक्षः परुषः। चण्डोऽतिवेगः। अभ्राणां मेघानां सम्प्लवा उद्गमाः। स्निग्धाः सूर्याचन्द्रमसोः परिवेषाः। असकला अखण्डाः। रविरादित्यः कपिलः कपिलवर्णस्ताम्रस्ताम्रवर्णश्च शुभः प्रशस्तः॥

चैत्रे मासि गर्भाः पवनेन वायुना घनैर्मेघैर्वृष्ट्या वर्षणे च युक्ताः सपरिवेषाः परिवेषसहिताः शुभाः। वैशाखे मासि घनैर्मेघैः। पवनेन वायुना। सलिलेन जलेन। विद्युता तडिता। स्तनितेन गर्जितेन च युक्ता गर्भा हिताय भवन्ति। तथा च कश्यपः--

शीतमभ्रं तथा वायुश्चन्द्रार्कपरिवेषणम्।
माघे मासि परीक्षेत श्रावणे वृष्टिमादिशेत्॥
फाल्गुने चात्र सङ्घातं वृष्टिस्तनितमेव च।
पुरोवाताश्च ये प्रोक्ता मासि भाद्रपदे शुभम्।
बहुपुष्पफला वृक्षा वाताः शर्करवर्षिणः।
शीतवर्षं तथाभ्राणि चैत्रेणाश्वयुजं वदेत्॥
वहन्ति मृदवो वाताः पुरः शीघ्रं प्रदक्षिणाः।
वैशाखे तानि रूपाणि कार्तिके मासि वर्षति॥

तथा च समाससंहितायाम्--

शस्तानि मृगान्मासाच्छीतहिमवायुमेघकृतानि।
स्तनिततडिज्जलमारुतघनतापान्यतिशयं तु वैशाखे॥
कृष्णेन शुक्लपक्षः सितेन कृष्णो निशा दिनोत्थेन।
रात्र्याहः सन्ध्यायां सन्ध्यादिग्व्यत्ययाज्जलदाः॥इति॥१९-२२॥

अथ गर्भकाले मेघानां लक्षणमाह--

मुक्तारजतनिकाशास्तमालनीलोत्पलाञ्जनाभासः।
जलचरसत्त्वाकारा गर्भेषु घनाः प्रभूतजलाः॥२३॥
तीव्रदिवाकरकिरणाभितापिता मन्दमारुता जलदाः।
रुषिता इव धाराभिर्विसृजन्त्यम्भः प्रसवकाले॥२४॥

ये घना मेघा मुक्तारजतनिकाशा मुक्ताफलानां रजतस्य रौप्यस्य निकाशाः सदृशाः। अतिशुक्ला इत्यर्थः। अथवा तमालनीलोत्पलाञ्जनाभासः। तमालवृक्षस्य नीलोत्पलस्याञ्जनस्य च सदृशवर्णाः। अतिकृष्णा इत्यर्थः। जलचरसत्त्वाकाराः। जलचरा ये सत्त्वा जलप्राणिनः। झषमकरमत्स्यनक्रकूर्मशिशुमारप्रभृतयः। एवंविधा गर्भेषु घना दृष्टाः प्रभूतजला बहुवर्षदाः॥

तीव्रदिवाकरकिरणाभितापिता इति। ये मेघास्तीव्रैः प्रचण्डैर्दिवाकरकिरणैरर्करश्मिभिरभितापिता दग्धदेहाः। मन्दमारुताः स्वल्पपवना जलदा मेघाः। एवंविधा ये गर्भकाले दृश्यन्ते ते प्रसवकाले पञ्चनवते दिवसशते काले अम्भः पानीयं रुषिता रुष्टाः क्रुद्धा इव धाराभिर्विसृजन्त्युत्सृजन्ति। अतिवृष्टिदा भवन्तीत्यर्थः। तथा च सभाससंहितायाम्--

पृथुघनबहुला जलदा जलचरसत्त्वान्विताः शुभा गर्भाः।
स्निग्धसितबहुलपरिवेषपरिवृतौ हिमकरोष्णकरौ॥
नृखगमृगा मुदिता निरुपहतास्तरवः।
वियदमलं च यदा भवति तदा सुसमा॥
स्निग्धतडित्प्रतिसूर्यकमत्स्यशक्रधनुःप्रथमापरमध्ये।
शान्तरवा मृगपक्षिमनुष्या शक्रशशीश्वरदि[1] क्पवनाश्च॥

इति॥२३-२४॥

अधुना गर्भोपघातलक्षणमाह--

गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः।
क्षितिकम्पखपुरकीलककेतुग्रहयुद्धनिर्घाताः॥२५॥
रुधिरादिवृष्टिवैकृतपरिघेन्द्रधनूंषि दर्शनं राहोः।
इत्युत्पातैरेतैस्त्रिविधैश्चान्यैर्हतो गर्भः॥२६॥

इमानि वक्ष्यमाणानि गर्भाणामुपघातलिङ्गानि विनाशचिह्नानि। एतैर्गर्भो वृतो[2] विनश्यति। तद्यथा--उल्कापातः। अशनिर्विद्युत्। पांशुपातः पांशुवर्षणम्। दिग्दाहो दिशां दाहः। क्षितिकम्पो भूचलनम्। खपुरं गन्धर्वनगरम्। कीलकस्तामसकीलकः। केतुः शिखी। ग्रहयुद्धम्। निर्घातो निर्घातशब्दः॥

तथा वृष्टौ वर्षणे। रुधिरादिवैकृतं विकारः। रक्तमांसवसाघृततैला-

---

१. दिग्मरुतश्चेति अ. क. पु. पाठः।
२. हतो विनष्ट इति अ. क. पु. पाठः।

दिवर्षणम्। परिघलक्षणं वक्ष्यति—"[1]परिघ इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा" इति। तस्य परिघस्येन्द्रधनुषः सुरचापस्य दर्शनम्। राहोर्दर्शनं चन्द्रार्कग्रहणदर्शनम्। इत्येवं प्रकारैरुत्पातैरन्यैस्त्रिविधैर्दिव्यान्तरिक्षभौमैरुत्पातैर्गर्भो हतो नष्टो वाच्यः। एतदुक्तं भवति—गर्भे दृष्टे यदि पश्चादुक्तानामुत्पातानामन्यतमो भवति तदा गर्भो हतो यस्य समनन्तरं पश्चादुत्पातसम्भवो नान्य इति। तथा च गर्गः—

अश्मवर्षं तमोवर्षं मांसशोणितवर्षणम्।
उल्कानिर्घातकम्पश्च वज्रपातस्तथैव च॥
परिवेषाः परिधयो वासवस्य धनूंषि च।
अनभ्रस्तनितं वर्षं दिशां दाहस्तथैव च॥
अनार्तवं पुष्पफलं वारणीयेषु वर्षणम्।
ग्रहयुद्धेषु घोरेषु हतान् गर्भान् विनिर्दिशेत्॥

तथा च पराशरः—

"तेषां ग्रहाणामुदयास्तमयोल्कानिर्घाताशनिपातगन्धर्वनगरदिग्दाहार्करश्मिवर्णविकारभूचलनप्रादुर्भावो वर्षास्ववर्षाय" इति॥२५-२६॥

पुनरपि विशेषमाह—

स्वर्तुस्वभावजनितैः सामान्यैर्यैश्च लक्षणैर्वृद्धिः।
गर्भाणां विपरीतैस्तैरेव विपर्ययो भवति॥२७॥

"[2]पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः" इति स्वभावजनितानि गर्भाणां लक्षणानि। तथा—"[3]ह्लादिमृदूदक्शिवशक्रदिग्भवो मारुतः" इत्यादीनि सामान्यलक्षणानि। एवं स्वर्तुस्वभावजनितैर्यैश्च सामान्यैर्लक्षणैर्गर्भाणां वृद्धिरुक्ता तैरेव विपरीतैर्विपर्ययस्तैर्विपर्ययो विपरीतो गर्भाणां हानिरिति। अर्थादेव मध्यमैर्मध्यमं फलं वक्तव्यमिति॥२७॥

अथ येषु नक्षत्रेषु गर्भः सम्भूतो बहुतोयदो भवति तान्याह—

भद्रपदाद्वयविश्वाम्बुदेवपैतामहेष्वथर्क्षेषु।
सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवति॥२८॥

---

१. बृहत्संहितायाम् ४७ अध्यायस्य मयूरचित्रकाख्यस्य १९ श्लोकः।
२. अस्यैवाध्यायस्य १९ श्लोकः।
३. अस्यैवाध्यायस्य १४ श्लोकः।

भद्रपदाद्वयं पूर्वभद्रपदोत्तरभद्रपदे। विश्वेदेव उत्तराषाढा। अम्बुदेवः पूर्वाषाढा। पैतामहो रोहिणी। एतेषु पञ्चसु नक्षत्रेषु सर्वेष्वप्यृतुषु वृद्धो गर्भः "पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः" इत्यादिभिर्गुणैः पुष्टः प्रवर्षणे बहुतोयदः प्रभूतवर्षदो भवति ॥२८॥

साम्प्रतं येषु नक्षत्रेषु गर्भः सम्भतो बहुन्यहानि वर्षति तान्याह--

शतभिषगाश्लेषार्द्रास्वातिमघासंयुतः शुभो गर्भः।
पुष्णाति बहून् दिवसान् हन्त्युत्पातैर्हतस्त्रिविधैः ॥२९॥

शतभिषगाश्लेषा आर्द्रा स्वातिर्मघाः। एभ्यः शतभिषगादिभ्यः पञ्चभ्यः सम्भूतो गर्भः। एतेषां मध्यादेकतमेन नक्षत्रेण सम्भूतः शुभः शुभफलो भवति। स च बहून् दिवसान् पुष्णाति प्रभूतान्यहानि पुष्टिं नयति। पुष्टिनिमित्तान्यभिहितानि--"ह्लादिमृदूदक्" इत्यादीनि। हन्त्युत्पातैर्हतस्त्रिविधैरिति। एष्वेव नक्षत्रेषु विवृद्धो गर्भस्त्रिविधैरुत्पातैर्दिव्यान्तरिक्षभौमैर्हतो[1] हन्त्यात्मानं विनाशयतीत्यर्थः। एतदुक्तं भवति--हतस्तावन्त्येव दिनानि न वर्षति। --"[2]गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः" इत्याद्युक्तानि। त्रिविधमुत्पातलक्षणमाचार्येण समासंहितानिबन्धने स्पष्टतरमुक्तम्--

दिव्यं ग्रहर्क्षजातं भुवि भौमं स्थिरचरोद्भवं यच्च।
दिग्दाहोल्कामारुतपरिवेषाद्यं वियत्प्रभवम् ॥

तथा च गर्गः--

प्राजापत्यं मघा श्लेषा रौद्रं चानिलवारुणम्।
आषाढाद्वितयं चैव तथा भद्रपदाद्वयम् ॥
नक्षत्रदशकं चैतद्यदि स्याद् ग्रहदूषितम्।
न गर्भाः संपदं यान्ति योगक्षेमं न कल्पते ॥
उल्कयाभिहतं वापि केतुना वाप्यधिष्ठितम्।
न गर्भाः सम्पदं यान्ति वासवैश्च न वर्षति ॥इति॥२९॥

अधुनानन्तरोक्ताया दिवससंख्याया नियमं करोति--

मृगमासादिष्वष्टौ षट् षोडश विंशतिश्चतुर्युक्ता।
विंशतिरथ दिवसत्रयमेकतमर्क्षेण पञ्चभ्यः ॥३०॥

---

१. हतो विनष्ट आत्मानं हन्ति व्यापादयतीति अ. क. पु. पाठः।
२. अस्यैवाध्यायस्य २५ श्लोकः।

मृगमास आदिर्येषां मासानां ते मृगमासादयस्तेषु मृगमासादिषु प्राक्-पठितानां पञ्चानामन्यतमेन नक्षत्रेण यदा गर्भो विवृद्धस्तदा यथासंख्यमेते दिवसा योजनीयाः। यदोक्तनक्षत्राणामन्यतमेन नक्षत्रेण मार्गशीर्षे मासि गर्भः सम्भूतस्तदा पञ्चनवते दिवसशतेऽतिक्रान्ते अष्टौ दिवसान् प्रवर्षति देवः। एवं पौषे षट्। माघे षोडश। फाल्गुने चतुर्युक्ता विंशतिश्चतुर्विंशतिः। चैत्रे विंशतिः। अथानन्तरं वैशाखे दिवसत्रयमिति। एवं शतभिषगादिभ्यः पञ्चभ्यो मध्यादेकतमर्क्षेण वृष्टिप्रमाणम्। अमुमेवार्थमृषिपुत्र आह—

माघे षोडशसंख्यास्तु षोडशाष्टौ च फाल्गुने।
विंशतिश्चैत्रमासे तु त्रयश्चेन्द्राग्निदैवते॥
अष्टौ सौम्येऽथ षट् पौषे संख्यास्तासु च वर्षति।

एवमेतावन्ति दिनानि पञ्चनवते दिवसशते गतेऽतिक्रान्ते प्रवर्षतीत्यर्थः। गर्भो बहुतोयदो भवत्यनेन वातिदिष्टं यथा प्रवर्षणे एतावती पानीयसंख्या अध्वसंख्या वाचार्येण समाससंहितानिबन्धने उक्ता—

पञ्चनिमित्तैः शतयोजनं तदर्द्धार्द्धमेकहान्याऽतः।
वर्षति पञ्चनिमित्ताद् रूपेणैकेन यो गर्भः॥इति।

निमित्तानि पञ्चाचार्यो वक्ष्यति—

[1]पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः।
स भवति बहुतोयः पञ्चरूपाभ्युपेतः॥इति।

निमित्तान्येकोत्तरवृद्ध्या मार्गशीर्षमासादिषु परिपठितानि। पौषे समार्गशीर्ष इत्यादि। तथा मृगशीर्षाद्या गर्भा मन्दफला इत्यनेन ग्रन्थेन मार्गशीर्षजातानां गर्भाणां पौषशुक्लजातानां मन्दफलतोक्ता, तदपवादमाह—

सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवतीति। तेन पञ्चनिमित्तसंयुक्तो गर्भः पुष्टो बहुतोयदो भवति। गर्भाणां पुष्टिनिमित्तान्यभिधाननिमित्तानि च प्राक्प्रदर्शितानि। विशेषनिमित्तैर्युक्तो गर्भो बहुतोयदो भवति। ३०॥

तान्याह—

[2]पञ्चनिमित्तैः शतयोजनं तदर्द्धार्द्धमेकहान्याऽतः।
वर्षति पञ्चनिमित्ताद्रूपेणैकेन यो गर्भः॥३१॥

---

१. अस्यैवाध्यायास्यान्तिमः श्लोकः।

२. अस्यैवाध्यायस्य ३७ श्लोकः। इदं पद्यं समाससंहितास्थं पूर्वं प्रमाणत्वेनोपन्यस्तमत्रापि मूले भट्टोत्पलेन न्यासि।

भद्रपदाद्वयं पूर्वभद्रपदोत्तरभद्रपदे। विश्वेदेव उत्तराषाढा। अम्बुदेवः पूर्वाषाढा। पैतामहो रोहिणी। एतेषु पञ्चसु नक्षत्रेषु सर्वेष्वप्यृतुषु वृद्धो गर्भः "पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः" इत्यादिभिर्गुणैः पुष्टः प्रवर्षणे बहुतोयदः प्रभूतवर्षदो भवति ॥२८॥

साम्प्रतं येषु नक्षत्रेषु गर्भः सम्भतो बहुन्यहानि वर्षति तान्याह--

शतभिषगाश्लेषार्द्रास्वातिमघासंयुतः शुभो गर्भः।
पुष्णाति बहून् दिवसान् हन्त्युत्पातैर्हतस्त्रिविधैः ॥२९॥

शतभिषगाश्लेषा आर्द्रा स्वातिर्मघाः। एभ्यः शतभिषगादिभ्यः पञ्चभ्यः सम्भूतो गर्भः। एतेषां मध्यादेकतमेन नक्षत्रेण सम्भूतः शुभः शुभफलो भवति। स च बहून् दिवसान् पुष्णाति प्रभूतान्यहानि पुष्टिं नयति। पुष्टिनिमित्तान्यभिहितानि--"ह्लादिमृदूदक्" इत्यादीनि। हन्त्युत्पातैर्हतस्त्रिविधैरिति। एष्वेव नक्षत्रेषु विवृद्धो गर्भस्त्रिविधैरुत्पातैर्दिव्यान्तरिक्षभौमैर्हतो[1] हन्त्यात्मानं विनाशयतीत्यर्थः। एतदुक्तं भवति--हतस्तावन्त्येव दिनानि न वर्षति। --"[2]गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः" इत्याद्युक्तानि। त्रिविधमुत्पातलक्षणमाचार्येण समासंहितानिबन्धने स्पष्टतरमुक्तम्--

दिव्यं ग्रहर्क्षजातं भुवि भौमं स्थिरचरोद्भवं यच्च।
दिग्दाहोल्कामारुतपरिवेषाद्यं वियत्प्रभवम् ॥

तथा च गर्गः--

प्राजापत्यं मघा श्लेषा रौद्रं चानिलवारुणम्।
आषाढाद्वितयं चैव तथा भद्रपदाद्वयम् ॥
नक्षत्रदशकं चैतद्यदि स्याद् ग्रहदूषितम्।
न गर्भाः संपदं यान्ति योगक्षेमं न कल्पते ॥
उल्कयाभिहतं वापि केतुना वाप्यधिष्ठितम्।
न गर्भाः सम्पदं यान्ति वासवैश्च न वर्षति ॥इति॥२९॥

अधुनानन्तरोक्ताया दिवससंख्याया नियमं करोति--

मृगमासादिष्वष्टौ षट् षोडश विंशतिश्चतुर्युक्ता।
विंशतिरथ दिवसत्रयमेकतमर्क्षेण पञ्चभ्यः ॥३०॥

---

१. हतो विनष्ट आत्मानं हन्ति व्यापादयतीति अ. क. पु. पाठः।
२. अस्यैवाध्यायस्य २५ श्लोकः।

मृगमास आदिर्येषां मासानां ते मृगमासादयस्तेषु मृगमासादिषु प्राक्-पठितानां पञ्चानामन्यतमेन नक्षत्रेण यदा गर्भो विवृद्धस्तदा यथासंख्यमेते दिवसा योजनीयाः। यदोक्तनक्षत्राणामन्यतमेन नक्षत्रेण मार्गशीर्षे मासि गर्भः सम्भूतस्तदा पञ्चनवते दिवसशतेऽतिक्रान्ते अष्टौ दिवसान् प्रवर्षति देवः। एवं पौषे षट्। माघे षोडश। फाल्गुने चतुर्युक्ता विंशतिश्चतुर्विंशतिः। चैत्रे विंशतिः। अथानन्तरं वैशाखे दिवसत्रयमिति। एवं शतभिषगादिभ्यः पञ्चभ्यो मध्यादेकतमर्क्षेण वृष्टिप्रमाणम्। अमुमेवार्थमृषिपुत्र आह—

माघे षोडशसंख्यास्तु षोडशाष्टौ च फाल्गुने।
विंशतिश्चैत्रमासे तु त्रयश्चेन्द्राग्निदैवते॥
अष्टौ सौम्येऽथ षट् पौषे संख्यास्तासु च वर्षति।

एवमेतावन्ति दिनानि पञ्चनवते दिवसशते गतेऽतिक्रान्ते प्रवर्षतीत्यर्थः। गर्भो बहुतोयदो भवत्यनेन वातिदिष्टं यथा प्रवर्षणे एतावती पानीयसंख्या अध्वसंख्या वाचार्येण समाससंहितानिबन्धने उक्ता—

पञ्चनिमित्तैः शतयोजनं तदर्द्धार्द्धमेकहान्याऽतः।
वर्षति पञ्चनिमित्ताद् रूपेणैकेन यो गर्भः॥इति।

निमित्तानि पञ्चाचार्यो वक्ष्यति—

[1]पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः।
स भवति बहुतोयः पञ्चरूपाभ्युपेतः॥इति।

निमित्तान्येकोत्तरवृद्ध्या मार्गशीर्षमासादिषु परिपठितानि। पौषे समार्गशीर्ष इत्यादि। तथा मृगशीर्षाद्या गर्भा मन्दफला इत्यनेन ग्रन्थेन मार्गशीर्षजातानां गर्भाणां पौषशुक्लजातानां मन्दफलतोक्ता, तदपवादमाह—

सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवतीति। तेन पञ्चनिमित्तसंयुक्तो गर्भः पुष्टो बहुतोयदो भवति। गर्भाणां पुष्टिनिमित्तान्यभिधाननिमित्तानि च प्राक्प्रदर्शितानि। विशेषनिमित्तैर्युक्तो गर्भो बहुतोयदो भवति। ३०॥

तान्याह—

[2]पञ्चनिमित्तैः शतयोजनं तदर्द्धार्द्धमेकहान्याऽतः।
वर्षति पञ्चनिमित्ताद्रूपेणैकेन यो गर्भः॥३१॥

---

१. अस्यैवाध्यायास्यान्तिमः श्लोकः।

२. अस्यैवाध्यायस्य ३७ श्लोकः। इदं पद्यं समाससंहितास्थं पूर्वं प्रमाणत्वेनोपन्यस्तमत्रापि मूले भट्टोत्पलेन न्यासि।

पञ्चभिर्निमित्तैः संयक्तो गर्भ आसमन्ताद्योजनशतं वर्षति। तदर्द्धार्द्धम्। तदित्यनेन तस्यैव योजनशतस्य परामर्शं करोति। पञ्चानां निमित्तानामेकैकनिमित्तहानौ सामान्येनैवाशेषविधिक्रमेणार्द्धमत्र योजनीयम्। चतुर्निमित्तस्तदर्धं शतार्धं पञ्चाशद्योजनानि वर्षति। त्रिनिमित्तो गर्भस्तदर्धं पञ्चविंशतियोजनानि। द्विनिमित्तो गर्भस्तदर्द्धं साद्धानि द्वादशयोजनानि वर्षति। पञ्चनिमित्तादूपेणैकेन यो गर्भ इति। पञ्चानां निमित्तानामन्यतमरूपेणैकेन यः संयुक्तो गर्भः समन्तात्पञ्चयोजनानि वर्षति। पञ्चसंख्याग्रहणं निर्दिष्टार्द्धक्रमनिर्देशव्युदासार्थमिति ॥३१॥

प्रत्येकनिमित्तसंयुक्तानां गर्भाणां पानीयसंख्यामाह—

द्रोणः पञ्चनिमित्ते गर्भे त्रीण्याढकानि पवनेन।
षड् विद्युता नवाभ्रैः स्तनितेन द्वादश प्रसवे॥३२॥

वृष्टेराढकद्रोणप्रमाणपरिज्ञानं पराशर आह—

आढकांश्चतुरो द्रोणमपां विन्द्यात् प्रमाणतः।
धनुष्प्रमाणं मेदिन्या विन्द्याद् द्रोणातिवर्षणम्॥
समे विशाङ्गुलानाहे द्विचतुष्काङ्गुलोच्छ्रिते।
भाण्डे वर्षति सम्पूर्णं ज्ञेयमाढकवर्षणम्॥

तथा चाचार्य आह—

[1]हस्तविशालं कुण्डकमधिकृत्याम्बुप्रमाणनिर्देशः।
पञ्चाशत्पलमाढकमनेन मिनुयाज्जलं पतितम्॥इति।

द्रोणः पञ्चनिमित्तैः पञ्चनिमित्तसंयुक्ते गर्भे द्रोणः प्रवर्षति। षड् विद्युता। आढकानीत्यनुवर्तते। विद्युता संयुक्ते गर्भे आढकानि षड् वर्षति। नवाभ्रैर्मेघैः संयुक्ते गर्भे नवाढकानि वर्षति। स्तनितेन द्वादश प्रसवे। स्तनितेन गर्जितेन द्वादशाढकानि प्रसवकाले वर्षति। प्रसवकालेऽभिहित एव। पञ्चनवते दिनशते तत्रैव प्रसवमायाति। अमुमेवार्थं वृद्धगर्ग आह—

वाते तु आढ़कं विन्द्यात् स्तनिते द्वादशाढकम्।
नवाढकं तथाभ्रेषु द्योतितेषु षडाढकम्।
निमित्तपञ्चकोपेते द्रोणं वर्षति वासवः॥इति॥३२॥

---

१. बृहत्संहितायाम् २३ अध्यायस्य २ श्लोकः।

अत्रैव विशेषमाह—

क्रूरग्रहसंयुक्ते करकाशनिमत्स्यवर्षदा गर्भाः।
शशिनि रवौ वा शुभसंयुतेक्षिते भूरिवृष्टिकराः॥३३॥

गर्भनक्षत्रे क्रूरग्रहसंयुक्ते पापग्रहाधिष्ठिते गर्भाः करकाशनिमत्स्यवर्षदाः। करका उपलवृष्टिः, अशनिर्विद्युत्, मत्स्या मीनास्तैः संयुक्तं वर्षं ददति। शशिनि चन्द्रे रवावादित्ये वा तत्र स्थिते तस्मिंश्च शुभग्रहैर्बुधजीवशुक्राणामन्यतमेन संयुक्ते ईक्षिते दृष्टे च। संयुतश्चासौ ईक्षितश्च तस्मिंस्तथाभूते भूरिवृष्टिकरा बहुवर्षदा गर्भाः॥३३॥

अथ गर्भसम्भवे सति विशेषलक्षणमाह—

गर्भसमयेऽतिवृष्टिर्गर्भाभावाय निर्निमित्तकृता।
द्रोणाष्टांशेऽभ्यधिके वृष्टे गर्भः स्रुतो भवति॥३४॥

गर्भसमये गर्भग्रहणकाले निर्निमित्तकृता अतिवृष्टिः। निमित्तं कारणं यथा—

प्रायो ग्रहाणामुदयास्तकाले समागमे मण्डलसंक्रमे च।
पक्षक्षये तीक्ष्णकरायनान्ते वृष्टिर्गतेऽर्के नियमेन चान्द्री॥इति।

एवं निमित्तरहिता अतिवृष्टिर्गर्भाभावाय गर्भविनाशाय भवति। द्रोणः पलशतद्वयं तस्याष्टांशः पलानां पञ्चविंशतिः। तदधिके वृष्टे गर्भः स्रुतः परिस्रुतो भवति। न जलप्रद इत्यर्थः॥३४॥

अत्रैव विशेषमाह—

गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि न वृष्टः।
आत्मीयगर्भसमये करकामिश्रं ददात्यम्भः॥३५॥

यो गर्भो ग्रहणकाले पुष्टः प्रसवे प्रसवकाले पञ्चनवते दिनशते ग्रहोपघातादिभिरुत्पातैः। ग्रहोपघातः कश्चिद्ग्रहस्तत्कालमेव जलप्रदो भवति। यथा भौमः,—"प्राजापत्ये श्रवण" इति। आदिग्रहणाद्दिव्यान्तरिक्षभौमैरुत्पातैर्यदि न वृष्टः स चात्मीयगर्भसमये पुनः पुरस्ताद् द्वितीयगर्भग्रहणकाले। अम्भः पानीयं करकामिश्रमुपलसंयुक्तं ददाति॥३५॥

---

१. द्रष्टव्योऽस्य ग्रन्थस्य १५९ पृष्ठे ११ श्लोकः।

अत्रैव दृष्टान्तरमाह--

काठिन्यं याति यथा चिरकालधृतं पयः पयस्विन्याः।
कालातीतं तद्वत् सलिलं काठिन्यमुपयाति ॥३६॥

यथा पयस्विन्याः सक्षीराया धेनोः पयः क्षीरं चिरकालधृतं प्रभूतकालमुषितं काठिन्यं कठिनतां याति गच्छति। तद्वत्तथा कालातीतं सलिलं जलं काठिन्यमुपयाति प्राप्नोति। सलिलं तूपलतां प्रतिपद्यत इति ॥३६॥

अथ गर्भस्य पुष्टिलक्षणमाह--

पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः।
स भवति बहुतोयः पञ्चरूपाभ्युपेतः।
विसृजति यदि तोयं गर्भकालेऽतिभूरि
प्रसवसमयमित्वा शीकराम्भः करोति ॥३७॥

पवनो वायुः। सलिलं जलम्। विद्युत् तडित्। गर्जितं मेघशब्दः। अभ्राणि मेघाः। एतैः पञ्चभिर्यो गर्भोऽन्वितो युक्तः स बहुतोयो बहुजलप्रदः, यतः स गर्भः पञ्चरूपाभ्युपेतः। पञ्चभी रूपैः संयुक्तोऽतो बहुतोयदो भवति। एवंविधो गर्भो गर्भकाले यद्यतिभूरि तोयं प्रभूतपानीयं विसृजत्युत्सृजति, तदा प्रसवसमयं मेघवर्षणकालमित्वा प्राप्य पञ्चनवते दिनशतेऽतीते शीकराम्भः करोति जलबिन्दून् ददाति। न प्रभूतं वर्षतीत्यर्थः ॥३७॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ गर्भलक्षणं नामैकविंशोऽध्यायः ॥२१॥

अथ गर्भधारणाध्यायो व्याख्यायते।

तत्रादावेव तासां लक्षणमाह--

ज्यैष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः।
मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च ॥१॥

ज्यैष्ठसिते ज्येष्ठशुक्लपक्षे अष्टम्याद्याश्चत्वारो ये दिवसास्ते वायुधारणा दिवसाः। वायुर्धारणा येषाम्, ते दिवसा वायुना धार्यन्ते यथा तेषां प्रसवो न भवति। ते च दिवसा मृदुशुभपवनाः शस्ताः। मृदुः सुखसंस्पर्शः। शुभ उदक्-

शिवशक्रदिग्भवः। पवनो वायुः। तथा स्निग्धघनस्थगितगगनाश्च शस्ता एव। स्निग्धैरूक्षैः, घनैर्मेघैः स्थगितं छन्नं गगनमाकाशं येषु दिवसेषु॥ १॥

अथ तास्वेव विशेषमाह—

तत्रैव स्वात्याद्ये वृष्टे भचतुष्टये क्रमान्मासाः।
श्रावणपूर्वा ज्ञेयाः परिस्रुता धारणास्ताः स्युः॥२॥

तत्रैव तस्मिन्नेव ज्यैष्ठसिते स्वात्याद्ये स्वातिपूर्वके भचतुष्टये नक्षत्रचतुष्टये स्वातिविशाखाऽनुराधाज्येष्ठाख्ये वृष्टे क्रमात् परिपाट्या श्रावणपूर्वाश्चत्वारो मासा ज्ञेयाः। श्रावणभाद्रपदाश्वयुजकार्तिकाख्याः। ताश्च धारणाः परिस्रुताः स्युर्भवेयुः। न जलप्रदा भवन्ति। एतदुक्तं भवति—स्वातौ वृष्टायां श्रावणे त्ववृष्टिः। विशाखायां भाद्रपदे। अनुराधायामाश्वयुजे। ज्येष्ठायां कार्तिक इति। तथा च काश्यपः—

ज्येष्ठस्य शुक्लाष्टम्यां तु नक्षत्रे भगदैवते।
चत्वारो धारणाः प्रोक्ता मृदुवातसमीरिताः॥
नीलाञ्जननिभैर्मेघैर्विद्युत्स्थगितमास्तैः।
विस्फुलिङ्गरजोधूम्रैश्छन्नौ शशिदिवाकरौ॥
एकरूपाः शुभा ज्ञेया अशुभा सान्तराः स्मृताः।
अनार्यैस्तस्करैर्घोरैः पीडा चैव सरीसृपैः॥
ततः स्वात्यादिनक्षत्रैश्चतुर्भिः श्रावणादयः।
परिपूर्णाः शुभास्ताः स्युः सौम्याः शिवसुभिक्षकाः॥
स्वातौ तु श्रावणं हन्याद्वृष्टेऽथेन्द्राग्निदैवते।
भाद्रपदे त्ववृष्टिः स्यान्मैत्रे चाश्वयुजे स्मृता॥
ऐन्द्रे तु कार्तिके त्वेवं वृष्टे वृष्टिं निहन्ति च।
एतेषु यदि नो वृष्टिस्तदा सौभिक्षलक्षणम्॥इति॥ २॥

पुनरपि विशेषलक्षणमाह—

यदि ताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय।
तस्करभयदाश्चोक्ताः श्लोकाश्चाप्यत्र वासिष्ठाः॥३॥

ता धारणा यद्येकरूपाश्चतुर्ष्वपि दिवसेषु सदृशाः स्युर्भवेयुस्ततः शुभाः। सान्तराः सविशेषा विसदृशा न शिवाय श्रेयसे भवन्ति। ताश्च तस्करभयदाश्चौरभीतिप्रदाश्चोक्ताः कथिताः। अत्रास्मिन्नर्थेऽप्यमी वासिष्ठाः श्लोकाः वसिष्ठमहर्षिणा उक्ताः कथिता लिख्यन्ते॥३॥

अत्रैव दृष्टान्तरमाह--

काठिन्यं याति यथा चिरकालधृतं पयः पयस्विन्याः।
कालातीतं तद्वत् सलिलं काठिन्यमुपयाति ॥३६॥

यथा पयस्विन्याः सक्षीरायाः धेनोः पयः क्षीरं चिरकालधृतं प्रभूतकालमुषितं काठिन्यं कठिनतां याति गच्छति। तद्वत्तथा कालातीतं सलिलं जलं काठिन्यमुपयाति प्राप्नोति। सलिलं तूपलतां प्रतिपद्यत इति ॥३६॥

अथ गर्भस्य पुष्टिलक्षणमाह--

पवनसलिलविद्युद्गर्जिताऽभ्रान्वितो यः।
स भवति बहुतोयः पञ्चरूपाभ्युपेतः।
विसृजति यदि तोयं गर्भकालेऽतिभूरि
प्रसवसमयमित्वा शीकराम्भः करोति ॥३७॥

पवनो वायुः। सलिलं जलम्। विद्युत् तडित्। गर्जितं मेघशब्दः। अभ्राणि मेघाः। एतैः पञ्चभिर्यो गर्भोऽन्वितो युक्तः स बहुतोयो बहुजलप्रदः, यतः स गर्भः पञ्चरूपाभ्युपेतः। पञ्चभी रूपैः संयुक्तोऽतो बहुतोयदो भवति। एवंविधो गर्भो गर्भकाले यद्यतिभूरि तोयं प्रभूतपानीयं विसृजत्युत्सृजति, तदा प्रसवसमयं मेघवर्षणकालमित्वा प्राप्य पञ्चनवते दिनशतेऽतीते शीकराम्भः करोति जलबिन्दून् ददाति। न प्रभूतं वर्षतीत्यर्थः ॥३७॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ गर्भलक्षणं नामैकविंशोऽध्यायः ॥२१॥

अथ गर्भधारणाध्यायो व्याख्यायते।

तत्रादावेव तासां लक्षणमाह--

ज्यैष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः।
मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च ॥१॥

ज्यैष्ठसिते ज्येष्ठशुक्लपक्षे अष्टम्याद्याश्चत्वारो ये दिवसास्ते वायुधारणा दिवसाः। वायुर्धारणा येषाम्, ते दिवसा वायुना धार्यन्ते यथा तेषां प्रसवो न भवति। ते च दिवसा मृदुशुभपवनाः शस्ताः। मृदुः सुखसंस्पर्शः। शुभ उदक्-

शिवशक्रदिग्भवः। पवनो वायुः। तथा स्निग्धघनस्थगितगगनाश्च शस्ता एव। स्निग्धैररूक्षैः, घनैर्मेघैः स्थगितं छन्नं गगनमाकाशं येषु दिवसेषु॥ १॥

अथ तास्वेव विशेषमाह--

तत्रैव स्वात्याद्ये वृष्टे भचतुष्टये क्रमान्मासाः।
श्रावणपूर्वा ज्ञेयाः परिस्रुता धारणास्ताः स्युः॥२॥

तत्रैव तस्मिन्नेव ज्यैष्ठसिते स्वात्याद्ये स्वातिपूर्वके भचतुष्टये नक्षत्रचतुष्टये स्वातिविशाखाऽनुराधाज्येष्ठाख्ये वृष्टे क्रमात् परिपाट्या श्रावणपूर्वाश्चत्वारो मासा ज्ञेयाः। श्रावणभाद्रपदाश्वयुजकार्तिकाख्याः। ताश्च धारणाः परिस्रुताः स्युर्भवेयुः। न जलप्रदा भवन्ति। एतदुक्तं भवति--स्वातौ वृष्टायां श्रावणे त्ववृष्टिः। विशाखायां भाद्रपदे। अनुराधायामाश्वयुजे। ज्येष्ठायां कार्तिक इति। तथा च काश्यपः--

ज्येष्ठस्य शुक्लाष्टम्यां तु नक्षत्रे भगदैवते।
चत्वारो धारणाः प्रोक्ता मृदुवातसमीरिताः॥
नीलाञ्जननिभैर्मेघैर्विद्युत्स्थगितमारुतैः।
विस्फुलिङ्गरजोधूम्रैश्छन्नौ शशिदिवाकरौ॥
एकरूपाः शुभा ज्ञेया अशुभा सान्तराः स्मृताः।
अनार्यैस्तस्करैर्घोरैः पीडा चैव सरीसृपैः॥
ततः स्वात्यादिनक्षत्रैश्चतुर्भिः श्रावणादयः।
परिपूर्णाः शुभास्ताः स्युः सौम्याः शिवसुभिक्षकाः॥
स्वातौ तु श्रावणं हन्याद्वृष्टेऽथेन्द्राग्निदैवते।
भाद्रपदे त्ववृष्टिः स्यान्मैत्रे चाश्वयुजे स्मृता॥
ऐन्द्रे तु कार्तिके त्वेवं वृष्टे वृष्टिं निहन्ति च।
एतेषु यदि नो वृष्टिस्तदा सौभिक्षलक्षणम्॥इति॥ २॥

पुनरपि विशेषलक्षणमाह--

यदि ताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय।
तस्करभयदाश्चोक्ताः श्लोकाश्चाप्यत्र वासिष्ठाः॥३॥

ता धारणा यद्येकरूपाश्चतुर्ष्वपि दिवसेषु सदृशाः स्युर्भवेयुस्ततः शुभाः। सान्तराः सविशेषा विसदृशा न शिवाय श्रेयसे भवन्ति। ताश्च तस्करभयदाश्चौरभीतिप्रदाश्चोक्ताः कथिताः। अत्रास्मिन्नर्थेऽप्यमी वासिष्ठाः श्लोकाः वसिष्ठमहर्षिणा उक्ताः कथिता लिख्यन्ते॥३॥

अथ तांश्चाह—

सविद्युतः सपृषतः सपांशूत्करमारुताः।
सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः ॥४॥
यदा तु विद्युतः श्रेष्ठाः शुभाशाः प्रत्युपस्थिताः।
तदापि सर्वसस्यानां वृद्धिं ब्रूयाद्विचक्षणः ॥५॥
सपांशुवर्षाः सापश्च शुभा बालक्रिया अपि।
पक्षिणां सुस्वरा वाचः क्रीडा पांशुजलादिषु ॥६॥
रविचन्द्रपरीवेषाः स्निग्धा नात्यन्तदूषिताः।
वृष्टिस्तदापि विज्ञेया सर्वसस्यार्थसाधिका ॥७॥
मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रियाः।
तदा स्यान्महती वृष्टिः सर्वसस्याभिवृद्धये ॥८॥

एवंविधा धारणा शुभा धारणा भवन्ति। कीदृश्यः? सविद्युतो विद्युत्तडित्तया सहिताः। सपृषतः सजलकणाः। सह पांशूत्करेण पांशुसमूहेन यो मारुतो वायुर्वर्तते तेन सहिताः। सहार्कचन्द्राभ्यां परिच्छन्नाभ्यां परिवर्तते, मेघावृतत्वाद्रविचन्द्रौ स्थगितौ यासु ॥४॥

यदा तु श्रेष्ठाः शोभना विद्युतस्तडितो भवन्ति, ताश्च शुभाशाः प्रत्युपस्थिताः। शुभा या आशा दिश उदक्शिवशक्रदिशस्ताभ्यः प्रत्युपस्थिता उत्पन्नास्तदाऽपि विचक्षणः पण्डितः सर्वसस्यानामशेषधान्यानां वृद्धिं सम्पत्तिं ब्रूयाद् वदेत् ॥ ५ ॥

सपांशुवर्षा इति। सपांशुवर्षेण वर्तन्ते यास्ताः सपांशुवर्षाः। सापः अद्भिः सहिताः।

अथवा बालानां शिशूनां शुभाः क्रियाः शोभनाश्चेष्टाः। शुभेन कर्मणा जनशुभप्रदेन क्रीडनेन। पक्षिणां पतत्रिणां सुस्वराः शोभनशब्दा मधुरं वाक् सम्भाषणम्। तथा पांशुजलादिषु क्रीडा क्रीडनम्। पांशुना जलेन वा। आदिग्रहणाद् गोमयकर्दमादिना ॥६॥

रविचन्द्राभ्यां सूर्यशशिभ्यां परिवेषाः। स्निग्धा अरूक्षा नात्यन्तदूषिता नातिविकृताः; तथापि सर्वसस्यार्थसाधिका वृष्टिर्विज्ञेया। यया वृष्ट्या सर्वसस्यानामर्थवृद्धिर्भवति। सर्वाणि सस्यानि निष्पद्यन्त इत्यर्थः ॥७॥

मेघाः स्निग्धा इति। यद्येवंविधा मेघा घना दृश्यन्ते तदा सर्वसस्याभिवृद्धये निःशेषसस्यानामभिवर्द्धनाय महती प्रभूता वृष्टिः स्याद्भवेत्। कीदृशा

मेघाः ? स्निग्धा अरूक्षाः, संहता घनाः, प्रदक्षिणगतिक्रिया येषाम्। यथा पूर्वस्यां स्थिता दक्षिणां व्रजन्ति। दक्षिणस्यां पश्चिमाम्। पश्चिमायामुत्तराम्। उत्तरस्यां पूर्वामिति ॥८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ गर्भधारणो नाम द्वाविंशोऽध्यायः ॥२२॥

अथ प्रवर्षणाध्यायो व्याख्यायते।

तत्र तावल्लक्षणमाह—

ज्यैष्ठ्यां समतीतायां पूर्वाषाढादिसम्प्रवृष्टेन।
शुभमशुभं वा वाच्यं परिमाणं चाम्भसस्तज्ज्ञैः ॥१॥

ज्येष्ठमासस्येयं पौर्णमासी ज्यैष्ठी, तस्यां समतीतायामतिक्रान्तायां पूर्वाषाढादिसम्प्रवृष्टेन पूर्वाषाढामादितः कृत्वा सर्वेषु नक्षत्रेषु सम्प्रवृष्टेन प्रवर्षितेन तज्ज्ञैः पण्डितैरम्भसो जलस्य परिमाणं शुभमशुभं वा वाच्यं वक्तव्यम्। वृष्टौ शुभमवृष्टावशुभमिति। तथा च गर्गः—

ज्येष्ठे मूलमतिक्रम्य मासि प्रतिपदग्रतः।
वर्षासु वृष्टिज्ञानार्थं निमित्तान्युपलक्षयेत् ॥इति॥१॥

अधुना जलप्रमाणार्थमाह—

हस्तविशालं कुण्डकमधिकृत्याम्बुप्रमाणनिर्देशः।
पञ्चाशत्पलमाढकमनेन मिनुयाज्जलं पतितम् ॥२॥

हस्तविशालं हस्तविस्तीर्णं कुण्डकं समपरिवर्तुलमधिकृत्य कृत्वा अम्बुप्रमाणनिर्देशो जलप्रमाणकथनं कार्यम्। पञ्चाशत्पलमाढकमनेन प्रमाणेन पतितं जलं पानीयं मिनुयान्मापयेत्। एतदुक्तं भवति—हस्तविशालं कुण्डकं वर्षति देवे संस्थाप्य तत्र यज्जलं पतितं तन्मापयेत्। तद्यदि पलशतद्वयं भवति तदा द्रोणो वृष्टः। यत उक्तम्—"पञ्चाशत्पलमाढकं चतुर्भिराढकैर्द्रोणः" इति। तथा च समाससंहितायाम्—

ज्येष्ठस्य पौर्णमासीमतीत्य भूमुद्रया यथा वृष्टे।
आप्याद्यैर्जलमानं मागधमानेन हस्तमिते ॥

यदुक्तम्--

ज्यैष्ठ्यां समतीतायां पूर्वाषाढादिसम्प्रवृष्टेन।
शुभमशुभं वा वाच्यं परिमाणं चाम्भसस्तज्ज्ञैः ॥इति॥२॥

तत्र वर्षप्रमाणमाह--

येन धरित्री मुद्रा जनिता वा बिन्दवस्तृणाग्रेषु।
वृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमम् ॥३॥

येन वृष्टेन धरित्री मुद्रा भूर्मुद्रा जनिता विगतधूली जाता। अथवा तृणानामग्रेषु प्रान्तेषु बिन्दवो जलकणा दृश्यन्ते। तेन वृष्टेन पूर्वाषाढादौ प्रथमादौ वारिणो जलस्य प्रमाणं वाच्यम्। एतदुक्तं भवति--पूर्वाषाढादौ प्रथमं येन नक्षत्रेण वर्षणं भवति तेनैव जलप्रमाणं लोके वक्तव्यम्, नापरेण नक्षत्रेण। वर्षेऽपि सति भवत्स्वपि गर्भेषु धारणास्वपि सत्सु यदि प्रवर्षणकाले न वर्षति तदा प्रसवकाले वृष्टिर्न स्यादित्यतो गर्भेष्विदमुच्यते परिमाणं चाम्भसः प्रसवकाले वाच्यमिति ॥३॥

अत्रैव मतान्तरमाह--

केचिद्यथाभिवृष्टं दशयोजनमण्डलं वदन्त्यन्ये।
गर्गवसिष्ठपराशरमतमेतद् द्वादशान्न परम् ॥४॥

केचिन्मुनयः कश्यपप्रभृतयो यथाभिवृष्टं यावत्तावन्मात्रं वृष्टं कथयन्ति। प्रवर्षणकाले यथा तथैकस्मिन्नपि प्रदेशे वृष्टे वर्षाकाले शोभनं वर्षं पूर्वाषाढादि ग्राह्यम्। तथा च कश्यपः--

प्रवर्षणे यथा देशं वर्षणं यदि दृश्यते।
वर्षाकालं समासाद्य वासवो बहु वर्षति ॥

अन्ये देवलादयो दशयोजनमण्डलं वृष्टं वदन्ति। प्रवर्षणकाले योजनदशके वृष्टे वर्षाकाले अम्बुकथनं नास्मादून इति। तथा च देवलः--

प्रवर्षणे यदा वृष्टं दशयोजनमण्डलम्।
वर्षाकालं समासाद्य वासवो बहु वर्षति ॥

गर्गवसिष्ठपराशराणामेतन्मतं यथा द्वादशाद्योजनात् परम्। प्रवर्षणकाले योजनद्वादशके वृष्टे वर्षाकाले अम्बुकथनं कार्यं नास्मादून इति। तथा च गर्गः--

आषाढादिषु वृष्टेषु योजनद्वादशात्मके।
प्रवृष्टे शोभनं वर्षं वर्षाकाले विनिर्दिशेत् ॥इति॥४॥

पुनरपि विशेषमाह—

येषु च भेष्वभिवृष्टं भूयस्तेष्वेव वर्षति प्रायः।
यदि नाप्यादिषु वृष्टं सर्वेषु तदा त्वनावृष्टिः ॥५॥

येषु च पूर्वाषाढादिषु भेषु नक्षत्रेष्वभिवृष्टं प्रवर्षणकाले भूयः पुनस्तेष्वेव नक्षत्रेषु प्रायो बाहुल्येन वर्षति। प्रसवकाले आप्यादिषु पूर्वाषाढादिषु सप्तविंशेष्वपि नक्षत्रेषु यदि न प्रवृष्टं तदा त्वनावृष्टिः प्रसवकाले भवतीति ॥५॥

अधुना नक्षत्राणां वृष्टिप्रमाणमाह—

हस्ताप्यसौम्यचित्रापौष्णधनिष्ठासु षोडश द्रोणाः।
शतभिषगैन्द्रस्वातिषु चत्वारः कृत्तिकासु दश ॥६॥
श्रवणे मघानुराधाभरणीमूलेषु दश चतुर्युक्ताः।
फल्गुन्यां पञ्चकृतिः पुनर्वसौ विंशतिर्द्रोणाः ॥७॥
ऐन्द्राग्न्याख्ये वैश्वे च विंशतिः सार्पभे दश त्र्यधिकाः।
आहिर्बुध्न्यार्यम्णप्राजापत्येषु पञ्चकृतिः ॥८॥
पञ्चदशाजे पुष्ये च कीर्तिता वाजिभे दश द्वौ च।
रौद्रेऽष्टादश कथिता द्रोणा निरुपद्रवेष्वेते ॥९॥

हस्तः, आप्यं पूर्वाषाढा, सौम्यं मृगशिराः, चित्रा, पौष्णं रेवती, धनिष्ठा, एतेष्वेकतमे प्रवर्षणकाले यदि वर्षति तदा प्रसवकाले षोडश द्रोणा वर्षन्ति। एवं शतभिषक्, ऐन्द्रं ज्येष्ठा, स्वातिः, एतेषु चत्वारो द्रोणा वर्षन्ति। कृत्तिकासु दश द्रोणाः ॥

श्रवणे, मघा, अनुराधा, भरणी, मूलम्, एतेषु दश चतुर्युक्ताश्चतुर्दश द्रोणाः। फल्गुन्यां पूर्वफल्गुन्यां पञ्चकृतिः पञ्चविंशतिर्द्रोणाः। पुनर्वसौ विंशतिर्द्रोणाः ॥

ऐन्द्राग्न्याख्ये विशाखायाम्, वैश्वे उत्तराषाढायाम्, विंशतिर्द्रोणाः। सार्पभे आश्लेषायां दश त्र्यधिकास्त्रयोदश द्रोणाः। आहिर्बुध्न्ये उत्तरभद्रपदायाम्, अर्यम्णे उत्तरफल्गुन्याम्, प्राजापत्ये रोहिण्याम् एतेषु पञ्चकृतिः पञ्चविंशतिर्द्रोणाः ॥

अजे पूर्वभद्रपदायाम्, पुष्ये च पञ्चदश द्रोणाः कीर्तिता उक्ताः। वाजिभे अश्विन्याम्, दश द्वौ च द्वादश द्रोणाः। रौद्रे आर्द्रायाम्, अष्टादश

द्रोणाः कथिता उक्ताः। एते प्रवर्षणकाले द्रोणा नक्षत्रेषूक्तास्ते निरुपद्रवेषूपद्रवरहितेषु वाच्या इति। तथा च समाससंहितायाम्––

दश युक्ता द्विकृतखतिथिरसाष्टदिग्विषयरामजलतिथिभिः।
तिथिरसरसैश्च विरसाः सदशकृताः षड्विहीनाश्च॥
जलषट्कदशकसहिता जलरसयुक्ताः षड्नाश्च।
विषयतिथिषट्कसहिताश्चाश्विन्यादिषु जलद्रोणाः॥इति॥६-९॥

अत्रैव विशेषमाह––

रविरविसुतकेतुपीडिते भे
क्षितितनयत्रिविधाद्भुताहते च।
भवति च न शिवं न चापि वृष्टिः
शुभसहिते निरुपद्रवे शिवं च॥१०॥

रविरादित्यः। रविसुतः सौरः। केतुः शिखी। एतेषामन्यतमे भे नक्षत्रे उपहते तत्र स्थित इत्यर्थः। तथा क्षितितनयेनाङ्गारकेणाहतेऽभिघातिते। वक्रातिवक्रमध्यगमनयोगतारकभेदानामन्यतमेन। तथा त्रिविधेनाद्भुतेनोत्पातेन दिव्यान्तरिक्षभौमेन चाहते न शिवं श्रेयो न चापि वृष्टिर्भवति। शुभसहिते बुधजीवशुक्राणामन्यतमेन संयुक्ते। निरुपद्रवे अन्योत्पातरहिते प्रवर्षणं शिवं श्रेयश्च भवति। तथा च गर्गः––

सूर्यसौराहते वाच्यं नक्षत्रे भौमघातिते।
उत्पातैस्त्रिविधैर्वापि राहुणा केतुनापि वा॥
अवृष्टिमशुभं विन्द्याद्विपरीते शुभं वदेत्॥ इति॥१०॥

इति श्रीभट्टोत्पलविरचितायां संहितायां विवृतौ प्रवर्षणं नाम त्रयोविंशोऽध्यायः॥२३॥

अथ रोहिणीयोगाध्यायो व्याख्यायते।

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह––

कनकशिलाचयविवरजतरुकुसुमासङ्गिमधुकरानुरुते।
बहुविहगकलहसुरयुवतिगीतमन्द्रस्वनोपवने॥१॥

सुरनिलयशिखरिशिखरे बृहस्पतिर्नारदाय यानाह।
गर्गपराशरकाश्यपमयाश्च यान् शिष्यसङ्घेभ्यः ॥२॥
तानवलोक्य यथावत् प्राजापत्येन्दुसम्प्रयोगार्थान्।
अल्पग्रन्थेनाहं तानेवाभ्युद्यतो वक्तुम् ॥३॥

यान् प्राजापत्येन्दुसम्प्रयोगार्थान्। प्राजापत्यं रोहिणी तस्या इन्दुना चन्द्रेण सह सम्प्रयोगः समागमस्तत्र यानर्थान् शुभाशुभान् बृहस्पतिः सुरगुरुर्नारदायाह। नारदो नाम मुनिस्तस्मै प्रोक्तवान्। कस्मिन् स्थाने ? सुरनिलयशिखरिशिखरे, सुरनिलयशिखरी मेरुः, सुरा देवास्तेषां निलयः स्थानम्, सुरनिलयश्चासौ शिखरी पर्वतस्तस्य शिखरे पृष्ठे यदुपवनमुद्यानं तस्मिन्। कीदृशे उपवने ? कनकशिलाः सुवर्णपाषाणास्तासां क्षयः सञ्चयस्तत्र यानि विवराणि छिद्राणि तेषु ये जातास्तरवो वृक्षास्तेषु यानि कुसुमानि पुष्पाणि तेषु च मधुकराणां भ्रमराणां य आसङ्ग आसक्तिः संश्लेषस्तेनानुरुतं शब्दो यस्मिन्नुपवने, तथा बहवो नानाप्रकारा ये विहगाः पक्षिणस्तेषां कलह आलापस्तेन, तथा सुरयुवतयो देवस्त्रियो विद्याधर्यस्तासां च गायमानानां गीते योऽसौ मन्द्रो मधुरः स्वनः शब्दः स यत्रोपवने तस्मिन्। तथा गर्गः पराशरः काश्यपो मयश्च शिष्यसंघेभ्यो यान् योगानाहोक्तवान्, तान् सर्वानेवावलोक्य विचार्य यथावत्संस्फुटमल्पग्रन्थेनाहं तानेव प्राजापत्येन्दुसम्प्रयोगार्थान् वक्तुं गदितुमभ्युद्यतोऽस्मीति ॥१-३॥

अथ स रोहिणीयोगः कस्मिन् काले विचार्य इत्येतदाह—

प्राजेशमाषाढतमिस्रपक्षे
क्षपाकरेणोपगतं समीक्ष्य।
वक्तव्यमिष्टं जगतोऽशुभं वा
शास्त्रोपदेशाद् ग्रहचिन्तकेन ॥४॥
योगो यथानागत एव वाच्यः
स धिष्ण्ययोगः करणे मयोक्तः।
चन्द्रप्रमाणद्युतिवर्णमार्गै-
रुत्पातवातैश्च फलं निगद्यम् ॥५॥

आषाढमासस्य तमिस्रपक्षे कृष्णपक्षे प्राजेशं रोहिणीं क्षपाकरेण चन्द्रेणोपगतं संयुक्तं समीक्ष्य दृष्ट्वा ग्रहचिन्तकेन दैवज्ञेन शास्त्रोपदेशाद् ग्रन्थागमाज्जगतो जनस्येष्टं शुभमशुभमनिष्टं वा वक्तव्यं कथनीयम् ॥

योगो यथेति। यथा येन प्रकारेण योगो रोहिणीयोगोऽनागतो भावी एव वाच्यो वक्तव्योऽत्र स धिष्ण्ययोगो नक्षत्रयोगः करणे पञ्चसिद्धान्तिकायां मयोक्तः कथितः। तथा च पञ्चसिद्धान्तिकायाम्—

[1]बुद्ध्वा शशिविक्षेपं कृत्वा ताराशशाङ्कविवरं च।
संसाध्य च वक्तव्यः पश्चात्तारासमायोगः॥

इत्यादिना ग्रन्थेनेति। तथा च [2]ब्रह्मसिद्धान्ते—

ध्रुवकादूनः पश्चादधिकः प्राग्वत् कृतो यथा योगः।
अन्यद् ग्रहमेलकवत्. . . . . ॥ इति।

चन्द्रप्रमाणेति। चन्द्रस्य प्रमाणेन बिम्बपरिमाणेन। द्युत्या कान्त्या। वर्णेन सितादिकेन। मार्गेण यथा पूर्वाद्यास्वष्टासु दिक्षु संस्थित्या। एतैस्तथोत्पातैस्तत्कालजातैरुल्कापातादिभिर्वातैश्चानिलैः शुभाशुभफलं निगद्य वक्तव्यमिति॥४-५॥

अथ तत्र विधानमाह—

पुरादुदग्यत् पुरतोऽपि वा स्थलं
त्र्यहोषितस्तत्र हुताशतत्परः।
ग्रहान् सनक्षत्रगणान् समालिखेत्
सधूपपुष्पैर्बलिभिश्च पूजयेत्॥६॥
सरत्नतोयौषधिभिश्चतुर्दिशं
तरुप्रवालापिहितैः सुपूजितैः।
अकालमूलैः कलशैरलङ्कृतं
कुशास्तृतं स्थण्डिलमावसेद् द्विजः॥७॥

पुरान्नगरादुदगुत्तरस्यां दिशि यत्स्थलं तत्र तस्मिन् स्थले द्विजो ब्राह्मणः, त्र्यहोषितो दिनत्रयं स्थितस्तत्र च कृतोपवासो हुताशतत्परः, अग्निहवनपरः। तथा च गर्गः—

---

१. पञ्चसिद्धान्तिकायाम् १४ अध्यायस्य ३३ श्लोकः। तत्र द्वितीये पादे 'कृत्वा' स्थाने 'दृष्ट्वा' तृतीये पादे 'संसाध्यैवं वाच्यः' इति पाठः।

२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्ते।

नगरादुपनिष्क्रम्य [1]दिशं प्रागुत्तरां शुचिः।
विविक्ते प्रस्थले देशे देवतायतनेऽपि वा॥
राज्ञा नियुक्तो दैवज्ञः कृतशौचो जितेन्द्रियः।
निमित्तकुशलो धीरः शुक्लाम्बरसमावृतः॥
उपवासमथातिष्ठेदष्टमीं[2] संयतव्रतः।
ततोऽष्टम्याः परे यस्मिन् दिने संयुज्यते शशी॥
प्राजापत्येन च ततो निमित्तान्युपलक्षयेत्॥

ग्रहान् सनक्षत्रगणान् समालिखेत्। तस्मिन् स्थले ग्रहानादित्यादीन् सनक्षत्रगणान्नक्षत्रसमूहेन सहितान् समालिखेत् सम्यगालिखेत्, तानखिलान् सधूप-पुष्पैर्धूपपुष्पसहितैर्बलिभिरुपहारैः पूजयेदर्चयेत्॥

तथैवंविधं स्थण्डिलं द्विज आवसेदधिवसेत् सह रत्नैर्मणिभिस्तोयैर्-जलैरौषधिभिः सुगन्धद्रव्यैः सह ये वर्तन्ते कलशा उदकुम्भास्तैश्चतुर्दिशमलङ्कृतं शोभितम्। अन्यैश्च किम्भूतैः? तरुप्रवालापिहितैः, तरूणां वृक्षाणां प्रवालाः पल्लवास्तैरासमन्ताद्ये पिहिता आच्छादितास्तैः। तथा सुपूजितैः शोभनं कृत्वा चन्दनादिभिश्चर्चितैः। अकालमूलैः, अकालानि मूलानि येषाम्, अग्निपाकेन कृष्णवर्णाभासा अधो न सन्ति। कीदृशं स्थण्डिलम् कुशास्तृतम्, दर्भैराच्छादित-मिति॥ ६-७॥

ततस्तत्र किं कुर्यादित्याह—

आलभ्य मन्त्रेण महाव्रतेन
बीजानि सर्वाणि निधाय कुम्भे।
प्लाव्यानि चामीकरदर्भतोयै-
[3]र्होमो मरुद्वारुणसोममन्त्रैः॥८॥

ततः सर्वाणि बीजानि महाव्रतेन महाव्रतनाम्ना मन्त्रेणाऽऽलभ्याभि-मन्त्र्य कुम्भे निधाय विनिक्षिप्य प्लाव्यानि मज्जनीयानि। कैः? तोयैर्जलैः। कीदृशैः? चामीकरं सुवर्णं दर्भाः कुशाश्च विद्यन्ते येषु तैस्तोयैः। तथा होमोऽग्निहोमो मरु-द्वारुणसोममन्त्रैः, मरुद्वायुः, वरुणो यादसां पतिः, सोमश्चन्द्रः, एषां मन्त्रै-

---

१. सम्प्रायादुत्तरां शुचिरिति अ. क. पु. पाठः।
२. दर्भमासं जितव्रत इति अ. क. पु. पाठः।
३. होमश्चरुर्वारुणसौम्यमन्त्रैरिति पाठान्तरम्।

र्होमः कार्यः। केषाञ्चित् पाठे होमश्चरुर्वारुणसौम्यमन्त्रैः। चरुः स्थालीपाको वारुणसौम्यमन्त्रैर्होमो होतव्य इति ॥८॥

ततः किं कुर्यादित्याह—

श्लक्ष्णां पताकामसितां विदध्या-
द्दण्डप्रमाणां त्रिगुणोच्छ्रितां च।
आदौ कृते दिग्ग्रहणे नभस्वान्
ग्राह्यस्तया योगगते शशाङ्के ॥९॥

श्लक्ष्णां सूक्ष्मतन्तुकृतां पताकां वैजयन्तीमसितां कृष्णवर्णां विदध्यादुच्छ्रयेत्। तां च दण्डप्रमाणां चतुर्हस्तसम्मिताम्। चतुर्हस्तो दण्डः। तथा च पुराणे—

. . . . . चतुर्हस्तो धनुः स्मृतः।
धनुर्दण्डो युगं नाली तुल्यान्येतान्यथाङ्गुलैः ॥ इति ॥

एवं चतुर्हस्तां पताकां त्रिगुणोच्छ्रितां द्वादशहस्तोच्छ्रितामित्यर्थः। एतदुक्तं भवति—द्वादशहस्तोच्छ्रिते काष्ठे तां निबध्नीयादिति। आदौ प्रथमं दिग्ग्रहणे दिक्साधने कृते तया पताकया नभस्वान् वायुः शशाङ्के चन्द्रे रोहिणीयोगगते ग्राह्यो ग्रहीतव्य इति। कस्यां दिशि वहतीति।

तत्र दिक्साधनमाचार्येण पञ्चसिद्धान्तिकायामुक्तम्। तद्यथा—

[1]शङ्कुचतुर्विस्तारे वृत्ते छायाप्रवेशनिर्गमनात्।
अपरैन्द्रीदिक्सिद्धिर्यवाच्च याम्योत्तरे साध्ये ॥

सलिलसमीकृतायामवनौ मध्ये चतुर्विंशत्यङ्गुलप्रमाणेन सूत्रेण कर्कटकेन वा वृत्तमालिखेत्। तस्य वृत्तस्य विष्कम्भोऽष्टाचत्वारिंशदङ्गुलानि भवन्ति, तस्मिन् शङ्कुचतुर्विस्तारे वृत्ते मध्यप्रदेशे शङ्कुर्देयः। ततः पूर्वकपालस्थे सवितरि तस्यैव शङ्कोश्छाया तद्वृत्तपरिधौ यत्र प्रवेशं करोति तत्र बिन्दुर्देयः; सापरा पश्चिमां दिग्भवति। ततो परकपालस्थे सवितरि तस्यैव शङ्कोश्छाया तद्वृत्तपरिधौ यत्र निर्गमं करोति तत्र बिन्दुर्देयः; सा ऐन्द्री पूर्वा दिग्भवति। एवं छायाप्रवेशनिर्गमनादपरैन्द्रीदिक्सिद्धिरिति। ततः तयोर्बिन्द्वोर्मस्तकावगाहि सूत्रं

---

१. पञ्चसिद्धान्तिकायाम् ४ अध्यायस्य १९ श्लोकः। तत्र प्रथमे पादे "शङ्क्वङ्गुलविस्तारे" चतुर्थे पादे "यत्रैश्च" इति भट्टोत्पलव्याख्यानुसारेणाशुद्धः पाठः।

प्रसार्य रेखां कुर्यात्; सा प्राच्यपररेखा भवति। यवाच्च याम्योत्तरे साध्ये, याम्योत्तरे दक्षिणोत्तरे च यवात् साध्ये। यवस्य साधनं प्रदर्श्यते—तत्रैकं बिन्दुं मध्ये कृत्वा द्वितीयबिन्दुं पाटयता सूत्रेण वृत्तमालिखेत्। एवं द्वितीयं बिन्दुं मध्ये कृत्वा परबिन्दुं पाटयता सूत्रेणापरं वृत्तं लिखेत्। एवं वृत्तद्वयस्य परस्परानुप्रवेशान्मध्ये यवाकार उत्पद्यते, तस्य सममध्यगता रेखा कार्या; सा च याम्योत्तरा। एवं दिक्चतुष्टयसिद्धिः। ततः स्वबुद्ध्या विदिशः साध्याः। एवं दिक्साधनं कृत्वा कृते दिग्ग्रहणे तन्मध्ये पताकां निधापयेत्। तया रोहिणीयोगगते शशाङ्के चन्द्रे वायुर्ग्राह्यः, कस्यां दिश्युद्गतः कां च यातीति॥९॥

अथ वातेन शुभाशुभमाह—

[1]तत्रार्द्धमासाः प्रहरैर्विकल्प्या
वर्षानिमित्तं दिवसास्तदंशैः।
सव्येन गच्छन् शुभदः सदैव
यस्मिन् प्रतिष्ठा बलवान् स वायुः॥१०॥

तत्र तस्मिन् रोहिणीयोगे प्रहरैरहोरात्राष्टभागैरर्द्धमासाः पक्षा विकल्प्या विकल्पनीयाः। किमर्थम्? वर्षानिमित्तं वर्षासमयज्ञानार्थम्। एतदुक्तं भवति—यस्मिन्नहोरात्रे रोहिण्या सह चन्द्रमा युज्यते तत्र सूर्योदयात्प्रभृति प्रथमं प्रहरं यावच्छोभनो वातो वहति तदा श्रावणस्य प्रथमपक्षे देवो वर्षति। अशुभेन वातेनावृष्टिस्तत्र वक्तव्या। एवं द्वितीयप्रहरे शोभनो वातो वहति तदा श्रावणस्य द्वितीयपक्षे देवो वर्षति। तृतीये भाद्रपदस्य प्रथमपक्षे वर्षति। चतुर्थे भाद्रपदस्य द्वितीयपक्षे वर्षति। तथा रात्रौ प्रथमप्रहरे शोभनवाते आश्वयुजः प्रथमपक्षे वर्षति, द्वितीयप्रहरे द्वितीयपक्षे। तृतीयप्रहरे कार्तिकप्रथमपक्षे चतुर्थे द्वितीयपक्षे वर्षति। अशुभे वातेऽनावृष्टिः। एवं यथासम्भवं योज्यम्।

दिवसास्तदंशैरिति। तदंशैः प्रहरांशैर्दिवसा वाच्याः। प्रहरेण यदि पक्षं तत्प्रहरार्धेन सप्त सार्धानि दिनानि। प्रहरचतुर्भागेन पादोनानि चत्वार्येवमादि। केचित् "तेनात्र मासाः "प्रहरैर्विकल्प्याः" इति पठन्ति। तेनानन्तरोक्तेन नभस्वता। अत्र योगे प्रहरैर्मासा विकल्प्या विकल्पनीया निश्चयीकर्तव्या इत्यर्थः।

वर्षानिमित्तं वर्षासमयनिमित्तं दिवसास्तदंशैस्तस्य प्रहरस्यांशैर्भागैर्दिवसा विकल्प्या विकल्पनीयाः। प्रहरस्य त्रिंशत्तमो भागो दिवस इति। यदि

---

१. तेनात्र मासा इति पाठान्तरम्।

तत्र दिने सूर्योदयात्प्रभृति प्रहरं यावच्छोभनो वातो वहति तदा श्रावणसमग्रं मासं वर्षति। एवं द्वितीयप्रहरे भाद्रपदम्। तृतीये आश्वयुजम्। चतुर्थे कार्तिकमिति। एवमशोभनवातेनानावृष्टिः।

तदंशैर्दिवसा वाच्याः--इत्येतस्यैतदेव व्याख्यानं शोभनं यस्मादनन्तरमुक्तमाचार्येण गर्गपराशरमतं वच्मि। गर्गादीनां च मतम्--"तेनात्र मासाः प्रहरैर्विकल्प्याः" इति। नार्द्धमासाः प्रहरैः। तथा च गर्गः--

तदहश्चोदयादूर्ध्वं चतुर्धाहो विभज्य च।
हिताहितार्थं मासानां चतुर्णामुपलक्षयेत्॥

आचार्येण च रोहिणीयोगेनैवाषाढीयोगस्यास्यातिदेशः कृतः। गर्गोक्ते च वातचक्रे प्रहरैर्मासाः। तथा च गर्गः--

दिनार्द्धमथवा वायुर्द्वौ मासौ तत्र वर्षति।
चतुर्भागेन मासं तु शक्रोऽत्यर्थं प्रवर्षति॥
पूर्वे चैवार्द्धदिवसे पूर्वौ मासौ तु वर्षति।
अह्नस्तु पश्चिमे भागे पश्चिमौ द्वौ तु वर्षति॥
अथ पूर्वं व्यतिक्रम्य भागं तत्पश्चिमं ततः।
मध्याह्ने वाति चेद्वायुर्मध्यौ मासौ तु वर्षति॥
भाद्रपदोऽश्वयुक् चैव मासावेतौ तु मध्यमौ।
एतयोरपि निर्देश्या वर्षारात्रस्य सम्पदः॥

तथा च ऋषिपुत्रः--

दिनार्द्धं वाति चेद्वायुः पूर्वं पश्चिममेव वा।
मासद्वयं तदा वर्षो विभागः पूर्वपश्चिमे॥
समग्रं दिवसं वायुर्यदि वाति सुलक्षणः।
मासास्तु श्रावणाद्या ये तेषां सम्पद्विनिर्दिशेत्॥

"तस्मात्तेनात्र मासाः" इति शोभनः पाठः।

सव्येन गच्छन्निति। नभस्वान् सव्येन प्राग्दक्षिण्येन गच्छन् व्रजन् सदैव सर्वकालं शुभदः। यथा पूर्वस्यां स्थित्वा आग्नेयीं याति, ततो दक्षिणाम्, ततो नैर्ऋतीम्, ततः पश्चिमामित्यनेन क्रमेणेति। अर्थादेवापसव्येन गच्छन्न शुभदः।

यस्मिन् प्रतिष्ठेति। यस्मिन् वायौ प्रतिष्ठा स्थैर्यमाधिक्यं भवति स एव बलवांस्तेन शुभाशुभं वदेत्। केचिदेवं व्याचक्षते--आदित्यास्तमये यो वायुः सा प्रतिष्ठेत्येतन्न शोभनम्। तथा च ऋषिपुत्रः--

वायन्तं मारुतं चापि यो वायुः प्रतिवायति।
तत्र यो बलवान् वायुस्तस्यैव फलमादिशेत् ॥इति॥१०।

अन्यच्छुभाशुभमाह—

वृत्ते तु योगेऽङ्कुरितानि यानि
सन्तीह बीजानि धृतानि कुम्भे।
येषां तु योंऽशोऽङ्कुरितस्तदंश-
स्तेषां विवृद्धिं समुपैति नान्यः॥११॥

रोहिण्या सह शशिनो योगे वृत्ते यानि बीजानि कुम्भे निहितानि प्राक्स्थापितानि तेषां यान्यङ्कुरितानि तान्येवास्मिन् वर्षे सन्ति भवन्ति। हि-यस्मादर्थे। येषामपि कुम्भस्थितानां योंऽशो भागोऽङ्कुरितस्तदंशस्तद्भागस्तेषामेव वृद्धिं समुपैति प्राप्नोति नान्य इति॥११॥

अथ रोहिणीयोगे यद्यच्छस्यते तत्तदाह—

शान्तपक्षिमृगराविता दिशो
निर्मलं वियदनिन्दितोऽनिलः।
शस्यते शशिनि रोहिणीगते
मेघमारुतफलानि वच्म्यतः॥१२॥

शशिनि चन्द्रे रोहिणीगते रोहिणीयोगं गते इदमिदं शस्यते स्तूयते शान्तैरनर्काभिमुखैर्मधुरस्वनैश्च पक्षिभिर्विहगैर्मृगैश्चारण्यपशुभिर्दिश आशा राविताः शब्दं कारिताः। वियदाकाशं निर्मलं विमलम्। वायुरनिन्दितोऽ-कुत्सितः। तथा च गर्गः—

योगे ह्यनुद्धता वाता ह्लादयन्तः सुखप्रदाः।
प्रदक्षिणाः श्रेष्ठतमाः पूर्वपूर्वोत्तरा इति॥

मेघमारुतफलानि वच्म्यत इति। अतोऽस्मादनन्तरं मेघानामभ्राणां मारु-तस्य च वायोः फलानि वच्मि कथयामि॥१२॥

अधुना तान्येवाह—

क्वचिदसितसितैः सितैः क्वचिच्च
क्वचिदसितैर्भुजगैरिवाम्बुवाहैः ।
वलितजठरपृष्ठमात्रदृश्यैः
स्फुरिततडिद्रसनैर्वृतं विशालैः॥१३॥

विकसितकमलोदरावदातै-
रुणकरद्युतिरञ्जितोपकण्ठैः।
छुरितमिव वियद्घनैर्विचित्रै-
र्मधुकरकुङ्कुमकिंशुकावदातैः ॥१४॥

वियदाकाशमम्बुवाहैर्मेघैर्विशालैर्विस्तीर्णैर्वृतं व्याप्तम्। कीदृशैरम्बुवाहैः? भुजगैः सर्पैरिव। किम्भूतैः सर्पैः? वलितजठरपृष्ठमात्रदृश्यैः, वलितानां स्वकायपरिवेष्टितावयवानां जठरपृष्ठमात्रं दृश्यं येषां भुजगानाम्। क्वचिज्जठरैकदेशं क्वचित्पृष्ठैकदेशमित्यसितसितानामत्रोपमानम्; यतः सर्पाणामुदरं श्वेतवर्णं भवति, पृष्ठं कृष्णवर्णमतः क्वचिदसितसितैः कृष्णैः शुक्लैश्च व्यामिश्रवर्णैः, क्वचिच्च सितैः शुक्लवर्णैरेव क्वचिच्चासितवर्णैः कृष्णवर्णैर्वियन्मेघैर्वृतम्। तडितो विद्युतस्ता एव [1]स्फुरिताश्चलिता रसना जिह्वा येषां तैः॥१३॥

तथा विकसितकमलोदरावदातैः, विकसितं प्रफुल्लं कमलं पद्मं तस्योदरं गर्भस्तद्वद्ये अवदाताः शुद्धास्तैः। तथारुणकरद्युतिरञ्जितोपकण्ठैः, अरुणकराणामरुणरश्मीनां लोहितकान्तीनां या द्युतिः कान्तिस्तया रञ्जितानि सरागाण्युपकण्ठानि कण्ठसमीपान्तानि येषां तैः। विचित्रैर्नानावर्णैर्मेघैर्घनैर्वियदाकाशं छुरितं रञ्जितमिव। किम्भूतैः मधुकरकुङ्कुमकिंशुकावदातैः, मधुकरा भ्रमराः। कुङ्कुमं प्रसिद्धम्। किंशुकः पुष्पविशेषः। तद्वदवदातैः शुद्धैः, तद्वद्वर्णैरिति॥१४॥

अन्यच्च—

असितघननिरुद्धमेव वा
चलिततडित्सुरचापचित्रितम्।
द्विपमहिषकुलाकुलीकृतं
वनमिव दावपरीतमम्बरम् ॥१५॥

अथवाऽम्बरमाकाशं वनमरण्यमिव दावपरीतम्, दावो [2]दांवाग्निस्तेन परीतं व्याप्तमिव। यतोऽसितैः कृष्णैर्घनैर्मेघैर्निरुद्धं स्थगितम्, तथा चलिताभिस्तडिद्भिः स्फुरद्विद्युद्भिः सुरचापेनेन्द्रधनुषा विचित्रितं नानावर्णतामुपगतम्। कीदृशम्? उत्प्रेक्ष्यते—द्विपमहिषकुलाकुलीकृतं वनमिव, मेघानां तत्सादृश्यं द्विप-

---

१. स्फुरन्त्यश्चरन्त्यः इति अ. क. पु. पाठः।
२. वनाग्निरिति अ. क. पु. पाठः।

कुलैर्हस्तिसमूहैर्महिषकुलैश्चाकुलीकृतं सोद्यमं तैः संयुक्तमतो दावपरीतं वनमिवोत्प्रेक्ष्यते ॥१५॥

अन्यदप्याह—

अथवाञ्जनशैलशिलानिचयप्रतिरूपधरैः स्थगितं गगनम्।
हिममौक्तिकशङ्खशशाङ्ककरद्युतिहारिभिरम्बुधरैरथवा ॥१६॥

अथवाञ्जनशैलस्याञ्जनपर्वतस्य शिलानां पाषाणानां यो निचयः समूहस्तत्प्रतिरूपधरैस्तादृशैरम्बुधरैर्मेघैः स्थगितमाच्छादितं **गगनमाकाशम्**, कृष्णैरित्यर्थः। अथवा हिमस्य तुषारस्य मौक्तिकस्य मुक्ताफलानां **शङ्खस्य** कम्बुनः। शशाङ्ककराणां चन्द्ररश्मीनां द्युतिहारिभिः कान्ति चोरयद्भिरम्बुधरैर्मेघैः श्वैतवर्णैः स्थगितमाकाशमित्यर्थः ॥१६॥

अन्यच्च—

तडिद्धैमकक्ष्यैर्बलाकाग्रदन्तैः
स्रवद्वारिदानैश्चलत्प्रान्तहस्तैः।
विचित्रेन्द्रचापध्वजोच्छ्रायशोभै-
स्तमालालिनीलैर्वृतं चाब्दनागैः ॥१७॥

अब्दा मेघास्त एव नागा हस्तिनस्तैर्वियदाकाशं वृतं व्याप्तम्। तडितो विद्युतस्ता एव हैमकक्ष्याः सौवर्णानि मध्यबन्धनानि येषाम्। 'बलाका हंसपङ्क्तिविशेषास्ता एवाग्रदन्ताः पुरोवर्तिनो रदाः शुक्लत्वाद्येषाम्। स्रवद्वारि वर्षजलं तदेव दानं मदजलं येषाम्। चलन्ति प्रान्तान्यग्राणि यानि तान्येव हस्ताः करा येषाम्। विचित्रं नानावर्णमिन्द्रचापं सुरेन्द्रधनुस्तदेव ध्वजोच्छ्रायशोभा येषाम्। उच्छ्रितं चोपरि ध्वजं नृपजनानां भवति। तमालो वृक्षः कृष्णवर्णः। अलिर्भ्रमरस्तद्वन्नीलत्वं येषां तैस्तथाभूतैः ॥१७॥

अन्यच्च मेघवर्णनमाह—

सन्ध्यानुरक्ते नभसि स्थितानां-
मिन्दीवरश्यामरुचां घनानाम्।
वृन्दानि पीताम्बरवेष्टितस्य
कान्तिं हरेश्चोरयतां यदा वा ॥१८॥

---

१. बलाकाः पक्षिविशेषा इति अ. क. पु. पाठः।

घनानां मेघानां नभस्याकाशे सन्ध्यानुरक्ते सन्ध्यारागरञ्जिते लोहिते स्थितानां सन्तिष्ठताम्। कीदृशानाम्? इन्दीवरश्यामरुचाम्, इन्दीवरं नीलोत्पलं तद्वत् श्यामा रुक् कान्तिर्येषां तथाभूतानाम्। वृन्दानि समूहाः। अत एवोत्प्रेक्ष्यते—हरेर्भगवतो नारायणस्य पीताम्बरवेष्टितस्य पीतवस्त्रप्रावृतशरीरस्य कान्तिं दीप्तिं चोरयतां मुष्णतां यदा यस्मिन्नभसि ॥१८॥

अन्यमेघवर्णनमाह—

सशिखिचातकदर्दुरनिःस्वनै-
र्यदि विमिश्रितमन्द्रपटुस्वनाः।
खमवतत्य दिगन्तविलम्बिनः
सलिलदाः सलिलौघमुचः क्षितौ ॥१९॥

एवं यदा सलिलौघमुचो मेघाः सलिलस्य जलस्यौघं समूहं मुञ्चन्ति परित्यजन्ति ये ते क्षितौ भूमौ सलिलदा जलं ददतीत्यर्थः। अथ चैवंविधाः सलिलदा मेघाः क्षितौ भूमौ सलिलौघमुचो भवन्तीति योजना। कीदृशाः? शिखिनो मयूराः, चातकाः सारङ्गाः, दर्दुरा मण्डूकाः, तेषां निःस्वनाः शब्दाः। सशिखिचातकानां दर्दुराणां ये निःस्वनास्तैर्विमिश्रिता मन्द्रा मधुराः पटवश्चतुराः स्वनाः शब्दा येषां ते तथाविधाः। तथा खमाकाशमवतत्य व्याप्य यदि दिगन्तविलम्बिनो दिगन्तेष्वाशापर्यन्तेषु ये विलम्बन्ते ते तथाविधाः ॥१९॥

अन्यच्चाह—

निगदितरूपैर्जलधरजालै-
स्त्र्यहमवरुद्धं द्व्यहमथवाहः।
यदि वियदेवं भवति सुभिक्षं
मुदितजना च प्रचुरजला भूः ॥२०॥

यदि वियदाकाशं निगदितरूपैः [1]कथितरूपैर्जलधराणां मेघानां जालैर्वृन्दैस्त्र्यहं दिनत्रयमवरुद्धं स्थगितम्। द्व्यहं दिनद्वयं वाऽहर्दिनमेकम्। अनेन प्रकारेण सुभिक्षं भवति। तथा भूरवनिर्मुदितजना प्रहृष्टलोका प्रचुरजला भूरितोया च भवति। तथा च गर्गः—

दधिरौप्यामलक्रौञ्चता म्राभारुणसन्निभाः।
शुककौशेयमाञ्जिष्ठास्तपनीयसमप्रभाः ॥

---

१. कथितलक्षणैरिति अ. क. पु. पाठः।

अच्छिन्नमूलाः सुस्निग्धाः पर्वताकारसन्निभाः।
घना घनाः प्रशस्यन्ते विद्युत्स्तनितसङ्कुलाः॥

तथा च पराशरः—

"रोहिणीयोगे पुनः प्रदक्षिणो मृदुर्मारुतः स्नेहवन्ति चाभ्राणि विद्युच्छक्रचापालङ्कृतानि स्वादुसुरभिविमलशिशिरतावृद्धिश्चाम्भसां वृष्टिक्षेमसुभिक्षाय। यावतो दिवसान् निमित्तप्रादुर्भावानुबन्धस्तावद्वर्षाणि सुभिक्षक्षेमम्। आसप्तरात्रादिवलवासिनां बिलेभ्यो निष्क्रमणं स्त्रीपुरुषबालानां प्रमोदः पक्षिणां क्षीरपुष्पफलवृक्षसेवनं तरूणामच्छिद्रपत्रता पुरपौरहिताय" इति।

तथा च समाससंहितायाम्—

आषाढबहुलपक्षे शिशिरकरे रोहिणीसमायुक्ते।
यदि गगनममलमत्यन्ततीक्ष्णरश्मिः सहस्रांशुः॥
सलिलगुरुनभ्रजलधरतडिल्लतालोलरञ्जितदिगन्तः।
अमितमलभेकचातककादम्बविमिश्रमाकाशम् ॥
क्षितितनयरविजरहितः स्फटिकनिभश्चन्द्रमा निरुत्पातः।
मरुतश्च पूर्वपूर्वोत्तरोत्तराः शान्तमृगविहगाः॥इति॥२०॥

अथाशुभानां मेघानां लक्षणमाह—

रूक्षैरल्पैर्मारुताक्षिप्तदेहै-
रुष्ट्रध्वाङ्क्षप्रेतशाखामृगाभैः
अन्येषां वा निन्दितानां स्वरूपै-
र्मूकैश्चाब्दैर्नो शिवं नापि वृष्टिः॥२१॥

एवंविधैरब्दैर्मेघैर्नो शिवं श्रेयः, न चापि वृष्टिर्वर्षणं भवति। कीदृशैः? रूक्षैरस्निग्धैः। अल्पैर्लघुभिः। मारुतेन वायुना आसमन्तात्क्षिप्ताः प्रेरिता देहाः शरीराणि येषां तैः। उष्ट्रः करभः। ध्वाङ्क्षः काकः। प्रेतः शवः। शाखामृगो मर्कटः। एतेषां सदृशी आभा सादृश्यमाकृत्या च येषां तैस्तथाभूतैः। अन्येषामपरेषां वा प्राणिनां निन्दितानां कुत्सितानां श्वमार्जारराक्षसानां स्वरूपैः सदृशैर्मूकैर्निःशब्दैश्च। तथा च गर्गः—

छिन्नमूलाश्च वृक्षाश्च शुष्का वाष्पाकुलाङ्कृताः।
पापसत्त्वानुकाराश्च मेघाः पापफलप्रदाः॥इति॥२१॥

अन्यच्छुभलक्षणमाह—

विगतघने वा वियति विवस्वा-
नमृदुमयूखः सलिल कृदेवम्।
सर इव फुल्लं निशि कुमुदाढ्यं
खमुडुविशुद्धं यदि च सुवृष्टयै ॥२२॥

अथ विवस्वानादित्यो वियत्याकाशे विगतघने मेघरहिते अमृदुमयूखश्चण्डरश्मिर्भवति तदैवमनेन प्रकारेण सलिलकृज्जलं करोति। तथा खमाकाशं निशि रात्रावुडुविशुद्धं निर्मलनक्षत्रं कुमुदाढ्यं कुमुदबहुलं सर इव फुल्लं विकसितं यदि दृश्यते तदा सुवृष्टयै शोभनवृष्टये भवति ॥२२॥

अथ दिग्भागेन मेघफलान्याह—

पूर्वोद्भूतैः सस्यनिष्पत्तिरब्दै-
राग्नेयाशासम्भवैरग्निकोपः ।
याम्ये सस्यं क्षीयते नैर्ऋतेऽर्द्धं
पश्चाज्जातैः शोभना वृष्टिरब्दैः ॥२३॥
वायव्योत्थैर्वातवृष्टिः क्वचिच्च
पुष्टा वृष्टिः सौम्यकाष्ठासमुत्थैः।
श्रेष्ठं सस्यं स्थाणुदिक्सम्प्रवृद्धै-
र्वायुश्चैवं दिक्षु धत्ते फलानि ॥२४॥

अब्दैर्मेघैः पूर्वोद्भूतैः पूर्वस्यां दिशि सम्भूतैः सस्यानां निष्पत्तिः सम्पद् भवति। एवमाग्नेयाशासम्भूतैरनलदिक्स्थैरग्निकोपो वह्निकोपः। याम्ये दक्षिणदिगुत्थैः सस्यं क्षीयते क्षयं याति। नैर्ऋते नैर्ऋतदिगुत्थैरब्दैरर्द्धं क्षीयते। अर्द्धनिष्पत्तिं याति। पश्चाज्जातैः पश्चिमायां दिश्युत्पन्नैरब्दैर्मेघैः शोभना वृष्टिर्भवति। वायव्योत्थैर्वातयुक्ता वृष्टिर्भवति, सा क्वचित् क्वचिच्च न सर्वत्र। सौम्यकाष्ठासमुत्थैरुत्तरदिक्सम्भूतैः पुष्टा परिपूर्णा वृष्टिर्भवति। स्थाणुदिगैशानी। तत्सम्प्रवृद्धैस्तदुत्पन्नैः श्रेष्ठं सस्यं भवति। एवमनेन प्रकारेण यथा मेघाः शुभाशुभफलप्रदा उक्तास्तथैव वायुर्मरुतः फलानि धत्ते ददाति। एतदुक्तं भवति— यथा पूर्वोद्भूतैः सस्यनिष्पत्तिरब्दैरेवं पूर्वोद्भूतेन वायुनापि सस्यनिष्पत्तिर्भवतीत्यादि योज्यम् ॥२३-२४॥

अथैषामप्युत्पातानामतिदेशार्थमाह—

उल्कानिपातास्तडितोऽशनिश्च
दिग्दाहनिर्घातमहीप्रकम्पाः ।
नादा मृगाणां सपतत्त्रिणां च
ग्राह्या यथैवाम्बुधरास्तथैव ॥२५॥

उल्कानिपाताः। तडितो विद्युतः प्रघाताः। अशनिपाताः। आसां लक्षणानि पुरस्तादाचार्य एव वक्ष्यति। दिग्दाहो दिशां दाहः। निर्घातो नभः-शब्दाः। महीप्रकम्पो भूमिकम्पः। मृगाणामरण्यप्राणिनां सपतत्त्रिणां पक्षि-सहितानां नादाः शब्दा यथा येन प्रकारेणाम्बुधरास्तथा तेनैव प्रकारेण ग्राह्या गृहीतव्याः। पूर्वोद्भूतैः सस्यनिष्पत्तिरुद्भवैरिति न्यायेन ॥२५॥

अथ ये पूर्वं चतसृषु दिक्षु कुम्भाः स्थापितास्तैः शुभाशुभज्ञानमाह—

नामाङ्कितैस्तैरुदगादिकुम्भैः
प्रदक्षिणं श्रावणमासपूर्वैः ।
पूर्णैः स मासः सलिलस्य दाता
स्रुतैरवृष्टिः परिकल्प्यमूनैः ॥२६॥

तैः कुम्भैरुदगादिस्थैरुत्तराद्यासु दिक्षु प्रदक्षिणं प्रादक्षिण्येन व्यवस्थितै-स्तैश्च श्रावणमासचतुष्टयपरिकल्पितैः। एतदुक्तं भवति—उदक्कुम्भः श्रावण-मासः परिकल्प्यः। प्राग्भाद्रपदः। दक्षिण आश्वयुजः। पश्चिमस्थः कार्तिकः परिकल्प्य इति। तैः पूर्णैः स मासः सलिलस्य दाता भवति। तेषां चतुर्णां मध्याद्यः कुम्भः परिपूर्णो यस्मिन् मासे परिकल्पितः स मासः सलिलस्य दाता भवति। तस्मिन् मासे देवो वर्षतीत्यर्थः। एतदुक्तं भवति—उदक्कुम्भे परिपूर्णे श्रावणे वृष्टिर्वक्तव्या। प्राक्कुम्भे भाद्रपदे। दक्षिणे आश्वयुजे। पश्चिमे कार्तिक इति। सर्वेषु परिपूर्णेषु चतुर्ष्वपि मासेषु वृष्टिर्वक्तव्या। द्वयोर्मासद्वयोरपि। तैरेव कुम्भैः परिस्रुतै रिक्तीभूतैरवृष्टिरवर्षणम्। ऊनैः स्वबुद्ध्या परिकल्पनीयम्। अर्द्धस्रुतैर्मध्यमा वृष्टिरन्तरेऽनुपाताद्वाच्यम्। तथा च गर्गः—

सौम्ये तु श्रावणं विन्द्यात् पूर्वे भाद्रपदं वदेत्।
दक्षिणेऽश्वयुजो ज्ञेयः पश्चिमे कार्तिकं विदुः॥
सर्वे कुम्भाः सुपूर्णाः स्युरभग्नाः कान्तिसंयुताः।
चतुरो वार्षिकान् मासान् सर्वान् वर्षति वासवः॥

सर्वस्रुतैरवृष्टिः स्यादर्द्धैर्मध्यमवर्षणम्।
द्रवैस्तथाविधा वृष्टिर्वक्तव्या जलमानतः॥ इति॥२६॥

अन्यदप्याह—

अन्यैश्च कुम्भैर्नृपनामचिह्नै-
र्देशाङ्कितैश्चाप्यपरैस्तथैव ।
भग्नैः स्रुतैर्न्यूनजलैः सुपूर्णै-
र्भाग्यानि वाच्यानि यथानुरूपम् ॥२७॥

अन्यैरपरैरपि कुम्भैर्नृपनामचिह्नैर्नृपाणां राज्ञां नाम्ना संज्ञया चिह्नैरुपलक्षितैस्तथा तेनैव प्रकारेणापरैरन्यैर्देशाङ्कितैर्देशनाम्ना चिह्नितैः। एतदुक्तं भवति—तत्र बहव उदकुम्भा नृपदिग्देशचातुर्वर्ण्यैश्चिह्निताः शुभाशुभज्ञानार्थं स्थाप्याः। तैश्च भग्नैः स्रुतैर्न्यूनजलैः सुपूर्णैर्यथानुरूपं यथासादृश्यं भाग्यानि शुभाशुभानि वाच्यानि वक्तव्यानि। एतदुक्तं भवति—तैः कुम्भैः परिपूर्णैरतिशुभम्। भग्नैर्नष्टैः स्रुतैरुपद्रवाः। ऊनजलैर्मध्यमं फलम्। तथा च काश्यपः—

अन्यदेशाङ्किताः कुम्भा भिद्यन्ते च स्रवन्ति च।
बन्धहीना वितोयाश्च तेऽभियोज्या नृपेण वै॥इति॥२७॥

अथ रोहिण्याश्चन्द्रसंस्थाने विशेषेण शुभाशुभफलमाह—

दूरगो निकटगोऽथवा शशी
दक्षिणे पथि यथातथा स्थितः।
रोहिणीं यदि युनक्ति सर्वथा
कष्टमेव जगतो विनिर्दिशेत् ॥२८॥

शशी चन्द्रो यथा येन प्रकारेण तथा तेन प्रकारेण दूरगो विप्रकृष्टस्थो निकटगः समीपस्थो वा दक्षिणे पथि दक्षिणस्यां दिशि स्थितो यदि रोहिणीं प्राजापत्यं युनक्ति संयोगं याति तदा जगतो जनपदस्य कष्टमशुभं दुर्भिक्षजनमरकादिकं विनिर्दिशेद् वदेत् ॥२८॥

अन्यदप्याह—

स्पृशन्नुदग्याति यदा शशाङ्क-
स्तदा सुवृष्टिर्बहुलोपसर्गा।
असंस्पृशन् योगमुदक्समेतः
करोति वृष्टिं विपुलां शिवं च॥२९॥

रोहिण्याः स्पृशन्नेव दक्षिणेन स्पर्शं कृत्वा यद्युत्तरेण शशाङ्को याति गच्छति तदा बहुलोपसर्गा प्रभूतोपद्रवा बहुभिर्दोषैर्युक्ता सुवृष्टिः शोभनवृष्टिर्भवति। लोकानामुपद्रवा भवन्ति, यथा कालोचिता वृष्टिर्भवतीत्यर्थः। अथवा रोहिण्या योगमसंस्पृशन्नादावुदक्समेत उत्तरेण गतस्तदा सुवृष्टिं शोभनवृष्टिं विपुलां विस्तीर्णां करोति। शिवं श्रेयश्च भवति ॥२९॥

अथ रोहिण्याः शकटमध्यगते चन्द्रे फलमाह—

रोहिणीशकटमध्यसंस्थिते
चन्द्रमस्यशरणीकृता जनाः।
क्वापि यान्ति शिशुयाचिताशनाः
सूर्यतप्तपिठराम्बुपायिनः ॥ ३०॥

शकटभेदलक्षणं गणित उक्तम्। तथा च ब्रह्म[2]सिद्धान्ते—

विक्षेपोऽशद्वितयादधिको वृषभस्य सप्तदशभागे।
यस्य ग्रहस्य याम्यो भिनत्ति शकटं स रोहिण्याः ॥इति।

चन्द्रमसि रोहिण्याः शकटमध्यसंस्थिते जना लोका अशरणीकृता निःशरणीभूताः क्वापि यान्ति कुत्रापि गच्छन्ति। केचित् प्रजा इति पठन्ति। प्रजाः क्वापि यान्ति। कीदृशाः शिशुयाचिताशनाः, शिशवो बालास्तेषामशनं भोजनं याचमानाः प्रार्थ्यमानाः। तथा सूर्येणाऽऽदित्येन पिठरे भाण्डविशेषे तप्तं परितापितं यदम्बु पानीयं तत्पायिनस्तत्पानशीलाः। अनेन जलाभाव उक्तः। षट्तारकत्वाद्रोहिण्याः शकटः समूहः ॥३०॥

अथ रोहिण्याः पश्चिमदिक्स्थे चन्द्रमसि फलमाह—

उदितं यदि शीतदीधितिं
प्रथमं पृष्ठत एति रोहिणी।
शुभमेव तदा स्मरातुराः
प्रमदाः कामवशेन संस्थिताः ॥३१॥

शीतदीधितं चन्द्रं प्रथममादौ यद्युदितमभ्युद्गतं तस्य च पृष्ठतः पश्चाद्रोहिणी एत्यागच्छति समुदेति, तदा शुभमेव शोभनं लोके। प्रमदाः स्त्रियः स्मरातुराः कामार्ताः कामवशेन संस्थिताः कामुकानां वशवर्तिन्यो भवन्ति ॥३१॥

---

१. प्रजाः इति पाठान्तरम्।
२. ब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्ते।

अथ रोहिण्याः पूर्वस्यां दिशि स्थिते चन्द्रे फलमाह—

अनुगच्छति पृष्ठतः शशी
यदि कामी वनितामिव प्रियाम्।
मकरध्वजबाणखेदिताः
प्रमदानां वशगास्तदा नराः॥३२॥

रोहिण्याः शशी चन्द्रो यदि पृष्ठतः पश्चादनुगच्छत्युदेति प्रियां वनितां वल्लभां स्त्रियं कामिनीं कामी कामुको यथा अनुगच्छति। तदा प्रमदानां स्त्रीणां तस्मिन् वर्षे नराः पुरुषा मकरध्वजबाणखेदिताः कामशरपीडिताः सन्तो वशगा भवन्ति॥३२॥

अथ रोहिण्याः शेषासु दिक्षु स्थिते चन्द्रे फलमाह—

आग्नेय्यां दिशि चन्द्रमा यदि भवेत्तत्रोपसर्गो महान्
नैर्ऋत्यां समुपद्रुतानि निधनं सस्यानि यान्तीतिभिः।
प्राजेशानिलदिक्स्थिते हिमकरे सस्यस्य मध्यश्चयो
याते स्थाणुदिशं गुणाः सुबहवः सस्यार्घवृष्टचादयः॥३३॥

प्राजेशस्य ब्राह्मण इयं प्राजेशी रोहिणी तस्यामाग्नेय्यां पूर्वदक्षिणस्यां दिशि यदि चन्द्रमाः शशी भवेत् स्यात्तदा तत्र तस्मिन् वर्षे महानतीवोपसर्ग उपद्रवो भवति। तथा नैर्ऋत्यां दक्षिणपश्चिमायां दिशि स्थिते चन्द्रमसि सस्यानि ईतिभिरतिवृष्ट्यादिभिरुपद्रवैः समुपद्रुतानि उपतप्तानि निधनं नाशं यान्ति प्राप्नुवन्ति। हिमकरे चन्द्रेऽनिलदिक्स्थिते वायव्यां पश्चिमोत्तरस्यां दिशि स्थिते समाश्रिते सस्यस्य धान्यादेर्मध्यश्चयो मध्यमं संघटनं भवति। तथा स्थाणुदिशमैशानीमुत्तरंपूर्वामाशां याते प्राप्ते चन्द्रे सुबहवः सुप्रभूता गुणा भवन्ति। के ते सस्यार्घवृष्टचादयः सस्यानि चार्घवृष्टयश्च ताः सस्यार्घवृष्टयः। आदिग्रहणाद्योगक्षेमनीरोगता गृहीतव्याः। तथा च समाससंहितायाम्—

उदगपि च तुहिनकिरणः पूर्वोत्तरतोऽथवा स्थितः प्राच्याम्।
यदि भवति तदा वसुधा भवति विवृद्धा प्रहृष्टजना॥
उपसर्गोऽनलदिक्स्थे याम्याशासंस्थिते शकटके च।
किं कष्टैस्तैरुक्तैः श्रुतमात्रैर्यैः कृशो भवति॥
क्रिमिशुकशलभादिभयं नैर्ऋत्यां नातिपुष्टिरपरेण।
वायव्याशासंस्थे मध्यं सस्यं कुमुदनाथे॥ इति॥३३॥

अथ योगतारोपतापे छादने च फलमाह—

ताडयेद्यदि च योगतारकामावृणोति वपुषा यदापि वा।
ताडने भयमुशन्ति दारुणं छादने नृपबधोऽङ्गनाकृतः॥३४॥

योगतारकां प्रधानतारकाम्। तथा चोक्तम्—

सतारागणमध्ये तु या तारा दीप्तिमुत्तरा।
योगतारेति सा प्रोक्ता नक्षत्राणां पुरातनैः॥

तां च योगतारकां यदि ताडयेद् भिन्द्यात्, शृङ्गैकदेशेन स्पृशतीत्यर्थः। अथवा वपुषा शरीरेणावृणोत्याच्छादयति, तदा ताडने दारुणं तीव्रं भयं भीतिमुशन्ति कथयन्ति। तथा छादने अङ्गनाकृतः स्त्रीकृतो नृपस्य राज्ञो बधः। मरणमुशन्ति॥३४॥

अन्यदपि शुभाशुभज्ञानमाह—

गोप्रवेशसमयेऽग्रतो वृषो
याति कृष्णपशुरेव वा पुरः।
भूरि वारि शबले तु मध्यमं
नो सितेऽम्बुपरिकल्पनापरैः॥३५॥

गोप्रवेशसमये गवामरण्यादागतानां प्रवेशकाले पश्चिमसन्ध्यायां यद्यग्रतः पुरतो वृषो बलीवर्दो भवति पुरद्वारे, अथवा पुरोऽग्रतः कृष्णोसितः पशुश्छागादिको भवति, तदा तद्वर्षं भूरि वारि बहु जलं भवति। शबले तु मध्यमम्। शबलः कृष्णश्वेतः पशुस्तस्य यदा द्वौ वर्णौ समौ भवतस्तदा मध्यमं फलम्। तस्यैव काष्ण्येऽधिके भूरि वारि, शौक्ल्येऽधिके ऊनम्। सिते श्वेतवर्णे न किञ्चिदम्बु भवति॥

अपरैर्वर्णैरम्बुपरिकल्पना स्वबुद्ध्या कार्या। शुक्लवर्णवर्जैरन्यैर्वर्णैः किञ्चित् किञ्चिद् भवतीत्यर्थः। तथा च गर्गः—

प्राक् प्रवेशे तु यूथस्य पुरतो वृषभो यदा।
प्रवेशे कृष्णवर्णो वा पशुर्बहुजलप्रदः॥
कृष्णा तु गौः सुभिक्षाय क्षेमारोग्याय चोच्यते।
गौर्यामथ च नीलायां मध्याः सस्यस्य सम्पदः॥
अनावृष्टिकरी श्वेता वाताय कपिला स्मृता।
पाटला सस्यनाशाय रोगाय करटा स्मृता॥
एकदेशाय शबला चित्रं चित्रा तु वर्षति।
पाण्डुरा मध्यमाङ्गी वा ग्रीष्मधान्यविवर्द्धिनी॥
कपिला पश्चिमं वर्षं शोणा त्वग्रे प्रवर्षति।

तथा च पराशरः—

"अथास्तमयवेलायां पुरद्वारमभिगम्य निमित्तान्युपलक्षयेत्। तत्र गोगजाश्वरथप्रथमप्रवेशे पुरविजयो वानरखरोष्ट्रनकुलमार्जारप्रवेशे विद्रवो नेत्राङ्गहीनप्रवेशे त्वशनिभय इति ॥३५॥

अथादर्शने चन्द्रमसः फलमाह—

दृश्यते न यदि रोहिणीयुत-
श्चन्द्रमा नभसि तोयदावृते।
रुग्भयं महदुपस्थितं तदा
भूश्च भूरिजलसस्यसंयुता ॥३६॥

यदि नभस्याकाशे तोयदावृते मेघच्छन्ने चन्द्रमा रोहिणीयुतो न दृश्यते लोके तदा तस्मिन् वर्षे महदतीव रुग्भयं रोगभयमुपस्थितं प्राप्तं वदेत्। भूश्च भूमिर्भूरिजलसस्यसंयुता बहुभिस्तोयैः सस्यैश्च युक्ता भवतीति ॥३६॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ रोहिणीयोगो नाम चतुर्विंशोऽध्यायः ॥२४॥

अथ स्वातियोगाध्यायो व्याख्यायते

तत्रादावेव रोहिणीयोगोक्तस्य फलस्यातिदेशं कालनिर्देशं चाह—

यद् रोहिणीयोगफलं तदेव
स्वातावषाढासहिते च चन्द्रे।
आषाढशुक्ले निखिलं विचिन्त्यं
योऽस्मिन् विशेषस्तमहं प्रवक्ष्ये ॥१॥

रोहिणीसहिते चन्द्रे यद्योगफलं प्रागुक्तं तदेव स्वातिसहिते चन्द्रेऽषाढासहिते फलं निखिलं निःशेषं विचिन्त्यं विचारणीयम्। किन्त्वाषाढशुक्ले शुचौ शुक्लपक्ष एतद्योगद्वयं विचार्यम्। एतदुक्तं भवति—मेघानां वायोश्चोत्पातानां च यत्फलं रोहिणीयोग उक्तं तत्सर्वं स्वात्याषाढास्थे चन्द्रमसि ज्ञातव्यम्। तदा दूरगो निकटगोऽथवा शशी इत्यादि। यथासम्भवं समागमफलं यदुक्तं तत्सर्वमत्रैव वेदितव्यम्। तथा गोप्रवेशसमयेऽग्रतो वृष इत्यादिकं सर्वमपि वेदितव्यम्। तथा च पराशरः—

"सर्व एते योगा मास्याषाढे भवन्ति। तान् दैवज्ञः प्रयतः शुचिरवधारयेत्, स्वातिसंयुते चन्द्रमसि घनस्निग्धस्तनितविद्युन्मालैरम्भोदैर्नभसोऽवच्छादनं सुभिक्षक्षेमाय तद्वत्सर्ववातप्रादुर्भाव इति। उल्कानिर्घातकम्पोपघातैश्च विपर्ययः" इति ॥

योऽस्मिन् विशेषस्तमहं प्रवक्ष्ये इति। अस्मिन् स्वातियोगे रोहिणी-योगाद्यो विशेषस्तमहं प्रवक्ष्ये कथयिष्य इति॥१॥

अथ तत्र रात्रौ दिवसे च वृष्टे शुभाशुभलक्षणमाह—

स्वातौ निशांशे प्रथमेऽभिवृष्टे
सस्यानि सर्वाण्युपयान्ति वृद्धिम्।
भागे द्वितीये तिलमुद्गमाषा
ग्रैष्मं तृतीयेऽस्ति न शारदानि॥२॥
वृष्टेऽह्निभागे प्रथमे सुवृष्टि-
स्तद्वद् द्वितीये तु सकीटसर्पा।
वृष्टिस्तु मध्यापरभागवृष्टे
निश्छिद्रवृष्टिर्द्युनिशं प्रवृष्टे॥३॥

स्वातौ स्वातियोगे प्रथमे निशांशे आद्यरात्रित्रिभागे वृष्टे सर्वाणि निःशेषाणि सस्यानि वृद्धिमुपयान्ति गच्छन्ति। द्वितीये रात्रित्रिभागे वृष्टे तिलमुद्गमाषा वृद्धिमुपयान्ति। तृतीये त्रिभागे वृष्टे ग्रैष्ममस्ति ग्रीष्मधान्यानि भवन्ति। न शारदानि शरत्सस्यानि न भवन्ति॥

अह्नि दिवसे प्रथमे आद्ये त्रिभागे वृष्टे सुवृष्टिः शोभना वृष्टिर्भवति। द्वितीये दिनत्रिभागे वृष्टे तद्वत्सुवृष्टिर्भवति, किन्तु सकीटसर्पा कीटैः क्रिमिभिः सर्पभुजङ्गैश्च सहिता वृष्टिर्भवति। अपरभागे तृतीये दिनत्रिभागे वृष्टिर्मध्यमा भवति, नातिबह्वी नात्यल्पा। द्युनिशं प्रवृष्टे समग्रमहोरात्रं प्रवृष्टे निश्छिद्रा छिद्ररहिता निर्दोषा वृष्टिर्भवति। सर्वत्र कालोचितं वर्षतीत्यर्थः। तथा च गर्गः—

स्वातियोगे यदा युक्ते पूर्वरात्रे प्रवर्षति।
ग्रीष्मशारदसम्पन्नां तां समामभिनिर्दिशेत्॥
रात्रेर्द्विभागमाश्रित्य स्वातियोगेऽभिवर्षति।
सम्पदो मुद्गमाषाणां तिलानां चावधारयेत्॥
त्रिभागशेषे शर्वर्याः स्वातियोगेऽभिवर्षति।
ग्रैष्मं सम्पद्यते सस्यं शारदं तु विनश्यति॥
अह्नस्तु प्रथमे भागे वर्षाक्षेमसुवृष्टये।
द्वितीये शोभना वृष्टिर्बहुसस्यसरीसृपाः॥

अङ्गस्तृतीये भागे तु मध्यमां कुरुते समाम्।
अहोरात्रं यदा वर्षं स्वातियोगे पुरन्दरः॥
तदा तु चतुरो मासान् सर्वान् वर्षति वासवः॥ इति॥२-३॥

अथापांवत्सनिकटस्थे चन्द्रमसि शुभाशुभमाह—

सममुत्तरेण तारा चित्रायाः कीर्त्यते ह्यपांवत्सः।
तस्यासन्ने चन्द्रे स्वातेर्योगः शिवो भवति॥४॥

चित्रायाः समसमुत्तरेण समं कृत्वोत्तरेण तिर्यग् या तारा स्थिता सापांवत्स इति कीर्त्यते कथ्यते। तस्यापांवत्सस्याऽऽसन्ने निकटस्थे चन्द्रे स्वातेर्योगश्चन्द्रसंयोगः शिवः श्रेयस्करो भवति॥४॥

अथ स्वातियोगस्य कालयोगमाह—

सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे
वायुर्वा चण्डवेगः सजलजलधरो वापि गर्जत्यजस्रम्।
विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं
विज्ञेया प्रावृडेषा मुदितजनपदा सर्वसस्यैरुपेता॥५॥

माघमासस्यान्धकारे कृष्णपक्षे सप्तम्यां तिथौ स्वातिनक्षत्रयुक्ते चन्द्रे हिमं तुहिनं यदि पतति, वायुर्मारुतो वा चण्डवेगः परुषो महास्वनो वहति, अथवा सजलो जलेन पानीयेन सहितो जलधरो मेघोऽजस्रमनवरतं वापि गर्जति शब्दं करोति। अथवा नभ आकाशं विद्युन्मालाभिराकुलं सौदामिनीनां पंक्तिभिर्व्याप्तम्, नष्टचन्द्रार्कतारं नष्टा अदर्शनं गताश्चन्द्रतारकार्काः सोमतारकसूर्या यत्र मेघच्छन्नमित्यर्थः, तदैषा प्रावृड् वर्षा मुदितजनपदा प्रहृष्टलोका सर्वैर्निःशेषैः सस्यैरुपेता संयुक्ता विज्ञेया विज्ञातव्या॥५॥

अन्यदपि शुभाशुभलक्षणमाह—

तथैव फाल्गुने चैत्रे वैशाखस्यासितेऽपि वा।
स्वातियोगं विजानीयादाषाढे च विशेषतः॥६॥

यथा सप्तम्यां स्वातियोगे यदि पतति हिममित्याद्युक्तं तथैव फाल्गुने मासि स्वातौ भवति। चैत्रे वैशाखमासस्यासिते कृष्णपक्षेऽपि स्वातियोगं विजानीयाद्विन्द्याद्विचारयेत्। विशेषत आषाढस्य यः स्वातियोगस्तं विचारयेदिति। अनार्षोऽयं श्लोकः॥६॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ स्वातियोगो नाम पञ्चविंशोऽध्यायः॥२५॥

अथाषाढीयोगाध्यायो व्याख्यायते ।

तत्र तावद्रोहिणीयोगफलं यदुक्तं तत्सर्वमुत्तराषाढायुक्ते चन्द्रमसि विज्ञातव्यं तथाषाढपौर्णमास्यां विचारयेत्। तथा च पराशरः—

अतोऽनन्तरमाषाढासंयुक्ते शशिन्यादानविसर्गान्तर्भागेषु निमित्तानि प्रावृष्याद्यन्तमध्येषु फलन्ति। तत्र सुरभिरनुकूलः स्पर्शवान् मारुतः पूर्वपूर्वोत्तरोऽतिवर्षसस्यकरो नैर्ऋताग्नेययाम्यवारुणवायव्या मध्यसस्यकराः। विपर्ययो विपरीतेषु। वैदूर्यरजतमधुहेमप्रभा सन्ध्या स्निग्धाभ्रवृक्षप्रादुर्भावश्च प्रावृड्वृद्धये। प्राङ्मध्यपश्चाद्भागेष्वाषाढानां योगः शशिनो वर्षासु तत्कालमेव वर्षाय। वैश्वदेवादुत्तरतः शशी वर्षकरो न दक्षिणतः। निर्घातोल्काशनिभूचलनदण्डान्यावग्रहोपतापे सस्यवधो भवति। भवति चात्र—

सोदकं सातपं साभ्रं सविद्युत् स्तनयित्नुमत्।
प्रवातं च निवातं च प्रशस्तं तदहः स्मृतम् ॥इति।

अथाषाढीयोगे यत्कर्तव्यं तदाह—

आषाढ्यां समतुलिताधिवासितानाम्
अन्येद्युर्यदधिकतामुपैति बीजम्।
तद्वृष्टिर्भवति न जायते यदूनं
मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय ॥१॥

आषाढस्येयं पौर्णमासी आषाढी। उत्तराषाढायुक्तेत्यर्थः। तथा च गर्गः—

वायव्यवैश्वदेवाभ्यां प्राजापत्यस्य चैव हि।
एषामप्यधिकं चापि रोहिणी नाम याप्यते ॥इति।

तस्यामाषाढ्यां सर्वबीजानां समतुलिताधिवासितानां समं कृत्वोनातिरिक्तवर्जं यानि बीजानि धान्यादीनि तुलितानि तुलया परिच्छिन्नानि तेषां तथाभूतानामधिवासितानाम्। अधिवासना महाव्रतमन्त्रेणाभिमन्त्र्य रात्रिमेकामुषितानि। ततोऽन्येद्युरन्यस्मिन्नहनि द्वितीयदिवसे यद्बीजं तुलितमधिकतामुपैत्याधिक्यं गच्छति तद्वृद्धिस्तस्य धान्यादेस्तस्मिन् वर्षे वृद्धिर्भवति। यदूनं भवति तन्न जायते नोत्पद्यते। मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय। अस्मिंस्तुलाकर्मणि तुलाभिमन्त्रणाय मन्त्रो भवति येन तुलाभिमन्त्र्यते इत्यर्थः। तथा च समाससंहितायाम्—

तुलिताधिवासितानामन्येद्युर्यदधिकं भवति बीजम्।
आषाढपौर्णमास्यां तद्वृद्धिस्तत्र मन्त्रोऽयम् ॥इति॥१॥

अथ तं मन्त्रमार्षमाह—

स्तोतव्या मन्त्रयोगेन सत्या देवी सरस्वती।
दर्शयिष्यसि यत्सत्यं सत्ये सत्यव्रता ह्यसि॥२॥
येन सत्येन चन्द्रार्कौ ग्रहा ज्योतिर्गणास्तथा।
उत्तिष्ठन्तीह पूर्वेण पश्चादस्तं व्रजन्ति च॥३॥
यत्सत्यं सर्ववेदेषु यत्सत्यं ब्रह्मवादिषु।
यत्सत्यं त्रिषु लोकेषु तत्सत्यमिह दृश्यताम्॥४॥
ब्रह्मणो दुहितासि त्वमादित्येति प्रकीर्तिता।
काश्यपी गोत्रतश्चैव नामतो विश्रुता तुला॥५॥

स्तोतव्येति। सा तुला अनेन मन्त्रयोगेन सह स्तोतव्या स्तवनीया। सत्या सत्यरूपा सरस्वती देवी। हे सत्ये सत्यरूपे यत्सत्यं परमार्थं दर्शयिष्यसि यस्मादसि त्वं सत्यव्रता। सत्यमेव व्रतं यस्याः॥२॥

चन्द्रार्कौ शशिसूर्यौ ग्रहाश्चान्ये भौमादयः। तथा ज्योतिर्गणाः। ज्योतिषां ताराणां गणाः समूहा येन सत्येन पूर्वेण पूर्वस्यां दिश्युत्तिष्ठन्ति उदयं यान्ति इहास्मिल्लोके तथा पश्चात्पश्चिमायां दिश्यस्तं व्रजन्ति अस्तमयं यान्ति॥३॥

तथा सर्वेषु वेदेषु यत्सत्यं यत्सत्यं ब्रह्मवादिषु परं ब्रह्म ये वदन्ति। त्रिषु लोकेषु भूर्भुवःस्वराख्येषु यत्सत्यं तत्सत्यमिहास्मिंस्तुलाकर्मणि दृश्यताम्॥४॥

त्वं ब्रह्मणः कमलजस्य दुहिता तनया असि भवसि, तथा आदित्या अदितेरपत्यमित्येवं प्रकारा प्रकीर्तिता कथिता। गोत्रतः काश्यपी कश्यपगोत्रा। नामतः संज्ञया तुलाइति च विश्रुता ख्याता॥५॥

अथ तुलाया लक्षणमाह—

क्षौमं चतुःसूत्रकसन्निबद्धं
षडङ्गुलं शिक्यकवस्त्रमस्याः।
सूत्रप्रमाणं च दशाङ्गुलानि
षडेव कक्ष्योभयशिक्यमध्ये॥६॥

अस्यास्तुलायाः शिक्यकवस्त्रं क्षौमं कार्यम्। यत्र स्थितानि द्रव्याणि परिच्छिद्यन्ते तच्छिक्यवस्त्रं तच्चतुःसूत्रकसन्निबद्धम्, चतुर्भिःसूत्रैस्तन्तुभिः सन्निबद्धं संलग्नं कार्यम्। तच्च शिक्यकवस्त्रं षडङ्गुलं षडङ्गुलप्रमाणम्। यैः सूत्रैस्तद्बध्यते, तेषां प्रमाणं दशाङ्गुलानि। उभयशिक्यमध्ये शिक्यद्वयस्यान्तः कक्ष्यासूत्रं षडङ्गुलं कार्यम्। कक्ष्यासूत्रेण ग्रहणसूत्रमुच्यते॥६॥

कथं तत्र द्रव्याणि परिच्छेद्यानीत्याह—

याम्ये शिक्ये काञ्चनं सन्निवेश्यं
शेषद्रव्याण्युत्तरेऽम्बूनि चैव ।
तोयैः कौप्यैः सैन्धवैः सारसैश्च
[1]वृष्टिर्हीना मध्यमा चोत्तमा च ॥७॥
दन्तैर्नागा गोहयाद्याश्च लोम्ना
हेम्ना भूपाः शिक्थकेन द्विजाद्याः ।
तद्वद्देशा वर्षमासा दिशश्च
शेषद्रव्याण्यात्मरूपस्थितानि ॥८॥

याम्ये दक्षिणशिक्ये काञ्चनं सुवर्णं सन्निवेश्यं स्थापनीयम्। शेषाणि द्रव्याणि तथाम्बूनि पानीयानि उत्तरे शिक्ये सन्निवेश्यानि। एतदुक्तं भवति सुवर्णं यदा परिच्छिद्यते तदा दक्षिणे शिक्ये विनिवेशयेत्। अन्यानि सर्वाण्युत्तर इति।

तोयैर्जलैः कौप्यैः कूपसम्भवैर्वृद्धिमद्भिर्हीना वृष्टिर्भवति। सैन्धवैर्नादेयैर्जलैर्वृद्धिमद्भिर्मध्यमा वृष्टिर्भवति, नातिबह्वी नात्यल्पा। तथा सारसैः सरःसम्भवैर्वृद्धिमद्भिर्जलैरुत्तमा प्रधाना वृष्टिर्भवति। सर्वेषां वृद्धावतिमहती वृष्टिः, सर्वेषां हानावनावृष्टिरिति। केचिद्वृद्धिर्हीना मध्यमा चोत्तमा चेति पठन्ति। सस्यानां वृद्धिर्भवति न चैतच्छोभनम् ॥७॥

दन्तैर्नागा इति। नागाः करिणो दन्तैर्हस्तिदन्तैः परिच्छेद्याः। गोहयाद्याश्च लोम्ना। गावः, हया अश्वाः, आदिग्रहणात्खरकरभच्छागमेषाः। एते सर्व एव लोम्ना। हेम्ना सुवर्णेन भूपा राजानः परिच्छेद्याः। शिक्थकेन मधूच्छिष्टेन द्विजाद्या ब्राह्मणाद्याश्चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः। देशा मध्यदेशप्रभृतयः। वर्षाण्येतानि यथेष्टानि। मासा वर्षान्तःस्थाः। दिशश्च पूर्वाद्याः। शुभाशुभज्ञानार्थं तद्वत् शिक्थकेनैव परिच्छेद्याः। शेषाण्यन्यान्यनुक्तानि यानि द्रव्याणि तान्यात्मरूपस्थितानि स्वयमेव परिच्छेद्यानि धान्यादीनीत्यर्थः ॥८॥

अथ तुलालक्षणमाह—

हैमी प्रधाना रजतेन मध्या
तयोरलाभे खदिरेण कार्या।

---

१. वृद्धिर्हीना मध्यमा चोत्तमा चेति पाठान्तरम्।

विद्धः पुमान् येन शरेण सा वा
तुला प्रमाणेन भवेद्वितस्तिः ॥९॥

हैमी सुवर्णतुला प्रधानोत्तमा। रजतेन रौप्येण या क्रियते सा मध्यमा, न शुभा नाप्यशुभा। तयोः सुवर्णरौप्ययोरलाभे अभावे सति खदिरेण कार्या। खदिरकाष्टमयी कर्तव्या। अथवा येन शरेणेषुणा पुमान् पुरुषः कश्चिद्विद्धो भिन्नः सा वा तुला कार्या तस्माच्छरादित्यर्थः। सा च तुला प्रमाणेन वितस्तिर्द्वादशाङ्गुला भवतीति ॥९॥

अथ तुलितानां शुभाशुभफलज्ञानमाह—

हीनस्य नाशोऽभ्यधिकस्य वृद्धिस्तुल्येन तुल्यं तुलितं तुलायाम्।
एतत्तुलाकोशरहस्यमुक्तं प्राजेशयोगेऽपि नरो विदध्यात् ॥१०॥

तुलायां तुलितस्य परिच्छन्नस्य द्रव्यस्य हीनस्य नाशः क्षयो वक्तव्यः। अभ्यधिकस्य वृद्धिः। तुल्येन समेन तुल्यं समम्। न हानिर्न च वृद्धिः। तथा च गर्गः—

येषां प्रणमते सारं ते भवन्ति च नासमम्।
येषां तु हीयते सारं तेषां नाशं विनिर्दिशेत् ॥
समानि तु समानि स्युस्तुलया तुलितानि तु ॥

तथा च पराशरः—

सारसेऽम्भसि सस्यानां राज्ञां च विजयोऽधिके।
नादेये मध्यमा सम्पत्कनीयस्य चलोदके ॥
यस्यां दिशि भवेन्माल्यमम्लानं शुचिगन्धिमत्।
तस्यां दिशि विजानीयाद्राज्ञां शिवमनामयम् ।इति।

एतत्तुलाकोशरहस्यं तुलाभाण्डागाररहस्यं परमं गुह्यमुक्तं कथितम्। **नरो** मनुष्यः प्राजेशयोगेऽपि न केवलमाषाढयोगे तुलाकोशं विदध्यात्कारयेत्, **यावत्प्राजेशयोगे** रोहिणीयोगेऽपि कारयेत् ॥१०॥

अन्यस्मिन् योगत्रयेऽपि पापग्रहा व्यवस्थिता न शुभदाः। अधिमासके सति योगे विशेषविधानमाह—

स्वातावषाढास्वथ रोहिणीषु
पापग्रहा योगगता न शस्ताः।
ग्राह्यं तु योगद्वयमप्युपोष्य
यदाधिमासो द्विगुणीकरोति ॥११॥

स्वातौ स्वातिसंयुक्ते चन्द्रे। अषाढासूत्तराषाढासु युक्तं च। अथ रोहिणीसंयुक्ते चन्द्रे। एतेषु त्रिषु योगेषु पापग्रहा भौमसौरराहुकेतवो योगगतास्तत्र स्थिता न शुभदा न शस्ताः। तथा च गर्गः--

योगैः पापैरुपहतैः प्रजानामशुभं वदेत्।
दुर्भिक्षावृष्टिमरकान् सौम्यैः सौभिक्षमादिशेत्॥

तथा च पराशरः--

शुक्रबुधबृहस्पतिसंयोगे शूकधान्यतिलमुद्गविनाशः, सौरस्य मध्यदेशाभावः भौमस्य शस्त्रकोपः, केतोर्भयदुर्भिक्षप्रादुर्भावावग्रहः, रोहिणीमध्यगमनमिन्दोः सुभिक्षक्षेमवृष्टिकरम्॥

यदा यस्मिन् काले एतेषां योगानामधिमासो द्विगुणीकरोति द्वितीयोऽधिमासोऽषाढाख्यो भवति, तदा तस्मिन् काले योगद्वयं रोहिण्यषाढाख्यमुपोष्य भुक्त्वा ग्राह्यम्। एतदुक्तं भवति—यदा द्वावाषाढौ भवतस्तदोपोष्य मासद्वयेऽपि योगद्वयं ग्राह्यं द्वितीयस्मिन् योगे मलरूपत्वादनादरो न कार्य इत्यत उक्तं योगद्वयमपीति। यदाधिमासो द्विगुणीकरोति द्वावधिमासकेन सह भवत इत्यर्थः। स्वातियोगस्य सामान्यविहितत्वाद्योगद्वयमित्युक्तमन्यथा योगत्रयं भवति॥११॥

अथात्र योगत्रयमध्याद्रोहिणीयोगस्य विशेषमाह—

त्रयोऽपि योगाः सदृशाः फलेन
यदा तदा वाच्यमसंशयेन।
विपर्यये यत्त्विह रोहिणीजं
फलं तदेवाभ्यधिकं निगद्यम्॥१२॥

त्रयोऽपि स्वात्यषाढारोहिणीति योगा यदा फलेन सदृशास्तुल्या भवन्ति, तदा शुभं फलमशुभं वा प्रधानत्वाद्योगद्वयजं फलं न बाधत इत्यष्टासु दिक्षु तदा शुभं फलमशुभं वा असंशयेन सन्देहं विहाय वाच्यं वक्तव्यम्। त्रिभिरेव शुभैः शुभमशुभैरत्यशुभमिति। फलानां वैसदृशे विपर्यये फलविपर्ययेऽन्यादृशे भिन्नफले सति यत्तु रोहिणीजं शुभं फलमशुभं वा असंशयेन सन्देहं विहाय तदेव निगद्यं वक्तव्यम्। प्रधानत्वाद्योगद्वयं फलं न बाधत इति॥१२॥

अथाष्टासु दिक्षु वातफलमाह--

निष्पत्तिरग्निकोपो वृष्टिर्मन्दाथ मध्यमा श्रेष्ठा।
बहुजलपवना पुष्टा शुभा च पूर्वादिभिः पवनैः॥१३॥

पूर्वाद्यासु दिक्ष्वष्टसु पवनैर्वातैः क्रमेणैतानि फलानि। तत्र पूर्वस्यां दिशि यदा वातो वहति तदा निष्पत्तिः सस्यानां भवति। सस्यानि सर्वाणि निष्पद्यन्ते। अग्निकोपोऽग्निभयमाग्नेय्याम्। वृष्टिर्मन्दा अल्पा दक्षिणस्याम्। मध्यमा वृष्टिर्नैर्ऋत्याम्। श्रेष्ठा प्रधाना वृष्टिः पश्चिमायाम्। बहुजलपवना प्रभूतोदका प्रभूतवाता वायव्याम्। पुष्टा परिपूर्णा अतिशोभनोत्तरस्याम्। शुभा अतिश्रेयस्करी ऐशान्यां वृष्टिरिति। रोहिणीयोगे "वायुश्चैवं दिक्षु धत्ते फलानि" इत्युक्तत्वात्पुनः करणं "निष्पत्तिरग्निकोप" इत्यादिकं शिष्यं भ्रान्तिनिराशाय कृतमिति ॥१३॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावाषाढीयोगो नाम षड्विंशोऽध्यायः ॥२६॥

अथ वातचक्रं व्याख्यायते

अतः परं केचिद्वातचक्रं पठन्ति। तच्च वराहमिहिरकृतं न भवति। यतः—

निष्पत्तिरग्निकोपो वृष्टिर्मन्दाथ मध्यमा श्रेष्ठा।
बहुजलपवना पुष्टा शुभा च पूर्वादिभिः पवनैः॥

इत्यनेन पौनरुक्त्यं भवति। बहुष्वादर्शेषु च दृश्यते। अतोऽस्माभिः सरसत्वाद्व्याख्यायते शिष्यहितार्थम्।

तत्रादावैशान्यां दिशि स्थितस्य वातस्य लक्षणमाह—

[1]**आषाढपौर्णमास्यां तु यद्यैशानोऽनिलो भवेत्।**
अस्तं गच्छति तीक्ष्णांशौ सस्यसम्पत्तिरुत्तमा ॥१॥

आषाढमासस्य पौर्णमास्यां तीक्ष्णांशावर्केऽस्तं गच्छति यद्यैशान ऐशान्यां दिशि अनिलो वातो भवेद्वहति तदा सस्यानां धान्यादीनां सम्पत्तिरुत्तमा प्रधामा भवति ॥१॥

अथ पूर्वस्यामाह—

पूर्वः पूर्वसमुद्रवीचिशिखरप्रस्फालनाघूर्णित-
श्चन्द्रार्कांशुसटाकलापकलितो वायुर्यदाकाशतः।
नैकान्तस्थितनीलमेघपटला शारद्यसंवर्धिता
वासन्तोत्कटसस्यमण्डिततला सर्वा मही शोभते ॥२॥

---

१. अ. कः पुस्तकद्वयं पद्यं तद्विवृतिश्च वातचक्रान्त उपलभ्यते।

तस्यामेवाषाढपौर्णमास्यां पूर्वो वायुः पूर्वस्यां दिशि यस्मिन् काले आकाशतो नभसो वहतीत्यर्थः। कीदृशो वायुः ? पूर्वसमुद्रस्य प्रागुदधेर्ये वीचय ऊर्मयस्तेषां ये शिखरा अग्राणि तेषां प्रस्फालना चालनं तेन घूर्णितो भ्रमितः। तथा चन्द्रार्कयोः सूर्यशशिनोर्येऽशवो रश्मयस्त एव सटाः स्कन्धावलम्बिनः केशा इव तेषां यः कलापो विस्तारस्तेन कलितो मिश्रितः। तदा मही कीदृशी भवति ? नैकान्तस्थितेति। नैकान्तमत्यर्थमेव सर्वत्र ये स्थिता नीलवर्णानां मेघानां पटलाः समूहास्तैः शोभिता। तथा शारद्यसंवर्धिता। शारद्यैः सस्यैर्धान्यादिभिः संवर्धिता समृद्धयुक्ता भवति। तथा वासन्तैर्वसन्तसम्भवैरुत्कटैरतिसमृद्धैः सस्यैर्मण्डितं भूषितं तलं पृष्ठं यस्याः सा तथाभूता। सर्वा निःशेषा मही भूः शोभते विराजते ॥२॥

अथाग्नेय्यामाह—

यदा वह्नौ वायुर्वहति गगने खण्डिततनुः
प्लवत्यस्मिन् योगे भगवति पतङ्गे प्रवसति।
तदा नित्योद्दीप्ता ज्वलनशिखरालिङ्गिततला
स्वगात्रोष्मोच्छ्वासैर्वमति वसुधा भस्मनिकरम् ॥३॥

यदा यस्मिन् काले वायुः पवनो वह्नावाग्नेय्यां दिशि वहति। गगने आकाशे। कीदृशः ? अखण्डिततनुः। अखण्डिता तनुर्यस्य अविहतगतिरित्यर्थः। प्लवति प्रवहति अस्मिन्नाषाढीयोगे। कदा भगवति पतङ्गे सूर्ये प्रवसत्यस्तमेति सति। तदा तस्मिन् वर्षे वसुधा भूर्नित्योद्दीप्ता सर्वकालमुज्ज्वलिता। ज्वलनशिखरालिङ्गिततला ज्वलनस्याग्नेर्ये शिखरा ज्वालाग्राणि तैरालिङ्गितं परिष्वक्तं तलं यस्याः। तथाभूता स्वगात्रोष्मोच्छ्वासैः स्वगात्रादात्मीयदेहाद्य ऊष्मा स एवोच्छ्वासास्तैस्तथाभूतैर्बहुप्रकारैः स्वगात्रोष्मोच्छ्वासैर्भस्मनिकरं भस्मसमूहं वमत्युद्गिरति ॥३॥

अथ दक्षिणस्यामाह—

तालीपत्रलतावितानतरुभिः शाखामृगान्नर्तयन्
योगेऽस्मिन् प्लवति ध्वनिः सपरुषो वायुर्यदा दक्षिणः।
तद्वद्योगसमुत्थितस्तु गजवत्तालाङ्कुशैर्घट्टिताः
कीनाशा इव मन्दवारिकणिका मुञ्चन्ति मेघास्तदा ॥४॥

अस्मिन् योगेऽषाढाख्ये यदा यस्मिन् काले दक्षिणो याम्याशास्थो वायुः पवनः प्लवति वहति। किं कुर्वंस्तालो वृक्षविशेषस्तस्य पत्राणि पर्णानि तथा लता-वितानो लतानां विस्तारस्तरवो वृक्षाः। एतैश्चालितैः शाखामृगान् वानरान्नर्तयन्

वहति। वातवेगात्तालादयश्चलन्ति तच्चलनात्तान्नर्तयन्निव। तथा तद्वत्तेनैव प्रकारेण योगे पौर्णमास्यां सूर्यास्तमये समुत्थितो ध्वनिः शब्दः सपरुषोऽतिरूक्षः प्लवति वाति प्रभवति वा तदा तस्मिन् काले मेघा अम्बुदा गजवत्तालाङ्कुशैर्घट्टिताः। यथा गजा इभाः। तालेनाहता अङ्कुशेन च यद्वद्घट्यन्ते रुध्यन्ते तद्वद्घट्टिता। कीनाशाः कदर्या इव मन्दस्य स्वल्पस्य वारिणो जलस्य कणिका बिन्दूनेव मुञ्चन्ति त्यजन्ति न प्रभूतं जलमिति ॥४॥

अथ नैर्ऋत्यामाह—

सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णयन् सागरे
भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैर्ऋतः।
क्षुत्तृष्णावृतमानुषास्थिशकलप्रस्तारभारच्छदा
मत्ता प्रेतवधूरिवोग्रचपला भूमिस्तदा लक्ष्यते ॥५॥

तस्यामाषाढपौर्णमास्यां भानोः सूर्यस्यास्तमयेऽस्तमयकाले नैर्ऋतो वायुर्दक्षिणपश्चिमाशास्थः। अविरतः सन्ततः प्लवति वहति। किं कुर्वन्। सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णयन्। सूक्ष्मैला प्रसिद्धा। लवली प्रसिद्धा। लवङ्गानि प्रसिद्धानि। एतेषां निचयाः समूहास्तान् व्याघूर्णयंश्चालयन् क्व। सागरे [1]समुद्रसमीपे। तदा तस्मिन् वर्षे भूमिरवनिरेवंविधा लक्ष्यते दृश्यते। कीदृशी? क्षुत्तृष्णावृतमानुषास्थिशकलप्रस्तारभारच्छदा, क्षुद् बुभुक्षा, तृष्णा पिपासा, आभ्यामावृता व्याप्ता ये मानुषा जनास्तेषां मृतानामस्थिशकलैरस्थिखण्डैश्च यः प्रस्तारो विस्तारः स एव भारोऽतिबहुत्वात् स एव शुक्लत्वाच्छद आवरणं वस्त्रं यस्याः अत एव प्रेतवधूः प्रेतस्त्रीवोग्रचपला तीव्रा चापल्ययुक्ता च। मत्ता प्रमत्ता। इवातीव जनमरकत्वात् ॥५॥

अथ पश्चिमायामाह—

यदा रेणूत्पातैः प्रविचलसटाटोपचपलः
प्रवातः पश्चाच्चेद्दिनकरकरापातसमये।
तदा सस्योपेता प्रवरनिकराबद्धसमरा
क्षितिः स्थानस्थानेष्वविरतवसामांसरुधिरा ॥६॥

यदा यस्मिन् काले दिनकरकरापातसमये दिनकरस्यादित्यस्य करा ये रश्मयस्तेषामापातो विनाशस्तत्समये। सूर्यास्तमयकाल इत्यर्थः; पश्चाच्चेत् पश्चि-

---

१. समुद्रतीर इति अ. क. पु. पाठः।

मायां दिशि यदि प्रवातश्चण्डानिलो वहति। कीदृशः ? रेणूत्पातैर्धूलिसमुत्क्षेपणैः प्रविचलः। प्रकर्षेण चलमानो यः सटाटोपः सटाक्षेपस्तेन चपलश्चञ्चलः। तदा तस्मिन् वर्षे क्षितिर्भूः कीदृशी भवति सस्योपेता सस्यैर्बहुभिः संयुक्ता। तथा प्रवराणां प्रधानानां ये निकराः समूहास्तैराबद्धा रचिताः समराः संग्रामा यस्याम्। तथा स्थानस्थानेषु प्रदेशप्रदेशेषु। अविरतवसामांसरुधिरा, अविरतं सन्ततं कृत्वा वसामांसरुधिरैर्मेदपलशोणितैर्युक्तेति। अतिबहवो जनाः सङ्ग्रामे बध्यन्त इत्यर्थः ॥६॥

अथ वायव्यामाह—

आषाढीपर्वकाले यदि किरणपतेरस्तकालोपपत्तौ
वायव्यो वृद्धवेगः पवनघनवपुः [1]पन्नगार्द्धानुकारी।
जानीयाद्वारिधाराप्रमुदितमुदितामुक्तमण्डूककण्ठां
सस्योद्भासैकचिह्नां सुखबहुलतया भाग्यसेनामिवोर्वीम् ॥७॥

आषाढी पौर्णमासी सैव पर्व तस्य कालस्तस्मिन् यदि चेत् करणपतेः सूर्यस्यास्तकालोपपत्तावस्तमयसमयप्राप्तौ वायव्यो वातो वृद्धवेगश्चण्डशब्दो यदि वहति। कीदृशः ? पवनघनवपुः पवनश्चासौ घनवपुः, घनं समन्ततो वपुः शरीरं यस्य। तथा पन्नगार्द्धानुकारी, पन्नगाः सर्पास्तेषामर्द्धानि खण्डान्यनुकरोति। रेणुसमायोगत्वात् सन्ततत्वाच्चेत्यर्थः। केषाञ्चित् पाठः पन्नगादानुकारी, पन्नगाः सर्पास्तानत्ति भक्षयति गरुडस्तदनुकारी। अतिवेगसमायुक्तत्वाद् गरुडवेग इव स वायुर्लक्ष्यते। तदा तस्मिन् वर्षे उर्वीं भूमि कीदृशीं जानीयाद्विन्द्यात्। वारिधाराप्रमुदितमुदितामुक्तमण्डूककण्ठामिति, वारिणो जलस्य या धारास्ताभिः प्रकर्षेणातिशयेन या मुद्धर्षमिता प्राप्ता तया मुदिता हृष्टा मत्ता ये मण्डूका भेकास्तेषामामुक्ता अतिशब्दाः कण्ठा गलाश्च यस्याम्। तथा सस्यानामुद्भासो बीजोत्पत्तिः स एकचिह्नं ललाटे यस्याम्। सुखानां बहुलतया सामग्र्या जनानामतिसुखितत्वाद् भाग्यसेनां भाग्यचमूमिव ॥७॥

अथोत्तरस्यामाह—

मेरुग्रस्तमरीचिमण्डलतले ग्रीष्मावसाने रवौ
वात्यामोदिकदम्बगन्धसुरभिर्वायुर्यदा चोत्तरः।
विद्युद्भ्रान्तिसमस्तकान्तिकलना मत्तास्तदा तोयदा
उन्मत्ता इव नष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः ॥८॥

---

१. पन्नगादानुकारीति पाठान्तरम्।

ग्रीष्मावसाने आषाढपौर्णमास्यां रवावादित्ये मेरुग्रस्तमरीचिमण्डलतले मेरुणा पर्वतेन ग्रस्तमुपसंहृतं मरीचिमण्डलतलं रश्मिसमूहपर्यन्तं यस्य रवेस्तथाभूते काले यदा वायुरनिल उत्तरः सौम्याशास्थो वाति वहति। कीदृशः ? आमोदिनोऽतिसुगन्धा ये कदम्बास्तेषामेव कदम्बानां पुष्पविशेषाणां यो गन्धस्तेन सुरभिः सुवासितः, तदा तस्मिन् वर्षे तोयदा मेघा गां भूमिमम्बुभिर्जलैः पूरयन्ति। कीदृशा मेघाः ? विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्ताः। विद्युत्तडित्तस्या भ्रान्तिः परिभ्रमणं तया समस्ता सकला या कान्तिः प्रभा तस्याः कलनमाकारज्ञानं येषां तस्माद्मत्ताः सोद्यमाः। तथा उन्मत्ता इवातिनादाश्चातिवृष्टिमुचः। कीदृशीं गाम् ? नष्टचन्द्रकिरणाम्, नष्टा अदर्शनं गताश्चन्द्रकिरणाः शशिरश्मयो यस्यां तथाभूतामिति ॥८॥

अथ भद्रपदायोगमाह—

वृत्तायामाषाढ्यां कृष्णचतुर्थ्यामजैकपादर्क्षे।
यदि वर्षति पर्जन्यः प्रावृट् शस्ता न चेन्न तदा ॥९॥

आषाढपौर्णमास्यां वृत्तायामतीतायां पुरतः कृष्णचतुर्थ्यां तिथावजैकपादर्क्षे पूर्वभद्रपदानक्षत्रे यदि पर्जन्यो मेघो वर्षति तदा प्रावृड् वर्षाः शस्ता शुभप्रदा। न चेद्यदि न वर्षति तदा न शुभेति ॥९॥

अन्यदप्याह—

नष्टचन्द्रार्ककिरणं नष्टतारं न चेन्नभः।
न तां भद्रपदां मन्ये यत्र देवो न वर्षति ॥१०॥

यस्यां भद्रपदायां नभ आकाशं नष्टचन्द्रार्ककिरणं भवति। नष्टा अदर्शनं गताश्चन्द्रार्कयोः शशिसूर्ययोः किरणा यत्र तत्तथाभूतम्। मेघच्छन्नत्वात्। तथा नष्टतारम्, नष्टा अदर्शनं गतास्तारा नक्षत्राणि यत्र। यस्यां भद्रपदायां देवो न वर्षति न तां भद्रपदामिति मन्ये जाने इति। अनार्षाविमौ श्लोकौ ॥१०॥

इति श्रीभट्टोत्पलविरचितायां संहितायां विवृतौ वातचक्रं नाम सप्तविंशोऽध्यायः ॥२७॥

अथ सद्योवर्षणाध्यायो व्याख्यायते

तत्रादावेव वर्षपृच्छायां वर्षज्ञाने प्रश्नमाह—

वर्षाप्रश्ने सलिलनिलयं शशिमाश्रित्य चन्द्रो
लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे।

सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोऽल्पमम्भः
प्रावृट्काले सृजति न चिराच्चन्द्रवद्भार्गवोऽपि ॥१॥

वर्षाप्रश्ने वृष्टिपृच्छायां चन्द्रः शशी सलिलनिलयं जलाश्रयं राशिमाश्रित्य कर्कटमकरमीनानामन्यतमं संश्रित्य लग्नं तात्कालिकं पृच्छालग्नं यातः प्राप्तस्तत्र व्यवस्थितः, एको योगो भवति। यदि वा केन्द्रगः शुक्लपक्षे प्रश्नकाले न लग्नगश्चन्द्रमा जलराशिस्थोऽप्यन्यस्मिन् केन्द्रे चतुर्थसप्तमदशमानामन्यतमे भवति। किं सर्वदा। नहि, शुक्लपक्षे। तेनैतदुक्तं भवति—कृष्णपक्षे वर्षपृच्छायां यदि जलचरराशिव्यवस्थितश्चन्द्रमा लग्ने भवति शुक्ले पुनर्जलराश्याश्रित एव लग्नवर्जमन्यकेन्द्रगतो भवति, तदा द्वितीयो योगः। अस्मिन् योगद्वये प्रावृट्काले वर्षासमये न चिराच्छीघ्रमेवाम्भः पानीयं सृजति ददाति। अत्रैव जलस्याल्पत्वं प्रभूतत्वमाह—सौम्यैर्दृष्टः प्रचुरमिति। यथादर्शितयोगस्थः शशी सौम्यैः शुभग्रहैर्बुधजीवशुक्राणामन्यतमेन दृष्टोऽवलोकितो भवति, तदा प्रचुरं प्रभूतमुदकं जलं सृजति। पापैरादित्यभौमसौराणामन्यतमेन दृष्टोऽल्पं स्तोकमम्भो जलं सृजति। अर्थादेव मिश्रदृष्टो मध्यमं जलं सृजति तदा प्रावृट्काले। प्रावृट्कालग्रहणमन्यकालव्युदासार्थम्। सृजति मुञ्चति न चिरात् तस्मिन्नहन्येव। चन्द्रवद्भार्गवोऽपि, भार्गवः शुक्रश्चन्द्रवज्ज्ञेयः। एतदुक्तं भवति—वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य शुक्रो लग्नयातो भवति कृष्णपक्षे तथा शुक्लपक्षे केन्द्रगस्तत्र च योगद्वयोऽपि सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोऽल्पमम्भो मिश्रदृष्टो मध्यमं जलं सृजति।

नन्वत्र यदुक्तम्—"लग्न यातो भवति यदि वा केन्द्रगः शुक्लपक्षे" इति तत्किमनेन लग्नग्रहणेन, केन्द्रग्रहणेनैव लग्नं परिगृहीतमेव। यस्मात् 'सञ्ज्ञाध्यायेऽभिहितम्—"कण्टककेन्द्रचतुष्टयसञ्ज्ञा सप्तमलग्नचतुर्थखभानाम्" तस्माल्लग्नग्रहणमत्रातिरिच्यत इति। अत्रोच्यते—"भवति यदि वा केन्द्रगः शुक्लपक्षे" इति यदुक्तं तदनेनैव विकल्पेनाचार्येण कृष्णपक्षे वर्षप्रश्नपरिज्ञानं सविकल्पनमभिहितम्, तेन शुक्लपक्षे लग्नादन्यतमे केन्द्रे वा जलराशिव्यवस्थितश्चन्द्रमाः सौम्यैर्यदि दृश्यते तदा सुप्रभूतं पानीयं मुञ्चति, पापदृष्टोऽल्पम्, मिश्रदृष्टो मध्यमम्। कृष्णपक्षे पुनर्लग्न एव केन्द्रे यदि भवति तत्रस्थः सौम्यैर्दृश्यते तदा प्रचुरं पानीयं मुञ्चति, पापदृष्टोऽल्पम्, मिश्रदृष्टो मध्यमम्। अन्यकेन्द्रव्यवस्थिते शशिनि सौम्यग्रहदृष्टेऽपि पानीयं नास्त्येव। कुत एतन्निश्चीयते ननु। विकल्पादवगतं भवति। यदि वा केन्द्रगः शुक्लपक्षेऽतोऽर्थादेवावगम्यते। लग्नकेन्द्रमुक्त्वा कृष्णपक्षेऽन्यकेन्द्र-

---

१. बृहज्जातकस्य संज्ञाध्याय इत्यर्थः।

चिन्ता नास्त्येव। तस्मान्न लग्नग्रहणमत्रातिरिच्यत इति। तथा च समास-संहितायाम्—

वर्षाप्रश्ने प्रावृषि जलराशौ कण्टके शशी बलवान्।
भृगुजो वा शुभदृष्टो बहुजलकृत् स्वल्पदः पापैः ॥इति॥१॥

अत्र सामान्येनोक्तम्।

अथान्यत्प्रश्नज्ञानमाह—

आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा
तोयासन्नो भवति यदि वा तोयकार्योन्मुखो वा।
प्रष्टा वाच्यः सलिलमचिरादस्ति निःसंशयेन
पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः॥२॥

अथवा प्रष्टा वर्षप्रश्नपृच्छकः। आर्द्रं द्रव्यं सरसं यत्किञ्चिद्वस्तुविशेषं स्पृशति। यदि वा वारि जलं स्पृशति। तत्संज्ञकं वारिसंज्ञकं यत्किञ्चित् स्पृशति। यथा क्षीरं पयःशब्दवाच्यत्वात्तत्संज्ञम्। अब्जा मुक्ताः। अम्बुबाल-कमित्येवमादि। अथवा प्रष्टा तोयासन्नो जलसमीपवर्ती यदि भवति। अथवा तोयकार्ये जलकार्ये उन्मुखो गन्तुं प्रवृत्तो भवति। तदा प्रष्टा एव वाच्यो वक्तव्यः, यथा सलिलं जलम्। अचिराच्छीघ्रमेव निःसंशयेन निर्विकल्पेनास्ति विद्यते। अथवा पृच्छाकाले वा प्रश्नसमये सलिलमिति शब्दो वा श्रूयते यत्र तत्र जलं निः-संशयेनास्तीति वक्तव्यम्॥ तथा च समाससंहितायाम्—

आर्द्रद्रव्यं सलिलं जलसंज्ञश्रवणदर्शनान्यथवा॥ इति॥२॥

अथान्यद्वर्षज्ञानमाह—

उदयशिखरिसंस्थो दुर्निरीक्ष्योऽतिदीप्त्या
द्रुतकनकनिकाशः स्निग्धवैदूर्यकान्तिः।
तदहनि कुरुतेऽम्भस्तोयकाले विवस्वान्
प्रतपति यदि चोच्चैः खं गतोऽतीव तीक्ष्णम्॥३॥

विवस्वानादित्य उदयशिखरिसंस्थः। उदयपर्वतमूर्ध्नि स्थितः। अति-दीप्त्या अतिकान्त्या दुर्निरीक्ष्यो निरीक्षितुं न शक्यते। द्रुतकनकनिकाशः, द्रुतस्य गलितस्य कनकस्य सुवर्णस्य निकाशस्तत्सदृशः। स्निग्धवैदूर्यकान्ति-स्तथा स्निग्धस्य निर्मलस्य वैदूर्यस्य मणेः सदृशी कान्तिः। एवंविधो विवस्वान् तदहनि तस्मिन्नेव दिनेऽम्भस्तोयं कुरुते। तोयकाले वर्षासमये। तोयकाल-

ग्रहणमन्यकालव्युदासार्थम्। यदि चोच्चैः खमाकाशं गतो मध्याह्नस्थ इत्यर्थः। प्रतप्यत्यतितीक्ष्णं तपति तदापि तस्मिन्नहन्यम्भः कुरुते ॥३॥

अन्यद्वर्षज्ञानमाह—

विरसमुदकं गोनेत्राभं वियद्विमला दिशो
लवणविकृतिः काकाण्डाभं यदा च भवेन्नभः।
पवनविगमः पोप्लूयन्ते झषाः स्थलगामिनो
रसनमसकृन्मण्डूकानां जलागमहेतवः ॥४॥

इमे सर्वे जलागमहेतवः। पानीयागमनकारणानि। उदकं जलं विरसं स्वादुरहितम्। तथा गोनेत्राभं गोनयनसदृशं वियदाकाशम्। दिश आशा विमला निर्मलाः। लवणस्य सैन्धवस्य विकृतिर्विकारः। आर्द्रताप्रस्वेदः। नभ आकाशं च काकाण्डाभं वायसाण्डकान्तितुल्यं भवेत् स्यात्, श्वेतनीलमित्यर्थः। पवन-विगमो वायोर्निरोधः। झषा मत्स्याः स्थलगामिनः स्थलगमनशीलाः। पोप्लूयन्ते अत्यर्थं प्लवन्ते। मण्डूकानां भेकानामसकृत् पुनः पुना रसनं शब्दः ॥४॥

अन्यद्वर्षज्ञानमाह—

मार्जारा भृशमवनिं नखैर्लिखन्तो
लोहानां मलनिचयः सविस्रगन्धः।
रथ्यायां शिशुरचिताश्च सेतुबन्धाः
सम्प्राप्तं जलमचिरान्निवेदयन्ति ॥५॥

मार्जारा विडाला भृशमत्यर्थमवनिं भूमिं नखैः करजैर्लिखन्तो विलिखन्तः। तथा लोहानामायसभाण्डानां कांस्यानां वा मलनिचयो मलसमूहः। सविस्रगन्धः सह विस्रगन्धेन वर्तते। केचिन्मत्स्यसदृशगन्ध इतीच्छन्ति। एवं मलनिचयो विस्रगन्धसहितस्तथा रथ्यायां पथि शिशुरचिता बालविरचिताश्च सेतुबन्धा यदि दृश्यन्ते तदा जलमुदकं सम्प्राप्तमागतमचिराच्छीघ्रमेव निवेदयन्ति कथयन्ति ॥५॥

अन्यद्वर्षज्ञानमाह—

गिरयोऽञ्जनचूर्णसन्निभा यदि वा बाष्पनिरुद्धकन्दराः।
कृकवाकुबिलोचनोपमाः परिवेषाः शशिनश्च वृष्टिदाः ॥६॥

गिरयः पर्वता अञ्जनचूर्णसन्निभाः कृष्णवर्णा यदि दृश्यन्ते। बाष्पेणो-ष्मणा निरुद्धाऽऽवृताः कन्दरा अवटा येषां तथाभूताः। शशिनश्चन्द्रस्य परिवेषा

कृकवाकुविलोचनोपमाः। कृकवाकोर्जलकुक्कुटस्य यादृग्विलोचनं नयनं तदुपमास्तत्सदृशाः। अतिलोहिता इत्यर्थः। एते सर्व एव वृष्टिदाः ॥६॥

अन्यद्वर्षज्ञानमाह—

विनोपघातेन पिपीलिकाना-
मण्डोपसंक्रान्तिरहिव्यवायः।
द्रुमावरोहश्च भुजङ्गमानां
वृष्टेर्निमित्तानि गवां प्लुतं च ॥७॥

पिपीलिकानामुपघातेनोपसर्गेण विना तद्व्यतिरिक्तमण्डानामुपसंक्रान्तिरन्यदेशे नयनम्। तथाऽहीनां सर्पाणां व्यवायो मैथुनम्। भुजङ्गमानां सर्पाणां द्रुमावरोहो वृक्षावरोहणम्। तथा गवां सुरभीणां प्लुतं प्लवनम्। एतानि सर्वाणि वृष्टेर्निमित्तानि कारणानि ॥७॥

अन्यद्वर्षज्ञानमाह—

तरुशिखरोपगताः कृकलासा
गगनतलस्थितदृष्टिनिपाताः।
यदि च गवां रविवीक्षणमूर्ध्वं
निपतति वारि तदा न चिरेण ॥८॥

कृकलासाः प्राणिनस्तरूणां वृक्षाणां शिखरोपगता मूर्द्धनि स्थिताः। तत्र गगनतले आकाशतले स्थितदृष्टिनिपाता नभस्येव निरीक्षन्ते। यदि च गवामुक्षणामूर्ध्वमुपरि रविवीक्षणं सूर्यावलोकनं भवति तदा न चिरेण शीघ्रमेव वारि जलं निपतति वर्षतीत्यर्थः ॥८॥

अन्यद्वर्षज्ञानमाह—

नेच्छन्ति विनिर्गमं गृहाद्धुन्वन्ति श्रवणान् खुरानपि।
पशवः पशुवच्च कुक्कुरा यद्यम्भः पततीति निर्दिशेत् ॥९॥

यदि पशवश्चतुष्पादा गवादयो गृहाद्वेश्मनो विनिर्गमं निष्क्रमणं नेच्छन्ति न वाञ्छन्ति, तथा श्रवणान् कर्णान् पादानपि धुन्वन्ति कम्पयन्ति, तदाम्भो जलं निपततीति निर्दिशेद्वदेत्। पशुवच्च कुक्कुराः। श्वानः पशुवत्। यथा पशवस्तथा कुक्कुरा अपि ज्ञेयाः। एतदुक्तं भवति—नेच्छन्ति विनिर्गमं गृहाद्धुन्वन्ति श्रवणान् खुरानपीति कुक्कुराणामपि ज्ञेयम् ॥९॥

अन्यद्वर्षज्ञानमाह—

यदा स्थिता गृहपटलेषु कुक्कुरा
रुदन्ति वा यदि विततं वियन्मुखाः।
दिवा तडिद्यदि च पिनाकिदिग्भवा
तदा क्षमा भवति समैव वारिणा॥१०॥

यदा यस्मिन् काले कुक्कुराः श्वानो गृहपटलेषु स्थिताः। गृहपटलं गृहाच्छादनं तत्र स्थिता यदि वा विततं सततं कृत्वा वियन्मुखमाकाशं निरीक्षन्तो रुदन्ति शब्दं कुर्वन्ति। यदि च दिवा दिवसे तडिद् विद्युत् पिनाकिदिग्भवा ईशानदिगुत्था भवति, तदा क्षमा भूर्वारिणा जलेनैव समा निम्नोन्नता लक्ष्या न भवति। अतिवृष्टिर्भवतीत्यर्थः॥१०॥

अन्यद्वर्षज्ञानमाह—

शुककपोतविलोचनसन्निभो
मधुनिभश्च यदा हिमदीधितिः।
प्रतिशशी च यदा दिवि राजते
पतति वारि तदा न चिरेण च॥११॥

हिमदीधितिश्चन्द्रो यदा यस्मिन् काले शुककपोतविलोचनसन्निभः। शुककपोतौ प्रसिद्धौ पक्षिणौ तद्विलोचनसन्निभस्तन्नेत्रसदृशाभो लोहितकान्तिरित्यर्थः। मधुनिभश्च माक्षिकसदृशवर्णो वा पीताभ इत्यर्थः। तथा प्रतिशशी द्वितीयश्चन्द्रो यदा च दिवि नभसि राजते दृश्यते तदा तस्मिन् काले न चिरेण शीघ्रमेव वारि पानीयं पतति वर्षतीत्यर्थः॥११॥

अन्यद्वर्षज्ञानमाह—

स्तनितं निशि विद्युतो दिवा
रुधिरनिभा यदि दण्डवत्स्थिताः।
पवनः पुरतश्च शीतलो
यदि सलिलस्य तदाऽऽगमो भवेत्॥१२॥

यदि निशि रात्रौ स्तनितं मेघशब्दो भवति तथा विद्युतस्तडितो दिवा दिवसे। कीदृश्यो विद्युतः। रुधिरनिभा अतिलोहितास्ताश्च दण्डवदूर्ध्वाधःस्थित्या स्थिताः। पवनो वायुः पुरतः पूर्वस्यां दिशि शीतलो वहति तदा सलिलस्य जलस्यागमो वृष्टिपातो भवेत् स्यात्॥१२॥

अन्यद्वर्षज्ञानमाह—

वल्लीनां गगनतलोन्मुखाः प्रवालाः
स्नायन्ते यदि जलपांशुभिर्विहङ्गाः।
सेवन्ते यदि च सरीसृपास्तृणाग्रा-
ण्यासन्नो भवति तदा जलस्य पातः॥१३॥

वल्यः प्रसिद्धास्तासां प्रवाला अभिनवपत्राणि। गगनतलोन्मुखा ऊर्ध्वगामिनः। यदि च विहङ्गाः पक्षिणो जलपांशुभिर्जलेनोदकेन वा पांशुना धूल्या स्नायन्ते स्नानं कुर्वन्ति। सरीसृपाः कृमिजातयो यदि च तृणाग्राणि तृणप्रान्तानि सेवन्ते। तत्पृष्ठगता भवन्ति। तदा जलस्य पानीयस्य पात आसन्नो निकटो भवति। शीघ्रमेव वर्षतीत्यर्थः॥१३॥

अन्यद्वर्षज्ञानमाह—

मयूरशुकचाषचातकसमानवर्णा यदा
जपाकुसुमपङ्कजद्युतिमुषश्च सन्ध्याघनाः।
जलोर्मिनगनक्रकच्छपवराहमीनोपमाः
प्रभूतपुटसंचया न तु चिरेण यच्छन्त्यपः॥१४॥

एवंविधाः सन्ध्याकाले घना मेघा न तु चिरेण कालेन शीघ्रमेवापो जलं यच्छन्ति ददति। कीदृशाः। मयूरशुकचाषचातकाः सर्व एव पक्षिविशेषाः। एतेषां समानवर्णास्तुल्यभाः, अतिनीलकान्तय इत्यर्थः।

तथा जपाकुसुमपङ्कजद्युतिमुषः, जपाकुसुमं पुष्पविशेषोऽतिलोहितः। पङ्कजं पद्मम्। पङ्के कर्दमे जायत इति। अनयोर्द्युतिं कान्तिं ये मुष्णन्ति अपहरन्ति, अतिलोहितत्वात्तथाविधाः। तथा जलोर्मिरुदकावर्तः, नगः पर्वतः, नक्रो जलप्राणी, कच्छपः कूर्मः, वराहः सूकरः, मीनो मत्स्यः, एषां सदृशाकृतयः। तथा प्रभूतपुटसंचयाः। प्रभूतो बहुप्रकारः पुटसंचयो येषाम्। उपर्युपरि स्थिता इत्यर्थः॥१४॥

अथान्यद्वर्षज्ञानमाह—

पर्यन्तेषु सुधाशशाङ्कधवला मध्येऽञ्जनालिप्तविषः
स्निग्धा नैकपुटाः क्षरज्जलकणाः सोपानविच्छेदिनः।
माहेन्द्रीप्रभवाः प्रयान्त्यपरतः प्राग् वाम्बुपाशोद्भवा
ये ते वारिमुचस्त्यजन्ति न चिरादम्भः प्रभूतं भुवि॥१५॥

एवंविधा ये वारिमुचो मेघास्ते न चिराच्छीघ्रमेव भुवि भूमावम्भो जलं प्रभूतं सुबहु त्यजन्ति विसृजन्ति। कीदृशाः। पर्यन्तेषु समन्ततः। सुधा मक्कोलः। शशाङ्कश्चन्द्रः। तद्वद्धवलाः शुक्लाः। तथा मध्ये मध्यभागेऽञ्जनालित्विषः। अञ्जनं कज्जलम्। अलिर्भ्रमरः। तद्वत्त्विट् कान्तिर्येषां ते तथाभूताः। तथा स्निग्धा निर्मलाः। नैकपुटा बहुभिः पुटैरुपलक्षिताः। उपर्युपरि स्थिता इत्यर्थः। क्षरज्जलकणाः, क्षरन्तस्त्यजन्तो जलकणा जलबिन्दवो येषां ते। सोपानविच्छेदिनः। सोपानवद्विच्छेदो येषां ते। सोपानपदपङ्क्तिन्यायेन स्थिता इत्यर्थः। माहेन्द्रीप्रभवाः पूर्वस्यां दिशि उत्पन्नाः। अपरतः पश्चिमायां दिशि प्रयान्ति गच्छन्ति। अम्बुपाशोद्भवाः। अम्बुपो वरुणस्तस्याशा वारुणी दिक् पश्चिमेत्यर्थः। तदु वास्तत्सम्भूताः। प्राग्वा पूर्वां वा दिशं यान्ति ॥१५॥

अन्यद्वर्षज्ञानमाह—

शक्रचापपरिघप्रतिसूर्या रोहितोऽथ तडितः परिवेषः।
उद्गमास्तसमये यदि भानोरादिशेत् प्रचुरमम्बु तदाशु ॥१६॥

भानोरादित्यस्योद्गमास्तसमये उदयकालेऽस्तमयकाले वा यद्येते दृश्यन्ते तदाशु शीघ्रमेव प्रचुरं प्रभूतमम्बु जलमादिशेद्वदेत्। के ते? शक्रचापपरिघप्रतिसूर्याः, शक्रचापमिन्द्रधनुः। परिघः सूर्योदयास्तमयसमये तिर्यक् स्थिता मेघरेखा, तस्य च लक्षणं वक्ष्यति—"परिघ[1] इति मेघरेखा"। प्रतिसूर्यो द्वितीयोऽर्कः। रोहितस्तस्य च लक्षणं वक्ष्यति—"[2]सुरचापखण्डमृजु यद्रोहितम्" इति।

अथशब्दश्चार्थे। अथ तडितो विद्युतः। परिवेषः सूर्यशशिनोः। तस्य लक्षणं वक्ष्यति—"[3]सम्मूर्छिता रवीन्द्वोः किरणाः" इति। एते सर्व एव ॥१६॥

अन्यद्वर्षज्ञानमाह—

यदि तित्तिरपत्रनिभं गगनं
मुदिताः प्रवदन्ति च पक्षिगणाः।
उदयास्तमये सवितुर्द्युनिशं
विसृजन्ति घना न चिरेण जलम् ॥१७॥

यदि गगनमाकाशं तित्तिरपत्रनिभम्, तित्तिरः पक्षी तस्य पत्रं पक्षस्तन्निभमिति तद्वत्। आवृतत्वाद्विचित्रमित्यर्थः। अथ च पक्षिगणा विहङ्गसमूहा

---

१. बृहत्संहितायाम् ४७ अध्यायस्य मयूरचित्रकाख्यस्य १९ श्लोकः।
२. बृहत्संहितायाम् ४७ अध्यायस्य मयूरचित्रकाख्यस्य २० श्लोकः।
३. बृहत्संहितायाम् ३४ अध्यायस्य १ श्लोकः।

मुदिता हृष्टाः प्रवदन्ति शब्दं कुर्वन्ति सवितुः सूर्यस्योदयकालेऽस्तमयकाले वा। ते च यथासङ्ख्यं द्युनिशम्। उदये दिवसे अस्ते च रात्रौ घना मेघा नचिरेण शीघ्रमेव जलं विसृजन्त्युत्सृजन्ति। वर्षन्तीत्यर्थः। उदयकाले दिवा वृष्टिरस्तमयकाले रात्राविति। अनार्षोऽयं श्लोकः ॥१७॥

अन्यद्वर्षज्ञानमाह—

यद्यमोघकिरणाः सहस्रगो-
रस्तभूधरकरा इवोच्छ्रिताः।
भूसमं च रसते यदाम्बुद-
स्तन्महद्भवति वृष्टिलक्षणम् ॥१८॥

सहस्रं गवां रश्मीनां यस्य स सहस्रगुप्तस्य सहस्रगोरादित्यस्य यद्यमोघकिरणाः। अमोघाख्या रश्मयः। तेषां लक्षणं वक्ष्यति—"[1]शुक्राः करा दिनकृतः" इति। एवंविधा अमोघकिरणा अस्तभूधरकरा इवोच्छ्रिताः। अस्तभूधरस्यास्तमयपर्वतस्योच्छ्रिता उच्चीकृताः करा हस्ता इव लक्ष्यन्ते। उदयास्तमययोश्चैवंविधा दृश्यन्ते। वक्ष्यत्याचार्यः। [2]उदयेऽस्ते वा भानोर्ये दीर्घा रश्मयस्त्वमोघास्ते। तथाम्बुदो मेघो भूसमं क्षितितुल्यं रसते श्लिष्यते यदा तत्तस्मान्महद्वृष्टिलक्षणं भवति। अतिवृष्टिचिह्नं भवतीत्यर्थः। तथा च समाससंहितायाम्—

पृच्छाकाले शान्ता वारुणदिक्स्था विहङ्गा वा।
दर्पणलोहकलङ्को लवणक्लेदोऽतितीक्ष्णकिरणोऽर्कः॥
पोप्लूयन्ते मत्स्या दिश्यैशान्यां तडिच्च दिवा।
उत्कर्णपुच्छवदना गावस्तापोऽम्भसां पवननाशः॥
अञ्जनपुञ्जश्यामा गिरयो वाष्पावृता यदि वा।
यदि जलपांशुस्नानं विहगानां मैथुनं द्विजिह्वानाम्॥
वृक्षारोहणमथवा पिपीलिकाण्डोपसङ्क्रातिः।
कृकवाकुशुककपोतकलविङ्कविलोचनोऽर्केन्द्वोः ॥
स्निग्धः परिवेषो वा वियदमलं बालकनिमित्तम्।
मधुसदृशः शीतांशुः प्रतिचन्द्रः शीतमारुतः पूर्वः॥
ऊर्ध्वाङ्कुराश्च वल्यः सद्योवर्षाय कीर्त्यन्ते।
स्निग्धाः समसितरेखा यथाभ्रवृन्दानि कल्पितान्येव॥
यच्छन्त्यपो मयूखा यदि चेन्दोर्वा रवेर्दीप्ताः ॥इति॥

---

१. बृहत्संहितायाम् ३० अध्यायस्य सन्ध्यालक्षणाख्यस्य ११ श्लोकः।
२. बृहत्संहितायाम् ४७ अध्यायस्य मयूरचित्रकाख्यस्य २० श्लोकः।

अत्र यानि सद्योवर्षचिह्नानि उक्तानि तेषु बलवत्सु महद्वृष्टिं मध्येषु मध्यमामल्पेष्वत्यल्पां वदेत्। तथा च पराशरः—

बलवत्सु महद्वर्षमल्पेष्वल्पाम्बुशीकरम्।
मध्येषु मध्यमं ब्रूयान्निमित्तेषु निमित्तवत्॥
उल्कानिर्घातभूकम्पपांशुवर्षाणि केतवः।
अपसव्या ग्रहाश्चैव नित्यं वर्षासु वर्षदाः॥इति॥१८॥

अन्यद्वर्षलक्षणमाह—

प्रावृषि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः।
सूर्यसुतान्नवपञ्चमगो वा सप्तमगश्च जलाऽऽगमनाय॥१९॥

प्रावृड्ग्रहणमन्यकालव्युदासार्थम्। प्रावृषि वर्षाकाले शीतकरश्चन्द्रो भृगुपुत्राच्छुक्रात् सप्तमराशिगतः सप्तमराशौ व्यवस्थितः। तत्र च शुभदृष्टः सौम्यग्रहावलोकितस्तदा जलाऽऽगमनाय वर्षाऽऽगमनाय भवतीति। अथवा सूर्यसुतात् सौरात् स एव चन्द्रो नवमगः पञ्चमगो वा सप्तमगश्च यदि भवति स च शुभदृष्टस्तदा जलाऽऽगमनाय वर्षाऽऽगमनाय भवतीति॥१९॥

अन्यद्वर्षलक्षणमाह—

प्रायो[1] ग्रहाणामुदयास्तकाले समागमे मण्डलसंक्रमे च।
पक्षक्षये तीक्ष्णकरायनान्ते वृष्टिर्गतेऽर्के नियमेन चार्द्राम्॥२०॥

ग्रहाणामुदयकाले सूर्यमण्डलान्निर्गमे। तत्रैवास्तकालेऽस्तमये। एवमुदयास्तमयावत्र अर्कविप्रकर्षसन्निकर्षजौ ज्ञेयौ। तथा समागमे, समागमश्चन्द्रेण सह ताराग्रहाणाम्। मण्डलसङ्क्रमे वा, मण्डलानि भरणीपूर्वमण्डलमित्यादि षण्मण्डलानि शुक्रचारोक्तानि तेषां संक्रमे प्रवेशे च। पक्षक्षयोऽमावस्यापौर्णमास्यन्तस्तस्मिन्। तीक्ष्णकरस्यादित्यस्यायनान्ते दक्षिणोत्तरयोरयनयोः समाप्तौ। कर्कटकमकरसंक्रान्तावित्यर्थः। एतेषु सर्वेषु प्रायो बाहुल्येन वृष्टिर्भवति। तथाऽर्के सूर्ये आर्द्रां गते रौद्रं नक्षत्रं प्राप्ते नियमेन निश्चयेन वृष्टिर्भवति॥२०॥

अन्यद्वर्षज्ञानमाह—

समागमे पतति जलं ज्ञशुक्रयोर्ज्ञजीवयोर्गुरुसितयोश्च सङ्गमे।
यमारयोः पवनहुताशजं भयं ह्यदृष्टयोरसहितयोश्च सद्ग्रहैः॥२१॥

---

१. अस्य ग्रन्थस्य ३३१ पृष्ठे गर्भलक्षणाध्यायस्य ३४ श्लोकटीकायां प्रमाणत्वेनायं श्लोक उपनिबद्धस्तत्रान्तिमे सर्वेषु पुस्तकेषु 'चान्द्रौ' इति प्रामादिकः पाठः।

ज्ञो बुधः। शुक्रो भार्गवः। तयोर्ज्ञशुक्रयोः समागमे संयोगे जलं पानीयं पतति वर्षतीत्यर्थः। तथा ज्ञजीवयार्बुधबृहस्पत्योः सङ्गमे संयोगे जलं पतति। गुरुसितयोर्जीवशुक्रयोः सङ्गमे जलं पतति। यमारयोः सौराङ्गारकयोः सङ्गमे पवनहुताशजं भयं भवति। पवनो वायुः। हुताशोऽग्निः। तज्जं भयं भवति। किं सर्वदा। न, इत्याह—अदृष्टयोरसहितयोश्च सद्ग्रहैरिति। सद्ग्रहा बुध-बृहस्पतिशुक्राः। एतेषामन्यतमेनादृष्टयोरनवलोकितयोरसहितयोरसंयुक्तयोः पवन-हुताशजं भयं भवति। युक्तदृष्टयोर्नेति ॥२१॥

अन्यद्वर्षज्ञानमाह—

अग्रतः पृष्ठतो वापि ग्रहाः सूर्यावलम्बिनः।
यदा तदा प्रकुर्वन्ति महीमेकार्णवामिव ॥२२॥

सूर्यावलम्बिनो ग्रहाः सूर्यावलम्बनशीलाः। अस्तमयाभिलाषिण इत्यर्थः। अग्रतः पृष्ठतो वा भवन्ति। अग्रतः पुरस्तात्। पृष्ठतः पश्चात्। मन्दग्रहा अग्रतोऽस्तमयं यान्ति। शीघ्रग्रहाः पृष्ठतः। सूर्यस्य प्राक्पश्चाद्वा अद्यस्तमयं कुर्वन्ति, यदा यस्मिन् काले, तदा तस्मिन् काले महीं भूमिमेकार्णवां सर्वजलमयीं कुर्वन्तीत्यर्थः। बहुवचननिर्देशादयादयो ग्रहा ज्ञेया इति ॥२२॥

प्रविशति यदि खद्योतो जलदसमीपेषु रजनीषु।
केदारपूरमधिकं वर्षति देवस्तदा न चिरात् ॥२३॥
वर्षत्यपि रटति यदा गोमायुश्च प्रदोषवेलायाम्।
सप्ताहं दुर्दिनमपि तदा पयो नात्र सन्देहः[1] ॥२४॥

इति श्रीभट्टोत्पलविरचितायां संहितायां विवृतौ सद्योवर्षलक्षणं नामाष्टाविंशोऽध्यायः ॥२८॥

अथ कुसुमलताध्यायो व्याख्यायते

तत्रादावेव तत्प्रयोजनप्रदर्शनार्थमाह—

फलकुसुमसम्प्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्।
सुलभत्वं द्रव्याणां निष्पत्तिश्चापि सस्यानाम् ॥१॥

वनस्पतीनां वृक्षाणां फलकुसुमसम्प्रवृद्धिं फलानां कुसुमानां च पुष्पाणां सम्यक् प्रवृद्धिं विलोक्य दृष्ट्वा द्रव्याणां सर्वेषां सुलभत्वं सामर्थ्यं विज्ञेयं विज्ञात-व्यम्। तथा सस्यानामपि निष्पत्तिः सम्पद् ज्ञेयेति ॥१॥

---

१. इदं पद्यद्वयमन्यपुस्तकेषु नोपलभ्यते, केनचित्प्रक्षिप्तमित्यत्र न संशयोऽविवृतित्वात्।

अथ केन कस्य वृद्धिर्ज्ञेयेत्येतदाह—

शालेन कलमशाली रक्ताशोकेन रक्तशालिश्च।
पाण्डूकः क्षीरिकया नीलाशोकेन सूकरकः ॥२॥

शालो वृक्षविशेषस्तस्य फलकुसुमसम्प्रवृद्धिं दृष्ट्वा कलमशाल्यादीनां निष्पत्तिः सुलभत्वं च ज्ञेयम्। एवं सर्वत्र। तस्माच्छालेन कलमशाली विज्ञातव्या। तथा रक्ताशोकेन रक्तशालिः। पाण्डूकः शालिविशेषः स च क्षीरिकया दुग्धिकया ज्ञेयः। सूकरकः शालिविशेषः स च नीलाशोकेन विज्ञेयः ॥२॥

अथान्यत्—

न्यग्रोधेन तु यवकस्तिन्दुकवृद्ध्या च षष्टिको भवति।
अश्वत्थेन ज्ञेया निष्पत्तिः सर्वसस्यानाम् ॥३॥

यवकः शालिविशेषः स च न्यग्राधेन विज्ञेयः। षष्टिकः शालिविशेषः स च तिन्दुकवृद्ध्या भवति। अश्वत्थेन सर्वसस्यानां निष्पतिर्ज्ञेया ज्ञातव्या ॥३॥

अथान्यत्—

जम्बूभिस्तिलमाषाः शिरीषवृद्ध्या च कङ्गुनिष्पत्तिः।
गोधूमाश्च मधूकैर्यववृद्धिः सप्तपर्णेन ॥४॥

जम्बूवृक्षविशेषस्ताभिर्जम्बूभिस्तिलमाषा ज्ञातव्याः। शिरीषो वृक्षविशेषस्तद्वृद्ध्या कङ्गुनिष्पत्तिः। कङ्गुः प्रियङ्गुः। मधूको वृक्षविशेषः। तैर्मधूकैर्गोधूमा ज्ञेयाः। सप्तपर्णो वृक्षविशेषस्तेन यववृद्धिर्भवति ॥४॥

अथान्यत्—

अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदशनैः।
बदरीभिश्च कुलत्थांश्चिरविल्वेनादिशेन्मुद्गान् ॥५॥

अतिमुक्तका वृक्षविशेषः कुन्दश्च यत्र कुन्दपुष्पाणि भवन्ति। ताभ्यामतिमुक्तककुन्दाभ्यां कर्पासं वदेत् ब्रूयात्। अशनो वृक्षविशेषस्तैः सर्षपान् वदेद् ब्रूयात्। बदरीभिश्च कुलत्थान् वदेत्। चिरबिल्वेन करञ्जेन मुद्गानादिशेद् ब्रूयात् ॥५॥

अन्यदप्याह—

अतसी वेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः।
तिलकेन शङ्खमौक्तिकरजतान्यथ चेङ्गुदेन शणाः ॥६॥

वेतसो वृक्षविशेषस्तत्पुष्पैरतसी ज्ञेया ज्ञातव्या। पलाशकुसुमैः पलाशवृक्षपुष्पैः काद्रवा ज्ञेया ज्ञातव्याः। तिलको वृक्षविशेषस्तेन शङ्खमौक्तिकरजतानि शङ्खः प्रसिद्धः, मौक्तिकं मुक्ताफलानि, रजतं रूप्यम्, एतानि विज्ञेयानि। अथानन्तरमिङ्गुदेन वृक्षविशेषेण शणा विज्ञेयाः ॥६॥

अथान्यत्—

करिणश्च हस्तिकर्णैरादेश्या वाजिनोऽश्वकर्णेन।
गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥७॥

हस्तिकर्णैः करिणो गजा आदेश्या वक्तव्याः। वाजिनोऽश्वास्ते चाश्वकर्णेन एतौ द्वावपि सुप्रसिद्धौ। पाटला वृक्षजातिस्ताभिर्गावः। अजश्छागोऽविर्मेषः। अजाविकं कदलीभी रम्भाभिर्भवति ॥७॥

अथान्यदप्याह—

चम्पककुसुमैः कनकं विद्रुमसम्पच्च बन्धुजीवेन।
कुरवकवृद्ध्या वज्रं वैदूर्यं नन्दिकावर्त्तैः ॥८॥

कनकं सुवर्णं चम्पकपुष्पैः। बन्धुजीवेन विद्रुमस्य सम्पत् सुलभत्वम्। वज्रं मणिविशेषस्तत्कुरववृद्ध्या। नन्दिकावर्तैर्वैदूर्यम् ॥८॥

अथान्यदप्याह—

विन्द्याच्च सिन्धुवारेण मौक्तिकं कारुकाः कुसुम्भेन।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥९॥

सिन्धुवारो वृक्षविशेषस्तेन मौक्तिकं विन्द्याज्जानीयात्। कारुकाः शिल्पिनः कुसुम्भेन महारजतेन। राजा नृपो रक्तोत्पलेनोक्तः। नीलोत्पलेन मन्त्री सचिवः ॥९॥

अन्यदप्याह—

श्रेष्ठी सुवर्णपुष्पात् पद्मैर्विप्राः पुरोहिताः कुमुदैः।
सौगन्धिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः ॥१०॥

सुवर्णपुष्पात् श्रेष्ठी ज्ञेयः। पद्मैः कमलैर्विप्रा ब्राह्मणाः। कुमुदैः कैरवैः पुरोहिता नृपाचार्याः। बलपतिः सेनापतिः सौगन्धिकेन। हिरण्यस्य सुवर्णस्य परिवृद्धिरर्केण ॥१०॥

अथान्यत्—

आम्रैः क्षेमं भल्लातकैर्भयं मीलुभिस्तथारोग्यम्।
खदिरशमीभ्यां दुर्भिक्षमर्जुनैः शोभना वृष्टिः ॥११॥

आम्रैश्चूतैः क्षेमं विन्द्यात्। भल्लातकैर्भयं भीतिम्। पीलुभिस्तथा आरोग्यमरोगित्वम्। खदिरशमीभ्यां प्रवृद्धाभ्यां दुर्भिक्षं भवति। अर्जुनैः शोभना वृष्टिः, सुवृष्टिर्भवतीत्यर्थः ॥११॥

अन्यदप्याह—

पिचुमन्दनागकुसुमैः सुभिक्षमथ मारुतः कपित्थेन।
निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥१२॥

पिचुमन्दो निम्बवृक्षः, नागो नागकेसर इति प्रसिद्धः, तयोः पुष्पैः सुभिक्षं ज्ञेयम्। अथ कपित्थेन मारुतो वायुः। कपित्थो वृक्षविशेषः। निचुलेन वृक्षविशेषेण अवृष्टिभयं भवति। निचुलो जलवेतसवृक्षः। कुटजेन व्याधिभयं भवति ॥१२॥

अन्यदप्याह—

दूर्वाकुशकुसुमाभ्यामिक्षुर्वह्निश्च कोविदारेण।
श्यामालताभिवृद्ध्या बन्धक्यो वृद्धिमायान्ति ॥१३॥

दूर्वा शाद्वलम्। कुशो दर्भः। तत्कुसुमाभ्यां तत्पुष्पाभ्यामिक्षुर्भवति। कोविदारेण च वह्निरग्निः। श्यामालता लतैव प्रसिद्धा। तदभिवृद्ध्या बन्धक्यो वेश्या वृद्धिमायान्ति प्राप्नुवन्ति ॥१३॥

अथैताभिर्वृष्टिलक्षणमाह—

यस्मिन् काले स्निग्धनिश्छिद्रपत्राः
संदृश्यन्ते वृक्षगुल्मा लताश्च।
तस्मिन् वृष्टिः शोभना सम्प्रदिष्टा
रूक्षैश्छिद्रैरल्पमम्भः प्रदिष्टम् ॥१४॥

वृक्षास्तरवः, गुल्म एकमूलो विटपः, लताः प्रसिद्धाः, एते यस्मिन् काले स्निग्धा निर्मला निश्छिद्रपत्राः, छिद्ररहितैः पत्रैः संदृश्यन्ते तस्मिन् काले शोभना वृष्टिः प्रदिष्टा उक्ता। तैरेव रूक्षैरस्निग्धैश्छिद्रैश्चाल्पं परिमितमम्भः पानीयं प्रदिष्टमुक्तम्। तथा च पराशरः—

अच्छिद्रपत्राः सुस्निग्धाः फलपुष्पसमन्विताः।
निर्दिशन्ति शुभं वृक्षा विपरीतं विगर्हिताः ॥इति॥ १४॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ कुसुमलता नामोनत्रिंशोऽध्यायः ॥२९॥

अथ सन्ध्यालक्षणं व्याख्यायते

तत्रादावेव तल्लक्षणमाह—

अर्द्धास्तमितानुदितात् सूर्यादस्पष्टभं नभो यावत्।
तावत् सन्ध्याकालश्चिह्नैरेतैः फलं चास्मिन् ॥१॥

सूर्याद् आदित्यादर्द्धास्तमितादारभ्य यावन्नभ आकाशमस्पष्टभम्। अस्पष्टान्यस्फुटानि भानि नक्षत्राणि यत्र तत्। तावदेका सायंसन्ध्या। तथा स्पष्टभान्नभस आरभ्य प्रभातकाले यस्मिन् समये भानां स्वल्पा कान्तिर्भवति ततः कालाद्यावत्सूर्य अर्धोदितस्तावद् द्वितीया प्रातः सन्ध्या। एवमर्धास्तमितानुदितात् सूर्यादस्पष्टभं नभो याबत्तावत्सन्ध्याकालः। तथा च गर्गः—

अहोरात्रस्य यः सन्धिः सा च सन्ध्या प्रकीर्तिता।
द्विनाडिका भवेत् साधुर्यावदाज्योतिदर्शनम् ॥इति॥

अस्मिन् सन्ध्याकाले एतैर्वक्ष्यमाणैश्चिह्नैर्लक्षणैः शुभाशुभं फलं वाच्यं वक्तव्यम् ॥१॥

इत्याह—

मृगशकुनिपवनपरिवेषपरिधिपरिघाभ्रवृक्षसुरचापैः।
गन्धर्वनगररविकरदण्डरजः स्नेहवर्णैश्च ॥२॥

मृगा अरण्यप्राणिविशेषाः, शकुनिः पक्षी, पवनो वायुः, परिवेषोऽर्कचन्द्रमसोः, परिधिः प्रतिसूर्यः, परिघो भास्करस्योदयेऽस्तमये वा तिर्यक्स्थिता मेघरेखा, अभ्रवृक्षो मेघ एव वृक्षाकारः, सुरचापमिन्द्रधनुः, एतैः, तथागन्धर्वनगरं खपुरम्, रविकराः सूर्यरश्मयः, दण्डो रविकिरणजलदमरुतां सङ्घातः, रजः प्रसिद्धम्, स्नेहवर्णैः सर्वेषामेव, एतैश्च सन्ध्याफलं वाच्यमिति ॥२॥

तत्र मृगचेष्टितमाह—

भैरवमुच्चैर्विरुवन् मृगोऽसकृद् ग्रामघातमाचष्टे।
रविदीप्तो दक्षिणतो महास्वनः सैन्यघातकरः ॥३॥

मृग उच्चैः कृत्वा भैरवं विरुवन् भयावहं शब्दं कुर्वन्नसकृदनेकवारं ग्रामघातं ग्रामविनाशमाचष्टे कथयति, तथा सैन्यस्य सेनाया दक्षिणतो दक्षिणस्यां दिशि स्थितस्तत्र च रविदीप्तः सूर्याभिमुखो महास्वनो महाशब्दः सैन्यस्य घातं सेनाविनाशं करोति ॥३॥

अन्यदप्याह—

अपसव्येसंग्रामः सव्ये सेनासमागमः शान्ते।
मृगचक्रे पवने वा सन्ध्यायां मिश्रगे वृष्टिः ॥४॥

सन्ध्यायां सन्ध्याकाले मृगचक्रे मृगसमूहे पवने वायौ वापसव्ये सैन्यस्य वामभागस्थे दीप्ते सूर्याभिमुखे च संग्रामो भवति। तथा सव्ये दक्षिणे शान्ते शान्तदिक्स्थे मधुरस्वरेऽनर्काभिमुखे च सेनासमागमः। द्वयोः सैन्ययाः संयोगो भवति। तथा तस्मिन्नेव मृगचक्रे मृगसमूहे पवने वायुसमूहे वा सन्ध्यायां मिश्रगे शान्तदीप्तदिगुत्थे वृष्टिर्वर्षणं भवतीति ॥४॥

अन्यच्च सन्ध्यालक्षणमाह—

दीप्तमृगाण्डजविरुता प्राक् सन्ध्या देशनाशमाख्याति।
दक्षिणदिक्स्थैर्विरुता ग्रहणाय पुरस्य दीप्तास्यैः ॥५॥

प्राक् सन्ध्या पूर्वसन्ध्या दीप्तमृगाण्डजविरुता। दीप्तैर्दीप्तदिक्स्थै रूक्षैः स्वनैः सूर्याभिमुखैर्मृगैरारण्यैः ॥ अण्डजैः पक्षिभिश्च विरुता कृतशब्दा देशस्य नाशमाख्याति कथयति। तथा तैरेव मृगाण्डजैर्दीप्तास्यैः सूर्याभिमुखैर्ग्रामस्य पुरस्य वा दक्षिणदिक्स्थैर्याम्याशासमवस्थितैर्विरुता सन्ध्या तस्यैव पुरस्य ग्रहणाय भवति। तत्पुरमन्यैः शत्रुभिर्गृह्यत इति ॥५॥

अथ सन्ध्याकाले वायोर्लक्षणमाह—

गृहतरुतोरणमथने सपांशुलोष्टोत्करेऽनिले प्रबले।
भैरवरावे रूक्षे खगपातिनि चाशुभा सन्ध्या ॥६॥

एवंविधेऽनिले वायौ सन्ध्या अशुभा अनिष्टफला। कीदृशे। गृहतरु-तोरणमथने। गृहाणि वेश्मानि। तरून् वृक्षान्। तोरणानि च मथ्नाति यस्तथाभूते। सपांशुलोष्टोत्करे, पांशूनां तथा लोष्टानां मृत्खण्डानां य उत्करः समूहस्तेन संयुते। तथा प्रबले बलवति। भैरवरावेऽतिशब्दे। रूक्षे चाङ्गानामसुखकरे। खगाः पक्षिण-स्तान् पातयति नभसस्तथाविधे ॥६॥

अन्यच्च सन्ध्यालक्षणमाह—

मन्दपवनावघट्टितचलितपलाशद्रुमा विपवना वा।
मधुरस्वरशान्तविहङ्गमृगरुता पूजिता सन्ध्या ॥७॥

एवंविधा सन्ध्या पूजिता शुभेत्यर्थः। कीदृशी। मन्दपवनावघट्टितचलित-पलाशद्रुमा, मन्देनाल्पेन पवनेन वायुना यदवघट्टितं चालनं तेन चलिताः कम्पिताः

पलाशाः पर्णानि येषु द्रुमेषु तथाभूता द्रुमा वृक्षा यस्यां सन्ध्यायाम्। विपवना वा वातरहिता। तथा मधुरस्वरैः कलशब्दैः शान्तैरनर्काभिमुखैर्विहङ्गैः पक्षिभिर्मृगैश्च या रुता कृतशब्दा सापि पूजिता ॥७॥

अन्यदप्याह—

सन्ध्याकाले स्निग्धा दण्डतडिन्मत्स्यपरिधिपरिवेषाः।
सुरपतिचापैरावतरविकिरणाश्चाशु वृष्टिकराः ॥८॥

एते सर्व एव सन्ध्याकाले सन्ध्यासमय आशु क्षिप्रमेव वृष्टिकराः। के ते। दण्डतडिन्मत्स्यपरिधिपरिवेषाः, दण्डस्तस्य लक्षणं वक्ष्यति। तडिद् विद्युत्। मत्स्या मत्स्याकारा एव मेघाः। परिधिः प्रतिसूर्यः। परिवेषस्तस्य लक्षणं वक्ष्यति। सुरपतिचापमिन्द्रधनुः। ऐरावतस्तस्य लक्षणं वक्ष्यति—"[1]सर चापखण्डमृजु यद्रोहितमैरावतं दीर्घम्" इति।

रविकिरणा अर्करश्मयः। एते सर्व एव स्निग्धा यदि भवन्ति तदाशु वृष्टिकराः ॥८॥

अथान्यदप्याह—

विच्छिन्नविषमविध्वस्तविकृतकुटिलापसव्यपरिवृत्ताः।
तनुह्रस्वविकलकलुषाश्च विग्रहावृष्टिदाः किरणाः ॥९॥

एवंविधाः किरणा रविरश्मयो विग्रहा वृष्टिदाः, विग्रहं विरोधम्, अवृष्टिमवर्षणं च ददति। कीदृशाः। विच्छिन्नविषमेति। विच्छिन्नाः खण्डशो गताः। विषमा अतुल्याः, विध्वस्ता नष्टवर्णाः। विकृता विकारं गताः। कुटिला अस्पष्टाः। अपसव्यमप्रदक्षिणं कृत्वा परिवृत्ताः परिवेष्टिताः। तनवः सूक्ष्माः। ह्रस्वा अदीर्घाः। विकलाः शक्तिरहिताः। कलुषा अप्रसन्नाः ॥९॥

अथैषामेव विशेषलक्षणमाह—

उद्द्योतिनः प्रसन्ना ऋजवो दीर्घाः प्रदक्षिणावर्ताः।
किरणाः शिवाय जगतो वितमस्के नभसि भानुमतः ॥१०॥

एवंविधाः किरणा रश्मयो भानुमत आदित्यस्य संबन्धिनो वितमस्के तमोरहिते नभस्याकाशे दृष्टा जगतो विश्वस्य शिवाय श्रेयसे भवन्ति। कीदृशाः। उद्द्योतिनो दीप्तिमन्तः। प्रसन्ना निर्मलाः। ऋजवः स्पष्टाः। दीर्घा आयामिनः। प्रदक्षिणावर्ताः प्रदक्षिणेनावर्तो येषां ते तथाविधाः ॥१०॥

---

१. बृहत्संहितायाम् ४७ अध्यायस्य मयूरचित्रकाख्यस्य २० श्लोकः।

पूर्वमुक्तं यद्यमोघकिरणः सहस्रगोरिति तत्र न ज्ञायते। तदर्थममोघकिरणानां लक्षणमाह—

शुक्लाः करा दिनकृतो दिवादिमध्यान्तगामिनः स्निग्धाः।
अव्युच्छिन्ना ऋजवो वृष्टिकरास्ते त्वमोघाख्याः ॥११॥

दिनकृत आदित्यस्य शुक्लाः श्वेतवर्णाः करा रश्मयो दिवादिमध्यान्तगामिनः। दिवे नभसि आदौ मध्येऽन्ते च गमनशीलाः। सकलनभोव्यापिन इत्यर्थः। ते च स्निग्धा अरूक्षाः। अव्युच्छिन्ना अखण्डाः। ऋजवः स्पष्टाः। ते त्वमोघाख्या अमोघसंज्ञा रविरश्मयः। ते च दृष्टा वृष्टिकराः ॥११॥

अथान्यद्रश्मिलक्षणमाह—

कल्माषबभ्रुकपिला विचित्रमाञ्जिष्ठहरितशबलाभाः[1]।
त्रिदिवानुबन्धिनोऽवृष्टयेऽल्पभयदास्तु सप्ताहात् ॥१२॥

कल्माषाः पीतगौरकृष्णवर्णाः। बभ्रव ईषत्कपिलाः कपिलवर्णाः। विचित्रा नानावर्णाः। माञ्जिष्ठा मञ्जिष्ठाभाः। हरिताः शुकवर्णाः। शबलाभाः कृष्ण-श्वेतकान्तयः। केषाञ्चित्पाठः शबला वा। त्रिदिवानुबन्धिनस्त्रिदिवमाकाशं तत्रानुबन्धिनोऽनुबन्धशीलाः, सकलमाकाशं व्याप्य स्थिता इत्यर्थः। ऊर्ध्वगामिनश्च। एते दृष्टा अवृष्टये भवन्ति। तथा सप्ताहाद्दिनसप्तकात् परतोऽल्पमीषद् भयं ददति ॥१२॥

अथैतेषामुक्तलक्षणानां फलान्याह—

ताम्रा बलपतिमृत्युं पीतारुणसन्निभाश्च [2]तद्व्यसनम्।
हरिताः पशुसस्यबधं धूमसवर्णा गवां नाशम् ॥१३॥
माञ्जिष्ठाभाः शस्त्राग्निसम्भ्रमं बभ्रवः पवनवृष्टिम्।
भस्मसदृशास्त्ववृष्टिं तनुभावं शबलकल्माषाः ॥१४॥

ताम्रास्ताम्रवर्णाभा रविरश्मयो बलपतेश्चमूनाथस्य मृत्युं मरणं ददति। पीतारुणसन्निभाः पीतवर्णा हरिद्राभाः। अरुणसन्निभा लोहितकान्तयश्च तद्व्यसनं तस्यैव सेनापतेर्व्यसनं दुःखं ददति। केचिद्रुग्व्यसनमिति पठन्ति। हरिताः शुकवर्णाः पशूनां चतुष्पदानां सस्यानां च बधं विनाशं कुर्वन्ति। धूमसवर्णा धूमाभा गवां नाशं कुर्वन्ति ॥१३॥

---

१. शबला वेति पाठान्तरम्।
२. रुग्व्यसनमिति पाठान्तरम्।

माञ्जिष्ठाभा माञ्जिष्ठवर्णाः शस्त्राग्निसम्भ्रमं शस्त्रेणाग्निना च सम्भ्रममुद्योगं च कुर्वन्ति। बभ्रवः कपिलवर्णाः पवनवृष्टिं पवनेन वायुना संयुक्तां वृष्टिं कुर्वन्ति। भस्मसदृशा भस्मकान्तयः। अवृष्टिमवर्षणं कुर्वन्ति। शबलकल्माषाः सितकृष्णनीलपीतव्यामिश्रवर्णास्तनुभावमेव वृष्टेः कुर्वन्ति ॥१४॥

अन्यत्सन्ध्यालक्षणमाह—

बन्धूकपुष्पाञ्जनचूर्णसन्निभं
सान्ध्यं रजोऽभ्येति यदा दिवाकरम्।
लोकस्तदा रोगशतैर्निपीड्यते
शुक्लं रजो लोकविवृद्धिशान्तये ॥१५॥

बन्धूकपुष्पं प्रसिद्धमतिलोहितम्। अञ्जनचूर्णश्च प्रसिद्धोऽतिकृष्ण एव। तत्सन्निभं तत्सदृशं सन्ध्याकाले रजो यदा दिवाकरमभ्येति सम्मुखमुपगच्छति, तदा लोको जनपदो रोगशतैर्बहुभिर्गदैर्निपीड्यते उपताप्यते। तथा शुल्कं श्वेतवर्णं संध्यारजो लोकानां विवृद्धये संवर्धनाय। शान्तये शिवाय च भवति। तथा च पराशरः—

बन्धुजीवनिकाशेन तपनीयनिभेन वा।
उदये रजसा सूर्यः संवृतः शस्त्रमावहेत् ॥
शङ्खचूर्णनिकाशेन रजसा संवृतो रविः।
राज्ञो विजयमाख्याति वृद्धिं जनपदस्य च ॥इति ॥१५॥

अधुना दण्डलक्षणमाह—

रविकिरणजलदमरुतां सङ्घातो दण्डवत्स्थितो दण्डः।
स विदिक्स्थितो नृपाणामशुभो दिक्षु द्विजादीनाम् ॥१६॥

रविकिरणाः सूर्यरश्मयः, जलदो मेघः, मरुद्वायुः, एषां त्रयाणां सङ्घात एकीभावो यदा दण्डवत्स्थितो भवति तथा दण्डाकृतिसंस्थानाद्दण्ड इत्युच्यते। स च विदिक्स्थितो विदिक्षु स्थितो नृपाणां राज्ञामशुभोऽनिष्टदः। दिक्षूत्तराद्यासु चतसृषु स्थितः क्रमेण द्विजादीनां चतुर्णां वर्णानामशुभः। केचित्सामान्येन दिक्षु द्विजातीनामेवाशुभमिच्छन्ति ॥१६॥

अथास्यैव विशेषमाह—

शस्त्रभयातङ्ककरो दृष्टः प्राङ्मध्यसन्धिषु दिनस्य।
शुक्लाद्यो विप्रादीन् यदभिमुखस्तां निहन्ति दिशम् ॥१७॥

स एव दण्डो दिनस्य प्राङ्मध्यसन्धिषूदयमध्याह्नास्तमयकालेषु दृष्टोऽवलोकितः शस्त्रभयातङ्ककरो भवति, शस्त्रभयमातङ्कमुपद्रवं च करोति। शुक्लाद्यः सितरक्तपीतकृष्णो विप्रादीन् ब्राह्मणक्षत्रियविट्शूद्रान् निहन्ति घातयति। यस्यां दिश्यभिमुखः सम्मुखः स दण्डस्तां दिशमाशां निहन्ति। अर्कसन्निकृष्टो भागस्तस्य मूलमन्यो मुखमिति ॥१७॥

अथान्यल्लक्षणमाह—

दधिसदृशाग्रो नीलो भानुच्छादी खमध्यगोऽभ्रतरुः।
पीतच्छुरिताश्च घना घनमूला भूरिवृष्टिकराः ॥१८॥

अभ्रतरुमेघवृक्षः। दधिसदृशाग्रः दधिसदृशमग्रं यस्य। श्वेताग्र इत्यर्थः। तथा नीलो नीलवर्णो भानुच्छादी सूर्यमाच्छादयति तच्छीलः। स च खमध्यग आकाशमध्यभागस्थः। तथा घना मेघाः पीतच्छुरिताः पीतेन पीतवर्णेन छुरिता रञ्जितास्ते च घनमूलाः। घनानि सन्ति तानि मूलानि येषाम्। एते सर्व एव भूरिवृष्टिकराः प्रभूतां वृष्टिं कुर्वन्ति ॥१८॥

अथाभ्रवृक्षेणैव यियासोः शुभाशुभमाह—

अनुलोमगेऽभ्रवृक्षे शमं गते यायिनो नृपस्य बधः।
बालतरुप्रतिरूपिणि युवराजामात्ययोर्मृत्युः ॥१९॥

अभ्रवृक्षे मेघतरौ यायिनो जिगमिषोर्नृपस्य राज्ञोऽनुलोमगे तत्पश्चाद् गम्यमाने शमं गतेऽकस्मान्नष्टे तस्यैव यायिनो बधो मरणं भवति। तस्मिन्नेवाभ्रतरं बालतरुप्रतिरूपिणि बालवृक्षसदृशे शमं गते युवराजामात्ययोर्मरणं मृत्युर्भवति अर्धराज्यभाग युवराजः। अमात्यो मन्त्री ॥१९॥

अथ पुनरपि सन्ध्यालक्षणमाह—

कुवलयवैदूर्याम्बुजकिञ्जल्काभा प्रभञ्जनोन्मुक्ता।
सन्ध्या करोति वृष्टिं रविकिरणोद्भासिता सद्यः ॥२०॥

एवंविधा सन्ध्या सद्यस्तस्मिन्नेवाहनि वृष्टिं वर्षणं करोति। कीदृशी। कुवलयं नीलोत्पलम्, वैदूर्यो मणिर्नीलपीतः, अम्बुजकिञ्जल्कं पद्मकेसरम्, एषां सदृशी आभा कान्तिर्यस्याः। तथा प्रभञ्जनोन्मुक्ता प्रभञ्जनेन वातेनोन्मुक्ता रहिता। तथा रविकिरणोद्भासिता प्रकाशीकृता ॥२०॥

अन्यल्लक्षणमाह—

अशुभाकृतिघनगन्धर्वनगरनीहारधूमपांशुयुता।
प्रावृषि करोत्यवग्रहमन्यतौ शस्त्रकोपकरी ॥२१॥

अशुभा अनिष्टा आकृतिर्येषां घनानां मेघानाम्। गर्दभोष्ट्रकबन्धध्वांक्ष-मार्जाराकृतय इत्यर्थः। तथा गन्धर्वनगरं खपुरम्। नीहारधूमपांशवः प्रसिद्धाः। एतैर्युक्ता या सन्ध्या सा प्रावृषि प्रावृट्काले वर्षाकालेऽवग्रहमवृष्टिं करोति। वर्षावर्जिते चान्यऋतौ शस्त्रकोपं करोति ॥२१॥

अथ षट्सु ऋतुषु लक्षणमाह—

शिशिरादिषु वर्णाः शोणपीतसितचित्रपद्मरुधिरनिभाः।
प्रकृतिभवाः सन्ध्यायां स्वर्तौ शस्ता विकृतिरन्या ॥२२॥

शिशिरादिषु षट्सु ऋतुषु शोणादयो वर्णाः सन्ध्यायां प्रकृतिभवाः सहजाः स्वर्तावात्मीयर्तौ शस्ताः शुभा भवन्ति। तद्यथा—शिशिरे शोणा लोहितवर्णा सन्ध्या शस्ता शुभा। वसन्ते पीता। ग्रीष्मे सिता श्वेतवर्णा। वर्षासु चित्रा नानावर्णा। शरदि पद्मवर्णा रक्तगौरा। हेमन्ते रुधिरनिभा अतिलोहिता। एताः स्वर्तौ आत्मीयर्तौ शस्ताः। अन्या विकृतिर्विकारः। शिशिरादिषु ये वर्णाः क्रमेणोक्तास्त एव यदा विपर्ययेण भवन्ति, तदा विकृतिर्विकारोऽशुभ इत्यर्थः। तथा च गर्गः—

वसन्ते मधुवर्णाभाऽथवा रुधिरसन्निभा।
ग्रीष्मे श्वेता रजोध्वस्ता पांशुवर्णा च शस्यते।
नीललोहितशुक्लाभा सन्ध्या वर्षासु वार्षिका।
माञ्जिष्ठवर्णा शरदि पीयूषाभा च शस्यते॥
हेमन्ते बभ्रुवर्णा च पिङ्गला चापि पूजिता।
शिशिरे शोणवर्णा च सन्ध्याक्षेमसुखप्रदा॥
स्निग्धा प्रसन्ना विमला सप्रभा नाकुलापि वा।
सन्ध्या यथर्तुवर्णाभा शान्तद्विजमृगा शुभा॥इति॥२२॥

अथान्यल्लक्षणमाह—

आयुधभृन्नरूपं छिन्नाभ्रं परभयाय रविगामि।
सितखपुरेऽर्काक्रान्ते पुरलाभो भेदने नाशः ॥२३॥

छिन्नाभ्रं मेघखण्डमायुधभृन्नरूपं सायुधं पुरुषमिव तच्च रविगामि अर्कसमीपवर्ति यदि भवति, तदा परभयाय भवति। परेषां शत्रूणां संबन्धि भय-मुत्पद्यते। सितखपुरे शुक्लवर्णे गन्धर्वनगरेऽर्काक्रान्ते, अर्कः सूर्य आक्रान्तो येन, आच्छादित इत्यर्थः। तस्मिन् पुरलाभः, येन पुरं नगरमाक्रान्तं रुद्धं तस्य लाभो भवति। भेदने नाशः, अर्केण यदि मध्यात् खपुरं भिद्यते तदा पुरस्य नाशः, परै-र्लुण्ठनं भवति ॥२३॥

अन्यदप्याह—

सितसितान्तघनावरणं रवे-
र्भवति वृष्टिकरं यदि सव्यतः।
यदि च वीरणगुल्मनिभैर्घनै-
र्दिवसभर्तुरदीप्तदिगुद्भवैः ॥२४॥

सिताः शुक्लास्ते च सितान्ताः सितः शुक्लोऽन्तो येषां तैः सितैः सितान्तैर्घनैर्मेघै रवेरादित्यस्य सव्यतो गच्छतो दक्षिणत आवरणमाच्छादनं यदि भवति, तदा वृष्टिकरं भवति। यदि च दिवसभर्तुरादित्यस्य घनैर्मेघैर्वीरणगुल्मनिभैः, वीरणस्तृणविशेषतस्य गुल्मः समूहस्तत्सदृशैः। अदीप्तदिगुद्भवैः शान्तदिक्सम्भूतैः सव्यतो दक्षिणेनावरणं भवति तद्वृष्टिकरम् ॥२४॥

अथ परिघवशेन शुभाशुभमाह—

नृपविपत्तिकरः परिघः सितः क्षतजतुल्यवपुर्बलकोपकृत्।
कनकरूपधरो बलवृद्धिदः सवितुरुद्गमकालसमुत्थितः ॥२५॥

सवितुरादित्यस्य परिघस्तिर्यक् स्थिता मेघरेखेत्यर्थः। उद्गमकाले उदयसमये समुत्थित उत्पन्नः सितः शुक्लो यदि दृश्यते तदा नृपस्य राज्ञो विपत्तिकरो मृत्युदः। क्षतजतुल्यवपू रक्तवर्णसदृशो बलस्य सेनायाः कोपकृद्भङ्गदः। बले स्वामिनो वा कुप्यन्ति। कनकरूपधरः सुवर्णसदृशो बलस्य वृद्धिदो भवति ॥२५॥

अथ परिधिवशेन शुभाशुभमाह—

उभयपार्श्वगतौ परिधी रवेः
प्रचुरतोयकरौ वपुषान्वितौ।
अथ स मस्तककुप्परिचारिणः
परिधयोऽस्ति कणोऽपि न वारिणः ॥२६॥

रवेरादित्यस्य परिधी प्रतिसूर्यावुभयपार्श्वगतौ पार्श्वद्वयस्थौ तौ च वपुषा शरीरेणान्वितौ सूर्यसंयुक्तौ। यतस्तयोः सूर्य एव शरीरम्। तथाभूतौ प्रचुरतोयकरौ बहुजलप्रदौ। अथ परिधयः समस्तककुप्परिचारिणः सकलदिग्व्यापिनो भवन्ति, तदा वारिणो जलस्य कणोऽपि नास्ति। न वर्षतीत्यर्थः ॥२६॥

अथ सन्ध्याघनानां लक्षणमाह—

छत्रातपत्रपर्वतद्विपाश्वरूपधारिणः।
जयाय सन्ध्ययोर्घना रणाय रक्तसन्निभाः ॥२७॥

पलालधूमसञ्चयस्थितोपमा बलाहकाः।
बलान्यरूक्षमूर्त्तयो विवर्धयन्ति भूभृताम् ॥२८॥
विलम्बिनो द्रुमोपमाः खरारुणप्रकाशिनः।
घनाः शिवाय सन्ध्ययोः पुरोपमाः शुभावहाः ॥२९॥

एवंविधा घना मेघाः सन्ध्ययोर्दृष्टा जयाय नृपाणां जनानां च भवन्ति। कीदृशाः। ध्वजातपत्रेति। ध्वजः प्रसिद्धो विविधपटनिर्मितं चिह्नम्। आतपत्रं छत्रम्, पर्वतः शैलः, द्विपो हस्ती, अश्वस्तुरगः, एतेषां सदृशरूपधारिणः, तदाकृतय इत्यर्थः। अथ रक्तसन्निभा अतिलोहिता रणाय संग्रामाय भवन्ति ॥२७॥

पलालधूमेति। एवंविधा बलाहका मेघाः। अरूक्षमूर्तयः स्निग्धशरीराः। भूभृतां राज्ञां बलानि सैन्यानि विवर्धयन्ति वृद्धिं नयन्ति। कीदृशाः। पलाल धूमसञ्चयस्थितोपमाः, पलालस्य धूमः पलालधूमस्तस्य सञ्चयः समूहः, पलालधूमसञ्चयस्थिता इव। तदुपमास्तत्सदृशाः ॥२८॥

विलम्बिन इति। एवंविधा घना मेघाः सन्ध्ययोः शिवाय श्रेयसे भवन्ति। कीदृशाः। विलम्बिनो लम्बमानाः। द्रुमोपमा वृक्षाकृतयः। खरारुणप्रकाशिनः खरा अतीव याऽसावरुणता लोहितता तयातिप्रकाशिनो दीप्तिजनकाः, तथा पुरोपमाः पुराकाराः। शुभावहाः शुभमावहन्ति ॥२९॥

अथ विशेषलक्षणमाह—

दीप्तविहङ्गशिवामृगघुष्टा दण्डरजःपरिघादियुता च।
प्रत्यहमर्कविकारयुता वा देशनरेशसुभिक्षबधाय ॥३०॥

एवंविधा सन्ध्या देशस्य जनपदस्य नरेशस्य राज्ञः सुभिक्षस्य च बधाय नाशाय भवति। कीदृशी। दीप्तैः सूर्याभिमुखैर्विहङ्गैः पक्षिभिस्तथा शिवाभिर्दीप्ताभिः। मृगैरारण्यप्राणिभिर्घुष्टा कृतशब्दा, तथा दण्डेन रजसा परिघेण च युता संयुक्ता। आदिग्रहणात् सुरचापगन्धर्वनगरनीहारा ज्ञेयाः। प्रत्यहं प्रतिदिनमर्कविकारयुता वा। सविकारार्कसंयुक्ता। स्वरूपान्यत्वं विकारता। तथा च पराशरः—

"अथ सन्ध्यासु द्वियोजनान्तरे देशे सद्यः फलमादिशेत्। रश्मिसंयुक्तायां तु सप्तरात्रनिवाते निर्मलस्निग्धायां शान्तमृगद्विजायां प्रसन्नायामनुपहतायां सन्ध्यायां योगक्षेमं विन्द्याद्विपर्ययं विपरीतायाम्। श्वेतायां वसुवृद्धिं तस्यामेव परिमण्डलायां रक्तायाम्। हरितायां शस्त्रकोपम्। माञ्जिष्ठायामग्निं पीतायां चतुःपाद्रोगं श्यावायां चौरतो भयम्। नीलपीतायामीतिं गवाम्। हरितालवर्णायां प्रथमामात्यस्य शस्त्रेण बधम्। आम्रकोरकवर्णायां वर्षं नीलरक्तायामवग्रहं च कृष्णायामवर्षम्। श्वाय-

कृष्णगौर्य्यां पशुघातं विन्द्यात्। वातं कपिलायामस्तमितमात्रे सूर्ये यातिमात्रप्रकाशः स्यात् प्रभा सा नाम तस्यां वर्षं विन्द्यात्। प्रत्यूषसि तद्रूपायामेव राज्ञः सेनापतेर्वा बधः स्यात्। महावर्षं रूप्यवर्णायां च तस्यामेव ताम्रमध्यायां कृष्णायामनृतौ वर्षमृतावग्रहम्। तथा पीतमाञ्जिष्ठा अग्निजीविनां बधाय। लोहितश्यावा चौरवृद्धये। सर्वा एव च त्रिगात्राः पञ्चरागा वा युद्धाय यच्चालोहितेनैव लिम्पेत्तस्य बधाय। स्निग्धा तु गौरी योगक्षेमाय भवति चात्र।

प्रतिसूर्यः शक्रधनुर्दण्डकः परिवेषणम्।
तथैरावतमत्स्याश्च स्निग्धा ये चार्करश्मयः॥
विद्युतो भूरिकाराश्च वर्णा ये च प्रदक्षिणाः।
सन्ध्यासु यदि दृश्यन्ते सद्यो वर्षणलक्षणम्"॥इति।

तथा च काश्यपः—

दिनरात्र्यन्तरं सन्ध्या सूर्यस्यार्द्धं प्रदृश्यते।
यावच्च तावदारभ्य शुभा वाप्यशुभापि वा॥
नभोऽमलं शुभदिशः पद्मारुणसमप्रभाः।
मारुतो वाति सुरभिः सुखदो मृदुशीतलः॥
एषा सन्ध्या शुभा ज्ञेया विपरीताऽशुभा स्मृता।
रूक्षा च सविकारार्का क्रव्यादखरनादिता॥
स्निग्धा दण्डपरीवेषा सुरचापविभूषिता।
क्षिप्रं वर्षप्रदा सन्ध्या जयाऽऽरोग्यविवृद्धिदा॥इति॥३०॥

अथैतेषां सन्ध्यालक्षणोक्तानां फलानां फलकालनियमार्थमाह—

प्राची तत्क्षणमेव नक्तमपरा सन्ध्या त्र्यहाद्वा फलं
सप्ताहात् परिवेषरेणुपरिघाः कुर्वन्ति सद्यो न चेत्।
तद्वत्सूर्यकरेन्द्रकार्मुकतडित्प्रत्यर्कमेघानिला-
स्तस्मिन्नेव दिनेऽष्टमेऽथ विहगाः सप्ताहपाका मृगाः॥३१॥

प्राची पूर्वा सन्ध्या शुभमशुभं वा फलं तत्क्षणं तस्यामेव वेलायां करोति। नक्तमपरा, अपरा पश्चिमा द्वितीया सन्ध्या शुभमशुभं वा फलं नक्तं रात्रौ करोति। त्र्यहाद्वा फलमिति। सन्ध्याफलमुक्तकाले यदि न दृश्यते तदा त्र्यहाद्दिनत्रयेण भवति। सप्ताहादिति। परीवेषः सूर्यचन्द्रयोः। रेणुर्धूलिः। परिघस्तिर्यक् स्थिता सूर्यस्यादयेऽस्तमये वा मेघरेखा। एते दृष्टाः सद्यस्तस्मिन्नेवाहनि फलं कुर्वन्ति। चेच्छब्दो यद्यर्थे। यदि सद्यो न कुर्वन्ति तदा सप्ताहाद्दिनसप्तकेन शुभमशुभं वा फलं

कुर्वन्ति। तद्वदिति। सूर्यकराः सूर्यरश्मयः, अमोघादिकाः, इन्द्रकार्मुकमिन्द्रधनुः, तडिद्विद्युत्, प्रत्यर्कः प्रतिसूर्यः। मेघा अभ्राणि, अनिलो वातः, एते सर्वं एव तद्वत्सद्यः शुभमशुभं वा फलं कुर्वन्ति। यदि सद्यो न कुर्वन्ति तदा सप्ताहात्। तस्मिन्नेवेति। विहगाः पक्षिणः शुभमशुभं वा सन्ध्याकृतं फलं तस्मिन्नेव दिने कुर्वन्ति। तत्र यदि न कुर्वन्ति तदाऽष्टमदिने। अथशब्दो विकल्पे। सप्ताहपाका मृगाः, मृगा आरण्यप्राणिनः सप्ताहपाकाः सप्ताहमध्ये पाकं फलं शुभमशुभं वा कुर्वन्ति ॥इति ॥३१॥

अन्येष्वप्याह—

एकं दीप्त्या योजनं भाति सन्ध्या
विद्युद्भासा षट् प्रकाशीकरोति।
पञ्चाब्दानां गर्जितं याति शब्दो
नास्तीयत्ता केचिदुल्कानिपाते ॥३२॥

सन्ध्या दीप्त्या कान्त्या एकं योजनं भाति प्रकाशयति, सा च तावन्मात्र एव फलदा, योजनफलप्रदेत्यर्थः। तथा विद्युद्भासा तडिद्दीप्त्या षड् योजनानि प्रकाशीकरोति। षण्णां योजनानां सा फलदेत्यर्थः। अब्दानां मेघानां गर्जितं शब्दः पञ्च योजनानि याति गच्छति। योजनपञ्चके फलद इत्यर्थः। नास्तीयत्तेति, केचिद्देवलादय एवमाहुः। यथोल्कानिपाते इयत्ता परिच्छित्तिर्नास्ति। सर्वत्र सा फलदेत्यर्थः। तथा च देवलः—

सन्ध्या तु योजनं याति विद्युद्भासा षडेव हि।
मेघशब्दस्तु पञ्चानां योजनानां फलप्रदः॥
उल्का सर्वत्र फलदा शुभा वाऽप्यशुभापि वा ॥इति॥३२॥

अथान्येषामप्याह—

प्रत्यर्कसंज्ञः परिधिस्तु तस्य
त्रियोजनाभः परिघस्य पञ्च।
षट्पञ्चदृश्यं परिवेषचक्रं
दशामरेशस्य धनुर्विभाति ॥३३॥

प्रत्यर्कसंज्ञो यः प्रतिसूर्यस्तस्य परिधिस्त्रियोजनाभः, त्रयाणां योजनानां तस्य कान्तिर्दृश्यते। योजनत्रये फलद इत्यर्थः। परिघस्य पञ्च, पञ्चसु योजनेषु परिघो दृश्यते। तावत्स्वेव फलद इत्यर्थः। परिवेषचक्रं परिवेषमण्डलं षट्पञ्चदृश्यम्, षट्सु पञ्चसु वा योजनेषु दृश्यते। तावन्मात्र एव फलदम्। अमरेशस्येन्द्रस्य धनुरिन्द्र-

सार्धं च दशयोजनानि विभाति प्रकटीकरोति। दशानां योजनानां फलप्रदमित्यर्थः ॥३३॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ सन्ध्यालक्षणं
नाम त्रिंशतमोऽध्यायः ॥३०॥

अथ दिग्दाहलक्षणं व्याख्यायते।

तत्रादावेव वर्णभेदनं तस्यैव फलमाह—

दाहो दिशां राजभयाय पीतो देशस्य नाशाय हुताशवर्णः।
यश्चारुणः स्यादपसव्यवायुः सस्यस्य नाशं स करोति दृष्टः ॥१॥

दिशां दाहा दिग्दाहः। पीतः पीतवर्णो राजभयाय नृपभीतये भवति। तथा हुताशवर्णोऽग्निसमप्रभो देशस्य जनपदस्य नाशाय क्षयाय भवति। यश्चारुणो लोहितवर्णः स्याद्भवेत् स चापसव्यवायुः, अपसव्यो वामो वायुर्यस्य स दृष्टोऽवलोकितः सस्यस्य नाशं क्षयं करोतीति ॥१॥

अथान्यदप्याह—

योऽतीव दीप्त्या कुरुते प्रकाशं छायामपि व्यञ्जयतेऽर्कवद्यः।
राज्ञो महद्वेदयते भयं स शस्त्रप्रकोपं क्षतजानुरूपः ॥२॥

यो दिग्दाहोऽतीव दीप्त्या अतिकान्त्या प्रकाशं कुरुते उद्योतं जनयति। तथा योऽर्कवदादित्यवच्छायामपि व्यञ्जयते प्रकाशयति। दृश्यमाना ये भावास्तदीयां छायामुत्पादयतीत्यर्थः। स च राज्ञो नृपस्य महद्भयं वेदयते आख्याति। क्षतजानुरूपो रक्तवर्णोऽतिलोहित इत्यर्थः। स शस्त्रकोपं करोति ॥२॥

अथ सर्वासु दिक्षु फलमाह—

प्राक् क्षत्रियाणां सनरेश्वराणां प्राग्दक्षिणे शिल्पिकुमारपीडा।
याम्ये सहोग्रैः पुरुषैस्तु वैश्या दूताः पुनर्भूप्रमदाश्च कोणे ॥३॥
पश्चात्तु शूद्राः कृषिजीविनश्च चौरास्तुरङ्गैः सह वायुदिक्स्थे।
पीडां व्रजन्त्युत्तरतश्च विप्राः पाखण्डिनो वाणिजकाश्च शार्व्याम् ॥४॥

प्राक् पूर्वस्यां दिशि दिग्दाहा दृष्टः क्षत्रियाणां क्षत्रियजातीनां सनरेश्वराणां नरेश्वरेण नृपेण सहितानां पीडां कराति। तथा प्राग्दक्षिणे आग्नेय्यां दिशि शिल्पिनां लोहकारसुवर्णकारादीनां कुमाराणां च पीडां करोति। याम्ये दक्षिणे वैश्या वैश्यजातयः, उग्रैः क्रूरैः पुरुषैः सह पीडां व्रजन्ति प्राप्नुवन्ति। दूता गमागमिकाः,

पुनर्भूप्रमदाश्च पुनर्भूस्त्रियः। कोणे नैर्ऋत्यां दिशि पीडां व्रजन्ति। अक्षतयोनित्वाद्या पुनरुह्यते सा पुनर्भूः। तथा च—

पुनर्भूः सोह्यते भूयो याऽक्षतत्वाद्यथाविधि ॥३॥

पश्चात्तु शूद्रा इति। शूद्राः शूद्रजातयः, कृषिजीविनः कार्षिकाः पश्चात् पश्चिमायां दिशि पीडां व्रजन्ति। वायुदिक्स्थे वायव्यां दिशि स्थित दिग्दाहे चौरास्तुरङ्गैरश्वैः सह पीडां व्रजन्ति। उत्तरत उत्तरस्यां दिशि विप्रा ब्राह्मणाः पीडां व्रजन्ति। पाखण्डिनो वेदबाह्या वाणिजकाश्च क्रयविक्रयजीविनः शार्व्यामैशान्यां दिशि पीड़ां व्रजन्ति। तथा च काश्यपः—

प्राच्यां दिशि प्रदीप्तायां श्रेणीनां भयमादिशेत्।
आग्नेय्यां तु कुमाराणां वैश्यानां दक्षिणे तथा॥
नैर्ऋत्यां च स्त्रियो हन्ति शूद्रान् पश्चिमतस्तथा।
वायव्यायां चौरभयं विप्राणामुत्तरे तथा।
पाखण्डिवणिजां पीडा ह्यैशानी यदि दीप्यते ॥इति॥४॥

अथ शुभलक्षणमाह—

नभः प्रसन्नं विमलानि भानि
प्रदक्षिणं वाति सदागतिश्च।
दिशां च दाहः कनकावदातो
हिताय लोकस्य सपार्थिवस्य ॥५॥

नभ आकाशं प्रसन्नं निर्मलम्, तथा भानि नक्षत्राणि विमलानि स्निग्धानि। सदागतिर्वायुश्च प्रदक्षिणं वाति प्रदक्षिणेन वहति। दिशां दाहो दिग्दाहः कनकावदातः कनकवत् सुवर्णवदवदातो निर्मलस्तथाभूतः सपार्थिवस्य सनृपस्य लोकस्य जनपदस्य हिताय श्रेयसे भवति ॥५॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ दिग्दाह-
लक्षणं नामैकत्रिंशोऽध्यायः ॥३१॥

अथ भूकम्पलक्षणाध्यायो व्याख्यायते।

तत्रादावेव तन्निमित्तार्थं मुनीनां मतभेदप्रदर्शनार्थमाह—

क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवासिसत्त्वकृतम्।
भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये ॥१॥

एके मुनया बृहदन्तर्जलनिवासिसत्त्वकृतं क्षितिकम्पमाहुः कथयन्ति। बृहन्तो ये च सत्त्वाः प्राणिनो झषमकरमत्स्यकूर्मनक्रशिशुमारप्रभृतयोऽन्तर्जले

जलमध्ये निवसन्ति, तत्कृतं क्षितिकम्पं भूचलनमाहुः। तेषां जलसंक्षोभणादुत्पद्यत इत्यर्थः। तथा च काश्यपः—

वारुणस्योपरि पृथ्वी सशैलवनकानना।
स्थिता जलजसत्त्वाश्च सक्षोभाश्चालयन्ति ताम्॥

भूभारखिन्नेति। तथा अन्ये गर्गादय एवमाहुः। भूभारेण क्षितिभारोद्वहनेन खिन्नाः श्रान्ता ये दिग्गजा दिग्नागास्तेषां विश्राम उच्छ्वसनं तदुद्भवं तदुत्पन्नं क्षितिकम्पमिति। तथा च गर्गः—

चत्वारः पृथिवीं नागा धारयन्ति चतुर्दिशम्।
वर्धमानः सुवृद्धश्चातिवृद्धश्च पृथुश्रवाः।
वर्धमानो दिशं पूर्वां सुवृद्धो दक्षिणां दिशम्॥
पश्चिमामतिवृद्धस्तु सौम्याशां तु पृथुश्रवाः।
नियोगाद् ब्रह्मणो ह्येते धारयन्ति वसुन्धराम्॥
ते श्वसन्ति यदा शान्ताः स वायुः श्वसितो महान्।
वेगान्महीं चालयति भावाभावाय देहिनाम्॥इति॥१॥

अन्यन्मतान्तरमाह—

अनिलोऽनिलेन निहतः क्षितौ पतन् सस्वनं करोत्यन्ये।
केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्याः॥२॥

अन्ये वसिष्ठादय एवमाहुः। अनिलो वायुः स च नभस्थोऽपरेणैवानिलेन निहतस्ताडितः क्षितौ भूमौ पतति, स च पतन् सस्वनं शब्दं भूकम्पं करोति उत्पादयति। तथा च वसिष्ठः—

यदा तु बलवान् वायुरन्तरिक्षानिलाहतः।
पतत्याशु स निर्घातो भवेदनिलसम्भवः॥
तस्य योगान्निपततश्चलत्यन्याहता क्षितिः।
सोऽभिघातसमुत्थः स्यात् सनिर्घातमहोचलः॥इति।

केचित्त्वदृष्टकारितमिति। केचिद्वृद्धगर्गादय इदं भूकम्पमदृष्टकारितं प्राहुः। अदृष्टशब्देन धर्माधर्मौ बुध्येते, ताभ्यां कारितं कृतमित्यर्थः। किल धर्मेण वृद्धेन प्रजानां शुभसंसूचनाय शुभं भूमिकम्पमुत्पद्यते। अधर्मेणाभिवृद्धेन प्रजानामशुभसंसूचनायाशुभं भूमिकम्पमुत्पद्यत इति।

तथा च वृद्धगर्गः—

प्रजा धर्मरता यत्र तत्र कम्पं शुभं वदेत्।
जनानां श्रेयसे नित्यं विसृजन्ति सुरोत्तमाः॥

विपरीतस्थिता यत्र जनास्तत्राशुभं तथा ।
विसृजन्ति प्रजानां तु दुःखशोकाभिवृद्धये ॥इति॥

अन्ये आचार्याः पराशरादयो मुनय इदं वक्ष्यमाणं प्राहुरुक्तवन्तः ॥२॥

किं तदित्याह—

गिरिभिः पुरा सपक्षैर्वसुधा प्रपतद्भिरुत्पतद्भिश्च ।
आकम्पिता पितामहमाहामरसदसि [1]सव्रीडम् ॥३॥
भगवन्नाम ममैतत्त्वया कृतं यदचलेति तन्न तथा ।
क्रियतेऽचलैश्चलद्भिः शक्ताहं नास्य खेदस्य ॥४॥
तस्याः सगद्गदगिरं किञ्चित् स्फुरिताधरं विनतमीषत् ।
साश्रुविलोचनमाननमालोक्य पितामहः प्राह ॥५॥
मन्युं हरेन्द्र धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय ।
शक्रः कृतमित्युक्त्वा मा [2]भैरिति वसुमतीमाह ॥६॥
किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम् ।
प्राग् द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति ॥७॥

पुरा पूर्वं गिरिभिः पर्वतैः सपक्षैः पक्षसहितैर्वसुधा भूः प्रपतद्भिरुत्पतद्भिश्च आकाशाद् भूर्भूम्याश्चाकाशमुत्पतद्भिराकम्पिता चाल्यमाना सती अमरसदसि देवसभायां गत्वा सव्रीडं सलज्जं कृत्वा । केचित् सव्रीडेति पठन्ति । सव्रीडा सलज्जा पितामहं ब्रह्माणमाह उक्तवती ॥

किं तदित्याह । हे भगवन् पितामह ममैतत्त्वया भगवता नाम कृतं यदचलेति स्थिरा त्वमिति । तन्नाम न तथाऽचलैः पर्वतैश्चलद्भिर्भ्रमद्भिः क्रियते सम्पाद्यते, तस्मादस्य खेदस्य नाहं सोढुं शक्ता न समर्थेति ॥

तस्या इति । ततस्तस्या वसुमत्याः पितामहो ब्रह्मा आननं मुखमालोक्य दृष्ट्वा इदं प्राहोक्तवान् । कीदृशमाननम् ? सगद्गदगिरम्, सह गद्गदया अव्यक्तया गिरा वाचा वर्तते यत् । तथा किञ्चिदीषत्स्फुरिताधरम्, मनाक् स्फुरितौ चलमानावधरावोष्ठौ यस्य तत् । तथा विनतमधोमुखम् । तथा साश्रुविलोचनम्, सहाश्रुणा नयनाम्बुना विलोचने नयने वर्तते यस्मिन् तथाभूतम् ॥

किं तत्पितामह उवाचेत्याह—मन्युं हरेति । हे इन्द्र शतक्रतो धात्र्या भूम्या मन्युं हर परिभवमपनय । क्षिप कुलिशं शैलपक्षभङ्गाय । शैलानां पर्वतानां पक्षभङ्गाय

---

१. सव्रीडा—इति पाठान्तरम् ।

२. छन्दोभङ्गभिया मा भैषीरित्यस्य स्थाने मा भैरिति प्रयोगः कृतो ग्रन्थकृता ।

अङ्गरुहच्छेदनाय कुलिशं वज्रं क्षिप प्रेरय। ततः शक्र इन्द्रः कृतमिति सम्पन्नमित्युक्त्वा वसुमतीं भूमिं मा भैषीरित्याह, मा तव भयं भवतु; अहमपनयामीत्युक्तवान्॥

किन्त्विति। अनिलदहनसुरपतिवरुणाः, अनिलो वायुः, दहनोऽग्निः, सुरपतिरिन्द्रः, वरुणोऽपांपतिः, एते चत्वारः सदसत्फलानां शुभाशुभफलानामवबोधार्थं संसूचयितुं दिननिशोः, दिनं च निशा च तयोर्दिननिशोः समुदितयोर्न प्रत्येकं प्राग्द्वित्रिचतुर्भागेषु त्वां कम्पयिष्यन्ति। दिवसस्य च पूर्वेऽर्द्धे अनिलः कम्पयिष्यति। द्वितीये दिनार्द्धेऽग्निः। तृतीये अहोरात्रभागे प्रथमनिशार्द्धे सुरपतिः। अहोरात्रस्य चतुर्थभागे निशायाश्चार्द्धे वरुणः कम्पयिष्यति। एवं प्रथममहोरात्रचतुर्भागो वायोर्वेला द्वितीयाग्नेस्तृतीया इन्द्रस्य चतुर्थी वरुणस्य। द्वौ दिनस्य निशायाश्च द्वावेवं प्राग्द्वित्रिचतुर्भागेषु वेलामण्डलान्येतानि। तथा च पराशरः—

"पुरातिवीर्यवेगप्रवृद्धप्रभावाः पक्षिणः पवनपथविचारिणश्चलाः प्रपतन्तः शतशोऽवनिमसकृदभिकम्पयाम्बभूवुः। तदखिलजगदहितमवनिचलनमभिसमीक्ष्य सुरपतिरविहतगतिमुपरि कुलिशमुपक्षिप्य क्षितिधरपक्षान् क्षणान्निपात्यावनिमुवाच। अद्रिजमतः परं भयमपनयाम्यनिलानलाम्बुपतिमदभिसृष्टाः कम्पाः कदाचिज्जगति हिताहितवेदिनो भविष्यन्तीत्यर्कचन्द्रग्रहणग्रहविकृतचारजांश्च कम्पानाहुः"।

अत्र केचित् प्राग्द्वित्रिचतुर्भागेषु दिननिशोरित्यन्यथा व्याख्यानं कुर्वन्ति। प्रत्येकं दिननिशोः प्राग्द्वित्रिचतुर्भागेष्वनिलदहनसुरपतिवरुणाः कम्पयिष्यन्ति। तथा च शास्त्रान्तरे पठ्यते—

रात्रौ दिवा च पूर्वाह्णे वायव्यः कम्प उच्यते।
मध्याह्ने चार्द्धरात्रे च हौताशः कम्प उच्यते॥
दिवारात्रौ तृतीयेंऽशे माहेन्द्रश्चाभिगीयते।
चतुर्थे वर्तमानेंशे वारुणं निर्दिशेद् बुधः॥

एतन्न शोभनम्, यस्मात् पराशर आह—

"तत्र चतुर्षु चतुर्भागेषु दिवानक्तमनिलानलेन्द्रवरुणजं कम्पक्रमं विन्द्यात्"।

एतत् स्पष्टतरं गर्ग आह—

कृत्वा चतुर्धाहोरात्रं द्विधाहोऽथ द्विधा निशम्।
देवताश्रययोगाच्च चतुर्धा भगणं तथा॥
पूर्वे दिनार्द्धे वायव्य आग्नेयोऽर्द्धे तु पश्चिमे।
ऐन्द्रः पूर्वे च रात्र्यर्द्धे पश्चिमार्द्धे तु वारुणः॥

चत्वार एवमेते स्युरहोरात्रविकल्पजाः।
निमित्तभूता लोकानामुल्कानिर्घातभूचलाः॥ इति।

एवं चतस्रो वेला इति सिद्धम्॥३-७॥

अथ वायव्यस्य कम्पस्य लक्षणं पूर्वलिङ्गानि चाह--

चत्वार्यार्यम्णाद्यान्यादित्यं मृगशिरोऽश्वयुक् चेति।
मण्डलमेतद्वायव्यमस्य रूपाणि सप्ताहात्॥ ८॥
धूमाकुलीकृताशे नभसि नभस्वान् रजः क्षिपन् भौमम्।
विरुजन् द्रुमांश्च विचरति रविरपटुकरावभासी च॥ ९॥
वायव्ये भूकम्पे सस्याम्बुवनौषधीक्षयोऽभिहितः।
श्वयथुश्वासोन्मादज्वरकासभवो वणिक्पीडा॥१०॥
रूपायुधभृद्वैद्यास्त्रीकविगान्धर्वपण्यशिल्पिजनाः।
पीड्यन्ते सौराष्ट्रककुरुमगधदशार्णमत्स्याश्च॥११॥

चत्वार्यार्यम्णाद्यानीति। आर्यम्णमुत्तरफल्गुनी तदाद्यानि चत्वारि नक्षत्राणि। उत्तरफल्गुनी हस्ताश्चत्रा स्वातिरिति। आदित्यं पुनर्वसुः। मृगशिरः सौम्यम्। अश्वयुगश्विनीत्येतानि सप्त नक्षत्राणि वायव्यमण्डलम्। एतेषामन्यतमर्क्षे यदि भूकम्पो भवति तदा तद्वायव्यं ज्ञेयमिति। अस्य रूपाणि सप्ताहात्। अस्य च मण्डलस्य सप्ताहात्पूर्वं वक्ष्यमाणानि रूपाणि पूर्वलिङ्गानि भवन्ति॥

तान्याह--धूमाकुलीकृताश इति। यदा वायव्यकम्पो भवति, तदा चैतानि प्राक्स्थितानि लिङ्गान्युत्पद्यन्ते। नभस्याकाशे धूमाकुलीकृताशे। धूमेन आकुलीकृता आशा दिशो यत्र तथाभूते। नभस्वान् वायुर्भौमं भूमेरुत्थं रजो धूलिं क्षिपन् प्रेरयन् विचरति। तथा द्रुमान् वृक्षान् विरुजन् विभञ्जयन् विचरति। रविरादित्यः। अपटुकरावभासी च भवति। अपटुभिरचतुरैः करैः रश्मिभिरवभासनं प्रकाशं करोति तच्छीलः। तथा च गर्गः--

प्रथमेऽह्नि चतुर्भागे निर्घातोल्कामहीचलाः।
सौम्यादित्यार्यम्णहस्तचित्रास्वात्यश्विनीषु च॥
भवन्त्यनिलजाः सर्वे लक्षणान्यवधारय।
धूमव्याप्ता दिशः सर्वा नभस्वान् प्रक्षिपन् रजः।
द्रुमांश्च भञ्जंश्चरति रविस्तपति शीतलः।
सप्तमेऽहनि कम्पः स्याद् भूमेरनिलसम्भवः॥इति।

तस्मादस्य रूपाणि सप्ताहादिति यदुक्तं तत्र प्राप्तलिङ्गानीति बोद्धव्यम्।

तत्र फलान्याह—

वायव्ये भूकम्पे सस्यानां शालीनामम्बुनो जलस्य वनानामरण्यानामौषधीनां च क्षयो विनाशोऽभिहित उक्तः। तथा श्वयथुः शोफः। श्वासः। उन्मादो विचित्तता। ज्वरः। कासः। एषां भवः सम्भवः। वणिजां क्रयविक्रयजीविनां च पीडा व्यथा।

तथा रूपायुधभदिति। रूपभृतो वेश्याजनाः। आयुधभृतः शस्त्रोपजीविनः। वैद्याः कायचिकित्सकाः। स्त्रियो योषितः। कवयः काव्यकर्तारः। गान्धर्वा गायकाः। पण्याः पण्येन ये जीवन्ति जनाः। तथा शिल्पिनो लोहकारप्रभृतयः। अथवा पण्यमेव शिल्पं येषां ते पण्यशिल्पिजनाः। एते सर्वे पीडयन्ते। तथा सौराष्ट्रका जनाः। कुरवः। मगधाः। दशार्णाः। मत्स्याः। एतेऽपि पीडयन्ते।

एवमाचार्येण गर्गऋषिपुत्रयोर्मतमङ्गीकृतम्। वृद्धगर्गपराशरकश्यपैः सह मतभेदः। तथा च पराशरः—

"वायव्याभिजिद्वासवाश्वार्यम्णहस्तत्वाष्ट्रेष्वनिलोऽभिकम्पयन् परुषपवननिपातैस्तरुकुसुमशष्पसस्यान्युच्छेदयति। उन्मादश्वासश्वयथुविषमज्वरातङ्ककृद्विशेषतो भिषग्वणिक्पण्यस्त्रीशिल्पिशूरचित्रकारकविविद्याविवादशीलधूर्तकुरुसारदण्डकवात्समागधसाल्वसौवर्धनपुलिन्दवैदेहसौराष्ट्रनलदकदम्बदशार्णाङ्गवङ्गवर्तिमालवपौरवत्रिगर्तसौवीरयौधेयक्षुद्रकशिविकानभिहन्ति" ॥८-११॥

अथाग्नेयस्य मण्डललक्षणं पूर्वलिङ्गानि चाह—

पुष्याग्नेयविशाखाभरणीपित्र्याजभाग्यसंज्ञानि ।
वर्गो हौतभुजोऽयं करोति रूपाण्यथैतानि ॥१२॥
तारोल्कापातावृतमादीप्तमिवाम्बरं सदिग्दाहम् ।
विचरति मरुत्सहायः सप्तार्चिः सप्तदिवसान्तः ॥१३॥
आग्नेयेऽम्बुदनाशः सलिलाशयसंक्षयो नृपतिवैरम् ।
दद्रूविर्चाचिकाज्वरविसर्पिकाः पाण्डुरोगश्च ॥१४॥
दीप्तौजसः प्रचण्डाः पीड्यन्ते चाश्मकाङ्गबाह्लीकाः ।
तङ्गणकलिङ्गवङ्गद्रविडाः शबरा अनेकविधाः ॥१५॥

पुष्यः। आग्नेयं कृत्तिका। विशाखा। भरणी। पित्र्यं मघाः। अजशब्देनैकपादुच्यते। एवमजं पूर्वभद्रपदा। भाग्यसंज्ञा पूर्वफल्गुनी। एतानि सप्त नक्षत्राणि। हौतभुजोऽयं वर्गः। हुतं भुङ्क्ते हुतभुक् तस्यायं हौतभुजः। आग्नेयं मण्डलम्। अथानन्तरम्। एतानि वक्ष्यमाणानि रूपाणि चिह्नानि सप्ताहात् पूर्वं करोति।

तारोल्कापातावृतमिति। अम्बरमाकाशं तारोल्कापातावृतम्। तारापातैरुल्कापातैश्चावृतं व्याप्तम्। सदिग्दाहं दिग्दाहसहितम्। आदीप्तमिवोज्ज्वलितमिव लक्ष्यते। सप्तदिवसान्तः सप्ताहमध्ये सप्तार्चिरग्निर्मरुत्सहायो वातसहितो विचरति वहन् दृश्यते। तथा च गर्गः—

द्वितीयेऽह्नि चतुर्भागे निर्घातोल्कामहीचलाः।
पित्र्यभाग्याजपुष्याग्निविशाखायमदैवतैः ॥
भवन्त्यनिलजास्ते च लक्षणानि निबोध मे।
तारोल्कापातदिग्दाहैरादीप्तं लक्ष्यते नभः॥
मरुत्सहायः सप्तार्चिः सप्ताहान्तश्चरत्यपि।
सप्तमेऽहनि विज्ञेयः कम्पश्चानलसम्भवः॥इति॥

अथ फलान्याह—आग्नेये भूकम्पे अम्बुदानां मेघानां नाशः क्षयः। सलिलाशयानां जलधराणां वापीकूपतडागानां संक्षयः संशोषः। नृपतीनां राज्ञां परस्परं वैरं द्वेषः। दद्रू त्वग्विकारः। विचर्चिका रोगविशेषः पादजस्त्वग्विकारः। ज्वरः। विसर्पिका अङ्गविकारः। पाण्डुरोग उदरामयः। एते सम्भवन्ति।

दीप्तौजस इति। दीप्तमोजो येषां ते दीप्तौजसस्तेजस्विनः। प्रचण्डाः क्रोधिनः। एते पीड्यन्ते पीडां प्राप्नुवन्ति। तथाश्मका जनाः। अङ्गाः। बाह्लीकाः। तङ्गणाः। कलिङ्गाः। वङ्गाः। द्रविणाः। शबराः। एते अनेकविधा बहुप्रकाराः। सर्व एव पीड्यन्ते। अत्रापि पराशरः—

"अग्नीन्द्राग्न्यजयमपितृगुरुभगदैवतेष्वनलोऽभिकम्पयन् वर्षसरित्सरःस्रोतसामपः क्षपयन् सुखानि रोगारोचकपिटकपाण्डुरुग्ज्वरकिटिभदद्रूदाहकृद्विशेषाद्वातपादकाग्नित्पुलिन्दयवनबाह्लीकवङ्गोष्ट्रासन्त्यश्मकेक्ष्वाकुकुलूततुखारशिबिकत्रिगर्तवैदेहद्रविडसुराष्ट्रमध्यदेशदाशार्णांश्च हिनस्ति" इति॥१२–१५॥

अथेन्द्रस्य मण्डलस्य लक्षणं पूर्वलिङ्गानि फलान्याह—

अभिजिच्छ्रवणधनिष्ठाप्राजापत्यैन्द्रवैश्वमैत्राणि ।
सुरपतिमण्डलमेतद्भवन्ति चाप्यस्य रूपाणि॥१६॥
चलिताचलवर्ष्माणो गम्भीरविराविणस्तडिद्वन्तः।
गवलालिकुलाहिनिभा विसृजन्ति पयः पयोवाहाः॥१७॥
ऐन्द्रं स्तुतकुलजातिख्यातावनिपालगणपविध्वंसि।
अतिसारगलग्रहवदनरोगकृच्छर्दिकोपाय ॥१८॥
काशियुगन्धरपौरवकिरातकीराभिसारहलमद्राः ।
अर्बुदसुराष्ट्रमालवपीडाकरमिष्टवृष्टिकरम् ॥१९॥

अभिजिच्छ्रवणं धनिष्ठा। प्राजापत्यं रोहिणी। ऐन्द्रं ज्येष्ठा। वैश्वमुत्तराषाढा। मैत्रमनुराधा। एतानि सप्त नक्षत्राणि सुरपतेरिन्द्रस्य मण्डलमेतत्। अस्यापि सप्ताहात् पूर्वं स्वरूपाणि भवन्ति॥

पयोवाहा मेघाः पयः पानीयं विसृजन्त्युत्सृजन्ति। कीदृशाः? चलिताचलवर्ष्माणः, चलितानामचलानां पर्वतानामिव वर्ष्म शरीरं येषां ते तथाविधाः। तथा गम्भीरविराविणः, गम्भीरो मधुरो विशेषेण रावः शब्दो येषाम्। तडिद्वन्तः, तडितो विद्युतस्ता विद्यन्ते येषु। गवलं महिषशृङ्गम्। अलिकुलं भ्रमरकुलम्। अहयः सर्पास्तन्निभास्तत्सदृशाः। तथा च गर्गः—

निशार्द्धे तु यदा पूर्वे उल्कानिर्घातभूचलाः।
मैत्रेन्द्रवैश्वश्रवणाभिजिद्रोहिणिवासवैः॥
स्यादिन्द्रसम्भवः कम्पो लक्षणानि च मे शृणु।
वर्षन्ति बहवो मेघा वराहमहिषोपमाः॥
धुन्वन्तो मधुरान् रावान् विद्युद्भासितभूतलाः।
सप्तमेऽहनि सम्प्राप्ते कम्पः स्यादिन्द्रसम्भवः॥इति॥

फलान्याह—ऐन्द्रमित्यादि। ऐन्द्रं कम्पम्। स्तुतकुलजातयः। स्तुते स्तुतिसंयुक्ते प्रधानकुले जातिर्जन्म येषां ते। तथा ख्याताः कीर्तियुक्ताः। अवनिपाला राजानः। गणपाः समूहपतयः। एषां विध्वंसि नाशकम्। अतिसारोऽतीसारः। गलग्रहः कण्ठरोगः। वदनरोगो मुखगदः। एतान् करोति। तथा छर्दिकोपाय भवति। छर्दिप्रकोपं करोति॥

काशयो जनाः। युगन्धराः। पौरवाः। किराताः। कीराः। अभिसाराः। हलाः। मद्राः। अर्बुदाः। सुराष्ट्राः। मालवाः। एषां पीडाकरम्। तथा इष्टवृष्टिकरम्। इष्टामभिमतां वृष्टिं करोति। अत्रापि पराशरः—

"ऐन्द्रवैश्वदेववैष्णवप्राजापत्यसौम्यादित्यमैत्रेषु सुरपतिरवनिमतिचालयन् प्रवृद्धाम्भोदयज्ञघर्मान्नपानोत्सवो जात्यप्रथितकुलाधिपतिसुवास्तुनीचकाश्मीराभिसारप्राच्यशककिरातपौरवाच्युतवास्वर्णवमालवपल्लवदण्डककाशिकार्षककैलास-मल्ललहवहालानुपतापयति" इति॥१६–१९॥

अथ वारुणस्य लक्षणं पूर्वलिङ्गानि फलमाह—

पौष्णाप्यार्द्राश्लेषामूलाहिर्बुध्न्यवरुणदेवानि।
मण्डलमेतद्वारुणमस्यापि भवन्ति रूपाणि॥२०॥
नीलोत्पलालिभिन्नाञ्जनत्विषो मधुरराविणो बहुलाः।
तडिदुद्भासितदेहा धाराङ्कुरवर्षिणो जलदाः॥२१॥

वारुणमर्णवसरिदाश्रितघ्नमतिवृष्टिदं विगतवैरम्।
गोनर्दचेदिकुकुरान् किरातवैदेहकान् हन्ति ॥२२॥

पौष्णं रेवती। आप्यं पूर्वाषाढा। आर्द्रा। आश्लेषा। मूलम्। अहिर्बुध्न्यमुत्तरभद्रपदा। वरुणदेवं शतभिषक्। एतानि सप्त नक्षत्राणि। वारुणं मण्डलमस्यापि सप्ताहात् पूर्वं रूपाणि चिह्नानि भवन्ति॥

जलदा मेघा धाराङ्कुरवर्षिणः। धारा जलपात एवाङ्कुरो येषां तैर्वर्षन्ति। कीदृशाः ? नीलोत्पलालिभिन्नाञ्जनत्विषः, नीलोत्पलं कुवलयम्, अलिर्भ्रमरः, भिन्नाञ्जनमिति नीलवर्णं कज्जलम्, एषां सदृशी त्विट् कान्तिर्येषाम्। मधुरराविणः, मधुरो रावः शब्दो येषाम्। बहुलाः प्रभूतास्तडिदुद्भासितदेहाः। तडिद्भिर्विद्युद्भिरुद्भासिताः प्रकटीकृता देहाः शरीराणि येषाम्। तथा च गर्गः—

निशायां पश्चिमे भागे निर्घातोल्कामहीचलाः।
पौष्णाप्यार्द्रोरगा मूलाहिर्बुध्न्यं वरुणं तथा॥
कम्पो वारुण एभिः स्याच्छृणु तस्यैव लक्षणम्।
वर्षन्ति जलदास्तत्र नीलाञ्जनचयोपमाः॥
विद्युद्भासितदेहाश्च मधुरस्वरभूषिताः।
सप्तमेऽहनि सम्प्राप्ते कम्पः स्याद्वारुणस्ततः॥ इति।

फलान्याह—वारुणं कम्पमर्णवसरिदाश्रितघ्नम्। अर्णवः समुद्रः। सरितो नद्यः। तत्र ये आश्रितास्तान् हन्ति। अतिवृष्टिदम्, प्रभूतां वृष्टिं ददाति। विगतवैरं नष्टद्वेषम्। गोनर्दा जनाः। चेदयः। कुकुराः। एतान् किरातान् वैदेहांश्च हन्ति नाशयति। अत्रापि पराशरः—

"वारुणाहिर्बुध्न्यपूषारुद्रभुजगनैर्ऋत्यदैवतेषु कम्पोऽम्बुपतिकृतः प्रततजलधरः। धराभिन्नकेदारपुरनगरप्रबद्धतरुणततजलताक्षुपशष्पसस्यातीसारहिक्काक्षिरोगकृदपि च विशेषतः किरातकाश्मीरापरान्तककौकुरेयशौर्यारकचेदिवत्ससैन्धवोदक्यात्रिकोदधिनदनदीसंश्रितांश्च देशानुपहन्ति" इति॥२०-२२॥

अधुना फलकालनियमार्थमाह—

षड्भिर्मासैः कम्पो द्वाभ्यां पाकं च याति निर्घातः।
अन्यानप्युत्पातान् जगुरन्ये मण्डलैरेतैः॥२३॥

षड्भिर्मासैः कम्पः पाकं याति फलं ददातीत्यर्थः। निर्घातो द्वाभ्यां मासाभ्यां पाकं याति। अन्ये मुनयो गर्गादयोऽन्यानप्युत्पातान् ग्रहणनिर्घातोल्कापातादीनेतैरेव भूकम्पोक्तैर्मण्डलैर्जगुरुक्तवन्तः। तथा च गर्गः—

निर्घातोल्कामहीकम्पाः स्निग्धगम्भीरनिःस्वनाः।
मेघाः स्तनितशब्दाश्च सूर्येन्दुग्रहणे तथा॥
परिवेषेन्द्रचापं च गन्धर्वनगरं तथा।
मण्डलैरेव बोद्धव्याः शुभाशुभफलप्रदाः॥

तथा च समाससंहितायामाचार्येणैवोक्तम्—

आर्यम्णपूर्वं भचतुष्टयं च शशाङ्कमादित्यमथाश्विनी च।
वायव्यमेतत्पवनोऽत्र चण्डो मासद्वयेनाशुभदः प्रजानाम्॥
अजैकपादं बहुला भरण्यो भाग्यं विशाखा गुरुभं मघा च।
क्षुदग्निशस्त्रामयकोपकारि पक्षैस्त्रिभिर्मण्डलमग्निसंज्ञम्॥
प्राजापत्यं वैष्णवं मैत्रमैन्द्रं विश्वेशं स्याद्वासवं चाभिजिच्च।
ऐन्द्रं ह्येतन्मण्डलं सप्तरात्रात् कुर्यात्तोयं हृष्टलोकं प्रशान्तम्॥
आहिर्बुध्न्यं वारुणं मूलमाप्यं पौष्णं सार्पं मन्मथारीश्वरं च।
सद्यः पाकं वारुणं नाम शस्तं तोयप्रायं हृष्टलोकं प्रशान्तम्॥
उल्काहरिश्चन्द्रपुरं रजश्च निर्घातभूकम्पककुप्प्रदाहाः।
वातोऽतिचण्डो ग्रहणं रवीन्द्वोर्नक्षत्रतारागणवैकृतानि॥
व्यभ्रे वृष्टिर्वैकृतं चातिवृष्टिर्धूमोऽनग्निर्विस्फुलिङ्गार्चिषो वा।
वन्यं सत्त्वं ग्राममध्ये विशेद्वा रात्रावैन्द्रं कार्मुकं दृश्यते वा॥
सन्ध्याविकारः परिवेषखण्डा नद्यः प्रतीपा दिवि तूर्यनादः।
अन्यच्च यत्स्यात् प्रकृतेः प्रतीपं तन्मण्डलैरेव फलं निगाद्यम्॥इति॥२३॥

अथ वेलामण्डलवशेन कम्पानां निष्फलत्वमाह—

हन्त्यैन्द्रो वायव्यं वायुश्चाप्यैन्द्रमेवमन्योऽन्यम्।
वारुणहौतभुजावपि वेलानक्षत्रजाः कम्पाः॥२४॥

ऐन्द्रः कम्पो वायव्यं हन्ति। ऐन्द्रमण्डलोत्पन्नो भूकम्पो वायुवेलाजं कम्पं नाशयति। एवं वायुश्चाप्यैन्द्रं हन्ति। एवमनेनैव प्रकारेण। अन्योऽन्यं परस्परं वारुणहौतभुजावपि। वारुणमण्डलमग्निजं हन्ति। अग्निर्वरुणजं हन्ति। वेलाजाता नक्षत्रजाताश्च कम्पाः परस्परं नाशयन्तीत्यर्थः। तस्मान्न फलदाः। वेलामण्डलयोर्भेदा अभेदे त्वतिफलदाः। यथा वायव्ये मण्डले वायव्यां च वेलायां यः कम्पः स स्वफलं पुष्टं ददात्येवमन्येऽपि बोद्धव्या इति॥२४॥

अथ वेलामण्डलवशेन कम्पोक्तस्य विशेषमाह—

प्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमण्डलयोः।
क्षुद्भयमरकावृष्टिभिरुपतापयन्ते जनाश्चापि॥२५॥

आग्नेयवायुमण्डलयोराग्नेये मण्डले वायव्यां च वेलायाम्। अथवा वायव्यमण्डले आग्नेय्यां वेलायां भूकम्पस्तस्मिन् प्रथितनरेश्वरमरणव्यसनानि भवन्ति। प्रथिताः प्रख्याता ये नरेश्वरा राजानस्तेषां मरणं व्यसनानि भवन्ति। मृत्युदुःखं च भवतीत्यर्थः। तथा जना लोकाः क्षुद्भयमरकावृष्टिभिरुपताप्यन्ते, क्षुद्भयं दुर्भिक्षम्, मरको मरणम्, अवृष्टिरवर्षणम्, एतैरुपताप्यन्ते ॥२५॥

पुनरप्याह—

वारुणपौरन्दरयोः सुभिक्षशिववृष्टिहार्दयो लोके।
गावोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः ॥२६॥

वारुणो वरुणकृतः। पौरन्दर ऐन्द्रः। वारुणपौरन्दरयोर्वेलामण्डलयोः सुभिक्षम्। शिवं श्रेयः। वृष्टिर्वर्षणम्। हार्दिश्चित्ततुष्टिः। एते लोके भवन्ति। तथा गावः। अतिभूरिपयसो बहुक्षीराः। तथा भूपाला राजानो निवृत्तवैरा नष्टद्वेषा भवन्ति। तथा च काश्यपः—

ऐन्द्रश्चानिलजं हन्ति वायव्यश्चापि शक्रजम्।
आप्यो हौतभुजं हन्ति चाग्निर्वारुणसम्भवम् ॥
वाय्वग्निमिश्रितो यश्च वेलामण्डलसम्भवः।
दुर्भिक्षव्याधिरोगैस्तु पीड्यन्ते तत्र जन्तवः ॥
माहेन्द्रवारुणे यत्र वेलामण्डलसम्भवः।
सुभिक्षक्षेमधर्माणां तत्र वृष्टिः प्रतिष्ठिता ॥

एवमुक्तपरिशेषाणां विशेषफलं नास्ति पाराशरे तन्त्रे विशेषतरं पठ्यते। तथा च—

योऽन्यस्मिन्नक्षत्रे भागे चान्यत्र भूचलो भवति।
स भवेद् व्यामिश्रफलस्तन्मे गदतो निबोध त्वम् ॥
कुरुशाल्वमत्स्यनैषधपुण्ड्रान्ध्रकलिङ्गविन्ध्यपादस्थान्।
वाय्वाग्नेयः कम्पः सानलजीवान् भजति मैत्र्याम् ॥
प्राच्यशकचीनपल्लवयौधेयकपर्दियक्षवद्गोमान्।
शरदण्डमगधवन्धकिविनाशनः शक्रवायव्यः ॥
आवन्तिकाः पुलिन्दा विदेहकाश्मीरदरदवासान्ताः।
बाह्याश्रिताश्च वायव्यवारुणे प्राप्नुयुः पीडाम् ॥
ऐक्ष्वाकवाऽश्मरथ्यान् पदच्चराभीरचीनमरुकुत्सान्।
ऐन्द्राग्नेयः कम्पो हिनस्ति राज्ञश्च समुदीर्णान् ॥

सरितः सरः समुद्राश्रितांश्च गोनर्दमङ्गनाराज्यम्।
क्षत्रियगणांश्च हन्यात् कम्पो वरुणाग्निदैवत्यः॥
काश्याभिसारकाच्युतकच्छद्वीपार्यदेशजाः पुरुषाः।
गणपूजिताः कुलाग्र्या नृपाश्च वरुणेन्द्रवध्याः स्युः॥इति॥२६॥

अधुना कम्पव्यतिरिक्तानामन्येषामुत्पातानां येषां न कुत्रचित् कालनियमः कृतस्तेषां कालनियमार्थमाह--

पक्षैश्चतुर्भिरनिलस्त्रिभिरग्निर्देवराट् च सप्ताहात्।
सद्यः फलति च वरुणो येषु न कालोऽद्भुतेषूक्तः॥२७॥

येष्वद्भुतेषूत्पातेषु देहस्पन्दनपिटकप्रायेषु कालः समयो नोक्तो न कथितस्ते यद्यनिले वायव्ये मण्डले भवन्ति तदा चतुर्भिः पक्षैर्मासद्वयेन फलन्ति। एवमाग्नेय-स्त्रिभिः पक्षैः। देवराडिन्द्रः सप्ताहात् सप्तभिर्दिनैः। वरुणः सद्यस्तस्मिन्नेवाहनि फलति॥२७॥

अथ येन मण्डलेन यावन्ति योजनानि चलन्ति तत्प्रदर्शनार्थमाह--

चलयति पवनः शतद्वयं शतमनलो दशयोजनान्वितम्।
सलिलपतिरशीतिसंयुतं कुलिशधरोऽभ्यधिकं च षष्टितः॥२८॥

पवनो वायुर्योजनानां शतद्वयं चलयति। एतदुक्तं भवति--वायव्ये मण्डले यो भूकम्पो भवति स योजनानां शतद्वयं कम्पयति। एवमनलोऽग्निर्दशयोजनान्वितं दशाधिकं योजनशतं चलयति। सलिलपतिर्वरुणोऽशीतिसंयुतं योजनशतं चलयति। कुलिशं वज्रं तद्धारयतीति कुलिशधर इन्द्रः षष्टितोऽधिकं योजनशतं चलयति। तथा च काश्यपः—

वायव्ये मण्डले नित्यं योजनानां शतद्वयम्।
दशाधिकमथाग्नेय ऐन्द्रे षष्ठ्याधिकं शतम्॥
शतं चाशीतिसंयुक्तं वारुणे मण्डले चलेत्॥इति॥२८॥

अथ भूकम्पे वृत्ते पुनर्यदि भूकम्प आसन्नो भवति तस्य फलप्रदर्शनार्थमाह—

त्रिचतुर्थसप्तमदिने मासे पक्षे तथा त्रिपक्षे च।
यदि भवति भूमिकम्पः प्रधाननृपनाशनो भवति॥२९॥

भूकम्पे वृत्ते पुनर्यदि तृतीये दिवसे चतुर्थे वा सप्तमे दिने मासे त्रिंशद्दिने पक्षे पञ्चदशाहे। त्रिपक्षे दिनपञ्चचत्वारिंशता भूकम्पो भवति तदा प्रधान-नृपाणां प्रतिष्ठितानां राज्ञां नाशनः क्षयावहो भवति। तथा च गर्गः—

अर्द्धमासे चतुर्थेऽह्नि तृतीये वाथ सप्तमे।
कस्मात् पुनर्यदा कम्पो मासे सार्द्धे यदापि वा॥
उत्पद्यते जने यत्र तत्र विन्द्यान्महद्भयम्॥ इति।

तथा च पराशरः—

"स्निग्धस्वनाः प्रदक्षिणानुयायिनोऽम्बुधरा धाराभिषिक्ताः पर्वसु च सर्व एव प्रशस्यन्ते। तीक्ष्णाम्बुवहोऽवनिपतिविग्रहोच्छ्राय। त्रिचतुःसप्तरात्रे पक्षमासत्रिपक्षान्तरे प्रततानुकम्पनः प्रवरनरपतिविनाशाय। अपि च शमयन्त्या-सप्ताहात् कम्पादिकृतं निमित्तमाश्वेवातिवर्षणोपवासव्रतदीक्षाजप्यहवनानि" इति॥२९॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ भूकम्पलक्षणं
नाम द्वात्रिंशोऽध्यायः॥३२॥

अथोल्कालक्षणं व्याख्यायते।

तत्रादावेव स्वरूपप्रदर्शनार्थमाह—

दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः।
धिष्ण्योल्काशनिविद्युत्तारा इति पञ्चधा भिन्नाः॥१॥

दिवि स्वर्गे। भुक्तशुभफलानाम्, शुभानि फलानि भुक्तानि यैः स्वर्गस्थै-स्तेषां पततां यानि रूपाणि दृश्यन्ते तान्युल्का इत्युच्यन्ते। गर्गादिभिः पुनरन्यथा कथितम्। यथा लोकपाला लोकानां शुभाशुभफलसूचनायास्त्राणि ज्वलितान्यु-त्सृजन्ति तान्येवोल्काः। तथा च गर्गः—

स्वास्त्राणि संसृजन्त्येते शुभाशुभनिवेदिनः।
लोकपाला महात्मानो लोकानां ज्वलितानि तु॥

आचार्येण स्वल्पसंहितायामेवोक्तम्—

अस्त्राणि लोकपाला लोकाभावाय सन्त्यजन्त्युल्काः।
केषाञ्चित् पुण्यकृतां तत्रोल्काविच्युतिः स्वर्गात्॥इति।

ताश्चोल्काः पञ्चधा। पञ्चभिः प्रकारैर्भिन्ना भेदिताः। तद्यथा— धिष्ण्या, उल्का, अशनिः, विद्युत्, तारा इति॥१॥

अथ फलकालनियमार्थमाह—

उल्का पक्षेण फलं तद्वद्धिष्ण्याशनिस्त्रिभिः पक्षैः।
विद्युदहोभिः षड्भिः तद्वत्तारा विपाचयति॥२॥

उल्का पक्षेण पञ्चदशभिर्दिनैः शुभाशुभफलं विपाचयति सम्पादयतीत्यर्थः। तद्वद्धिष्ण्या तेनैव प्रकारेण पक्षेण फलं विपाचयति। अथाशनिस्त्रिभिः पक्षैर्दिनपञ्चचत्वारिंशता। विद्युदहोभिः षड्भिर्दिनैः। तारा तद्वदेव षड्भिर्दिनैर्विपाचयति। तथा च समाससंहितायाम्—

उल्काथ पञ्चरूपा धिष्ण्योल्का विद्युतोऽशनिस्तारा।
धिष्ण्योल्के पक्षफले तत्त्रिगुणश्चाशनिः षडहिकेऽन्ये॥
फलपादकरी तारा धिष्ण्यार्द्धं पुष्कलं शेषाः॥इति॥२॥

अथ फलनियमार्थमाह—

तारा फलपादकरी फलार्द्धदात्री प्रकीर्तिता धिष्ण्या।
तिस्रः सम्पूर्णफला विद्युदथोल्काशनिश्चेति॥३॥

तारा फलपादकरी, फलस्य पादं चतुर्भागं करोतीत्यर्थः। धिष्ण्या फलार्द्धं ददाति। तिस्रो विद्युत्। उल्का। अशनिः। एतास्तिस्रः सम्पूर्णफलाः सम्पूर्णं यथा पठितं फलं प्रयच्छन्ति॥३॥

अथाशन्याः कीदृग्लक्षणमित्येतदाह—

अशनिः स्वनेन महता नृगजाश्वमृगाश्मवेश्मतरुपशुषु।
निपतति विदारयन्ती धरातलं चक्रसंस्थाना॥४॥

अशनिर्महता स्वनेन शब्देन युक्ता निपतति। नृगजेति। ना मनुष्यः। गजो हस्ती। अश्वस्तुरगः। मृग आरण्यप्राणी। अश्मा पाषाणः। वेश्म गृहम्। तरुर्वृक्षः। पशुर्गवादिः। एतेषूपरि निपतति। तथा धरातलं भूतलम्। चक्रसंस्थाना चक्रवद्भ्रमन्ती विदारयन्ती च निपतति। तथा च समाससंहितायाम्—

अशनिः प्राणिषु निपतति दारयति धरातलं बृहच्छब्दाः॥इति॥४॥

अथ विद्युल्लक्षणमाह—

विद्युत् सत्त्वत्रासं जनयन्ती तटतटस्वना सहसा।
कुटिलविशाला निपतति जीवेन्धनराशिषु ज्वलिता॥५॥

विद्युत् सत्त्वानां प्राणिनां त्रासं भयं जनयन्ती उत्पादयन्ती। तटतटस्वना तटतटेति शब्दं क्रियमाणा। अव्यक्तशब्देति यावत्। तथा कुटिलविशाला कुटिला वक्रा विशाला विस्तीर्णा। जीवेन्धनराशिषु, जीवेषु प्राणिषु, इन्धनराशिषु काष्ठनिचयेषु। ज्वलिता सज्वाला सहसा झटित्येव निपतति। तथा च[1]—

---

१. तथा चेत्यनेनात्र सर्वत्र समाससंहितावचनानि ज्ञेयानीति।

विद्युत्तटतटशब्दा ज्वालामालाकुला पतति ॥इति॥५॥

अथ धिष्ण्यालक्षणमाह—

धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यतेऽन्तराभ्यधिकम् ।
ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन ॥६॥

धिष्ण्या कृशा दुर्बला। अल्पपुच्छा स्वल्पलाङ्गूला। ज्वलिताङ्गार-निकाशा प्रज्वलिताङ्गारसदृशी। सा च द्वौ हस्तौ प्रमाणेन दीर्घा। यत उत्पन्ना तत आरभ्य दश धनूंषि। अन्तरे मध्येऽभ्यधिकं दृश्यते। चत्वारिंशद्धस्ता स्फुटतरा दृश्यते इत्यर्थः। तथा च—

धिष्ण्या सिता द्विहस्ता धनूंषि दश याति कृशदेहा ॥ इति ॥६॥

अथ तारालक्षणमाह—

तारा हस्तं दीर्घा शुक्ला ताम्राब्जतन्तुरूपा वा ।
तिर्यगधश्चोर्ध्वं वा याति वियत्युह्यमानेव ॥७॥

तारा हस्तं हस्तप्रमाणं दीर्घा। शुक्ला श्वेतवर्णा। ताम्रा वा लोहितवर्णा। अब्जतन्तुरूपा पद्मसूत्रसदृशी। अतिसूक्ष्मेत्यर्थः। सा च वियत्याकाशे उह्यमाने-वाकृष्यमाणेव तिर्यगधश्चोर्ध्वं वा याति गच्छति। तथा च—

तारा तु हस्तमात्रा यात्यूर्ध्वमधः स्थिता सिता ताम्रा ॥इति॥७॥

अथोल्कालक्षणमाह—

उल्का शिरसि विशाला निपतन्ती वर्धते प्रतनुपुच्छा ।
दीर्घा च भवति पुरुषं भेदा बहवो भवन्त्यस्याः ॥८॥

उल्का शिरसि मूर्धनि विशाला विस्तीर्णा निपतन्ती वर्धते। यथा यथा निपतति तथा तथा वृद्धिं याति। प्रतनुपुच्छा सूक्ष्मलाङ्गूला। दीर्घा चाऽऽयामिनी पुरुषप्रमाणा भवति। हस्तत्रयं सार्द्धमित्यर्थः। अस्या उल्काया बहवो भेदा भवन्ति। प्रभूता भेदा इत्यर्थः। तथा च—

उल्काग्रतो विशाला बहुप्रकारा पुरुषमात्रा ॥इति॥८॥

अथ के ते भेदा इत्याह—

प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः ।
गोधाहिधूमरूपाः पापा या चोभयशिरस्का ॥९॥

प्रेतः शवः। प्रहरणं खड्गादि। खरो गर्दभः। करभ उष्ट्रः। नक्रो जल-प्राणी। कपिर्वानरः। दंष्ट्रिणो वराहादयः। लाङ्गलं हलम्। मृग आरण्यप्राणी।

एषां सदृश्यः। तथा गोधा प्राणिविशेषः। अहिः सर्पः। धूमः प्रसिद्धः। एषां सदृशरूपाः। एताः सर्वाः पापाः। अनिष्टफला इत्यर्थः। या चोभयशिरस्का द्विशीर्षा सापि पापैव ॥९॥

पुनरप्याह—

ध्वजझषगिरिकरिकमलेन्दुतुरगसन्तप्तरजतहंसाभाः।
श्रीवृक्षवज्रशङ्खस्वस्तिकरूपाः शिवसुभिक्षाः ॥१०॥

एवंविधाः सर्वाः शिवसुभिक्षाः, शिवं श्रेयः सुभिक्षं च कुर्वन्ति। कीदृश्यः? ध्वजः पताकाकृतिर्बहुपटविरचितः। झषो मीनः। गिरिः पर्वतः। करी हस्ती। कमलं पद्मम्। इन्दुश्चन्द्रः। तुरगोऽश्वः। सन्तप्तरजतं गलितरौप्यम्। हंसः पक्षी। एतदाभाः एषां सदृश्यः। तथा श्रीवृक्षः प्रसिद्धः। वज्रं हीरकं वज्रमायुधं वा। शङ्खः प्रसिद्धः। स्वस्तिकः संस्थानविशेषः। एवंविधाश्चापि शिवसुभिक्षाः। तथा च काश्यपः—

नरेभतुरगाश्वाश्मवृक्षेषु च पतेत् सदा।
ज्वलन्ती चक्रवद् दृश्या त्वशनी रावसंयुता॥
विद्युत्त्रासकरी भीमा शब्दयन्ती तटत्तटा।
बृहच्छीर्षाऽतिसूक्ष्मा[1] च जीवेषु च पतेत्सदा॥
धनूंषि दश या दृश्या सा च धिष्ण्या प्रकीर्तिता।
ज्वलिताङ्गारसदृशी द्वौ हस्तौ सा प्रमाणतः॥
पद्मताम्राकृतिश्चैव हस्तमात्रायता गता।
तिर्यगूर्ध्वमधो याति सोह्यमानेव तारका॥
उल्का मूर्धनि विस्तीर्णा पतन्ती वर्धते तु सा।
तनुपुच्छा नृमात्रा तु बहुभेदसमावृता॥
आयुधप्रेतसदृशी जम्बुकोष्ट्रखराकृतिः।
धूम्रवर्णा तु पापाख्या विशीर्णा या तु मध्यमा॥
ध्वजपद्मेभहंसाभा पर्वताश्वसमप्रभा।
श्रीवृक्षशङ्खसदृशी या चोल्का सा शिवप्रदा॥इति॥१०॥

अन्यदपि लक्षणमाह—

अम्बरमध्याद् बह्व्यो निपतन्त्यो राजराष्ट्रनाशाय।
बम्भ्रमती गगनोपरि विभ्रममाख्याति लोकस्य ॥११॥

---

१. तु सूक्ष्माङ्गी इति अ. क. पु. पाठः।

अम्बरमध्यान्नभोऽन्तः। बह्वयः प्रभूता अपि निपतन्त्यः संपतमाना राज्ञो नृपस्य राष्ट्रस्य जनपदस्य च नाशाय भवन्ति। तथा च गगनोपरि आकाशे योल्का बम्भ्रमती अत्यर्थं भ्रमति सा लोकस्य जनपदस्य विभ्रमं सम्भ्रममाकुलतामाख्याति कथयति ॥११॥

अन्यदप्याह—

संस्पृशती चन्द्रार्कौ तद्विसृता वा सभूप्रकम्पा च।
परचक्रागमनृपभयदुर्भिक्षावृष्टिभयजननी ॥१२॥

योल्का चन्द्रार्कौ शशिसूर्यौ संस्पृशती। तौ संस्पृशति। तद्विसृता वा ताभ्यां चन्द्रार्काभ्यां विसृता निर्गता। सभूप्रकम्पा च भूकम्पसहिता। तस्याः पतमानाया भूकम्पमुत्पद्यते। सा तथाभूता परचक्रागमं परचक्रस्यागमनम्। नृपभयं राजभयम्। दुर्भिक्षभयम्। अवृष्टिभयं च जनयत्युत्पादयति ॥१२॥

अन्यदप्याह—

पौरेतरघ्नमुल्कापसव्यकरणं दिवाकरहिमांश्वोः।
उल्का शुभदा पुरतो दिवाकरविनिःसृता यातुः ॥१३॥

दिवाकरहिमांश्वोरर्कचन्द्रयोः। उल्कापसव्यकरणम्। तयोरेवापसव्येन प्रदक्षिणेन गमनं करोति। तत्पौरेतरघ्नम्, दिवाकरस्यापसव्यकरणं पौरघ्नं पौरान्नागरान् हन्ति। हिमांशोरुल्कापसव्यकरणमितरघ्नम्, इतरे यायिनस्तान् हन्ति। या च दिवाकरविनिःसृता दिवाकरात्सूर्यान्निर्गता सा यातुर्जिगमिषोः पुरतोऽग्रतः पतिता शुभदा शुभं ददाति ॥१३॥

अन्यदप्याह—

शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णघ्नी।
क्रमशश्चैतान् हन्युर्मूर्धोरःपार्श्वपुच्छस्थाः ॥१४॥

शुक्लाद्या उल्का। क्रमशः परिपाट्या द्विजादिवर्णघ्नी द्विजाद्यान् ब्राह्मणाद्यान् वर्णांश्चतुरो हन्ति घातयति। तद्यथा—शुक्ला ब्राह्मणान् हन्ति। रक्ता क्षत्रियान्। पीता वैश्यान्। कृष्णा शूद्रान् इति। तथा मूर्धोरःपार्श्वपुच्छस्था उल्का एतानेव हन्युः। मूर्ध्ना तिष्ठतीति मूर्धस्था। शिरसा या पतति सा ब्राह्मणान् हन्ति। एवमुरसा तिष्ठतीति उरःस्था वक्षःस्था। या पतति सा क्षत्रियान्। पार्श्वाभ्यां तिष्ठतीति पार्श्वस्था सा वैश्यान्। पुच्छेन तिष्ठतीति पुच्छस्था सा शूद्रान् हन्ति ॥१४॥

अन्यदप्याह—

उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा।
ऋज्वी स्निग्धाखण्डा नीचोपगता च तद्वृद्धयै॥१५॥

उत्तरदिगादिपतिता रूक्षा विप्रादीनां ब्राह्मणादीनां वर्णानामनिष्टदा अशुभदा। उत्तरस्यां पतति सा ब्राह्मणानाम्। पूर्वस्यां क्षत्रियाणाम्। दक्षिणस्यां वैश्यानाम्। पश्चिमायां शूद्राणामिति। तथा ऋज्वी या स्पष्टा स्निग्धा निर्मला अखण्डाऽशकला नीचोपगता नभसोऽधोगामिनी। सा तद्वृद्धयै, तेषामेव ब्राह्मणादीनामुत्तरदिगादिपतिता वृद्धयै वृद्धये भवति॥१५॥

अन्यदप्याह—

श्यावारुणनीलासृग्दहनासितभस्मसन्निभा रूक्षा।
सन्ध्यादिनजा वक्रा दलिता च परागमभयाय॥१६॥

श्यावा श्यामवर्णा। अरुणा रक्ता। नीला नीलवर्णा। असृग्रुधिरं तद्वर्णा। दहनसन्निभा अग्निवर्णा। असितसन्निभा कृष्णा। भस्मसन्निभा भस्मवर्णा। रूक्षा अनिर्मला। सन्ध्यादिनजा सन्ध्याया दिने च जाता। वक्रा कुटिला। दलिता खण्डिता। एवंविधा परागमभयाय भवति। पराणां शत्रूणामागमाद्यद् भयं तत् करोति॥१६॥

अन्यदप्याह—

नक्षत्रग्रहघातैस्तद्भक्तीनां क्षयाय निर्दिष्टा।
उदये घ्नती रवीन्दू पौरेतरमृत्यवेऽस्ते वा॥१७॥

नक्षत्रोपघातैर्ग्रहोपघातैश्च तद्भक्तीनां नक्षत्राणां नक्षत्रव्यूहे ग्रहाणां च या भक्तय उक्तास्तासां क्षयाय विनाशाय निर्दिष्टा कथिता उक्ता। तथा च काश्यपः—

नक्षत्राणि ग्रहाश्चैव यद्युल्काध्वस्तधूमिताः।
तद्देशनाथनाशाय लोकानां सम्भ्रमाय च॥

तथा च समाससंहितायाम्—

उदगादिषु विप्रादीन् सितलोहितकृष्णवर्णांश्च।
घ्नन्ति ग्रहर्क्षघातैस्तद्भक्तीनां च नाशाय॥

रवीन्दू सूर्याचन्द्रमसौ उदये उदयसमये अस्ते अस्तसमये वा घ्नती पौरेतराणां मृत्यवे भवति। पौरा नागराः। इतरे यायिनः। आदित्ये हते पौराणां चन्द्रे च यायिनामिति॥१७॥

अथ नक्षत्रोपतापेन फलमाह—

भाग्यादित्यधनिष्ठामूलेषूल्काहतेषु युवतीनाम्।
विप्रक्षत्रियपीडा पुष्यानिलविष्णुदेवेषु ॥१८॥
ध्रुवसौम्येषु नृपाणामुग्रेषु सदारुणेषु चौराणाम्।
क्षिप्रेषु कलाविदुषां पीडा साधारणे च हते ॥१९॥

भाग्यं पूर्वफल्गुनी। आदित्यं पुनर्वसुः। धनिष्ठा। मूलम्। एतेषु नक्षत्रेषूल्काहतेषूल्कया ताडितेषु। एतेषां योगतारा यद्युल्काहता भवति तदा युवतीनां स्त्रीणां पीडा भवति। तथा पुष्यः। अनिलः स्वातिः। विष्णुदेवः श्रवणम्। एतेषूल्काहतेषु विप्राणां क्षत्रियाणां च पीडा भवति॥

रोहिण्युत्तराक्ष्यं ध्रुवाणि। मृगशिरश्चित्रानुराधा रेवतीति सौम्यानि मृदूनीत्यर्थः। एतेषूल्काहतेषु नृपाणां राज्ञां पीडा भवति। पूर्वात्रयं भरणी मघा च उग्राणि। आर्द्राश्लेषाज्येष्ठामूलानि दारुणानि। एतेषूल्काहतेषु चौराणां तस्कराणां पीडा भवति। अश्विनी तिष्यं हस्तोऽभिजिदिति क्षिप्राणि कृत्तिका विशाखा साधारणं तेषूल्काहतेषु कलाविदुषां कलाविषये गीतनृत्यचित्रवाद्ये ये पण्डितास्तेषां पीडा भवति॥१८-१९॥

अन्यदप्याह—

कुर्वन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम्।
शक्रोपरि नृपतीनां गृहेषु तत्स्वामिनां पीडाम् ॥२०॥
आशाग्रहोपघाते तद्दृश्यानां खले कृषिरतानाम्।
चैत्यतरौ सम्पतिता सत्कृतपीडां करोत्युल्का ॥२१॥
द्वारि पुरस्य पुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः।
ब्रह्मायतने विप्रान् विनिहन्याद् गोमिनो गोष्ठे ॥२२॥

कुर्वन्त्येता इति। एता उल्का देवप्रतिमासु सुरार्चासु पतिता राजभयं नृपभयं राष्ट्रभयं जनपदभयं च कुर्वन्ति। शक्र इन्द्रस्तस्योपरि पतिता नृपतीनां राज्ञां भयं कुर्वन्ति। गृहेषु वेश्मसु पतितास्तत्स्वामिनां गृहपतीनां पीडां कुर्वन्ति॥

आशा दिशः। ग्रहाः सूर्यादयः। आशाग्रहा दिक्पतयो ग्रहाः। ते च—"प्रागाद्या रविशुक्ललोहिततमःसौरेन्दुवित्सूरयः" इत्युक्तास्तेषामुपघाते उल्का-

---

१. बृहज्जातके २ अध्यायस्य ५ श्लोकः।

पीडने तद्देश्यानां तद्दिग्निवासिनां तस्यां दिशि ये जना निवसन्ति तेषां पीडां कुर्वन्ति। अथवा आशा दिशस्तासां यान्ति तद्देश्यानां ग्रहदेशनिवासिनाम्। खले कृषिरतानाम्। खलमुलूखा यत्र धान्यं स्थाप्यते तदुपघाते कृषिरतानां कृषिजीविनां पीडा भवति। चैत्यतरुः प्रधानवृक्षः। तत्र पतितोल्का सत्कृतानां पूजितानां पीडां करोति॥

पुरस्य द्वारि पतिता पुरक्षयं पुरविनाशं करोति। अथेन्द्रकीले द्वारार्गले पतिता तदा जनानां क्षयोऽभिहित उक्तः। जननाशो भवति। ब्रह्मायतने पितामहो यत्र देवस्तत्र पतिता विप्रान् ब्राह्मणान् विनिहन्याद् घातयेत्। गोष्ठे गोस्थाने यत्र गावो निवसन्ति तत्र पतिता गोमिनो गावो येषां सन्ति तान् विनिहन्यान्नाशयेदिति ॥२०-२२॥

अथान्यद्विशेषमाह—

क्ष्वेडास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्ति यदा।
उल्कानिपातसमये भयाय राष्ट्रस्य सनृपस्य॥२३॥

क्ष्वेडा क्ष्वेडितम्। आस्फोटितं करास्फोटः। वक्षःस्थस्य बाहोर्द्वितीयेन हस्तेन ताडनं करास्फोटः। वादितं वाद्यशब्दः। गीतं प्रसिद्धम्। एषामुत्क्रुष्टा उद्घोषिताः स्वनाः शब्दा यदा भवन्ति, कदा? उल्कानिपातसमये, उल्कानिपातकाले, तदा राष्ट्रस्य सनृपस्य नृपतिसहितस्य भयाय भवन्ति॥२३॥

अन्यदप्याह—

यस्याश्चिरं तिष्ठति खेऽनुषङ्गो
दण्डाकृतिः सा नृपतेर्भयाय।
या चोह्यते तन्तुधृतेव खस्था
या वा महेन्द्रध्वजतुल्यरूपा॥२४॥

यस्या उल्कायाः खे नभसि। चिरं चिरकालम्। अनुषङ्ग आसक्तिस्तिष्ठति। तथा दण्डाकृतिर्दण्डाकारा च या दृश्यते सा नृपते राज्ञो भयाय भवति। या चोल्का खस्था आकाशस्थिता तन्तुधृतेव, तन्तुना ध्रियमाणेनेवोह्यते धार्यते सापि नृपतेर्भयाय भवति। या च महेन्द्रध्वजस्येन्द्रचिह्नस्य तुल्यरूपा तदाकारा सापि नृपतेर्भयाय भवति॥२४॥

अन्यदप्याह—

श्रेष्ठिनः प्रतीपगा तिर्यगा नृपाङ्गनानाम्।
हन्त्यधोमुखी नृपान् ब्राह्मणानथोर्ध्वगा॥२५॥

बर्हिपुच्छरूपिणी लोकसंक्षयावहा।
सर्पवत् प्रसर्पती योषितामनिष्टदा ॥२६॥
हन्ति मण्डला पुरं छत्रवत् पुरोहितम्।
वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥२७॥
व्यालसूकरोपमा विस्फुलिङ्गमालिनी।
खण्डशोऽथवा गता सस्वना च पापदा ॥२८॥

या प्रतीपगा यत आगता तत्रैव गता सा श्रेष्ठिनो हन्ति। तिर्यगा तिर्यक्कृत्वा या गता सा नृपाङ्गनां नृपस्त्रियं हन्ति। अधोमुखी अवाग्वदना नृपान् राज्ञो हन्ति। अथानन्तरमूर्ध्वगा ऊर्ध्वगामिनी ब्राह्मणान् द्विजान् हन्ति॥

या चोल्का बर्हिपुच्छरूपिणी मयूरपुच्छाकारा सा लोकसंक्षयावहा, लोकानां जनानां संक्षयं विनाशमावहति करोति। या च सर्पवत् प्रसर्पती उरगवद् गच्छन्ती सा योषितां स्त्रीणामनिष्टदा अशुभप्रदा॥

या च पतिता मण्डलाकारा भवति सा पुरं नगरं हन्ति नाशयति। या च छत्रवच्छत्राकारा दृश्यते सा पुरोहितमाचार्यं हन्ति। या च वंशगुल्मवत् स्थिता वंशगुल्माकारा सा राष्ट्रस्य दोषकारिणी भवति॥

व्यालः सर्पः। सूकरो वराहः। तदुपमा तत्सदृशी। तथा विस्फुलिङ्गानामग्निकणानां माला विद्यते यस्याः। अग्निकणैर्व्याप्तेत्यर्थः। अथवा खण्डशो गता बहुविधं विशीर्णा सस्वना सशब्दा या च सा पापदा अशुभफलदा भवति॥२५-२८॥

अन्यदप्याह—

सुरपतिचापप्रतिमा राज्यं नभसि विलीना जलदान् हन्ति।
पवनविलोमा कुटिलं याता न भवति शस्ता विनिवृत्ता वा ॥२९॥

या चोल्का सुरपतिचापप्रतिमा इन्द्रधनुःसदृशी सा राज्यं निहन्ति नाशयति। या च नभस्याकाशे विलीना उत्पन्ना सती तत्रैवादर्शनं गता सा जलदान् मेघान् हन्ति। या च पवनविलोमा सम्मुखवाता कुटिलं याता वक्रं कृत्वा गता सा शस्ता न भवति। विनिवृत्ता वा उत्पन्ना सत्यधो न गता सा न शस्तेति न प्रशस्ता भवति॥२९॥

अत्रापि विशेषमाह—

अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य।
निपतति च यया दिशा प्रदीप्ता जयति रिपूनचिरात्तया प्रयातः ॥३०॥

यतो यस्यां दिशि पुरं बलं वा अभिभवति तत एव तस्यामेव दिशि पार्थिवस्य राज्ञो भयं भीतिर्भवति। यया च दिशा प्रदीप्ता समुज्ज्वलिता निपतति तया प्रयातो गतो राजा अचिराच्छीघ्रमेव रिपूनरीन् जयति। तथा च काश्यपः—

पार्थिवे प्रस्थिते दीप्ता पतत्युल्का महास्वना।
तां दिशं सिद्धचते सिद्धिं विजयं लभते चिरात्॥

अत्र च तात्कालिकलग्नग्रहसंयोगाच्छकुनिरुतश्रवणाच्च फलमूह्यम्।
तथा च समाससंहितायाम्—

क्रूरग्रहर्क्षलग्नक्षणतिथिकरणप्रभञ्जनैर्दीप्तैः।
दीप्ताण्डजमृगविरुतैर्निर्घातक्षितिविमर्दैश्च ॥इति॥३०॥

इति श्रीभट्टोत्पलविरचितायां संहितावृतावुल्का-
लक्षणं नाम त्रयस्त्रिंशोऽध्यायः॥३३॥

अथ परिवेषलक्षणं व्याख्यायते।

तत्रादावेव स्वरूपप्रदर्शनार्थमाह—

सम्मूर्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः।
नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः॥१॥

रवीन्द्वोरर्कचन्द्रयोः किरणा रश्मयः पवनेन वायुना मण्डलीभूता वृत्ताकाराः कृतास्ते च तन्वभ्रे स्वल्पमेघे व्योम्नि आकाशे सम्मूर्छिताः प्रतिफलिता नानावर्णाकृतयो दृश्यन्ते। नानाप्रकारो विचित्रो वर्ण आकृतिः संस्थानं येषां ते परिवेषा इत्युच्यन्ते॥१॥

अथ तेषां संज्ञान्तराण्याह—

ते रक्तनीलपाण्डुरकापोताभ्राभशबलहरितशुक्लाः।
इन्द्रयमवरुणनिर्ऋतिश्वसनेशपितामहाम्बुकृताः॥२॥

ते परिवेषा रक्तादिवर्णा यथासंख्यमिन्द्रादिकृता भवन्ति। तद्यथा—रक्तवर्णः परिवेष इन्द्रकृतः। नीलवर्णो यमकृतः। पाण्डुर ईषच्छुक्लो वरुणकृतः। कापोतः कपोतवर्णो निर्ऋतिकृतः। अभ्राभो मेघाभः कृष्णवर्णः श्वसनकृतो वायुनोत्पादित इत्यर्थः। शबलः कृष्णश्वेतशारवर्ण ईशकृतः शम्भुकृतः। हरितो नीलपीतः पितामहकृतो ब्रह्मकृतः। शुक्लः श्वेतवर्णोऽम्बुकृतः सोऽपि वरुणकृत एव॥२॥

अन्यदप्याह—

धनदः करोति मेचकमन्योन्यगुणाश्रयेण चाप्यन्ये।
प्रविलीयते मुहुर्मुहुरल्पफलः सोऽपि वायुकृतः ॥३॥

धनदो वैश्रवणो मेचकं मयूरकण्ठसदृशवर्णं परिवेषं करोति। अन्ये इन्द्रादयोऽन्योन्यगुणाश्रयेण रक्ताद्या ये गुणा उक्तास्तेषां गुणानामन्योन्यं परस्परं समाश्रयेण कुर्वन्ति। अतोऽपि बहुवर्णता दृश्यते। यः पुनर्मुहुर्मुहुः प्रतिक्षणं प्रविलीयते नश्यति सोऽपि परिवेषो वायुकृतोऽनिलोत्पादितोऽल्पफलदश्च भवति। तथा च काश्यपः—

सितपीतेन्द्रनीलाभा रक्तकापोतबभ्रवः।
शबला बर्हिवर्णाश्च विज्ञेयास्ते शुभप्रदाः॥
ऐन्द्रयाम्याप्यनैर्ऋत्यवारुणाः सौम्यवह्निजाः।
दृश्यादृश्येन भावेन वायव्यः सोऽपि कष्टदः॥इति ॥३॥

अथ वस्तुवशेन शुभफलमाह—

चाषशिखिरजततैलक्षीरजलाभः स्वकालसम्भूतः।
अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः ॥४॥

चाषः पक्षी। शिखी मयूरः। रजतं रूप्यम्। तैलं तिलतैलम्। क्षीरं गोक्षीरम्। जलं पानीयम्। एषां सदृशी आभा कान्तिर्यस्य सः। स्वकालसम्भूतः, स्वकाले शिशिरादिऋतुषट्सु सम्भूत उत्पन्नः। क्रमेण तुल्यवर्णः। एतदुक्तं भवति—चाषवर्णो नीलाभः शिशिरतौ शोभनः परिवेषः। मयूरवर्णो विचित्रो वसन्ते। रूप्यवर्णः शुक्लो ग्रीष्मे। तैलवर्णो वर्षासु। क्षीरवर्णः शरदि। जलाभो हेमन्त इति। एवं स्वकालसम्भूतः। तथा अविकलवृत्तोऽखण्डः परिवर्तुलः। स्निग्धो निर्मलः। एवंविधः परिवेषः शिवसुभिक्षकरः। शिवं श्रेयः सुभिक्षं च करोति। तथा च काश्यपः—

शिशिरे चाषवर्णश्च वसन्ते शिखिसन्निभः।
ग्रीष्मे रजतसङ्काशः प्रावृट्तैलसमप्रभः॥
गोक्षीरसदृशः शस्तः परिवेषः शरत्स्मृतः।
हेमन्ते जलसङ्काशः स्वकाले शुभदः स्मृतः॥इति ॥४॥

अन्यदप्याह—

सकलगगनानुचारी नैकाभः क्षतजसन्निभो रूक्षः।
असकलशकटशरासनशृङ्गाटकवत् स्थितः पापः॥५॥

सकलं समग्रं गगनमाकाशमनुचरति गच्छति सकलगगनानुचारी। उदयात् प्रभृत्यस्तं यावत्तिष्ठतीत्यर्थः। नैकाभो विविधकान्तिः। क्षतजसन्निभो रक्तवर्णः। रूक्षो निःस्नेहः। असकलः खण्डः। शकटं प्रसिद्धम्। शरासनं चापम्। शृङ्गाटकं त्र्यस्रम्। तद्वत्स्थितस्तदाकारः। पापोऽनिष्टफलदः ॥५॥

अन्यदप्याह—

शिखिगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे।
हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि ॥६॥

शिखिगलसमे मयूरकण्ठतुल्ये परिवेषे सत्यतिवर्षं प्रभूता वृष्टिर्भवति। बहुवर्णे नानारूपे नृपस्य राज्ञो वधः। धूम्रवर्णे कृष्णश्यावे भयं भीतिर्भवति। हरिचापनिभे इन्द्रधनुःसदृशे युद्धानि भवन्ति। अशोककुसुमप्रभेऽशोकपुष्पसदृशकान्तौ अतिलोहिते। चशब्दाद्युद्धान्येव भवन्ति ॥६॥

अन्यदप्याह—

वर्णेनैकेन यदा बहुलः स्निग्धः क्षुराभ्रकाकीर्णः।
स्वर्त्तौ सद्यो वर्षं करोति पीतश्च दीप्तार्कः ॥७॥

एकेन वर्णेन यदा युक्तो बहुलो घनः। स्निग्धः सस्नेहः। क्षुराभ्रकाकीर्णः क्षुराकारैरभ्रकैराकीर्णो व्याप्तस्तथाभूतः स्वर्तावात्मीयतौ दृष्टस्तस्मिन्नेवाहनि वृष्टिं करोति। एतदुक्तं भवति---चाषादिसदृशवर्णः शिशिरादिऋतुषु सम्भूत एकवर्णः क्षुराभ्रकाकीर्णः सद्यो वर्षं करोति। पीतः पीतवर्णो दीप्तस्तीक्ष्णश्चार्कः सूर्यो यस्मिन् सोऽपि चशब्दात् सद्यो वर्षं करोति ॥७॥

अन्यदप्याह—

दीप्तमृगविहङ्गरुतः कलुषः सन्ध्यात्रयोत्थितोऽतिमहान्।
भयकृत् तडिदुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण ॥८॥

दीप्तैः सूर्याभिमुखैर्मृगैरारण्यैर्विहङ्गैश्च पक्षिभी रुतः कृतः शब्दः। कलुषोऽनिर्मलः। सन्ध्यात्रयोत्थितो दिनस्य प्राङ्मध्यान्तसन्ध्यासूत्पन्नः। उदय-मध्याह्नास्तमयेषु दृश्यत इत्यर्थः। अतिमहानतिविस्तीर्णस्तथाभूतो भयकृद्भयं करोति। तथा च गर्गः —

उदयास्तमयोर्मध्ये सूर्याचन्द्रमसोर्द्वयोः।
परिवेषः प्रदृश्येत तद्राष्ट्रमवसीदति ॥

तडिदुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण। तडिद् विद्युत्। उल्का प्रसिद्धा।

आद्यग्रहणाद्दिव्यान्तरिक्षभौमा उत्पाताः। एतैस्तडिदुल्काद्युत्पातैर्हतो नृपं राजानं शस्त्रेण हन्ति घातयति ॥८॥

अन्यदप्याह—

प्रतिदिनमर्कहिमांश्वोरहर्निशं रक्तयोर्नरेन्द्रवधः।
परिविष्टयोरभीक्ष्णं लग्नास्तमयस्थयोस्तद्वत् ॥९॥

अर्क आदित्यः। हिमांशुश्चन्द्रः। तयोरर्कहिमांश्वोः प्रतिदिनमहर्निशमहोरात्रं रक्तयोर्लोहितवर्णयोः सूर्यो लोहितवर्णोऽह्नि चन्द्रो निशि यदि दृश्यते तदा नरेन्द्रवधो राज्ञो मरणं भवति। परिविष्टयोरभीक्ष्णं तथा लग्नास्तमयस्थयोः। लग्नग्रहणेनोदयकाल उच्यते। अर्कचन्द्रयोरुदयास्तमयस्थयोरभीक्ष्णं पुनः पुनः परिविष्टयोस्तद्वत्तेन प्रकारेण नरेन्द्रवध इत्यर्थः। तथा च गर्गः—

दिवा सूर्ये परीवेषो रात्रौ चन्द्रे यदा भवेत्।
एकस्मिंश्चेदहोरात्रे तदा नश्यति पार्थिवः॥
एतेन विधिना नित्यं सप्ताहं परिविष्यते।
सर्वभूतविनाशः स्यात्तस्मिन्नुत्पातदर्शने॥

अत्र केचिल्लग्नास्तनभःस्थयोरिति पठन्ति। नभःशब्देन मध्याह्नकाल[1] उच्यते। उदयमध्याह्नास्तमयेषु यदि दृश्यते तदा नरेन्द्रवधः। तथा च समाससंहितायाम्—

शृङ्गाटकचापविकारसन्निभः परुषमूर्तिरतिबहुलः।
सकलगगनानुचारी बहुवर्णश्चावलम्बी च॥
द्वित्रिगुणः खण्डो वा सन्ध्यात्रयमुत्थितो ग्रहच्छादी।
परिवेषः पापफलो ग्रहरोधी हन्ति तद्भक्तीः॥
स्निग्धो मधुघृतशिखिचाषपत्रनीलोत्पलाब्जरजतनिभः।
क्षेमसुभिक्षाय भवेत् परिवेषोऽर्कस्य शशिनो वा॥ इति॥९॥

अन्यदप्याह—

सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोपकरः।
त्रिप्रभृति शस्त्रकोपं युवराजभयं नगररोधम् ॥१०॥

द्वे मण्डले यस्यासौ द्विमण्डलः परिवेषः सेनापतेश्चमूनाथस्य भयं भीतिं करोति। नातिशस्त्रकोपकरः, अतिशस्त्रकोपं च न करोति; ईषत्करोतीत्यर्थः।

---

१. लग्नास्तनभःस्थयोरिति पाठान्तरम्।

त्रिप्रभृति शस्त्रकोपमिति, त्रिप्रभृतीनि मण्डलानि त्रीणि चत्वारि पञ्चधा शस्त्रकोपम्। युवराजोऽर्धभोगी राजा। युवराजस्य च भयम्। नगरस्य पुरस्य रोधं वेष्टनं च करोति। तथा च गर्गः—

द्विमण्डलपरीवेषः सेनापतिभयङ्करः।
युद्धे सुदारुणं कुर्याद् दृश्यते मण्डलैस्त्रिभिः ॥इति॥१०॥

अन्यद्विशेषमाह—

वृष्टिस्त्र्यहेण मासेन विग्रहो वा ग्रहेन्दुभनिरोधे।
होराजन्माधिपयोर्जन्मर्क्षे वांऽशुभो राज्ञः ॥११॥

ग्रहेन्दुभनिरोधे। ग्रहा भौमादयः। इन्दुश्चन्द्रः। भानि नक्षत्राणि। एषां निरोधे परिवेष्टने। एतदुक्तं भवति—चन्द्रपरिवेषमध्यगते ग्रहनक्षत्रे यदा भवतस्तदा त्र्यहेण दिनत्रयेण वृष्टिर्भवति। मासेन त्रिंशदहोरात्रेण वा विग्रहः कलहो भवति। तथा च गर्गः—

त्रीणि यत्रावरुध्येरन्नक्षत्रं चन्द्रमा ग्रहः।
त्र्यहेण वर्षतीन्द्रश्च मासाद्वा जायते भयम्॥

होराजन्माधिपयोरिति। राज्ञो नृपस्य होराजन्माधिपयोः, होराधिपो जन्मलग्नपः, जन्माधिपो राश्यधिपः, तयोस्तथा जन्मर्क्षे च जन्मनक्षत्रे निरुद्धे सति राज्ञो नृपस्याशुभः ॥११॥

ग्रहाणां परिवेषगतानां फलमाह—

परिवेषमण्डलगतो रवितनयः क्षुद्रधान्यनाशकरः।
जनयति च वातवृष्टिं स्थावरकृषिकृन्निहन्ता च ॥१२॥
भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्रभयम्।
जीवे परिवेषगते पुरोहितामात्यनृपपीडा ॥१३॥
मन्त्रिस्थावरलेखकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च।
शुक्रे यायिक्षत्रियराज्ञोपीडा प्रियं चान्नम् ॥१४॥
क्षुदनलमृत्युनराधिपशस्त्रेभ्यो जायते भयं केतौ।
परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयं च ॥१५॥

रवितनयः सौरः परिवेषमण्डलमध्यगतः क्षुद्रधान्यानां प्रियङ्ग्वादीनां नाशकरः। तथा वातवृष्टिं वातसंयुक्तां वृष्टिं जनयत्युत्पादयति। स्थावराणां वृक्षादीनां कृषिकराणां च निहन्ता नाशकरो भवति॥

भौम इति। भौमे परिवेषमध्यगते कुमाराणां तथा बलपतीनां चमूनाथानां सैन्यानां च विद्रव आकुलता, अग्निभयं शस्त्रभयं च भवति। जीवे बृहस्पतौ परिवेषमध्यगते पुरोहितस्याऽऽचार्यस्यामात्यानां मन्त्रिणां नृपाणां राज्ञां च पीडा भवति॥

चन्द्रजे बुधे परिविष्टे मन्त्रिणां सचिवानां स्थावराणां वृक्षादीनां लेखकानां लिपिकराणां च परिवृद्धिर्भवति। सुवृष्टिः शोभना वृष्टिश्च भवति। शुक्रे परिवेषमण्डलगते यायिनां जिगमिषूणां क्षत्रियाणां क्षत्रियजातीनां राज्ञ्या नृपमहिष्याश्च पीडा भवति। प्रियं चान्नम्। दुर्भिक्षं भवतीत्यर्थः॥

केतौ परिवेषमध्यगते क्षुद् दुर्भिक्षम्। अनलोऽग्निः। मृत्युर्मरणम्। नराधिपो राजा। शस्त्रमायुधम्। एभ्यो भयं भीतिर्जायते उत्पद्यते। राहौ परिविष्टे परिवेषमध्यगते गर्भाणां भयम्। व्याधिः। नृपभयं नृपस्य राज्ञो भयं च भवति। तथा च समाससंहितायाम्—

बलपपुरोहितनरपतिकृषिकृत्पीडा क्रमेण परिविष्टैः।
कुजगुरुसितार्कपुत्रैः सौम्येन तु मन्त्रिपरिवृद्धिः॥
केतोः शस्त्रोद्योगो राहाः परिवेषणेन रोगभयम्।
युद्धक्षुद्भयनृपतेर्नाशं व्याध्यादिभिः क्रमशः॥इति॥१२-१५॥

अथ द्व्यादिषु ग्रहेषु परिवेषमध्यगतेषु फलमाह—

युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयोर्ग्रहयोः।
दिवसकृतः शशिनो वा क्षुदवृष्टिभयं त्रिषु प्रोक्तम्॥१६॥
याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं मृत्योः।
प्रलयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु॥१७॥

दिवसकृत आदित्यस्य शशिनश्चन्द्रस्य वा द्वयोस्ताराग्रहयोः परिवेषाभ्यन्तरे स्थितयोर्युद्धानि संग्रामान्-विजानीयाद् विन्द्यात्। त्रिषु ग्रहेषु परिवेषमध्यगतेषु क्षुद् दुर्भिक्षभयम्। अवृष्टिभयं च प्रोक्तं कथितम्॥

यातीति। चतुर्षु ताराग्रहेषु परिवेषमण्डलमध्यगतेषु नरेन्द्रो राजा सामात्यपुरोहितः, अमात्या मन्त्रिणः, पुरोहित आचार्यस्तैः सहितो मृत्योर्वशं याति। म्रियत इत्यर्थः। पञ्चादिषु पञ्चसु षट्सु वा मण्डलस्थेषु परिवेषमध्यवर्तिषु जगतो विश्वस्य प्रलयं संहारमिव विद्धि जानीहि॥१६-१७॥

अधुना ताराग्रहाणां नक्षत्राणां वा पृथक्परिविष्टानां फलमाह—

ताराग्रहस्य कुर्यात् पृथगेव समुत्थितो नरेन्द्रवधम्।
नक्षत्राणामथवा यदि केतोर्नोदयो भवति॥१८॥

पृथक्ताराग्रहस्य भौमादेः। नक्षत्राणामश्विन्यादीनां वा परिवेषः समुत्थित उत्पन्नो नरेन्द्रस्य राज्ञो वधं मरणं कुर्यात्। अथवा विकल्पे। यदि केतूदयो न भवति तदैवम्। केतूदये तु पुनस्तत्फलमेव न ताराग्रहादिपरिवेषकृतम्। तथा च काश्यपः—

परिवेषाभ्यन्तरगौ द्वौ ग्रहौ यायिनागरौ।
युद्धं च भवति क्षिप्रं घोररूपं सुदारुणम्॥
मण्डलान्तरिताः पञ्च जगतः संक्षयावहाः।
अथ ताराग्रहस्यैव नक्षत्राणामथापि वा॥
परिवेषो यदा दृश्यस्तदा नरपतेर्वधः।
यदि केतूदयो न स्यादन्यथा तद्वदेत् फलम्॥इति॥१८॥

अधुना तिथिक्रमेण परिवेषफलान्याह—

विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु क्रमशः।
श्रेणीपुरकोशानां पञ्चम्यादिष्वशुभकारी॥१९॥
युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोषकरः।
पुररोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम्॥२०॥
नरपतिपत्नीपीडां परिवेषोऽभ्युत्थितश्चतुर्दश्याम्।
कुर्यात् तु पञ्चदश्यां पीडां मनुजाधिपस्यैव॥२१॥

क्रमशः क्रमेण प्रतिपदादिषु चतुर्षु दिवसेषु परिवेषा दृष्टो विप्रक्षत्रियविट्-शूद्रहा भवति। तद्यथा—प्रतिपदि दृष्टो विप्रान् हन्ति। द्वितीयायां क्षत्रियान् हन्ति। तृतीयायां वैश्यान्। चतुर्थ्यां शूद्रान् इति। श्रेणीपुरकोशानामिति, बहूनां समान-जातीयानां सङ्घः श्रेणी। पञ्चम्यां दृष्टः श्रेण्या अशुभकारी। षष्ठ्यां पुरस्य नगरस्य। सप्तम्यां कोशस्य गंजस्य॥

युवराजस्याष्टम्यामिति। अष्टम्यां दृष्टो युवराजस्य दोषकरः। पर-तोऽनन्तरं त्रिषु दिनेषु नवमीदशम्येकादशीषु पार्थिवस्य राज्ञो दोषकरो। न शुभः। द्वादश्यां पुररोधो नगरवेष्टनम्। त्रयोदश्यां सैन्यक्षोभ आकुलता॥

चतुर्दश्यामभ्युत्थित उत्पन्नः परिवेषो नरपते राज्ञः पत्न्याः पीडां करोति। पञ्चदश्यां मनुजाधिपस्य राज्ञः पीडां करोति॥१९-२१॥

अधुना परिवेषरेखावशेन शुभाशुभफलमाह—

नागरकाणामभ्यन्तरस्थिता यायिनां च बाह्यस्था।
परिवेषमध्यरेखा विज्ञेयाक्रन्दसाराणाम्॥२२॥

रक्तः श्यामो रूक्षश्च भवति येषां पराजयस्तेषाम्।
स्निग्धः श्वेतो द्युतिमान् येषां भागो जयस्तेषाम् ॥२३॥

परिवेषे वर्णत्रयेण रेखात्रयं दृश्यते प्रायेण। तत्र द्वे रेखे बहिर्वर्तिन्यावतिक्रम्य या स्थिता रेखा साऽभ्यन्तरस्थिता सा च [1]नागरकाणां नृपाणां शुभाशुभकरी ज्ञेया। तथा बाह्यस्था रेखा यायिनां जिगमिषूणां राज्ञाम्। परिवेषमध्यगता रेखा आक्रन्द-साराणां शुभाशुभकरी विज्ञेया॥

कथमित्याह—रक्त इति। येषां नागरकादीनां भागो रक्तोऽतिलोहितवर्णः, श्यामः कृष्णवर्णः, रूक्षोऽनिर्मलश्च तेषां पराजयो भवति। येषां भागः स्निग्धो निर्मलः, श्वेतः शुक्लवर्णः, द्युतिमान् दीप्तिमान्। तेषां जयो भवति॥२२-२३॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ परिवेषलक्षणं
नाम चतुस्त्रिंशोऽध्यायः॥३४॥

अथेन्द्रायुधलक्षणं व्याख्यायते।

तत्रादावेव तत्सम्भवप्रदर्शनार्थमाह—

सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे।
वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः॥१॥

सूर्यस्यादित्यस्य करा रश्मयः। साभ्रे समेघे वियत्याकाशे। पवनेन वायुना विघट्टिता रुद्धास्ते च धनुःसंस्थानाश्चापाकारा विविधवर्णा नानारूपा ये दृश्यन्ते तदिन्द्रधनुरिति लोके दृश्यते॥१॥

अत्रैव परमतं शुभाशुभं च फलमाह—

केचिदनन्तकुलोरगनिःश्वासोद्भूतमाहुराचार्याः।
तद्यायिनां नृपाणामभिमुखमजयावहं भवति॥२॥

केचिदाचार्याः काश्यपादयोऽनन्तकुले अनन्तस्य नागराजस्य कुले वंशे ये जाता उरगाः सर्पास्तेषां निःश्वास उच्छ्वसनं तदुद्भूतं तदुत्पन्नमाहुरुक्तवन्तः। तथा च काश्यपः—

---

१. नागरादीनां राज्ञां चर्चाऽस्य ग्रन्थस्य २९४-२९५ पृष्ठयोः। स्वराज्यस्थिता नागराः। कृतोद्यमा यायिनो जिगमिषवो वा। परं ये आक्रन्दयन्ति ते आक्रन्दा वाऽऽक्रन्दनमेव च सारत्वेन जानन्ति त आक्रन्दसारा इति त्रिविधा राजानः।

अनन्तकुलजाता ये पन्नगाः कामरूपिणः।
तेषां निःश्वाससम्भूतमिन्द्रचापं प्रचक्षते॥

तदिन्द्रधनुर्यायिनां नृपाणां राज्ञामभिमुखं सम्मुखमजयावहं पराजयदं भवति इति॥२॥

अन्यदप्याह—

अच्छिन्नमवनिगाढं द्युतिमत् स्निग्धं घनं विविधवर्णम्।
द्विरुदितमनुलोमं च प्रशस्तमम्भः प्रयच्छति च॥३॥

अच्छिन्नमखण्डम्। अवनिगाढं भूमौ लग्नम्। भूतलं भित्त्वेवोत्थितमित्यर्थः। द्युतिमदत्युज्ज्वलम्। स्निग्धमरूक्षं सुकान्तिमित्यर्थः। घनमविकलम्। विविधवर्णं नानाप्रकारै रक्तनीलसिताद्यैर्वर्णैर्युक्तम्। द्विरुदितं द्विधा स्थितम्। चकारः समुच्चये। न केवलमनन्तरोक्तप्रतिपादितलक्षणसंयुक्तम्। यावद् द्विरुदितमनुलोमं पश्चाद्व्यवस्थितम्। एवंविधं प्रशस्तमिष्टफलसूचकम्। अम्भः प्रयच्छति च पानीयं ददातीति।

अत्र केचित् शक्रचापस्यैवमनुलोमतां वर्णयन्ति। यथैकं दक्षिणदिक्स्थमपरं चोत्तरदिक्स्थं तयोर्यदा प्रतिलोमता तदा द्विरुदितस्यानिष्टं फलम्। यदा त्वेकदिगवस्थितौ तौ तदानुलोमौ। तत्रेष्टफलमिति। तथा च ऋषिपुत्र आह—

द्विरुत्तरमविच्छिन्नं स्निग्धमिन्द्रायुधं महत्।
पृष्ठतो विजयाय स्याद्विच्छिन्नं परुषं न तु॥

तथा च नन्दी आह—

बहुवर्णमविच्छिन्नं द्विरुन्नतं स्निग्धममरपतिचापम्।
पश्चात् पार्श्वे वापि प्रयाणकाले रिपुवधाय॥

तथा च बृहस्पतिः—

नीलताम्रमविच्छिन्नं द्विगुणं सिद्धमायतम्।
पृष्ठतः पार्श्वयोर्वापि जयायेन्द्रधनुर्भवेत्॥

तथा च [1]गर्गोक्तमयूरचित्रके पठ्यते—

पूर्वस्यां दिशि संग्रामे भवतीन्द्रधनुर्यदि।
पश्चिमे च प्रयातानां जयस्तत्र न संशयः॥

---

१. वपुस्तके वृद्धगर्गोक्तमयूरचित्रके इति पाठः।

येषां प्रवृत्ते संग्रामे पश्चादिन्द्रधनुर्भवेत्।
पूर्वेण तु प्रयातानां जयस्तत्र न संशयः॥
येषां प्रवृत्ते संग्रामे वामपार्श्वे च पृष्ठतः।
धनुः प्रादुर्भवेदैन्द्रं जयस्तेषां न संशयः॥
येषां प्रवृत्ते संग्रामे पुरस्ताद्दक्षिणेन वा।
धनुः प्रादुर्भवेदैन्द्रं वधं तेषां विनिर्दिशेत्॥
पश्चिमे तु दिशो भागे भवतीन्द्रधनुर्यदि।
समेघगगनं स्निग्धं वैदूर्यविमलद्युति॥
विद्युच्च निर्मला भाति पूर्वे वायुर्यदा भवेत्।
सप्तरात्रं महावर्षं निर्दिशेद्दैवचिन्तकः॥

यद्येवं तदा द्वितीयं व्याख्यानमशोभनं पूर्वमेव ज्यायः। पश्चात् स्थितमनुलोममिति॥३॥

अन्यदप्याह—

विदिगुद्भूतं दिक्स्वामिनाशनं व्यभ्रजं मरककारि।
पाटलपीतकनीलैः शस्त्राग्निक्षुत्कृता दोषाः॥४॥

विदिगुद्भूतं विदिक्स्थितमिन्द्रचापं दिक्स्वामिनाशनम्। तस्यां दिशि यः स्वामी स नश्यति। दिगधिपतीन् शाकुने वक्ष्यति—

राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः।
गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम्॥ इति।

एवं व्यभ्रजं मरककारि, विगताभ्रे गगने यदुत्पन्नमिन्द्रचापं तन्मरककारि मरकं करोति। पाटलो वर्णः कृष्णलोहितः। पीतकः पीतवर्णः। नीलो नीलवर्णः। एतैर्वर्णैर्यदि युक्तमिन्द्रधनुर्भवति तदा यथासङ्ख्येन शस्त्राग्निक्षुत्कृता दोषा भवन्ति। पाटलवर्णे शस्त्रकृता दोषाः। पीते अग्निकृता दोषाः। नीले क्षुत्कृता दुर्भिक्षजा इति॥४॥

अन्यदप्याह—

जलमध्येऽनावृष्टिर्भुवि सस्यवधस्तरौ स्थिते व्याधिः।
वाल्मीके शस्त्रभयं निशि सचिववधाय धनुरैन्द्रम्॥५॥

ऐन्द्रं धनुरिन्द्रचापं जलमध्ये यदा दृश्यते तदा अनावृष्टिरवर्षणं भवति।

---

१. बृहत्संहितायाम् ८६ अध्यायस्य ३४ श्लोकः।

भूवि भूमौ दृश्यते तदा सस्यानां वधो नाशो भवति। तरौ वृक्षे स्थिते इन्द्रचापे व्याधिः पीडा भवति। वाल्मीके वल्मीककृते मृत्स्तूपे। शस्त्रभयं भवति। निशि रात्राविन्द्रधनुः सचिवस्य मन्त्रिणो वधाय मरणाय भवति ॥५॥

अथ दिग्वशेन फलमाह—

वृष्टिं करोत्यवृष्टयां वृष्टिं वृष्टयां निवारयत्यैन्द्र्याम्।
पश्चात् सदैव वृष्टिं कुलिशभृतश्चापमाचष्टे ॥६॥

कुलिशभृत इन्द्रस्य चापमैन्द्र्यां पूर्वस्यां दिशि दृष्टमवृष्टयामनावृष्टयां वृष्टिं वर्षणं करोति, तत्रैव दृष्टं वृष्टयां वृष्टिं निवारयति। पश्चात् पश्चिमायां दिशि दृष्टं सदैव सर्वकालं वृष्टिं वर्षणमाचष्टे कथयति ॥६॥

अन्यदप्याह—

चापं मघोनः कुरुते निशाया-
माखण्डलायां दिशि भूपपीडाम्।
याम्यापरोदक्प्रभवं निहन्यात्
सेनापतिं नायकमन्त्रिणौ च ॥७॥

मघोन इन्द्रस्य चापं धनुः। आखण्डलायामैन्द्र्यां पूर्वस्यां दिशि निशायां रात्रौ दृष्टं भूपस्य राज्ञः पीडां रोगभयं करोति। याम्यापरोदक्प्रभवं यथासङ्ख्यं सेनापतिं नायकमन्त्रिणौ च निहन्यात्। याम्यायां दक्षिणस्यां सेनापतिम्। अपरस्यां पश्चिमायां नायकान् प्रधानपुरुषान्। उत्तरस्यां मन्त्रिणं सचिवं हन्यात्। तथा च काश्यपः—

अवृष्टौ वर्षणं कुर्यादैन्द्रीं दिशमुपाश्रितम्।
पश्चिमायां महद्वर्षं करोतीन्द्रधनुः सदा॥
रात्रौ चेद् दृश्यते पूर्वे भयं नरपतेर्भवेत्।
याम्यायां बलमुख्यश्च विनाशमभिगच्छति॥
पश्चिमायां प्रधानस्य सौम्यायां मन्त्रिणो वधः।
स्निग्धवर्णैर्घनैः शुभ्रैर्वारुण्यां दिशि दृश्यते॥
बहूदकं सुभिक्षं च शिवं सस्यप्रदं भवेत् ॥इति॥७॥

अन्यदप्याह—

निशि सुरचापं सितवर्णाद्यं जनयति पीडां द्विजपूर्वाणाम्।
भवति च यस्यां दिशि तद्देश्यं नरपतिमुख्यं नचिराद्धन्यात् ॥८॥

निशि रात्रौ सुरचापमिन्द्रधनुः सितवर्णाद्यं सितरक्तपीतकृष्णं द्विजपूर्वाणां ब्राह्मणप्रथमानां वर्णानां पीडां जनयत्युत्पादयति। तद्यथा—श्वेतवर्णो ब्राह्मणान् पीडयति। रक्तः क्षत्रियान्। पीतो वैश्यान्। कृष्णः शूद्रानिति। भवति च यस्यां दिशीति। यस्यां च दिशि आशायां भवति दृश्यते तद्देश्यं तद्देशभवं नरपतिमुख्यं नृपप्रधानं नंचिराच्छीघ्रं हन्यान्नाशयेत्। तस्यां दिशि यः प्रधाननृपस्तं विनाशयतीत्यर्थः ॥८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृताविन्द्रायुधलक्षणं
नाम पञ्चत्रिंशोऽध्यायः ॥३५॥

अथ गन्धर्वनगरलक्षणं व्याख्यायते।

तत्रादावेव दिग्वशेन तस्य फलप्रदर्शनार्थमाह—

उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम्।
सितरक्तपीतकृष्णं विप्रादीनामभावाय ॥१॥

खपुरं गन्धर्वनगरमुदगादिस्थितमुत्तराद्यासु दिक्षु दृष्टं यथाक्रमेण पुरोहितनृपबलपतियुवराजदोषदं भवति। उत्तरस्यां दिशि दृष्टं पुरोहित आचार्यस्तस्य दोषदमशुभप्रदम्। पूर्वस्यां नृपस्य राज्ञः। दक्षिणस्यां बलपतेश्चमूनाथस्य। पश्चिमायां युवराजस्य। तथा सितरक्तपीतकृष्णं यथासङ्ख्यं विप्रादीनां ब्राह्मणादीनामभावाय नाशाय भवति। सितं श्वेतवर्णं ब्राह्मणानाम्। रक्तं क्षत्रियाणाम्। पीतं वैश्यानाम्। कृष्णं शूद्राणामिति ॥१॥

अन्यदप्याह—

नागरनृपतिजयावहमुदग्विदिक्स्थं विवर्णनाशाय।
शान्ताशायां दृष्टं सतोरणं नृपतिविजयाय ॥२॥

उदगुत्तरस्यां दिशि दृष्टं खपुरं गन्धर्वनगरं नागराणां राज्ञां विजयावहं जयप्रदम्। विदिक्स्थं विदिक्षु स्थितं विवर्णानां सङ्करणां विनाशाय भवति। शान्ताशायाम्। तत्कालं या शान्ता दिक् तस्यां दृष्टं सतोरणं तोरणसहितं नृपते राज्ञो विजयाय भवति ॥२॥

अन्यदप्याह—

सर्वदिगुत्थं सततोत्थितं च भयदं नरेन्द्रराष्ट्राणाम्।
चौराटविकान् हन्याद् धूमानलशक्रचापाभम् ॥३॥

सर्वदिगुत्थं सर्वासु दिक्षु स्थितं सततोत्थितं च सर्वकालं समुत्पन्नं प्रत्यहं दृश्यते तन्नरेन्द्रस्य राज्ञो राष्ट्रस्य जनपदस्य च भयं भीतिं ददाति। धूमानलशक्रचापाभं धूमस्यानलस्याग्नेः शक्रचापस्येन्द्रधनुषः सदृशी आभा कान्तिर्यस्य तथाभूतम्। चौरास्तस्कराः। आटविका अटव्यां च ये वसन्ति। तान् हन्यान्नाशयेत् ॥३॥

अन्यदप्याह—

गन्धर्वनगरमुत्थितमापाण्डुरमशनिपातवातकरम्।
दीप्ते नरेन्द्रमृत्यूर्वामेऽरिभयं जयः सव्ये ॥४॥

गन्धर्वनगरं खपुरमुत्थितमुत्पन्नमापाण्डुरं पाण्डुरवर्णमशनिपातवातं करोति। दीप्तं दीप्तादिक्स्थे तस्मिन्नरेन्द्रस्य राज्ञो मृत्युर्मरणं भवति। दीप्तासु दिक्षु लक्षणं वक्ष्यत्याचार्यः शाकुने। तथा च—

[1]मुक्तप्राप्तैष्यदर्कासु फलं दिक्षु तथाविधम्।
अङ्गारदीप्तधूमिन्यस्ताश्च शान्तास्ततोऽपराः ॥इति॥

वामेऽरिभयम्। सैन्यस्य पुरस्य वा वामे भागे दृष्टमरिभयं शत्रुभयं करोति। सव्ये दक्षिणे जयप्रदं भवति ॥४॥

अन्यदप्याह—

अनेकवर्णाकृति खे प्रकाशते पुरं पताकाध्वजतोरणान्वितम्।
यदा तदा नागमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा ॥५॥

यदा यस्मिन् काले खे आकाशे पुरं गन्धर्वनगरम्। अनेकवर्णाकृति बहुवर्णचित्रसंस्थानं प्रकाशते दृश्यते। तच्च पताकाध्वजतोरणान्वितम्। पताकाभिर्वैजयन्तीभिर्ध्वजैश्चित्रैर्बहुपटविरचितैः, अथवा पताकाध्वजैस्तोरणैश्चान्वितं संयुक्तं तदा तस्मिन् काले। नागानां गजानाम्। मनुष्याणां पुरुषाणाम्। वाजिनामश्वानां च रणे संग्रामे। असृग् रुधिरम्। भूरि प्रभूतम्। वसुन्धरा भूः। पिबति। तथा च काश्यपः—

बहुवर्णं पताकाढयं गन्धर्वनगरं महत्।
दृष्टं प्रजाक्षयकरं संग्रामे लोमहर्षणम् ॥इति॥५॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ गन्धर्वपुरलक्षणं नाम षट्त्रिंशोऽध्यायः ॥३६॥

---

१. बृहत्संहितायाम् ८६ अध्यायस्य १२ श्लोकः।

अथ प्रतिसूर्यलक्षणं व्याख्यायते ।

तत्रादावेव वर्णलक्षणं शुभाशुभफलं चाह—

प्रतिसूर्यकः प्रशस्तो दिवसकृदृतुवर्णसप्रभः स्निग्धः।
वैदूर्यनिभः स्वच्छः शुक्लश्च क्षेमसौभिक्षः ॥१॥

प्रतिसूर्यको द्वितीयोऽर्कः स च दिवसकृत आदित्यस्य ऋतुवर्णसप्रभः आदित्यस्य ये ऋतुवर्णा [1]उक्तास्ताम्रः कपिलो वार्कः शिशिर इत्यादिकास्तेषां सदृशवर्णः। स्निग्धो निर्मलकान्तिश्च शस्तः प्रशस्तः। तथा वैदूर्यनिभो वैदूर्यमणेः सदृशकान्तिः। नीलपीत इत्यर्थः। स्वच्छो निर्मलः। शुक्लः श्वेतवर्णश्च। क्षेमसौभिक्षः, क्षेमं सौभिक्षं च करोति॥१॥

अन्यदप्याह—

पीतो व्याधिं जनयत्यशोकरूपश्च शस्त्रकोपाय।
प्रतिसूर्याणां माला दस्युभयातङ्कनृपहन्त्री ॥२॥

पीतः पीतवर्णः प्रतिसूर्यो व्याधिं जनयत्युत्पादयति। अशोकरूपोऽशोकपुष्पसदृशवर्णो लोहित इत्यर्थः। तथारूपः शस्त्रकोपाय भवति। शस्त्रकोपं करोति। प्रतिसूर्याणां माला पङ्क्तिर्यदि दृश्यते तदा दस्युभयातङ्कनृपहन्त्री भवति, दस्यवश्चौरास्तेभ्यो भयमातङ्कमुपद्रवं नृपं च राजानं हन्ति ॥२॥

अन्यदप्याह—

दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत्।
उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनहा ॥३॥

[2]इयमार्या अर्कचारे व्याख्याता। तथा च काश्यपः—

याम्ये वातप्रदो ज्ञेय उत्तरे वृद्धिदो रवेः।
उभयोः पार्श्वयोर्भाति सलिलं भूरि यच्छति॥

तथा च पराशरः—

दीप्ताग्निवर्णः कनकप्रभो वा सन्ध्यासु चेद्भास्करमावृणोति।
कम्पेत भूः खात् प्रपतेन्महाल्का नृपो विनश्येत् सहितः प्रजाभिः॥
सन्ध्यासमीपे यदि भास्करस्य दृश्येत माला प्रतिसूर्यकाणाम्।
सर्पा भवेयुः प्रचुराश्च चौरा रोगाश्च घोरा विविधप्रकाराः॥

---

१. ऋतुवर्णा आदित्यचारे वर्णिताः। द्रष्टव्यमस्य ग्रन्थस्य ८६ पृष्ठम्।
२. द्रष्टव्यमस्य ग्रन्थस्य ९२ पृष्ठम्।

प्रत्यर्कमिन्द्रायुधमत्स्यदण्डाः सविद्युदभ्राशनिवर्षवाताः।
भवन्त्यभीक्ष्णं दिनरात्रिसन्धौ भयं तदा भूमिपतेर्वधः स्यात् ॥इति॥३॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ प्रतिसूर्यलक्षणं नाम सप्तत्रिंशोऽध्यायः ॥३७॥

अथ निर्घातलक्षणं व्याख्यायते।

तत्रादावेव तदुत्पत्तिप्रदर्शनार्थमाह—

पवनः पवनाभिहतो गगनादवनौ यदा समापतति।
भवति तदा निर्घातः स च पापो दीप्तविहगरुतः ॥१॥

पवनो वायुः पवनेन परेण वायुनाऽभिहतः स मारुतो गगनादाकाशादवनौ भूमौ यदा समापतति तदा तस्याभिहतस्य पतमानस्य यः शब्दः स निर्घातो भवतीत्युच्यते। तथा च गर्गः—

यदान्तरिक्षे बलवान् मारुतो मारुताहतः।
पतत्यधः स निर्घातो भवेदनिलसम्भवः॥

स च पापो दीप्तविहगरुतः। स च निर्घातः शब्दो दीप्तैः सूर्याभिमुखैर्दीप्तस्वरैश्च विहगैः पक्षिभी रुतः कृतः शब्दः पापो भवति। दुष्टफलद इत्यर्थः ॥१॥

अथ वेलावशेन फलमाह—

अर्कोदयेऽधिकरणिकनृपधनियोधाङ्गनावणिग्वेश्याः।
आप्रहरांशेऽजाविकमुपहन्याच्छूद्रपौरांश्च ॥२॥
आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीडयति।
वैश्यजलदांस्तृतीये चौरान् प्रहरे चतुर्थे तु ॥३॥
अस्तं याते नीचान् प्रथमे यामे निहन्ति सस्यानि।
रात्रौ द्वितीययामे पिशाचसङ्घान् निपीडयति ॥४॥
तुरगकरिणस्तृतीये विनिहन्याद्यायिनश्चतुर्थे च।
भैरवजर्जरशब्दो याति यतस्तां दिशं हन्ति ॥५॥

अर्कोदये सूर्योदयकाले यदि निर्घात उत्पद्यते तदा अधिकरणिकाः। अधिकरणेन युक्तोऽधिकरणिकः। नृपो राजा। धनिन ईश्वराः। योधा युद्धकुशलाः। अङ्गनाः स्त्रियः। वणिजः क्रयविक्रयजीविनः। वेश्या बन्धक्यः। एतान् सर्वानेवोपहन्यान्नाशयेत्। दिनारम्भाद् घटिकाद्वयं यावत् सूर्योदयः॥

आप्रहरांश इति—सूर्योदयादारभ्य प्रहरं यावदाप्रहरांशम्। दिनचतुर्थभागे तस्मिन् प्रथमे दिनचतुर्भागे। अजाश्छागाः। आविका अविप्रकाराः। शद्राः शूद्रजातयः। पौराश्च पौरा जनाः। एतानुपहन्यात्॥

आमध्याह्नादिति—प्रहरादूर्ध्वं मध्याह्नं यावत्। राजोपसेविनो नृपाराधनतत्परान्। ब्राह्मणान् विप्रांश्च पीडयति उपतापयति। तृतीये प्रहरे वैश्या वैश्यजातीयास्तान्। जलदान् मेघांश्च पीडयति। चतुर्थे प्रहरे चौरांस्तस्करान् पीडयति॥

अस्तं यातेऽर्के यदि निर्घात उत्पद्यते तदा नीचानधर्मकर्मकरान्निहन्ति। रात्रेः प्रथमे यामे प्रहरे सस्यानि निहन्ति नाशयति। रात्रेर्द्वितीययामे पिशाचसंघान्। पिशाचा देवयोनयः, तत्समूहान् निपीडयति॥

रात्रेस्तृतीयप्रहरे तुरगानश्वान्। करिणो हस्तिनो विनिहन्यात्। चतुर्थे यामे यायिनो जिगमिषून् विनिहन्यात्। यतो यस्यां दिशि भैरवो विकृतो जर्जरो भिन्नभाण्डसमुद्भूतसदृशः शब्दः स्वरो याति गच्छति तां दिशमाशां हन्ति नाशयति। तथा च समाससंहितायाम्—

निर्घातोऽहोरात्रेण हन्ति नृपपौरभृत्यराष्ट्रजनान्।
तस्करविप्रांश्चार्कोदयाद्दिशं पतति यस्याम्॥

तथा च गर्गः—

यदा सूर्योदये प्राप्ते निर्घातः श्रूयते भुवि।
क्षत्रिया योधमुख्याश्च पीडयन्तेऽत्र न संशयः॥
प्रहरांशे तथा वैश्यान् हन्याद् गोजीविनस्तथा।
परिवृत्ते हरौ वैश्या अपराह्णे तु दस्यवः॥
नीचचौरांश्च हन्यात् स अस्तमेति दिवाकरे।
प्रथमे प्रहरे सस्यान्यर्द्धरात्रे तु राक्षसान्॥
रात्रित्रिभागे वैश्यांश्च प्रत्यूषे चाहितो भवेत्।
यां दिशं चाभिहन्येत निर्घातो भैरवः स्वनः॥
तद्देश्यान् हन्ति देशांश्च सर्वदिग्भक्तयस्तथा। इति॥२-५॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ निर्घातलक्षणं नामाष्टत्रिंशोऽध्यायः॥३८॥

अथ सस्यजातकं व्याख्यायते।

तत्रादावेवागमप्रदर्शनार्थमाह—

वृश्चिकवृषप्रवेशे भानोर्ये बादरायणेनोक्ताः।
ग्रीष्मशरत्सस्यानां सदसद्योगाः कृतास्त इमे ॥१॥

भानोरादित्यस्य वृश्चिकप्रवेशे ग्रीष्मसस्यानां यवादीनां वृषप्रवेशे शरत्सस्यानां धान्यादीनां बादरायणेनाचार्येण सदसद्योगाः शुभाशुभा ये योगा उक्ताः कथितास्त इमे सर्वे मयाऽत्र कृता इति। एतदुक्तं भवति—यत्र दिने रवेर्वृश्चिकसंक्रमणं भवति तत्र वृश्चिकमेव लग्नं परिकल्प्य वक्ष्यमाणविधिना ग्रीष्मसस्यानां जन्म विचारणीयम्। एवं वृषसंक्रमवेलायां वृषमेव लग्नं परिकल्प्य शरत्सस्यानां जन्म विचारणीयमिति ॥१॥

तदत्र योगप्रदर्शनार्थमाह—

भानोरलिप्रवेशे केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैः।
बलवद्भिः सौम्यैर्वा निरीक्षिते ग्रैष्मिकविवृद्धिः ॥२॥

भानोरादित्यस्यालिप्रवेशे वृश्चिकप्रवेशसमयेऽयं विचारः। केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैर्यो यत्रावधित्वेन निर्दिश्यते तस्माद्यानि केन्द्राणि लग्नचतुर्थसप्तमदशमानि तैः शुभग्रहाक्रान्तैः। शुभग्रहा बुधगुरुसिताः। अत्रावधित्वेन वृश्चिकप्रवेशावस्थितिः सवितुर्निर्दिष्टा। तस्मादादित्यात् केन्द्रैः शुभग्रहाक्रान्तैः सौम्यग्रहयुक्तैः। एतदुक्तं भवति—यदा सूर्यस्य वृश्चिकप्रवेशे केन्द्रस्थानानि शुभग्रहाक्रान्तानि भवन्ति तदा ग्रैष्मिकसस्यविवृद्धिर्भवति, विशेषेण वृद्धिर्विवृद्धिः। सुवृद्धिरित्यर्थः। बलवद्भिः सौम्यैर्वा निरीक्षिते। अथवा भानोः केन्द्रस्थानानि शुभग्रहाक्रान्तानि भवन्ति, बलवद्भिः सौम्यैः केन्द्रवर्जमन्यत्रावस्थितैर्भानौ निरीक्षिते दृष्टं ग्रैष्मिकविवृद्धिर्भवति। अत्र केन्द्रनिर्देशादनन्तरमेव दर्शनशब्दो निर्दिष्टः। तत्केन्द्रगतैरपि ग्रहैर्दृश्यत एव कस्मादाचार्येण दर्शननिर्देशेनैव केवलेन निर्देशः क्रियते। यदादित्यकेन्द्रावस्थितस्य ग्रहस्य कथं प्रदर्शनं घटत इत्युपगम्यापि ब्रूमः। यद्येवं तदा त्वेवं निर्देष्टुं युक्तम्। यथा बलवद्भिः सौम्यैर्दृष्टे भानौ युक्त इति, यस्मादाचार्यसुष्ठुसमासोक्तिप्रियः परिहारः। बलवद्भिः सौम्यैर्निरीक्षित इत्यस्माद्विकल्पादिदमवगम्यते यदा सौम्यैर्बलिभिरबलिभिर्वा केन्द्रस्थानानि युक्तानि भवन्ति तदा ग्रैष्मिकसस्यविवृद्धिर्भवति। यदा तु पुनस्त्रिकोणरिपुलाभगाः सौम्या बलिनः पश्यन्ति तदा ग्रैष्मिकस्य विवृद्धिर्भवति। मध्यबलैर्याप्यता। बलहीनैर्मनागपि सस्यानां वृद्धिर्भवति। तथा च बादरायणः—

वृश्चिकसंस्थे सूर्ये सौम्यैर्बलिभिर्निरीक्षिते वृद्धिम्।
तैरेव केन्द्रगैर्वा ग्रीष्मजधान्यस्य निर्दिशेन्महतीम् ॥इति॥२॥

अथ योगान्तरमाह—

अष्टमराशिगतेऽर्के गुरुशशिनोः कुम्भसिंहसंस्थितयोः।
सिंहघटसंस्थयोर्वा निष्पत्तिर्ग्रीष्मसस्यस्य ॥३॥

अर्के रवावष्टमराशिगते वृश्चिकस्थे इत्यर्थः। गुरुशशिनोर्जीवचन्द्रयोर्यथाक्रमं कुम्भसिंहसंस्थयोः। कुम्भे गुरुः शशी सिंहे। अथवा सिंहघटसंस्थयोः। गुरुः सिंहे शशी घटे। तथापि ग्रीष्मसस्यस्य निष्पत्तिर्वक्तव्येति ॥३॥

अथ योगान्तरमाह—

अर्कात् सिते द्वितीये बुधेऽथवा युगपदेव वा स्थितयोः।
व्ययगतयोरपि तद्वन्निष्पत्तिरतीव गुरुदृष्टया ॥४॥

अर्काद्रवेरलिस्थितात् सिते शुक्रे द्वितीये द्वितीयस्थानस्थे बुधेऽथवा द्वितीये। अथवा तयोर्बुधसितयोर्द्वयोरेव युगपद् द्वितीयस्थयोः। व्ययगतयोरपि। तद्वत्तेनैव प्रकारेण व्ययगतयोरादित्याद् द्वादशस्थाने स्थितयोः शुक्रे द्वादशगे बुधे वा द्वयोर्वा द्वादशस्थानस्थितयोः सस्यानां निष्पत्तिर्भवति। अतीव गुरुदृष्टया। बृहस्पतिर्यदाऽऽदित्यं पश्यति तदा अतीव सस्यानां निष्पत्तिर्भवति। तथा च बादरायणः—

सूर्याद् बुधे द्वितीये शुक्रे वा युगपदेव तयोः।
रिष्फगयोरप्येवं निष्पत्तिर्गुरुदृशाऽतीव ॥इति॥४॥

अन्यद्योगान्तरमाह—

शुभमध्येऽलिनि सूर्याद् गुरुशशिनोः सप्तमे परा सम्पत्।
अल्यादिस्थे सवितरि गुरौ द्वितीयेऽर्द्धनिष्पत्तिः ॥५॥

अलिनि वृश्चिके शुभमध्यस्थिते वृश्चिकात् सूर्ययुक्ताद् बुधशुक्रयोरेको द्वितीयस्थाने भवति, अन्यो द्वादशे। वा शुभमध्यगतो भवति। तथाभूतात् सूर्यादादित्याद् गुरुशशिनोर्बृहस्पतिचन्द्रयोः सप्तमस्थाने स्थितयोः परा प्रकृष्टा सम्पत् सस्यानां भवति। अल्यादिस्थ इति। अलिनि आदौ तिष्ठति अल्यादिस्थस्तस्मिन् सवितर्यादित्ये अल्यादिस्थे वृश्चिकप्रारम्भव्यवस्थिते गुरौ जीवे द्वितीयेऽर्द्धनिष्पत्तिः सस्यानां भवति। अर्द्धं निष्पद्यत इत्यर्थः ॥५॥

अन्यद्योगान्तरमाह—

लाभहिबुकार्थयुक्तैः सूर्यादलिगात् सितेन्दुशशिपुत्रैः।
सस्यस्य परा सम्पत् कर्मणि जीवे गवां चाग्र्या ॥६॥

सूर्यादादित्यादलिगाद् वृश्चिकस्थात् सितेन्दुशशिसुतैः शुक्रचन्द्रबुधैर्यथासङ्ख्यं लाभहिबुकार्थयुक्तैः। एकादशचतुर्थद्वितीयस्थैः। तत्रैतज्जातम्। एकादशगे शुक्रे चतुर्थे चन्द्रे द्वितीये बुधे सस्यस्य परा प्रकृष्टा सम्पद् भवति। अस्मिन्नेव योगे कर्मणि दशमस्थाने स्थिते जीवे गुरौ न केवलं सस्यस्य परा सम्पद् भवति, यावद् गवां चाग्र्य श्रेष्ठा सम्पद् भवति। क्षीरबाहुल्यमित्यर्थः ॥६॥

अन्यद्योगान्तरमाह—

कुम्भे गुरुर्गवि शशी सूर्योऽलिमुखे कुजार्कजौ मकरे।
निष्पत्तिरस्ति महती पश्चात् परचक्रभयरोगम् ॥७॥

रविवृश्चिकप्रवेशे कुम्भे गुरुर्जीवः स्थितो भवति। गवि वृषे शशी चन्द्रः। सूर्योऽर्कः। अलिमुखे वृश्चिकप्रारम्भे। कुजार्कजौ भौमसौरौ मकरे। एवंविधे योगे सस्यानां महती निष्पत्तिरस्ति विद्यते, किन्तु पश्चादनन्तरं परचक्रकृतं भयं रोगं च भवति ॥७॥

अन्यद्योगान्तरमाह—

मध्ये पापग्रहयोः सूर्यः सस्यं विनाशयत्यलिगः।
पापः सप्तमराशौ जातं जातं विनाशयति ॥८॥

सूर्यो रविरलिगो वृश्चिकस्थः। पापग्रहयोः शनैश्चराङ्गारकयोर्मध्ये स्थितः। एको द्वितीये द्वितीयो द्वादशे यद्यर्कात् भवतीत्यर्थः। तदा सस्यं विनाशयति। तथा वृश्चिकात् सप्तमराशौ स्थितः पापः सौरभौमयोरन्यतरस्तदा जातं सस्यं जातुमुत्पन्नमपि विनाशयति। तथा च बादरायणः—

क्रूरान्तस्थः सूर्यो वृश्चिकसंस्थो विनाशयति सस्यम्।
जातं जातं पापः सप्तमसंस्थो विनाशयति ॥इति॥८॥

अन्यद्योगान्तरमाह—

अर्थस्थाने क्रूरः सौम्यैरनिरीक्षितः प्रथमजातम्।
सस्यं निहन्ति पश्चादुप्तं निष्पादयेद् व्यक्तम् ॥९॥

वृश्चिकादर्थस्थाने द्वितीये क्रूरः पापग्रहो भौमसौरयोरन्यतरः स्थितः स च सौम्यैरनिरीक्षितो बुधजीवशुक्राणामन्यतमेनानिरीक्षितो न दृष्टः। प्रथमजातं पूर्वोत्पन्नं सस्यं निहन्ति नाशयति। तथा पश्चात् कनीयसमुप्तं तद्व्यक्तं समस्तं निष्पादयेत्। सम्भवतीत्यर्थः ॥९॥

जामित्रकेन्द्रसंस्थौ क्रूरौ सूर्यस्य वृश्चिकस्थस्य।
सस्यविपत्तिं कुरुतः सौम्यैर्दृष्टौ न सर्वत्र ॥१०॥

सूर्यस्यादित्यस्य वृश्चिकसंस्थस्य क्रूरौ पापग्रहौ भौमसौरौ जामित्रकेन्द्र संस्थौ। एको जामित्रे सप्तमस्थाने द्वितीयोऽन्यस्मिन् केन्द्रे लग्नचतुर्थदशमाना मन्यतमे स्थितः। तथाविधौ भौमसौरौ सस्यस्य विपत्तिं विनाशं कुरुतो विदधतः। तथा तावेव क्रूरौ तत्रस्थौ सौम्यैः शुभग्रहैर्दृष्टावालोकितौ न सर्वत्र सर्वस्मिन् देशे सस्यविपत्तिं कुरुतः। क्वचिदित्यर्थः।

नन्वत्र केन्द्रग्रहणेन सप्तमस्थानं गृहीतं भवति। तत्किमर्थं जामित्रग्रहण मिति? उच्यते—जामित्रग्रहणेनैतत्प्रतिपादयति। यथैकोऽवश्यमेव जामित्रे। अन्यो यस्मिंस्तस्मिन् केन्द्रे भवतीति तदा योग एषः। तथा च बादरायणः—

सूर्यात् सप्तमसंस्थः पापोऽयः केन्द्रगश्च हानिकरौ।
सौम्यग्रहसंदृष्टौ न तथा सर्वत्र निर्दिष्टौ ॥इति॥१०॥

अन्यद्योगान्तरमाह—

वृश्चिकसंस्थादर्कात् सप्तमषष्ठोपगौ यदा क्रूरौ।
भवति तदा निष्पत्तिः सस्यानामर्घपरिहानिः ॥११॥

अर्कादादित्याद्वृश्चिकसंस्थात् क्रूरौ पापौ भौमसौरौ यदा सप्तमषष्ठोपगौ। एकः सप्तमे परः षष्ठे भवति, तदा सस्यानां निष्पत्तिर्भवति। किन्त्वर्घस्य परिहानिः स्वल्पता। बहुमूल्येनाल्पं लभत इत्यर्थः ॥११॥

अथ शारदसस्यानामतिदेशार्थमाह—

विधिनानेनैव रविर्वृषप्रवेशे शरत्समुत्थानाम्।
विज्ञेयः सस्यानां नाशाय शिवाय वा तज्ज्ञैः ॥१२॥

अनेनैव निर्दिष्टेन विधिना वृश्चिकप्रवेशोक्तेन रविरादित्यो वृषप्रवेशे वृषसंक्रमणकाले शरत्समुत्थानां शरत्समुद्भूतानां सस्यानां नाशायाभावाय शिवाय निष्पत्तये वा तज्ज्ञैः पण्डितैः सस्यजातकज्ञैर्विज्ञेयो ज्ञातव्यः। तथा च बादरायणः—

य एव योगोऽभिहितो वृश्चिकस्थे दिवाकरे।
वृषेऽपि ते शारदानां चिन्तनीया यथार्थतः ॥इति॥१२॥

अधुना रविचारवशेन ग्रैष्मिकसस्यस्य सामर्घ्यं महर्घतां चाह—

त्रिषु मेषादिषु सूर्यः सौम्ययुतो वीक्षितोऽपि वा विचरन्।
ग्रैष्मिकधान्यं कुरुते समर्घमभयोपयोग्यं च॥१३॥

सूर्य आदित्यः। त्रिषु मेषादिषु मेषवृषमिथुनेषु सौम्यैः शुभग्रहैर्बुधगुरुशुक्रैर्युतः संयक्तो वीक्षितोऽवलोकितो वा विचरंस्तिष्ठन् ग्रैष्मिकं ग्रीष्मसम्भवं धान्यं समर्घं स्वल्पमूल्यं कुरुते। अभयोपयोग्यं च महार्घताऽभयोपयोग्यम्। अथवा उभयोपयोग्यमिह लोके परलोके चोपयुज्यते। इह लोके बन्धुवर्गस्य। धर्मार्थं परलोक इति॥१३॥

अथैवं शारदसस्यस्याप्याह—

कार्मुकमृगघटसंस्थः शारदसस्यस्य तद्वदेव रविः।
संग्रहकाले ज्ञेयो विपर्ययः क्रूरदृग्योगात्॥१४॥

रविरादित्यः। कार्मुकमृगघटसंस्थः। कार्मुकं धन्वी। मृगो मकरः। घटः कुम्भः। एतेषु स्थितः शारदसस्यस्य तद्वदेव ज्ञेयः। यथा त्रिषु मेषादिषु सूर्यः सौम्ययुतो वीक्षितो वा विचरन् ग्रैष्मिकधान्यं कुरुते। समर्घमभयोपयोग्यं चैवं कार्मुकमृगघटसंस्थः सूर्यः सौम्ययुक्तो वीक्षितोऽपि वा विचरन् शारदधान्यं कुरुते। समर्घमभयोपयोग्यं चेति। संग्रहकाले संग्रहणसमये क्रूरदृग्योगाद्विपर्ययो ज्ञेयः क्रूरग्रहदृष्टत्वाद्योगात् संयोगाच्च विपर्ययो विपरीतो विज्ञेयः। क्रूरावत्र भौमसौरौ। एतदुक्तं भवति—यदा मेषादिषु त्रिषु कार्मुकादिषु त्रिषु वा सूर्यः पापयुक्तः पापवीक्षितोऽपि वा विचरति तदा विपर्ययो महार्घताभयोपयोग्यत्वं च भवति। एतत्संग्रहकाले विक्रयकाले विपरीतः शोभनः। विपरीतयोगस्थे सूर्ये विक्रेयः कार्य इति॥१४॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ सस्यजातकं
नामैकोनचत्वारिंशोऽध्यायः॥३९॥

अथ द्रव्यनिश्चयाध्यायो व्याख्यायते।

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह—

ये येषां द्रव्याणामधिपतयो राशयः समुद्दिष्टाः।
मुनिभिः शुभाशुभार्थं तानागमतः प्रवक्ष्यामि॥१॥

---

१. मुभयोपयोग्यं चेति पाठान्तरम्।

येषां द्रव्याणां ये राशयो मेषादयोऽधिपतयो मुनिभिः काश्यपादिभिः समुद्दिष्टाः कथिताः। किमर्थं शुभाशुभार्थं सम्यर्घमहार्घज्ञानार्थं तान् राशीनागमत आगमात् प्रवक्ष्यामि कथयिष्यामीति ॥१॥

तत्र मेषस्य कानि द्रव्याण्येतदाह—

वस्त्राविककुतुपानां मसूरगोधूमरालकयवानाम्।
स्थलसम्भवौषधीनां कनकस्य च कीर्तितो मेषः ॥२॥

वस्त्राण्यम्बराणि। अवयः प्रसिद्धा एव। अवीनामिदमाविकं तत्सम्भूतमित्यर्थः। कुतुपं छागलोमतन्तुकृतं वस्त्रम्। मसूरगोधूमाः प्रसिद्धाः। रालको वृक्षनिर्यासः। यवाः प्रसिद्धाः। एतेषां सर्वेषाम्। तथा स्थलसम्भवौषधीनाम्, स्थले जलरहितायां भूमौ या ओषधयः सम्भवन्ति तासाम्। तथा कनकस्य सुवर्णस्य च मेषराशिरधिपतिः कीर्तित उक्तः। तथा च काश्यपः—

मेषे सुवर्णस्थलजा गोधूमाजाविकास्तथा।
ग्रहवर्णर्क्षसंयोगे शोभने सफलं भवेत् ॥इति॥२॥

अथ वृषमिथुनयोराह—

गवि वस्त्रकुसुमगोधूमशालियवमहिषसुरभितनयाः स्युः।
मिथुनेऽपि धान्यशारदवल्लीशालूककार्पासाः ॥३॥

वस्त्राण्यम्बराणि। कुसुमानि पुष्पाणि। गोधूमाः। शालयः षष्टिकादयः। यवाः। महिषाः। सुरभितनया बलीवर्दाः। एते गवि वृषे स्युर्भवेयुः।

मिथुनेऽपीति। धान्यानि प्रसिद्धानि। शारदं शरत्समुत्पन्नं यत्किञ्चिद् द्राक्षावल्यादि। शालूकं कुमुदकन्दम्। कार्पासाः प्रसिद्धाः। एते सर्व एव मिथुने। तथा च काश्यपः—

वृषे महिषगोवस्त्रशालयः पुष्पसम्भवाः।
मिथुने धान्यशालूकवल्यः कार्पासशारदम् ॥इति॥३॥

अथ कर्कटसिंहयोराह—

कर्किणि कोद्रवकदलीदूर्वाफलकन्दपत्रचोचानि।
सिंहे तुषधान्यरसाः सिंहादीनां त्वचः सगुडाः ॥४॥

काद्रवाः प्रसिद्धा। कदली रम्भा। दूर्वा शाद्वलम्। फलानि सर्वाणि जातीफलप्रभृतीनि। कन्दं प्रसिद्धम्। मूले बीजं यस्य तत्कन्दम्। पत्रं सुगन्धपत्रम्। चोचं पालेवतं नालिकेरं वा। एतानि सर्वाणि कर्किणि कर्कटे।

तुषधान्यानि प्रसिद्धानि। शालयः। रसा मधुराम्ललवणतिक्तकटुकषायाः षट्। सिंहादीनां प्राणिनां सिंहद्वीपिमार्जाराणां त्वचश्चर्माणि विचित्ररूपाणि। एते सगुडा गुडेन सहिताः सिंहे। तथा च काश्यपः—

कर्कटे फलदूर्वाश्च कोद्रवः कदला तथा।
सिंहे धान्यं सर्वरसाः सिंहादीनां त्वचो गुडाः ॥इति॥३॥

अथ कन्यातुलयोराह—

षष्ठेऽतसीकलायाः कुलत्थगोधूममुद्गनिष्पावाः।
सप्तमराशौ माषा यवगोधूमाः ससर्षपाश्चैव ॥५॥

अतसी प्रसिद्धा। कलायः सस्यम्। कुलत्थाः। गोधूमाः। मुद्गाः। एते प्रसिद्धाः। अनूत्पन्नानि यानि पुनर्जायन्ते ते निष्पावाः। निष्पावाः शालय इति केचित्। शिम्बिधान्यमिति च केचित्। एते षष्ठे कन्यायाम्। सप्तमराशाविति। माषाः। यवाः। गोधूमाः। एते किं भूताः। ससर्षपाः सर्षपसहिताः। एते सप्तमराशौ तुलायाम्। तथा च काश्यप.—

कन्यायां मुद्गनीवारकुलत्थाः सकला यवाः।
तुले तु यवगोधूममाषाः सिद्धार्थकास्तथा ॥इति॥५॥

अथ वृश्चिकधनुषोराह—

अष्टमराशाविक्षुः सैक्यं लोहान्यजाविकं चापि।
नवमे तु तुरगलवणाम्बरास्त्रतिलधान्यमूलानि ॥६॥

इक्षुः प्रसिद्धः। सैक्यं सेकोत्थं वल्लीफलादि। लोहमायसं कांस्यं वा। एतानि। तथा अजश्छागः। अविः प्रसिद्धः। तज्जातमाविकम्। एतत्सर्वमष्टमराशौ वृश्चिके।

नवमे त्विति। तुरगा अश्वाः। लवणं सैन्धवम्। अम्बराणि वस्त्राणि। अस्त्राण्यायुधानि धनुःशरादीनि। तिलः। धान्यम्। मूलानि प्रसिद्धानि। एतानि नवमे धनुषि। तथा च काश्यपः—

अलिनीक्षुरसं सैक्यमाजं लोहं सकांस्यकम्।
धान्यं धनुषि वस्त्राणि लवणं तुरगास्तथा ॥इति॥६॥

अथ मकरकुम्भयोराह—

मकरे तरुगुल्माद्यं सैक्येक्षुसुवर्णकृष्णलोहानि।
कुम्भे सलिलजफलकुसुमरत्नचित्राणि रूपाणि ॥७॥

तरवो वृक्षाः। गुल्माः प्रसिद्धाः। अकाण्डविटपा इत्यर्थः। आदिग्रहणाल्लतावल्यः। सैक्यं सेकोत्थम्। इक्षुः प्रसिद्धः। सुवर्णं काञ्चनम्। कृष्णलोहमायसम्। एतानि सर्वाणि मकरे।

कुम्भ इति। सलिलजं यत्किञ्चिज्जलसम्भूतम्। फलानि प्रसिद्धानि। कुसुमानि। रत्नानि चित्राणि नानाप्रकाराणि येषां रूपाणि। एतानि कुम्भे। तथा च काश्यपः—

मकरे सस्यसीसं च सुवर्णगुडधातुजम्।
कुम्भे कुसुमचित्राणि हंसाश्च जलजास्तथा ॥इति॥७॥

अथ मीन आह—

मीने कपालसम्भवरत्नान्यम्बूद्भवानि वज्राणि।
स्नेहाश्च नैकरूपा व्याख्याता मत्स्यजातं च ॥८॥

कपालसम्भवानि रत्नानि मुक्ताफलानि। अम्बूद्भवानि शुक्तिसम्भवानि। वज्रं हीरकम्। नैकरूपा बहुविधाः स्नेहास्तैलादयः। मत्स्यजातं मत्स्योद्भूतम्। मुक्तादिकमपि। एते सर्व एव मीने व्याख्याता उक्ताः। तथा च काश्यपः—

पद्ममुक्ताफलादीनां द्रव्याणां मीन ईश्वरः ॥इति॥८॥

अथैतेषां द्रव्याणां शुभाशुभज्ञानार्थमाह—

राशेश्चतुर्दशार्थायसप्तनवपञ्चमस्थितो जीवः।
द्व्येकादशदशपञ्चाष्टमेषु शशिजश्च वृद्धिकरः ॥९॥
षट्सप्तमगो हानिं वृद्धिं शुक्रः करोति शेषेषु।
उपचयसंस्थाः क्रूराः शुभदाः शेषेषु हानिकराः ॥१०॥

राशेश्चतुर्दशेति—यस्य कस्य चोद्देशः। चतुश्चतुर्थस्थानम्। दश दशमम्। अर्थस्थानं द्वितीयम्। आयमेकादशम्। सप्तमनवमपञ्चमानि। एतेषां स्थानानामन्यतमस्थानस्थो जीवो बृहस्पतिस्तत्प्रोक्तद्रव्याणां वृद्धिकरः। द्वितीयम्। एकादशम्। दशमम्। पञ्चमम्। अष्टमम्। एतेषां स्थानानामन्यतमस्थाने स्थितः शशिजो बुधो वृद्धिकरः।

षट्सप्तमग इति। शुक्रो भार्गवः षट्सप्तमस्थानगतो हानिं क्षयं करोति। शेषेष्वन्यतमस्थानेषु प्रथमद्वितीयतृतीयचतुर्थपञ्चमाष्टमनवमदशमैकादशद्वादशेषु स्थितो वृद्धिं करोति। क्रूरा आदित्याङ्गारकशनैश्चरा उपचयसंस्थास्त्रिषडेकादशगताः शुभदा वृद्धिकराः। शेषेष्वन्यस्थानेषु प्रथमद्वितीयचतुर्थपञ्चमसप्तमाष्टमनवमद्वादशेषु हानिकराः। तथा च काश्यपः—

चतुःसप्तद्विपञ्चस्थो नवदिग्रुद्रगो गुरुः॥
यस्य राशेस्तदुक्तानां द्रव्याणां वृद्धिदः स्मृतः।
शुक्रः षट्सप्तमस्थो वा हानिकृद्वृद्धिदोऽन्यगः॥
द्व्येकादशदशार्थाष्टसंस्थितः शशिजः शुभः।
पापास्तूपचयस्थाश्च वृद्धिं कुर्वन्ति नान्यथा॥इति॥९-१०॥

अत्रैव विशेषमाह—

राशेर्यस्य क्रूराः पीडास्थानेषु संस्थिता बलिनः।
तत्प्रोक्तद्रव्याणां महार्घता दुर्लभत्वं च॥११॥

यस्य राशेः क्रूराः पापा रविभौमसौराः पीडास्थानेष्वूपचयस्थानेष्ववस्थितास्ते च बलिनो वीर्यवन्तो मित्रस्वक्षेत्रोच्चस्वनवांशकेषु स्थिताः शुभेक्षिताश्च तत्प्रोक्तद्रव्याणां तस्य राशेर्यानि प्रोक्तानि द्रव्याणि तेषां कथितद्रव्याणां महार्घता बहुमूल्यत्वं दुर्लभत्वं च दुष्प्रापत्वं भवति। तथा च काश्यपः—

राशेरनिष्टस्थानेषु पापाश्च सबलाः स्थिताः।
तद्द्रव्याणां नाशकरा दुर्लभास्ते भवन्ति हि॥इति॥११॥

अन्यदप्याह—

इष्टस्थाने सौम्या बलिनो येषां भवन्ति राशीनाम्।
तद्द्रव्याणां वृद्धिः सामर्घ्यं वल्लभत्वं च॥१२॥

येषां राशीनां सौम्याः शुभग्रहा बुधगुरुशुक्रा इष्टस्थानस्थाः। इष्टस्थानानि यथा जीवश्चतुरादिषु स्थितो बुधश्च द्व्यादिषु स्थितः शुक्रः षट्सप्तमरहितेषु। एतेषु स्थानेषु बलिनो ये येषां राशीनां भवन्ति तद्द्रव्याणां तस्य राशेर्यानि द्रव्याणि तेषां सामर्घ्यं समर्घता वल्लभत्वं च भवति। तथा च काश्यपः—

इष्टस्थाने स्थिताः सौम्या बलिनो येषु राशिषु।
भवन्ति तद्भवानां च द्रव्याणां शुभदाः स्मृताः॥इति॥१२॥

अन्यदप्याह—

गोचरपीडायामपि राशिर्बलिभिः शुभग्रहैर्दृष्टः।
पीडां न करोति तथा क्रूरैरेवं विपर्यासः॥१३॥

जीवादीनां चतुरादीनि स्थानानि यान्युक्तानि तद्व्यतिरिक्तेष्वन्येषु स्थानेषु यदा स्थिता भवन्ति तदा गोचरपीडा तस्यां सत्यामपि राशिर्यदा शुभग्रहैर्बुधजीव-

शुक्रैर्बलिभिः सवीर्यैर्दृष्टोऽवलोकितो भवति तदा पीडां न करोति। एतदुक्तं भवति—तद्द्रव्याणि नातिसमर्घाणि नातिमहार्घाणि भवन्ति। क्रूरैः पापग्रहैरादित्याङ्गारशनैश्चरैर्बलिभिर्गोचरपीडायां यदि राशिर्दृश्यते तदा विपर्यासो विपरीतो भवति। तत्प्रोक्तद्रव्याणां महार्घता दुर्लभत्वं च भवतीति॥१३॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ द्रव्यनिश्चयो नाम चत्वारिंशोऽध्यायः॥४०॥

अथातोऽर्घकाण्डाध्यायो व्याख्यायते।

तत्रादावेव प्रयोजनसम्प्रदर्शनार्थमाह—

अतिवृष्ट्युल्कादण्डान् परिवेषग्रहणपरिधिपूर्वांश्च।
दृष्ट्वाऽमावास्यायामुत्पातान् पौर्णमास्यां च॥१॥
ब्रूयादर्घविशेषान् प्रतिमासं राशिषु क्रमात् सूर्ये।
अन्यतिथावुत्पाता ये ते डमरार्तये राज्ञाम्॥२॥

अतिवृष्टिरतिवर्षणम्। उल्का। तस्या लक्षणमुक्तम्—"[1]उल्का शिरसि विशाला" इति। दण्डस्तस्य च लक्षणमुक्तम्—"[2]रविकिरणजलदमरुताम्" इति। तथा परिवेषस्तस्य[3] लक्षणमुक्तम्। ग्रहणमर्केन्द्वोः। परिधिः प्रतिसूर्यस्तस्य[4] लक्षणमुक्तम्। तत्पूर्वांस्तदाद्यान्। आदिग्रहणाद् रजोनीहारदिग्दाहगन्धर्वनगराणि ग्रहीतव्यानि। एतानुत्पातानमावास्यायां पौर्णमास्यां च।

दृष्ट्वाऽवलोक्यार्घविशेषान् सूर्ये आदित्ये राशिषु मेषादिषु प्रतिमासं क्रमात् परिपाट्या तद् ब्रूयाद् वदेत्। अन्यस्मिंस्तिथावमावास्यां पौर्णमासीं च वर्जयित्वा ये उत्पाता अतिवृष्ट्यादयो भवन्ति ते राज्ञां नृपाणां डमरार्तये भवन्ति। डमरं शस्त्रकलहस्तेनार्तिः पीडा भवति। तथा च काश्यपः—

उल्कातिवृष्टिर्ग्रहणे सूर्येन्द्वोः परिवेषणम्।
प्रतिसूर्यादयो येऽन्ये पक्षमासान्तसंक्षये॥
तिथौ निरीक्ष्य चोत्पातान् ब्रूयाल्लोके शुभाशुभम्।
सुभिक्षदुर्भिक्षकृतान् विशेषोऽत्र विचारतः॥

---

१. द्रष्टव्यमस्य ग्रन्थस्य ४०८ पृष्ठम्। २. द्रष्टव्यमस्य ग्रन्थस्य ३८६ पृष्ठम्।
३. द्रष्टव्यमस्य ग्रन्थस्य ४१५ पृष्ठम्। ४. द्रष्टव्यमस्य ग्रन्थस्य ४२८ पृष्ठम्।

प्रतिमासं विधानज्ञो नान्यस्मिन् दिवसे वदेत्।
अन्यत्र ये भवन्त्येते ते सर्वे नृपदोषदाः ॥इति॥२॥

अथोत्पातेऽमावास्यायां पौर्णमास्यां च मेषवृषस्थे सूर्ये किं कुर्यादित्याह—

मेषोपगते सूर्ये ग्रीष्मजधान्यस्य संग्रहं कृत्वा।
वनमूलफलस्य वृषे चतुर्थमासे तयोर्लाभः ॥३॥

सूर्ये रवौ मेषोपगते मेषं प्राप्ते। अमावास्यायां पौर्णमास्यां चोत्पातानुक्तान् दृष्ट्वा ग्रीष्मजस्य ग्रीष्मोत्पन्नस्य धान्यस्य संग्रहं कृत्वा तथा वृषे वृषगतेऽर्के वनमूलफलस्य वन्यानां मूलफलानां संग्रहं कृत्वा तयोर्मेषवृषयोश्चतुर्थे मासि विक्रयाल्लाभो भवति ॥३॥

अथ मिथुनस्थ आह—

मिथुनस्थे सर्वरसान् धान्यानि च संग्रहं समुपनीय।
षष्ठे मासे विपुलं विक्रेता प्राप्नुयाल्लाभम् ॥४॥

मिथुनस्थेऽर्के प्रागुक्तानुत्पातान् दृष्ट्वा। सर्वरसान् मधुरादीन्। धान्यानि च शालीन्। संग्रहं समुपनीय। संग्रहमेषां कृत्वा विक्रेता षष्ठे मासे विपुलं विस्तीर्णं लाभं प्राप्नुयाल्लभेत ॥४॥

अथ कर्कटस्थ आह—

कर्किण्यर्के मधुगन्धतैलघृतफाणितानि विनिधाय।
द्विगुणा द्वितीयमासे लब्धिर्हीनाधिके छेदः ॥५॥

अर्के आदित्ये कर्किणि कर्कटस्थे मधु माक्षिकम्। गन्धः सुगन्धद्रव्याणि। तैलम्। घृतमाज्यम्। फाणितमिक्षुरसक्वाथः क्षुद्रगुडादि। एतानि विनिधाय संस्थाप्य द्वितीयमासे विक्रयाद् द्विगुणा लब्धिर्भवति। हीने कालेऽधिके वा विक्रयाच्छेदो भवति ॥५॥

अथ सिंहस्थ आह—

सिंहे सुवर्णमणिचर्मवर्मशस्त्राणि मौक्तिकं रजतम्।
पञ्चममासे लब्धिर्विक्रेतुरतोऽन्यथा छेदः ॥६॥

सिंहस्थेऽर्के सुवर्णम्। मणयः। चर्माणि। वर्म सन्नाहः। शस्त्राण्यायुधानि। मौक्तिकं मुक्ताफलानि। रजतं रौप्यम्। एतानि विनिधाय विक्रेतुः पञ्चमे मासे विक्रयाल्लब्धिर्भवति। अतोऽन्यथा ऊने कालेऽधिके वा छेदो भवति ॥६॥

अथ कन्यागते स्वावाह—

कन्यागते दिनकरे चामरखरकरभवाजिनां क्रेता।
षष्ठे मासे द्विगुणं लाभमवाप्नोति विक्रीणन् ॥७॥

दिनकरे सूर्ये कन्यागते प्रागुक्तानुत्पातान् दृष्ट्वा चामरं बालव्यजनम्। खरो गर्दभः। करभ उष्ट्रः। वाजी तुरगः। एषां क्रेता षष्ठे मासे विक्रीणन् विक्रेता द्विगुणं लाभमाप्नोति लभते ॥७॥

अथ तुलागत आह—

तौलिनि तान्तवभाण्डं मणिकम्बलकाचपीतकुसुमानि।
आदद्याद्धान्यानि च वर्षार्द्धाद् द्विगुणिता वृद्धिः ॥८॥

तौलिनि तुलागतेऽर्के तान्तवभाण्डं तन्तुकृतं यत्किञ्चित् कर्म कर्पटादि मणयः। कम्बलम्। काचम्। पीतानि पीतवर्णानि कुसुमानि पुष्पाणि। एतान्यादद्याद्वाहयेत्। धान्यानि च तथा। वर्षार्द्धात् षड्भिर्मासैर्द्विगुणिता वृद्धिर्द्विगुणत्वं व्रजन्ति। द्विगुणलाभो भवतीत्यर्थः ॥८॥

अथ वृश्चिकस्थ आह—

वृश्चिकसंस्थे सवितरि फलकन्दकमूलविविधरत्नानि।
वर्षद्वयमुषितानि द्विगुणं लाभं प्रयच्छन्ति ॥९॥

सवितरि आदित्ये वृश्चिकसंस्थे। फलानि। कन्दको मूलविशेषः। मूलानि अन्यानि द्रव्याणि। विविधानि नानाकाराणि रत्नानि। एतानि वर्षद्वयमुषितानि द्विगुणं लाभं प्रयच्छन्ति ददति ॥९॥

अथ धन्विस्थ आह—

चापगते गृह्णीयात् कुङ्कुमशङ्खप्रवालकाचानि।
मुक्ताफलानि च ततो वर्षार्द्धाद् द्विगुणतां यान्ति ॥१०॥

चापगते धन्विस्थेऽर्के गृह्णीयात्। कुङ्कुमं काश्मीरम्। शङ्खम्। प्रवालं विद्रुमम्। काचम्। मुक्ताफलानि च। ततोऽनन्तरं क्रमात् परतः वर्षार्द्धात् षड्भिर्मासैर्द्विगुणतां यान्ति। द्विगुणं लाभं ददति ॥१०॥

अथ मकरकुम्भस्थेऽर्क आह—

मृगघटसंस्थे सवितरि गृह्णीयाल्लोहभाण्डधान्यानि।
स्थित्वा मासं दद्याल्लाभार्थी द्विगुणमाप्नोति ॥११॥

मृगो मकरः। घटः कुम्भः। सवितर्यादित्ये मृगघटसंस्थे लोहभाण्डधान्यानि गृह्णीयात् स्थापयेत्। लोहमयानि भाण्डानि धान्यानि च मासं स्थित्वा मासं संस्थाप्य ततो दद्याद्विक्रयं कुर्यात्। लाभार्थी द्विगुणं लाभमाप्नोति लभते ॥११॥

अथ मीनस्थेऽर्क आह—

सवितरि झषमुपयाते मूलफलं कन्दभाण्डरत्नानि।
संस्थाप्य वत्सरार्द्धं लाभकमिष्टं समाप्नोति ॥१२॥

सवितरि आदित्ये झषं मीनमुपयाते प्राप्ते। मूलानि। फलानि। कन्दो मूलविशेषः। भाण्डानि नानाकाराणि। रत्नानि मणयः। एतान् गृहीत्वा वत्सरार्द्धं मासषट्कं संस्थाप्येष्टं यथाभिलषितं लाभं वृद्धिं समाप्नोति लभते ॥१२॥

अत्रैव पुनरपि विशेषमाह—

राशौ राशौ यस्मिन् शिशिरमयूखः सहस्रकिरणो वा।
युक्तोऽधिमित्रदृष्टस्तत्रायं लाभको दिष्टः ॥१३॥

यस्मिन् राशौ राशौ मेषादिके शिशिरमयूखश्चन्द्रः सहस्रकिरणो वा सूर्यः। अधिमित्रेण तात्कालिकेन दृष्टो विलोकितो मित्रयुक्तश्च भवति। यतस्तत्कालं दशायबन्धुसहजस्वान्तेषु स्थितो ग्रहो मित्रं भवति। तद्युक्तत्वात्तेन मित्रयुक्तोऽधिमित्रदृष्टः। तत्र तस्मिन् राशौ अयं लाभको दिष्टोऽभिहितो नान्यत्र योगासम्भवात्। यतोऽमावास्यापौर्णमास्योरयं विचारः। उत्पातदर्शनात्। अतः शिशिरमयूखसहस्रकिरणग्रहणं कृतम्। तथा च काश्यपः—

राशौ राशौ स्थितः सूर्यः शशी वा मित्रसंयुतः।
अधिमित्रेण सन्दृष्टो यथा लाभप्रदः स्मृतः ॥इति॥१३॥

अत्रैव विशेषमाह—

सवितृसहितः सम्पूर्णो वा शुभैर्युतवीक्षितः
शिशिरकिरणः सद्योऽर्घस्य प्रवृद्धिकरः स्मृतः।
अशुभसहितः सन्दृष्टो वा हिनस्त्यथवा रविः
प्रतिगृहगतान् भावान् बुद्ध्वा वदेत् सदसत्फलम् ॥१४॥

शिशिरकिरणश्चन्द्रः सवितृसहितः सूर्येण सहावस्थितोऽमावास्यायां शुभग्रहैर्बुधजीवशुक्रैर्युतः संयुतो वीक्षितो यत्र राशौ भवति तत्र सद्योऽर्घस्य सुवृद्धिकरः स्मृतः।

अथाशुभसहितः पापग्रहाभ्यां भौमसौराभ्यां युक्तः सन्दृष्टो रविर्वा चन्द्रो हिनस्ति नाशयति। अर्घहानिं करोतीत्यर्थः। एवं प्रतिगृहगतान् प्रतिराशिव्यवस्थितान् भावान् द्रव्याण्युक्तान् बुद्ध्वा ज्ञात्वा सदसच्छुभमशुभं वा फलं वदेद् ब्रूयादिति। तथा च काश्यपः—

अत्रार्कशशिनौ सौम्यैः संयुक्तौ वा निरीक्षितौ।
शुभग्रहस्थानगतौ सद्योऽर्घस्य विवृद्धिदौ॥
विपरीतस्थितावेतौ पापयुक्तौ निरीक्षितौ।
अर्घहानिकरौ प्रोक्तौ मिश्रितौ मध्यमौ स्मृतौ॥इति॥१४॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावर्घकाण्डं नामैकचत्वारिंशोऽध्यायः॥४१॥

अथेन्द्रध्वजसम्पद्वचाख्यायते।

तत्रादावेव तदुत्पत्तिप्रदर्शनार्थमाह—

ब्रह्माणमूचुरमरा भगवन् शक्ताः स्म नासुरान् समरे।
प्रतियोधयितुमतस्त्वां शरण्यशरणं समुपयाताः॥१॥

अमरा देवा ब्रह्माणमूचुः पितामहमुक्तवन्तः। किं तदित्याह। हे भगवन् पितामह! वयमसुरान् दैत्यान् समरे संग्रामे प्रतियोधयितुं तैः सह युद्धं कर्त्तुं न शक्ताः स्मः। अतोऽस्माद्धेतोः शरण्यं त्वां शरणं वयं समुपयाताः प्राप्ता इति॥१॥

ततोऽनन्तरं स तानाह—

देवानुवाच भगवान् क्षीरोदे केशवः स वः केतुम्।
यं दास्यति तं दृष्ट्वा नाजौ स्थास्यन्ति वो दैत्याः॥२॥

भगवान् ब्रह्मा देवानुवाच प्रोक्तवान्। क्षीरोदे क्षीरसमुद्रे यः केशवो नारायणः स वो युष्मभ्यं यं केतुं ध्वजं दास्यति तं दृष्ट्वा अवलोक्य वो युष्माकमाजौ संग्रामे दैत्या न स्थास्यन्ति॥२॥

ततः किमित्याह श्लोकत्रयेण—

लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः सेन्द्राः।
श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोरस्कम्॥३॥

श्रीपतिमचिन्त्यमसमं समं ततः सर्वदेहिनां सूक्ष्मम्।
परमात्मानमनादिं विष्णुमविज्ञातपर्यन्तम् ॥४॥
तैः संस्तुतः स देवस्तुतोष नारायणो ददौ चैषाम्।
ध्वजमसुरसुरवधूमुखकमलवनतुषारतीक्ष्णांशुम् ॥५॥

ते सेन्द्रा इन्द्रसहिताः सुरा देवा लब्धो वरो यैस्ते लब्धवराः क्षीरोदं क्षीरसमुद्रं गत्वा तं भगवन्तं केशवं तुष्टुवुः स्तुतवन्तः। श्रीवत्साङ्कं श्रीवत्सभङ्कं चिह्नं यस्य तम्। कौस्तुभो मणिविशेषस्तस्य किरणा रश्मयस्तैरुद्भासितमुरो वक्षो यस्य तम्॥

तथाभूतं श्रीपतिं लक्ष्मीनाथम्। अचिन्त्यम्। चिन्तयितुं न शक्यम्। असमम्। असदृशम्। अनौपम्यमित्यर्थः। समं सर्वगतत्वात्तुल्यम्। ततः समत्वात् सर्वदेहिनां सर्वभूतानां सूक्ष्मं दुर्विज्ञेयम्। परमात्मानम्। परमश्चासौ आत्मा परमात्मा तं तथाभूतम्। अनादिम्। न आदिरुत्पत्तिर्विद्यते यस्य तम्। विष्णुम्। व्यापकम्। अविज्ञातपर्यन्तम्। न विज्ञातः पर्यन्तः सर्गो यस्य तम्। अविज्ञातनिधनमित्यर्थः॥

तैः सेन्द्रैर्देवैः संस्तुतः स देवो नारायणस्तुतोष। तुष्टश्चैषां देवानां ध्वजं ददौ। कीदृशं ध्वजम्? असुरसुरवधूमुखकमलवनतुषारतीक्ष्णांशुम्, असुरा दैत्याः सुरा देवास्तेषां वध्वः स्त्रियस्तासां मुखकमलानि वक्त्रपद्मानि तदेव मुखकमलानां वनं समूहस्तत्र तीक्ष्णांशुः सूर्यः। विकाशकत्वात्। त्रिभिर्विशेषकम्॥३-५॥

कीदृशं ध्वजं ददावित्याह—

तं विष्णुतेजोभवमष्टचक्रे रथे स्थितं भास्वति रत्नचित्रे।
देदीप्यमानं शरदीव सूर्यं ध्वजं समासाद्य मुमोद[1] शक्रः ॥६॥

तं ध्वजं विष्णुतेजोभवम्। विष्णुतेजसोद्भव उत्पत्तिर्यस्य तम्। अष्टचक्रे रथे स्थितम्। अष्टभिश्चक्रैर्यो युक्तो रथः स्यन्दनं तत्र स्थितम्। कीदृशे भास्वति। तेजोयुते। रत्नचित्रे मणिभूषिते। कीदृशं ध्वजम्। देदीप्यमानं शरदीव सूर्यम्। शरदि शरत्काले सूर्यमादित्यमिव देदीप्यमानं ज्वलन्तम्। एवंविधं तं ध्वजं शक्र इन्द्रः समासाद्य प्राप्य मुमोद जहृषे॥६॥

---

१. अत्र 'मुमुदे' इत्यत्र 'मुमोद' इति शब्दः प्रामादिकस्तथाऽस्य टीकायामपि 'जहृषे' इत्यत्र 'जहर्ष' इति साधुः पाठः।

ततस्तं प्राप्य किं कृतवानिन्द्र इत्याह—

स किङ्किणीजालपरिष्कृतेन स्रक्छत्रघण्टापिटकान्वितेन।
समुच्छ्रितेनामरराड्ध्वजेन निन्ये विनाशं समरेऽरिसैन्यम् ॥७॥

अमरराडिन्द्रस्तेन ध्वजेन समुच्छ्रितेनारिसैन्यं शत्रुसैन्यं समरे संग्रामे विनाशं क्षयं निन्ये। कीदृशेन ? किङ्किणीजालपरिष्कृतेन। किङ्किण्यः सूक्ष्मघण्टाः। तासां जालं समूहः। तेन परिष्कृतेन युक्तेन। स्रक्छत्रघण्टापिटकान्वितेन, स्रक् माला। छत्रमातपत्रम्। घण्टा प्रसिद्धा। पिटकानि विभूषणानि। तैरन्वितेन युक्तेन। तथा च गर्गः—

असुरास्तं ध्वजं दृष्ट्वा ध्वजतेजःसमाहताः।
विसंज्ञाः समरे भग्नाः पराभूता प्रदुद्रुवुः॥
तान् वज्रेण सहस्राक्षो मासे भाद्रपदेऽसुरान्।
घातयित्वा सज्येष्ठायामेकरात्रेण [1]वाजिना॥
स जित्वा श्रवणे स्वर्गं प्रययौ सद्विजः पथि॥इति॥७॥

ततस्तं ध्वजमिन्द्रो वसुं ददावित्याह—

उपरिचरस्यामरपो वसोर्ददौ चेदिपस्य वेणुमयीम्।
यष्टिं तां स नरेन्द्रो विधिवत् सम्पूजयामास ॥८॥

ततोऽमरप इन्द्रं उपरिचरस्योर्ध्वगामिनो वसुनामचेदिपस्य वेणुमयीं यष्टिं ददौ। चेदिनां जनपदानां राजा वसुपो भूमिष्ठः सन् उपरि चरति स्वर्गं याति। तथा स नरेन्द्रश्चेदिपो विधिवत्तां यष्टिं सम्पूजयामास पूजितवान् ॥८॥

अथ शक्रप्रसादं ध्वजमाहात्म्यं श्लोकद्वयेनाह—

प्रीतो महेन मघवा प्राहैवं ये नृपाः करिष्यन्ति।
वसुवद्वसुमन्तस्ते भुवि सिद्धाज्ञा भविष्यन्ति ॥९॥
मुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूतान्नाः।
ध्वज एव चाभिधास्यति जगति निमित्तैः फलं सदसत् ॥१०॥

मघवा भगवानिन्द्रो महेन पूजया प्रीतः परितुष्टः प्राह उक्तवान्। एवमनेन प्रकारेण वसुवद्वसुना तुल्यं ये नृपा राजानः करिष्यन्ति ते वसुमन्तः। वसूनि रत्नानि

---

१. हस्तिना—इति वपुस्तके पाठः।

विद्यन्ते येषाम्। तथा भूवि भूमौ सिद्धाज्ञा भविष्यन्ति। सिद्धा आज्ञा येषां ते विहितादेशाः कृतादेशा इत्यर्थः॥

मुदिता इति। तेषां नृपाणां प्रजा जना मुदिता भविष्यन्ति तथा भयरोगैर्विवर्जिता रहिताः। प्रभूतान्नाः। प्रभूतं बह्वन्नं येषां ते। ततो ध्वज एव जगति लोके निमित्तैः कारणैः सदसच्छुभाशुभं फलं दास्यति। एतदुक्तं भवति—य एवं भगवता दत्तं ध्वजं राजा पूजयिष्यति। स एव ध्वजः पूज्यमानो लोके निमित्तैश्चिह्नैः शुभाशुभं दास्यतीत्यर्थः। युगलकम्॥९-१०॥

अथास्य विधानं वक्ष्यामीत्याह—

पूजा तस्य नरेन्द्रैर्बलवृद्धिजयार्थिभिर्यथा पूर्वम्।
शक्राज्ञया प्रयुक्ता तामागमतः प्रवक्ष्यामि॥११॥

तस्य ध्वजस्य नरेन्द्रै राजभिर्बलवृद्धिजयार्थिभिः। बलवृद्धिजयानां येऽर्थिनः प्रार्थनापरास्तैर्यथा येन प्रकारेण पूर्वं पुरा शक्राज्ञया इन्द्राज्ञया प्रयुक्ता कृता तां पूजामागमत आगमात् प्रवक्ष्यामि। यथावदभिधास्यामीत्यर्थः॥११॥

अथ तदभिधानमेवाह—

तस्य विधानं शुभकरणदिवसनक्षत्रमङ्गलमुहूर्त्तैः।
प्रास्थानिकैर्वनमियाद् दैवज्ञः सूत्रधारश्च॥१२॥

तस्येन्द्रध्वजस्य विधानं करणम्। शुभे शुभप्रदे करणे। करणानि बवादीनि। तस्मिन् शुभे विष्टिपरिवर्जिते। आचार्योऽत्र लक्षणं कथयिष्यति। यथा—

[1]बववालवकौलवतैतिलाख्यगरवणिजविष्टिसंज्ञानाम्।
पतयः स्युरिन्द्रकमलजमित्रार्यमभूश्रियः सयमाः॥
कृष्णचतुर्दश्यर्द्धाद् ध्रुवाणि शकुनिश्चतुष्पदं नागम्।
किंस्तुघ्नमिति च तेषां कलिवृषफणिमारुताः पतयः॥

एवंविधे शुभे करणे। दिवसशब्देन तिथिर्वा वार उच्यते—

नन्दा भद्रा जया रिक्ता पूर्णा च नामसदृशफलाः। इति।

शुभतिथौ। तथैवं शुभे पूर्णचन्द्रबुधजीवशुक्राणामन्यतमयुक्तस्य दिने। शुभनक्षत्रे दारुणोग्रवर्जिते लघूनि साधारणे च पापग्रहवर्जिते। लघुहस्ताश्विनपुष्य

---

१. बृहत्संहितायाम् ९९ अध्याये ४-५ श्लोकौ।

इत्यादि निरुपहते नक्षत्रे। शुभे मङ्गले शकुने दध्यक्षतकुसुमादीनां दर्शने। शुभे मुहूर्ते। मुहूर्तानि यात्रायामुक्तानि। तद्यथा——यात्रायां गरवणिजविष्टिपरिवर्जितानि करणानीति करणानां फलमुक्तम्। दिवसगुणा वारगुणाः। उदरनयनरोगश्वपदारुण्यबाधा इत्युक्ताः। नक्षत्राणाम्। दिशि दिशि बहुलाद्या इति। मङ्गलानि च सिद्धार्थकादर्शमयाऽञ्जनानीति। मुहूर्ताः——

शिवभुजगमित्रपितृवसुजलविश्वविरञ्चिपङ्कजप्रभवाः।
इन्द्राग्नीन्द्रनिशाचरवरुणार्यमयोनयश्चाह्नि ॥
रुद्राजाहिर्बुध्न्याः पूषादस्रान्तकाग्निधातारः।
चन्द्रादितिगुरुहरिरवित्वाष्ट्राण्यनिलाख्यका रात्रौ॥
अह्नः पञ्चदशांशे रात्रेश्चैवं मुहूर्त इति।
संज्ञा स च विज्ञयश्छायायन्त्राम्बुभिर्युक्त्या ॥ इति॥

एतैः प्रास्थानिकैः। प्रस्थाने गमने भवाः प्रास्थानिकास्तैर्दैवज्ञः कालवित् सूत्रधारश्च तक्षा वनमियाद् गच्छेत्॥१२॥

तत्र वने किं कुर्यादित्यशुभतरुच्छदवर्जं श्लोकद्वयेनाऽऽह——

उद्यानदेवतालयपितृवनवल्मीकमार्गचितिजाताः ।
कुब्जोर्ध्वशुष्ककण्टकिवल्लीवन्दाकयुक्ताश्च ॥१३॥

बहुविहगालयकोटरपवनानलपीडिताश्च ये तरवः।
ये च स्युः स्त्रीसंज्ञा न ते शुभाः शक्रकेत्वर्थे॥१४॥

एवंविधास्तरवो वृक्षाः शक्रकेत्वर्थे इन्द्रध्वजार्थे न शुभा न प्रशस्ताः। कीदृशाः? उद्यानमुपवनम्। देवतालयं सुरगृहम्। पितृवनं श्मशानम्। वल्मीकः प्रसिद्धो वल्मीककृतो मृद्यूपः। मार्गः पन्थाः। चितिर्यज्ञभूमिः। एतेषु ये जाताः। तथा कुब्जा अस्पृष्टार्थाः। ऊर्ध्वशुष्काः। तथा कण्टकिनः कण्टकयुक्ता वदरीप्रभृतय इत्यर्थः। वल्लीभिर्युक्ता लतापरिवेष्टिताः। वन्दाकयुक्ताश्च। वन्दाको वृक्षविशेषस्तेन युक्ताः॥

तथा प्रभूतानां विहगानां पक्षिणामालयानि गृहाणि यत्र सन्ति। कोटरं छिद्रम्। पवनेन वायुना ये पीडिता भग्नाः। अनलेन पीडिता दग्धाः। तथा च ये स्त्रीसंज्ञाः स्त्रीनामानः स्युर्भवेयुः। यथा कदली बदरी द्रेकाण्येवमादि। एतत्प्रतिपादितं यत्तद्वर्जितं शुभतरुछेदनं कार्यम्। तथा च गर्गः——

प्रोष्ठपादे प्रतिपदि ध्वजार्थं पूर्वतो वनम्।
गत्वा वृक्षं परीक्षेत वयःसारगुणान्वितम् ॥इति॥१४॥

अथैषां केतुः शोभन इत्याह—

श्रेष्ठोऽर्जुनोऽजकर्णः प्रियकधवोदुम्बराश्च पञ्चैते।
एतेषामेकतमं प्रशस्तमथवापरं वृक्षम् ॥१५॥

अर्जुनो वृक्षः श्रेष्ठः प्रशस्तः। अजकर्णः। प्रियकः। धवः। उदुम्बरः। एते पञ्च श्रेष्ठाः। एतेषां मध्यादेकतममन्यतमम्। अथवाऽपरमन्यं वृक्षं प्रशस्तं शुभलक्षणमित्यर्थः ॥१५॥

तत्कीदृशमित्याह—

गौरासितक्षितिभवं सम्पूज्य यथाविधि द्विजः पूर्वम्।
विजने समेत्य रात्रौ स्पृष्ट्वा ब्रूयादिमं मन्त्रम् ॥१६॥

गौरायामसितायां च क्षितौ भूमौ भव उत्पत्तिर्यस्य तं तथाभूतं वृक्षं द्विजो ब्राह्मणः पूर्वं प्रथमसमये रात्रौ निशि विजने जनरहिते समेत्य गत्वा यथाविधि सम्पूज्य समभ्यर्च्य स्पृष्ट्वा च मन्त्रमिमं ब्रूयाद्वदेत् ॥१६॥

तमेव मन्त्रं श्लोकद्वयेनाह—

यानीह वृक्षे भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः।
उपहारं गृहीत्वेमं क्रियतां वासपर्ययः ॥१७॥
पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम।
ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम् ॥१८॥

इहास्मिन् वृक्षे तरौ यानि भूतानि च सन्ति तेभ्यो भूतेभ्यः स्वस्ति श्रेयोऽस्तु। वो युष्माकं नमस्कारो भवतु। इममपहारमिमं बलिं गृहीत्वा वासपर्ययः क्रियतामन्यत्र वासं गृहं कल्पयत्विति ॥१७॥

ते तव नगोत्तम वृक्षप्रधान स्वस्त्यस्तु। पार्थिवो राजा देवराजस्येन्द्रस्य ध्वजार्थं वरयते। तस्मादियं मत्प्रयुक्ता पूजा प्रतिगृह्यताम् ॥१८॥

ततः किं कुर्यादित्याह—

छिन्द्यात् प्रभातसमये वृक्षमुदक् प्राङ्मुखोऽपि वा भूत्वा।
परशोर्जर्जरशब्दो नेष्टः स्निग्धो घनश्च हितः ॥१९॥

ततः प्रभातसमये अरुणोदयकाले वृक्षं तरुं छिन्द्यात्। कीदृशो भूत्वा? उदक् प्राङ्मुखोऽपि वा भूत्वा, उत्तराभिमुखः पूर्वाभिमुखोऽपि वा स्थित्वा।

परशोः कुठारस्य जर्जरशब्दो भिन्नशब्दो नेष्टो न शुभः। स्निग्धो मधुरः, घनः सन्ततश्च हितः प्रशस्तः॥१९॥

अथ पतितस्य शुभाशुभज्ञानमाह—

नृपजयदमविध्वस्तं पतनमनाकुञ्चितं च पूर्वोदक्।
अविलग्नं चान्यतरौ विपरीतमतस्त्यजेत् पतितम्॥२०॥

वृक्षस्य पतनमविध्वस्तं ध्वंसरहितं नृपजयदम्। अभग्नस्य पतनमित्यर्थः। अनाकुञ्चितं पतनं नृपजयदमेव। तथा पूर्वोदक् पूर्वस्यामुत्तरस्यां दिशि यदि पतितं तदापि नृपजयदम्। तथाप्यन्यतरावन्यस्मिन् वृक्षे अविलग्नं पतनं नृपजयदम्। अतोऽस्माद्विपरीतं त्यजेत् परिहरेदित्यर्थः। एतदुक्तं भवति—वृक्षं कुञ्चितं कुब्जं कृत्वा यत् पतितं तथाग्नेयीदक्षिणनैर्ऋत्यपश्चिमवायव्यासु पतितमन्यस्मिंस्तरौ च लग्नं तन्न शुभदमित्यर्थः॥२०॥

ततः किं कुर्यादित्याह—

छित्त्वाग्रे चतुरङ्गुलमष्टौ मूले जले क्षिपेद्यष्टिम्।
उद्धृत्य पुरद्वारं शकटेन नयेन्मनुष्यैर्वा॥२१॥

ततस्तस्य वृक्षस्याग्रे चतुरङ्गुलं छित्वा तां यष्टिं जले उदकमध्ये क्षिपेत्। ततो जलादुद्धृत्य शकटेन मनुष्यैर्नरैर्वा पुरद्वारं नगरगोपुरं नयेत्॥२१॥

अथ तस्य नीयमानस्य लक्षणमाह—

अरभङ्गे बलभेदो नेम्या नाशो बलस्य विज्ञेयः।
अर्थक्षयोऽक्षभङ्गे तथाणिभङ्गे च वर्द्धकिनः॥२२॥

अरं चक्रस्य मध्यवर्ति काष्टम्। तस्य भङ्गे बलस्य सैन्यस्य भेदो भवति। नेमिश्चक्रपर्यन्तम्। तस्या भङ्गे बलस्य नाशः क्षयो भवति। अक्षश्चक्रविवरवर्ति काष्ठम्। तस्य भङ्गेऽर्थक्षयो द्रव्यविनाशः। अणिरक्षाग्रे कीलकः। तस्य भङ्गे वर्द्धकिनस्तक्षणः क्षयः॥२२॥

अथ कस्मिन् काले प्रवेशयेदित्याह श्लोकद्वयेन—

भाद्रपदशुक्लपक्षस्याष्टम्यां नागरैर्वृतो राजा।
दैवज्ञसचिवकञ्चुकिविप्रप्रमुखैः सुवेषधरैः॥२३॥
अहताम्बरसंवीतां यष्टिं पौरन्दरीं पुरं पौरैः।
लग्नगन्धधूपयुक्तां प्रवेशयेच्छङ्खतूर्यरवैः॥२४॥

भाद्रपदशुक्लाष्टम्यां तिथौ राजा नृपो नागरैर्नगरवासिभिर्जनैर्वृतः परिवृतस्तथा दैवज्ञेन सांवत्सरिकेण। सचिवैर्मन्त्रिभिः। कञ्चुकिभिर्महत्तरकैर्विप्रप्रमुखैर्ब्राह्मणप्रवरैः सुवेषधरैः॥

पौरैः स पौरन्दरीमैन्द्रीं यष्टिं प्रवेशयेत् पुरं नगरम्। कीदृशीं यष्टिम्? अहताम्बरसंवीताम्, अहतमक्षतमभिनवमम्बरं वस्त्रं तेन संवीतामावृताम्। तथा स्रग्गन्धधूपयुक्ताम्, स्रग्भिर्मालाभिः, गन्धैः सुगन्धद्रव्यैः, धूपैश्च संयुक्ताम्। तथा शङ्खरवैः शङ्खशब्दैः, तूर्यरवैः सह प्रवेशयेदिति। युगलकम्। तथा च गर्गः—

प्रोष्ठपादे सिताष्टम्यां ज्येष्ठायोगे स्वलङ्कृताम्।
यष्टिं पौरन्दरीं राजा नगरं सम्प्रवेशयेत्॥इति॥२३-२४॥

कीदृशं नगरमित्याह श्लोकद्वयेन—

रुचिरपताकातोरणवनमालालङ्कृतं प्रहृष्टजनम्।
सम्मार्जितार्चितपथं सुवेषगणिकाजनाकीर्णम्॥२५॥
अभ्यर्चितापणगृहं प्रभूतपुण्याहवेदनिर्घोषम्।
नटनर्तकगेयज्ञैराकीर्णचतुष्पथं नगरम्॥२६॥

कीदृशं नगरम्? रुचिरपताकातोरणवनमालालङ्कृतम्, रुचिराभिः शोभनाभिः पताकाभिर्वैजयन्तीभिः, रुचिरैश्च तोरणैः, तथा वनमालाभिः पत्रलताभिरलङ्कृतम्। प्रहृष्टा हर्षिता जना लोका यत्र तत्। सम्मार्जितार्चितपथम्, सम्मार्जितः शोधितोऽर्चितः पूजितः पन्था यत्र तत्। तथा सुवेषगणिकाजनाकीर्णम्, सुवेषेण शोभनवेषेण गणिकाजनेन वेश्यासमूहेनाकीर्णं व्याप्तम्॥२५॥

अभ्यर्चितापणगृहम्, अभ्यर्चितानि पूजितानि आपणगृहाणि पण्यविक्रयस्थानानि यत्र। प्रभूतपुण्याहवेदनिर्घोषम्, प्रभूता बहवः पुण्याहानां वेदानां च निर्घोषाः शब्दा यत्र। नटनर्तकगेयज्ञैराकीर्णचतुष्पथम्, नटैर्नर्तकैर्गेयज्ञैराकीर्णं संयुक्तं चतुष्पथं यत्र। चत्वारः पन्थानो यस्य तच्चतुष्पथं नगरम्। युगलकम्॥२६॥

कीदृशीभिः पताकाभिः कार्यमित्याह—

तत्र पताकाः श्वेता भवन्ति विजयाय रोगदाः पीताः।
जयदाश्च चित्ररूपा रक्ताः शस्त्रप्रकोपाय॥२७॥

तत्र तस्मिन्नगरे पताकाः श्वेताः शुक्लवर्णा विजयाय भवन्ति। पीताः पीतवर्णा रोगदा भवन्ति। चित्ररूपा नानावर्णा जयदा एव। शत्रुविजयं कुर्वन्तीत्यर्थः। रक्ता रक्तवर्णाः पताकाः शस्त्रप्रकोपाय भवन्ति॥२७॥

तस्यां प्रवेशमानायां शुभाशुभमाह—

यष्टिं प्रवेशयन्तीं निपातयन्तो भयाय नागाद्याः।
बालानां तलशब्दे संग्रामः सत्त्वयुद्धे वा ॥२८॥

प्रवेशयन्तीं यष्टिं नागाद्याः। नागा हस्तिनः। आदिग्रहणादश्वमहिषगवादयो गृह्यन्ते। एते निपातयन्तो भयाय भवन्ति। तथा बालानां शिशूनाम्। तलशब्देन हस्ततलमुच्यते। तेन करास्फोटेन संग्रामो भवति। सत्त्वानां गवां युद्धे संग्राम एव भवति ॥२८॥

ततः किं कुर्यादित्याह श्लोकद्वयेन—

सन्तक्ष्य पुनस्तक्षा विधिवद्यष्टिं प्ररोपयेद्यन्त्रे।
जागरमेकादश्यां नरेश्वरः कारयेच्चास्याम् ॥२९॥
सितवस्त्रोष्णीषधरः पुरोहितः शाक्रवैष्णवैर्मन्त्रैः।
जुहुयादग्निं सांवत्सरो निमित्तानि गृह्णीयात् ॥३०॥

तां यष्टिं पुनर्भूयस्तक्षा वर्द्धकी सन्तक्ष्य तनूकृत्य विधिवद्विधानेन यन्त्रे प्ररोपयेत्। आसनस्थाने निवेश्य तिर्यक् स्थितां कुत्रचित् सक्तां स्थापयेत्। तथास्थितायामेकादश्यां नरेश्वरो राजा रात्रिजागरं कारयेत् ॥२९॥

तस्य च राज्ञः पुरोहित आचार्यः शाक्रवैष्णवैरिन्द्रदैवतैर्विष्णुदैवतैश्च मन्त्रैरग्निमनलं जुहुयात्। कीदृशः पुरोहितः? सितवस्त्रोष्णीषधरः, सितानि श्वेतानि वस्त्राणि अम्बराणि, तथोष्णीषं शिरः पट्टविशेषं यो धारयति। सांवत्सरो ज्यौतिषिकः। अग्नेर्निमित्तानि शुभाशुभानि चिह्नानि गृह्णीयात्। युगलकम् ॥३०॥

अथ शुभाशुभानि चिह्नान्याह—

इष्टद्रव्याकारः सुरभिः स्निग्धो घनोऽनलोऽर्चिष्मान्।
शुभकृदतोऽन्योऽनिष्टो यात्रायां विस्तरोऽभिहितः ॥३१॥

इष्टं द्रव्यं यदभिरुचितं मनसीप्सितमातपत्रादि तदाकारस्तत्सदृशः। सुरभिः सुगन्धः। स्निग्धोऽरूक्षः। घनः सन्ततः। अर्चिष्मान् ज्वालावान्, एवंविधोऽनलो वह्निः शुभकृत् शुभं क्षेमं करोति। अतोऽस्मादन्योऽनिष्टो न शुभः। एतदेव विपर्ययेण यदभिहितं तदनिष्टम्। यथा—अनिष्टद्रव्याकारः, असुरभिः, अस्निग्धः, अघनः, ज्वालारहितः, एतद्विपर्ययमशुभमिति। यात्रायां विस्तरोऽभिहितः। योगयात्रायां विस्तर उक्तो मया तदेह न विस्तृतः। विस्तरेण तदा न कथितः। तथा च योगयात्रायाम्—

कृतेऽपि यत्नेऽपि कृशः कृशानुर्घातव्यकाष्ठाविमुखो नतार्चिः।
वामे कृतावर्तशिखोऽतिधूमो विच्छिन्नसाकम्पविलीनमूर्तिः॥

सिमिसिमायति चास्य हविर्हुतं सुरधनुः सदृशः कपिलोऽथवा।
रुधिरपीतकबभ्रुहरिच्छविः परुषमूर्तिरनिष्टकरोऽनलः॥

खरकरभकवानरानुरूपो निगडविभीषणशस्त्ररूपभृद्वा।
शवरुधिरवसास्थिमज्जगन्धो हुतभुगनिष्टफलः स्फुलिङ्गकृच्च॥

चर्मविपाटनतुल्यनिनादो जर्जरदर्दुररूक्षरवो वा।
आकुलयंश्च पुरोहितमर्त्यान् धूमलवैर्न शिवाय हुताशः॥

हारकुन्दकुमुदेन्दुसन्निभः संहतोऽङ्गसुखदो महोदयः।
अङ्कुशातपनिवारणाकृतिर्हूयतेऽल्प उपमानहव्यभुक्॥

उत्थाय स्वयमुज्ज्वलार्चिरनलः स्वाहावसाने हवि-
र्भुङ्क्ते देहसुखप्रदक्षिणगतिः स्निग्धो महान् संहतः।
निर्धूमः सुरभिः स्फुलिङ्गरहितो घातानुलोमो मृदु-
र्मुक्तेन्दीवरकाञ्चनद्युतिधरो यातुर्जयं संयति॥

इष्टद्रव्यघटातपत्रतुरगश्रीवृक्षशैलाकृति-
र्भेर्यब्दोदधिदुन्दुभीतशकटस्निग्धस्वनैः पूजितः।
नेष्टः प्रोक्तविपर्यये हुतवहः स्निग्धो यथाभीष्टदः
सव्येऽङ्गे नृपतेर्दहन्नतिशुभः शेषं च लोकाद्वदेत्॥इति॥३१॥

अथान्यलक्षणमाह—

स्वाहावसानसमये स्वयमुज्ज्वलार्चिः
स्निग्धः प्रदक्षिणशिखो हुतभुग् नृपस्य।
गङ्गादिवाकरसुताजलचारुहारां
धात्रीं समुद्ररशनां वशगां करोति॥३२॥

एवंरूपो हुतभुगग्निर्नृपस्य राज्ञः समुद्ररशनां समुद्रमेखलां धात्रीं भूमिं वशगां करोति। कीदृशीं धात्रीम्? गङ्गादिवाकरसुताजलचारुहाराम्, गङ्गा जाह्नवी, दिवाकरसुता यमुना, तयोर्यज्जलं सलिलं तदेव चारुर्दर्शनीयो हारो यस्यास्ताम्। कीदृशोऽग्निः? स्वाहावसानसमये पूर्णाहुतिदानकाले स्वयमेवोज्ज्वलार्चिः, स्वयमेवोज्ज्वलोऽर्चिर्यस्याग्नेः। स्निग्धो निर्मलः। प्रदक्षिणशिखः, प्रादक्षिण्येन शिखा ज्वाला यस्येत्यर्थः॥३२॥

अन्यदाह—

चामीकराशोककुरण्टकाब्ज-
वैदूर्यनीलोत्पलसन्निभेऽग्नौ ।
न ध्वान्तमन्तर्भवनेऽवकाशं
करोति रत्नांशुहतं नृपस्य ॥३३॥

एवंविधेऽग्नौ नृपस्य राज्ञो ध्वान्तमन्धकारम् । अन्तर्भवने गृहमध्ये अवकाशं न करोति । यतो रत्नांशुहतम् , रत्नानामंशवो रत्नांशवस्तैर्हतं नष्टं रत्नांशुहतम् । रत्नांशुहतमित्यनेन रत्नलाभ उक्तः । कीदृशेऽग्नौ? चामीकरं सुवर्णम्, अशोकः पुष्पविशेषः कुरण्टकश्च, अब्जं पद्मम्, वैदूर्यो रत्नविशेषः, नीलोत्पलमिन्दीवरम्, एषां सन्निभे अग्नौ शुभः प्रत्यासन्नो भवति ॥३३॥

अन्यदपि लक्षणमाह—

येषां रथौघार्णवमेघदन्तिनां
समस्वनोऽग्निर्यदि वापि दुन्दुभेः ।
तेषां मदान्धेभघटावघट्टिता
भवन्ति याने तिमिरोपमा दिशः ॥३४॥

येषां राज्ञां रथौघो गोरथसमूहः। अर्णवः समुद्रः । मेघोऽम्बुदः । दन्ती हस्ती । एषां समस्वनस्तुल्यशब्दोऽग्निर्यदि । वापि दुन्दुभेः, दुन्दुभिर्वाद्यविशेषः तत्समानो वा । तेषां राज्ञां मदान्धा ये इभा हस्तिनः । तेषां या घटास्ताभिरवघट्टिता रुद्धा दिशो याने गमने तिमिरोपमा अन्धकारसदृश्यो भवन्ति । तिमिरोपमा दिश इत्यनेन हस्तिबाहुल्यमुक्तम् ॥३४॥

अन्यदपि वह्निलक्षणमाह—

ध्वजकुम्भहयेभभूभृतामनुरूपे वशमेति भूभृताम् ।
उदयास्तधराधराऽधरा हिमवद्विन्ध्यपयोधरा धरा ॥३५॥

ध्वजश्चिह्नं पताकादि । कुम्भो घटः । हयोऽश्वः । इभो हस्ती । भूभृत् पर्वतः । एषामनुरूपे सदृशेऽग्नौ भूभृतां राज्ञां धरा भूर्वशमेति । कीदृशी धरा ? उदयधराधरः अस्तमयधराधर उदयास्तधराधरौ तावेवाधरावोष्ठौ यस्याः । हिमवद्विन्ध्यौ पयोधरौ स्तनौ यस्याः ॥३५॥

अथान्यदपि वह्निलक्षणमाह—

द्विरदमदमहीसरोजलाजाघृतमधुना च हुताशने सगन्धे ।
प्रणतनृपशिरोमणिप्रभाभिर्भवति पुरश्छुरितेव भूर्नृपस्य ॥३६॥

द्विरदो हस्ती तस्य मदो मधुजलम्। मही भूः। सरोजं पद्मम्। लाजाः प्रसिद्धाः। घृतमाज्यम्। मधु माक्षिकम्। एषां सगन्धे सदृशगन्धे। हुताशने अग्नौ। नृपस्य राज्ञः। भूर्भूमिः। पुरोऽग्रतः। प्रणतानां प्रह्वाणां नृपाणां राज्ञां शिरोमणयश्चूडारत्नानि। तेषां याः प्रभा दीप्तयस्ताभिः छुरिता रञ्जितेव भाति ॥३६॥

अत्र यदुक्तमग्निलक्षणं तदन्यत्रापि चिन्त्यमित्याह—

उक्तं यदुत्तिष्ठति शक्रकेतौ शुभाशुभं सप्तमरीचिरूपैः।
तज्जन्मयज्ञग्रहशान्तियात्राविवाहकालेष्वपि चिन्तनीयम् ॥३७॥

शक्रकेताविन्द्रध्वजे उत्तिष्ठति सति यच्छुभाशुभं सदसत्फलं सप्तमरीचिरूपैः, सप्तमरीचिरग्निस्तस्य रूपैर्यदुक्तं यत्कथितं तत्सर्वं जन्मसंभये। यज्ञे यज्ञकाले, ग्रहशान्तौ, यात्रायाम्, विवाहकाले च। एवमादिष्वपि चिन्तनीयम् ॥३७॥

तत्किं कुर्यादित्याह—

गुडपूपपायसाद्यैर्विप्रानभ्यर्च्य दक्षिणाभिश्च।
श्रवणेन द्वादश्यामुत्थाप्योऽन्यत्र वा श्रवणात् ॥३८॥

गुडः इक्षुविकारः। पूपो मुद्गकृतो मिश्रितो वा तण्डुलेन सह। पायसं प्रसिद्धम्। आदिग्रहणादोदनमोदकलोपिकाश्च गृह्यन्ते। एतैर्विप्रान् ब्राह्मणानभ्यर्च्य सम्पूज्य। न केवलं गुडपूपपायसाद्यैः, दक्षिणाभिश्च पूजयित्वा द्वादश्यां श्रवणेन नक्षत्रेणोत्थाप्य उत्थापनीयः। श्रवणादन्यत्र वा द्वादश्यामुत्थापनीयः। एतदुक्तं भवति—द्वादश्यां श्रवणो भवतु मा वा सर्वत्रोत्थापनं कार्यम्। तथा च गर्गः—

तत्र श्रवणयोगेन [1]ध्वजोत्थापनं प्रशस्यते।
द्वादश्यां विजये वाश्वमुहूर्त्ते वा दिनेऽथवा ॥इति ॥३८॥

अधुना शक्रकुमारीणां लक्षणं श्लोकद्वयेनाह—

शक्रकुमार्यः कार्याः प्राह मनुः सप्त पञ्च वा तज्ज्ञैः।
नन्दोपनन्दसंज्ञे पादोनार्द्धे ध्वजोच्छ्रायात् ॥३९॥
षोडशभागाभ्यधिके जयविजये द्वे वसुन्धरे चान्ये।
अधिका शक्रजनित्री मध्येऽष्टांशेन चैतासाम् ॥४०॥

---

१. अत्र ध्वजोत्थानमिति पाठः साधुः।

मनुरेवं प्राह, एवमुक्तवान्। यथा तज्ज्ञैः शक्रध्वजलक्षणज्ञैः सप्त पञ्च वा शक्रकुमार्यः कार्याः। तथा च गर्गः —

दृढकाष्ठकृताः पञ्च सप्त वा लक्षणान्विताः।
इन्द्रध्वजस्य शोभार्थं कुमारीः कारयेद् द्विजः॥

नन्दोपनन्दसंज्ञे इति। नन्दोपनन्दासंज्ञे द्वे ध्वजोच्छ्रायाद्यथासङ्ख्यं पादोनार्द्धे कार्ये। नन्दा ध्वजप्रमाणचतुर्भागोना कार्या। उपनन्दा ध्वजार्द्धप्रमाणेनेति॥३९॥

अत्राचार्येणेन्द्रध्वजप्रमाणं सामान्येनोक्तम्। गर्गादिभिर्विशेषेणोक्तम्। तथा च गर्गः—

अष्टाविंशत्करा यष्टिरष्टहस्ता ततोऽपरा।
विष्कम्भश्चाङ्गुलैस्तस्याः षड्भिर्द्विगुणितैः स्मृतः॥
सभग्रमनुलोमं वा तक्षं प्राक् शिखयान्वितम्।
कुर्यादिन्द्रध्वजं शुभ्रं सारदारुमयं शुभम्॥

षोडशभागेति। नन्दोपनन्दसंज्ञाभ्यां यथाक्रमं जयविजयें द्वे षोडशभागाधिके कार्ये। जयविजयाभ्यां सकाशात् षोडशभागाभ्यधिके अन्ये वसुन्धरासंज्ञे ध्वजे कार्ये। एतासां सर्वासां मध्ये शक्रजनित्री इन्द्रमाताऽष्टांशेनाष्टांशाधिका वसुन्धरातः कार्येति। युगलकम्॥४०॥

अथान्यदपि शक्रकेतुलक्षणमाह—

प्रीतैः कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः।
तानि क्रमेण दद्यात् पिटकानि विचित्ररूपाणि॥४१॥

पुरा पूर्वं सुरकेतोरिन्द्रध्वजस्य प्रीतैः प्रीतिमद्भिर्विबुधैर्देवैर्यानि भूषणानि अलङ्करणानि कृतानि तानि च क्रमेण परिपाट्या विचित्ररूपाणि पिटकानि दद्यात्॥४१॥

तानि सर्वाण्याहाष्टभिः श्लोकैः—

रक्ताशोकनिकाशं चतुरस्रं विश्वकर्मणा प्रथमम्।
रशना स्वयम्भुवा शङ्करेण चानेकवर्णगा दत्ता॥४२॥
अष्टाश्रि नीलरक्तं तृतीयमिन्द्रेण भूषणं दत्तम्।
असितं यमश्चतुर्थं मसूरकं कान्तिमदयच्छत्॥४३॥

मञ्जिष्ठाभं वरुणः षडश्रि तत्पञ्चमं जलोर्मिनिभम्।
मायूरं केयूरं षष्ठं वायुर्जलदनीलम् ॥४४॥
स्कन्दः स्वं केयूरं सप्तममदद् ध्वजाय बहुचित्रम्।
अष्टममनलज्वालासङ्काशं हव्यभुग्वृत्तम् ॥४५॥
वैदूर्यसदृशमिन्द्रो नवमं ग्रैवेयकं ददावन्यत्।
रथचक्राभं दशमं सूर्यस्त्वष्टा प्रभायुक्तम् ॥४६॥
एकादशमुद्वंशं विश्वेदेवाः सरोजसङ्काशम्।
द्वादशमपि च निवेशमृषयो नीलोत्पलाभासम् ॥४७॥
किञ्चिदधऊर्ध्वनिर्मितमुपरि विशालं त्रयोदशं केतोः।
शिरसि बृहस्पतिशुक्रौ लाक्षारससन्निभं ददतुः ॥४८॥
यद्यद्येन विभूषणममरेण विनिर्मितं ध्वजस्यार्थे।
तत्तत्तद्दैवत्यं विज्ञातव्यं विपश्चिद्भिः ॥४९॥

रक्ताशोकनिकाशं रक्ताशोकसदृशप्रभं चतुरस्रं चतस्रोऽश्रयो यस्य तत् तथाभूतं विश्वकर्मणा प्रथमं विभूषणमिन्द्रध्वजाय दत्तम्। स्वयम्भुवा ब्रह्मणा। शङ्करेण महेश्वरेण अनेकवर्णगा नानावर्णा रशना मेखला दत्ता द्वितीया ॥४२॥

अष्टाश्रीति। इन्द्रेण शक्रेण तृतीयं भूषणमलङ्करणम्। अष्टाश्रि, अष्टावश्रयो यस्य अष्टकोणमित्यर्थः। नीलरक्तं नीलवर्णं रक्तवर्णं च दत्तम्। चतुर्थमसितं कृष्णवर्णं मसूरकं कान्तिमत् कान्तियुक्तं यमः प्रेताधिपोऽयच्छत् अदात् ॥४३॥

मञ्जिष्ठाभमिति। वरुणोऽप्पाम्पतिर्मञ्जिष्ठाभं मञ्जिष्ठवर्णं षडश्रि षडश्रयो यस्य षट्कोणमित्यर्थः। जलोर्मिनिभं उदकावर्तसदृशमदात् तत्पञ्चमम्। षष्ठं मायूरं मयूरपक्षचितं केयूरं बाहुवर्तकं जलदनीलं मेघवत् श्यामं वायुरदात् ॥४४॥

स्कन्दः कुमारः स्वमात्मीयं केयूरं बाहुवर्तकं बहुचित्रं नानावर्णं सप्तमं ध्वजायादात्। अनलज्वालासंकाशं वह्निशिखासमकान्ति वृत्तं परिवर्तुलं हव्यभुगग्निरष्टममदात् ॥४५॥

वैदूर्येति। अन्यदपरं ग्रैवेयकं ग्रीवाभूषणम्। वैदूर्यसदृशम्। वैदूर्यमणितुल्यप्रभं नवममिन्द्रो ददौ। सूर्य आदित्यो रथचक्राभं रथचक्रसदृशं त्वष्टा नामार्कः प्रभायुक्तं कान्तिसहितं दशमं ददौ ॥४६॥

एकादशेति। विश्वदेवः सरोजसंकाशं पद्मसदृशमुद्वंशसंज्ञमेकादशं ददौ। ऋषयो मुनयो निवेशं नाम नीलोत्पलाभासमिन्दीवरसदृशकान्ति द्वादशं ददुः ॥४७॥

किञ्चिदिति। किञ्चिदध ऊर्ध्वं निर्मितम्। ईषदधोभागे रचितम्। ईषच्चोर्ध्वभागे रचितमुपर्यग्रतो विशालं विस्तीर्णं लाक्षारससदृशं लोहितकान्ति त्रयोदशं केतोरिन्द्रध्वजस्य शिरसि मूर्ध्नि बृहस्पतिशुक्रौ गुरुभार्गवौ ददतुः ॥४८॥

यद्यद्येनेति। ध्वजस्येन्द्रध्वजस्यार्थे येन येन देवेन यद्यद्विभूषणमलङ्करणं विनिर्मितं रचितं तत्तत्तस्माद्दैवत्यम्। स एव देवता अस्येति विपश्चिद्भिः शास्त्रज्ञैर्विज्ञातव्यम्। कुलकम् ॥४९॥

अधुना पिटकस्य परिमाणमाह—

ध्वजपरिमाणत्र्यंशः परिधिः प्रथमस्य भवति पिटकस्य।
परतः प्रथमात् प्रथमादष्टांशाष्टांशहीनानि ॥५०॥

ध्वजस्येन्द्रध्वजस्य यत्परिमाणमुक्तं तस्माद्यस्तृतीयोंऽशस्तृतीयो भागस्तावत्सूक्ष्मं प्रथमस्य पिटकस्य परिधिर्भवति। ततः प्रथमात् पिटकात्परतोऽन्यानि यानि द्वादशपिटकानि तानि सर्वाण्यष्टांशहीनानि कार्याणि। एतदुक्तं भवति—प्रथमात् पिटकाद् द्वितीयस्याष्टांशहीनः परिधिः कार्यः। द्वितीयातृतीयस्याष्टांशोन इत्यनेन क्रमेण यावत्त्रयोदशं पिटकम् ॥५०॥

कस्मिन् दिने पिटकैः पूरणं कार्यमित्याह—

कुर्यादहनि चतुर्थे पूरणमिन्द्रध्वजस्य शास्त्रज्ञः।
मनुना चागमगीतान् मन्त्रानेतान् पठेन्नियतः ॥५१॥

शास्त्रज्ञ इन्द्रध्वजलक्षणवित् चतुर्थेऽहनि पञ्चदश्यामिन्द्रध्वजस्य पिटकैः पूरणं भरणं कुर्यात्। कीदृशः? नियतः प्रह्वः। एतान् मन्त्रान् वक्ष्यमाणान् पठेत् कीर्तयेत्। कीदृशान्? मनुना नृपेण चागमगीतान्, आगमादुक्तान् ॥५१॥

तानाह श्लोकचतुष्टयेन—

हरार्कवैवस्वतशक्रसोमैर्धनेशवैश्वानरपाशभृद्भिः ।
महर्षिसंघैः सदिगप्सरोभिः शुक्राङ्गिरःस्कन्दमरुद्गणैश्च ॥५२॥
यथा त्वमूर्जस्करणैकरूपैः समर्चितस्त्वाभरणैरुदारैः।
तथेह तान्याभरणानि यागे शुभानि सम्प्रीतमना गृहाण ॥५३॥
अजोऽव्ययः शाश्वत एकरूपो विष्णुर्वराहः पुरुषः पुराणः।
त्वमन्तकः सर्वहरः कृशानुः सहस्रशीर्षः शतमन्युरीड्यः ॥५४॥

कविं सप्तजिह्वं त्रातारमिन्द्रं स्ववितारं सुरेशम्।
ह्वयामि शक्रं वृत्रहणं सुषेणमस्माकं वीरा उत्तरा भवन्तु ॥५५॥

हरो महादेवः। अर्क आदित्यः। वैवस्वतो यमः। शक्र इन्द्रः। सोमश्चन्द्रः। तथा धनेशो वैश्रवणः। वैश्वानरोऽग्निः। पाशभृद्वरुणः। एतैः सुरैर्महर्षिसङ्घैर्महर्षीणां वृन्दैरेतैः किम्भूतैः। सदिगप्सरोभिर्दिग्भिराशाभिः अप्सरोभिः सहितैः। तथा शुक्रो भार्गवः। अङ्गिरा बृहस्पतिः। स्कन्दः कुमारः। मरुद्गणो मरुतां सङ्घः। एतैः सर्वैस्त्वम् ॥५२॥

यथा येन प्रकारेण उदारैः श्रेष्ठैराभरणैः। ऊर्जस्करणैकरूपैः समर्चितः पूजितः। तथा तेनैव प्रकारेणेहास्मिन् यागे शुभानि तान्येवाभरणानि सम्प्रीतमनास्तुष्टचित्तो गृहाण ॥५३॥

अजोऽव्यय इति। त्वमजो नाजायत इति अजः। अव्ययो न व्ययं याति। अक्षय इत्यर्थः। शाश्वतः सार्वदिकः। एकरूपो बहुरूपरहितः। विष्णुर्व्यापकः। वराहो वराहरूपः। पुरुषः प्रधानाख्यः। पुराणश्चिरन्तनः। एवंविधस्त्वम्। तथा अन्तको यमः। सर्वहरः सर्वसंहारकः। कृशानुरग्निः। सहस्रशीर्षः सहस्रवक्त्रः। शतमन्युरिन्द्रः। ईड्यः स्तुत्यः ॥५४॥

कविं विद्वांसम्। सप्तजिह्वमग्निम्। त्रातारं पालयितारम्। इन्द्रं परमैश्वर्ययुक्तम्। स्ववितारं सुष्ठुरक्षितारम्। सुरेशं देवप्रभुम्। ह्वयामि आह्वयामि। शक्रमिन्द्रं वृत्रहणं वृत्रस्य हन्तारम्। सुषेणं शोभना सेना यस्य। तमस्माकं नः। वीरा बलिनः। उत्तरा भवन्तु। जयिनो भवन्त्वित्यर्थः। कलापम् ॥५५॥

कस्मिन् काले एतान्मन्त्रान् पठेदित्याह—

प्रपूरणे चोच्छ्रयणे प्रवेशे स्नाने तथा माल्यविधौ विसर्गे।
पठेदिमान्नृपतिः सोपवासो मन्त्रान् शुभान् पुरुहूतस्य केतोः ॥५६॥

प्रपूरणे पिटकाभरणे। उच्छ्रयणे उत्थापने। प्रवेशे नगरप्रवेशे। स्नाने स्नानकाले। तथा माल्यविधौ पुष्पप्रदानकाले। विसर्गे विसर्जने। एतेषु कार्येषु नृपती राजा सोपवास उपोषितः। पुरुहूतस्य केतोरिन्द्रध्वजस्येमानुक्तान् शुभान् मन्त्रान् पठेत् कीर्तयेत् ॥५६॥

कीदृशमिन्द्रध्वजमुत्थापयेदित्याह श्लोकद्वयेन—

क्षत्रध्वजादर्शफलार्द्धचन्द्रैर्विचित्रमालाकदलीक्षुदण्डैः।
सव्यालसिंहैः पिटकैर्गवाक्षैरलङ्कृतं दिक्षु च लोकपालैः ॥५७॥

अच्छिन्नरज्जुं दृढकाष्ठमातृकं
सुश्लिष्टयन्त्रार्गलपादतोरणम्।
उत्थापयेल्लक्ष्म सहस्रचक्षुषः
सारद्रुमाभग्नकुमारिकान्वितम् ॥५८॥

एवंविधं सहस्रचक्षुषो दशशतनयनस्येन्द्रस्य लक्ष्म ध्वजमुत्थापयेत्। कीदृशं छत्रमातपत्रम्। ध्वजः पताका। आदर्शो दर्पणम्। फलं लाङ्गलम्। अर्द्धचन्द्रः खण्डेन्दुः। विचित्रमाला नानाविधाः स्रजः। तथा कदली वृक्षविशेषः। इक्षुदण्डः। एतैः सह। तथा दिक्ष्वष्टासु लोकपालैरिन्द्राग्नियमनैर्ऋतवरुणवायुकुवेरेशानैरलङ्कृतं संयुक्तम् ॥५७॥

तथा अच्छिन्नरज्जुम्, अच्छिन्ना रज्जवो यस्य। इन्द्रध्वजबन्धनार्थमष्टासु दिक्षु अष्टौ रज्जवः कार्याः। तथा च गर्गः—

यथादिशं च रज्ज्वष्टौ मौञ्जीस्रग्दामसंहिताः।
निग्रहार्थं ध्वजे कार्या निबद्धाश्चेन्द्रमण्डले॥

दृढकाष्ठमातृकम्, दृढकाष्ठा मातृका यस्य। इन्द्रध्वजनिष्पीडनार्थं पार्श्वद्वये मातृकाद्वितयं कार्यम्। सुश्लिष्टयन्त्रार्गलपादतोरणम्, सुश्लिष्टं यन्त्रार्गलं पादमूले तोरणं यस्य। अयमर्थः—पादमूलध्वजस्य तोरणं कार्यं तत्रया मातृकाः पार्श्वस्थितानि निरन्तराणि काष्ठानि तासां मातृकाणां तिर्यक्कृत्वा यानि काष्ठानि निक्षिप्यन्ते तान्यर्गलाग्रहणेनोच्यन्ते। ता अर्गलाः सुश्लिष्टाः सुयोजिता यत्र। तथा कुमारिकाः शक्रकुमार्यः। सारद्रुमोऽन्तःसारो वृक्षः। तस्माद्या अभग्नाः कुमारिकास्ताभिरन्वितम्। एतदुक्तं भवति—यास्ताः शक्रकुमार्यः कथितास्ताः सारवृक्षैः कार्या अभग्नाश्चेति। युगलकम् ॥५८॥

कथं केतुमुत्थापयेदित्याह—

अविरतजनरावं मङ्गलाशीःप्रणामैः
पटुपटहमृदङ्गैः शङ्खभेर्यादिभिश्च।
श्रुतिविहितवचोभिः पापठद्भिश्च विप्रै-
[1]रशुभविहतशब्दं केतुमुत्थापयेच्च ॥५९॥

राजा केतुमिन्द्रध्वजमेवमुत्थापयेत्। कीदृशम्? अविरतजनरावम्, मङ्गलैः शुभैः शब्दैः, आशीर्भिः प्रणामैर्नमस्कारैरेतैरविरतः अविच्छिन्नो जनानां

---

१. सुशुभसाहितशब्दमिति पाठान्तरम्।

पुरुषाणां रावः शब्दो यस्य। तथा पटवश्चतुराः शब्दयुक्ता ये पटहास्तथा मृदङ्गा वादित्रविशेषास्तैः सह। तथा शङ्खभेर्यादिभिः, शङ्खैर्भेरीभिर्ढक्काभिः। आदिग्रहणाद् [1]दुन्दुभिकरटवीणावंशा गृह्यन्ते। एतैरपि सह। तथा विप्रैर्ब्राह्मणैः। पापठद्भिः। अत्यर्थं पुनः पुनर्वा पठद्भिः। कीदृशैः? श्रुतिविहितवचोभिः, श्रुतिर्वेदस्तद्विहितानि वचांसि येषां तैः। अशुभा अनिष्टा विहता विशेषेण नष्टाः शब्दा यस्य तथाभूतं केतुम्। अथवा परः पाठो यथा। सुशुभसहितशब्दम्, सुष्ठु शुभसहितः शब्दो यत्र मङ्गलपाठे तत्केतुमुत्थापयेदिति ॥५९॥

कीदृशो राजा केतुमुत्थापयेदित्याह—

फलदधिघृतलाजाक्षौद्रपुष्पाग्रहस्तैः
प्रणिपतितशिरोभिस्तुष्टवद्भिश्च पौरैः।
वृतमनिमिषभर्तुः केतुमीशः प्रजाना-
मरिनगरनताग्रं कारयेद् द्विड्बधाय ॥६०॥

प्रजानामीशो राजा। अनिमिषभर्तुः केतुम्, अनिमिषा देवास्तेषां भर्तुः प्रभोरिन्द्रस्य केतुं ध्वजं द्विषां शत्रूणां बधाय। अरिनगरनताग्रं कारयेत्, अरिनगरे शत्रुपुरे नतमग्रं प्रान्तं यस्य। कीदृशं ध्वजम्? एवंविधैः पौरैः पुरजनैर्वृतं परिवृतम्। कीदृशैः? फलानि श्रीफलप्रभृतीनि। दधि क्षीरविकारः। घृतमाज्यम्। लाजा प्रसिद्धा। क्षौद्रं माक्षिकम्। पुष्पाणि कुसुमानि। एतान्यग्रहस्ते दक्षिणपाणौ येषां तैः। तथा प्रणिपतितं शिरो मूर्धा येषां तैः। तुष्टवद्भिः। अत्यर्थं स्तुवद्भिः। नागरैः शुभशब्दं वाच्यमानैरिति ॥६०॥

कीदृशं शोभनमुत्थानमित्याह—

नातिद्रुतं न च विलम्बितमप्रकम्प-
मध्वस्तमाल्यपिटकादिविभूषणं च।
उत्थानमिष्टमशुभं यदतोऽन्यथा स्या-
त्तच्छान्तिभिर्नरपतेः शमयेत् पुरोधाः ॥६१॥

एवंविधमुत्थानमिष्टं शुभमित्यर्थः? कीदृशम्। नातिद्रुतं न त्वरितम्, न च विलम्बितं नातिध्वस्तम्। अप्रकम्पम्, प्रकम्पश्चलनं येन नोत्पद्यते। तथा अध्वस्तानि माल्यानि पिटकादीनि विभूषणानि येन तत्। आदिग्रहणाच्छत्रध्वजादर्शफलार्द्धचन्द्र इत्यादिकानि गृह्यन्ते। एतेषां ध्वंसो नाशो येन न भवति। अतोऽन्यथा

---

१. दुन्दुभिपणवकरटवीणावंशं गृह्यत इति पाठः साधुः।

यदुत्थानं तन्नरपते राज्ञोऽशुभमनिष्टं स्याद्ब्रूवेत्। तच्च पुरोधाः पुरोहितः शान्तिभिरुपघातप्रतीकारैः शमयेत्। तथा च गर्गः—

अविध्वस्तमनाधूतमद्रुताजिह्ममूर्ध्वगम्।
इन्द्रध्वजसमुत्थानं क्षेमसौभिक्षकारकम्॥
निर्घातोल्कामहीकम्पा दीप्ताश्च मृगपक्षिणः।
उच्छ्रीयमाणे चण्डा वा वायवः स्युर्भयाय ते॥इति॥६१॥

अथोच्छ्रिते च तस्मिन् शुभाशुभज्ञानमाह श्लोकपञ्चकेन—

क्रव्यादकौशिककपोतककाककङ्कैः[1]
केतुस्थितैर्महदुशन्ति भयं नृपस्य।
चाषेण चापि युवराजभयं वदन्ति
श्येनो विलोचनभयं निपतन् करोति॥६२॥
छत्रभङ्गपतने नृपमृत्यु-
स्तस्करान् मधु करोति निलीनम्।
हन्ति चाप्यथ पुरोहितमुल्का
पार्थिवस्य महिषीमशनिश्च॥६३॥
राज्ञीविनाशं पतिता पताका
करोत्यवृष्टिं पिटकस्य पातः।
मध्याग्रमूलेषु च केतुभङ्गो
निहन्ति मन्त्रिक्षितिपालपौरान्॥६४॥
धूमावृते शिखिभयं तमसा च मोहो
व्यालैश्च भग्नपतितैर्न भवन्त्यमात्याः।
ग्लायन्त्युदक्प्रभृति च क्रमशो द्विजाद्यान्
भङ्गे तु बन्धकिबधः कथितः कुमार्याः॥६५॥
रज्जूत्सङ्गच्छेदने बालपीडा
राज्ञो मातुः पीडनं मातृकायाः।
यद्यत् कुर्युश्चारणा बालका वा
तत्तत्तादृग्भावि पापं शुभं वा॥६६॥

---

१. गृध्रैरिति पाठान्तरम्।

क्रव्यादा मांसाशिनो विहगाः। कौशिक उलूकः। कपोतः पारावतः। काको वायसः। कङ्कः पक्षिविशेषः। गृध्रो वेति पाठः। एतैः केतुस्थितैरिन्द्रध्वजोपविष्टैर्नृपस्य राज्ञो महद्भयमुशन्ति कथयन्ति। चाषः पक्षी। तेन ध्वजस्थेन युवराजभयं वदन्ति। श्येनो वाजिको निपतन्नुपविशन् विलोचनभयं चक्षुर्नाशं करोति ॥६२॥

तथा छत्रस्यातपत्रस्य भङ्गे स्फुटने पतने वा नृपस्य राज्ञो मृत्युर्भवति। मधुशब्देन मधुमक्षिकोच्यते। मधु निलीनं तत्र संश्लिष्टं तस्करान् करोति। उल्काप्यथ पतिता पुरोहितं हन्ति नाशयति। अशनिः पतिता पार्थिवस्य राज्ञो महिषीं प्रधानां स्त्रियं हन्ति ॥६३॥

पताका पतिता राज्ञ्या विनाशं करोति। पिटकस्य पातः पतनमवृष्टिमवर्षणं करोति। तथा केतोर्मध्याद् भङ्गो मन्त्रिणो हन्ति। अग्राद्भङ्गः क्षितिपालं राजानं निहन्ति। मूलाद्भङ्गः पौरान् पुरजनान्निहन्ति ॥६४॥

तथा केतौ धूमावृते धूमेन व्याप्ते शिखिभयमग्निभयं भवति। तमसा वृते मोहो वैकल्यं भवति। व्यालैर्व्यालैर्भग्नैः स्फुटितैः पतितैश्चामात्या मन्त्रिणो न भवन्ति। उदक्प्रभृतीत्युत्तरादिदिक्चतुष्टये उत्पातैर्दृष्टैर्द्विजाद्यान् ब्राह्मणाद्यान् ग्लायन्ति पीडयन्तीत्यर्थः। तद्यथा--उत्तरस्यां ब्राह्मणान्। पूर्वस्यां क्षत्रियान्। दक्षिणस्यां वैश्यान्। पश्चिमायां शूद्रान् इति। कुमार्या भङ्गे स्फुटने बन्धकीनां वेश्यानां बधः कथित इति ॥६५॥

तथा रज्जूनां यत्र कुत्रचिच्छेदने च बालानां शिशूनां पीडा भवति। तथा मातृकायास्तोरणपार्श्वस्थस्य काष्ठस्य पीडने राज्ञो मातुर्नृपजनन्याः पीडनं भवति। चारणा विदग्धा रङ्गवरा वा, बालकाः शिशवः, एते यद्यत्पापमनिष्टं शुभं वा कुर्युः, तत्तत्तादृग्भावि। तत्तत्तथाभूतं शुभमशुभं वा लोके भवतीत्यर्थः। कुलकम्। तथा च गर्गः—

प्रहृष्टमनसः सर्वे क्रीडेयुर्मुदिता यदि।
यदा जलेन गन्धैश्च विन्द्यात् सौभिक्षलक्षणम् ॥
अमेध्यै रक्तकैः केशैर्भस्मना क्रन्दनेन च।
दुर्भिक्षपीडा विज्ञेया शस्त्रैश्चापि भयं वदेत् ॥इति॥६६॥

अथ विसर्जने विधिमाह—

दिनचतुष्टयमुत्थितमर्चितं
समभिपूज्य नृपोऽह्नि पञ्चमे।
प्रकृतिभिः सह लक्ष्म विसर्जयेद्-
बलभिदः स्वबलाभिविवृद्धये ॥६७॥

बलभिद इन्द्रस्य लक्ष्म चिह्नं स्वबलाभिविवृद्धये आत्मीयबलविवृद्धयर्थं नृपो राजा पञ्चमेऽहनि दिवसे प्रतिपदि समभिपूज्य पूजयित्वा प्रकृतिभिर्मन्त्रिभिः सह विसर्जयेत्। कीदृशं लक्ष्म? दिनचतुष्टयं द्वादशीप्रभृतिदिनचतुष्टयं पौर्णमास्यां यावदुत्थितम्, समुत्थितम्। अर्चितं पूजितम् ॥६७॥

इन्द्रध्वजविधानकर्तुः प्रभावमाह—

उपरिचरवसुप्रवर्तितं नृपतिभिरप्यनुसन्ततं कृतम्।
विधिमिममनुमन्य पार्थिवो न रिपुकृतं भयमाप्नुयादिति ॥६८॥

इमं विधिं पार्थिवो राजा अनुमन्य तमिन्द्रध्वजं सम्पूज्य न क्वचिदपि रिपुकृतं शत्रुकृतं भयं प्राप्नुयात्। कीदृशं विधिम्? उपरिचरवसुप्रवर्तितम्, उपरिचरेणोर्ध्वगामिना वसुना राज्ञा प्रवर्तितम्। तथा नृपतिभी राजभिरप्यनुसन्ततमविच्छिन्नं कृतमिति ॥६८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावैन्द्रध्वज-
सम्पन्नाम द्विचत्वारिंशोध्यायः ॥४२॥

अथ नीराजनं व्याख्यायते।

तत्रादावेव कालनियमप्रदर्शनार्थमाह—

भगवति जलधरपक्ष्मक्षपाकरार्केक्षणे कमलनाभे।
उन्मीलयति तुरङ्गमकरिनरनीराजनं कुर्यात् ॥१॥

भगवति परमैश्वर्ययुक्ते। कमलनाभे नारायणे। जलधरपक्ष्मक्षपाकरार्केक्षणे, जलधरा मेघास्त एव पक्ष्माण्यक्षिरोमाणि ययोस्ते क्षपाकरार्केक्षणे। क्षपाकरश्चन्द्रः। अर्क आदित्यस्तावेवेक्षणे नेत्रे। उन्मीलयति विकाशयति सति। तुरङ्गमाणामश्वानाम्। करिणां हस्तिनाम्। नराणां मनुष्याणाम्। नीरेण जलेन अजनं स्पर्शनं कुर्यात्। अनेन नीराजनस्य वर्षासु निषेध उक्त इति ॥१॥

अथ कालसमयमाहः—

द्वादश्यामष्टम्यां कार्तिकशुक्लस्य पञ्चदश्यां वा।
आश्वयुजे वा कुर्यान्नीराजनसंज्ञितां शान्तिम् ॥२॥

कार्तिकमासशुक्लपक्षद्वादश्यां तिथावष्टम्यां वा पञ्चदश्यां पूर्णिमाया-

ममावस्यायां वा। आश्वयुजशुक्लपक्षे एतास्वेव तिथिषु प्रोक्तासु वा नीराजनसंज्ञितां नीराजनाख्यां शान्तिं कुर्यात् ॥२॥

अथ तद्विधानमाह —

नगरोत्तरपूर्वदिशि प्रशस्तभूमौ प्रशस्तदारुमयम्।
षोडशहस्तोच्छ्रायं दशविपुलं तोरणं कार्यम् ॥३॥

नगरस्य पुरस्योत्तरपूर्वस्यामैशान्यां दिशि, प्रशस्तभूमौ शुभलक्षणसंयुतायां शल्यादिदोषवर्जितायामवनौ, प्रशस्तदारुमयं याज्ञिकवृक्षविनिर्मितम्। षोडशहस्तोच्छ्रायमुच्छ्रितं दशहस्तविपुलं विस्तीर्णं तोरणं कार्यम् ॥३॥

अथ शान्तिगृहलक्षणमाह—

सर्जोदुम्बरककुभशाखामयशान्तिसद्म कुशबहुलम्।
वंशविनिर्मितमत्स्यध्वजचक्रालङ्कृतद्वारम् ॥४॥

सर्जः। उदुम्बरः। ककुभः। ऐते सर्वे वृक्षविशेषाः। एषां शाखामयं लताविनिर्मितं शान्तिसद्म शान्तिगृहं कार्यम्। कुशबहुलं प्रभूतकक्षमयम्। तथा वंशविनिर्मितानि वेणुरचितानि मत्स्यध्वजचक्राणि, मत्स्यो मीनः, ध्वजश्चिह्नम्, चक्रमायुधम्। एतैरलंकृतं शोभितं द्वारं यस्य तथाभूतम् ॥४॥

अथाश्वादीनां दीक्षाविधानमाह—

प्रतिसरया तुरगाणां भल्लातकशालिकुष्ठसिद्धार्थान्।
कण्ठेषु निबध्नीयात् पुष्टचर्थं शान्तिगृहगाणाम् ॥५॥

तुरगाणामश्वानां प्रतिसरया कुंकुमरंजितेन सूत्रेणान्येन पीतेन वा कण्ठेषु गलेषु। भल्लातकं प्रसिद्धम्। शालयः प्रसिद्धाः। कुष्ठम्। सिद्धार्था गौरसर्षपाः। एतत्पुष्टचर्थं पुष्टिकरणाय। शान्तिगृहगाणां शान्तिसद्मस्थानां निबध्नीयात्। तथा च काश्यपः—

शालिजातकसिद्धार्थान् कुष्ठं भल्लातकं तथा।
अश्वेषु कण्ठे बध्नीयात् सप्ताहं शान्तिमाचरेत् ॥ इति ॥५॥

अथ शान्तिविधानमाह—

रविवरुणविश्वदेवप्रजेशपुरुहूतवैष्णवैर्मन्त्रैः ।
सप्ताहं शान्तिगृहे कुर्याच्छान्तिं तुरङ्गाणाम् ॥६॥

रविरादित्यः। वरुणोऽप्पतिः। विश्वेदेवा देवविशेषाः। प्रजेशो ब्रह्मा। पुरुहूत इन्द्रः। विष्णुर्नारायणः। एषां सप्तभिर्मन्त्रैस्तुरङ्गाणामश्वानां शान्तिगृहे स्थितानां सप्ताहं सप्तदिनानि शान्तिं कुर्यात्। तथा च काश्यपः—

पौष्टिकैर्विविधैर्मन्त्रैः पुरोधा ज्वलनं हुतेत्।
हुतान्ते भोजयेद्विप्रान् दक्षिणां विपुलां ददेत्॥ इति॥६॥

अथाश्वानां किं कुर्यादित्याह—

अभ्यर्चिता न परुषं वक्तव्या नापि ताडनीयास्ते।
पुण्याहशङ्खतूर्यध्वनिगीतरवैर्विमुक्तभयाः॥७॥

ते अश्वा अभ्यर्चिताः पूजिताः। परुषमप्रियं न वक्तव्याः। नापि ते ताडनीयाः। कषादिभिर्न हन्तव्याः। तथा पुण्याहरवैः शुभवाक्यशब्दैः माङ्गलीयकैर्वचनैः शङ्खध्वनिभिः शङ्खशब्दैः। तूर्यध्वनिभिः तूर्यशब्दैः। गीतरवैर्गीतशब्दैश्च। विमुक्तं परित्यक्तं भयं भीतिर्यैस्ते तथाविधाः कार्याः॥७॥

ततः सप्ताहात् परतः किं कुर्यादित्याह—

प्राप्तेऽष्टमेऽह्नि कुर्यादुदङ्मुखं तोरणस्य दक्षिणतः।
कुशचीरावृतमाश्रममग्निं पुरतोऽस्य वेद्यां च॥८॥

प्राप्तेऽष्टम इति ततोऽष्टमेऽह्नि दिवसे प्राप्ते तोरणस्य प्राङ्निर्दिष्टस्य दक्षिणभागे आश्रममुदङ्मुखमुत्तराभिमुखं कुशचीरावृतं कुशैर्दर्भैश्चीरैर्वृक्षवल्कलैरावृतं छादितं कुर्यात्। अस्य पुरतोऽग्रतो वेद्यामग्निं कुर्यात्। वेदीलक्षणमत्राचार्येणोक्तमस्माभिरन्यशास्त्रात् प्रदर्श्यते—

यज्ञे चतुःषष्टिकरा विवाहे वेदी द्विजानां द्विनरप्रमाणा।
कार्या ततोऽष्टांशशमक्रमेण राजन्यवैश्यवृषलान्त्यजानाम्॥

तथा च—

सप्तहस्ता ब्राह्मणानां वेदी यज्ञे प्रकीर्तिता।
षट्करा क्षत्रियाणां तु वैश्यानां पञ्च कीर्तिता॥
चतुर्हस्ता तु शूद्राणां विवाहेऽपि विनिश्चिता।
अलाभे सर्ववर्णानां चतुर्हस्ता प्रकीर्तिता॥
व्यन्तराणामतो न्यूना निर्दिष्टा मुनिभिः सदा।
अतो न्यूनाधिका वेदी यजमानस्य मृत्युदा॥

तथा च।

यज्ञे विवाहे वक्ष्यामि वेदिमानं समासतः।
त्रिःसप्तहस्तविस्तारा ब्राह्मणानां शुभावहा॥
क्षत्रियाणां पञ्चदशी वैश्यानां नवसंमिता।
सप्तहस्ता तु शूद्राणां शिल्पिनां पञ्च कीर्तिता॥
त्रिहस्ता व्यन्तराणां तु वेदी सर्वत्र कीर्तिता।
भुवोऽपरोधे मर्त्यानां चातुर्वर्ण्यैः प्रकीर्तिता॥
पञ्चहस्ता कृता वेदी सर्वमाङ्गल्यदायिका।

एवं प्रमाणं ज्ञात्वा तस्याः शुभाशुभलक्षणमाचार्येणैवोक्तम् —

वेदीशुभाशुभविधानविधौ प्रदिष्टा दिक्स्थानमानाभ्यधिका न हीना।
भ्रष्टा प्रमाणेन करोति भङ्गं दिग्वक्त्रसंस्था न च सिद्धिदा स्यात्॥
प्राग्भागहीना नगरस्य नेष्टा पुरोधसो दक्षिणभागवक्त्रा।
नरेन्द्रजायाशुभदा परस्यामुदग्बलेशस्य नृपस्य मध्ये॥इति।

तथा च काश्यपः।

अष्टमेऽह्नि पुरस्कृत्य राजा पौरजनैर्वृतः।
गच्छेच्छान्तिगृहं हृष्टः शङ्खतूर्यरवैः सह॥इति॥८॥

अथ सम्भाराणां लक्षणमाह—

चन्दनकुष्ठसमङ्गाहरितालमनःशिलाप्रियङ्गुवचाः।
दन्त्यमृताञ्जनरजनीसुवर्णपुष्प्यग्निमन्थाश्च ॥९॥

श्वेतां सपूर्णकोशां कटम्भरात्रायमाणसहदेवीः।
नागकुसुमं स्वगुप्तां शतावरीं सोमराजीं च॥१०॥

कलशेष्वेताः कृत्वा सम्भारानुपहरेद्बलिं सम्यक्।
भक्ष्यैर्नानाकारैर्मधुपायसयावकप्रचुरैः ॥११॥

चन्दनं मलयजम्। कुष्ठं प्रसिद्धम्। समङ्गा मंजिष्ठा। हरितालं प्रसिद्धम्। मनःशिला प्रसिद्धैव। प्रियङ्गुर्गन्धप्रियङ्गुः। वचा प्रसिद्धैव। दन्ती प्रसिद्धैव। अमृता गुडुची। अंजनं स्रोताञ्जनं प्रसिद्धं सौभाञ्जनं वा। रजनी हरिद्रा। सुवर्णपुष्पी प्रसिद्धैव। अग्निमन्था तर्कारी॥९॥

श्वेता गिरिकर्णिका, तां च सपूर्णकोशां पूर्णकोशया सह। कटम्भरां महाश्वेताम्। त्रायमाणं प्रसिद्धम्। सहदेवीं सहगन्धाम्। नागकुसुमं नागपुष्पम्। स्वगुप्ता-

यदुत्थानं तन्नरपते राज्ञोऽशुभमनिष्टं स्याद्ब्रूवेत्। तच्च पुरोधाः पुरोहितः शान्तिभिरुपघातप्रतीकारैः शमयेत्। तथा च गर्गः—

अविध्वस्तमनाधूतमद्रुताजिह्ममूर्ध्वगम्।
इन्द्रध्वजसमुत्थानं क्षेमसौभिक्षकारकम्॥
निर्घातोल्कामहीकम्पा दीप्ताश्च मृगपक्षिणः।
उच्छ्रीयमाणे चण्डा वा वायवः स्युर्भयाय ते॥इति॥६१॥

अथोच्छ्रिते च तस्मिन् शुभाशुभज्ञानमाह श्लोकपञ्चकेन—

क्रव्यादकौशिककपोतककाककङ्कैः[1]
केतुस्थितैर्महदुशन्ति भयं नृपस्य।
चाषेण चापि युवराजभयं वदन्ति
श्येनो विलोचनभयं निपतन् करोति॥६२॥
छत्रभङ्गपतने नृपमृत्यु-
स्तस्करान् मधु करोति निलीनम्।
हन्ति चाप्यथ पुरोहितभुल्का
पार्थिवस्य महिषीमशनिश्च॥६३॥
राज्ञोविनाशं पतिता पताका
करोत्यवृष्टिं पिटकस्य पातः।
मध्याग्रमूलेषु च केतुभङ्गो
निहन्ति मन्त्रिक्षितिपालपौरान्॥६४॥
धूमावृते शिखिभयं तमसा च मोहो
व्यालैश्च भग्नपतितैर्न भवन्त्यमात्याः।
ग्लायन्त्युदक्प्रभृति च क्रमशो द्विजाद्यान्
भङ्गे तु बन्धकिबधः कथितः कुमार्याः॥६५॥
रज्जूत्सङ्गच्छेदने बालपीडा
राज्ञो मातुः पीडनं मातृकायाः।
यद्यत् कुर्युश्चारणा बालका वा
तत्तत्तादृग्भावि पापं शुभं वा॥६६॥

---

१. गृध्रैरिति पाठान्तरम्।

क्रव्यादा मांसाशिनो विहगाः। कौशिक उलूकः। कपोतः पारावतः। काको वायसः। कङ्कः पक्षिविशेषः। गृध्रो वेति पाठः। एतैः केतुस्थितैरिन्द्रध्वजोपविष्टैर्नृपस्य राज्ञो महद्भयमुशन्ति कथयन्ति। चाषः पक्षी। तेन ध्वजस्थेन युवराजभयं वदन्ति। श्येनो वाजिको निपतन्नुपविशन् विलोचनभयं चक्षुर्नाशं करोति॥६२॥

तथा छत्रस्यातपत्रस्य भङ्गे स्फुटने पतने वा नृपस्य राज्ञो मृत्युर्भवति। मधुशब्देन मधुमक्षिकोच्यते। मधु निलीनं तत्र संश्लिष्टं तस्करान् करोति। उल्काप्यथ पतिता पुरोहितं हन्ति नाशयति। अशनिः पतिता पार्थिवस्य राज्ञो महिषीं प्रधानां स्त्रियं हन्ति॥६३॥

पताका पतिता राज्ञ्या विनाशं करोति। पिटकस्य पातः पतनमवृष्टिमवर्षणं करोति। तथा केतोर्मध्याद् भङ्गो मन्त्रिणो हन्ति। अग्राद्भङ्गः क्षितिपालं राजानं निहन्ति। मूलाद्भङ्गः पौरान् पुरजनान्निहन्ति॥६४॥

तथा केतौ धूमावृते धूमेन व्याप्ते शिखिभयमग्निभयं भवति। तमसा वृते मोहो वैकल्यं भवति। व्यालैर्व्यडैर्भग्नैः स्फुटितैः पतितैश्चामात्या मन्त्रिणो न भवन्ति। उदक्प्रभृतीत्युत्तरादिदिक्चतुष्टये उत्पातैर्दृष्टैर्द्विजाद्यान् ब्राह्मणाद्यान् ग्लायन्ति पीडयन्तीत्यर्थः। तद्यथा--उत्तरस्यां ब्राह्मणान्। पूर्वस्यां क्षत्रियान्। दक्षिणस्यां वैश्यान्। पश्चिमायां शूद्रान् इति। कुमार्या भङ्गे स्फुटने बन्धकीनां वेश्यानां बधः कथित इति॥६५॥

तथा रज्जूनां यत्र कुत्रचिच्छेदने च बालानां शिशूनां पीडा भवति। तथा मातृकायास्तोरणपार्श्वस्थस्य काष्ठस्य पीडने राज्ञो मातुर्नृपजनन्याः पीडनं भवति। चारणा विदग्धा रङ्गवरा वा, बालकाः शिशवः, एते यद्यत्पापमनिष्टं शुभं वा कुर्युः, तत्तत्तादृग्भावि। तत्तत्तथाभूतं शुभमशुभं वा लोके भवतीत्यर्थः। कुलकम्। तथा च गर्गः—

प्रहृष्टमनसः सर्वे क्रीडेयुर्मुदिता यदि।
यदा जलेन गन्धैश्च विन्द्यात् सौभिक्षलक्षणम्॥
अमेध्यै रक्तकैः केशैर्भस्मना क्रन्दनेन च।
दुर्भिक्षपीडा विज्ञेया शस्त्रैश्चापि भयं वदेत्॥इति॥६६॥

अथ विसर्जने विधिमाह—

दिनचतुष्टयमुत्थितमर्चितं
समभिपूज्य नृपोऽहनि पञ्चमे।
प्रकृतिभिः सह लक्ष्म विसर्जयेद्-
बलभिदः स्वबलाभिविवृद्धये॥६७॥

बलभिद इन्द्रस्य लक्ष्म चिह्नं स्वबलाभिविवृद्धये आत्मीयबलविवृद्धयर्थं नृपो राजा पञ्चमेऽहनि दिवसे प्रतिपदि समभिपूज्य पूजयित्वा प्रकृतिभिर्मन्त्रिभिः सह विसर्जयेत्। कीदृशं लक्ष्म? दिनचतुष्टयं द्वादशीप्रभृतिदिनचतुष्टयं पौर्णमास्यां यावदुत्थितम्, समुत्थितम्। अर्चितं पूजितम् ॥६७॥

इन्द्रध्वजविधानकर्तुः प्रभावमाह—

उपरिचरवसुप्रवर्तितं नृपतिभिरप्यनुसन्ततं कृतम्।
विधिमिममनुमन्य पार्थिवो न रिपुकृतं भयमाप्नुयादिति ॥६८॥

इमं विधिं पार्थिवो राजा अनुमन्य तमिन्द्रध्वजं सम्पूज्य न क्वचिदपि रिपुकृतं शत्रुकृतं भयं प्राप्नुयात्। कीदृशं विधिम्? उपरिचरवसुप्रवर्तितम्, उपरिचरेणोर्ध्वगामिना वसुना राज्ञा प्रवर्तितम्। तथा नृपतिभी राजभिरप्यनुसन्ततमविच्छिन्नं कृतमिति ॥६८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृताविन्द्रध्वज-
सम्पन्नाम द्विचत्वारिंशोध्यायः ॥४२॥

अथ नीराजनं व्याख्यायते।

तत्रादावेव कालनियमप्रदर्शनार्थमाह—

भगवति जलधरपक्ष्मक्षपाकरार्केक्षणे कमलनाभे।
उन्मीलयति तुरङ्गमकरिनरनीराजनं कुर्यात् ॥१॥

भगवति परमैश्वर्ययुक्ते। कमलनाभे नारायणे। जलधरपक्ष्मक्षपाकरार्केक्षणे, जलधरा मेघास्त एव पक्ष्माण्यक्षिरोमाणि ययोस्ते क्षपाकरार्केक्षणे। क्षपाकरश्चन्द्रः। अर्क आदित्यस्तावेवेक्षणे नेत्रे। उन्मीलयति विकाशयति सति। तुरङ्गमाणामश्वानाम्। करिणां हस्तिनाम्। नराणां मनुष्याणाम्। नीरेण जलेन अजनं स्पर्शनं कुर्यात्। अनेन नीराजनस्य वर्षासु निषेध उक्त इति ॥१॥

अथ कालसमयमाहः—

द्वादश्यामष्टम्यां कार्तिकशुक्लस्य पञ्चदश्यां वा।
आश्वयुजे वा कुर्यान्नीराजनसंज्ञितां शान्तिम् ॥२॥

कार्तिकमासशुक्लपक्षद्वादश्यां तिथावष्टम्यां वा पञ्चदश्यां पूर्णिमाया-

ममावस्यायां वा। आश्वयुजशुक्लपक्षे एतास्वेव तिथिषु प्रोक्तासु वा नीराजनसंज्ञितां नीराजनाख्यां शान्तिं कुर्यात् ॥२॥

अथ तद्विधानमाह ——

नगरोत्तरपूर्वदिशि प्रशस्तभूमौ प्रशस्तदारुमयम्।
षोडशहस्तोच्छ्रायं दशविपुलं तोरणं कार्यम् ॥३॥

नगरस्य पुरस्योत्तरपूर्वस्यामैशान्यां दिशि, प्रशस्तभूमौ शुभलक्षणसंयुतायां शल्यादिदोषवर्जितायामवनौ, प्रशस्तदारुमयं याज्ञिकवृक्षविनिर्मितम्। षोडशहस्तोच्छ्रायमुच्छ्रितं दशहस्तविपुलं विस्तीर्णं तोरणं कार्यम् ॥३॥

अथ शान्तिगृहलक्षणमाह——

सर्जोदुम्बरककुभशाखामयशान्तिसद्म कुशबहुलम्।
वंशविनिर्मितमत्स्यध्वजचक्रालङ्कृतद्वारम् ॥४॥

सर्जः। उदुम्बरः। ककुभः। ऐते सर्वे वृक्षविशेषाः। एषां शाखामयं लताविनिर्मितं शान्तिसद्म शान्तिगृहं कार्यम्। कुशबहुलं प्रभूतकक्षमयम्। तथा वंशविनिर्मितानि वेणुरचितानि मत्स्यध्वजचक्राणि, मत्स्यो मीनः, ध्वजश्चिह्नम्, चक्रमायुधम्। एतैरलंकृतं शोभितं द्वारं यस्य तथाभूतम् ॥४॥

अथाश्वादीनां दीक्षाविधानमाह——

प्रतिसरया तुरगाणां भल्लातकशालिकुष्ठसिद्धार्थान्।
कण्ठेषु निबध्नीयात् पुष्टचर्थं शान्तिगृहगाणाम् ॥५॥

तुरगाणामश्वानां प्रतिसरया कुंकुमरंजितेन सूत्रेणान्येन पीतेन वा कण्ठेषु गलेषु। भल्लातकं प्रसिद्धम्। शालयः प्रसिद्धाः। कुष्ठम्। सिद्धार्था गौरसर्षपाः। एतत्पुष्टचर्थं पुष्टिकरणाय। शान्तिगृहगाणां शान्तिसद्मस्थानां निबध्नीयात्। तथा च काश्यपः——

शालिजातकसिद्धार्थान् कुष्ठं भल्लातकं तथा।
अश्वेषु कण्ठे बध्नीयात् सप्ताहं शान्तिमाचरेत् ॥ इति ॥५॥

अथ शान्तिविधानमाह——

रविवरुणविश्वदेवप्रजेशपुरुहूतवैष्णववैर्मन्त्रैः ।
सप्ताहं शान्तिगृहे कुर्याच्छान्तिं तुरङ्गाणाम् ॥६॥

रविरादित्यः। वरुणोऽपाम्पतिः। विश्वेदेवा देवविशेषाः। प्रजेशो ब्रह्मा। पुरुहूत इन्द्रः। विष्णुर्नारायणः। एषां सप्तभिर्मन्त्रैस्तुरङ्गाणामश्वानां शान्तिगृहे स्थितानां सप्ताहं सप्तदिनानि शान्तिं कुर्यात्। तथा च काश्यपः—

पौष्टिकैर्विविधैर्मन्त्रैः पुरोधा ज्वलनं हुतेत्।
हुतान्ते भोजयेद्विप्रान् दक्षिणां विपुलां ददेत्॥ इति॥६॥

अथाश्वानां किं कुर्यादित्याह—

अभ्यर्चिता न परुषं वक्तव्या नापि ताडनीयास्ते।
पुण्याहशङ्खतूर्यध्वनिगीतरवैर्विमुक्तभयाः॥७॥

ते अश्वा अभ्यर्चिताः पूजिताः। परुषमप्रियं न वक्तव्याः। नापि ते ताडनीयाः। कषादिभिर्न हन्तव्याः। तथा पुण्याहरवैः शुभवाक्यशब्दैः माङ्गलीयकैर्वचनैः शङ्खध्वनिभिः शङ्खशब्दैः। तूर्यध्वनिभिः तूर्यशब्दैः। गीतरवैर्गीतशब्दैश्च। विमुक्तं परित्यक्तं भयं भीतिर्यैस्ते तथाविधाः कार्याः॥७॥

ततः सप्ताहात् परतः किं कुर्यादित्याह—

प्राप्तेऽष्टमेऽह्नि कुर्यादुदङ्मुखं तोरणस्य दक्षिणतः।
कुशचीरावृतमाश्रममग्निं पुरतोऽस्य वेद्यां च॥८॥

प्राप्तेऽष्टम इति ततोऽष्टमेऽह्नि दिवसे प्राप्ते तोरणस्य प्राङ्निर्दिष्टस्य दक्षिणभागे आश्रममुदङ्मुखमुत्तराभिमुखं कुशचीरावृतं कुशैर्दर्भैश्चीरैर्वृक्षवल्कलैरावृतं छादितं कुर्यात्। अस्य पुरतोऽग्रतो वेद्यामग्निं कुर्यात्। वेदीलक्षणमत्राचार्येणोक्तमस्माभिरन्यशास्त्रात् प्रदर्श्यते—

यज्ञे चतुःषष्टिकरा विवाहे वेदी द्विजानां द्विनरप्रमाणा।
कार्या ततोऽष्टांशमक्रमेण राजन्यवैश्यवृषलान्त्यजानाम्॥

तथा च—

सप्तहस्ता ब्राह्मणानां वेदी यज्ञे प्रकीर्तिता।
षट्करा क्षत्रियाणां तु वैश्यानां पञ्च कीर्तिता॥
चतुर्हस्ता तु शूद्राणां विवाहेऽपि विनिश्चिता।
अलाभे सर्ववर्णानां चतुर्हस्ता प्रकीर्तिता॥
व्यन्तराणामतो न्यूना निर्दिष्टा मुनिभिः सदा।
अतो न्यूनाधिका वेदी यजमानस्य मृत्युदा॥

तथा च।

यज्ञे विवाहे वक्ष्यामि वेदिमानं समासतः।
त्रिःसप्तहस्तविस्तारा ब्राह्मणानां शुभावहा॥
क्षत्रियाणां पञ्चदशी वैश्यानां नवसंमिता।
सप्तहस्ता तु शूद्राणां शिल्पिनां पञ्च कीर्तिता॥
त्रिहस्ता व्यन्तराणां तु वेदी सर्वत्र कीर्तिता।
भुवोऽपरोधे मर्त्यानां चातुर्वर्ण्यैः प्रकीर्तिता॥
पञ्चहस्ता कृता वेदी सर्वमाङ्गल्यदायिका।

एवं प्रमाणं ज्ञात्वा तस्याः शुभाशुभलक्षणमाचार्येणैवोक्तम् —

वेदीशुभाशुभविधानविधौ प्रदिष्टा दिक्स्थानमानाभ्यधिका न हीना।
भ्रष्टा प्रमाणेन करोति भङ्गं दिग्वक्रसंस्था न च सिद्धिदा स्यात्॥
प्राग्भागहीना नगरस्य नेष्टा पुरोधसो दक्षिणभागवक्रा।
नरेन्द्रजायाशुभदा परस्यामुदग्बलेशस्य नृपस्य मध्ये॥इति।

तथा च काश्यपः।

अष्टमेऽह्नि पुरस्कृत्य राजा पौरजनैर्वृतः।
गच्छेच्छान्तिगृहं हृष्टः शङ्खतूर्यरवैः सह॥इति॥८॥

अथ सम्भाराणां लक्षणमाह—

चन्दनकुष्ठसमङ्गाहरितालमनःशिलाप्रियङ्गुवचाः।
दन्त्यमृताञ्जनरजनीसुवर्णपुष्प्यग्निमन्थाश्च ॥९॥
श्वेतां सपूर्णकोशां कटम्भरात्रायमाणसहदेवीः।
नागकुसुमं स्वगुप्तां शतावरीं सोमराजीं च॥१०॥
कलशेष्वेताः कृत्वा सम्भारानुपहरेद्बलिं सम्यक्।
भक्ष्यैर्नानाकारैर्मधुपायसयावकप्रचुरैः ॥११॥

चन्दनं मलयजम्। कुष्ठं प्रसिद्धम्। समङ्गा मंजिष्ठा। हरितालं प्रसिद्धम्। मनःशिला प्रसिद्धैव। प्रियङ्गुर्गन्धप्रियङ्गुः। वचा प्रसिद्धैव। दन्ती प्रसिद्धैव। अमृता गुडुची। अंजनं स्रोताञ्जनं प्रसिद्धं सौभाञ्जनं वा। रजनी हरिद्रा। सुवर्णपुष्पी प्रसिद्धैव। अग्निमन्था तर्कारी॥९॥

श्वेता गिरिकर्णिका, तां च सपूर्णकोशां पूर्णकोशया सह। कटम्भरां महाश्वेताम्। त्रायमाणं प्रसिद्धम्। सहदेवीं सहगन्धाम्। नागकुसुमं नागपुष्पम्। स्वगुप्ता-

मात्मगुप्तां कपिकच्छुमित्यर्थः। शतावरी प्रसिद्धा। सोमराजी सोमवल्ली ॥१०॥

एताश्चौषधीः कलशेषु पूर्णघटेष्वभ्यन्तरे कृत्वा संस्थाप्य सम्भारानेतानेव ततः सम्यग्यथाविधानेन बलिमुपहरेत् ढौकयेत्। भक्ष्यैर्मोदकैर्लोपिकापूपादिभिः। नानाकारैर्बहुविधैः। कीदृशैर्मधुपायसयावकप्रचुरैः। मधु माक्षिकम्। पायसं पयोविकारो यत्किञ्चित्क्षीरसम्भवम्। यावकं यावप्रकारः। एतैः प्रचुराः प्रभूता येषु तैः ॥११॥

अन्यच्च —

खदिरपलाशोदुम्बरकाश्मर्यश्वत्थनिर्मिताः समिधः।
स्रुक् कनकाद्रजताद्वा कर्तव्या भूतिकामेन ॥१२॥

खदिरः। पलाशः। उदुम्बरः। काश्मरी। अश्वत्थः। एते सर्व एव वृक्षविशेषा याज्ञिकाः सुप्रसिद्धाः। एभ्यो निर्मिताः सम्भूताः समिधः कार्याः। तथा भूतिकामेन समृद्धिमिच्छता स्रुक् कनकात् सुवर्णात् रजताद्वा कर्तव्या ॥१२॥

ततः किं कुर्यादित्याह—

पूर्वाभिमुखः श्रीमान् वैयाघ्रे चर्मणि स्थितो राजा।
तिष्ठेदनलसमीपे तुरगभिषग्दैववित्सहितः ॥१३॥

राजा नृपः। श्रीमान् श्रीर्विद्यते यस्य। त्रिवर्गसमाश्रयः। श्रीमानित्यनेन राज्ञो महिमानं दर्शयति। सकलप्रतिपत्तियुक्तस्तत्रस्थ इत्यर्थः। पूर्वाभिमुखः पूर्वस्यां दिशि निरीक्षमाणो वैयाघ्रे व्याघ्रस्य चर्मणि स्थित उपविष्टः। अनलसमीपेऽग्निसन्निधौ तुरगभिषग्दैववित्सहितः, तुरगभिषजा अश्ववैद्येन दैवविदा सांवत्सरिकेण सहितः संयुक्तस्तत्र तिष्ठेत् ॥१३॥

अथ दैवविदा तत्र किं कार्यमित्याह—

यात्रायां यदभिहितं ग्रहयज्ञविधौ महेन्द्रकेतौ च।
वेदीपुरोहितानललक्षणमस्मिंस्तदवधार्यम् ॥१४॥

वेद्या अग्न्यागारस्य। पुरोहितस्य हेतुः। अनलस्याग्नेः। लक्षणं यात्रायामभिहितं कथितम्। क्व ग्रहयज्ञविधौ। ग्रहाणां यज्ञविधाने। तथा महेन्द्रकेताविन्द्रध्वजे च यदुक्तं तदस्मिन्नीराजने अवधार्यं लक्षणीयमिति। तथा च यात्रायां ग्रहयज्ञे—

ग्रहयज्ञमतो वक्ष्ये तत्र निमित्तानि लक्षयेद्वेद्याम्।
भङ्गो मानोनायां दिग्भ्रष्टायामसिद्धिश्च ॥
नगरपुरोहितदेवीसेनापतिपार्थिवक्षयं कुरुते।
प्राग्दक्षिणापरोत्तरमध्यमभागेषु या विकला ॥

तथा च पुरोहितस्य—

कम्पोच्छ्वासविजृम्भणप्रचलनस्वेदाश्रुपातक्षुधो-
द्गाराद्यं च पुरोधसः स्मृतिविपच्चानिष्टमन्यच्छुभम्।
आज्यं केशपिपीलकामलयुतं सत्त्वावलीढं च य-
त्तन्नेष्टं शुभमन्यथोपकरणं द्रव्याण्यनूनानि च॥

तथा चानललक्षणम्—

उत्थाय[1] स्वयमुज्ज्वलार्चिरनलः स्वाहावसाने हवि-
र्भुङ्क्ते देहसुखप्रदक्षिणगतिः स्निग्धो महान् संहतः।
निर्धूमः सुरभिः स्फुलिङ्गरहितो यात्रानुलोमो मृदु-
र्मुक्तेन्दीवरकाञ्चनद्युतिधरो वह्निः श्रियं यच्छति॥
इष्टद्रव्यघटातपत्रतुरगश्रीवृक्षशैलाकृति-
र्भेर्यब्दोदधिदुन्दुभीभशकटस्निग्धस्वनैः पूजितः।
नेष्टः प्रोक्तविपर्यये हुतवहः स्निग्धोऽन्यथापीष्टदः
सव्येऽङ्गे नृपतेर्दहन्नतिहितः शेषं च लोकाद्वदेत्॥

तथा महेन्द्रकेताविहैवोक्तम्—

स्वाहावसानसमये स्वयमुज्ज्वलार्चिः॥इति॥१४॥

ततः किं कुर्यादित्याह—

लक्षणयुक्तं तुरगं द्विरदवरं चैव दीक्षितं स्नातम्।
अहतसिताम्बरगन्धस्रग्धूमाभ्यर्चितं कृत्वा॥१५॥
आश्रमतोरणमूलं समुपनयेत् सान्त्वयन् शनैर्वाचा।
वादित्रशङ्खपुण्याहनिःस्वनापूरितदिगन्तम् ॥१६॥

तुरगमश्वम्। द्विरदवरं हस्तिप्रधानं च। लक्षणयुक्तं तुरङ्गं वक्ष्यमाणैः शोभनैरश्वलक्षणैः[2] दीर्घग्रीवाक्षिकूट इत्यादिलक्षणैश्च युक्तम्। तथा द्विरदवरैर्हस्तिलक्षणैस्ता[3]म्रोष्ठतालुवदना इत्यादिकैश्च युक्तम्। दीक्षितं कृतदीक्षं च स्नातम्।

---

१. द्रष्टव्यमस्य ग्रन्थस्य ४५३ पृष्ठम्। तत्र "घातानुलोमः", "यातुर्जयं संयति", "बुन्दुभीतशकट", "स्निग्धो यथाभीष्टदः", "नृपतेर्दहन्नतिशुभः" इति पाठभेदो न साध्वर्थदः। अत्रत्याः पाठाः साधवः—इति।

२. बृहत्संहितायाम् ६६ अध्यायस्य १ श्लोकः।

३. बृहत्संहितायाम् ६७ अध्यायस्य ६ श्लोकः।

अहतेनाक्षतेन सितेन शुक्लेनाम्बरेण वस्त्रेण स्रग्भिर्मालाभिर्धूपैर्गुग्गुलप्रभृतिभिरभ्यर्चितं पूजितं कृत्वा ॥१५॥

तत आश्रमतोरणमूलम्। स्वाश्रमसमीपे यत्तोरणं तन्मूलं तत्र वाचा गिरा सान्त्वयन् शान्तिं कुर्वन् शनैः शनैर्मन्दं मन्दं समुपनयेत् प्रापयेत्। कीदृशं तोरणमूलम्? वादित्रशङ्खपुण्याहनिःस्वनापूरितदिगन्तम्। वादित्राणां पटहमृदङ्गानां पुण्याहानां शुभशब्दानां निःस्वनैः शब्दैरापूरिता जडीकृता दिगन्ता यत्र तथाभूतम् ॥१६॥

अथाश्वगजयोश्चेष्टितमाह—

यद्यानीतस्तिष्ठेद्दक्षिणचरणं हयः समुत्क्षिप्य।
स जयति तदा नरेन्द्रः शत्रून्नचिराद्विना यत्नात् ॥१७॥
त्रस्यन्नेष्टो राज्ञः परिशेषं चेष्टितं द्विपहयानाम्।
यात्रायां व्याख्यातं तदिह विचिन्त्यं यथायुक्ति ॥१८॥

यद्यानीत इति। अत्र हयग्रहणमुपलक्षणार्थम्। तेन हयोऽश्वो द्विरदवरो वा हस्ती यद्यानीतस्तत्र दक्षिणचरणं दक्षिणपादं समुत्क्षिप्य तिष्ठेत्, तदा स नरेन्द्रो राजा शत्रून् रिपून्नचिराच्छीघ्रमेव विना यत्नात् प्रयत्नं विना अनुद्यमेनैव जयति ॥१७॥

त्रस्यन्नुद्विजन् राज्ञो नृपस्य नेष्टो न शुभः। परिशेषमन्यच्चेष्टितं शुभाशुभसूचकं द्विपहयानां हस्त्यश्वानां यात्रायां व्याख्यातं कथितम्। तथा च—

[1]मुहुर्मुहुर्मूत्रशकृत् करोति न ताड्यमानोऽप्यनुलोमयायी।
अकार्यभीतोऽश्रुविलोचनश्च शिवं न भर्तुस्तुरगोऽभिधत्ते ॥

[2]आरोहति क्षितिपतौ विनयोपपन्नो
यात्रानुगोऽन्यतुरगं प्रति ह्रेषते च।
वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं
योऽश्वः स भर्तुरचिरात् प्रतनोति लक्ष्मीम् ॥इत्यादि।

तथा च गजस्य—

[3]स्खलितगतिरकस्मात् त्रस्तकर्णोऽतिदीनः
श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम्।
द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो
भयकृदहितभक्षी नैकशोऽसृक् शकृच्च ॥

---

१. बृहत्संहितायाम् ९३ अध्यायस्य १४ श्लोकः।
२. बृहत्संहितायाम् ९३ अध्यायस्य १३ श्लोकः।
३. बृहत्संहितायाम् ९४ अध्यायस्य १२-१३ श्लोकौ।

वल्मीकस्थाणुगुल्मक्षुपतरुमथनः स्वेच्छया हृष्टदृष्टि-
र्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्रमुन्नाम्य चोच्चैः।
कक्ष्यासन्नाहकाले जनयति च मुहुः शीकरं वृंहितं वा
तत्कालं वा मदाप्तिर्जयकृदथ रदं वेष्टयन् दक्षिणं वा॥

एवमादिकं यदुक्तं तदिहास्मिन्नीराजने यथायुक्ति यथासम्भवं विचिन्त्यं विचार्यम्। यत्सम्भवति तच्चिन्तनीयमित्यर्थः।

"[1]प्रद्वेषो यवसाम्भसां प्रपतनम्" इत्यादिकमश्वस्य सम्भवति। तथा गजस्य।

"[2]क्षीरवृक्षफलपुष्पपादपेष्वापगातटविघट्टितेन वा।
वाममध्यरदभङ्गखण्डनम्" इत्यादिना सम्भवति॥इति॥१८॥

ततः किं कुर्यादित्याह--

पिण्डमभिमन्त्र्य दद्यात् पुरोहितो वाजिने स यदि जिघ्रेत्।
अश्नीयाद्वा जयकृद्विपरीतोऽतोऽन्यथाभिहितः॥१९॥

पुरोहित आचार्यो वाजिने अश्वाय पिण्डमन्नपिण्डमभिमन्त्र्य दद्यात् प्रयच्छेत्। सोऽश्वो यदि तत् पिण्डं जिघ्रेत् किञ्चिदश्नीयाद् भक्षयेद् वा, तदा जयकृत्, राज्ञो जयं करोति। अतोऽन्यथा यदि न जिघ्रेन्नापि भक्षयेत्, तदा विपरीतोऽभिहितः पराजयकृदुक्त इति॥१९॥

अथ नीराजनमाह--

कलशोदकेषु शाखामाप्लाव्यौदुम्बरीं स्पृशेत् तुरगान्।
शान्तिकपौष्टिकमन्त्रैरेवं सेनां सनृपनागाम्॥२०॥

कलशोदकेषु कलशस्थजलेषु प्राक्स्थापितेष्वौषधिमिश्रितेष्वौदुम्बरीमुदुम्बरवृक्षसम्भवां शाखां लताम्माप्लाव्य मज्जयित्वा तया तुरगान् अश्वान् स्पृशेत्। शान्तिकैः पौष्टिकैश्च मन्त्रैः सह। एवमनेन प्रकारेण सनृपनागां सेनां स्पृशेत्। नृपो राजा। नागा हस्तिनः। तत्संयुक्तां चमूं स्पृशेत्॥२०॥

ततः किं कुर्यादित्याह--

शान्तिं राष्ट्रविवृद्धयै कृत्वा भूयोऽभिचारकैर्मन्त्रैः।
मृण्मयमरिं विभिन्द्याच्छूलेनोरःस्थले विप्रः॥२१॥

---

१. बृहत्संहितायाम् ९३ अध्यायस्य ६ श्लोकः।
२. बृहत्संहितायाम् ९४ अध्यायस्य ११ श्लोकः।

भूयः पुना राष्ट्रविवृद्धयै राष्ट्रसम्बर्धनाय शान्तिं कृत्वा ततोऽभिचारकैर्मन्त्रैः, अभिचारकर्मणि यै मन्त्रा आथर्वणा उक्तास्तैर्मन्त्रैर्मृण्मयं मृत्तिकारचितमरिं शत्रुमुरःस्थले वक्षःप्रदेशे विप्रो ब्राह्मणः शूलेनाग्रतीक्ष्णेन काष्ठेन विभिन्द्याद् विदारयेत् ॥२१॥

ततः किं कुर्यादित्याह—

खलिनं हयाय दद्यादभिमन्त्र्य पुरोहितस्ततो राजा।
आरुह्योदक्पूर्वां यायान्नीराजितः सबलः ॥२२॥

ततोऽनन्तरं पुरोहितः खलिनं कविकामभिमन्त्र्य मन्त्रयित्वा हयायाश्वाय दद्यात् प्रयच्छेत्। तस्मिन् नृप आरुह्य नीराजितः सबलो बलसहितः सेनासहित उदक्पूर्वामैशानीं यायाद् गच्छेत् ॥२२॥

कथं राजा गच्छेदित्याह—

मृदङ्गशङ्खध्वनिहृष्टकुंजरस्रवन्मदामोदसुगन्धमारुतः ।
शिरोमणिप्रान्तचलत् प्रभाचयैर्ज्वलन् विवस्वानिव तोयदात्यये ॥२३॥
हंसपङ्क्तिभिरितस्ततोऽद्रिराट् सम्पतद्भिरिव शुक्लचामरैः।
मृष्टगन्धपवनानुवाहिभिर्धूयमानरुचिरस्रगम्बरः ॥२४॥
नैकवर्णमणिवज्रभूषितैर्भूषितो मुकुटकुण्डलाङ्गदैः।
भूरिरत्नकिरणानुरञ्जितः शक्रकार्मुकरुचिं समुद्वहन् ॥२५॥
उत्पतद्भिरिव खं तुरङ्गमैर्दारयद्भिरिव दन्तिभिर्धराम्।
निर्जितारिभिरिवामरैर्नरैः शक्रवत् परिवृतो व्रजेन्नृपः ॥२६॥

मृदङ्गेति । नृपो राजा नीराजितस्तोयदात्यये शरदि विवस्वानादित्यो ज्वलन् कान्तिमानिव व्रजेत्। तोयदा मेघास्तेषामत्ययो विनाशः शरदित्यर्थः। कीदृशः ? मृदङ्गशङ्खध्वनिहृष्टकुञ्जरस्रवन्मदामोदसुगन्धिमारुतः, मृदङ्गा वादित्रविशेषाः, शङ्खाः प्रसिद्धाः, मृदङ्गशङ्खानां योऽसौ ध्वनिः शब्दस्तेन हृष्टा मुदिता ये कुञ्जरा हस्तिनस्तेषां स्रवन्मदं मदजलं तस्यामोदः सौरभ्यं तेन सुगन्धीकृतो यो मारुतो वायुस्तेन यो युक्तः स तथोक्तः। यतः शरदि किल सुगन्धो मारुतो वहति। तथा शिरोमणयश्चूडारत्नानि तेषु प्रान्तमग्रं. तत्र चलन्तः स्फुरन्तो ये प्रभाचया रश्मिसमूहास्तैर्ज्वलन् देदीप्यमानः। शरदि किल सूर्यस्तेजस्वी भवति ॥२३॥

अथवा अद्रिराट् पर्वतराजो हिमवानिव व्रजेत्। इतस्ततः सर्वतः शुक्लचामरैः सितैर्बालव्यजनैः सम्पतद्भिस्तदभिमुखं गच्छद्भिः। धूयमानाश्चाल्यमाना रुचिरा दीप्तिमत्यः स्रजो माला अम्बराणि च वस्त्राणि यस्य स तथोक्तः। कीदृशैश्चामरैः ?

मृष्टगन्धपवनानुवाहिभिः। मृष्टं गन्धं सुगन्धं पवनं वातं येऽनुवहन्ति सेवन्ते तैस्तथाभूतैः। अत एवोत्प्रेक्षते––हंसपंक्तिभिरितस्ततः सर्वतः सम्पतद्भिर्मृष्टगन्धपवनानुवाहिभिः सुगन्धमारुतानुवाहिभिरद्विराडिव ॥२४॥

। अथवा शक्रकार्मुकरुचिमिन्द्रधनुःकान्ति समुद्वहन् वाहयन् व्रजेत्। मुकुटकुण्डलाङ्गदैर्भूषितः, मुकुटं मौलिभूषणम्, कुण्डलं कर्णाभरणम्, अङ्गदाः कटकास्तैर्भूषितोऽलंकृतः। कीदृशैः? नैकवर्णमणिवज्रभूषितैः, नैकवर्णा बहुवर्णा ये मणयो रत्नानि, वज्रं हीरकम्, तैर्भूषिता अलंकृता ये मुकुटकुण्डलाङ्गदास्तैर्भूषितोऽलंकृतः। तथा भूरिरत्नानां बहूनां मणीनां ये किरणा रश्मयस्तैरनुरञ्जितो विच्छुरितस्तदा शक्रकार्मुकरुचिं समुद्वहन्। यतः शक्रकार्मुकस्य कान्तिर्नानावर्णा भवति ॥२५॥

अथवा शक्रवदिन्द्रवत्परिवृत्तः परिवारयुक्तो व्रजेत्। तुरङ्गमैरश्वैः खमाकाशमुत्पतद्भिरिव। यत इन्द्र अकाशे गच्छति। तथा दन्तिभिर्हस्तिभिर्धरां भूमिं धारयद्भिरिव। यतो मत्तदन्तिनो भूमिं विदारयन्ति। नरैर्मनुष्यैर्निर्जितारिभिर्जितशत्रुभिरमरैर्देवैरिव परिवृतः। अतीवोज्ज्वलं वेषधारित्वात्। अत एवोत्प्रेक्षते––शक्रवदिति ॥२६॥

अन्यदप्याह––

सवज्रमुक्ताफलभूषणोऽथवा सितस्रगुष्णीषविलेपनाम्बरः।
धृतातपत्रो गजपृष्ठमाश्रितो घनोपरीवेन्दुतले भृगोः सुतः ॥२७॥

अथवैवं व्रजेत्। सवज्रमुक्ताफलभूषणः, वज्रं हीरकम्, सवज्राणि वज्रसहितानि मुक्ताफलभूषणानि यस्य। तथा सितस्रगुष्णीषविलेपनाम्बरः, सिताः शुक्ला याः स्रजो मालाः। सिताश्चोष्णीषाः पट्टविशेषाः। सितानि च विलेपनानि समालम्भनानि। सितान्यम्बराणि वस्त्राणि च यस्य स तथाभूतः। धृतातपत्रः। धृतमातपत्रं छत्रं यस्य। गजपृष्ठं हस्तिपृष्ठं समाश्रितः। अत एवोत्प्रेक्षते––भृगोः सुतः शुक्रो घनोपरि मेघपृष्ठे इन्दोश्चन्द्रस्य तले अधोभागे स्थित इव। मेघसंस्थानीयो गजः। चन्द्रस्य संस्थानीयं छत्रम्। शुक्रसंस्थाने नृप इति ॥२७॥

अथ सैन्यचेष्टितमाह––

सम्प्रहृष्टनरवाजिकुञ्जरं निर्मलप्रहरणांशुभासुरम्।
निर्विकारमरिपक्षभीषणं यस्य सैन्यमचिरात् स गां जयेत् ॥२८॥

यस्य राज्ञ ईदृशं सैन्यं स राजा अचिराच्छीघ्रमेव गां भूमिं जयेत् स्वीकरोति। कीदृशम्? सम्प्रहृष्टजनवाजिकुञ्जरम्, सम्प्रहृष्टाः प्रमुदिता नरा मनुष्याः। वाजिनोऽश्वाः, कुञ्जरा यत्र। तथा निर्मलानां प्रहरणानां खड्गादीनां ये अंशवो

रश्मयस्तैर्भासुरं देदीप्यमानम्। निर्विकारं विकाररहितम्। निरुत्पातमित्यर्थः। अरिपक्षभीषणं शत्रुपक्षभयावहमिति ॥२८॥

इति श्रीभट्टोत्पलविरचितायां संहितायां विवृतौ नीराजनविधिर्नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥

अथ खञ्जनकलक्षणाध्यायो व्याख्यायते।

तत्रादावेवागमप्रदर्शनार्थमाह—

खञ्जनको नामायं यो विहगस्तस्य दर्शने प्रथमे।
प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि ॥१॥

अयं खञ्जनकनामा विहगः पक्षी तस्य प्रथमे दर्शने, आदौ यस्मिन् दिने दृश्यते तत्र मुनिभिर्गर्गादिभिर्यानि फलानि कथितानि प्रोक्तानि तानि प्रवक्ष्यामि कथयामीति।

खञ्जनकः श्रावणपूर्वकमासचतुष्टयं न दृश्यत इति स्थितिः। अत उक्तं दर्शने प्रथमे इति ॥१॥

तत्र तावच्चत्वारः खञ्जनका भवन्ति तेषां नामानि फलं चाह—

स्थूलोभ्युन्नतकण्ठः कृष्णगलो भद्रकारको भद्रः।
आकण्ठमुखात् कृष्णः सम्पूर्णः पूरयत्याशाम् ॥२॥
कृष्णो गलेऽस्य बिन्दुः सितकरटान्तः स रिक्तकृद्रिक्तः।
पीतो गोपीत इति क्लेशकरः खञ्जनो दृष्टः ॥३॥

स्थूलो बृहत्कायः। अभ्युन्नतकण्ठ उच्चग्रीवः। कृष्णगलः असितकण्ठः। स भद्रो नाम विहगो भद्राख्यः पक्षी। सच दृष्टो भद्रकारकः, भद्र श्रेयः करोति। भद्रः सम्पूर्णो रिक्तो गोपीत इत्येता अन्वर्थसंज्ञाः। आकण्ठमुखात् कृष्णः, मुखाद् वक्त्रादारभ्य कण्ठं गलं यावत्कृष्णोऽसितवर्णः सम्पूर्णनामा स चाशामिच्छां पूरयति परिपूर्णं करोति ॥

कृष्णो गलेऽस्य बिन्दुरिति। अस्य विहगस्य गले कण्ठे कृष्णोऽसितो बिन्दुस्तथा सितकरटान्तः शुक्लकपोलः स रिक्तसंज्ञः। स च रिक्तकृद्रिक्तफलः शून्यं सर्वं करोति। यः पीतः पीतवर्णः स च गोपीतनामा खञ्जनको दृष्टः क्लेशकरः क्लेशं करोति। तथा च काश्यपः —

स्थूलोऽभ्युन्नतकण्ठो यो भद्रः कृष्णगलः स्मृतः।
कृष्णमूर्धा गलान्तं यः स सम्पूर्ण इति स्मृतः॥
करटान्तौ सितौ यस्य कृष्णो बिन्दुर्गले तथा।
स रिक्त इति निर्दिष्टः पीतो गोपीतकः स्मृतः॥
नामानुरूपेण फलं विहगानां विनिर्दिशेत्। इति॥२-३॥

अथ कस्मिन् स्थाने दृष्टः कीदृक् फलं करोतीत्याह—

अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्येषु।
करितुरगभुजगमूर्ध्नि प्रासादोद्यानहर्म्येषु॥४॥
गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे।
हस्तितुरङ्गमशालाच्छत्रध्वजचामराद्येषु॥५॥
हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु।
दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते॥६॥

अथैतेषु स्थानेषु दृष्टः खञ्जनकः श्रियं लक्ष्मीं कुरुते विदधाति। केषु, कथम्? मधुरेति। अथशब्दः प्रकाराय। मधुराणि स्वादूनि। सुरभीणि सुगन्धानि फलानि, कुसुमानि पुष्पाणि येषु तरुषु वृक्षेषु। तथा पुण्येषु सलिलाशयेषु जलाधारेषु। तथा करिणां हस्तिनाम्, तुरङ्गाणामश्वानाम्, भुजगानां सर्पाणां मूर्धसु मस्तकेषु। तथामरप्रासादेषु देवगृहेषु। उद्यानेषूपवनेषु। हर्म्येषु अट्टालिकासु॥४॥

तथा गोरुपरि। गोष्ठे गवां स्थाने। सतां साधूनां यत्र समागमः। यज्ञो यागः। उत्सवो विवाहादि। पार्थिवो राजा। द्विजो ब्राह्मणः। एषां समीपे सन्निधौ। हस्तिशालासु गजशालासु। अश्वशालासु। छत्रमातपत्रम्। ध्वजश्चिह्नविशेषः। प्रसिद्धः। चामरं बालव्यजनम्। आदिग्रहणाद् भृङ्गारकुम्भतालवृन्तादयः। एतेष्वपि॥५॥

तथा हेमसमीपे सुवर्णसन्निधौ। सिताम्बरं श्वेतवस्त्रम्। कमलं पद्मम्। उत्पलं नीलोत्पलम्। पूजितेष्वर्चितेषु। उपलिप्तेषु संस्कृतेषु स्थानेषु। दधिपात्रे दधिभाजने। धान्यकूटे धान्यराशौ। एतेष्विति॥६॥

अन्येष्वप्याह—

पङ्के स्वाद्वन्नाप्तिर्गोरससम्पच्च गोमयोपगते।
शाद्वलगे वस्त्राप्तिः शकटस्थे देशविभ्रंशः॥७॥
गृहपटलेऽर्थभ्रंशो बध्रे बन्धोऽशुचौ भवति रोगः।
पृष्ठे त्वजाविकानां प्रियसङ्गममावहत्याशु॥८॥

पङ्कः कर्दमस्तत्र संस्थे खञ्जनके स्वाद्वन्नाप्तिः मृष्टभोजनलाभः। तथा गोमयोपगते गोमयनिचयस्थे गोरससम्पन्मथितबाहुल्यम्। शाद्वलगे दूर्वास्थे वस्त्राप्तिरम्बरलाभः। शकटस्थे शकटारूढे देशस्य विभ्रंशो नाशः ॥७॥

गृहपटले गृहच्छादने अर्थस्य वित्तस्य भ्रंशो नाशः। बध्रे चर्ममये बन्धो बन्धनम्। अशुचावशुद्धे स्थाने रोगो भवति। अजश्छागः। अविः प्रसिद्धः। अजाविकानां पृष्ठे उपरि स्थिते आशु क्षिप्रमेव प्रियसङ्गमं वल्लभसमायोगमावहति करोति ॥८॥

अन्यदप्याह—

महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्कराट्टस्थः ।
प्राकारभस्मकेशेषु चाशुभो मरणरुग्भयदः ॥९॥

एतेषु स्थानेषु खञ्जनको दृष्टः स चाशुभः प्राग्लक्षणो न भवति तदा मरणरुग्भयदः। द्रष्टुर्मरणं मृत्युं रुग्भयं च ददाति। केषु स्थानेषु ? महिषे। उष्ट्रे करभे। गर्दभे खरे। अस्थिश्मशाने पितृवने। गृहकोणे वेश्माग्रे। शर्करे मृत्खण्डे। अट्टे अट्टालके। प्राकारभित्तौ। भस्मनि। केशेषु। एतेषु स्थानेषु ॥९॥

अन्यदपि लक्षणमाह—

पक्षौ धुन्वन्न शुभः शुभः पिबन् वारि [1]निम्नगासंस्थः।
सूर्योदये प्रशस्तो नेष्टफलः खञ्जनोऽस्तमये ॥१०॥

पक्षावङ्गरुहौ धुन्वन् कम्पयन्न शुभोऽनिष्टफलदः। निम्नगा नदी तत्रस्थो वारि जलं पिबन् शुभ इष्टफलः। केचिद्वारिवाहस्थ इति पठन्ति। वारिवाहे जलगमनप्रदेशे वारि पिबन्। सूर्योदये रव्युदयकाले खञ्जनकः प्रशस्तः शुभफलदः। सूर्यास्तमये नेष्टफलोऽशुभ इति ॥१०॥

अन्यदप्याह—

नीराजने निवृत्ते यया दिशा खञ्जनं नृपो यान्तम्।
पश्येत्तया गतस्य क्षिप्रमरातिर्वशमुपैति ॥११॥

निवृत्ते परिसमाप्ते नीराजने नृपो राजा यया दिशा आशया खञ्जनं यान्तं पश्येदवलोकयेत्तया गतस्य राज्ञोऽरातिः शत्रुः। क्षिप्रमाशवेव वशमुपैति वश्यतां गच्छति ॥११॥

---

१. वारिवाहस्थ इति पाठान्तरम्।

अथ प्रत्ययप्रदर्शनार्थमाह —

तस्मिन्निधिर्भवति मैथुनमेति यस्मिन्
यस्मिंस्तु छर्दयति तत्र तलेऽस्ति काचम्।
अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य
तत्कौतुकापनयनाय खनेद् धरित्रीम् ॥१२॥

यस्मिन् स्थाने मैथुनमेति गच्छति तत्र तस्मिन् भूमिप्रदेशे निधिर्निधानं भवति। यस्मिंस्तु छर्दयति वमति तत्र तले काचमस्ति विद्यते। अस्य खञ्जनकस्य पुरीषणे यत्र पुरीषं हदनं करोति तत्र भूमौ तले अङ्गारमप्युपदिशन्ति कथयन्ति। मुनयः काश्यपादयः। तथा च काश्यपः—

मैथुनं कुरुते यत्र तत्र वै निधिमादिशेत्।
भुक्तं छर्दयते यत्र तत्र काचमधो भवेत्॥
पुरीषं यत्र कुरुते तत्राङ्गारं विनिर्दिशेत्।

तत्कौतुकापनयनाय खनेद्धरित्रीम्। तस्य कौतुकस्य कुतुकस्यापनयनाय निवारणाय धरित्रीं भूमिं खनेत्। येन प्रत्यय उत्पद्यते॥१२॥

अथान्यच्छुभाशुभमाह—

मृतविकलविभिन्नरोगितः स्वतनुसमानफलप्रदः खगः।
धनकृदभिनिलीयमानको वियति च बन्धुसमागमप्रदः॥१३॥

खगः पक्षी खञ्जनको मृतविकलविभिन्नरोगितः स्वतनुसमानमात्मीय-शरीरतुल्यं फलं ददाति। तद्यथा—मृतो यदि दृश्यते तदा द्रष्टुर्मरणमेव ददाति। एवं विकलोऽङ्गवैकल्यम्। विभिन्नशरीरो भेदनम्। रोगितः सञ्जातरोगो रोगमेव ददाति। धनकृदभिनिलीयमानक इति। अभिमुख्येन निलीयमान आलयं प्रविशन् धनकृत् धनसंश्लेषं कुरुते। वियत्याकाशे उड्डीनमाने बन्धुसमागमप्रदो बन्धुभिः सह संयोगं ददाति॥१३॥

अथ खञ्जनदृष्टे विधानमाह—

नृपतिरपि शुभं शुभप्रदेशे खगमवलोक्य महीतले विदध्यात्।
सुरभिकुसुमधूपयुक्तमर्घं शुभमभिनन्दिमवेमेति वृद्धिम्॥१४॥

नृपती राजा शुभे प्रदेशे शुभं प्रशस्तलक्षणमपि खगं पक्षिणमवलोक्य दृष्ट्वा महीतले भूपृष्ठे सुरभिकुसुमधूपयुक्तमर्घम्, सुरभीणि सुगन्धीनि यानि कुसुमानि

पुष्पाणि तथा सुगन्धा ये धूपास्तैः संयुक्तमर्घं विदध्याद् दापयेत्। एवमनेन प्रकारेण शुभं फलमभिनन्दितं सम्मानितं वृद्धिमेति वृद्धिं गच्छति ॥१४॥

अथाशुभे खञ्जनके दृष्टे विधानमाह—

अशुभमपि विलोक्य खञ्जनं द्विजकुरुसाधुसुरार्चने रतः।
न नृपतिरशुभं समाप्नुयात् न यदि दिनानि च सप्त मांसभुक् ॥१५॥

नृपती राजा अशुभमपि अनिष्टफलमपि खञ्जनं विलोक्य दृष्ट्वा यदि द्विजानां ब्राह्मणानाम्, गुरूणामुपदेशकर्तृणाम्, साधूनां सज्जनानाम्, सुराणां देवानाम्, अर्चने रतः सक्तो भवति, तदा नाशुभमनिष्टफलं समाप्नुयात् प्राप्नोति। यदि सप्त दिनानि सप्ताहं मांसभुग् न भवति। मांसं यदि न भुङ्क्ते नाश्नाति ॥१५॥

तथा कालप्रदर्शनार्थमाह—

आवर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु दिनशेषात्।
दिक्स्थानमूर्तिलग्नर्क्षशान्तदिप्तादिभिश्चोह्यम् ॥१६॥

प्रथमं खञ्जनकस्य दर्शने आदावेव यस्मिन्नहनि दृश्यते तत्र यत्फलं शुभमशुभं वा तदाऽऽवर्षाद्वर्षं यावत्। वर्षमध्ये भवतीत्यर्थः। प्रतिदिनं तु यद्दर्शनफलं तद्दिनशेषात्तस्मिन्नेव दिनमध्ये भवति। तथा च काश्यपः—

प्रथमे दर्शने पाकमावर्षात् प्रवदेद् बुधः।
प्रतिदैवसिके वाच्यं दर्शनेऽस्तमये फलम् ॥इति।

दिक्स्थानमूर्तिलग्नर्क्षशान्तदीप्तादिभिश्चोह्यम्, दिक् कस्यां दिशि स्थितः शुभायामशुभायां वा। तत्र पूर्वोत्तरैशान्यः स्वभावादेव शुभाः। शेषा अशुभाः। स्थानं यत्र स्थितः। "[1]अथ मधुरसुरभिः" इत्यादिना प्रदर्शितम्। मूर्तिः शरीराकारः— "[2]स्थूलाऽभ्युन्नतकण्ठः"[3] इत्यादि, "मृतविकलविभिन्नरोगितः" इति च। लग्नं तत्काले कीदृशं शुभराशिशुभग्रहयुतं दृष्टं वा पापलग्नं पापयुतमवलोकितं वा। ऋक्षं नक्षत्रं ध्रुवमृदुदारुणोग्रक्षिप्रचरसाधारणादि। तत्र ध्रुवाणि मृदूनि च शस्तानि, क्षिप्रचरसाधारणानि मध्यानि, दारुणोग्राणि अशोभनानीति। तथा शान्तदीप्तादिभिः। स पक्षी किं शान्तायां दिशि स्थितः शान्तरवश्च, किं वा दीप्तायां दिशि स्थितो दीप्तरवश्च। आदिग्रहणादङ्गारिताभिधूमिता च दिग् ज्ञेया। एवमादिभिः

---

१. अस्यैवाध्यायस्य ४ श्लोकः।
२. अस्यैवाध्यायस्य २ श्लोकः।
३. अस्यैवाध्यायस्य १६ श्लोकः।

शुभमशुभं व्यामिश्रं वा फलमूह्यम्। स्वबुद्धया तर्कणीयम्। एतदाचार्यः सविस्तरं, शाकुने वक्ष्यति। वयमपि तत्रैव विशेषं व्याख्यास्याम इति ॥१६॥

इति श्रीभट्टोत्पलविरचितायां संहितावितौ खञ्जनकलक्षणं नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥

अथोत्पाताध्यायो व्याख्यायते।

तत्रादावेवागमवस्तुप्रदर्शनार्थमाह—

यानत्रेरुत्पातान् गर्गः प्रोवाच तानहं वक्ष्ये।
तेषां संक्षेपोऽयं प्रकृतेरन्यत्वमुत्पातः ॥१॥

अत्रेर्मुनिप्रधानस्य यानुत्पातानद्भुतान् गर्गः प्रोवाचोक्तवान्, तानहं वक्ष्ये कथयिष्ये। तेषामुत्पातानामयं संक्षेपः समासः। प्रकृतेरन्यत्वमुत्पात इति। प्रकृतेः स्वभावादन्यत्वं वैपरीत्यं स एवोत्पात इति। तथा च समाससंहितायाम्—

यः प्रकृतिविपर्यासः सर्वः संक्षेपतः स उत्पातः।
क्षितिगगनदिव्यजातो यथोत्तरं गुरुतरो भवति ॥इति॥१॥

कथमुत्पाता उत्पद्यन्त इत्याह—

अपचारेण नराणामुपसर्गः पापसञ्चयाद्भवति।
संसूचयन्ति दिव्यान्तरिक्षभौमास्त उत्पाताः ॥२॥

नराणां पुरुषाणामपचारेणाविनयेन पापसंचयो भवति, पापसञ्चयादुपसर्गा उपद्रवाः। तथा च गर्गः—

अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधमतः।
नरापचारान्नियतमुपसर्गः प्रवर्तते ॥इति।

ततो दिव्यान्तरिक्षभौमा उत्पाताः तानुपसर्गान् संसूचयन्ति। दिवि आकाशे भवा दिव्याः। अन्तरिक्षे भवा आन्तरिक्षाः। भूमौ भवा भौमा इति ॥२॥

कथमुत्पाता उत्पद्यन्त इत्याह—

मनुजानामपचारादपरक्ता देवताः सृजन्त्येतान्।
तत्प्रतिघाताय नृपः शान्तिं राष्ट्रे प्रयुञ्जीत ॥३॥

मनुजानां मनुष्याणामपचारादविनयाद्देवताः सुरा अपरक्ता विरक्ता एतानुत्पातान् सृजन्त्युत्पादयन्ति। तत्प्रतिघाताय तेषामुत्पातानां प्रतिघाताय निवारणाय

नृपो राजा राष्ट्रे जनपदे शान्तिमुत्पातप्रतीकारं प्रयुञ्जीत कार्य्येदिति। तथा च गर्गः—

ततोऽपचारो मर्त्यानामपरज्यन्ति देवताः।
ते सृजन्त्यद्भुतान् भावान् दिव्यभूम्यन्तरिक्षजान्॥
त एव सर्वलोकानामुत्पाता देवनिर्मिताः।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च॥
तान् शास्त्रनिर्गमाद्विप्राः पश्यन्ति ज्ञानचक्षुषा।
प्रवदन्ति तु मर्त्येषु हितार्थं श्रद्धयान्विताः।
ते तु सम्बोधिता विप्रैः शान्तये मङ्गलानि च।
श्रद्दधानाः प्रकुर्वन्ति न ते यान्ति पराभवम्॥
ये तु न प्रतिकुर्वन्ति क्रियामश्रद्धयान्विताः।
नास्त्यिक्यादथवा कोपाद्विनश्यन्त्यथवाऽचिरात् ॥इति॥३॥

अधुना दिव्यान्तरिक्षभौमानामुत्पातानां प्रविभागमाह—

दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः।
गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत्॥४॥
भौमं चरस्थिरभवं तच्छान्तिभिराहृतं शममुपैति।
नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके॥५॥

ग्रहाणामादित्यादीनामृक्षाणामश्विन्यादीनां च यद्वैकृतं विकारस्तद्दिव्यमुत्पातम्, यश्चोल्कानिर्घातः पवनो विकृतो वायुः, परिवेषः सूर्याचन्द्रमसोः, गन्धर्वपुरं गन्धर्वनगरम्, पुरन्दरचापमिन्द्रधनुः, आदिग्रहणाद्रोहितैरावतदण्डपरिघा गृह्यन्ते। एवमादि यत्तदान्तरिक्षमुत्पातम्॥४॥

भौमं चरस्थिरभवमिति। चराणां वस्तूनां स्थैर्यं स्थिराणां चरत्वं तदुद्भवं तदुत्पन्नं यत्तद्भौममुत्पातम्। तथा च गर्गः—

स्वर्भानुकेतुनक्षत्रग्रहतारार्कजेन्द्रजम्।
दिवि चोत्पद्यते यच्च तद्दिव्यमिति कीर्तितम्॥
वाय्वभ्रसन्ध्यादिग्दाहपरिवेषतमांसि च।
खपुरं चेन्द्रचापं च तद्विन्द्यादन्तरिक्षजम्।
भूमावुत्पद्यते यच्च स्थावरं वाथ जङ्गमम्।
तदेकदैशिकं भौममुत्पातं परिकीर्तितम्॥ इति।

तथा च समाससंहितायाम्—

दिव्यं ग्रहर्क्षजातं भुवि भौमं स्थिरचरोद्भवं यच्च।
दिग्दाहोल्कापतनं परिवेषाद्यं वियत्प्रभवम् ॥इति।

तच्छान्तिभिराहतं शममुपैति। तच्च भौमं शान्तिभिराहतं निवारितं शममुपैति शान्तिमुपगच्छति। नाभसमान्तरिक्षं शान्तिभिराहतं मृदुतामुपैति मन्दत्वं गच्छति। शाम्यति नो दिव्यमित्येके। दिव्यं शान्तिभिराहतं नो शाम्यति न शान्तिं यात्येवमित्येके केचिद्वदन्ति। तथा च काश्यपः—

भौमं शान्तिहतं नाशमुपगच्छति मार्दवम्।
नाभसं न शमं याति दिव्यमुत्पातदर्शनम् ॥इति॥५॥

अथात्र स्वमतमाह—

दिव्यमपि शममुपैति प्रभूतकनकान्नगोमहीदानैः।
रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च ॥६॥

अपिशब्दः सम्भावनायां वर्तते। प्रभूतकनकान्नगोमहीदानैर्दिव्यमपि शममुपैति। कनकं सुवर्णम्। अन्नं भोज्यम्। गावो धेनवः। मही भूः। एषां प्रभूतैर्बहुभिः प्रदानैर्दिव्यमुत्पातं शममुपैति। अपि ग्रहणान्नाभसं भौमं च। तथा रुद्रायतने शिवगृहे। भूमाववनौ। गोदोहाद् गवां दोहनात्। कोटिहोमाच्च दिव्यमपि शममुपैति ॥६॥

दैवमुत्पातं नृपतेः कतिविधं परिपाकमायातीत्याह—

आत्मसुतकोशवाहनपुरदारपुरोहितेषु लोके च।
पाकमुपयाति दैवं परिकल्पितमष्टधा नृपतेः ॥७॥

दैवमुत्पातं नृपते राज्ञोऽष्टधा परिकल्पितमष्टभिः प्रकारैः पाकमुपयाति फलं ददाति। तद्यथा—आत्मनि। सुते पुत्रे। कोशे भाण्डागारे। वाहनेष्वश्वादिषु। पुरे नगरे। दारेषु भार्यासु। पुरोहिते आचार्ये। एतेषु तथा लोके जनपदे। एवमष्टप्रकारम्। तथा च गर्गः—

पुरे जनपदे कोशे वाहनेऽथ पुरोहिते।
पुत्रेष्वात्मनि भृत्येषु पश्यते दैवमष्टधा ॥ इति॥७॥

अधुनोत्पातान् प्रदर्शयितुमाह—

अनिमित्तभङ्गचलनस्वेदाश्रुनिपातजल्पनाद्यानि।
लिङ्गार्चायतनानां नाशाय नरेशवेश्मानाम् ॥८॥

लिङ्गं माहेश्वरम्। अर्चा सुरप्रतिमा। आयतनं देवनिर्मितं पुण्यस्थानम्। एषां लिङ्गार्चायतनानामनिमित्तं विना कारणं भङ्गः स्फोटनम्। चलनं कम्पनम्। स्वेदः प्रस्वेदः। अश्रु रोदनम्। निपातः पातनम्। जल्पनं सम्भाषणम्। आद्यग्रहणाद्वमनं प्रसर्पणं च। तथा च गर्गः—

देवतार्चाः प्रनृत्यन्ति वेपन्ते प्रज्वलन्ति वा।
मुहुर्नृत्यन्ति रोदन्ति प्रस्विद्यन्ति हसन्ति वा॥
उत्तिष्ठन्ति निषीदन्ति प्रधावन्ति पतन्ति वा।
कूजन्ति विक्षिपन्ते च गात्रप्रहरणध्वजान्॥
अवाङ्मुखा वा तिष्ठन्ति स्थानात् स्थानं व्रजन्ति वा।
वमन्त्यग्निं तथा धूमं स्नेहं रक्तं पयो जलम्॥
प्रसर्पन्ति च जल्पन्ति वा चेष्टन्ते श्वसन्ति वा।
समन्ताद्यत्र दृश्यन्ते गात्रैर्वापि विचेष्टितैः॥इति।

एतान्न सर्वाणि यथोक्तानि नरेशदेशानाम्। नरेशस्य राज्ञः। देशस्य जनपदस्य च नाशाय भवन्ति॥८॥

अथान्यदप्याह—

[1]दैवतयात्राशकटाक्षचक्रयुगकेतुभङ्गपतनानि।
सम्पर्यासनसादनसङ्गश्च न देशनृपशुभदाः॥९॥

दैवतयात्रायां देवतोत्सवे। केचित् सुरयात्रायामिति पठन्ति। शकटस्याक्षस्य चक्रमध्यवर्तिनः काष्ठस्य चक्रस्य युगस्य केतोर्ध्वजस्य चैषां भङ्गः स्फोटनं पतनं वा। एतानि। तथा एतेषामेव सम्पर्यासनं परिवर्तनम्। सादनं सज्जनम्। सङ्ग आसक्तिः। यत्र कुत्रचिदेते सर्व एव न देशनृपशुभदाः। देशस्य जनपदस्य। नृपस्य च राज्ञो न शुभप्रदा इति॥९॥

अधुना यद्वैकृतं येष्वशुभदं तत्प्रदर्शयितुमाह—

ऋषिधर्मपितृब्रह्मप्रोद्भूतं वैकृतं द्विजातीनाम्।
यद्रुद्रलोकपालोद्भवं पशूनामनिष्टं तत्॥१०॥
गुरुसितशनैश्चरोत्थं पुरोधसां विष्णुजं च लोकानाम्।
स्कन्दविशाखसमुत्थं माण्डलिकानां नरेन्द्राणाम्॥११॥

---

१. सुरयात्रायामिति पाठान्तरम्।

वेदव्यासे मन्त्रिणि विनायके वैकृतं चमूनाथे।
धातरि सविश्वकर्मणि लोकाभावाय निर्दिष्टम् ॥१२॥
देवकुमारकुमारीवनिताप्रेष्येषु वैकृतं यत् स्यात्।
तन्नरपतेः कुमारककुमारिकास्त्रीपरिजनानाम् ॥१३॥
रक्षः पिशाचगुह्यकनागानामेवमेव निर्दिष्टम्।
मासैश्चाप्यष्टाभिः सर्वेषामेव फलपाकः ॥१४॥

ऋषयो मुनयः। धर्मो देवविशेषः। पितरः प्रसिद्धा भूतजना लेपमयाः कुत्रचित् क्रियन्ते । ब्रह्मा पितामहः। एतेषु यत्प्रोद्भूतमुत्पन्नं वैकृतं विकारस्तद् द्विजातीनां ब्राह्मणानामनिष्टमशुभप्रदमित्यर्थः।

यच्च रुद्रस्य महादेवस्य वैकृतं लोकपालादीनामिन्द्रादीनां च यद्वैकृतं तदुत्पन्नं तत्पशूनां चतुष्पदानामनिष्टमशुभम् ॥१०॥

गुरुर्जीवः। सितः शुक्रः। शनैश्चर आर्किः। तदुत्थं तत्सम्भवमनिष्टं पुरोधसां पुरोहितानाम् । विष्णुजं नारायणोद्भूतं वैकृतं लोकानांजनानामनिष्टम्। स्कन्दः कुमारः। विशाखो देवविशेषः । तत्समुत्थं तदुद्भूतं माण्डलिकानां मण्डलाधिपानां नरेन्द्राणां राज्ञामनिष्टम् ॥११॥

वेदव्यासो व्यास एव। वेदव्यासे यद्वैकृतं तन्मन्त्रिणि सचिवे अनिष्टम्। विनायके गणपतौ वैकृतं तच्चमूनाथे सेनापतावनिष्टम्। धातरि प्रजापतौ सविश्वकर्मणि विश्वकर्मसहिते यद्वैकृतं तल्लोकानां जनानामभावाय विनाशाय निर्दिष्टं कथितम् ॥१२॥

देवकुमाराणां यद्वैकृतं तन्नरपतेः कुमाराणामनिष्टम्। एवं देवकुमारीणां यद्वैकृतं तद्राजकुमारीणामनिष्टम्। देववनितानां सुरस्त्रीणां यद्वैकृतं तन्नृपस्त्रीणामनिष्टम्। देवप्रेष्याणां देवदासानां यद्वैकृतं भवेत्तद्राजदासानामनिष्टमिति ॥१३॥

रक्षो राक्षसः। पिशाचा देवयोनयः। गुह्यका यक्षाः। नागाः प्रसिद्धाः। एषां वैकृतमेवमेव वानेन प्रकारेण निर्दिष्टं कथितम्। एतदुक्तं भवति——रक्षःपिशाचगुह्यकनागानां ये कुमारकुमारीवनिताप्रेष्यास्तेषु यद्वैकृतं तन्नरपतेः कुमारकुमारिकास्त्रीपरिजनानामनिष्टम्। एषामुक्तानामुत्पातानां सर्वेषामष्टाभिर्मासैरतीतैः फलपाकः ॥१४॥

अथैतेषामुत्पातानां शान्त्यर्थमाह——

बुद्ध्वा देवविकारं शुचिः पुरोधास्त्र्यहोषितः स्नातः।
स्नानकुसुमानुलेपनवस्त्रैरभ्यर्चयेत् प्रतिमाम् ॥१५॥

मधुपर्केण पुरोधा भक्ष्यैर्बलिभिश्च विधिवदुपतिष्ठेत्[1]।
स्थालीपाकं जुहुयाद्विधिवन्मन्त्रैश्च तल्लिङ्गैः ॥१६॥

देवविकारं सुरवैकृतं बुद्ध्वा ज्ञात्वा। पुरोधाः पुरोहितः। शुचिः शौचयुक्तः। समाहितः संयतः। स्नातश्च कृतस्नानः। त्र्यहोषितो दिनत्रयं कृतोपवासः। स्नानैः। कुसुमैश्च पुष्पैः। अनुलेपनैः समालम्भनैः। वस्त्रैरम्बरैः प्रतिमामुत्पन्नविकारामभ्यर्चयेत् पूजयेत् ॥१५॥

पुरोधाः पुरोहितो मधुपर्केण दध्ना संयुक्तेन भक्ष्यैर्मोदकैर्लोपिकापूपादिभिर्बलिभिरुपहारैश्च विधिवद्विधानेनोपतिष्ठेत् पूजयेत् स्थालीपाकं चरुं तल्लिङ्गैस्तदीयैर्मन्त्रैर्विधिवद्विधानेनाग्नीं जुहुयात् ॥१६॥

अथ कालप्रमाणं शान्तिप्रभावं चाह—

इति विबुधविकारे शान्तयः सप्तरात्रं
द्विजविबुधगणार्चा गीतनृत्योत्सवाश्च।
विधिवदवनिपालैर्यैः प्रयुक्ताः न तेषां
भवति दुरितपाको दक्षिणाभिश्च रुद्धः ॥१७॥

इत्यनेन विधानेन विबुधविकारे सुरविकृतौ सप्तरात्रं सप्ताहं शान्तयः कर्तव्याः। द्विजातीनां ब्राह्मणानां विबुधानां देवानां गणानां गजवक्त्रप्रभृतीनाम्। अर्चा पूजा, तथा गीतं नृत्यमुत्सवाश्च रात्रिजागरणं कार्यम्। एते यैरवनिपालै राजभिर्विधिवत्सम्यग्विधानेन प्रयुक्ताः कारिताःतेषां राज्ञां दुरितपाक उत्पातानिष्टफलं न भवति। यतो दक्षिणाभिश्च रुद्धो निवारित इति ॥१७॥

इति लिङ्गवैकृतम् ॥

अथान्यानुत्पातानाह—

राष्ट्रे यस्यानग्निः प्रदीप्यते दीप्यते च नेन्धनवान्।
मनुजेश्वरस्य पीडा तस्य च राष्ट्रस्य विज्ञेया ॥१८॥

यस्य मनुजेश्वरस्य राज्ञो राष्ट्रे जनपदे अनग्निः प्रदीप्यते विनाग्निना ज्वाला दृश्यते। तथेन्धनवान् काष्ठयुक्तोऽग्निर्न दीप्यते न ज्वलति। यत्रैवं तत्र मनुजेश्वरस्य राज्ञस्तस्य च राष्ट्रस्य देशस्य पीडा विज्ञेया ज्ञातव्या ॥१८॥

---

१. अत्र परस्मैपदरूपमुपतिष्ठेदिति प्राकृतिकम्।

अन्यदाह—

जलमांसार्द्रज्वलने नृपतिवधः प्रहरणे रणो रौद्रः।
सैन्यग्रामपुरेषु च नाशो वह्नेर्भयं कुरुते ॥१९॥

जलमुदकम्। मांसमामिषम्। आर्द्रमशुष्कं यत्किञ्चित्। एषां ज्वलने नृपतिवधो राज्ञो मरणम्। प्रहरणे आयुधे खड्गादौ ज्वलिते रौद्रो घोरो रणः सङ्ग्रामः। सैन्ये सेनायाम्। ग्रामे। पुरे च नगरे। एतेषु वह्नेरग्नेर्नाशोऽनुपलब्धिः। वह्निभयमग्निभीतिं कुरुते ॥१९॥

अथान्यत्—

प्रासादभवनतोरणकेत्वादिष्वननलेन दग्धेषु।
तडिता वा षण्मासात् परचक्रस्यागमो नियमात् ॥२०॥

प्रासादो देवगृहम्। भवनं वेश्म। तोरणं प्रसिद्धम्। केतुर्ध्वजः। आदिग्रहणात् कोष्ठागारकुशूलादयः। एतेष्वननलेन विनाऽग्निना दग्धेषु। तडिता वा विद्युता वा दग्धेषु सत्सु षण्मासात् षड्भिर्मासैः परतो नियमान्निश्चयात् परचक्रस्यान्यनृपसैन्यस्याऽऽगमो भवति ॥२०॥

अथान्यत्—

धूमोऽनग्निसमुत्थो रजस्तमश्चाह्निजं महाभयदम्।
व्यभ्रे निश्युडुनाशो दर्शनमपि चाह्नि दोषकरम् ॥२१॥

अनग्निसमुत्थो धूमो विनाग्निना यत्र धूमो दृश्यते। तथा अह्निजं दिनसम्भवं रजो धूलिस्तमोऽन्धकारश्च तन्महाभयदं महद्भयं ददाति। तथा च गर्गः—

अनिशानि तमांसि स्युर्यदि वा पांशवो रजः।
धूमश्चानग्निना यत्र तत्र विन्द्यान्महद्भयम् ॥इति।

व्यभ्रे निश्युडुनाशः। निशायां रात्रौ व्यभ्रे विगतमेघे उडूनां नक्षत्राणां नाशोऽदर्शनम्। तथा सत्यादित्ये दिने नक्षत्राणां दर्शनम्। एतद्दोषकरम्। दोषान् करोति महाभयमित्यर्थः ॥२१॥

अथान्यदाह—

नगरचतुष्पादण्डजमनुजानां भयकरं ज्वलनमाहुः।
धूमाग्निविस्फुलिङ्गैः शय्याम्बरकेशगैर्मृत्युः ॥२२॥

नगराणां पुराणाम्। चतुष्पदानां गवादीनाम्। अण्डजानां पक्षिणाम्। मनुष्याणां मनुजानाम्। ज्वलनं सज्वालत्वं महाभयकरमित्याहुरुक्तवन्तो मुनयः।

शय्या आस्तरणम्। अम्बरं वस्त्रम्। केशा मूर्धजाः। शय्याम्बरकेशगैर्धूमाग्निविस्फुलिङ्गैः, धूमः प्रसिद्धः। अग्निर्ज्वालारूपः, विस्फुलिङ्गा अग्निकणाः, एतैर्दृष्टैस्तत्स्वामिनो मृत्युर्भवति। तथा च गर्गः—

शयनासनयानेषु केशप्रावरणेषु च।
दृश्यन्ते विस्फुलिङ्गा वा धूमो वा मरणाय तत् ॥इति ॥२२॥

तथान्यत्—

आयुधज्वलनसर्पणस्वनाः कोशनिर्गमनवेपनानि वा।
वैकृतानि यदि वायुधेऽपराण्याशु रौद्ररणसङ्कुलं वदेत् ॥२३॥

आयुधानां खड्गादीनां ज्वलनम्। सर्पणं गमनम्। स्वनाः शब्दाः। एते यदि भवन्ति। कोशः परिधारकस्तस्मान्निर्गमनं निष्क्रमणम्। वेपनं कम्पनम्। एतानि वा भवन्ति। अथवायुधेऽपराण्यन्यानि वैकृतानि विकाराणि जल्पितहसितरुदितानि भवन्ति। तदाऽऽशु क्षिप्रमेव रौद्रं रणसङ्कुलं क्रूरं युद्धं निकटवर्ति वदेद् ब्रूयात्। भयावहः सङ्ग्रामो भवतीत्यर्थः। ननु—"जलमांसार्द्रज्वलने नृपतिवधः प्रहरणे रौद्रः" इत्यस्य निदेशस्य—

आयुधज्वलनसर्पणस्वनाः केशनिर्गमनवेपनानि वा।
वैकृतानि यदि वायुधेऽपराण्याशु रौद्ररणसङ्कुलं वदेत्।

इत्यनेन सह केचिद् द्विरुक्तिं चोदयन्ति, यथा यत्प्रहरणज्वलने फलमुक्तं तदेवायुधज्वलने, न च प्रहरणानामायुधानां च भेदोऽस्तीति।

अत्रोच्यते, नग्नजिता चित्रलक्षणे आयुधानां त्रयो भेदा अभिहिताः—प्रहरणानि, पाणिमुक्तानि, यन्त्रमुक्तानि चेति। तत्र प्रहरणानि खड्गादीनि, पाणिमुक्तानि चक्रादीनि, यन्त्रमुक्तानि अश्मशरास्त्रदण्डाश्चेति। योऽयमायुध इति संज्ञा सा सर्वव्यापिनी। यस्मादायुधानामेते प्रहरणादयो भेदाः। यद्यायुधनिर्देशेन प्राक् फलमभिधाय पश्चात् प्रहरणनिर्देशेन तदेव फलनिर्देशं करोति तदा गतार्थत्वाद् द्विरुक्तिदोषः स्यात्। अथ पुनः प्राक् प्रहरणनिर्देशेन फलमुक्तं पश्चादायुधनिर्देशेन प्रहरणनिर्देशेन च खड्गादीनामेव ग्रहणं स्यान्न पाणिमुक्तादीनामायुधभेदानामेतदाशङ्क्याऽऽचार्येण पुनरायुधज्वलनस्य फलमुक्तम्। तस्माद् द्विरुक्तिदोषो नात्रावगन्तव्य इति।

नन्वायुधसंज्ञा सर्वव्यापिनी। यदायुधग्रहणेनैव प्रहरणादीनि परिगृहीतानि। एवं च फलभेदोऽस्ति तस्मात् प्रहरणनिर्देशोऽतीव विरुध्यत इत्युच्यते। अयमाचार्य-

---

१. अस्यैवाध्यायस्य १९ श्लोकः।

स्याभिप्रायो यथा पृथक् प्रहरणायुधनिर्देशाद् भेदो मया प्रदर्शितो भेदप्रज्ञापनार्थं प्रहरणनिर्देश इति ॥२३॥

एषामुत्पातानां शान्तिमाह--

मन्त्रैराग्नेयैः क्षीरवृक्षात् समिद्भि-
र्होतव्योऽग्निः सर्षपैः सर्पिषा च।
अग्न्यादीनां वैकृते शान्तिरेवं
देयं चास्मिन् काञ्चनं ब्राह्मणेभ्यः ॥२४॥

"राष्ट्रे[1] यस्यानग्निः प्रदीप्यते" इत्यत आरभ्य ये उत्पाताः कथितास्ते अग्न्यादयः। तेषामग्न्यादीनां वैकृते विकारे आग्नेयैरग्निदैवत्यैर्मन्त्रैः क्षीरवृक्षादर्कादिकात्समिद्भिः। सर्षपैः सिद्धार्थकैः। सर्पिषा च घृतेनाग्निर्हुताशनो होतव्यः। एवमनेन प्रकारेण शान्तिः। अस्मिन्नुत्पाते ब्राह्मणेभ्यो विप्रेभ्यः काञ्चनं सुवर्णं दक्षिणार्थं देयम् ॥२४॥

इत्यग्निवैकृतम् ॥

अथान्यानुत्पातानाह--

शाखाभङ्गेऽकस्माद्वृक्षाणां निर्दिशेद्रणोद्योगम्।
हसने देशभ्रंशं रुदिते च व्याधिबाहुल्यम् ॥२५॥

अकस्माद्वृक्षाणां शाखाभङ्गे शाखास्फोटने रणोद्योगं सङ्ग्रामविभ्रमं निर्दिशेद्वदेत्। तथा वृक्षाणामेव हसने देशभ्रंशं देशविनाशम्। रुदिते च रोदने वृक्षाणामेव व्याधिबाहुल्यं रोगप्राचुर्यम् ॥२५॥

अथान्यदप्याह--

राष्ट्रविभेदस्त्वनृतौ बालवधोऽतीव कुसुमिते बाले।
वृक्षात् क्षीरस्रावे सर्वद्रव्यक्षयो भवति ॥२६॥

वृक्षाणामनृतावृतुवर्जिते काले पुष्पफलोद्गमे सम्भवे राष्ट्रस्य विभेदो भवति। बाले बालवृक्षे अतीव कुसुमिते संजातपुष्पे बालानां शिशूनां वधो मरणम्। तथा च गर्गः--

स्वराष्ट्रभेदं कुरुते फलपुष्पमनार्तवम्।
बालानां मरणं कुर्याद्बालानां फलपुष्पजम् ॥इति।

---

१. अस्यैवाध्यायस्य १८ श्लोकः।

तथा वृक्षात् द्रुमात् क्षीरस्रावे दुग्धे स्रुते सर्वद्रव्याणां क्षयो विनाशो भवति ॥२६॥

अन्यदप्याह--

मद्ये वाहननाशः संग्रामः शोणिते मधुनि रोगः।
स्नेहे दुर्भिक्षभयं महद्भयं निःस्रुते सलिले ॥२७॥

वृक्षान्मद्ये निःस्रुते निर्गते वाहनानामश्वादीनां नाशः क्षयः। शोणिते रक्ते निःस्रुते संग्रामो युद्धं भवति। मधुनि माक्षिके निःस्रुते रोगो भवति। स्नेहे तैलादिके निःस्रुते दुर्भिक्षभयं भवति। सलिले जले निःस्रुते महदतुलं भयं भवति ॥२७॥

अन्यदप्याह--

शुष्कविरोहे वीर्यान्नसंक्षयः शोषणे च विरुजानाम्।
पतितानामुत्थाने स्वयं भयं दैवजनितं च ॥२८॥

शुष्कविरोहे शुष्काणां नीरसानां वृक्षाणां विरोहे वीर्यान्नसंक्षय एव। पतितानां वृक्षाणां स्वयमात्मनैवोत्थाने ऊर्ध्वस्थितौ दैवजनितं दैवोत्पन्नं भयं भवति। चशब्दः समुच्चये ॥२८॥

अन्यदप्याह--

पूजितवृक्षे ह्यनृतौ कुसुमफलं नृपवधाय निर्दिष्टम्।
धूमस्तस्मिन् ज्वालाऽथवा भवेन्नृपवधायैव ॥२९॥

पूजितवृक्षे प्रधानतरौ अनृतौ कुसुमफलं कुसुमानां फलानां चोद्गमो नृपस्य राज्ञो वधाय नाशाय निर्दिष्टं कथितम्। अथवा तस्मिन् वृक्षे धूमो ज्वाला अथवा भवेत्तदा नृपवधायैव राजमृत्यवे भवति ॥२९॥

अन्यदप्याह--

सर्पत्सु तरुषु जल्पत्सु वापि जनसंक्षयो विनिर्दिष्टः।
वृक्षाणां वैकृत्ये दशभिर्मासैः फलविपाकः ॥३०॥

तरुषु वृक्षेषु सर्पत्सु गच्छत्सु जल्पत्सु व्याहरत्सु वा जनानां लोकानां क्षयो विनाशो विनिर्दिष्टः कथितः। वृक्षाणां सर्वेषां वैकृत्ये विकारे दशभिर्मासैर्गतैः फलस्य विपाको भवति ॥३०॥

अत्र शान्तिमाह--

स्रग्गन्धधूपाम्बरपूजितस्य छत्रं विधायोपरि पादपस्य।
कृत्वा शिवं रुद्रजपोऽत्र कार्यो रुद्रेभ्य इत्यत्र षडेव होमाः ॥३१॥

पायसेन मधुनापि भोजयेद् ब्राह्मणान् घृतयुतेन भूपतिः।
मेदिनी निगदितात्र दक्षिणा वैकृते तरुकृते हितार्थिभिः॥३२॥

पादपस्य वृक्षस्य स्रग्भिर्मालाभिः। गन्धैः सुगन्धद्रव्यैः। धूपैर्गुग्गुलप्रभृतिभिः। अम्बरैर्वस्त्रैः पूजितस्यार्चितस्योपरि मूर्द्धनि छत्रमातपत्रं विधाय दत्वा अत्रास्मिन्नुत्पातविषये रुद्राणां मन्त्राणामेकादशरुद्राणामनुवाकानां जपः कार्यः। रुद्रेभ्यः स्वाहा इत्यत्र षडेव होमाः कार्याः॥३१॥

एवं कृत्वा शिवं श्रेयो भवति। भूपती राजा पायसेन क्षीरिण्या आज्यमिश्रेण ब्राह्मणान् द्विजान् भोजयेत्। अत्रास्मिंस्तरुकृते वृक्षजे वैकृते विकारे मधुना माक्षिकेण च घृतयुतेन हितार्थिभिर्मुनिभिर्मेदिनी भूर्दक्षिणा निगदिता उक्ता॥३२॥

इति वृक्षवैकृतम्॥

अथान्यानप्युत्पातानाह—

नालेऽब्जयवादीनामेकस्मिन् द्वित्रिसम्भवो मरणम्।
कथयति तदधिपतीनां यमलं जातं च कुसुमफलम्॥३३॥

अब्जानि पद्मादीनि। यवाः प्रसिद्धाः। आदिग्रहणाद् गोधूमप्रियङ्गुधान्यानि। एतेषामन्यतमस्यैकस्मिन्नाले द्वित्रिसम्भवो द्वौ त्रयो वा भवन्ति, तदा तदधिपतीनां तेषां यवादीनामधिपतयः स्वामिनस्तेषां मरणं कथयत्याचष्टे। तथा यमलं द्विगुणितम्। द्विपुटादिवर्जं पद्मं कुसुमं पुष्पं फलं च जातम् तदा तदधिपतीनां मरणमेव कथयति॥३३॥

अन्यदप्याह—

अतिवृद्धिः सस्यानां नानाफलकुसुमसम्भवो वृक्षे।
भवति हि यद्येकस्मिन् परचक्रस्यागमो नियमात्॥३४॥

सस्यानामतीवात्यर्थं वृद्धिर्बाहुल्यम्। एकस्मिन् वृक्षे तरौ नानाविधानां बहुप्रकाराणां फलानां कुसुमानां पुष्पाणां च सम्भव उत्पत्तिर्यद्येवं भवति, तदा नियमान्निश्चयात् परचक्रस्याऽऽगमो भवति॥३४॥

अन्यदप्याह—

अर्धेन यदा तैलं भवति तिलानामतैलता वा स्यात्।
अन्नस्य च वैरस्यं तदा तु विन्द्याद् भयं सुमहत्॥३५॥

तिलानामर्धेन यदा तैलं भवति यावत्प्रमाणं तैलं प्राप्तं तदर्धं भवतीत्यर्थः। अथवा अतैलता तैलाभावः स्याद् भवेत्। अन्नस्य भोज्यस्य च वैरस्यं विरसत्वं तदा सुमहद्भयं विन्द्याज्जानीयात्। अतीव भयं भवतीत्यर्थः॥३५॥

अथैषामुत्पातानां शान्तिमाह—

विकृतकुसुमं फलं वा ग्रामादथवा पुराद्बहिः कार्यम्।
सौम्योऽत्र चरुः कार्यो निर्वाप्यो वा पशुः शान्त्यै ॥३६॥
सस्ये च दृष्ट्वा विकृतिं प्रदेयं
तत्क्षेत्रमेव प्रथमं द्विजेभ्यः।
तस्यैव मध्ये चरुमत्र भौमं
कृत्वा न दोषं समुपैति तज्जम् ॥३७॥

विकृतं सविकारं कुसुमं पुष्पं फलं वा ग्रामात् पुराद् नगराद्वा बहिः कार्यम्। गृहीत्वा वा त्यजेत्। अत्रास्मिन् उत्पाते सौम्यः सोमदैवत्यश्चरुः कार्यः। तथा पशुश्छागः शान्त्यै शान्त्यर्थे निर्वाप्यो देयः। वाशब्दोऽत्र समुच्चये ॥३६॥

सस्ये च विकृतिं विकारं दृष्ट्वा विलोक्य तत्क्षेत्रं प्रथममादौ द्विजेभ्यो ब्राह्मणेभ्यो देयम्। अत्रास्मिन्नुपसर्गे तस्यैव क्षेत्रस्यैव मध्ये भौमं भूमिदैवतं पार्थिवं चरुं कृत्वा तज्जं भूमिजं दोषं स्वामी न समुपैति न प्राप्नोति ॥३७॥

इति सस्यवैकृतम् ॥

अथान्यानुत्पातानाह—

दुर्भिक्षमनावृष्टावतिवृष्टौ क्षुद्भयं परभयं च।
रोगो ह्यनृतुभवायां नृपतिवधोऽनभ्रजातायाम् ॥३८॥

अनावृष्टौ दुर्भिक्षं भवति। अतिवृष्टावतिवर्षणे क्षुद्भयं दुर्भिक्षभयं परभयं च भवति। अनृतुभवायां वर्षाकालं वर्जयित्वा अन्यस्मिन्नृतौ वृष्टौ रोगो भवति। अनभ्रजातायां मेघं विनोत्पन्नायां वृष्टौ नृपतिवधो राज्ञो मरणं भवति ॥३८॥

अथान्यानप्याह—

शीतोष्णविपर्यासो नो सम्यगृतुषु च सम्प्रवृत्तेषु।
षण्मासाद्राष्ट्रभयं रोगभयं दैवजनितं च ॥३९॥

ऋतुषु शिशिरादिषु सम्यक् च न प्रवृत्तेषु। गणितदृष्ट्या न प्रवर्तितेषु शीतोष्णविपर्यासो व्यत्ययः। उष्णकाले शीतत्वं शीतकाले उष्णत्वम्। षण्मासादनन्तरं राष्ट्रभयं भवति। तथा दैवजनितं प्राक्कर्मार्जितं रोगभयं भवति ॥३९॥

अन्यदप्याह—

अन्यर्त्तौ सप्ताहं प्रबन्धवर्षे प्रधाननृपमरणम्।
रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः ॥४०॥

धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विन्द्यात्।
अङ्गारपांशुवर्षे विनाशमायाति तन्नगरम् ॥४१॥

वर्षाकालं वर्जयित्वा अन्यस्मिन्नृतौ सप्ताहं सप्तदिनानि प्रबन्धवर्षे सततायां वृष्टौ प्रधानस्य नृपस्य राज्ञो मरणं भवति। रक्तं वृष्टे शस्त्रोद्योगः सङ्ग्रामो भवति। मांसास्थिवसादिभिः, मांसमामिषम्, अस्थि प्रसिद्धम्, वसा मज्जा, आदिग्रहणात् घृततैलं गृह्यते। एतैर्वृष्टैर्मरको भवति जनानां मरणम् ॥४०॥

धान्यं शालयः। हिरण्यं सुवर्णादि। त्वग्वृक्षसम्भवैव। फलं प्रसिद्धमेव। कुसुमं पुष्पम्। आदिग्रहणात् पर्णादि। एतैर्वर्षितैर्भयं विन्द्याज्जानीयात्। अङ्गारवर्षे पांशुवर्षे च तन्नगरं यत्र वर्षति नाशमायाति विनाशं प्राप्नोति ॥४१॥

अन्यदप्याह—

उपला विना जलधरैर्विकृता वा प्राणिनो यदा वृष्टाः।
छिद्रं वाप्यतिवृष्टौ सस्यानामीतिसंजननम् ॥४२॥

विना जलदैर्मेघैरुपलाः पाषाणा वृष्टाः। अथवा विकृताः सविकाराः प्राणिनः खरोष्ट्राऽश्वमार्जारशृगालप्रभृतयो वृष्टाः। अतिवृष्टौ वापि छिद्रं मध्ये कुत्रचिदवृष्टिरित्यर्थः। तच्च सस्यानामीतिसंजननमुपद्रवोत्पादकम् ॥४२॥

अन्यानप्याह—

यद्यमलेऽर्के छाया न दृश्यते प्रतीपा वा।
देशस्य तदा सुमहद्भयमायातं विनिर्देश्यम् ॥४३॥

अमले निर्मले अर्के सूर्ये सति यदि वृक्षादीनां छाया प्रतिविम्बं न दृश्यते, अथवा प्रतीपा विपर्ययस्था दृश्यते सूर्याभिमुखी, तदा देशस्य जनस्य सुमहदतिप्रभूतं भयमायातं प्राप्तं विनिर्देश्यं वक्तव्यमिति ॥४३॥

अन्यदप्याह—

व्यभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यतेऽथवा रात्रौ।
प्राच्यामपरस्यां वा तदा भवेत्क्षुद्भयं सुमहत् ॥४४॥

व्यभ्रे विगताभ्रे नभस्याकाश इन्द्रधनुरिन्द्रचापं तच्च दिवा दिवसे यदि दृश्यते, अथवा रात्रौ निशि दृश्यते। प्राच्यां पूर्वस्यां दिशि। अपरस्यां पश्चिमायां वा। तदा सुमहदतिप्रभूतं क्षुद्भयं दुर्भिक्षं भवति ॥४४॥

अथैतेषामुत्पातानां शान्तिमाह—

सूर्येन्दुपर्जन्यसमीरणानां यागः स्मृतो वृष्टिविकारकाले।
धान्यान्नगोकाञ्चनदक्षिणाश्च देयास्ततः शान्तिमुपैति पापम् ॥४५॥

सूर्य आदित्यः। इन्दुश्चन्द्रः। पर्जन्यो मेघः। समीरणो वायुः। एषां वृष्टिविकारकाले वर्षणविकृतिसमये यागः स्मृत उक्तः। तथा धान्यानि शालयः। अन्नं भोज्यम्। गावो धेनवः। काञ्चनं सुवर्णम्। एता दक्षिणा ब्राह्मणेभ्यो देयाः। ततोऽनन्तरं पापमनिष्टं शान्तिमुपैति गच्छति ॥४५॥

वृष्टिवैकृतम्।

अथान्यानुत्पातानाह—

अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते।
शोषश्चाशोष्याणामन्येषां वा ह्रदादीनाम् ॥४६॥
स्नेहासृङ्मांसवहाः सङ्कुलकलुषाः प्रतीपगाश्चापि।
परचक्रस्यागमनं नद्यः कथयन्ति षण्मासात् ॥४७॥

नदीनां सरितां नगरात् पुरादपसर्पणं गमनं दूरतोऽचिरेण शीघ्रमेव नगरस्य शून्यतामुत्सादनं कुरुते। तथा अशोष्याणां बहुलजलानां स्थानानां शोषो जलाभावः। अन्येषां वा ह्रदादीनाम्। ह्रदो यत्र पातालादुदकमागच्छति स्वयमेव। आदिग्रहणात् स्रोतसामपि शोषः शून्यतामेव कुरुते ॥४६॥

स्नेहासृगिति। नद्यः सरितः। स्नेहासृङ्मांसवहाः, स्नेहं तैलादि। असृग्रक्तम्, मांसमामिषम्, यदा वहन्ति; तथा सङ्कुलाः स्वल्पाः। कलुषा अनिर्मलाः। प्रतीपगा यत आगतास्तत्रैव यान्ति। एवंविधा नद्यः षण्मासात्षड्भिर्मासैः परतः परचक्रस्यागमनं कथयन्ति प्रवदन्ति ॥४७॥

अन्यदप्याह—

ज्वालाधूमक्वाथारुदितोत्कृष्टानि चैव कूपानाम्।
गीतप्रजल्पितानि च जनमरकायोपदिष्टानि ॥४८॥

कूपानां ज्वाला प्रज्वलनम्, धूमः, क्वाथः फेनः, आरुदितम्, उत्कृष्टमुद्घोषितम्, एतानि यदि भवन्ति; तथा गीतम्, प्रजल्पितं व्याहरणमेतानि सर्वाणि जनानां लोकानां मरकाय मृत्यवे उपदिष्टान्युक्तानि ॥४८॥

अन्यदप्याह—

सलिलोत्पत्तिरखाते गन्धरसविपर्यये च तोयानाम्।
सलिलाशयविकृतौ वा महद्भयं तत्र शान्तिमिमाम् ॥४९॥

अखाते प्रदेशे सलिलस्य जलस्योत्पत्तिः सम्भवः। तोयानां जलानां गन्धरसविपर्यये। गन्धस्य सौगन्धस्य रसस्य स्वादुताया विपर्यये अन्यत्वे। सलिलाशयानामुदकाधाराणां विकृतौ विकारे स्वरूपान्यत्वे महदतीव भयं भवति। तत्र चेमां वक्ष्यमाणां शान्तिमाह ॥४९॥

तां चाह—

सलिलविकारे कुर्यात् पूजां वरुणस्य वारुणैर्मन्त्रैः।
तैरेव च जपहोमं शममेवं पापमुपयाति ॥५०॥

सलिलविकारे जलविकृतौ वरुणस्यापाम्पतेर्वारुणैर्मन्त्रैः पूजामर्चां कुर्यात्, तैरेव वारुणैर्मन्त्रैर्जपं होमं चाग्नौ कुर्यात्। एवमनेन प्रकारेण पापमनिष्टं शमं शान्तिमुपयाति प्राप्नोति ॥५०॥

इति जलवैकृतम् ॥

अथान्यानुत्पातानाह—

प्रसवविकारे स्त्रीणां द्वित्रिचतुष्प्रभृतिसम्प्रसूतौ वा।
हीनातिरिक्तकाले च देशकुलसंक्षयो भवति ॥५१॥

स्त्रीणां योषितां प्रसवविकारे प्रसूतिविकृतौ। प्रसवविकारः श्वाद्यङ्गसादृश्यम्। अथवा द्वित्रिचतुष्प्रभृतिसम्प्रसूतौ। द्वित्रिचतुष्पञ्चषट्सप्ताष्टनवदश वा जायन्ते। हीनातिरिक्तकाले, हीने अपरिपूर्णे। अतिरिक्ते चाधिके प्रसवे देशसङ्क्षयो देशविनाशः। कुलसंक्षयो वंशविच्छेदश्च भवति ॥५१॥

वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे रणमरणमेषाम्।
षण्मासात् सूतिफलं शान्तौ श्लोकौ च गर्गोक्तौ ॥५२॥

वडवा अश्वतरी। उष्ट्रा करभी। महिषी। गौः। हस्तिनी करिणी। एतासु यमलोद्भवे द्वाभ्यां जनने एषामेवाश्वादीनां मरणं भवति। तथा च गर्गः—

अकाले प्रसवे चैव कालातीतेऽथवा पुनः।
असङ्ख्याजनने चैव युग्मस्य प्रसवे तथा ॥
अमानुषाणि काण्डानि सञ्जातव्यञ्जनानि वा।
अनङ्गा ह्यधिकाङ्गा वा हीनाङ्गाः सम्भवन्ति वा ॥
विमुखाः पक्षिसदृशास्तथार्धपुरुषाश्च वा।
विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् ॥
अप्राप्तवयसे गर्भे द्वौ चतुष्पात् त्रयोऽपि वा।
अत्युच्चा विनताश्चापि प्रजायन्तेऽनयो भवेत् ॥
वडवा हस्तिनी गौर्वा यदि युग्मं प्रसूयते।
विजन्यं विकृतं वापि षड्भिर्मासैर्नृपक्षयः ॥इति।

षण्मासादिति। सूतिफलं प्रसूतिफलं षण्मासात् परतो भवति। अत्र शान्तौ गर्गोक्तौ गर्गमहर्षिकथितौ श्लोकौ द्वाविमौ वक्ष्यमाणौ ॥५२॥

एतौ चाह—

नार्यः परस्य विषये त्यक्तव्यास्ता हितार्थिना।
तर्पयेच्च द्विजान् कामैः शान्तिं चैवात्र कारयेत् ॥५३॥
चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु।
नगरं स्वामिनं यूथमन्यथा तु विनाशयेत् ॥५४॥

ता नार्यो योषितः संजातविकारा हितार्थिना हितमिच्छता परस्यान्यस्य विषये देशे त्यक्तव्याः। द्विजान् ब्राह्मणान् कामैरिच्छाभिस्तर्पयेत् पूजयेत्, तथाऽत्रास्मिन्नुत्पाते शान्तिं च कारयेत् ॥५३॥

चतुष्पदा वडवादयः स्वयूथेभ्य आत्मीयवृन्देभ्यः परभूमिष्वन्यदेशेषु त्यक्तव्याः। एवं कृते श्रेयो भवति। अन्यथाऽपरित्यागान्नगरं पुरं स्वामिनमधिपतिं यूथं तु विनाशयेत् क्षयं नयति ॥५४॥

इति प्रसववैकृतम् ॥

अथान्यानुत्पातानाह—

परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम्।
उक्षाणो वान्योन्यं पिबति श्वा वा सुरभिपुत्रम् ॥५५॥
मासत्रयेण विन्द्यात्तस्मिन्निःसंशयं परागमनम्।
तत्प्रतिघातायैतौ श्लोकौ गर्गेण निर्दिष्टौ ॥५६॥

तिरश्चां तिर्यग्जातीनां चतुष्पदप्रायाणां परयोनावन्ययोनावभिगमनं यदि भवति, तदाऽसाधु अशोभनम्। तथा धेनूनां गवामन्योन्यं परस्परं स्तनपाने सति, तथोक्षाणो वृषभा वा अन्योन्यं स्तनं पिबन्ति वत्सांश्च वर्जयित्वा, अथवा सुरभिपुत्रं गोस्तनं श्वा सारमेयः पिबति ॥

तस्मिन्नुत्पाते मासत्रयेण परागमनं निःसंशयमसन्देहं विन्द्याज्जानीयात्। तथा च गर्गः—

वियोनिषु यदा यान्ति मिश्रीभावः प्रजायते।
खरोष्ट्रहयमातङ्गा मनुष्या वा न साधु तत् ॥
अकालसक्ता दृश्यन्ते काले च विमदा यदि।
मातङ्गोष्ट्रहयश्वानः पक्षिणो वा न साधु तत् ॥
धेनुं धेनुः पिबेद्यत्रानुड्वानं ह्यनुडुत्तथा।
श्वा वा पिबेद्धेनुमथ धेनुः श्वानमथापि वा ॥
प्राप्तेषु त्रिषु मांसेषु परचक्रागमं वदेत् ॥इति।

एतेषामुत्पातानां प्रतिघाताय विनाशाय श्लोकौ द्वावेतौ गर्गेण निर्दिष्टौ कथितौ ॥५६॥

तावेवाह—

त्यागो विवासनं दानं तत्तस्याशु शुभं भवेत् ।
तर्पयेद् ब्राह्मणांश्चात्र जपहोमांश्च कारयेत् ॥५७॥
स्थालीपाकेन धातारं पशुना च पुरोहितः ।
प्राजापत्येन मन्त्रेण यजेद्बह्वन्नदक्षिणम् ॥५८॥

त्यागस्त्यजनम्। विवासनमन्यत्र स्थानम्। दानमन्यस्य ब्राह्मणादेः प्रतिपादनं यत्तस्य चतुष्पदस्याशु क्षिप्रमेव शुभं भवेत् स्यात्। अत्रास्मिन्नुपसर्गे ब्राह्मणान् द्विजांस्तर्पयेत् पूजयेत्। जपं मन्त्राणामद्भुतं होमानग्नौ च कारयेत् ॥५७॥

पुरोहितः स्थालीपाकेन चरुणा पशुना च छागादिना धातारं प्रजापतिं प्राजापत्येन मन्त्रेण बह्वन्नं प्रभूतान्नं बहुदक्षिणं च यजेत् ॥५८॥

इति चतुष्पदवैकृतम् ॥

अथान्यानप्युत्पातानाह—

यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहयुतम् ।
राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च ॥५९॥

यानमश्वादिकं वाहेन पुरुषेण वियुक्तं यदि गच्छेद् व्रजेत्। वाहेन युतं न व्रजेत्। तदा राष्ट्रस्य भयं भवति। तथा चक्राणां रथचक्राणां सादे मज्जने भङ्गे च स्फोटने राष्ट्रभयमेव भवति ॥५९॥

अन्यानप्याह—

गीतरवतूर्यशब्दा नभसि यदा वा चरस्थिरान्यत्वम् ।
मृत्युस्तदा गदा वा विस्वतूर्ये पराभिभवः ॥६०॥

नभस्याकाशे गीतरवा गीतशब्दास्तूर्यशब्दा वा श्रूयन्ते। अथवा चरस्थिरान्यत्वम्, अस्थिरस्य शकटादेः स्थिरता, स्थिरस्य वृक्षादेश्चरत्वम्, तदा मृत्युर्मरणम्, गदा रोगा भवन्ति। तथा विस्वरतूर्ये तूर्याणामाहतानां यद्यन्यादृशः सविकारः शब्द उत्पद्यते तदा पराभिभवो भवति, परैः शत्रुभिरभिभवः पराजयः ॥६०॥

अन्यानप्याह—

अनभिहततूर्यनादः शब्दो वा ताडितेषु यदि न स्यात् ।
व्युत्पत्तौ वा तेषां परागमो नृपतिमरणं वा ॥६१॥

अनभिहतानामताडितानां तूर्याणां नादः शब्दो यदि वा ताडितेष्वाहतेषु शब्दो रवो न स्यान्न भवेत्। तथा तूर्याणां व्युत्पत्तौ वा। विविधा उत्पत्तिर्व्युत्पत्तिर्नानाशब्दकृत्। परागमः परचक्रस्यागमो भवति नृपते राज्ञो मरणं वा[1] ॥६१॥

अन्यदप्याह—

गोलाङ्गलयोः सङ्गे दर्वीशूर्पाद्युपस्करविकारे।
क्रोष्टुकनादे च तथा शस्त्रभयं मुनिवचश्चेदम् ॥६२॥

लाङ्गलं हलम्। गोलाङ्गलयोः सङ्गः परस्परं श्लेषः। गौर्यत्र हललग्ना दृश्यते इति तस्मिंस्तथा दर्वीशूर्पाद्युपस्करविकारे, दर्वी प्रसिद्धा, शूर्पमपि प्रसिद्धमेव। दर्वीशूर्पविकारे। उपस्करभाण्डानां विकारे वैकृते। आदिग्रहणान्मुशले लूखलादि गृह्यते। एषां विकारे स्वरूपान्यत्वे। हसने गायने रोदने वा। क्रोष्टुकः शृंगाल स्तत्सदृशे तेषामेव नादे शब्दे शस्त्रभयं भवति। इदं वक्ष्यमाणमत्रास्मिन्नुत्पाते शान्त्यर्थं मुनिवचः ऋषिवाक्यमिति ॥६२॥

तच्चाह—

वायव्येष्वेषु नृपतिर्वायुं शक्तुभिरर्चयेत्।
आवायोरिति पञ्चर्चो जप्तव्याः प्रयतैर्द्विजैः ॥६३॥
ब्राह्मणान् परमान्नेन दक्षिणाभिश्च तर्पयेत्।
बह्वन्नदक्षिणा होमाः कर्तव्याश्च प्रयत्नतः ॥६४॥

एषु वायव्येषूत्पातेषु नृपती राजा वायुमनिलं शक्तुभिरर्चयेत् पूजयेत्, तथा प्रयतैः संयतैर्द्विजैर्ब्राह्मणैरावायोरित्यादिकाः पञ्चर्चो जप्तव्या इति। पञ्च ऋचो जप्तव्यो इति ॥६३॥

परमान्नेन पायसेन दक्षिणाभिश्च ब्राह्मणांस्तर्पयेत्, तथा होमा बह्वन्नदक्षिणाः प्रभूतभोज्याः प्रभूतदक्षिणाः प्रयत्नतश्च कर्तव्या इति ॥६४॥

इति वायव्यवैकृतम् ॥

अथान्यानप्युत्पातानाह—

पुरपक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरम्।
नक्तं वा दिवसचराः क्षपाचरा वा चरन्त्यहनि ॥६५॥

---

१. अ. पुस्तकेऽतः परं न ग्रन्थाः।

२. जपितव्या इत्यत्र जप्तव्याप्रयोगोऽपाणिनीयः।

पुरपक्षिणो ग्राम्यविहगा यदि वनचरा भवन्ति। वनेऽरण्ये चरन्ति, तथा वन्याः पक्षिणो निर्भया विगतभीतयो वा पुरं नगरं प्रविशन्ति। अथवा दिवसचराः पक्षिणः काकादयो नक्तं रात्रौ चरन्ति। क्षपाचरा रात्रिचारिणः कौशिकादयोऽह्नि दिवसे चरन्ति ॥६५॥

अन्यानप्याह—

सन्ध्याद्वयेऽपि मण्डलमाबध्नन्तो मृगा विहङ्गा वा।
दीप्तायां दिश्यथवा क्रोशन्तः संहता भयदाः ॥६६॥

मृगा अरण्यप्राणिनः, विहङ्गा पक्षिणो वा सन्ध्याद्वयेऽपि सूर्योदयास्तसमययोर्मण्डलं चक्राकारमाबध्नन्तो रचयन्तः, अथवा संहताः समेता बहवोऽतीव क्रोशन्तो वाच्यमाना दृश्यन्ते। दीप्तायां दिशि तत्कालं रवेर्वशेन या दीप्ता तस्याम्। तदा भयदा इति। यस्यां रविस्तिष्ठति सा दीप्तेति तल्लक्षणम् ॥६६॥

अन्यानप्याह—

श्येनाः प्ररुदन्त इव द्वारे क्रोशन्ति जम्बुका दीप्ताः।
प्रविशेन्नरेन्द्रभवने कपोतकः कौशिको यदि वा ॥६७॥

श्येनाः प्राचिकाः पक्षिणः प्रकर्षेण रुदन्तो रोदमाना इव भवन्ति, तथा जम्बुकाः शृगाला दीप्ताः सूर्याभिमुखाः क्रूरशब्दाश्च द्वारे पुरद्वारे क्रोशन्ति शब्दं कुर्वते, नरेन्द्रभवने राजगृहे, कपोतकः पक्षी कौशिक उलूको यदि वा प्रविशेत्। तथा च गर्गः—

श्येनगृध्रबलाकाश्च वामना मुण्डचारिणः।
शब्दायन्त इवात्यर्थं प्रदीप्ताः सङ्घशो यदि ॥
रुदन्ति विविधं यत्र तदेवाशु विनश्यति।
यद्यभीक्ष्णं कपोता वा प्रविशन्ति वसन्ति वा ॥
राजवेश्मन्युलूका वा तच्छून्यमचिराद् भवेत्। इति ॥६७॥

अथान्यानुत्पातानाह—

कुक्कुटरुतं प्रदोषे हेमन्तादौ च कोकिलालापाः।
प्रतिलोममण्डलचराः श्येनाद्याश्चाम्बरे भयदाः ॥६८॥
गृहचैत्यतोरणेषु द्वारेषु च पक्षिसङ्घसम्पातः।
मधुवल्मीकाम्भोरुहसमुद्भवश्चापि नाशाय ॥६९॥

प्रदोषे रात्रिमुखे कुक्कुटरुतं तथा हेमन्तादौ हेमन्तप्रमुखे कोकिलालापाः परभृतां शब्दाः। श्येनाद्याः सर्वपक्षिणो मांसाशिनः। आदिग्रहणात् काकवकप्लवकङ्का

गृह्यन्ते। एते अम्बरे आकाशे प्रतिलोममण्डलचराः, अप्रदक्षिणेन मण्डलेन चरन्तस्तथाभूता भयदा भयं जनयन्ति ॥६८॥

गृहं वेश्म। चैत्यं प्रधानवृक्षः। तोरणं प्रसिद्धम्। एतेषु गृहचैत्यतोरणेषु द्वारेषु पक्षिसङ्घानां खगवृन्दानां सम्पातः श्लेषो यत्र, तथैतेष्वेव गृहादिषु मधुवल्मीकाम्भोरुहसमुद्भवः, मधूनां माक्षिकानाम्, वल्मीकस्य च सरीसृपकृतमृत्स्तूपस्य। अम्भोरुहस्य पद्मादेः समुद्भव उत्पत्तिश्चापि नाशाय भवति ॥६९॥

अन्यानप्याह—

श्वभिरस्थिशवावयवप्रवेशनं मन्दिरेषु मरकाय।
पशुशस्त्रव्याहारे नृपमृत्युर्मुनिवचश्चेदम् ॥७०॥

श्वभिः सारमेयैर्मन्दिरेषु गृहेष्वस्थिशवावयवानां प्रवेशनम्। अस्थ्नः शवावयवस्य मृतपुरुषाङ्गस्य प्रवेशनं मरकाय भवति। पशूनां च चतुष्पदानां शस्त्राणां च व्याहारे पुंवत्सम्भाषमाणे नृपस्य राज्ञो मृत्युर्मरणं भवति। इदं च वक्ष्यमाणं शान्त्यर्थं मुनिवचः ऋषिवाक्यम् ॥७०॥

तच्चाह—

मृगपक्षिविकारेषु कुर्याद्धीमान् सदक्षिणान्।
देवाः कपोत इति च जप्तव्याः पञ्चभिर्द्विजैः ॥७१॥
सुदेवा इति चैकेन देया गावः सदक्षिणाः।
जपेच्छाकुनसूक्तं वा मनो वेदशिरांसि च ॥७२॥

मृगाणां पक्षिणां विकारेषु वैकृतेषु सदक्षिणान् दक्षिणाभिः सहितान् होमान् कुर्यात्। पञ्चभिर्द्विजैर्ब्राह्मणैर्देवाः कपोत इति जप्तव्याः ॥७१॥

सुदेवा एतत्पदं यस्य मन्त्रस्यादि स चैकेन द्विजेन जप्तव्यः। तेषां ब्राह्मणानां गावो धेनवः सदक्षिणा देयाः। शाकुनसूक्तं च मन्त्रं जपेत्पठेत्। वा मनो मन्त्रम्। वेदशिरांस्यथर्वशिरः प्रभृतीनि जपेत् ॥७२॥

इति मृगपक्ष्यादिवैकृतम् ॥

अथान्यानुत्पातानाह—

शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रपातभङ्गेषु।
तद्वत्कपाटतोरणकेतूनां नरपतेर्मरणम् ॥७३॥

शक्रध्वज इन्द्रध्वजः। इन्द्रकीलो द्वारार्गलः। स्तम्भद्वारे प्रसिद्धे। एषामन्यतमस्य प्रपातः पतनं भङ्गः स्फोटनं वा तेषु दृष्टेषु। कपाटं द्वारापिधानम्। तोरणं

प्रसिद्धम्। केतुर्ध्वजः। एतेषामपि तद्वत्प्रपातो भङ्गो दश्यते, तदा नरपते राज्ञो मरणं विनिर्दिशेद्वदेत् ॥७३॥

अन्यानप्याह--

सन्ध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च काननेऽनग्नौ।
छिद्राभावे भूमेर्दरणं कम्पश्च भयकारी ॥७४॥

सन्ध्याद्वयस्य सूर्योदयास्तमययोर्दीप्तिस्तेजः। कानने वने चानग्नौ अग्निरहिते धूमोत्पत्तिर्धूमसम्भवः, तथा छिद्राभावे व्रणं विना भूमेरवनेर्दरणं स्फोटनं कम्पश्चलनं च भयकारी भयं करोति ॥७४॥

पाखण्डानां नास्तिकानां च भक्तः
साध्वाचारप्रोज्झितः क्रोधशीलः।
ईर्ष्युः क्रूरो विग्रहासक्तचेता
यस्मिन् राजा तस्य देशस्य नाशः ॥७५॥

यस्मिन् देशे ईदृशो राजा नृपतिस्तस्य देशस्य नाशो भवति। कीदृशो राजा? पाखण्डानां वेदबाह्यानां नास्तिकानां च लौकायतिकानां भक्तस्तत्परः, तथा साध्वाचारप्रोज्झितः, साधूनां सज्जनानां संबन्ध्याचारः प्रोज्झितस्त्यक्तो येन। क्रोधशीलः क्रोधपरः। ईर्ष्युः परमत्सरः। क्रूरः खलः। विग्रहासक्तचेताः, विग्रहे सर्वकालमकालेऽपि आसक्तं चेतो यस्य ॥७५॥

अन्यानप्याह--

प्रहर हर छिन्धि भिन्धीत्यायुधकाष्ठाश्मपाणयो बालाः।
निगदन्तः प्रहरन्ते तत्रापि भयं भवत्याशु ॥७६॥

बालाः शिशवः। आयुधकाष्ठाश्मपाणयः, आयुधानि खड्गादीनि कृत्रिमरूपाणि, काष्ठानि लगुडानि, अश्मनः, पाषाणाः, पाणिषु हस्तेषु येषां ते तथाभूताः, प्रहर हर छिन्धि भिन्धि इति निगदन्तः। प्रवदन्तः परस्परमन्योन्यं प्रहरन्ते घ्नन्ति यत्र तत्राप्याशु क्षिप्रमेव भयं भवति। तथा च पराशरः—

यदि धनुरसिकाष्ठलोष्टहस्ताः पुरशिशवो रणवत्समाचरन्ति।
प्रहर हर जहीत्युदाहरन्ते भयमचिरात्तुमुलं निवेदयन्ति ॥इति ॥७६॥

अन्यानप्याह—

अङ्गारगैरिकाद्यैर्विकृतप्रेताभिलेखनं यस्मिन्।
नायकचित्रितमथवा क्षये क्षयं याति न चिरेण ॥७७॥

यस्मिन् क्षये गृहे अङ्गारगैरिकाद्यैर्विदग्धकाष्ठेन गैरिकेण वा। आदिग्रहणादन्यैः पीतनीलै रङ्गैर्विकृतानां विरूपाणां प्रेतानां मृतपुरुषाणां चाभिलेखनमालेखनम्, अथवा नायको गृहस्वामी अङ्गारगैरिकाद्यैश्चित्रित आलेखितोऽपि कृतो यत्र दृश्यते गृहे तद्गृहं न चिरेण शीघ्रमेव क्षयं नाशं याति ॥७७॥

अन्यानप्याह—

लूतापटाङ्गशबलं न सन्ध्ययोः पूजितं कलहयुक्तम्।
नित्योच्छिष्टस्त्रीकं च यद्गृहं तत्क्षयं याति ॥७८॥

लूताशब्देन जालकरा उच्यन्ते, तदीयैस्तन्तुभिर्ये पटा अङ्गान्यवयवाश्च तदीयान्येव, तैर्गृहं शबलं व्यामिश्रितम्, तथा सन्ध्ययोर्द्वयोः सूर्योदयास्तमययोर्यन्न पूजितं नार्चितम्, तथा नित्यं कलहयुक्तं प्रतिदिनं यत्र कलहः क्रियते, तथा यद्गृहं नित्योच्छिष्टस्त्रीकं नित्यं सर्वकालमुच्छिष्टाः स्त्रियो यत्र तत्क्षयं नाशं याति ॥७८॥

अन्यानप्याह—

दृष्टेषु यातुधानेषु निर्दिशेन्मरकमाशु सम्प्राप्तम्।
प्रतिघातायैतेषां गर्गः शान्तिं चकारेमाम् ॥७९॥

यातुधानेषु यक्षेषु प्रत्यक्षमवलोकितेषु आशु क्षिप्रमेव मरकं सम्प्राप्तं निकटवर्तिनं निर्दिशेद्वदेत्। एतेषामुत्पातानां प्रतिघाताय नाशायेमां वक्ष्यमाणां शान्तिं गर्गश्चकार कृतवान् ॥७९॥

तां चाह—

महाशान्त्योऽथ बलयो भोज्यानि सुमहान्ति च।
कारयेत महेन्द्रं च माहेन्द्रीं च समर्चयेत् ॥८०॥

महाशान्त्यो महत्योऽतिप्रभूताः शान्त्यः। अथ बलयमुपहाराः, तथा सुमहान्त्यपि प्रभूतानि भोज्यानि च कारयेत। महेन्द्रमिन्द्रं च कारयेत। माहेन्द्रीमिन्द्राणीं च समर्चयेत् पूजयेत् ॥८०॥

इति शक्रध्वजेन्द्रकीलादिवैकृतम् ॥

अथ यत्र कालेषूत्पाता दृष्टा विफला भवन्ति तानाह—

नरपतिदेशविनाशे केतोरुदयेऽथवा ग्रहेऽर्केन्दोः।
उत्पातानां प्रभवः स्वर्तुभवश्चाप्यदोषाय ॥८१॥

नरपतिविनाशे राजमरणे, तथा देशविनाशे परदेशलुण्ठनं यदा क्रियते, तथा केतोरुदये शिखिनो दर्शने, अथवा ग्रहेऽर्केन्दोः सूर्याचन्द्रमसोरुपप्लवे। एतेषु

कालेषु उत्पातानां प्रभव उत्पत्तिः, तथा स्वर्तुभवः। स्वर्तावात्मीय ऋतौ वक्ष्यमाणानामुत्पातानां प्रभव उत्पत्तिरदोषाय भवति। यत्र यदनिष्टं फलयुक्तं तन्न भवति ॥८१॥

अथ स्वर्तुस्वभावकृतानुत्पातान् वक्ष्यामीत्याह—

ये च न दोषान् जनयन्त्युत्पातास्तानृतुस्वभावकृतान्।
ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः ॥८२॥

ये चोत्पाता ऋतुस्वभावकृता ऋतुस्वभावेनोत्पद्यन्ते दोषाननिष्टफलं न जनयन्ति नोत्पादयन्ति। तानृतुस्वभावकृतानृषिपुत्रकृतैः ऋषिपुत्रो नामाचार्यस्तत्कृतैः श्लोकैरिमैः समासोक्तैः समासेन सङ्क्षेपेण य उक्तास्तैर्विद्याज्जानीयात् ॥८२॥

तत्र वसन्ते प्राकृतानुत्पातानाह—

वज्राशनिमहीकम्पसन्ध्यानिर्घातनिःस्वनाः।
परिवेषरजोधूमरक्तार्कास्तमयोदयाः ॥८३॥
द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः।
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥८४॥

एत उत्पाता मधौ चैत्रे माधवे च वैशाखे मासि शिवाय श्रेयसे भवन्ति। के तानित्याह, वज्राशनीत्यादि, वज्रं विद्युत्, अशनिरश्मवर्षणमुल्काभेदो वा। महीकम्पो भूकम्पः। सन्ध्या प्रसिद्धा दीप्ता। यतस्तस्या[1] लक्षणमुक्तम्। निर्घातनिःस्वना निर्घातशब्दाः, अथवा निर्घाताः केवलाः, निःस्वनाश्च शब्दा यथा तथोच्चरिताः। परिवेषः सूर्याचन्द्रमसोः। रजो धूलिर्नभसि। धूमः काननेषु। तथा रक्तस्य लोहितवर्णस्यार्कस्य सूर्यस्यास्तमयोदयौ ॥८३॥

द्रुमेभ्यो वृक्षेभ्योऽन्नस्य भोजनस्य। रसानां मधुरादीनाम्। स्नेहस्य तैलादेः। बहूनां पुष्पाणां फलानां चोद्गमः सम्भवः। गवां धेनूनां पक्षिणां च मदवृद्धिः कामानुसेवनम् ॥८४॥

अथ ग्रीष्मे आह—

तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम्।
अनग्निज्वलनस्फोटधूमरेण्वनिलाहतम् ॥८५॥

---

१. अस्यैव ग्रन्थस्य ३० अध्याये सन्ध्यालक्षणम्।

रक्तपद्मारुणा सन्ध्या नभः क्षुब्धार्णवोपमम्।
सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥८६॥

एतानुत्पातान् ग्रीष्मे ज्यैष्ठाषाढयोर्दृष्ट्वा विलोक्य शुभं वदेत् ब्रूयात्। नभ आकाशं तारापातेनोल्कापातेन च कलुषमनिर्मलमनवरतपतनात्, तथा कपिलवर्णे अर्केन्द्वोः सूर्याचन्द्रमसोर्मण्डले विम्बे यत्र। अनग्निज्वलनं विनाऽग्निना ज्वलनं ज्वाला स्फोटस्तेनैव शब्दः, अथवा नभसः स्फोटः शब्दः धूमः। रेणुर्धूलिः। अनिलो वायुः। एतैराहतमुपहतम् ॥८५॥

तथा सन्ध्या रक्तपद्मारुणा रक्तपद्मवदरुणा लोहिता। नभ आकाशं क्षुब्धार्णवोपमं क्षुब्धसमुद्रसदृशम्। जलवीचिभिरिव व्याप्तम्। सरितां नदीनामम्बुसंशोषणं जलाभावः ॥८६॥

अथ वर्षास्वाह—

शक्रायुधपरीवेषविद्युच्छुष्कविरोहणम्।
कम्पोद्वर्तनवैकृत्यं रसनं दरणं क्षितेः ॥८७॥
सरोनद्युदपानानां वृद्ध्यूर्ध्वतरणप्लवाः।
सरणं चाद्रिगेहानां वर्षासु न भयावहम् ॥८८॥

वर्षास्वेतन्न भयावहं न भयप्रदम्। शुभमित्यर्थः। शक्रायुधमिन्द्रचापम्। परिवेषः सूर्याचन्द्रमसोः। विद्युत्तडित्। शुष्कविरोहणं शुष्काणां तरूणां पुनर्विरोहणं सरसत्वम्। क्षितेर्भूमेः कम्पश्चलनम्। उद्वर्त्तनं परिवर्त्तनम्। वैकृत्यं विकृतता विकारः स्वरूपान्यत्वम्। क्षितेर्भूमे रसनं शब्दः श्लेषणं वा। दरणं निःसरणं स्फोटनमित्यर्थः ॥८७॥

सरोनद्युदपानानां यथाक्रमं वृद्ध्यूर्ध्वतरणप्लवाः, सरसां वृद्धिर्वर्द्धनम्। नदीनामूर्ध्वतरणमूर्ध्वगमनम्, उदपानानां वापीकूपतडागानां प्लवो जलप्लवः। अद्रीणां पर्वतानां गेहानां गृहाणां सरणं लुण्ठनमिति ॥८८॥

अथ शरद्याह —

दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम्।
ग्रहनक्षत्रताराणां दर्शनं च दिवाऽम्बरे ॥८९॥
गीतवादित्रनिर्घोषा वनपर्वतसानुषु।
सस्यवृद्धिरपां हानिरपापाः शरदि स्मृताः ॥९०॥

एत उत्पाताः शरदि शरत्काले अपापाः शुभफलदाः स्मृता उक्ताः। दिव्यस्त्रीणामप्सर आदीनाम्। भूतानां गन्धर्वाणा देवयोनीनाम्। विमानानां रथानाम्।

अद्भुतानामाश्चर्योत्पादकानां च दर्शनम्। तथा अम्बरे आकाशे दिवा दिवसे ग्रह-नक्षत्रताराणां दर्शनम् ॥८९॥

वनेष्वरण्येषु पर्वतसानुष्वद्रिसमभागेषु। गीतस्य वादित्राणां च निर्घोषाः शब्दाः श्रूयन्ते। सस्यानां वृद्धिरभ्यधिकता। अपां जलानां च हानिरल्पत्वम् ॥९०॥

अथ हेमन्ते आह—

शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम्।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी ॥९१॥
दिशो धूमान्धकाराश्च सनभोवनपर्वताः।
उच्चैः सूर्योदयास्तौ च हेमन्ते शोभनाः स्मृताः ॥९२॥

एत उत्पाताः शोभना इष्टफला हेमन्ते स्मृता उक्ताः। शीतस्यानिलस्य वायोस्तुषारस्य च भावः। मृगाणां पक्षिणां च नर्दनं शब्दः। रक्षसां यक्षाणां सत्वानां च प्राणिनामदृश्यानां दर्शनम्। आदिग्रहणाद् भूतप्रेतपिशाचवेतालानां च दर्शनम्। अमानुषी मानुषेण विना वाक् ॥९१॥

दिश आशा धूमान्धकारा धूमेनान्धकारीकृताः। कीदृश्यो दिशः? सनभोवन-पर्वताः, सह नभसा आकाशेन वनैररण्यैः पर्वतैश्च सहिताः, तथा सूर्यस्यादित्य-स्योदयास्तमयावुच्चैरुच्चतरौ स्थानात् ॥९२॥

अथ शिशिरे आह—

हिमपातानिलोत्पाता विरूपाद्भुतदर्शनम्।
कृष्णाञ्जनाभमाकाशं तारोल्कापातपिञ्जरम् ॥९३॥
चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु।
पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः ॥९४॥

एत उत्पाताः शिशिरे शुभा इष्टफलदाः। हिमस्य तुहिनस्य पातः पतनम्। अनिलोत्पाता वाय्वपस्पर्शाः। विरूपाणां भीषणीयानां सत्वानामद्भुतानामाश्चर्यो-त्पादकानां च दर्शनम्। दिव्यपुरुषादीनाम्। आकाशं नभः कृष्णाञ्जनाभम्, कृष्णाञ्जनवदाभा कान्तिर्यस्य। तारापातैरुल्कापातैः पिञ्जरं चित्रितम् ॥९३॥

स्त्रीषु योषित्सु चित्रा नानाप्रकाराः श्वाद्यङ्गसदृशा गर्भोद्भवा गर्भाणां सम्भवाः, तथा गोषु, अजेषु छागेषु, अश्वेषु तुरगेषु, मृगेषु, पक्षिषु च विचित्र-गर्भोद्भवाः। गोऽजाश्वानां मृगपक्षिणां प्रकृतेर्विपर्यासः। पत्राणां पर्णानामङ्कुराणां लतानां विकारा विकृतय इति ॥९४॥

अत्रैव विशेषमाह—

ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभप्रदाः।
ऋतोरन्यत्र चोत्पाता दृष्टास्ते चातिदारुणाः॥९५॥

एते यथोक्ता उत्पाता ऋतुस्वभावेन जायन्ते उत्पद्यन्ते स्वर्तावात्मीयर्तौ दृष्टा अवलोकिताः शुभप्रदा भवन्ति। ऋतोरन्यत्राऽस्मिन् काले दृष्टास्त उत्पाताश्चातिदारुणा अतिकष्टफला भवन्ति॥९५॥

यद्यद्विशेषफलप्रदं भवति तत्तदाह—

उन्मत्तानां च या गाथाः शिशूनां यच्च भाषितम्।
स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः॥९६॥

उन्मत्तानां विचित्राणां या गाथाः प्राकृतकाव्यम्। शिशूनां बालानां यच्च भाषितं व्याहृतम्, यच्च स्त्रियो योषितः प्रभाषन्ते व्याहरन्ति। तस्य व्यतिक्रमोऽन्यथात्वं नास्ति न विद्यते। सर्वथा तद्भवतीत्यर्थः। येन कारणेनैतत्सत्यरूपं भवति॥९६॥

तत्प्रदर्शनार्थमाह—

पूर्वं चरति देवेषु पश्चाच्चरति मानुषान्।
नाचोदिता वाग्वदति सत्या ह्येषा सरस्वती॥९७॥

एषा भगवती सरस्वती सत्या सत्यरूपा अचोदिता अप्रेरिता न वदति न ब्रवीति। यतः प्रथमं पूर्वं देवेषु चरति देवलोकं याति। देवप्रेरिता पश्चादनन्तरं मानुषान् गच्छति॥९७॥

अथोत्पातशास्त्रज्ञस्य प्रभावमाह—

उत्पातान् गणितविवर्जितोऽपि बुद्ध्वा
विख्यातो भवति नरेन्द्रवल्लभश्च।
एतत्तन्मुनिवचनं रहस्यमुक्तं
यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी॥९८॥

गणितविवर्जितो ग्रहगणितरहितोऽप्युत्पातान् बुद्ध्वा ज्ञात्वा विख्यातः कीर्तियुक्तो नरेन्द्रवल्लभो नृपप्रियश्च भवति। एतत्तद्रहस्यं परमार्थं मुनिवचनमृषिवाक्यमुक्तं कथितम्। यज्ज्ञात्वा बुद्ध्वा नरः पुरुषस्त्रिकालदर्शी त्रिकालं पश्यति। अतीतानागतवर्तमानकालज्ञो भवतीत्यर्थः॥९८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावुत्पाताध्यायः
पञ्चचत्वारिंशः॥४५॥

अथ मयूरचित्रकं व्याख्यायते।

तत्रादावेव तत्प्रदर्शनार्थमाह--

दिव्यान्तरिक्षाश्रयमुक्तमादौ मया फलं शस्तमशोभनं च।
प्रायेण चारेषु समागमेषु युद्धेषु मार्गादिषु विस्तरेण ॥१॥
भूयो वराहमिहिरस्य न युक्तमेतत्
कर्तुं समासकृदसाविति तस्य दोषः।
तज्ज्ञैर्न वाच्यमिदमुक्तफलानुगीति
यद्बर्हिचित्रकमिति प्रथितं वराङ्गम् ॥२॥
स्वरूपमेव तस्य तत्प्रकीर्तितानुकीर्तनम्।
ब्रवीम्यहं न चेदिदं तथाऽपि मेऽत्र वाच्यता ॥३॥

मया आदौ प्रथमं दिव्यान्तरिक्षाश्रयं फलम्। ग्रहाश्च नक्षत्राण्याश्रयो यस्य तद्दिव्यम्। उल्कानिर्घातपवनपरिवेषगन्धर्वनगरेन्द्रचापाद्याश्रयो यस्य तदान्तरिक्षम्। तच्च शस्तं शुभमशोभनं चाशस्तं प्रायेण बाहुल्येन चारेषु समागमेषु चन्द्रग्रहसंयोगेषु। युद्धेषु। मार्गादिषु मार्गेषु शुक्रचारोक्तेषु। आदिग्रहणान्मण्डलेषु सर्वं विस्तरेणोक्तं कथितम् ॥१॥

एतत्सर्वं पूर्वोक्तं भूयः पुनर्वराहमिहिरस्य वक्तुं न युक्तं नोपपन्नम्। यतोऽसौ वराहमिहिरः समासकृदिति संक्षेपकृदिति तस्य वराहमिहिरस्य दोषो व्यासकृतः। पुनरुक्तं कर्तुं न युज्यते। यस्माद्यतो बर्हिचित्रकं मयूरचित्रकं वराङ्गं संहितायाः प्रधानमङ्गं प्रथितं प्रसिद्धम्। अतोऽत्रोक्तफलानुगीति तज्ज्ञैर्न वाच्यम्। उक्तानां कथितानां फलानामनुगीति पुनः कीर्तनं पण्डितैर्न वक्तव्यम् ॥२॥

स्वरूपमेवेति। तस्य मयूरचित्रकस्य च तदेव स्वरूपं चरितं यत्प्रकीर्तितानामनुकीर्तनं पुनःकरणम्। अहं यदीदं मयूरचित्रकं न ब्रवीमि न वच्मि तथाऽप्यत्र मे वाच्यता भवति, यथा किमिति वराहमिहिरेण नोक्तम् ॥३॥

तदत्र ग्रहणचारोक्तफलमाह—

उत्तरवीथिगता द्युतिमन्तः क्षेमसुभिक्षशिवाय समस्ताः।
दक्षिणमार्गगता द्युतिहीनाः क्षुद्भयतस्करमृत्युकरास्ते ॥४॥

उत्तरवीथयो नागगजैरावताः तासु सर्व एव भौमादयस्ताराग्रहा गता ये च द्युतिमन्तस्तेजस्विनः क्षेमसुभिक्षशिवाय भवन्ति। तथा त एव ग्रहा दक्षिणमार्गगता मृगाजदहनाख्यासु वीथिषु स्थिताः। द्युतिहीनाः कान्तिरहिताः। क्षुद्भयतस्करमृत्यु-

कराः, क्षुद्भयं दुर्भिक्षम्, तस्करांश्चौरान्, मृत्युं मरणं च कुर्वन्ति। अर्थादेव मध्यवीथिषु गता मध्यफलाः। तथा च गर्गः—

वर्णवन्तः स्वमार्गस्था नागवीथीविचारिणः।
यदि ताराग्रहाः सन्ति सर्वलोकहितावहाः॥
वैश्वानरपथप्राप्ता एकनक्षत्रचारिणः।
पञ्च ताराग्रहाश्चेत् स्युर्विन्द्याल्लोकस्य संक्षयम्॥इति॥४॥

अन्यदप्याह—

कोष्ठागारगते भृगुपुत्रे पुष्यस्थे च गिराम्प्रभविष्णौ।
निर्वैराः क्षितिपाः सुखभाजः संहृष्टाश्च जना गतरोगाः॥५॥

कोष्ठागारं मघा तत्र गते तत्रस्थे भृगुपुत्रे शुक्रे गिराम्प्रभविष्णौ वाचां स्वामिनि बृहस्पतौ पुष्यस्थे च क्षितिपा राजानो निर्वैरा विगतद्वेषाः सुखभाजश्च भवन्ति। तथा जना लोकाः संहृष्टाः प्रमुदिता गतरोगाः स्वस्थदेहाश्च भवन्ति। तथा च गर्गः—

कोष्ठागारगते शुक्रे पुष्यस्थे च बृहस्पतौ।
विन्द्यात्तदा सुखं लोके शान्तशस्त्रमनामयम्॥इति॥५॥

अन्यदप्याह—

पीडयन्ति यदि कृत्तिकां मघां रोहिणीं श्रवणमैन्द्रमेव वा।
प्रोज्झ्य सूर्यमपरे ग्रहास्तदा पश्चिमा दिगनयेन पीड्यते॥६॥

सूर्यमादित्यं प्रोज्झ्य वर्जयित्वा अपरे सर्वे चन्द्रादयो ग्रहा यदा कृत्तिका, मघा, रोहिणी, श्रवणम्, ऐन्द्रं ज्येष्ठा, एतानि नक्षत्राणि पीडयन्ति दक्षिणमार्गगमनेन योगतारकाच्छादनेन भेदनेन वा। तदा पश्चिमा दिग् अपराशा अनयेनानीत्या पीड्यते। तथा च गर्गेणोच्यते—

वैष्णवं पित्रमाग्नेयं ज्येष्ठामपि च रोहिणीम्।
पीडयन्ति यदैतानि राहुषष्ठानुचारिणः॥
दुर्भिक्षं जायते लोके सस्यमत्र न रोहति।
शुष्यन्ति सरितः सर्वाः पर्जन्यश्च न वर्षति॥इति॥६॥

अन्यदप्याह—

प्राच्यां चेद् ध्वजवदवस्थिता दिनान्ते
प्राच्यानां भवति हि विग्रहो नृपाणाम्।

मध्ये चेद् भवति हि मध्यदेशपीठा
रूक्षैस्तैर्न तु रुचिमन्मयूखवद्भिः ॥७॥

एत एव चन्द्रादयो ग्रहा दिनान्ते अस्तमयकाले प्राच्यां पूर्वस्यां दिशि ध्वजवत्पताकासंस्थानेनावस्थिता यदि भवन्ति, तदा प्राच्यानां प्राग्देशवर्तिनां नृपाणां राज्ञां विग्रहो भवति परस्परं द्वेषः। अथ यदि मध्ये नभोमध्ये ध्वजवदवस्थिता भवन्ति, तदा मध्यदेशपीडा भवति। किं सर्वदा? न, इत्याह——रूक्षैस्तैः, तैर्ग्रहै रूक्षैः कलुषैः स्वल्पविम्बैर्यदुक्तं तदेव भवति प्राच्यानां नृपाणां विग्रहस्तथा मध्यदेशपीडा, न तु रुचिमन्मयूखवद्भिः, रुचिमद्भिर्दीप्तिमद्भिर्मयूखवद्भिः स्फुटरश्मिवद्भिश्च न भवति ॥७॥

अन्यदप्याह——

दक्षिणां ककुभमाश्रितस्तु तैर्दक्षिणापथपयोमुचां क्षयः।
हीनरूक्षतनुभिश्च विग्रहः स्थूलदेहकिरणान्वितैः शुभम् ॥८॥

तैर्ग्रहैर्दक्षिणां ककुभं याम्यां दिशमाश्रितैर्दक्षिणापथपयोमुचां दक्षिणस्यां दिशि पयोमुचां मेघानां क्षयो विनाशो भवति। तथा तैरेव दक्षिणां ककुभमाश्रितैर्हीनरूक्षतनुभिः, हीना अल्पा रूक्षा कलुषा तनुः शरीरं येषां तैस्तथाभूतैर्विग्रहैस्तैरेव स्थूलदेहैर्बृहद्बिम्बैः किरणान्वितै रश्मिवद्भिः शुभं तत्रैव वाच्यम् ॥८॥

अन्यदप्याह——

उत्तरमार्गे स्पष्टमयूखाः शान्तिकरास्ते तन्नृपतीनाम्।
ह्रस्वशरीरा भस्मसवर्णा दोषकराः स्युर्देशनृपाणाम् ॥९॥

त एव ग्रहा उत्तरमार्गे उत्तरस्यां दिशि उत्तरवीथिषु व्यवस्थिताः स्पष्टमयूखा विपुलरश्मयः। तन्नृपतीनामुत्तरपथराजानां शान्तिकराः शिवप्रदाः। तथा त एव ग्रहा ह्रस्वशरीराः स्वल्पविम्बा भस्मवर्णा विगतकान्तयः कलुषाश्च तद्देशनृपाणामुत्तरपथराजानां दोषकराः। तथा च गर्गः——

उत्तरोत्तरमार्गस्था रश्मिमालाधरा ग्रहाः।
विष्पन्दन्त इवात्यर्थं जयमाहुरुपस्थितम् ॥इति॥९॥

अन्यदप्याह——

नक्षत्राणां तारकाः सग्रहाणां
[1]धूमज्वालाविस्फुलिङ्गान्विताश्चेत्।

---

१. धूमज्वालाविस्फुलिङ्गावृताश्चेति पाठान्तरम्।

आलोकं वा निर्निमित्तं न यान्ति
याति ध्वंसं सर्वलोकः सभूपः ॥१०॥

येषां देशानां संबन्धिनां कूर्मविभागोक्तानां नक्षत्राणामश्विन्यादीनां यास्तारकास्ताश्च सधूमज्वालाविस्फुलिङ्गा धूमयुक्ता ज्वालायुक्ता वा विस्फुलिङ्गयुक्ता दृश्यन्ते यासु धूमेन ज्वालया विस्फुलिङ्गैरग्निकणैर्व्याप्ताः। केचित् पठन्ति धूमज्वालाविस्फुलिङ्गावृताश्च। अथवा निर्निमित्तं कारणं विना रजोनीहारमेघान्विता आलोकं दर्शनं न यान्ति। देशानां नक्षत्रोक्तानां ग्रहभक्तिकथितानां वा सभूपो नृपतिसहितः सर्वलोको निःशेषो जनो ध्वंसं नाशं याति गच्छति ॥१०॥

अन्यदप्याह—

दिवि भाति यदा तुहिनांशुयुगं
द्विजवृद्धिरतीव तदाशु शुभा।
तदनन्तरवर्णरणोऽर्कयुगे
जगतः प्रलयस्त्रिचतुष्प्रभृति ॥११॥

दिव्याकाशे यदा यस्मिन् काले तुहिनांशुयुगं चन्द्रयुग्मं भाति दृश्यते, तदा तस्मिन् काले आशु क्षिप्रं शुभा शोभना अतीवात्यर्थं द्विजानां ब्राह्मणानां वृद्धिर्भवति। तथा अर्कयुगे सूर्ययुग्मे दृष्टे तदनन्तरवर्णस्य ब्राह्मणात् परस्य क्षत्रियाख्यस्य रणः संग्रामो भवति। तथा त्रिषु चतुर्षु पञ्चसु वा सूर्येषु दृष्टेषु जगतो जनस्य प्रलयः संहार इति। तथा च गर्गः—

द्विचन्द्रं गगनं दृष्ट्वा विन्द्याद् ब्रह्मसमुत्थितम्।
द्वौ वा सूर्यौ यदा स्यातां तदा क्षत्रं विरुद्ध्यति॥
दृष्ट्वा त्रिचतुरः सूर्यानुदितान् सर्वतो दिशम्।
शस्त्रेण जनमारेण तद्युगान्तरदर्शनम् ॥इति॥११॥

अन्यदप्याह—

मुनीनभिजितं ध्रुवं मघवतश्च भं संस्पृशन्
शिखी घनविनाशकृत् कुशलकर्महा शोकदः।
भुजङ्गमथ संस्पृशेद् भवति वृष्टिनाशो ध्रुवं
क्षयं व्रजति विद्रुतो जनपदश्च बालाकुलः ॥१२॥

शिखी केतुर्मुनीन् सप्तर्षीन्। अभिजिदभिजित्तारकं ध्रुवं ध्रुवतारकं मघवत इन्द्रस्य भं ज्येष्ठा। एतानि यदि संस्पृशेत् स्पर्शयति तदा घनानां मेघानां विनाशकृद्विनाशं

करोति। कुशलकर्महा कुशलमारोग्यं कर्माणि च यानि क्रियन्ते तानि हन्ति। शोकदः शोकं च ददाति। अथ भुजङ्गमाश्लेषां यदि स्पृशेत्तदा ध्रुवं निश्चितं वृष्टिनाशो भवति, अवृष्टिर्जायते। तथा जनपदो लोको बालाकुलः शिशुभिराकुलीकृतश्चलितश्च क्षयं विनाशं व्रजति गच्छति॥१२॥

अन्यदप्याह—

प्राग्द्वारेषु चरन् रविपुत्रो नक्षत्रेषु करोति च वक्रम्।
दुर्भिक्षं कुरुते महदुग्रं मित्राणां च विरोधमवृष्टिम्॥१३॥

यात्रायां यानि प्राग्द्वारिकाणि कृत्तिकाद्यानि सप्त नक्षत्राणि उक्तानि तेषु च सप्तसु नक्षत्रेषु रविपुत्रः शनैश्चरस्तिष्ठेद्यदा च वक्रं करोति प्रतीपगमनमाश्रयति। तदा महदुग्रमतीव कष्टं दुर्भिक्षं कुरुते। येषु देशेषु भानि नक्षत्राणि तेषु विशेषतः। तथा मित्राणां सुहृदां च परस्परं विरोधं द्वेषमवृष्टिं च करोति। तथा च गर्गः—

विलम्बितगतिः सौरः प्राग्द्वारेषु यदा भवेत्।
महाभयानि चत्वारि विजानीयात् समन्ततः॥
अनावृष्टिभयं घोरं दुर्भिक्षं मित्रविग्रहम्॥इति॥१३॥

अन्यदप्याह—

रोहिणीशकटमर्कनन्दनो यदि भिनत्ति रुधिरोऽथवा शिखी।
किं वदामि यदनिष्टसागरे जगदशेषमुपयाति संक्षयम्॥१४॥

अर्कनन्दनः सौरो यदि रोहिणीशकटं भिनत्ति विदारयति रुधिरोऽङ्गारको वा शिखी केतुरथवा, तदा अनिष्टसागरे अनिष्टसमुद्रे अशेषं सर्वं जगद्विश्वं संक्षयं विनाशं याति। किमन्यदपरं वदामि कथयामि यदनिष्टं न भवति। तथा च गर्गः—

रोहिणीशकटं भौमो भिनत्त्यर्कसुतोऽथवा।
केतुर्वा जगतो ब्रूयात् प्रलयं समुपस्थितम्॥इति॥१४॥

अन्यदप्याह—

उदयति सततं यदा शिखी चरति भचक्रमशेषमेव वा।
अनुभवति पुराकृतं तदा फलमशुभं सचराचरं जगत्॥१५॥

शिखी केतुर्यदा सततं सर्वकालमुदयति दर्शनं गच्छति, अशेषं समग्रं भचक्रं नक्षत्रमण्डलमेव वा चरति विचरति, तदा सचराचरं जङ्गमस्थावराख्यं जगद्विश्वं पुराकृतमन्यजन्मार्जितं फलमशुभमनिष्टमनुभवत्युपभुंक्ते इत्यर्थः॥१५॥

अधुना चन्द्रचारोक्तफलमाह--

धनुःस्थायी रूक्षो रुधिरसदृशः क्षुद्भयकरो
बलोद्योगं चन्द्रः कथयति जयं ज्याऽस्य च यतः।
गवां शृङ्गो गोघ्नो निधनमपि सस्यस्य कुरुते
ज्वलन् धूमायन् वा नृपतिमरणायैव भवति॥१६॥

चन्द्र इन्दुः। धनुःस्थायी चापसंस्थानः। रूक्षः कलुषः। रुधिरसदृशो लोहितवर्णस्तथाभूतः। क्षुद्भयकरो दुर्भिक्षभयं करोति। तथा बलानां सैन्यानामुद्योगं युद्धं कथयत्याचष्टे। अस्य चन्द्रमसो यतो यस्यां दिशि ज्या गुणः स्थिता, तत्र ये नृपाः स्थितास्तेषां जयम्। गवां शृङ्गो गोविषाणो गोघ्नो गवां नाशकरः सस्यस्यापि निधनं विनाशं कुरुते। अथ ज्वलन् ज्वालामुद्वहन्। धूमायन् वा धूमं समुद्वहन् वा। नृपते राज्ञो मरणाय मृत्यव एव भवति॥१६॥

अन्यदप्याह--

स्निग्धः स्थूलः समशृङ्गो विशालस्तुङ्गश्चोदग्विचरन्नागवीथ्याम्।
दृष्टः सौम्यैरशुभैर्विप्रयुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः॥१७॥

एवंविधश्चन्द्रः शशी दृष्टोऽतीवात्यर्थं लोकानां जनानामानन्दं तुष्टिं कुरुते। कीदृशः? स्निग्धो निर्मलः, स्थूलो घनः, समशृङ्गस्तुल्यविषाणः, विशालो विस्तीर्णः, तुङ्ग उच्चस्थः, उदगुत्तरशृङ्गः, उत्तरशृङ्गोन्नत इत्यर्थः। नागवीथ्याम् "नागा[1] तु पवनयाम्यानलानि "त्युक्ता तस्यां विचरंस्तिष्ठन् सौम्यैः शुभग्रहैर्बुधजीवशुक्रैर्दृष्टो विलोकितः। अशुभैः पापैरादित्यभौमसौरैर्विप्रयुक्तो विरहितः॥१७॥

अन्यदप्याह--

पित्र्यमैत्रपुरुहूतविशाखा-
त्वाष्ट्रमेत्य च युनक्ति शशाङ्कः।
दक्षिणेन न शुभः शुभकृत् स्याद्
यद्युदक् चरति मध्यगतो वा॥१८॥

पित्र्यं मघा। मैत्रमनुराधा। पुरुहूतो ज्येष्ठा। विशाखा। त्वाष्टं चित्रा। एतानि नक्षत्राणि शशाङ्कश्चन्द्रः समेत्य प्राप्य दक्षिणेन याम्येन भागेन यदि युनक्ति संयोगं करोति, तदा न शुभोऽनिष्टफलदः। यद्युदगुत्तरेण चरति गच्छति प्रागुक्तेषु नक्षत्रेषु मध्यगतो वा मध्येन गच्छति, तदा शुभकृच्छुभफलं करोति॥१८॥

---

१ द्रष्टव्यमस्य ग्रन्थस्य १९६ पृष्ठे २ मूलश्लोकः।

अथ परिघपरिधिदण्डामोघरश्मिरोहितैरावतानां लक्षणमाह--

परिघ इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा।
परिधिस्तु प्रतिसूर्यो दण्डस्त्वृजुरिन्द्रचापनिभः ॥१९॥
उदयेऽस्ते वा भानोर्ये दीर्घा रश्मयस्त्वमोघास्ते।
सुरचापखण्डमृजु यद्रोहितमैरावतं दीर्घम् ॥२०॥

भास्करस्यादित्यस्योदये अस्तमये वा तिर्यग् या स्थिता मेघरेखा भवति, स परिघ इति परिघसंज्ञः। तथा प्रतिसूर्यः परिधिसंज्ञः। इन्द्रचापनिभः शक्रधनुःसदृशः ऋजुः स्पष्टो दण्डसंज्ञः ॥१९॥

उदयेऽस्ते वेति। भानोरादित्यस्योदयेऽस्तमये वा ये दीर्घा आयामिनो रश्मयः किरणास्ते त्वमोघाख्या अमोघसंज्ञाः। सुरचापखण्डमिन्द्रधनुःखण्डं यदृजु स्पष्टं तद्रोहितसंज्ञम् तदेव यदि दीर्घं भवति तदैरावतसंज्ञं ज्ञेयम् ॥२०॥

अथ सन्ध्यालक्षणमाह--

अर्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्।
तेजःपरिहानिमुखाद्भानोरर्धोदयो यावत् ॥२१॥
तस्मिन् सन्ध्याकाले चिह्नैरेतैः शुभाशुभं वाच्यम्।
सर्वैरेतैः स्निग्धैः सद्यो वर्षं भयं रूक्षैः ॥२२॥

भानोरादित्यस्यार्धास्तमयादारभ्य यावत्तारका नभसि न व्यक्तीभूता न परिस्फुटाः, तावदपरा सन्ध्या। तथा तारकाणां तेजःपरिहानिमुखाद्दीप्तिनिवृत्तेरारभ्य यावद् भानोरर्कस्यार्धोदयस्तावत् पूर्वा सन्ध्या ॥२१॥

तस्मिन् यथोद्दिष्टे सन्ध्यासमये एतैः प्रागुक्तैश्चिह्नैर्वक्ष्यमाणैश्च शुभाशुभं फलं वाच्यं वक्तव्यम्। एतैस्तथा वक्ष्यमाणैश्च चिह्नैः सर्वैः स्निग्धैः सस्नेहैः सद्यस्तस्मिन्नहनि वर्षं ज्ञेयम्। तस्मिन्नेवाहनि वर्षति। तैरेव रूक्षैः सद्यो भयमिति ॥२२॥

अथ वृष्टिज्ञानमाह--

अच्छिन्नः परिघो वियच्च विमलं श्यामा मयूखा रवेः
स्निग्धा दीधितयः मितं सुरधनुर्विद्युच्च पूर्वोत्तरा।
स्निग्धो मेघतरुर्दिवाकरकरैरालिङ्गितो वा यदा
वृष्टिः स्याद्यदि वाऽर्कमस्तसमये मेघो महान् छादयेत् ॥२३॥

परिघोऽच्छिन्नोऽखण्डः। सकल इत्यर्थः। वियदाकाशं विमलं निर्मलम्। रवेरादित्यस्य मयूखा रश्मयः श्यामाः श्यामवर्णाः। ते च मेघाख्याः। तथा दीधितयः

अधुना चन्द्रचारोक्तफलमाह—

धनुःस्थायी रूक्षो रुधिरसदृशः क्षुद्भयकरो
बलोद्योगं चन्द्रः कथयति जयं ज्याऽस्य च यतः।
गवां शृङ्गो गोघ्नो निधनमपि सस्यस्य कुरुते
ज्वलन् धूमायन् वा नृपतिमरणायैव भवति॥१६॥

चन्द्र इन्दुः। धनुःस्थायी चापसंस्थानः। रूक्षः कलुषः। रुधिरसदृशो लोहितवर्णस्तथाभूतः। क्षुद्भयकरो दुर्भिक्षभयं करोति। तथा बलानां सैन्यानामुद्योगं युद्धं कथयत्याचष्टे। अस्य चन्द्रमसो यतो यस्यां दिशि ज्या गुणः स्थिता, तत्र ये नृपाः स्थितास्तेषां जयम्। गवां शृङ्गो गोविषाणो गोघ्नो गवां नाशकरः सस्यस्यापि निधनं विनाशं कुरुते। अथ ज्वलन् ज्वालामुद्वहन्। धूमायन् वा धूमं समुद्वहन् वा। नृपते राज्ञो मरणाय मृत्यव एव भवति॥१६॥

अन्यदप्याह—

स्निग्धः स्थूलः समशृङ्गो विशालस्तुङ्गश्चोदग्विचरन्नागवीथ्याम्।
दृष्टः सौम्यैरशुभैर्विप्रयुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः॥१७॥

एवंविधश्चन्द्रः शशी दृष्टोऽतीवात्यर्थं लोकानां जनानामानन्दं तुष्टिं कुरुते। कीदृशः? स्निग्धो निर्मलः, स्थूलो घनः, समशृङ्गस्तुल्यविषाणः, विशालो विस्तीर्णः, तुङ्ग उच्चस्थः, उदगुत्तरशृङ्गः, उत्तरशृङ्गोन्नत इत्यर्थः। नागवीथ्याम् "नागा[1] तु पवनयाम्यानलानि "त्युक्ता तस्यां विचरंस्तिष्ठन् सौम्यैः शुभग्रहैर्बुधजीवशुक्रैर्दृष्टो विलोकितः। अशुभैः पापैरादित्यभौमसौरैर्विप्रयुक्तो विरहितः॥१७॥

अन्यदप्याह—

पित्र्यमैत्रपुरुहूतविशाखा-
त्वाष्ट्रमेत्य च युनक्ति शशाङ्कः।
दक्षिणेन न शुभः शुभकृत् स्याद्
यद्युदक् चरति मध्यगतो वा॥१८॥

पित्र्यं मघा। मैत्रमनुराधा। पुरुहूतो ज्येष्ठा। विशाखा। त्वाष्टं चित्रा। एतानि नक्षत्राणि शशाङ्कश्चन्द्रः समेत्य प्राप्य दक्षिणेन याम्येन भागेन यदि युनक्ति संयोगं करोति, तदा न शुभोऽनिष्टफलदः। यद्युदगुत्तरेण चरति गच्छति प्रागुक्तेषु नक्षत्रेषु मध्यगतो वा मध्येन गच्छति, तदा शुभकृच्छुभफलं करोति॥१८॥

---

१ द्रष्टव्यमस्य ग्रन्थस्य १९६ पृष्ठे २ मूलश्लोकः।

अथ परिघपरिधिदण्डामोघरश्मिरोहितैरावतानां लक्षणमाह--

परिघ इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा।
परिधिस्तु प्रतिसूर्यो दण्डस्त्वृजुरिन्द्रचापनिभः ॥१९॥
उदयेऽस्ते वा भानोर्ये दीर्घा रश्मयस्त्वमोघास्ते।
सुरचापखण्डमृजु यद्रोहितमैरावतं दीर्घम् ॥२०॥

भास्करस्यादित्यस्योदये अस्तमये वा तिर्यग् या स्थिता मेघरेखा भवति, स परिघ इति परिघसंज्ञः। तथा प्रतिसूर्यः परिधिसंज्ञः। इन्द्रचापनिभः शक्रधनुःसदृशः ऋजुः स्पष्टो दण्डसंज्ञः ॥१९॥

उदयेऽस्ते वेति। भानोरादित्यस्योदयेऽस्तमये वा ये दीर्घा आयामिनो रश्मयः किरणास्ते त्वमोघाख्या अमोघसंज्ञाः। सुरचापखण्डमिन्द्रधनुःखण्डं यदृजु स्पष्टं तद्रोहितसंज्ञम् तदेव यदि दीर्घं भवति तदैरावतसंज्ञं ज्ञेयम् ॥२०॥

अथ सन्ध्यालक्षणमाह--

अर्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्।
तेजःपरिहानिमुखाद्भानोरर्धोदयो यावत् ॥२१॥
तस्मिन् सन्ध्याकाले चिह्नैरेतैः शुभाशुभं वाच्यम्।
सर्वैरेतैः स्निग्धैः सद्यो वर्षं भयं रूक्षैः ॥२२॥

भानोरादित्यस्यार्धास्तमयादारभ्य यावत्तारका नभसि न व्यक्तीभूता न परिस्फुटाः, तावदपरा सन्ध्या। तथा तारकाणां तेजःपरिहानिमुखाद्दीप्तिनिवृत्तेरारभ्य यावद् भानोरर्कस्यार्धोदयस्तावत् पूर्वा सन्ध्या ॥२१॥

तस्मिन् यथोद्दिष्टे सन्ध्यासमये एतैः प्रागुक्तैश्चिह्नैर्वक्ष्यमाणैश्च शुभाशुभं फलं वाच्यं वक्तव्यम्। एतैस्तथा वक्ष्यमाणैश्च चिह्नैः सर्वैः स्निग्धैः सस्नेहैः सद्यस्तस्मिन्नहनि वर्षं ज्ञेयम्। तस्मिन्नेवाहनि वर्षति। तैरेव रूक्षैः सद्यो भयमिति ॥२२॥

अथ वृष्टिज्ञानमाह--

अच्छिन्नः परिघो वियच्च विमलं श्यामा मयूखा रवेः
स्निग्धा दीधितयः मितं सुरधनुर्विद्युच्च पूर्वोत्तरा।
स्निग्धो मेघतरुर्दिवाकरकरैरालिङ्गितो वा यदा
वृष्टिः स्याद्यदि वार्कमस्तसमये मेघो महान् छादयेत् ॥२३॥

परिघोऽच्छिन्नोऽखण्डः। सकल इत्यर्थः। वियदाकाशं विमलं निर्मलम्। रवेरादित्यस्य मयूखा रश्मयः श्यामाः श्यामवर्णाः। ते च मेघाख्याः। तथा दीधितयः

सामान्यरश्मयो येऽन्ये अमोघवर्जितास्ते स्निग्धाः। सुरधनुरिन्द्रचापं सितं श्वेतम्। पूर्वोत्तरा चैशानी विद्युत्तडिद् दृश्यते। मेघतरुर्मेघ एव वृक्षाकारः, स च स्निग्धो निर्मलः। अथवा सर्व एव मेघतरुर्दिवाकरकरैः सूर्यरश्मिभिरालिङ्गितो व्याप्तः समन्ततस्तदा वृष्टिर्वर्षणं स्याद् भवेत्। यदि वाऽस्तसमये सूर्यास्तमयवेलायामार्कं रविं महान् मेघो बृहद्घनः छादयेत् स्थगयेत्तथापि वृष्टिः स्यात् ॥२३॥

अधुनार्कचारोक्तं फलमाह--

खण्डो वक्रः कृष्णो ह्रस्वः काकाद्यैर्वा चिह्नैर्विद्धः।
यस्मिन् देशे रूक्षश्चार्कस्तत्राभावः प्रायो राज्ञः ॥२४॥

अर्क आदित्यो यस्मिन् देशे खण्डोऽसकलः। वक्रः कुटिलो दीर्घश्च। कृष्णोऽसितवर्णः। ह्रस्वः स्वल्पबिम्बः। अथवा काकाद्यैश्चिह्नैर्विद्धः। आदिग्रहणाद्ध्वांक्षकबन्धप्रहरणा ग्रहीतव्याः। तैर्विद्धः। तथा रूक्षो न निर्मलः। एवंविधो दृश्यते। तस्मिन् देशे यो राजा तस्य राज्ञः प्रायो बाहुल्येनाभावो विनाश इत्यर्थः॥ तथा च गर्गः--

खण्डो वा कृष्णवर्णो वा ह्रस्वः पिङ्गलकोऽथवा।
यत्रार्को दृश्यते तत्र राज्ञो मृत्युं विनिर्दिशेत् ॥इति॥२४॥

अथ युद्धकाले जयपराजयज्ञानमाह--

वाहिनीं समुपयाति पृष्ठतो मांसभुक् खगगणो युयुत्सतः।
यस्य तस्य बलविद्रवो महानग्रगैस्तु विजयो विहङ्गमैः ॥२५॥

यस्य राज्ञो युयुत्सतो योद्धुमिच्छतो वाहिनीं सेनां मांसभुगामिषादः खगगणः पक्षिसमूहः पृष्ठतः पश्चात् समुपयाति गच्छति तस्य महानतीव बलविद्रवः सेनापलायनं भवति। अग्रगैः पुरोगैर्विहङ्गमैः पक्षिभिर्विजयो भवति ॥२५॥

अथ गन्धर्वपुरलक्षणमाह--

भानोरुदये यदि वास्तमये गन्धर्वपुरप्रतिमा ध्वजिनी।
बिम्बं निरुणद्धि तदा नृपतेः प्राप्तं समरं सभयं प्रवदेत् ॥२६॥

भानोरादित्यस्योदये अस्तमये वा यदि गन्धर्वपुरप्रतिमा गन्धर्वनगरतुल्या ध्वजिनी सेना यदा बिम्बं मण्डलं निरुणद्धि छादयति, तदा नृपते राज्ञः समरं संग्रामं सभयं भयसहितं प्राप्तमायातमिति प्रवदेद् ब्रूयात्। तथा च गर्गः--

आदित्ये सरथा सेना सन्ध्याकाले यदा भवेत्।
प्रत्यासन्नं विजानीयाद् भूमिपस्य पराजयम् ॥इति॥२६॥

अथ सन्ध्यालक्षणमाह—

शस्ता शान्तद्विजमृगघुष्टा सन्ध्या स्निग्धा मृदुपवना च।
पांशुध्वस्ता जनपदनाशं धत्ते रूक्षा रुधिरनिभा वा ॥२७॥

सन्ध्या शान्तैरनर्काभिमुखैर्मधुरस्वरैर्द्विजैः पक्षिभिर्मृगैरारण्यपशुभिश्च घुष्टा कृतशब्दा शस्ता शुभदा, तथा स्निग्धा निर्मला, मृदुपवना अल्पवाता च शस्ता, पांशुध्वस्ता रजसा कलुषीकृता, रूक्षा निःस्नेहा, रुधिरनिभा वा लोहितवर्णा जनपदानां नाशं संक्षयं धत्ते ददाति ॥२७॥

अथात्मनः पेशलत्वं प्रदर्शयितुमाह—

यद्विस्तरेण कथितं मुनिभिस्तदस्मिन्
सर्वं मया निगदितं पुनरुक्तवर्जम्।
श्रुत्वाऽपि कोकिलरुतं बलिभुग्विरौति
यत्तत् स्वभावकृतमस्य पिकं न जेतुम् ॥२८॥

मुनिभिर्गर्गादिभिर्यन्मयूरचित्रकं विस्तरेण व्यासेन कथितमुक्तं तत्सर्वमस्मिन् मयूरचित्रके मया पुनरुक्तवर्जं निगदितमुक्तम्। आदौ तावन्मयूरचित्रकं पुनरुक्तं तत्रापि मुनिभिः पुनरुक्तं कृतं तन्मया नोक्तम्। यद्यप्येवं तथापि कोकिलस्य परभृतस्य रुतं शब्दितं श्रुत्वा आकर्ण्य बलिभुक्काकस्तदनुसारेण विरौति यत्तदस्य काकस्य स्वभावकृतं प्राकृतं प्रकृतिभवमेवायाति, न पिकं कोकिलं जेतुं शक्नोति। अनेनात्मनः पेशलत्वं प्रदर्शितं भवति ॥२८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ मयूरचित्रकं नाम
षट्चत्वारिंशोऽध्यायः ॥४६॥

अथ पुष्यस्नानं व्याख्यायते।

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह—

मूलं मनुजाधिपतिः प्रजातरोस्तदुपघातसंस्कारात्।
अशुभं शुभं च लोके भवति यतोऽतो नृपतिचिन्ता ॥१॥

प्रजातरोः प्रजावृक्षस्य मनुजाधिपतिः राजा मूलं यथा वृक्षस्य शाखिनो मूलवर्धने वृद्धिः सर्वत्रावयवेषु भवति। एवं राजनि विवृद्धे प्रजाः सुस्थिताः। तदुप-

घातात्तस्य प्रजातरोर्मूलविघाताद्विनाशो जनपदस्यानिष्टमशुभं भवति। तत्संस्कारा-च्छुभमिष्टं भवति। वृक्षवद्यतो यस्मादतोऽस्माद्धेतोर्नृपतिचिन्ता राज्ञः शुभवृद्धयर्थे चिन्ता कार्या। यत्नो विधेय इति। यतो मूलात् फलसम्भवः फलसम्भवात् प्रजावृद्धि-स्तदुपजीवनात् ॥१॥

अत्राऽऽगमप्रदर्शनार्थमाह—

या व्याख्याता शान्तिः स्वयम्भुवा सुरगुरोर्महेन्द्रार्थे।
तां प्राप्य वृद्धगर्गः प्राह यथा भागुरेः शृणुत ॥२॥

या शान्तिः स्वयम्भुवा ब्रह्मणा महेन्द्रस्य सुराधिपस्यार्थे सुरगुरोर्बृहस्पते-र्व्याख्याता कथिता तां शान्ति वृद्धगर्गः प्राप्य लब्ध्वा यथा येन प्रकारेण भागुरेर्मुनि-प्रधानस्य शिष्यस्य प्राहोक्तवान्, तथा तां शान्तिं शृणुताऽऽकर्णयत। तथा च वृद्धगर्गः—

देवाश्चादितिजैः सार्धं स्पर्धमाना हि मानिनः।
परस्परं महद्युद्धं चक्रुः सर्वे सुरासुराः॥
ततो दैत्यगणैः क्रुद्धैर्देवाः सर्वे विनिर्जिताः।
ततोऽङ्गिराः सुरगुरुर्ध्यानसक्तोऽभवत्पुरा॥
पुरन्दराभिषेकार्थं बृहस्पतिरकल्पयत्।
तिष्यमात्मीयनक्षत्रं यस्य देवो बृहस्पतिः॥
तेन चैवाभिषिक्तश्च देवराजः पुरन्दरः।
ततो बलसमारूढो नाशयामास दानवान्॥
देवाश्च हृष्टमनसः पुरीं प्राप्यामरावतीम्।
पुष्यस्नानं बलतरं तदारभ्य प्रवर्तितम्॥इति॥२॥

अथ पुष्यस्नानविधिमाह—

पुष्यस्नानं नृपतेः कर्तव्यं दैववित्पुरोधाभ्याम्।
नातः परं पवित्रं सर्वोत्पातान्तकरमस्ति॥३॥

नृपते राज्ञः पुष्यस्नानं पुष्येण नक्षत्रेण स्नपनम्। दैववित्पुरोधाभ्याम्। दैववित्सांवत्सरः, पुरोधा आचार्यः, एताभ्यां कर्तव्यम्। अतोऽस्मात् पुष्यस्नानात् परं प्रकृष्टं परमं पवित्रं पावनं तथा सर्वेषां निःशेषाणामुत्पातानामुपसर्गाणामन्तकरं नाशकरमन्यदपरं नास्ति न विद्यते॥३॥

कस्मिन् स्थाने पुष्यस्नानं नृपतिः कुर्यादित्याह—

श्लेष्मातकाक्षकण्टकिकटुतिक्तविगन्धिपादपविहीने।
कौशिकगृध्रप्रभृतिभिरनिष्टविहगैः परित्यक्ते॥४॥

तरुणतरुगुल्मवल्लीलताप्रतानान्विते वनोद्देशे।
निरुपहतपत्रपल्लवमनोज्ञमधुरद्रुमप्राये ॥५॥

एवंविधे वनोद्देशे वनभूमौ पुष्यस्नानं कुर्यात्। कीदृशे ? श्लेष्मातकेति, श्लेष्मातको वृक्षविशेषः। अक्षो विभीतकः। कण्टकिनः सकण्टका वृक्षाः खदिरप्रभृतयः। कटुस्तीक्ष्णो निम्बो वा। तिक्तास्तिक्तस्वादा निम्बाद्याः। विगन्धिनो विगतगन्धा दुर्गन्धा ये पादपा वृक्षास्तैर्विहीने वर्जिते। तथा कौशिका उलूकाः। गृध्रप्रभृतयो गृध्राद्याः काकाद्याः काककङ्कप्लवश्येनकपोताः। अनिष्टा अप्रशस्ता ये विहगाः पक्षिणस्तैः परित्यक्ते वर्जिते ॥४॥

तरुणैरभिनवैस्तरुभिर्वृक्षैः। गुल्मैरेकमूलजैः शाखासमूहैः सूक्ष्मैः। वल्लीभिः प्रसिद्धाभिः। लताप्रतानो लतानां समूहो विस्तारस्तेनान्वितः संयुक्तो योऽसौ वनोद्देशस्तस्मिन्। तथा निरुपहतानि निरुपसृष्टानि पत्राणि पर्णानि पल्लवा अभिनवा अङ्कुरा येषां मनोज्ञानां चित्ताह्लादकानां मधुराणां स्वादूनां द्रुमाणां वृक्षाणां प्रायो बाहुल्यं यत्र तत्रेति ॥५॥

अन्यत्कीदृश इत्याह—

कृकवाकुजीवजीवकशुकशिखिशतपत्रचाषहारीतैः।
ऋकरचकोरकपिञ्जलवञ्जुलपारावतश्रीकैः ॥६॥
कुसुमरसपानमत्तद्विरेफपुंस्कोकिलादिभिश्चान्यैः।
विरुते वनोपकण्ठे क्षेत्रागारे शुचावथवा ॥७॥

अथवैदृशे वनोपकण्ठे वनसमीपे पुष्यस्नानं कुर्यात्। कीदृशे ? कृकवाकुः कुक्कुटः। जीवजीवकौ पक्षिविशेषौ प्रसिद्धौ। शुकः कीरः। शिखी मयूरः। शतपत्रो दार्वाघाटः पक्षी। चाषहारीतावपि पक्षिविशेषौ। एतैर्विरुते कृतशब्दे। तथा ऋकरः। चकोरः। कपिञ्जलः। वञ्जुलः। पारावतः। श्रीकः श्रीकण्ठः। एतैरपि पक्षिविशेषैर्विरुते ॥६॥

तथा कुसुमानां पुष्पाणां रसपानेन रसास्वादनेन ये मत्ताः प्रहृष्टा द्विरेफा भ्रमराः। तथान्ये वा ये पुंस्कोकिलादयः। पुंस्कोकिलः प्रधानकोकिलः। आदिग्रहणाच्चक्रवाकसारसहंसा गृह्यन्ते। तैरपि विरुते। अथवा शुचौ शुद्धे क्षेत्रागारे क्षेत्रे पुण्यस्थाने यदागारं गृहं तत्र। क्षेत्रागारमपि कदाचिद्रुधिरमेध्यसम्पर्कान्न शुचि भवत्यत उक्तं क्षेत्रागारे शुचाविति ॥७॥

अन्यत्कीदृशे स्थाने पुष्यस्नानं कुर्यादित्याह—

ह्रदिनीविलासिनीनां जलखगनखविक्षतेषु रम्येषु।
पुलिनजघनेषु कुर्याद् दृङ्मनसोः प्रीतिजननेषु ॥८॥

ह्रदिन्यो नद्यस्ता एव विलासिन्यो वारयोषितस्तासां यानि पुलिनानि तीराणि तान्येव जघनानि नितम्बप्रदेशास्तेषु कुर्यात्। कीदृशेषु ? जलखगनखविक्षतेषु, जलखगा उदकचराः पक्षिणस्तैर्नखविक्षतेषु करप्रहतेषु, तथा रम्येषु रमणीयेषु, दृङ्मनसोः प्रीतिजननेषु , दृशोश्चक्षुषोः , मनसश्चित्तस्य यानि प्रीतिं तुष्टिं जनयन्त्युत्पादयन्ति तथाभूतेषु। अत एव विलासिनीनां जघनेषु सादृश्यम् ॥८॥

अन्यत्कीदृशेषु कुर्यादित्याह—

प्रोत्प्लुतहंसच्छत्रे कारण्डवकुररसारसोद्गीते।
फुल्लेन्दीवरनयने सरसि सहस्राक्षकान्तिधरे ॥९॥

अथवा सरसि कुर्यात्। कीदृशे ? सहस्राक्षकान्तिधरे, सहस्राक्ष इन्द्रस्तस्य संबन्धिनीं कान्तिं रुचिं यो धारयति बिभर्ति तस्मिन्। किंभूते ? प्रोत्प्लुतहंसच्छत्रे, प्रोत्प्लुता उड्डीयमाना ये हंसाः पक्षिविशेषाः , त एव छत्रमातपत्रं यत्र। तथा कारण्डवैः कुररैः सारसैश्च पक्षिविशेषैरुद्गीतं गानं क्रियते यत्र। फुल्लानि विकसितानि इन्दीवराणि नीलोत्पलानि नयनानि नेत्राणि यत्र। अत एव सहस्राक्षस्य सादृश्यम् ॥९॥

अन्यत्कीदृशे कुर्यादित्याह—

प्रोत्फुल्लकमलवदनाः कलहंसकलप्रभाषिण्यः।
प्रोत्तुङ्गकुड्मलकुचा यस्मिन्नलिनीविलासिन्यः ॥१०॥

अथवा यस्मिन् स्थाने नलिनीविलासिन्यः पुष्करिण्य एव विलासिन्यः वारयोषितस्तत्र कुर्यात्। कीदृश्यः ? प्रोत्फुल्लकमलवदनाः, प्रोत्फुल्लानि प्रविकसितानि कमलानि यानि पद्मानि तान्येव वदनानि मुखानि यासाम् , तथा कलहंसा राजहंसास्तेषां कलं मधुरं यत् क्वणं शब्दस्तदेव प्रभाषणं वचनं यासाम् , तथा प्रोत्तुङ्गानि उच्चानि यानि कुड्मलानि कर्णिकास्तान्येव कुचाः स्तना यासाम्। केचित्[1] प्रोदबद्धकुड्मलकुचा इति पठन्ति। प्रकर्षेणोद्बद्धानि अतिकठिनानि यानीति। अत एव विलासिनीनां सादृश्यम् ॥१०॥

अन्यत्कीदृशे स्थाने कुर्यादित्याह—

कुर्याद् गोरोमन्थजफेनलवशकृत्खुरक्षतोपचिते।
अचिरप्रसूतहुङ्कृतवल्गितवत्सोत्सवे गोष्ठे ॥११॥

अथवा गोष्ठे गोस्थाने कुर्यात्। कीदृशे ? गोरोमन्थजफेनलवशकृत्खुरक्षतोपचिते गो रोमन्थो गोरोमन्थः। गवां चर्वितचर्वणम्। तस्माज्जातो योऽसौ फेनलवो

---

१. प्रोद्बद्धकुड्मलकुचा इति पाठान्तरम्।

लालाबिन्दुः । तथा शकृद्गोमयस्तु खुरैः शफैर्यानि क्षतानि छिद्राणि तैरुपचिते संयुक्ते। तथा अचिरप्रसूताः सद्य एव जाता ये वत्सास्तर्णकास्तेषां हुङ्कृतो हुङ्कार-शब्दः। तथा वल्गितं क्रीडितं तदेवोत्सवो महो यत्र ॥११॥

अन्यत्कीदृशे स्थाने कुर्यादित्याह—

अथवा समुद्रतीरे कुशलागतरत्नपोतसम्बाधे।
घननिचुललीनजलचरसितखगशबलीकृतोपान्ते ॥१२॥

अथवा समुद्रतीरे सागरकूले कुर्यात्। कीदृशे ? कुशलागतरत्नपोतसम्बाधे, कुशलेनाविघ्नेनाऽऽगताः प्राप्ता ये रत्नानां मणीनां पोतास्तेषां सम्बाधः सङ्कटो यत्र। सङ्कट इत्यर्थः। तथा घनाः सन्तता ये निचुला वृक्षविशेषास्तेषु ये लीनाः श्लिष्टा जलचरा जलप्राणिनः, तथा सिताः श्वेता ये खगाः पक्षिणः, तैः शबलीकृताश्चित्रिता उपान्ताः समीपा यत्र ॥१२॥

अन्यत्कीदृशे कुर्यादित्याह—

क्षमया क्रोध इव जितः सिंहो मृग्याभिभूयते येषु।
दत्ताभयखगमृगशावकेषु तेष्वाश्रमेष्वथवा ॥१३॥

अथवा आश्रमेषु मुनिनिवासेषु कुर्यात्। कीदृशेषु ? येषु सिंहो हरिः, मृग्या एण्या अभिभूयते कृतपरिभवः सम्पाद्यते। कथम् ? क्षमया क्रोध इव जितः। यथा क्षमया क्षान्त्या क्रोधः कोपो जितः। तथा खगानां पक्षिणां मृगाणामेणानां च संबन्धिनो ये शावकाः पोतकास्तेषु अभयो दत्तो येषु। येषु गतेषु हिंसां न कश्चित् करोतीत्यर्थः ॥१३॥

अन्यत्कीदृशेषु कुर्यादित्याह—

काञ्चीकलापनूपुरगुरुजघनोद्वहनविघ्नितपदाभिः।
श्रीमति मृगेक्षणाभिर्गृहेऽन्यभृतवल्गुवचनाभिः ॥१४॥

अथवा गृहे वेश्मनि कुर्यात्। कीदृशे ? श्रीमति। श्रीर्विद्यते यस्मिन्। तथा एवंविधाभिः स्त्रीभिर्युक्ते ? किंभूताभिः। काञ्चीकलापनूपुरगुरुजघनोद्वहन-विघ्नितपदाभिः, काञ्ची मेखला तस्या यः कलापो विस्तारस्तस्योद्वहनेन विघ्नितौ मन्दगामिनौ पादौ चरणौ यासां ताभिः। मृगेक्षणाभिः, हरिणसदृशनेत्राभिः। अन्यभृतवल्गुवचनाभिः, अन्यभृतः कोकिलस्तद्वद्वल्गु रम्यं मधुरं वचनं यासां ताभि-र्युक्ते ॥१४॥

ह्रदिन्यो नद्यस्ता एव विलासिन्यो वारयोषितस्तासां यानि पुलिनानि तीराणि तान्येव जघनानि नितम्बप्रदेशास्तेषु कुर्यात्। कीदृशेषु ? जलखगनखविक्षतेषु, जलखगा उदकचराः पक्षिणस्तैर्नखविक्षतेषु करप्रहतेषु, तथा रम्येषु रमणीयेषु, दृङ्मनसोः प्रीतिजननेषु , दृशोश्चक्षुषोः , मनसश्चित्तस्य यानि प्रीतिं तुष्टिं जनयन्त्युत्पादयन्ति तथाभूतेषु। अत एव विलासिनीनां जघनेषु सादृश्यम् ॥८॥

अन्यत्कीदृशेषु कुर्यादित्याह—

प्रोत्प्लुतहंसच्छत्रे कारण्डवकुररसारसोद्गीते।
फुल्लेन्दीवरनयने सरसि सहस्राक्षकान्तिधरे ॥९॥

अथवा सरसि कुर्यात्। कीदृशे ? सहस्राक्षकान्तिधरे, सहस्राक्ष इन्द्रस्तस्य संबन्धिनीं कान्तिं रुचिं यो धारयति बिभर्ति तस्मिन्। किंभूते ? प्रोत्प्लुतहंसच्छत्रे, प्रोत्प्लुता उड्डीयमाना ये हंसाः पक्षिविशेषाः , त एव छत्रमातपत्रं यत्र। तथा कारण्डवैः कुररैः सारसैश्च पक्षिविशेषैरुद्गीतं गानं क्रियते यत्र। फुल्लानि विकसितानि इन्दीवराणि नीलोत्पलानि नयनानि नेत्राणि यत्र। अत एव सहस्राक्षस्य सादृश्यम् ॥९॥

अन्यत्कीदृशे कुर्यादित्याह—

प्रोत्फुल्लकमलवदनाः कलहंसकलप्रभाषिण्यः।
प्रोत्तुङ्गकुड्मलकुचा यस्मिन्नलिनीविलासिन्यः ॥१०॥

अथवा यस्मिन् स्थाने नलिनीविलासिन्यः पुष्करिण्य एव विलासिन्यः वारयोषितस्तत्र कुर्यात्। कीदृश्यः ? प्रोत्फुल्लकमलवदनाः, प्रोत्फुल्लानि प्रविकसितानि कमलानि यानि पद्मानि तान्येव वदनानि मुखानि यासाम् , तथा कलहंसा राजहंसास्तेषां कलं मधुरं यत् क्वणं शब्दस्तदेव प्रभाषणं वचनं यासाम् , तथा प्रोत्तुङ्गानि उच्चानि यानि कुड्मलानि कर्णिकास्तान्येव कुचाः स्तना यासाम्। केचित् प्रोदबद्धकुड्मलकुचा इति पठन्ति। प्रकर्षेणोद्बद्धानि अतिकठिनानि यानीति। अत एव विलासिनीनां सादृश्यम् ॥१०॥

अन्यत्कीदृशे स्थाने कुर्यादित्याह—

कुर्याद् गोरोमन्थजफेनलवशकृत्खुरक्षतोपचिते।
अचिरप्रसूतहुङ्कृतवल्गितवत्सोत्सवे गोष्ठे ॥११॥

अथवा गोष्ठे गोस्थाने कुर्यात्। कीदृशे ? गोरोमन्थजफेनलवशकृत्खुरक्षतोपचिते गो रोमन्थो गोरोमन्थः। गवां चर्वितचर्वणम्। तस्माज्जातो योऽसौ फेनलवो

---

१. प्रोद्बद्धकुड्मलकुचा इति पाठान्तरम्।

लालाबिन्दुः । तथा शकृद्गोमयस्तु खुरैः शफैर्यानि क्षतानि छिद्राणि तैरुपचिते संयुक्ते। तथा अचिरप्रसूताः सद्य एव जाता ये वत्सास्तर्णकास्तेषां हुङ्कृतो हुङ्कार-शब्दः। तथा वल्गितं क्रीडितं तदेवोत्सवो महो यत्र ॥११॥

अन्यत्कीदृशे स्थाने कुर्यादित्याह—

अथवा समुद्रतीरे कुशलागतरत्नपोतसम्बाधे।
घननिचुललीनजलचरसितखगशबलीकृतोपान्ते ॥१२॥

अथवा समुद्रतीरे सागरकूले कुर्यात्। कीदृशे ? कुशलागतरत्नपोतसम्बाधे, कुशलेनाविघ्नेनाऽऽगताः प्राप्ता ये रत्नानां मणीनां पोतास्तेषां सम्बाधः सङ्घट्टो यत्र। सङ्कट इत्यर्थः। तथा घनाः सन्तता ये निचुला वृक्षविशेषास्तेषु ये लीनाः श्लिष्टा जलचरा जलप्राणिनः, तथा सिताः श्वेता ये खगाः पक्षिणः, तैः शबलीकृताश्चित्रिता उपान्ताः समीपा यत्र ॥१२॥

अन्यत्कीदृशे कुर्यादित्याह—

क्षमया क्रोध इव जितः सिंहो मृग्याभिभूयते येषु।
दत्ताभयखगमृगशावकेषु तेष्वाश्रमेष्वथवा ॥१३॥

अथवा आश्रमेषु मुनिनिवासेषु कुर्यात्। कीदृशेषु ? येषु सिंहो हरिः, मृग्या एण्या अभिभूयते कृतपरिभवः सम्पाद्यते। कथम् ? क्षमया क्रोध इव जितः। यथा क्षमया क्षान्त्या क्रोधः कोपो जितः। तथा खगानां पक्षिणां मृगाणामेणानां च संबन्धिनो ये शावकाः पोतकास्तेषु अभयो दत्तो येषु। येषु गतेषु हिंसां न कश्चित् करोतीत्यर्थः ॥१३॥

अन्यत्कीदृशेषु कुर्यादित्याह—

काञ्चीकलापनूपुरगुरुजघनोद्वहनविघ्नितपदाभिः।
श्रीमति मृगेक्षणाभिर्गृहेऽन्यभृतवल्गुवचनाभिः ॥१४॥

अथवा गृहे वेश्मनि कुर्यात्। कीदृशे ? श्रीमति। श्रीर्विद्यते यस्मिन्। तथा एवंविधाभिः स्त्रीभिर्युक्ते ? किंभूताभिः। काञ्चीकलापनूपुरगुरुजघनोद्वहन-विघ्नितपदाभिः, काञ्ची मेखला तस्या यः कलापो विस्तारस्तस्योद्वहनेन विघ्नितौ मन्दगामिनौ पादौ चरणौ यासां ताभिः। मृगेक्षणाभिः, हरिणसदृशनेत्राभिः। अन्यभृतवल्गुवचनाभिः, अन्यभृतः कोकिलस्तद्वद्वल्गु रम्यं मधुरं वचनं यासां ताभि-र्युक्ते ॥१४॥

अन्यत्कीदृशेषु स्थानेषु कुर्यादित्याह--

पुण्येष्वायतनेषु च तीर्थेषूद्यानरम्यदेशेषु।
पूर्वोदक्प्लवभूमौ प्रदक्षिणाम्भोवहायां च ॥१५॥

पुण्येषु पवित्रेष्वायतनेषु च देवस्थानेषु च कुर्यात्। पुण्येषु तीर्थेषु सल्लिलाशयेषु। उद्यानेषूपवनेषु। रम्येषु रमणीयेषु देशेषु स्थानेषु। तथा पूर्वोदक्प्लवभूमौ, पूर्वस्यां दिश्युत्तरस्यां वा यस्यां भूमौ प्लवो निम्नता। तथा प्रदक्षिणाम्भोवहायाम् प्रादक्षिण्येन यस्यामम्भः पानीयं वहति। तथा च वृद्धगर्गः--

समुद्रतीरे उद्याने नदीनां सङ्गमे शुभे।
महाह्रदेऽथवा तीर्थे देवतायतने तथा॥
सर्वर्तुकुसुमोपेते वने द्विजवरैर्युते।
गृहे रम्ये विविक्ते वा पुण्यस्नानं समाचरेत् ॥इति॥१५॥

अथ भूलक्षणमाह--

भस्माङ्गारास्थ्यूषरतुषकेशश्वभ्रकर्कटावासैः ।
श्वाविधमूषकविवरैर्वल्मीकैर्या च सन्त्यक्ता ॥१६॥
धात्री घना सुगन्धा स्निग्धा मधुरा समा च विजयाय।
सेनावासेऽप्येवं योजयितव्या यथायोगम् ॥१७॥

या धात्री भूरेवंविधा तस्यां पुण्यस्नानं कुर्यात्। कीदृशी ? भस्मना भूतिना। अङ्गारैर्दग्धकाष्ठैः। अस्थिभिः। ऊषराः ससिकताश्च ताभिः। तुषैः शालिचर्मभिः। केशैः। श्वभ्रैः खातैः। कर्कटाः प्राणिनो मृगजातयस्तेषामावासा गृहाणि विद्यन्ते येषां तैः सन्त्यक्ता रहिता। तथा श्वाविधैर्बिलवासिभिः। प्राणिभिः। मूषकविवरैराखुबिलैः। वल्मीकैश्च या सन्त्यक्ता वल्मीककृतैर्मृत्स्तूपै रहिता सा शुभा। चशब्दः समुच्चये। न केवलं भस्माङ्गारादिदोषै रहिता यावच्छ्वाविधादिभिर्दोषैश्च रहितेति ॥१६॥

तथा च धात्री घना अन्तःसारा। सुगन्धा शोभनसुरभिः। स्निग्धा सस्नेहा। मधुरा सस्वादा। समा च तुल्या निम्नोन्नतरहिता। एवंविधा विजयाय भवति। न केवलं स्नाने यावत्सेनावासे सैन्यनिवासनेऽप्येषा भूर्यथायोगं यथायुक्ति सैन्यनिवेशे विभागेन योजयितव्या प्रयोज्या ग्राह्येति ॥१७॥

अथ तत्र विधानमाह--

निष्क्रम्य पुरान्नक्तं दैवज्ञामात्ययाजकाः प्राच्याम्।
कौबेर्यां वा कृत्वा बलिं दिशीशाधिपायां वा ॥१८॥

लाजाक्षतदधिकुसुमैः प्रयतः प्रणतः पुरोहितः कुर्यात्।
आवाहनमथ मन्त्रस्तस्मिन् मुनिभिः समुद्दिष्टः॥१९॥

दैवज्ञः सांवत्सरिकः। अमात्यो मन्त्री। याजकः पुरोधाः। एते दैवज्ञामात्ययाजकाः पुरान्नगरान्नक्तं रात्रौ निष्क्रम्य निर्गत्य प्राच्यां पूर्वस्यां दिशि कौबेर्यामुत्तरस्यां दिशि ईशाधिपायामैशान्यां दिशि आशायां बलिमुपहारं कुर्युः॥१८॥

लाजाक्षतेति। प्रयतः संयुतः। प्रणतः प्रह्वः। पुरोहितो लाजाभिरक्षतैर्यवैर्दध्ना क्षीरविकारेण कुसुमैः पुष्पैरावाहनमामन्त्रणं कुर्यात्। तस्मिन्नावाहने मुनिभिर्गर्गादिभिरयं वक्ष्यमाणो मन्त्रः समुद्दिष्ट उक्तः॥१९॥

अधुना तमेवाह--

आगच्छन्तु सुराः सर्वे येऽत्र पूजाभिलाषिणः।
दिशो नागा द्विजाश्चैव ये चाप्यन्येंऽशभागिनः॥२०॥
आवाह्यैवं ततः सर्वानेवं ब्रूयात् पुरोहितः।
श्वः पूजां प्राप्य यास्यन्ति दत्त्वा शान्तिं महीपतेः॥२१॥

सर्वे सुरा ये चात्रास्मिन् पूजाभिलाषिणोऽर्चार्थिनस्ते सर्व एव निःशेषा आगच्छन्तु आयान्तु। तथा दिश आशाः। नागाः पन्नगाः। द्विजा मुनयः। ये चाप्यन्ये परे चानुकीर्तिताः। अंशभागिनो भागभाजस्ते आयान्तु॥२०॥

एवमनेन प्रकारेण सर्वानशेषानावाह्य परिनिमन्त्र्य ततः पश्चादनन्तरं पुरोहित आचार्य एवमनेन प्रकारेण ब्रूयाद्वदेत्। येऽत्र सुरा आगतास्ते श्वः प्रातः पूजामर्चां प्राप्य लब्ध्वा महीपते राज्ञः शान्तिं श्रेयो दत्वा यास्यन्ति गमिष्यन्ति॥२१॥

ततः किं कुर्यादित्याह—

आवाहितेषु कृत्वा पूजां तां शर्वरीं वसेयुस्ते।
सदसत्स्वप्ननिमित्तं यात्रायां स्वप्नविधिरुक्तः॥२२॥

तेष्वावाहितेषु सुरेषु पूजामर्चां विधाय तां शर्वरीं रात्रिं ते दैवज्ञामात्ययाजका वसेयुस्तिष्ठेयुः। किमर्थम्? सदसत्स्वप्ननिमित्तम्, शुभाशुभसन्दर्शनार्थम्। यात्रायां यज्ञेष्वश्वमेधीयायां स्वप्नविधिः स्वप्नपरीक्षणविधिरुक्तः कथितः। तथा च यात्रायाम्—

दुकूलमुक्तामणिभूषितेन्द्रः समन्त्रिदैवज्ञपुरोहितोऽतः।
स्वदेवतागारमनुप्रविश्य निवेशयेत्तत्र दिगीश्वरार्चाम्॥

अभ्यर्च्च मन्त्रैस्तु पुरोहितस्तामधश्च तस्यां भुवि संस्कृतायाम् ।
दर्भैश्च कृत्वा स्तरमक्षतैस्तां लिखेत् समन्तात् सितसर्षपैश्च ।।
ब्राह्मीं सदूर्वामथ नागपुष्पीं कृत्वोपधानं शिरसि क्षितीशः ।
पूजार्घजान् पुष्पफलाभिधानानाशासु दध्याच्चतुरः क्रमेण ।।
यज्जाग्रतो दूरमुदैति दैवमावर्त्य मन्त्रं प्रयतस्त्रिरेतम् ।
लघ्वेकभुग्दक्षिणपार्श्वशायी स्वप्नं परीक्षेत यथोपदेशम् ।।
नमः शम्भो त्रिनेत्राय रुद्राय वरदाय च ।
वामनाय विरूपाय स्वप्नाधिपतये नमः ।।
भगवन् देवदेवेश शूलभृद् वृषवाहन ।
इष्टानिष्टं समाचक्ष्व स्वप्ने स्वप्नस्य शाश्वतम् ।।
इष्टमन्त्रान् ततः स्मृत्वा शिवशक्तिपुरोगमान् ।
अभ्यर्थनं ततस्तस्य कृत्वा सुप्रयतो नृपः ।।
एकवस्त्रे कुशास्तीर्णे सुप्तः प्रयतमानसः ।
निशान्ते पश्यति स्वप्नं शुभं वा यदि वाऽशुभम् ।।इति।।२२।।

ततः किं कुर्यादित्याह--

अपरेऽह्नि प्रभाते सम्भारानुपहरेद्यथोक्तगुणान् ।
गत्वाऽवनिप्रदेशे श्लोकाश्चाप्यत्र मुनिगीताः ।।२३।।

अपरेऽह्नि द्वितीयदिने प्रभाते प्रभातसमये तस्मिन्नेवावनिप्रदेशे भूस्थाने गत्वा यथोक्तगुणान् यथोपयोज्यान् सम्भारानुपहरेत् ढौकयेत्। अत्राप्यस्मिन्नर्थे श्लोका मुनिगीताः, मुनिना महर्षिणा वृद्धगर्गेण गीताः कथिताः। अपिशब्दः सम्भावनायाम् ।।२३।।

तांश्चाह—

तस्मिन् मण्डलमालिख्य कल्पयेत्तत्र मेदिनीम् ।
नानारत्नाकरवतीं स्थानानि विविधानि च ।।२४।।
पुरोहितो यथास्थानं नागान् यक्षान् सुरान् पितॄन् ।
गन्धर्वाप्सरसश्चैव मुनीन् सिद्धांश्च विन्यसेत् ।।२५।।
ग्रहांश्च सर्वनक्षत्रै रुद्रांश्च सह मातृभिः ।
स्कन्दं विष्णुं विशाखं च लोकपालान् सुरस्त्रियः ।।२६।।
वर्णकैर्विविधैः कृत्वा हृद्यैर्गन्धगुणान्वितैः ।
यथास्वं पूजयेद्विद्वान् गन्धमाल्यानुलेपनैः ।।२७।।

भक्ष्यैरन्नैश्च विविधैः फलमूलामिषैस्तथा।
पानैश्च विविधैर्हृद्यैः सुराक्षीरासवादिभिः ॥२८॥

तस्मिन् भूप्रदेशे यत्र पुष्यस्नानं क्रियते पूर्वोद्दिष्टलक्षणश्लेष्मातकाक्षकण्टकीत्यादिके मण्डलमालिख्य विरचय्य तस्मिन् स्थाने मेदिनीं भूमिं नानारत्नाकरवतीं नानाप्रकाराणां रत्नानामाकर उत्पत्तिस्थानं तद्विद्यते यस्यां तां तथाभूताम्। बहूनि रत्नानि तत्र स्थापयेदित्यर्थः। तथा विविधानि नानाप्रकाराणि स्थानानि सन्निवेशस्थानानि च कल्पयेत् कारयेत् ॥२४॥

ततः पुरोहित आचार्यो नागान् पन्नगान्। यक्षान् गुह्यकान्। सुरान् देवान्। पितॄन् देवविशेषांश्च यथास्थानं यथाप्राधान्यानुसारेण समालिखेत्। गन्धर्वान् देवयोनीन्। अप्सरसो देवयोषितः। मुनीनृषीन्। सिद्धान् देवयोनींश्च विन्यसेत् ॥२५॥

ग्रहानादित्यादीन् सर्वनक्षत्रैरश्विन्यादिभिः सह। तथा रुद्रान् देवविशेषान् मातृभिर्देवताभिर्ब्राह्म्यादिभिः सह लिखेत्। स्कन्दं कुमारम्। विष्णुं नारायणम्। विशाखं स्कन्दग्रहम्। लोकपाला इन्द्राग्नियमनिर्ऋतिपाशिवायुकुबेरैशानास्तान्। सुरस्त्रियो देवस्त्रियः। यथा इन्द्राणी गौरी लक्ष्मीः ॥२६॥

विविधैर्नानाप्रकारैर्धातुविशेषैः सितरक्तपीतकृष्णव्यामिश्रैः। हृद्यैश्चित्ताह्लादकैर्गन्धगुणान्वितैर्गन्धगुणसंयुक्तैः सुगन्धैरित्यर्थः। तथाभूतैः कृत्वा ततो विद्वान् पण्डितो गन्धैः सुगन्धद्रव्यैर्माल्यैः स्रग्भिरनुलेपनैः समालम्भनैर्यथास्वं पूजयेदर्चयेत्। एतदुक्तं भवति——यो यस्मिन् स्थाने लिखितो वर्णकानुसारेण तं तत्रैव गन्धमाल्यानुलेपनैर्यथार्हैः पूजयेदर्चयेत् ॥२७॥

तथा भक्ष्यैर्विविधैर्नानाकारैर्मोदकलोपिकापूपादिभिः। अन्नैश्च नानाप्रकारैरोदनपायसादिभिः। नानाप्रकारैः फलैः श्रीफलादिभिः। मूलैः प्रसिद्धैः। आमिषैर्मांसैः। विविधैर्नानाप्रकारैर्हृद्यैर्हृदयचोदकैः पानैर्मदकरैः। तथा सुरया मद्येन क्षीरेण दुग्धेन। आसवेन मध्वासवेन। आदिग्रहणाल्लेह्यपेयचोष्यादिभिरन्यैश्च पानविशेषैः पूजयेत् ॥२८॥

अतः परं पूजां कथयामीत्याह—

कथयाम्यतः परमहं पूजामस्मिन् यथाभिलिखितानाम्।
ग्रहयज्ञे यः प्रोक्तो विधिर्ग्रहाणां स कर्तव्यः ॥२९॥
मांसौदनमद्याद्यैः पिशाचदितितनयदानवाः पूज्याः।
अभ्यञ्जनाञ्जनतिलैः पितरो मांसौदनैश्चापि ॥३०॥
सामयजुर्भिर्मुनयस्तृग्भिर्गन्धैश्च धूपमाल्ययुतैः।
अश्लेषकवर्णैस्त्रिमधुरेण चाभ्यर्चयेद् नागान् ॥३१॥

धूपाज्याहुतिमाल्यैर्विबुधान् रत्नैः स्तुतिप्रणामैश्च।
गन्धर्वानप्सरसो गन्धैर्माल्यैश्च सुसुगन्धैः ॥३२॥
शेषांस्तु सार्ववर्णिकबलिभिः पूजां न्यसेच्च सर्वेषाम्।
प्रतिसरवस्त्रपताकाभूषणयज्ञोपवीतानि ॥३३॥

कथयामीति। अतोऽस्मात्परमहमाचार्योऽस्मिन् मण्डले यथाभिलिखितानां विन्यस्तानां पूजामर्चां कथयामि वक्ष्यामि। ग्रहाणामादित्यादीनां यात्रायां ग्रहयज्ञे योऽयं विधिः प्रोक्तः कथितः स एवात्र कर्तव्यः। तद्यथा—

यात्रायां ग्रहयज्ञे तत्रार्चा ताम्रमयसवितुः।
[1]पालाशिकी समिद् वैकङ्कतजाता तथा स्रुक् च।
आकृष्णेति च मन्त्रो रक्ता गन्धाः सहागुरुणा॥
माषाऽतसीतिलाल्वकमुद्गान् चणकान् विहाय भोज्यविधिः।
वकुलार्कगस्त्यपलाशशल्यकीकुसुमपूजा च॥
अष्टशतसस्मितेभ्यो विप्रेभ्यो दक्षिणा हिताग्निभ्यः।
देया वृषकनकमही सहस्रकिरणं समुद्दिश्य इत्यादि॥२९॥

मांसौदनमद्याद्यैरिति। पिशाचा देवयोनयः। दितितनया दैत्याः। दानवा दनुपुत्राश्च। मांसेनामिषेणौदनेन भक्तेन मद्येन मधुना न पूज्या अर्चनीयाः। आदिग्रहणात् सुरासवैः। तथा पितरोऽभ्यञ्जनेन स्नेहदानेन। अञ्जनेन तिलतैलाभ्यञ्जनेन कज्जलेन च तिलैर्मांसौदनेन च। एतैः पूज्याः॥३०॥

सामयजुर्भिरिति। मुनयः ऋषयः सामभिर्यजुर्भिः ऋग्भिश्च। तथा गन्धैः सुगन्धद्रव्यैः धूपमाल्ययुतैः। धूपैर्गुग्गुलप्रभृतिभिर्माल्यैश्च स्रग्भिः सहितैः। तथा नागान् पन्नगान्। अश्लेषकवर्णैः। यत्र बहूनां वर्णानामश्लेषस्संयोगो नास्ति तैः। तथा त्रिमधुरेण च, मधुना घृतेन शर्करया चेत्यर्थः। एतैः पूजयेत्॥३१॥

धूपाज्याहुतिमाल्यैरिति। विबुधान् देवान् धूपैराज्येन घृतेनाहुतिभिर्होमैर्माल्यैः स्रग्भिः रत्नैर्मणिभिः स्तुतिभिस्तोत्रैः प्रणामैर्नमस्कारैश्च पूजयेत्। गन्धर्वानप्सरसश्च गन्धैः सुगन्धद्रव्यैर्माल्यैश्च स्रग्भिः पूजयेत्। सुसुगन्धैः शोभनगन्धैः॥३२॥

शेषान् यक्षान् सार्ववर्णिकबलिभिः पूजयेत्। सार्ववर्णिकैर्बहुवर्णकैश्च बलिभिरुपहारैर्बहुद्रव्यमिश्रितैश्च पूजयेत्। सर्वेषां मण्डले यथाभिलिखितानां विरचि-

---

१. सर्वेषु पुस्तकेषु "पालाशिकी समित् स्रुक् च" इति भ्रष्टपाठो वर्तते। अस्माभिर्वैदिकानुसारेण "वैकङ्कतजाता तथा" इत्यधिकः पाठो योजितः।

तानां पूजामर्चां न्यसेत् कारयेत्। तथा प्रतिसरमन्तरान्तरात् कुङ्कुमेन रक्तं सूत्रम्। वस्त्रमम्बरम्। पताका ध्वजः। भूषणमलङ्करणम्। यज्ञोपवीतं सुप्रसिद्धम्। एतानि च सर्वेषां न्यसेत् ॥३३॥

ततः किं कुर्यादित्याह—

मण्डलपश्चिमभागे कृत्वाग्निं दक्षिणेऽथवा वेद्याम्।
आदद्यात् सम्भारान् दर्भान् दीर्घानगर्भांश्च ॥३४॥

मण्डलस्य पश्चिमभागे पश्चिमायां दिशि दक्षिणेऽथवा दक्षिणभागे वेदिं कुर्यात्। वेदीलक्षणमस्माभिः प्रागुक्तं [1]नीराजने। तस्यां वेद्यामग्निं हुताशनं कृत्वा प्रज्वाल्य ततः सम्भारानौपयोगिकानादद्यात् ढौकयेत्। दर्भान् दीर्घानच्छिन्नानगर्भान् गर्भरहितांश्चाऽऽहरेत् ॥३४॥

अन्यत्किमित्याह—

लाजाज्याक्षतदधिमधुसिद्धार्थकगन्धसुमनसो धूपः।
गोरोचनाञ्जनतिलाः स्वर्तुजमधुराणि च फलानि ॥३५॥
सघृतस्य पायसस्य च तत्र शरावाणि तैश्च सम्भारैः।
पश्चिमवेद्यां पूजां कुर्यात् स्नानस्य सा वेदी ॥३६॥

लाजाः प्रसिद्धाः। आज्यं घृतम्। अक्षता यवाः। दधि क्षीरविकारः। मधु माक्षिकम्। सिद्धार्था गौरसर्षपाः। गन्धाः सुगन्धद्रव्याणि। सुमनसः पुष्पाणि। धूपः प्रसिद्धः। गोरोचना गोपित्तसम्भवा। अञ्जनं प्रसिद्धम्। तिलास्तथा। स्वर्तुजानि स्वर्तावात्मीयर्तौ जातानि उत्पन्नानि यानि मधुराणि फलानि ॥३५॥

तथा तस्मिन् मण्डले सघृतस्य घृतसहितस्य च पायसस्य शरावाणि मृन्मयानि पात्राणि सुपरिपूर्णानि दातव्यानि। तैश्च सम्भारैः पूर्वोक्तैः पश्चिमायां वेद्यां पूजां कुर्यात्। यतः सा वेदी स्नातस्य। तस्यां पुष्यस्नानं कार्यमित्यर्थः ॥३६॥

ततः किं कुर्यादित्याह—

तस्याः कोणेषु दृढान् कलशान् सितसूत्रवेष्टितग्रीवान्।
सक्षीरवृक्षपल्लवफलापिधानान् व्यवस्थाप्य ॥३७॥
पुष्यस्नानविमिश्रेणापूर्णान्भसा सरत्नांश्च।
पुष्यस्नानद्रव्याण्यादद्याद् गर्गगीतानि ॥३८॥

---

१. द्रष्टव्यमस्य ग्रन्थस्य ४६८ पृष्ठम्।

तस्या वेद्याः कोणेष्वस्रेषु चतुर्षु दृढ़ानभग्नान् कलशान् घटान् सितसूत्रवेष्टितग्रीवान्। सितेन श्वेतवर्णेन सूत्रेण तन्तुना वेष्टिता ग्रीवा कण्ठो येषां तान्। तथाभूतान् व्यवस्थाप्य स्थापयित्वा। कीदृशान्? सक्षीरवृक्षपल्लवफलापिधानान्, सक्षीरा वृक्षा अर्कादयस्तेषां ये पल्लवा अभिनवपत्राणि तथान्यानि च फलानि तान्येव समन्तादपिधानमाच्छादनं येषाम् ॥३७॥

पुनः कीदृशान्? पुण्यस्नानौषधिविमिश्रेणाम्भसा जलेनाऽऽपूर्णान् सुभरितान्। सरत्नान् रत्नसहितांश्च। गर्गगीतानि गर्गमहर्षिणा कथितानि पुण्यस्नानार्थं द्रव्याण्यादद्यात् ढौकयेदिति। तथा च गर्गः—

कलशैर्हेमताम्रैश्च राजतैर्मृन्मयैस्तथा।
सूत्रसंवेष्टितग्रीवैश्चन्दनागुरुचर्चितैः ॥
प्रशस्तवृक्षपत्रैश्च फलपुष्पसमन्वितैः।
पुण्यतोयेन सम्पूर्णैः रत्नगर्भैर्मनोहरैः ॥इति॥३८॥

अथ पुष्यस्नानद्रव्याण्याह—

ज्योतिष्मतीं त्रायमाणामभयामपराजिताम्।
जीवां विश्वेश्वरीं पाठां समङ्गां विजयां तथा ॥३९॥
सहां च सहदेवीं च पूर्णकोशां शतावरीम्।
अरिष्टिकां शिवां भद्रां तेषु कुम्भेषु विन्यसेत् ॥४०॥
ब्राह्मीं क्षेमामजां चैव सर्वबीजानि काञ्चनीम्।
मङ्गल्यानि यथालाभं सर्वौषध्यो रसास्तथा ॥४१॥
रत्नानि सर्वगन्धाश्च बिल्वं च सविकङ्कतम्।
प्रशस्तनाम्न्यश्चौषध्यो हिरण्यं मङ्गलानि च ॥४२॥

ज्योतिष्मतीं सु... द्धाम्। त्रायमाणां प्रसिद्धाम्। अभयां हरीतकीम्। अपराजितां शमीम्। जीवां जीवन्तीम्। विश्वेश्वरीं पद्मचारिणीम्। पाठां प्रसिद्धाम्। समङ्गां रक्तमञ्जिष्ठाम्। विजयां वचाम्। सहां मुद्गपर्णीम्। सहदेवीं प्रसिद्धाम्। पूर्णकोशां प्रसिद्धाम्। शतावरीं प्रसिद्धामेव। अरिष्टिकां प्रसिद्धाम्। शिवां। प्रसिद्धाम्। भद्रां बलाम्। एता ओषधीस्तेषु प्रागुद्दिष्टेषु कुम्भेषु विन्यसेत् क्षिपेत् ॥४०॥

ब्राह्मीं प्रसिद्धाम्। क्षेमां काष्ठगुग्गुलम्। चोरकमिति प्रसिद्धम्। अजां प्रसिद्धाम्। केचिदेडिकाक्षीमिच्छन्ति। सर्वाणि च बीजानि। काञ्चनीं सुप्रसिद्धाम्। अन्यानि मङ्गल्यानि द्रव्याणि दध्यक्षतकुसुमादीनि। यथालाभमेतानि द्रव्याणि

यावन्ति प्राप्यन्ते तावन्त्येव ग्राह्याणि नान्येषां विकल्पः। सर्वा ओषधयः। रसाश्च सर्व एव मधुराम्ललवणतिक्तकटुकषायाः ॥४१॥

रत्नानि मणिविशेषाः। सर्वगन्धाश्च निःशेषसुगन्धद्रव्याणि। बिल्वं फलम्। सविकङ्कतं विकङ्कतफलेन सह। प्रशस्तनाम्न्यो या ओषधयः। यथा--जया। जयन्ती। जीवन्ती। जीवपुत्रिका। पुनर्नवा। विष्णुक्रान्ता। चक्राङ्का। वाराही। लक्षणा। हिरण्यं सुवर्णादयो धातवः। मङ्गलानि च मङ्गलवन्त्यौषधानि। यथा--गोरोचना। सर्षपः। दूर्वाहस्तिमदमिति। एवमादि ॥४२॥

ततः किं कुर्यादित्याह--

आदावनड्वहश्चर्म जरया संहृतायुषः।
प्रशस्तलक्षणभृतः प्राचीनग्रीवमास्तरेत् ॥४३॥
ततो वृषस्य योधस्य चर्म रोहितमक्षतम्।
सिंहस्याथ तृतीयं स्याद् व्याघ्रस्य च ततः परम् ॥४४॥
चत्वार्येतानि चर्माणि तस्यां वेद्यामुपास्तरेत्।
शुभे मुहूर्ते सम्प्राप्ते पुष्ययुक्ते निशाकरे ॥४५॥

आदौ प्रथममनड्वहो बलीवर्दस्य चर्म। कीदृशस्य ? जरया वार्द्धकेन संहृतायुषो मृतस्य। पुनः कीदृशस्य ? प्रशस्तलक्षणभृतः, प्रशस्तानि गोलक्षणोक्तानि[1] लक्षणानि बिभर्ति धारयति तस्य। ततश्च प्राचीनग्रीवं पूर्वाभिमुखकण्ठमास्तरेत् प्रसारयेत् ॥४३॥

ततोऽनन्तरं योधस्य वृषस्य रोहितं लोहितवर्णं चर्म। अक्षतमच्छिद्रमास्तरेत्। द्वितीयम्। अनन्तरं सिंहस्य चर्म तृतीयं चाऽऽस्तरेत्। ततः परं चतुर्थं व्याघ्रस्य चर्माऽऽस्तरेत् ॥४४॥

एतानि चत्वारि चर्माणि तस्यां प्रागुक्तायां वेद्यामुपास्तरेत्। कस्मिन् काले ? निशाकरे चन्द्रे पुष्ययुक्ते पुष्यस्य योगतारकसमीपस्थे, शुभे च मुहूर्ते सम्प्राप्ते ॥४५॥

ततः किं कुर्यादित्याह--

भद्रासनमेकतमेन कारितं कनकरजतताम्राणाम्।
क्षीरतरुनिर्मितं वा विन्यस्यं चर्मणामुपरि ॥४६॥
त्रिविधस्तस्योच्छ्रायो हस्तः पादाधिकोऽर्धयुक्तश्च।
माण्डलिकानन्तरजितसमस्तराज्यार्थिनां शुभदः ॥४७॥

---

१. गोलक्षणानि बृहत्संहितायाम् ६१ अध्याये।

कनकं सुवर्णम्। रजतं रूप्यम्। ताम्रं प्रसिद्धम्। एषां कनकरजतताम्राणामेकतमेनान्यतमेन भद्रासनं भद्रपीठं कारितं निर्मितम्। अथवा क्षीरतरवः क्षीरवृक्षा अर्कपिप्पलौदुम्बरादयस्तन्निर्मितं तन्मयम्। तथाभूतं तेषां प्राक्तनानां चर्मणामुपर्युपरि स्थितानामुपरि विन्यस्यं स्थाप्यम् ॥४६॥

त्रिविधिस्तस्योच्छ्राय इति। तस्य भद्रासनस्य त्रिविधस्त्रिप्रकार उच्छ्राय औच्च्यम्। हस्तः शयो माण्डलिकानां राज्ञां शुभदः शर्मदः। पादाधिको हस्तः, त्रिंशदङ्गुलानीत्यर्थः। अनन्तरजितां विजिगीषूणां राज्ञां शुभदः। अर्धयुक्तो हस्तः। सार्धशयः समस्तराज्यार्थिनां राजाधिराजैषिणां राज्ञां शुभदः ॥४७॥

ततः किं कुर्यादित्याह—

अन्तर्धाय हिरण्यं तत्रोपविशेन्नरेश्वरः सुमनाः।
सचिवाप्तपुरोहितदैवपौरकल्याणनामवृतः ॥४८॥

तत्र तस्मिन् भद्रासने हिरण्यं सुवर्णमन्तर्धायाभ्यन्तरे क्षिप्त्वा नरेश्वरो राजा सुमनाः शोभनचित्तः। उपविशेदध्यारोहेत्। सचिवैर्मन्त्रिभिः। आप्तैर्जनैर्विश्वस्तैर्बन्धुभिः। पुरोहितेनाचार्येण। दैवशब्देन दैवज्ञः सांवत्सरिक उच्यते। एतैर्वृतः समायुक्तः। तथा अन्यैश्च पौरैर्जनैः कल्याणनामभिर्वृतः परिवृतः। कल्याणनामानः शुभनामानः। यथा—जयराजः, सिंहराजः, बन्धुराजः, व्याघ्रराजः, इत्येवमादि ॥४८॥

किम्भूतो राजेत्याह—

वन्दिजनपौरविप्रैः प्रघुष्टपुण्याहवेदनिर्घोषैः।
समृदङ्गशङ्खतूर्यैर्मङ्गलशब्दैर्हतानिष्टः ॥४९॥

वन्दिनश्चाटुकारिणस्तैर्वन्दिजनैः। तथा पौरैश्च नागरैः। विप्रैर्ब्राह्मणैः। एतैः कीदृशैः? प्रघुष्टपुण्याहवेदनिर्घोषैः। प्रकर्षेण घुष्ट उद्घोषितः पुण्याहशब्दो वेदशब्दश्च यैः। एतैः। तथा समृदङ्गशंखतूर्यैर्मङ्गलशब्दैः, सह मृदङ्गशब्दैः, शङ्खशब्दैः, तूर्यशब्दैर्ये मङ्गलशब्दा वर्तन्ते तैर्हतो विनाशितोऽनिष्टोऽशुभः शब्दो यस्य स तथोक्तः ॥४९॥

ततः किं कुर्यादित्याह—

अहतक्षौमनिवसनं पुरोहितः कम्बलेन सञ्छाद्य।
कृतबलिपूजं कलशैरभिषिञ्चेत् सर्पिषा पूर्णैः ॥५०॥

ततः पुरोहितो राजानमभिषिञ्चेत्। कीदृशं राजानम्? अहतक्षौमनिवसनम्, अहतं नवं क्षौमं क्षुमाकृतं निवसनं यस्य। तथा कृतबलिपूजम्, कृतो बलिरुपहारः।

पूजा अर्चा च येन तम्। कथमभिषिञ्चेत्? कम्बलेनौर्णिकेन संच्छाद्य छादयित्वा। कैरभिषिञ्चेत्? कलशैः सर्पिषा पूर्णैः, घृतपरिपूर्णैः कुम्भैरित्यर्थः ॥५०॥

तथा कलशप्रमाणमाह--

अष्टावष्टाविंशतिरष्टशतं वापि कलशपरिमाणम्।
अधिकेऽधिके गुणोत्तरमयं च मन्त्रोऽत्र मुनिगीतः ॥५१॥

अष्टौ कलशाः, अष्टाविंशतिर्वा, अष्टशतमष्टाधिकं शतं वा। एतत्कलशानां परिमाणम्। अधिकेऽधिके कलशपरिमाणे गुणोत्तरं गुणाधिक्यम्। अत्र घृताभिषेके मन्त्रोऽयं मुनिगीतो मुनिना वृद्धगर्गेण उक्तः ॥५१॥

तमेवाह--

आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम्।
आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ॥५२॥
भौमान्तरिक्षं दिव्यं वा यत्ते कल्मषमागतम्।
सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥५३॥

आज्यं घृतं तदेव तेजः समुद्दिष्टं कथितम्। तथा आज्यं परं प्रकृष्टं पापहरं कल्मषनाशनम्। आज्यं सुराणां देवानामाहारो भोजनम्। आज्ये लोका भूर्लोकादयः प्रतिष्ठिताः स्थापिताः ॥५२॥

ते तव कल्मषं यत्पापं दिव्यं ग्रहनक्षत्रविकारजम्। आन्तरिक्षमुल्कानिर्घात-पवनपरिवेषगन्धर्वपुरपुरन्दरचापादिजातम्। भौमं वा चरस्थिरोद्भवम्। आगतं प्राप्तम्। तत्सर्वमाज्यसंस्पर्शात् घृतसंस्पर्शमात्रादेव प्रणाशं क्षयमुपगच्छतु प्रयातु ॥५३॥

ततः किं कुर्यादित्याह--

कम्बलमपनीय ततः पुण्यस्नानाम्बुभिः सफलपुष्पैः।
अभिषिञ्चेन्मनुजेन्द्रं पुरोहितोऽनेन मन्त्रेण ॥५४॥

ततोऽनन्तरं कम्बलमपनीयापास्य। ततः सफलपुष्पैः फलपुष्पसहितैः। पुण्यस्नानाम्बुभिः पुण्यस्नानद्रव्ययुक्तैर्जलैः। पुरोहित आचार्यो मनुजेन्द्रं राजानमनेन मन्त्रेणाभिषिञ्चेदभिषेकं कुर्यादिति ॥५४॥

अथ तमेव स्नानमन्त्रमाह--

[1]सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः ॥५५॥

---

१. अस्मिन् स्नानमन्त्रपाठे पुस्तकान्तरेषु क्रमभेदो बहुत्र नामभेदश्च वर्तते। हेमाद्रौ व्रत-खण्डस्य २३ अध्यायेऽप्ययं मन्त्र उपलभ्यते, तत्रापि क्रमभेदः पाठभेदश्च क्वचित्।

आदित्या वसवो रुद्रा अश्विनौ च भिषग्वरौ।
अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती ॥५६॥
कीर्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा।
दनुश्च सुरसा चैव विनता कद्रुरेव च ॥५७॥
देवपत्न्यश्च या नोक्ता देवमातर एव च।
सर्वास्त्वामभिषिञ्चन्तु दिव्याश्चाप्सरसां गणाः ॥५८॥
नक्षत्राणि मुहूर्ताश्च पक्षाहोरात्रसन्धयः ॥
संवत्सरा दिनेशाश्च कलाः काष्ठाः क्षणा लवाः ॥५९॥
सर्वे त्वामभिषिञ्चन्तु कालस्यावयवाः शुभाः।
एते चान्ये च मुनयो वेदव्रतपरायणाः ॥६०॥
सशिष्यास्तेऽभिषिञ्चन्तु सदाराश्च तपोधनाः।
वैमानिकाः सुरगणा मनवः सागरैः सह ॥६१॥
सरितश्च महाभागा नागाः किंपुरुषास्तथा।
वैखानसा महाभागा द्विजा वैहायसाश्च ये ॥६२॥
सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि च।
मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः ॥६३॥
भृगुः सनत्कुमारश्च सनकोऽथ सनन्दनः।
सनातनश्च दक्षश्च जैगीषव्यो भगन्दरः ॥६४॥
एकतश्च द्वितश्चैव त्रितो जाबालिकश्यपौ।
दुर्वासा दुर्विनीतश्च कण्वः कात्यायनस्तथा ॥६५॥
मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः।
ऊर्ध्वः संवर्तकश्चैव च्यवनोऽत्रिः पराशरः ॥६६॥
द्वैपायनो यवक्रीतो देवराजः सहानुजः।
पर्वतास्तरवो वल्ल्यः पुण्यान्यायतनानि च ॥६७॥
प्रजापतिर्दितिश्चैव गावो विश्वस्य मातरः।
वाहनानि च दिव्यानि सर्वलोकाश्चराचराः ॥६८॥
अग्नयः पितरस्तारा जीमूताः खं दिशो जलम्।
एते चान्ये च बहवः पुण्यसङ्कीर्तनाः शुभैः ॥६९॥

तोयैस्त्वामभिषिञ्चन्तु सर्वोत्पातनिबर्हणैः।
यथाभिषिक्तो मघवानेतैर्मुदितमानसैः ॥७०॥

अथ पयोऽभिषेकमन्त्रः सुबोधस्तथापि मन्दबुद्धिव्युत्पादनाय किञ्चिद् व्याख्यायते।

सुरा देवास्त्वां नृपमभिषिञ्चन्तु। ये च सिद्धा देवयोनयः। पुरातनाः ब्रह्माद्याः सुराः। साध्याः समरुद्गणाः, मरुतां गणैर्वायुसमूहैः सहिताः ॥५५॥

भिषग्वरौ वैद्यप्रधानावश्विनौ। अदितिर्देवमाता सुरजननी। स्वाहाद्या देवताः ॥५६॥

सिनीवाली दृश्यचन्द्रा अमावास्या यस्यांप्रभाते शशी दृश्यते, नष्टक्षपाकरा अमावास्या कुहूः, यस्यां प्रभाते चन्द्रमा न दृश्यते। दनुप्रभृतयः कश्यपपत्न्यः ॥५७॥

देवपत्न्यः सुरदाराः। देवमातरः सुरजनन्यः। एताः सर्वास्त्वामभिषिञ्चन्तु। दिवि भवा दिव्याः। अप्सरसां गणाः समूहाः ॥५८॥

नक्षत्राण्यश्विन्यादीनि सप्तविंशतिः। मुहूर्ताः क्षणाः। पक्षाहोरात्राणि। तेषां ये च सन्धयः। संवत्सरा वर्षाणि। दिनेशाः सूर्योदयः सप्तग्रहाः। कलाद्याः कालावयवाः ॥५९॥

कालस्याङ्गानि। एत उक्ता अन्ये परे च मुनयः ऋषयो वेदव्रतपरायणा वेदासक्ताः ॥६०॥

सशिष्याः शिष्यसहिताः। सदाराः सकलत्राः। तपोधनास्तपःप्रधानाः, तपस्विनः। वैमानिका विमानेन ये यान्ति। मनवः। सागरैः समुद्रैः सहिताः ॥६१॥

सरितो नद्यः। महाभागाः प्रधानाः। नागाः। किंपुरुषाः किन्नराः। वैखानसा वैहायसा इति संज्ञाविकृताः। महाभागा द्विजानां मुनीनाम् ॥६२॥

सप्तर्षयो मरीच्यादयो मुनयः। इहैव सप्तर्षिचारे उक्ताः। सदाराः सपत्नीकाः ध्रुवस्थानानि ध्रुवप्रदेशाः ॥६३॥

दीर्घतपा मुनिविशेषः ॥६४-६६॥

द्वैपायनो व्यासः। देवराज इन्द्रः। सहानुजैर्भ्रातृभिः सह ॥६७-६८॥

जीमूता मेघाः। खं नभः। दिश आशाः। जलमुदकम्। एते ये उक्तास्तथा अन्येऽपरे बहवः प्रभूताः। पुण्यसङ्कीर्तनाः। पुण्यं पवित्रं सङ्कीर्तनं येषां ते तथाभूताः। शुभैः पवित्रैः ॥६९॥

तोयैर्जलैस्त्वामभिषिञ्चन्तु। किम्भूतैः? सर्वोत्पातनिबर्हणैः, सर्वेषामुत्पातानां यानि निबर्हणानि नाशकर्तृणि तैः। निःशेषानिष्टनिवारणैः। यथा येन प्रकारेणैतैः पूर्वोक्तैर्देवतामुनिभिः। मुदितमानसैः संहृष्टचित्तैः। मघवानिन्द्रः पूर्वमभिषिक्तस्तथा ते अभिषिञ्चन्त्विति ॥७०॥

अथान्यान्मन्त्रानप्याह--

इत्येतैश्चान्यैश्चाप्यथर्वकल्पाहितैः सरुद्रगणैः।
कौष्माण्डमहारौहिणकुबेरहृद्यैः समृद्धया च ॥७१॥

इत्येवंप्रकारैरेतैर्मन्त्रैस्तथान्यैरपरैरप्यथर्वकल्पाहितैरथर्वकल्पनिर्दिष्टैः। सरुद्रगणै रुद्रगणसहितैः। एकादशानुवाका रुद्राः। कौष्माण्डैः, षडनुवाकाः कौष्माण्डाः महारौहिणेन मन्त्रेण। कुबेरहृदयेन समृद्धया ऋचा ॥७१॥

ततः किं कुर्यादित्याह

आपोहिष्ठातिसृभिर्हिरण्यवर्णेति चतसृभिर्जप्तम्।
कार्पासिकवस्त्रयुगं बिभृयात् स्नातो नराधिपतिः ॥७२॥

ततो नराधिपती राजा स्नातः कृतस्नानः कार्पासिकवस्त्रयुगं बिभृयाद्धारयेत्। कार्पासिकेत्यनेनान्यवस्त्राणां परिहारः। कीदृशम् ? आपोहिष्ठेति तिसृभिर्ऋग्भिर्जप्तं तथा हिरण्यवर्णेति चतसृभिर्ऋग्भिर्जप्तम्। आपोहिष्टा हिरण्यवर्णेत्याद्यपदग्रहणम् ॥७२॥

ततः किं कुर्यादित्याह--

पुण्याहशङ्खशब्दैराचान्तोऽभ्यर्च्य देवगुरुविप्रान्।
छत्रध्वजायुधानि च ततः स्वपूजां प्रयुञ्जीत ॥७३॥

ततो नृपः पुण्याहशङ्खशब्दैश्च सहाऽऽचान्तः शुद्धकायो देवान् सुरान्। गुरूनुपाध्यायान्। विप्रान् ब्राह्मणान्। अभ्यर्च्य सम्पूज्य। तथा छत्रध्वजायुधानि, छत्रमातपत्रम्, ध्वजं चिह्नम्, आयुधं खड्गादि। एतानि सम्पूज्य ततोऽनन्तरं स्वपूजामात्मीयेष्टदेवतार्चां प्रयुञ्जीत कारयेदिति ॥७३॥

ततः किं कुर्यादित्याह--

आयुष्यं वर्चस्यं रायस्पोषाभिर्ऋग्भिरेताभिः।
परिजप्तं वैजयिकं नवं विदध्यादलङ्कारम् ॥७४॥

ततोऽनन्तरं नवमभिनवमलङ्कारं विभूषणादि वैजयिकं विजयावहं विदध्याद्धारयेत्। कीदृशम् ? आयुष्यं वर्चस्यम्। रायस्पोषाभिरेताभिः षड्भिर्ऋग्भिः परिजप्तमभिमन्त्रितम् ॥७४॥

ततः किं कुर्यादित्याह--

गत्वा द्वितीयवेदीं समुपविशेच्चर्मणामुपरि राजा।
देयानि चैव चर्माण्युपर्युपर्येवमेतानि ॥७५॥

वृषस्य वृषदंशस्य रुरोश्च पृषतस्य च।
तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परम् ॥७६॥

ततो द्वितीयवेदीं दक्षिणां गत्वा प्राप्य तत्र च राजा नृपश्चर्मणामुपरि समुपविशेत्तिष्ठेत्। तथोपर्युपरि चर्मण्यनेकप्रकारेणैतानि स्थाप्यानि यानि तानीत्याह ॥७५॥

वृषस्येति। तद्यथा--वृषस्य बलीवर्दस्य सम्बन्धि प्रथमं दद्यात्। तत्रोपरि वृषदंशस्य मार्जारस्य। तस्योपरि रुरोर्मृगजातेः। तस्योपरि पृषतस्य च मृगजातेरेव। तेषामुपरि सिंहस्य हरेः। ततः परं तस्योपरि व्याघ्रस्येति ॥७६॥

ततः किं कुर्यादित्याह--

मुख्यस्थाने जुहुयात् पुरोहितोऽग्नि समित्तिलघृताद्यैः।
त्रिनयनशक्रबृहस्पतिनारायणनित्यगतिऋग्भिः ॥७७॥

पुरोहित आचार्यः। मुख्यस्थानं प्रधानस्थानं दक्षिणस्थानमित्यर्थः। समित्तिलघृताद्यैः, समिद्भिः, तिलैः, घृतेनाज्येन च। आदिग्रहणादन्यैः शान्तिकैः श्रीफलादिभिरग्निं जुहुयात्। त्रिनयनो रुद्रः। शक्र इन्द्रः। बृहस्पतिर्देवगुरुः। नारायणो विष्णुः। नित्यगतिर्वायुः। एतत्संबन्धिन्य ऋचस्ताभिः॥ ७७॥

अन्यच्च--

इन्द्रध्वजनिर्दिष्टान्यग्निनिमित्तानि दैवविद् ब्रूयात्।
कृत्वाऽशेषसमाप्तिं पुरोहितः प्राञ्जलिर्ब्रूयात् ॥७८॥

दैवित् सांवत्सरिकः। इन्द्रध्वजनिर्दिष्टानीन्द्रध्वजोक्तानि। अग्निनिमित्तानि अग्निलक्षणानि ब्रूयाद् वदेत्॥ तद्यथा--

[1]स्वाहावसानसमये स्वयमुज्ज्वलार्चिः
स्निग्धः प्रदक्षिणशिखो हुतभुग् नृपस्य।
गङ्गादिवाकरसुताजलचारुहारां
धात्रीं समुद्ररशनां वशगां करोति॥

एतत्सर्वं विचार्यम्।

अशेषसमाप्तिं सर्वकर्मणां परिसमाप्तिं कृत्वा ततः प्राञ्जलिः पुरोहितः। अञ्जलिं कृत्वा आचार्य इदं ब्रूयाद्वदेत् ॥७८॥

---

१. द्रष्टव्योऽस्यैव ग्रन्थस्य ४५३ पृष्ठे ३२ मूलश्लोकः।

किं तदित्याह—

यान्तु देवगणाः सर्वे पूजामादाय पार्थिवात्।
सिद्धिं दत्त्वा तु विपुलां पुनरागमनाय च ॥७९॥

सर्वे देवगणाः सुरसमूहाः पार्थिवाद्राज्ञः पूजामर्चामादाय गृहीत्वा तस्य च विपुलां विस्तीर्णां सिद्धिं दत्वा पुनर्भूयः आगमनाय च प्रयान्तु व्रजन्तु ॥७९॥

ततो राज्ञा किं कर्तव्यमित्याह—

नृपतिरतो दैवज्ञं पुरोहितं चार्चयेद्धनैर्बहुभिः।
अन्यांश्च दक्षिणीयान् यथोचितं श्रोत्रियप्रभृतीन् ॥८०॥

अतोऽनन्तरं नृपती राजा दैवज्ञं सांवत्सरं पुरोहितं चाचार्यं बहुभिः प्रभूतैर्धनैर्वित्तैरर्चयेत्। तथा अन्यान् दक्षिणीयान् दक्षिणार्हान् यथोचितं कुलशीलपाठश्रुतानुसारेण श्रोत्रियप्रभृतीन् यजमानाग्निहोतॄंश्चार्चयेत्। तथा च गर्गः—

दत्वा वित्तं ब्राह्मणेभ्यो गावो हेमपरिष्कृताः।
वास्तु युग्यं मही रूप्यं तेभ्यश्च बहुभोजनम् ॥
शङ्खभेरीस्वनैर्दिव्यैर्गीतैश्चैव मनोहरैः।
सम्प्रविश्य ततो राजा सचिवैः परिवारितः ॥
श्वेतकुञ्जरमारूढः श्वेतमश्वमथापि वा।
श्वेतचन्दनलिप्ताङ्गः श्वेताम्बरधरः शुभः ॥
पुरस्ताद्विकरेद्वित्तमाशीर्वादैश्च पूजितः ॥इति॥८०॥

ततः किं कुर्यादित्याह—

दत्त्वाऽभयं प्रजानामाघातस्थानगान् विसृज्य पशून्।
बन्धनमोक्षं कुर्यादभ्यन्तरदोषकृद्वर्जम् ॥८१॥

ततः प्रजानां लोकानामभयं दत्वा आघातस्थानगान् वध्यस्थानप्राप्तान् पशून् छागादीन् विसृज्य विमुच्य ततो बन्धनमोक्षं कुर्यात्। बन्धनस्थान् पुरुषान् परित्यजेत्। किं त्वभ्यन्तरदोषकृद्वर्जम्। अभ्यन्तरे नृपशरीरे अन्तःपुरे वा यैर्दोषः कृतःस्तान् वर्जयित्वेत्यर्थः ॥८१॥

अथ पुष्यस्नानमाहात्म्यमाह—

एतत्प्रयुज्यमानं प्रतिपुष्यं सुखयशोऽर्थवृद्धिकरम्।
पुष्याद्विनार्धफलदा पौषी शान्तिः परा प्रोक्ता ॥८२॥

एतत् स्नानं प्रतिपुष्यं पुष्यं पुष्यं प्रति प्रयुज्यमानं क्रियमाणं सुखयशोऽर्थ-वृद्धिकरं सुखस्य यशसेऽर्थस्य वृद्धिकरं भवति। पुष्याद्विना अन्यत्र क्रियमाणमर्धफलं यथोक्तात् फलादर्धं ददाति। पौषी शान्तिः। पुष्यनक्षत्रेण युता पौषी पौर्णमासी च परा प्रकृष्टा प्रोक्ता कथिता ॥८२॥

अथ केषु कालेषु पुष्यस्नानं कुर्यादित्याह—

राष्ट्रोत्पातोपसर्गेषु राहोः केतोश्च दर्शने।
ग्रहावमर्दने चैव पुष्यस्नानं समाचरेत् ॥८३॥

राष्ट्रे राज्ये। उत्पातेषु दिव्यान्तरिक्षभौमेषु। तथोपसर्गेषूपद्रवेषु। अन्येषु व्याध्यादिषु। राहोर्दर्शने रविचन्द्रग्रहणे। केतोर्दर्शने केतूदये। ग्रहावमर्दने ग्रहयुद्धे चैवमनेन प्रकारेण स यथा पुष्यस्नानं समाचरेत् कारयेत् ॥८३॥

अन्यच्चाह—

नास्ति लोके स उत्पातो यो ह्यनेन न शाम्यति।
मङ्गलं चापरं नास्ति यदस्मादतिरिच्यते ॥८४॥

लोके स उत्पातो नास्ति न विद्यते यो ह्यनेन पुष्यस्नानेन न शाम्यति न शमं याति; अपि तु सर्व एव शाम्यतीत्यर्थः। हिर्यस्मादर्थे। अस्मात् पुष्यस्नानाद्यद-तिरिच्यते श्रेष्ठतरं तदपरमन्यन्मङ्गलं नास्ति न विद्यते। तथा च गर्गः—

प्रतिपुष्येण यो राजा स्नायीत विधिपूर्वकम्।
तस्य राष्ट्रे न सीदन्ति मर्त्या ये जन्तवो भुवि ॥इति॥८४॥

अन्यत् पुष्यस्नानमाहात्म्यमाह—

अधिराज्यार्थिनो राज्ञः पुत्रजन्म च काङ्क्षतः।
तत्पूर्वमभिषेके च विधिरेष प्रशस्यते ॥८५॥

राज्ञो नृपस्याधिराज्यार्थिनोऽधिराज्यमिच्छतस्तथा पुत्रजन्म सुतसम्भवं च कांक्षतः समभिलषितः। तत्पूर्वं तत्प्रथमं योऽभिषेकस्तस्मिन्नप्यभिषेके एष एव विधिः प्रशस्यते स्त्यत इष्यत इति। अतोऽभीष्टमभिलाषी किल्विषक्षयार्थं माङ्गलिकं स्नानं कुर्वीतेति स्थितिः ॥८५॥

अन्यदप्याह—

महेन्द्रार्थमुवाचेदं बृहत्कीर्तिर्बृहस्पतिः।
स्नानमायुष्प्रजावृद्धिसौभाग्यकरणं परम् ॥८६॥

इदं स्नानं बृहस्पतिः सुरगुरुर्बृहत्कीर्तिर्विपुलकीर्तिः, महेन्द्रार्थं देवराजहितार्थं मुवाचोक्तवान्। कीदृशम् ? आयुष्प्रजावृद्धिसौभाग्यकरणम्, आयुषो जीवितस्य प्रजानां सुतानां च वृद्धिं करोति। सौभाग्यकरणं परं प्रकृष्टम् ॥८६॥

अन्यदप्याह—

अनेनैव विधानेन हस्त्यश्वं स्नापयेत्ततः।
तस्यामयविनिर्मुक्तं परां सिद्धिमवाप्नुयात् ॥८७॥

यो राजा अनेनैव पूर्वोक्तेन विधानेन हस्त्यश्वं गजतुरगं स्नापयेत् तस्य राज्ञस्तद्धस्त्यश्वमामयविनिर्मुक्तं रोगरहितं परां प्रकृष्टां सिद्धिमवाप्नुयाल्लभत इति ॥८७॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ पुष्यस्नानं नाम सप्तचत्वारिंशोऽध्यायः ॥४७॥

अथ पट्टलक्षणं व्याख्यायते।

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह—

विस्तरशो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः।
तत्संक्षेपः क्रियते मयाऽत्र सकलार्थसम्पन्नः ॥१॥

आचार्यैः काश्यपादिभिर्यत्पट्टानां नरेन्द्रमुकुटानां लक्षणं विस्तरशो विस्तरेण निर्दिष्टमुक्तम्। तस्य मया सकलार्थसम्पन्नः परिपूर्णार्थसमासः संक्षेपः क्रियते विरच्यत इति ॥१॥

अधुना तदेवाह—

पट्टः शुभदो राज्ञां मध्येऽष्टावङ्गुलानि विस्तीर्णः।
सप्त नरेन्द्रमहिष्याः षड् युवराजस्य निर्दिष्टः ॥२॥
चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये।
द्वे च प्रसादपट्टः पञ्चैते कीर्तिताः पट्टाः ॥३॥

राज्ञां नृपाणां पट्टो मुकुटो मध्ये मध्यभागे अष्टावङ्गुलानि विस्तीर्णः कार्यः। नरेन्द्रमहिष्या राजपत्न्याः सप्ताङ्गुलानि मध्ये विस्तीर्णः। षडङ्गुलानि युवराजस्य निर्दिष्टः कथितः ॥२॥

सेनापतेश्चमूनाथस्य मध्ये चतुरङ्गुलविस्तीर्णः कार्यः। द्वे चाङ्गुले प्रसाद-पट्टो विस्तीर्णः कार्यः। प्रसादपट्टं राजा कस्यचिद्वध्नाति। एवमेते पञ्च पट्टाः कीर्तिता उक्ताः ॥३॥

अन्यदप्याह—

सर्वे द्विगुणायामा मध्यादर्धेन पार्श्वविस्तीर्णाः।
सर्वे च शुद्धकाञ्चनविनिर्मिताः श्रेयसो वृद्धचै ॥४॥

सर्वे पञ्चैव पट्टा द्विगुणायामाः। विस्ताराद् द्विगुणायामा द्विगुणा दीर्घाः कर्तव्याः। यस्य पट्टस्य यो विस्तार उक्तस्तस्य दैर्घ्यं विस्तारद्विगुणं कार्यम्। यथा नृपपट्टोऽष्टावङ्गुलानि विस्तीर्णः सच षोडशाङ्गुलायामः कार्यः। एवमन्येषामप्यायामप्रमाणं ज्ञेयम्। तथा पट्टस्य मध्ये यो विस्तार उक्तस्तस्यार्धेन पार्श्वयोर्विस्तारः कार्यः। यथा नृपपट्टोऽष्टावङ्गुलानि मध्याद्विस्तीर्णः, स च पार्श्वयोश्चतुरङ्गुलविस्तारः कार्य इति। एवमन्येषामपि। सर्वे च पट्टाः शुद्धेन शुभेन काञ्चनेन सुवर्णेन विनिर्मिता रचिताः श्रेयसो वृद्धचै वृद्धये भवन्ति। आरोग्यस्य वृद्धिं कुर्वन्ति ॥४॥

अन्यल्लक्षणमप्याह—

पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिवमहिष्योः।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया ॥५॥

भूमिपते राज्ञः पञ्च शिखः पट्टः कार्यः। पञ्चशिखा यस्य स तथाभूतः। युवराजस्य तथा पार्थिवमहिष्या नृपपत्न्यास्त्रिशिखः कार्यः। सैन्यपतेश्चमूनाथस्यैकशिखः। प्रसादपट्टः शिखया विना शिखावर्जितः कार्यः ॥५॥

अत्रैव शुभाशुभज्ञानमाह—

क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।
वृद्धिजयौ भूमिपतेस्तथा प्रजानां च सुखसम्पत् ॥६॥

पट्टस्य संबन्धि पत्रं क्रियमाणं यदि सुखेनाक्लेशेन विस्तारमेत्यायाति तदा भूमिपते राज्ञो वृद्धिजयौ भवतः। तथा प्रजानां लोकानां च सुखसम्पत् सौख्यवृद्धिर्भवति ॥६॥

अन्यदप्याह—

जीवितराज्यविनाशं करोति मध्ये व्रणः समुत्पन्नः।
मध्ये स्फुटितस्त्याज्यो विघ्नकरः पार्श्वयोः स्फुटितः ॥७॥

पट्टस्य क्रियमाणस्य मध्ये व्रणश्छिद्रः समुत्पन्नो जीवितस्यायुषो राज्यस्य च विनाशं करोति। तथा मध्ये यः स्फुटितः स त्याज्यः। पार्श्वयोः स्फुटितः स विघ्नकरः विघ्नं करोति। तथा च काश्यपः—

क्रियमाणं यदा पत्रं मध्ये स्फुटति भिद्यते।
तदा नृपभयं प्रोक्तं यस्यार्थे वा प्रकल्पितम्॥
सुलक्षणं प्रमाणस्थं सुकरं च हितावहम्।
सुरूपं दर्शनीयं च प्रजानां वृद्धिदं स्मृतम्॥इति॥७॥

अथाशुभे लक्षणे दृष्टे किं कुर्यादित्याह—

अशुभनिमित्तोत्पत्तौ शास्त्रज्ञः शान्तिमादिशेद्राज्ञः।
शस्तनिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति॥८॥

अशुभनिमित्तस्याशुभलक्षणस्योत्पत्तौ सत्यां शास्त्रज्ञः पट्टलक्षणज्ञो राज्ञो नृपस्य शान्तिमादिशेद्वदेत्। यः पट्टः शस्तनिमित्तः शुभलक्षणसंयुक्तः स नृपस्य राज्ञो राष्ट्रस्य च विवृद्धये भवति॥८॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ पट्टलक्षणं नामाष्टचत्वारिंशोऽध्यायः॥४८॥

अथ खड्गलक्षणं व्याख्यायते।

तत्रादावेव खड्गस्य प्रमाणं व्रणानां च शुभाशुभज्ञानार्थमाह—

अङ्गुलशतार्धमुत्तम ऊनः स्यात् पञ्चविंशतिः खड्गः।
अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः॥१॥

उत्तमः प्रधानखड्गः। अङ्गुलशतार्धं पञ्चाशदङ्गुलानि दीर्घ इत्यर्थः। पञ्चविंशतिरङ्गुलानि च ऊनः कनीयान् खड्गः स्याद्भवेत्। अनयोः प्रमाणयोर्मध्ये स्थितः पञ्चाशत ऊनः पञ्चविंशतेरधिकः स मध्यम एव। अङ्गुलमानाद्यो व्रणो विषमपर्वस्थः। अङ्गुलगणनया विषमाङ्गुले स्थितः। प्रथमतृतीयपञ्चमसप्तमादिष्वङ्गुलेषु स्थितः सोऽशुभोऽनिष्टफलदः। अर्थादेव समाङ्गुलेषु द्वितीयचतुर्थषष्ठाष्टमादिषु यः स्थितः स शुभः। मिश्रेष्वङ्गुलेषु मध्यम इति॥१॥

अथ व्रणानामाकृतिलक्षणमाह—

श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम्।
सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च॥२॥

श्रीवृक्षो बिल्वः। वर्धमानं चिह्नविशेषो वर्धमानवास्तुनः सदृशम्। केचिच्छरावकमितीच्छन्ति। आतपत्रं छत्रम्। शिवलिङ्गं प्रसिद्धम्। कुण्डलं कर्णाभरणम्। अब्जं पद्मम्। एषां सदृशास्तुल्या आकृत्या ये व्रणास्ते खड्गे प्रशस्ताः शुभदाः। तथा ध्वजस्य चिह्नस्य पताकारूपस्य। आयुधस्य खड्गादेः। स्वस्तिकस्य चिह्नस्य स्वस्तिकवास्तुनः सदृशाश्च व्रणाः प्रशस्ता एव ॥२॥

अथाशुभलक्षणान्याह—

कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः।
खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च ॥३॥

कृकलासः प्राणिविशेषः। काककङ्कौ प्रसिद्धौ। क्रव्यादा मांसाशिनो विहङ्गाः श्येनगृध्रप्रभृतयः। कबन्धच्छिन्नशिराः पुमान्। वृश्चिकः कीटजातिः। एतेषां सदृशी आकृतिर्येषां ते व्रणाः खड्गे अशोभना अशुभदाः, तथा वंशानुगताः, वंशशब्देन खड्गमध्य उच्चभाग उच्यते। तत्र ये अनुगताः स्थिताः प्रभूताश्च बहवोऽपि श्वाकृतयस्तेऽप्यशुभा एव ॥३॥

अन्यल्लक्षणमाह—

स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनोऽनुगतः।
अस्वन इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः ॥४॥

स्फुटितः क्वचित् क्वचिदुच्चाटित इव दृश्यते। ह्रस्वः प्रमाणहीनः। कुण्ठो भग्नः। वंशच्छिन्नो वंशप्रदेशाद्विच्छिन्न इव दृश्यते, न च दृङ्मनोऽनुगतः। दृशोश्चक्षुषोर्मनसश्चित्तस्य यो नानुगतो न प्रियः। अस्वनो निःशब्दो यस्याऽऽहतस्य शब्दो नोत्पद्यत इति। एवंविधोऽनिष्टो न शुभः। प्रोक्तविपर्यस्त इष्टफलः। उक्तदोषलक्षणेभ्यो विपर्यस्तो विपरीतलक्षणस्थ इष्टफलः शुभफलः। अस्फुटितो दीर्घस्तीक्ष्णो वंशप्रदेशादविच्छिन्नो दृङ्मनोऽनुगतः सस्वन इति शुभलक्षणानि। एतैर्युक्त इष्टफलः ॥४॥

अथ खड्गचेष्टितमाह—

क्वणितं मरणायोक्तं पराजयाय प्रवर्तनं कोशात्।
स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे ॥५॥

स्वयमेव खड्गस्य क्वणितं शब्दो मरणायोक्तम्। खड्गस्वामिनो मृत्यवे कथितम्। कोशात् परीवारादप्रवर्तनमनिर्गमनं युद्धकाले पराजयाय भवति। स्वयमुद्गीर्णे परीवारात् स्वयमेव निर्गते खड्गे युद्धं संग्रामो भवति। संग्रामकाले ज्वलिते सज्वाले खड्गे विजयो भवति ॥५॥

अथ परिभाषार्थमाह—

नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम्।
देशं न चास्य कथयेत् प्रतिमानयेन्न
नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥६॥

नृपती राजा असियष्टि खड्गयष्टिमकारणं निष्प्रयोजनं न विवृणुयाद् विगतावरणं न कुर्यात्, नोद्घाटयेदित्यर्थः, तथा अकारणं न विघट्टयेद् न चालयेत्। तत्र तस्यां खड्गयष्टौ वदनं मुखं न पश्येद् न निरीक्षयेत्, तथा अकारणं मूल्यं न वदेद् न ब्रूयात्। तथा खड्गस्य देशं जातिं न कथयेत्। अमुकदेशजोऽयं खड्ग इति। न प्रतिमानयेद् नाङ्गुलैर्मिनुयात्, तथा अप्रयतोऽसमाहितोऽपि यष्टिं न स्पृशेत् ॥६॥

अन्यल्लक्षणमाह—

गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च।
करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः ॥७॥

एते खड्गाः प्रशस्ताः स्युर्भवेयुः। के ?ते, गोजिह्वासंस्थानः। यत्र गोजिह्वासदृशी वाकृतिः, तथा नीलोत्पलवंशपत्रसदृशः, कुवलयदलाकृतिः। वंशपत्रसदृशश्च यः, करवीरपत्रसदृशो वा, तथा शूलाग्रः शूलाकारमयं यस्य। मण्डलाग्रो मण्डलाकारमयं परिवर्तुलं यस्य यथाभूत इति ॥७॥

अन्यच्चाह—

निष्पन्नो न छेद्यो निकषैः कार्यः प्रमाणयुक्तः सः।
मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ॥८॥

खड्गो निष्पन्नः कदाचित् प्रमाणादधिको भवति, तदा न छेद्यो न कल्पनीयः। स खड्गो निकषैर्निघर्षणैः प्रमाणयुक्तः कार्यः। कल्पिते तत्र दोषमाह—मूले म्रियते स्वामीति। तस्य खड्गस्य मूले छिन्ने स्वामी प्रभुर्म्रियते विपद्यते। अग्रतश्छिन्ने जननी, तस्य स्वामिनो माता म्रियते। तथा च काश्यपः—

उत्पन्नो न पुनश्छेद्यो निष्पन्नो यः प्रमाणतः।
मुष्ट्या भङ्गे म्रियेत् स्वामी तदग्रे तस्य मातरम् ॥
तस्मान्न छेदयेत् खड्गमात्मनोऽशुभदं यतः।
निघर्षणैः प्रमाणस्थः कार्यो येन शुभो भवेत् ॥इति॥८॥

अथ खड्गमुष्टौ दृष्टायां व्रणज्ञानमाह—

यस्मिन् त्सरुप्रदेशे व्रणो भवेत् तद्वदेव खड्गस्य।
वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा ॥९॥

खड्गस्य या शिखा मुष्टावन्तः प्रविशति स प्रदेशः त्सरुशब्दवाच्यः। यस्मिन् त्सरुप्रदेशे ग्रहणविभागे मूले मध्ये यो वा व्रणश्छिद्रं भवेत् स्यात्, तद्वत्तेनैव प्रकारेण खड्गस्य मूले मध्ये अग्रे वा भवेत्। एतदुक्तं भवति—यदि मुष्टिमूले व्रणो दृश्यते तदा खड्गस्यापि मूले व्रणो वाच्यः। अनेनानुसारेणान्तरालेऽपि योज्यम्। अत्र दृष्टान्तमाह—वनितानामिव तिलक इति। वनितानां स्त्रीणां यथा तिलकं मुखे दृष्ट्वा अवलोक्य स एव गुह्येऽपि वाच्यो वक्तव्यः। एवं यस्मिन् खड्गे मुष्टौ व्रणो भवति तस्मिन्निश्चयान्मध्ये व्रणोऽग्रे च वाच्यः ॥९॥

अत्र व्रणज्ञानोपायमाह—

अथवा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तदवधार्य।
कोशस्थस्यादेश्यो व्रणोऽस्ति शास्त्रं विदित्वेदम् ॥१०॥

वाशब्दः प्रकारे। अथवा निस्त्रिंशभृत्प्रष्टा खड्गे गृहीते ससंशयः पृच्छति, यथा अस्मिन् खड्गे व्रणोऽस्ति न वेति। तत्रायमुपायः—तस्मिन् काले यल्लग्नं वर्तते तस्य यदि केन्द्रस्थः पापग्रहो भवति, तदा निश्चयात्तस्मिन् खड्गे व्रणो भवति। एवं व्रणे ज्ञाते सति स निस्त्रिंशभृत्प्रष्टा यदङ्गं स्वावयवं स्पृशति तदङ्गं समवधार्यावलोक्य कोशस्थस्यैव खड्गस्य व्रण आदेश्यो वक्तव्यः। इदं वक्ष्यमाणमपि शास्त्रं विदित्वा ज्ञात्वा।१०॥

तच्चाह—

शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे।
भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च ॥११॥

निस्त्रिंशभृत्प्रष्टा पृच्छाकाले यद्यात्मीयं शिरः स्पृशति, तदा खड्गस्य मूलादेव प्रथमेऽङ्गुले व्रणो वाच्यः। एवं ललाटसंस्पर्शे द्वितीयेऽङ्गुले, भ्रूमध्ये स्पृष्टे तृतीयेऽङ्गुले, नेत्रे नयने दक्षिणे वामे वा स्पृष्टे चतुर्थेऽङ्गुले वाच्यः ॥११॥

अन्यदप्याह—

नासौष्ठकपोलहनुश्रवणग्रीवांसके च पञ्चाद्याः।
उरसि द्वादशसंस्थस्त्रयोदशे कक्षयोर्ज्ञेयः ॥१२॥

नासायां स्पृष्टायां पञ्चमेऽङ्गुले व्रणो वाच्यः। ओष्ठयोः स्पर्शने षष्ठेऽङ्गुले। कपोलौ मुखगण्डौ, तयोः स्पर्शने सप्तमेऽङ्गुले। हनुस्पर्शेऽष्टमेऽङ्गुले। श्रवणौ कर्णौ, तयोः स्पर्शने नवमे। ग्रीवा शिरोधरा, तस्याः स्पर्शने दशमे। अंसौ स्कन्धौ, तयोः स्पर्शने एकादशे। एवं पञ्चाद्याः, पञ्चादित आरभ्य। उरसि वक्षसि स्पृष्टे द्वादशसंस्थो द्वादशेऽङ्गुले व्रणो वक्तव्यः। कक्षयोः स्पृष्टयोस्त्रयोदशेऽङ्गुले व्रणो वाच्य इति॥१२॥

अन्यदप्याह—

स्तनहृदयोदरकुक्षिनाभौ तु चतुर्दशादयो ज्ञेयाः।
नाभीमूले कटयां गुह्ये चैकोनविंशतितः॥१३॥

स्तनस्पर्शे चतुर्दशेऽङ्गुले व्रणो वक्तव्यः। हृदयस्पर्शने पञ्चदशे। उदरसंस्पर्शे षोडशे। कुक्षिस्पर्शने सप्तदशे। नाभिसंस्पर्शने अष्टादशे। एवं चतुर्दशादयो ज्ञेया ज्ञातव्याः। नाभिमूलं नाभेरधोभागः, तत्स्पर्शने एकोनविंशे। कटिस्पर्शने विंशे। गुह्यस्पर्शने एकविंशे। एवमेकोनविंशतितस्तदारभ्य॥१३॥

अन्यदप्याह—

ऊर्वोर्द्वाविंशे स्यादूर्वोर्मध्ये व्रणस्त्रयोविंशे।
जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥१४॥

ऊर्वोः स्पर्शने द्वाविंशेऽङ्गुले व्रणो वाच्यः। ऊर्वोर्मध्यभागस्पर्शने त्रयोविंशे। जानुनि च जानुनोः स्पर्शने चतुर्विंशे। जङ्घायां स्पर्शने च पञ्चविंशे व्रणो वाच्यः॥१४॥

अन्यदप्याह—

जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च।
षड्विंशतिकाद् यावत्त्रिंशदिति मतेन गर्गस्य॥१५॥

जङ्घयोर्मध्यभागस्पर्शने षड्विंशेऽङ्गुले व्रणो वाच्यः। गुल्फस्पर्शने सप्तविंशे। पार्ष्णिस्पर्शनेऽष्टाविंशे। पादस्पर्शने एकोनत्रिंशे। पादाङ्गुलीस्पर्शने त्रिंशे। एवं षड्विंशादङ्गुलात् प्रभृति यावत्त्रिंशदङ्गुलानि तावद्वाच्यम्। इत्यनेन प्रकारेण गर्गस्य मुनेर्मतेनेति। तथा च गर्गः—

शिरो ललाटं भ्रूमध्यं नेत्रघ्राणकपोलकम्।
हनुश्रोत्रं तथा ग्रीवा स्कन्धो वक्षश्च कक्षकम्॥
स्तनौ हृत् क्रोडकुक्षी च नाभिस्तन्मूलमेव च।
कटिगुह्योरुमध्यं च जानुजङ्घे तयोरधः॥

गुल्फं पार्ष्णिस्तथा पादमङ्गुलिस्पर्शने ध्रुवम्।
मूलात् प्रभृति खड्गेऽपि व्रणं त्रिशाङ्गुलं वदेत्॥ इति॥१५॥

अथैतेषां व्रणानां फलान्याह—

पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च बन्धश्च।
एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत् क्रमशः॥१६॥

मूलात् प्रभृति प्रथमेऽङ्गुले यदि व्रणो दृश्यते, तदा पुत्रमरणं सुतमृत्युः स्वामिनो भवति। द्वितीये धनाप्तिर्वित्तलाभः। तृतीये धनहानिरर्थनाशः। चतुर्थे सर्वार्थानां सम्पदः। पञ्चमे बन्धो बन्धनम्। एवमेकाद्यङ्गुलसंस्थैर्व्रणैः क्रमशः क्रमेण परिपाट्या फलं निर्दिशेद् वदेत्॥१६॥

अन्येष्वाह—

सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधनलाभौ।
क्रमशो विनाशवनिताप्तिचित्तदुःखानि षट्प्रभृति॥१७॥

सुतलाभः पुत्राप्तिः षष्ठेऽङ्गुले। कलहः सप्तमे। हस्तिलब्धिर्गजलाभोऽष्टमे। पुत्रमरणं सुतविनाशो नवमे। धनलाभो वित्तागमो दशमे। विनाशो मरणमेकादशे। वनिताप्तिः स्त्रीलाभो द्वादशे। चित्तदुःखं त्रयोदशे। एवं षट्प्रभृति षडादिष्वङ्गुलेषु क्रमशः क्रमेण विनिर्दिशेत् फलम्॥१७॥

अन्येष्वप्याह—

लब्धिर्हानिः स्त्रीलब्धयो वधो वृद्धिमरणपरितोषाः।
ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्॥१८॥

लब्धिरर्थलाभश्चतुर्दशेऽङ्गुले। हानिरर्थनाशः पञ्चदशे। स्त्रीलब्धिर्योषित्प्राप्तिः षोडशे। वधो मरणं सप्तदशे। वृद्धिरर्थादीनामष्टादशे। मरणमेकोनविंशे। परितोषश्चित्ततुष्टिर्विंशे। एवं चतुर्दशादिष्वङ्गुलेषु फलक्षयो ज्ञेयो ज्ञातव्यः। एकविंशे धनहानिर्वित्तनाशः स्याद् भवेत्॥१८॥

अन्येष्वाह—

वित्ताप्तिरनिर्वाणं धनागमो मृत्युसम्पदोऽस्वत्वम्।
ऐश्वर्यमृत्युराज्यानि च क्रमात् त्रिंशदिति यावत्॥१९॥

वित्ताप्तिर्धनागमो द्वाविंशे। अनिर्वाणं मृत्युस्त्रयोविंशे। धनागमो वित्तलाभश्चतुर्विंशे। मृत्युर्मरणं पञ्चविंशे। सम्पदोऽर्थादीनां षड्विंशे।

अस्वत्वं निर्धनत्वं सप्तविंशे। ऐश्वर्यमष्टाविंशे। मृत्युर्मरणमेकोनत्रिंशे। राज्यं त्रिंशे। एवं क्रमात् परिपाट्या त्रिंशद्यावत्फलानि वक्तव्यानीति ॥१९॥

अतः परमाह—

परतो न विशेषफलं विषमसमस्थास्तु पापशुभफलदाः।
कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽग्रमिति यावत् ॥२०॥

अतोऽस्मात् त्रिंशतः परतो न विशेषफलं भवति, किन्तु सामान्याद्विषमसमस्थाश्च पापशुभफलदाः। ये विषमाङ्गुलस्था व्रणास्ते पापफलदा अनिष्टफलदाः, ये च समाङ्गुलस्थास्ते शुभफलदाः। तथा च गर्गः—

अङ्गुलानि च पञ्चाशत्प्रधानः खड्ग उच्यते।
तदर्धको निकृष्टः स्यात्तन्मध्ये मध्यमः स्मृतः॥
विषमाङ्गुलसंस्थो यो व्रणः सोऽनिष्टदः स्मृतः।
शुभः समाङ्गुलस्थस्तु मध्यगो मध्यमः स्मृतः॥
त्रिंशद्यावद्विनिर्दिष्टमङ्गुलानां फलं ततः॥
षोडशाङ्गुलगो ज्ञेयो व्रणो मध्यफलप्रदः ॥इति॥

कैश्चिदफला इति कैश्चिन्मुनिभिः पराशरादिभिस्त्रिंशत्परतोऽग्रं यावदफला निष्फला प्रदिष्टा उक्ताः। तथा च पराशरः—

"तेषां प्रमाणानि। जघन्यमङ्गुलानि पञ्चविंशतिः। मध्यमं त्रिंशत्। उत्तमं चत्वारिंशत्। अतो हीनमतिरिक्तं वा न धारयेत्। पूर्णात् प्रत्यङ्गुलान्तरितेषु व्रणेष्वनाकृतिषु यावत्त्रिंशदङ्गुलं तावत्क्रमात् फलनियमः। पुत्रनाशोऽर्थागमोऽर्थनाशोऽर्थसञ्चयो गृहदाहो मित्रलाभो व्याधिभयं सुखाप्तिर्ज्ञातिबन्ध आज्ञाप्राधान्यं विपक्षोत्पत्तिर्वाहनलाभः, शोकः प्रव्रज्यासुतज्ञातिकुलच्छेदो माहात्म्यबललाभ सन्तापः क्लेशः पुत्रलाभो धनागमः शोकः प्रामाण्यमाधिपत्यमुपभोगो भयं दौर्भाग्य मैश्वर्यं राजपूजेति। परतः सर्वमप्रशस्तं विन्द्यात्" ॥इति॥२०॥

अथ गन्धलक्षणमाह—

करवीरोत्पलगजमदघृतकुङ्कुमकुन्दचम्पकसगन्धः।
शुभदोऽनिष्टो गोमूत्रपङ्कमेदःसदृशगन्धः ॥२१॥
कूर्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गन्धः।
वैदूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः ॥२२॥

करवीरं प्रसिद्धम्। उत्पलं नीलोत्पलम्। गजमदं हस्तिमदम्। घृतमाज्यम्। कुङ्कुमं प्रसिद्धम्। कुन्दः पुष्पविशेषः। चम्पकं पुष्पजातिः। एषां सगन्धः सदृशगन्धः खड्गः शुभदः। गोमूत्रं प्रसिद्धम्। पङ्कः कर्दमः। मेदः प्रसिद्धम्, अस्थ्यन्तरगतः स्नेहभागः। एषां सदृशगन्धोऽनिष्टोऽशुभदः खड्गः॥२१॥

कूर्मः प्राणी। वसा मज्जा। असृग्रक्तम्। क्षारं प्रसिद्धम्। एषामुपमः सदृशो गन्धो भयदुःखदो भवति, भयं दुःखं च ददाति। तथा वैदूर्यो मणिविशेषः। कनकं सुवर्णम्। विद्युत्तडित्। एषां सदृशप्रभः तुल्यकान्तिः खड्गो जयारोग्यवृद्धिकरः, जयमारोग्यं वृद्धिं च करोति॥२२॥

अथ शस्त्रपानमाह—

इदमौशनसं च शस्त्रपानं
रुधिरेण श्रियमिच्छतः प्रदीप्ताम्।
हविषा गुणवत्सुताभिलिप्सोः
सलिलेनाक्षयमिच्छतश्च वित्तम्॥२३॥

वडवोष्ट्रकरेणुदुग्धपानं
यदि पापेन समीहतेऽर्थसिद्धिम्।
झषपित्तमृगाश्वबस्तदुग्धैः
करिहस्तच्छिदये सतालगर्भैः॥२४॥

इदं वक्ष्यमाणं शस्त्रपानमौशनसम्, उशनसा शुक्रेणोक्तम्। प्रदीप्तामुत्कृष्टां श्रियं लक्ष्मीमिच्छतः प्रार्थयतो रुधिरेण रक्तेन। गुणवत्सुताभिलिप्सोर्गुणवतः सुतान् पुत्रान् लब्धुमिच्छति यस्तस्य हविषा घृतेन पानम्। अक्षयमपरिमितं वित्तं धनमिच्छतः सलिलेन पानम्॥२३॥

यदि पापेन बधादिना अर्थसिद्धिं समीहते प्रार्थयति, तदा वडवोष्ट्ररेणुदुग्धपानम्, वडवा अश्वतरी, उष्ट्रा करभी, करेणुर्हस्तिनी, आसां दुग्धेन क्षीरेण पानम्। करिणां हस्तिनां हस्तच्छिदये करच्छेदनाय खड्गं य इच्छति तस्य झषपित्तेन मत्स्यपित्तेन। मृगो हरिणः। अश्वस्तुरगः। बस्तश्छागः। एषां दुग्धैः क्षीरैः। तैः किंभूतैः? सतालगर्भैः, सह तालगर्भेण ये वर्तन्ते। तालो वृक्षस्तस्य गर्भो निर्यासः। तथा च पराशरः—

"अथ पायनानि क्षीरपायितमरिबधार्थी धारयेत्। तिलतैलारालाभ्यामर्थार्थी। पुत्रार्थी उदकेन। सर्पिषा श्रीकामः। साहसिकः शोणितेन। हस्त्यश्वोष्ट्रक्षीरैः शिलासारच्छेदकामः। अजाक्षीरेण तालवसया मत्स्यवडवाहरिणपित्तेन

द्विरदस्कन्धच्छेदकामः। नित्यं चैनं धूपपुष्पगन्धोपहारैरर्चयित्वा शिरस्यपशायिनं कुर्यात्। नावमन्येत न चोच्छिष्टः संस्पृशेत्। नादर्शकी कुर्यात्। नानिमित्तं विवृणुयात्। न क्रीडनायास्य मूलं विवृणुयात्" इति ॥२४॥

अन्यत्पानमाह—

आर्कं पयो हुडुविषाणमषीसमेतं
पारावताखुशकृता च युतः प्रलेपः।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥२५॥

आर्कं पयोऽर्कक्षीरम्। हुडुविषाणं मेषशृङ्गः। तस्मान्मषी तया समेतं सहितम्। पारावतः पक्षी। आखुर्मूषिकः। अनयोः शकृता विष्ठया च युतः संयुक्त एष प्रलेपः। शस्त्रस्य तैलमथितस्य खड्गादेस्तिलतैलेन मर्दितस्य एष प्रलेप उपरि देयः। ततस्तत्सहितमग्नौ क्षिप्त्वा तत्र सुतप्तस्य तदपास्य पूर्वोक्तं पानं देयम्। उक्तद्रव्याणां मध्यादेकतमम्, पश्चादनन्तरं शितस्य श्लक्ष्णीकृतस्य शिलासु पाषाणेषु विघातो न भवेत्, तासु न भज्यत इति ॥२५॥

अथान्यत्पानमाह—

क्षारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत्।
सम्यक् शितं चाश्मनि नैति भङ्गं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम्

कदली वृक्षविशेषः प्रसिद्धो रम्भाख्यः। तां दग्ध्वा क्षारं यद्भवति, तस्मिन् क्षारे मथितेन तक्रेण युक्ते सहिते दिनोषिते अहोरात्रमेकीकृत्य स्थापिते यदाऽऽयासं लोहं पायितं दत्तपानं सम्यक् शितं तीक्ष्णीकृतमश्मनि पाषाणे भङ्गं नैति न याति, न च तस्यान्यलोहेष्वपरशस्त्रेष्वपि कौण्ठ्यं कुण्ठत्वं भवति ॥ ६॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ खड्गलक्षणं नामैकोनपञ्चाशत्तमोऽध्यायः ॥४९॥

अतः परं केचिदङ्गविद्यां पठन्ति।

आचार्येण प्रागेवोक्तं [1]वास्तुविद्याङ्गविद्येति । तस्मादस्माभिर्व्याख्यायते।

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह—

दैवज्ञेन शुभाशुभं दिगुदितस्थानाहृतानीक्षता
वाच्यं प्रष्टृनिजापराङ्गघटनां चालोक्य कालं धिया।
सर्वज्ञो हि चराचरात्मकतयाऽसौ सर्वदर्शी विभु-
श्चेष्टाव्याहृतिभिः शुभाशुभफलं सन्दर्शयत्यर्थिनाम् ॥१॥

दैवज्ञेन सांवत्सरिकेण इमानि च वस्तूनि ईक्षता विचारयता प्रष्टुः शुभाशुभफलं वाच्यं वक्तव्यम्। कानीत्याह—दिगाशा पूर्वादिका। उदितं व्याहृतमुक्तं प्रच्छकेन। स्थानं प्रदेशो यत्र स्थितः। आहृतं तत्कालं केनचिद्यत्किञ्चिदानीतम्। एतानीक्षता। तथा प्रष्टृनिजापराङ्गघटनां चालोक्य, प्रष्टुः प्रच्छकस्य निजाङ्गानामात्मीयावयवानामपराङ्गानामन्यावयवानां च घटनां स्थितिं स्पर्शनादिकां कालं च तत्काले दिनगतशेषं च धिया बुद्धया आलोक्य वीक्ष्य वाच्यम्। सर्वज्ञो हीति। यतोऽसौ कालश्चराचरात्मकतया चराणां जन्तूनाम्। अचराणां स्थावराणां स एवात्मा जीवभूतस्तेन चराचरात्मकत्वेन स एव विभुः प्रभुः। सर्वदर्शी सर्वमशेषं पश्यति तच्छीलः। हि यस्मादर्थे। चेष्टाव्याहृतिभिः, चेष्टाः स्पर्शनादिकाः क्रियाः। व्याहृतिर्व्याहरणं सम्भाषणम्। एताभिः शुभाशुभफलं सदसत्फलमर्थिनां पृच्छतां सन्दर्शयति प्रकटयति। तथा च पराशरः—

"इह खलु चराचराणां भूतानां कालोऽन्तरात्मा सर्वदा सर्वदर्शी शुभाशुभैर्यः फलसूचकः स विशेषेण प्राणिनां स्वपराङ्गेषु स्पर्शव्याहारेङ्गितचेष्टादिभिर्निमित्तैः फलमभिदर्शयति। तत्प्रयतो दैवज्ञोऽनुपहतमतिरवधार्य स्वशास्त्रार्थमनुस्मृत्य यशोधर्मानुग्रहार्थमर्थिनां शुभाशुभानामर्थानां भावाभावमभिनिर्दिशेत्" इति।

तत्र देशे दिशः कालं व्याहारं द्रव्यदर्शनम्।
अङ्गप्रत्यङ्गसंस्पर्शं समीक्ष्य फलमादिशेत् ॥ इति ॥१॥

अधुना स्थाननिर्देशार्थमाह —

स्थानं पुष्पसुहासिभूरिफलभृत्सुस्निग्धकृत्तिच्छदा-
सत्पक्षिच्युतशस्तसञ्ज्ञिततरुच्छायोपगूढं समम्।

---

१. द्रष्टव्योऽस्य ग्रन्थस्य ७० पृष्ठे १६ पङ्क्तिः।

देवर्षिद्विजसाधुसिद्धनिलयं सत्पुष्पसस्योक्षितं
सत्स्वादूदकनिर्मलत्वजनिताह्लादं च सच्छाद्वलम् ॥२॥

एवंविधं स्थानं पृच्छायां सच्छुभदमित्यर्थः। कीदृशम्? एवंविधानां तरूणां वृक्षाणां छाययोपगूढं छन्नम्। कीदृशानाम्? पुष्पाणि कुसुमानि तान्येव शोभनो हासो हसनं येषां ते पुष्पसुहासिनः। तथा भूरीणि प्रभूतानि फलानि धारयन्ति ये ते भूरिफलभृतः। तथा सुस्निग्धा कृत्तिस्त्वक् छदाः पर्णानि च येषां ते सुस्निग्ध-कृत्तिच्छदाः। तथाऽसत्पक्षिभिरनिष्टविहगैः काकोलूकादिभिश्च्युता रहितास्तथा शस्त्रसंज्ञिताः प्रशस्तनामानो ये च पलाशपिप्पलन्यग्रोधप्रभृतयस्तेषाम्। समं निम्नोन्नतत्वरहितम्। देवाः सुराः। ऋषयो मुनयः। द्विजा ब्राह्मणाः। साधवः सज्जनाः। सिद्धा देवयोनयः। एषां निलयं स्थानम्। तथा सत्पुष्पैः सुगन्धकुसुमैः सस्यैश्च धान्यादिभिरुक्षितं अन्तःसेचितं तच्छुभम्। तथा स्वादूदकनिर्मलत्वजनि-ताह्लादं च। स्वादु मृष्टं यदुदकं जलं निर्मलं प्रसन्नं तद्भावेन जनितमुत्पादित-माह्लादं चित्तसुखं येन तथाभूतेनोदकेन युक्तं सच्छाद्वलं शोभन-दूर्वासंयुक्तं च सदिति। तथा च पराशरः—

"अथ पुष्पितफलितहरितस्निग्धत्वक्पत्रप्रशस्तनामाङ्कितसौम्यद्विज-निषेवितततरुच्छायोपगूढे सस्यकुसुमहरितमृदुशाद्वलसक्तमृष्टहृद्यप्रसन्नसलिलावकाशे देवर्षिसिद्धसाधुद्विजावासे प्राङ्मुखोत्तरोत्तरपूर्वाभिमुखो वा यः पृच्छेत्तस्य प्रार्थिता-र्थोपपत्तिमभिनिर्दिशेत्" इति ॥२॥

अथाशुभस्थानप्रदर्शनार्थमाह—

छिन्नभिन्नकृमिखातकण्टकिप्लुष्टरूक्षकुटिलैर्न सत्कुजैः।
क्रूरपक्षियुतनिन्द्यनामभिः शुष्कशीर्णबहुपर्णचर्मभिः ॥३॥

एवंविधैः कुजैवृक्षैर्युक्ते स्थाने न सद् न शुभं प्रष्टुर्वदेत्? कीदृशैः? छिन्नैः कल्पितैः। भिन्नैः स्फटितैः। कृमिखातैः कीटभक्षितैः। सकण्टकिभिः सकण्टकैः। प्लुष्टैर्दग्धैः। रूक्षैरस्निग्धैः। कुटिलैरस्पष्टैः। न शोभनम्। कौ भूमौ जायन्त इति कुजाः। तथा क्रूरैरनिष्टैः पक्षिभिर्विहगैः काकगृध्रबकाद्यैर्युक्तैः। निन्द्यनामभिः कुत्सितसंज्ञैर्विभीतकवेतसप्रभृतिभिः। शुष्कैर्नीरसैः। तथा शीर्णानि च्युतानि बहूनि प्रभूतानि पर्णानि पत्राणि चर्माणि त्वचो येषां तैः ॥३॥

तथान्यदप्याह —

श्मशानशून्यायतनं चतुष्पथं
तथाऽमनोज्ञं विषमं सदोषरम्।

अवस्कराङ्गारकपालभस्मभि-
श्चितं तुषैः शुष्कतृणैर्न शोभनम् ॥४॥

एवंविधं स्थानं पृच्छायां न शोभनं न शुभदम्। कीदृशम्? श्मशानं शवशयनप्रदेशम्। शून्यायतनं उद्वसितदेवगृहम्। चतुष्पथं चत्वारः पन्थानो यत्र। तथा अमनोज्ञमचित्ताह्लादकम्। विषमं निम्नोन्नतम्। सदा सर्वकालमूषरं सिकतासंयुक्तम्। अवस्करैर्गृहच्युतैरशुचिभिरनुपयोग्यैर्भाण्डैश्चितं व्याप्तम्। तथा अङ्गारैर्दग्धकाष्ठैः कपालैरस्थिशकलैर्भस्मना च चितं संयुक्तम्। तथा तुषैः शालिचर्मभिः शुष्कैर्नीरसैस्तृणैश्च चितं न शोभनमिति ॥४॥

अन्यदप्याह—

प्रव्रजितनग्ननापितरिपुबन्धनसौनिकैस्तथा श्वपचैः।
कितवयतिपीडितैर्युतमायुधमाध्वीकविक्रयैर्न शुभम् ॥५॥

एवंविधं स्थानं पृच्छायां न शुभम्। कीदृशम्? प्रव्रजितस्तापसो लिङ्गी। नग्नो विवस्त्रः। नापितः प्रसिद्धः शिल्पी। रिपुः शत्रुः। बन्धनं बन्धनशाला। सौनिकः पशुघातकः। एतैर्युक्तं यत्स्थानम्। तथा श्वपचैः प्रसिद्धैः। कितवो द्यूतकरः। यतिस्त्रिदण्डी। पीडितो व्याध्यर्दितः। एतैर्युतं यत्स्थानम्। तथा आयुधशाला यत्र। माध्वीकं मधु तच्छाला यत्र। विक्रयशाला यत्राऽऽकल्प-पालगृहसमीपमेतैर्न शुभमिति ॥५॥

अथ दिक्काललक्षणमाह—

प्रागुत्तरेशाश्च दिशः प्रशस्ताः
प्रष्टुर्न वाय्वम्बुयमाग्निरक्षः।
पूर्वाह्णकालेऽस्ति शुभं न रात्रौ
सन्ध्याद्वये प्रश्नकृतोऽपराह्णे ॥६॥

दिश आशाः। प्रागुत्तरेशाः, पूर्वा उत्तरा ऐशानी, इन्द्रकुबेरशिव-दिशः। पृच्छायां प्रशस्ताः शुभाः। प्रष्टुः प्रच्छकस्य तदभिमुखः शुभ इत्यर्थः। न वाय्वम्बुयमाग्निरक्षः, वायवीवारुणदक्षिणाग्नेयीनैर्ऋताश्च न शुभाः। एता दिशः प्रष्टुः पूर्वाह्णकाले दिनस्य प्राग्भागसमये प्रश्नकृतः प्रच्छकस्य शुभं शोभनफलमस्ति विद्यते। रात्रौ निशि सन्ध्याद्वये सायं प्रातरपराह्णे च न शोभनमिति। तथा च पराशरः—

"छिन्नभिन्नशुष्करूक्षवक्रजन्तुजग्धदग्धकण्टकिक्रव्यादद्विजनिषेविताप्रशस्तनामाङ्कितपादपच्छाये श्मशानशून्यायतनचत्वरोषररिपुनापितायुधमद्यविक्रयशालासु नैर्ऋताग्नेययाम्यवारुणवायव्याशाभिमुखः प्रचोदयेत्तस्येष्टमर्थमनर्थाय विन्द्यात्" इति।

अपि च—

वेलाः सर्वाः प्रशस्यन्ते पूर्वाह्णे परिपृच्छताम्।
सन्ध्ययोरपराह्णे तु क्षपायां तु विगर्हिताः॥इति॥६॥

अथान्यच्छुभाशुभलक्षणमाह—

यात्राविधाने हि शुभाशुभं यत्
प्रोक्तं निमित्तं तदिहापि वाच्यम्।
दृष्ट्वा पुरो वा जनताहृतं वा
प्रष्टुः स्थितं पाणितलेऽथ वस्त्रे॥७॥

यात्राविधाने यच्छुभाशुभं कथितं प्रोक्तम्—"[1]सिद्धार्थकादर्शपयोऽञ्जनानि" इति शुभदम्। "कार्पासौषधकृष्णधान्यम्" इत्यशुभदम्। तथा तत्र शाकुनं यन्निमितं प्रोक्तं तदिहापि प्रश्नसमये वाच्यं वक्तव्यम्। पुरोऽग्रतो वा दृष्ट्वाऽवलोक्य जनतया जनसमूहेन वा आहृतमानीतं प्रष्टुः प्रच्छकस्य पाणितले हस्ते वस्त्रे वा स्थितं दृष्ट्वा शुभमादिशेत्। तथा च पराशरः—

यात्राविधाने निर्दिष्टं निमित्तं यच्छुभाशुभम्।
तदेव दृष्ट्वा दैवज्ञो वाञ्छासिद्धिं विनिर्दिशेत्॥ इति॥७॥

अधुना अङ्गानि पुंसंज्ञकान्याह—

अथाङ्गान्यूर्वोष्ठस्तनवृषणपादं च दशना
भुजौ हस्तौ गण्डौ कचगलनखाङ्गुष्ठमपि यत्।
सशङ्खं कक्षांसं श्रवणगुदसन्धीति पुरुषे

अथानन्तरं पुंसञ्ज्ञकान्यङ्गानि भवन्ति। ऊरू। ओष्ठौ दन्तच्छदौ। स्तनौ प्रसिद्धौ। वृषणौ मुष्कौ। पादौ चरणौ। दशना दन्ताः। भुजौ बाहू। हस्तौ करौ। गण्डौ मुखकपोलौ। कचाः केशाः। गलं कण्ठम्। नखाः कररुहाः। अङ्गुष्ठौ हस्तपादाङ्गुष्ठौ। सशङ्खं कक्षांसम्, सह शङ्खाभ्यां वर्तते यत्कक्षांसम्। शङ्खौ प्रसिद्धौ। कक्षौ बाहुमूलतलौ। अंसौ स्कन्धौ। श्रवणौ कर्णौ। गुदं पायुस्थानम्।

---

१. द्रष्टव्याऽस्य ग्रन्थस्य ४४८ पृष्ठे ५ पङ्क्तिः। तंत्र "दर्शमयो" पाठो न साधुरिति।

सन्धिग्रहणेन सर्वाङ्गसन्धय उच्यन्ते। इत्येवं प्रकाराः सर्व एव पुरुषे पुंसि ज्ञेयाः। तथा च पराशरः--

"अङ्गानि मुष्कस्तनपादोरुगुह्यभुजहस्तसमस्तकर्णांसशङ्खदन्तौष्ठाङ्गुष्ठनखगलगण्डकेशसन्धयः पुरुषाख्यानि" इति॥

अथ स्त्रीसंज्ञकान्याह—

स्त्रियां भ्रूनासास्फिग्वलिकटिसुलेखाङ्गुलिचयम् ॥८॥
जिह्वा ग्रीवा पिण्डिके पार्ष्णियुग्मं
जङ्घे नाभिः कर्णपाली कृकाटी।

एतान्यङ्गानि स्त्रियो भवन्ति। भ्रूः प्रसिद्धा। नासा घ्राणम्। स्फिजौ प्रसिद्धौ। वली लेखा यथा त्रिवली। कटिः प्रसिद्धा। सुलेखा शोभनलेखा करमध्यस्था। अङ्गुलिचयोऽङ्गुलिसमूहः। जिह्वा रसना। ग्रीवा शिरोधरा। पिण्डिके जङ्घयोः पश्चिमभागौ। पार्ष्णियुग्मं प्रसिद्धम्। जङ्घे प्रसिद्धे। नाभिस्तुन्दिः। कर्णपाली प्रसिद्धा। कृकाटी ग्रीवापश्चिमभागः। एतानि स्त्रीसंज्ञानि। तथा च पराशरः—

"भ्रुवौ नासाग्रीवावलयोऽङ्गुलयो लेखा श्रोणिनाभी रसना जङ्घे पिण्डिके पालिस्फिजौ पार्ष्णिः कृकाटिकेति स्त्रीसञ्ज्ञानि" इति।

अथ नपुंसकाख्यान्याह—

वक्त्रं पृष्ठं जत्रुजान्वस्थिपार्श्वं
हृत्तालक्षी मेहनोरस्त्रिकं च॥९॥

नपुंसकाख्यं च शिरो ललाटमाश्वाद्यसंज्ञैरपरैश्चिरेण।
सिद्धिर्भवेज्जातु नपुंसकैर्नो रूक्षक्षतैर्भग्नकृशैश्च पूर्वैः॥१०॥

एतानि नपुंसकाख्यानि। वक्त्रं मुखम्। पृष्ठं शरीरपश्चिमभागः। जत्रुरुरःकक्षयोः सन्धिः। जानुनी प्रसिद्धे। अस्थीनि प्रसिद्धानि। पार्श्वे प्रसिद्धे। हृद्धृदयम्। तालुरास्यपृष्ठभागम्। अक्षिणी नेत्रे। मेहनं लिङ्गम्। उरो वक्षः। त्रिकं कटिपश्चिमभागो वलिप्रदेशाः॥९॥

शिरो मूर्धा। ललाटं मुखपृष्ठम्। एतत्सर्वं नपुंसकाख्यं स्याद्भवेदिति। तथा च पराशरः—

"शिरोललाटमुखचिबुकपृष्ठजठरजत्रुजान्वस्थिपार्श्वहृदयकर्णपीठाक्षिमेहनोरस्त्रिकतालिवति नपुंसकाख्यानि" इति।

आश्वाद्यसंज्ञैरिति। आद्यसंज्ञैः प्रथमोक्तैः पुन्नामभिः स्पृष्टैराशु क्षिप्रमेव सिद्धिः स्याद् भवेत्। अपरैस्तदनन्तरोक्तैः स्त्रीनामभिः। चिरेण सिद्धिर्भवेत्। नपुंसकैः स्पृष्टैर्नो जातु न कदाचिदपि सिद्धिः स्यात्।

रूक्षक्षतैरिति। नेत्यनुवर्तते। पूर्वैः पुन्नामभिः स्त्रीनामभिर्वा रूक्षैरस्निग्धैः। क्षतैः सम्प्रहारैः। भग्नैः स्फुटितैः। कृशैरल्पमांसैः। न जातु न कदाचिदपि सिद्धिर्भवेदिति। तथा च पराशरः—

"तत्र पुन्नाम स्निग्धमुचितमनुपहतमक्षतमरोगमङ्गं स्पृष्टं दिग्देशकालव्याहारेष्टदर्शनैरुपपन्नं प्रष्टुः पृच्छार्थं सकलफलमभिनिवर्तयति। स्त्रीसञ्ज्ञमपि पूर्वोक्तलक्षणयुक्तं यत्नात् कालान्तरेण सफलम्। नपुंसकाख्यमकार्यसिद्धिमनर्थानां वाऽऽगमनं कुर्यात्" इति।

अपि च—

पुंसंज्ञेष्वाशु सिद्धिः स्यात् स्त्रीसंज्ञेषु चिराद्भवेत्।
अशुभं त्वेव निर्दिष्टं नपुंसकसनामसु॥
पुरुषाख्ये नु संस्पृष्टे बाह्ये रूक्षेऽबले क्षते।
नार्थसिद्धिमतो ब्रूयादङ्गविद्याविशारदः॥ इति॥१०॥

अथ पृथक् पृथक् फलनिर्देशार्थमाह—

स्पृष्टे वा चालिते वापि पादाङ्गुष्ठेऽक्षिरुग्भवेत्।
अङ्गुल्यां दुहितुः शोकं शिरोघाते नृपाद् भयम्॥११॥

तत्र पृच्छायां पादाङ्गुष्ठे स्पृष्टे चालिते वा प्रष्टुरक्षिरुग् नेत्रपीडा भवेत् स्यादिति वदेत्। अङ्गुल्यां स्पृष्टायां दुहितृशोकं वदेत्। शिरोघाते शिरोऽभिहन्यमानं पृच्छेत्तदा नृपाद्राजतो भयमिति। तथा च पराशरः—

"अथ पृथक् पृथक् फलनिर्देशः। तत्र पादाङ्गुष्ठे प्रचलयन् स्पृष्ट्वा वा पृच्छेत् प्रष्टुश्चक्षुरोगं विनिर्दिशेत्। अङ्गुलिं स्पृष्ट्वा दुहितृशोकं शिरोऽभिहन्यमानं राजतो भयम्" इति॥११॥

अन्यदप्याह—

विप्रयोगमुरसि स्वगात्रतः कर्पटाहृतिरनर्थदा भवेत्।
स्यात् प्रियाप्तिरभिगृह्य कर्पटं पृच्छतश्चरणपादयोजितुः॥१२॥

उरसि वक्षसि स्पृष्टे प्रष्टुः केनचित् सह विप्रयोगं वदेत्। स्वगात्रत आत्मीयशरीरात् कर्पटाहृतिः वस्त्रत्यागः, अनर्थदा अनिष्टदा भवेत् स्यात्। कर्पटं वसनमभिगृह्य प्राप्य चरणं पादं द्वितीयचरणे योजयति तस्य पृच्छतः प्रष्टुः प्रियाप्तिः प्रियलाभः स्याद्भवेत्। तथा च पराशरः—

उरः स्पृष्ट्वा विप्रयोगं स्वगात्राद्वस्त्रमुत्सृजेत्।
तस्यानर्थागमं पादं पादेन संस्पृशेत् पटम्॥
तमभिगृह्य वा पृच्छेद्विन्द्यात् प्रियसमागमम्। इति॥१२॥

अन्यदप्याह—

पादाङ्गुष्ठेन विलिखेद् भूमिं क्षेत्रोत्थचिन्तया।
हस्तेन पादौ कण्डूयेत्तस्य दासीमयी च सा॥१३॥

प्रष्टा क्षेत्रोत्थचिन्तया पादाङ्गुष्ठेन भूमिमवनिं विलिखेत्। हस्तेन करेण पादौ चरणौ कण्डूयेत्तदा चित्तस्य सा च चिन्ता दासीमयी दासीकृता। तथा च पराशरः—

अङ्गुष्ठेन लिखेद् भूमिं क्षेत्रचिन्तां विचिन्तयेत्।
हस्तेन पादौ कण्डूयेत् कुर्याद्दासीकृतां स ताम्॥ इति॥१३॥

अन्यदप्याह—

तालभूर्जपटदर्शनेऽंशुकं चिन्तयेत् कचतुषास्थिभस्मगम्।
व्याधिराश्रयति रज्जुजालकं वल्कलं च समवेक्ष्य बन्धनम्॥१४॥

तालवृक्षपत्रदर्शने भूर्जपटदर्शने वा प्रष्टा अंशुकं वस्त्रं चिन्तयेत्। कचतुषास्थिभस्मगं व्याधिराश्रयति। कचाः केशाः। तुषं शालिचर्म। अस्थि प्रसिद्धम्। भस्म प्रसिद्धमेव। एषामन्यतम उपगतं प्रष्टारं व्याधिः पीडा। आश्रयति आवृणोति। रज्जुः प्रसिद्धा। जालकं यत्र पक्षिणो बध्यन्ते। वल्कलं त्वक्। एषामन्यतमे स्थितं तं वा समवेक्ष्यावलोक्य गृहीत्वा वा पृच्छेत् तदा बन्धनं वदेत्। तथा च पराशरः—

तालभूर्जपत्रदर्शने वस्त्रार्थं केशास्थिभस्मान्याक्रम्य व्याधिभयं ब्रूयात्।
निगडजालरज्ज्वाश्रित्य वल्कलान्यधिष्ठाय दर्शने वा बन्धनभयम्॥ इति॥१४॥

अन्यदप्याह—

पिप्पलीमरिचशुण्ठिवारिदैः रोध्रकुष्ठवसनाम्बुजीरकैः।
गन्धमांसिशतपुष्पया वदेत् पृच्छतस्तगरकेण चिन्तयेत्॥१५॥
स्त्रीपुरुषदोषपीडितसर्वार्थसुतार्थधान्यतनयानाम्।
द्विचतुष्पदक्षितीनां विनाशतः कीर्तितैर्दृष्टैः॥१६॥

पिप्पल्यादिदर्शने स्त्र्यधिकृतां चिन्तां क्रमशो वदेत्। तत्र पिप्पलीदर्शने या स्त्री दोषसंयुता सदोषा दुष्टा तत्कृतां चिन्तां प्रवदेत्। मरिचदर्शने पुरुषस्य

अन्यदप्याह—

तापसे शौण्डिके दृष्टे प्रोषितं पशुपालनम्।
हृद्गतं प्रच्छकस्य स्यादुञ्छवृत्तौ विपन्नता॥२२॥

तापसे दृष्टेऽवलोकिते प्रच्छकस्य प्रष्टुर्हृद्गतं चित्तस्थम्। प्रोषितः प्रवासी यः कश्चित् स्थितः। तं प्रवासिनम्। शौण्डिके मद्यासक्ते दृष्टे पशुपालनं चित्तस्थम्। उञ्छवृत्तौ शिलोञ्छवृत्तौ दृष्टे विपन्नतार्था चिन्ता। तथा च पराशरः—

"निर्ग्रन्थिदर्शने दासीपृच्छा। वृद्धश्रावकदर्शने मित्रद्यूतकृता वा। शाक्यस्य चौरकृता परिव्राजकस्य नृपसूतिकागणिकार्था वा। उपाध्यायस्य चमूपतिकृता। नैगमस्य श्रेष्ठिकृता। नैमित्तिकस्य योधार्था। अर्हतो वाणिजिकार्था। उञ्छवृत्तिनो विपन्नार्था। तापसस्य प्रोषितार्था। शौण्डिकस्य पशुपालनार्था। कैवर्तस्य वध्यघातकृता" इति॥२२॥

अन्यदप्याह—

इच्छामि प्रष्टुं भण पश्यत्वार्यः समादिशेत्युक्ते।
संयोगकुटुम्बोत्था लाभैश्वर्योद्गता चिन्ता॥२३॥

इच्छामीत्याद्युक्ते यथासङ्ख्यं संयोगादिकृता चिन्ता ज्ञेया। इच्छामि प्रष्टुमिति भणेति उक्ते संयोगकुटुम्बकृतां चिन्तां वदेत्। पश्यत्वार्य इत्युक्ते लाभोद्गतां लाभार्थकृतां चिन्तां समादिशेत्। समादिशेत्युक्ते ऐश्वर्योद्गतां चिन्तामिति॥२३॥

अन्यदप्याह—

निर्दिशेति गदिते जयाध्वजा
प्रत्यवेक्ष्य मम चिन्तितं वद।
आशु सर्वजनमध्यगं त्वया
दृश्यतामिति च बन्धुचौरजा॥२४॥

निर्दिशेति गदिते उक्ते पृच्छा जयाध्वजा। जयार्थं जाता कृता। अध्वजा वा। प्रत्यवेक्ष्य वेति विचार्य मम चिन्तितं हृद्गतं वदेत्युक्ते बन्धुकृता। सर्वजनमध्यगं प्रष्टारमेवं वक्ति। आशु क्षिप्रमेव त्वया च दृश्यतामिति चौरजा तस्करकृता चिन्ता। तथा च पराशरः—

"आदिशार्येत्येवं पृच्छेदैश्वर्यचिन्ताम्। भणेत्युक्ते कुटुम्बकृताम्। इच्छामि प्रष्टुमिति संयोगकृताम्। पश्यत्वार्य इति लाभकृताम्। निर्दिशेत्यध्वकृताम्।

जयपृच्छां वा। पृच्छामि तावदाचार्येति वा सम्यक् मां प्रत्यवेक्षस्वेति बन्धुकृताम्। अथ काले निःश्वसनान्तः सहसा बहुजनमध्यगतं दृश्यतामिति पृच्छेदिति चौरचिन्तां जानीयात्" इति ॥२४॥

अथ चौरविज्ञानमाह—

अन्तःस्थेऽङ्गे स्वजन उदितो बाह्यजे बाह्य एव
पादाङ्गुष्ठाङ्गुलिकलनया दासदासीजनः स्यात्।
जङ्घे प्रेष्यो भवति भगिनी नाभितो हृत्स्वभार्या
पाण्यङ्गुष्ठाङ्गुलिचयकृतस्पर्शने पुत्रकन्ये ॥२५॥

अन्तःस्थे अभ्यन्तरस्थितेऽङ्गे अवयवे स्पृष्टे पृच्छायां चौरः स्वजन आत्मीय एव उदित उक्तः। बाह्यजेऽङ्गे स्पृष्टे बाह्य एवोदितश्चौरः। पादाङ्गुष्ठाङ्गुलिकलनया पादाङ्गुष्ठे स्पृष्टे दासश्चौरः। अङ्गुलीषु पादस्थास्वेव स्पृष्टासु शदासीजनः स्याद्ब्रवेत्। जङ्घस्पर्शने प्रेष्यः कर्मकरो भवति। नाभितो भगिनी। हृदि स्वभार्या आत्मीया जाया। पाणिर्हस्तः। तदङ्गुष्ठस्पर्शने पुत्रः। अङ्गुलिचयस्पर्शने कन्या आत्मीया तनया चौरी। एवं कृतस्पर्शने चौरज्ञानम् ॥२५॥

अन्यदप्याह—

मातरं जठरे मूर्ध्नि गुरुं दक्षिणवामकौ।
बाहू भ्राताऽथ तत्पत्नी स्पृष्ट्वैवं चौरमादिशेत् ॥२६॥

जठरे उदरे स्पृष्टे मातरं स्वजननीं चौरीम्। मूर्ध्नि शिरसि स्पृष्टे गुरुम्। दक्षिणवामकौ बाहू तत्स्पर्शने यथासङ्ख्यं भ्राता तत्पत्नी। दक्षिणबाहुस्पर्शने। भ्राता वामे तत्पत्नी। एवमङ्गस्पर्शने चौरं तस्करमादिशेद्वदेत्। तथा च पराशरः—

"बाह्याङ्गस्पर्शने बाह्यचौरम्। अन्तः स्वकृतम्। तत्र पादाङ्गुष्ठे दासम्। अङ्गुलीषु दासीम्। जङ्घयोः प्रेष्यम्। जठरे मातरम्। हस्ताङ्गुलिषु दुहितरम्। अङ्गुष्ठे सुतम्। नाभ्यां भगिनीम्। गुरुं शिरसि। हृदि भार्याम्। दक्षिणबाहौ भ्रातरम्। वामे भ्रातृभार्याम्" इति ॥२६॥

अथापहृतस्य लाभज्ञानमाह—

अन्तरङ्गमवमुच्य बाह्यग-
स्पर्शनं यदि करोति पृच्छकः।
श्लेष्ममूत्रशकृतस्त्यजत्यथो
पातयेत् करतलस्थवस्तु चेत् ॥२७॥

भृशमवनामिताङ्गपरिमोटनतोऽप्यथवा
जनधृतरिक्तभाण्डमवलोक्य च चौरजनम्।
हृतपतितक्षतास्मृतविनष्टविभग्नगतो-
न्मुषितमृताद्यनिष्टरवतो लभते न हृतम् ॥२८॥

एवंविधैर्निमित्तैः प्रष्टा हृतं न लभते। कैरित्याह—अन्तरङ्गमभ्यन्तरस्थितमवयवमवमुच्य परित्यज्य बाह्यगावयवस्पर्शनं यदि पृच्छकः करोति, अथवा श्लेष्ममूत्रशकृतस्त्यजति तत्कालं परित्यजति, अथवा करतलस्थं पाणितले स्थितं यत्किञ्चिद्वस्तु पातयेत् ॥२७॥

अथवा भृशमत्यर्थमवनामिताङ्ग अवनामितावयवाङ्गानामेव परिमोटनं चटचटाशब्दमुत्पादयति। तथा तत्कालं जनधृतं लोकगृहीतं रिक्तभाण्डमवलोक्य दृष्ट्वा। तथा चौरजनं तस्करजनमवलोक्य, अथवा हृतः पतितः क्षतः-अस्मृतो विनष्टो विभग्नो गत उन्मुषितो मृतः। एषामनिष्टरवतः शब्दश्रवणात्। आदिग्रहणात् कष्टदुष्टानिष्टशीर्णशब्दश्रवणाद् हृतं प्रहृतं न लभत इति। तथा च पराशरः—

"अभ्यन्तरगं स्पृष्ट्वा बाह्यं स्पृशेन्निर्हरणं वा श्लेष्मपुरीषमूत्रत्यागं कुर्याद्वस्ताद्वा किञ्चित् पातयेत्। गात्राणि वा स्फोटयेत्। क्षतहृतपतितमुषितविस्मृतनष्टकष्टदुष्टानिष्टभग्नगतजीर्णशब्दप्रादुर्भावो वा स्यात्। रिक्तभाण्डतस्कराणां दर्शने न प्रष्टा लाभं विन्द्यात्" इति ॥२८॥

अथ पीडार्तानां मरणज्ञानमाह—

निगदितमिदं यत्तत्सर्वं तुषास्थिविषादिकैः
सह मृतिकरं पीडार्तानां समं रुदितक्षतैः।

अन्तरङ्गमवमुच्येति आरभ्य यदिदं नष्टचिन्तायां निगदितमुक्तम्। तत्सर्वं तुषास्थिविषादिकैः सह साकं तथा रुदितक्षतैः सह समं पीडार्तानां रोगिणां मृतिकरं मरणं करोति। आदिग्रहणाच्छिन्नमृतिजग्धपाटितशब्दैरिति। तथा च पराशरः—

"अथ रोगाभिघातच्छर्दमूत्रपुरीषोत्सर्गे केशास्थिभस्मतुषविषादीनामशुभानां दर्शने तथा छिन्नभिन्नव्यापन्नहृतमृतावक्षतजग्धदग्धबद्धपाटितरुदितशब्दश्रवणे वा रोगिणां मरणमादिशेत्" इति।

अथ भोजनज्ञानमाह—

अवयवमपि स्पृष्ट्वाऽन्तःस्थं दृढं मरुदाहरे-
दतिबहु तदा भुक्त्वाऽन्नं संस्थितः सुहितो वदेत् ॥२९॥

अन्तःस्थमभ्यन्तरस्थितमवयवं स्पृष्ट्वा मरुद्वायुमाहरेदुद्गिरन् पृच्छेत्तदा प्रच्छकोऽतिबहु अतिप्रभूतमन्नं भुक्त्वा सुहितोऽग्नितृप्तः स्थित इति वदेत् ॥२९॥

अन्यदप्याह—

ललाटस्पर्शनाच्छूकदर्शनाच्छालिजौदनम् ।
उरःस्पर्शात् षष्टिकाख्यं ग्रीवास्पर्शे च यावकम् ॥३०॥

ललाटस्पर्शनात् शूकधान्यानां वा दर्शनाच्छालिजौदनं प्रच्छकेन भुक्तमिति वदेत् । उरःस्पर्शात् षष्टिकाख्यं धान्यविशेषान्नं ग्रीवास्पर्शे च ग्रावकं यवान्नम् ॥३०॥

अन्यदप्याह—

कुक्षिकुचजठरजानुस्पर्शे माषाः पयस्तिलयवाग्वः ।
आस्वादयते चोष्ठौ लिहते मधुरं रसं ज्ञेयम् ॥३१॥

कुक्षिस्पर्शने माषा मुक्ताः। कुचौ स्तनौ। तत्स्पर्शने पयः क्षीरौदनम्। जठरमुदरम्। तत्स्पर्शने तिलौदनम्। जानुस्पर्शने यवागूः यावकम्। ओष्ठावास्वादयते लिहते वा प्रष्टा पृच्छति तदा तेन मधुरं रसं भुक्तमिति ज्ञेयम् ॥३१॥

अन्यदप्याह—

विसृक्के स्फोटयेज्जिह्वामाम्ले वक्त्रं विकूणयेत् ।
कटुकेऽथ कषायेऽथ हिक्केत् ष्ठीवेच्च सैन्धवे ॥३२॥

जिह्वां रसनां विसृक्के स्फोटयेत् प्रष्टा तदा तेनाम्लं भुक्तम्। वक्त्रं मुखं विकूणयेत् कटुके भुक्ते । असौ प्रच्छकः कषाये भुक्ते हिक्केत्। सैन्धवे लवणे भुक्ते ष्ठीवेत् ॥३२॥

अन्यदप्याह—

श्लेष्मत्यागे शुष्कतिक्तं तदल्पं
श्रुत्वा क्रव्यादं वा प्रेक्ष्य वा मांसमिश्रम् ।
भ्रूगण्डौष्ठस्पर्शने शाकुनं त-
द्दुक्तं तेनेत्युक्तमेतन्निमित्तम् ॥३३॥

श्लेष्मपरित्यक्ते शुष्कं नीरसं तिक्तं तदल्पं स्तोकं च भुक्तम्। क्रव्यादं मांसाशिनं प्राणिनं श्रुत्वा प्रेक्ष्य दृष्ट्वा तन्मांसमिश्रं भुक्तम्। भ्रूगण्डौष्ठस्पर्शने शाकुनं मांसम्। तेन प्रष्ट्रा तद्भुक्तम्। इत्युक्तमेतत्कथितं निमित्तं चिह्नम् ॥३३॥

अन्यदप्याह—

मूर्धगलकेशहनुशङ्खकर्णजङ्घं वस्तिं च स्पृष्ट्वा।
गजमहिषमेषशूकरगोशशमृगमहिषमांसयुग्भुक्तम् ॥३४॥

मूर्धादिस्पर्शने यथाक्रमं गजादिमांसं भुक्तं वक्तव्यम्। मूर्धा शिरस्तत्स्पर्शने गजमांसं कौञ्जरम्। गलस्पर्शने माहिषम्। केशस्पर्शने मेषमांसमौरभ्रम्। हनुस्पर्शने शूकरमांसम्। शङ्खस्पर्शने गोमांसम्। कर्णस्पर्शने शशमांसम्। जङ्घास्पर्शने मृगमांसम्। वस्तिस्पर्शने महिषमांसयुतमेव भुक्तम् ॥३४॥

अन्यदप्याह—

दृष्टे श्रुतेऽप्यशकुने गोधामत्स्यामिषं वदेद्भुक्तम्।
गर्भिण्या गर्भस्य च निपतनमेवं प्रकल्पयेत् प्रश्ने ॥३५॥

अशकुने दृष्टे अवलोकिते वा दुर्निमित्ते गोधामिषं मत्स्यामिषं वा भुक्तं वदेद् ब्रूयात्। एवमेव गर्भपृच्छायामशकुने दुर्निमित्ते श्रुते दृष्टे वा गर्भिण्याः स्त्रियो गर्भनिपतनं प्रकल्पयेद् निर्दिशेदिति। तथा च पराशरः—

"अथ स्निग्धं दृढमभ्यन्तराङ्गं स्पृष्ट्वोद्गिरन् पृच्छेद् भुक्तमन्नं विन्द्यात्। तत्र ललाटस्पर्शे शूकानां वा शाल्योदनम्। उरसि संस्पृष्टे षष्टिकौदनम्। ग्रीवायां यवान्नम्। जठरे तिलौदनम्। कुक्षौ माषौदनम्। स्तनयोः क्षीरौदनम् जानुनोर्यावकम्। स्वादयेदोष्ठौ वा परिलिहेत मधुरम्। आविसृक्के जिह्वामपि स्फोटयेदाम्लम्। विकूणयेत् कटुकम्। हिक्केत् कषायम्। निष्ठीवेत्तिक्तम्। शुष्कमल्पं श्लेष्माणमुत्सृजेदतिलवणम्। क्रव्यादानां दर्शने मांसप्रायम्। तत्र भ्रूगण्डजिह्वौष्ठसंस्पर्शने शाकुनम्। हन्वोर्वाराहम्। कर्णयोः पार्षदम्। जङ्घयोर्मार्गम्। केशनामौरभ्रम्। शङ्खयोर्गव्यम्। वस्तिगलयोर्माहिषम्। मूर्ध्नि कौञ्जरम्। पाटितच्छिन्नभिन्नानां स्पर्शने श्रवणे गोधामत्स्यमांसम्" इति ॥३५॥

अथ गर्भिण्या जन्मज्ञानमाह—

पुंस्त्रीनपुंसकाख्ये दृष्टेऽनुमिते पुरःस्थिते स्पृष्टे।
तज्जन्म भवति पानान्नपुष्पफलदर्शने च शुभम् ॥३६॥

गर्भस्थायां स्त्रियां किं जनयिष्यतीति पृच्छायां पुरुषे दृष्टेऽवलोकितेऽनुमिते वा चिन्तिते पुरोऽग्रतः स्थिते वा स्पृष्टे वा तस्मिंस्तज्जन्म पुंसो जन्म भवति। एवं स्त्रियां दृष्टायामनुमितायां वा पुरतः स्थितायां वा पृष्टायां स्त्रीजन्म भवति। नपुंसकाख्ये दृष्टेऽनुमिते वा पुरतःस्थिते स्पृष्टे वा नपुंसकजन्म भवति। पानान्नपुष्पफलदर्शने च शुभमिति। पानस्याऽऽसवस्य अन्नस्य भोजनादेः पुष्पाणां कुसुमानां फलानां च दर्शने शुभं जन्म सुखप्रसवो भवतीत्यर्थः ॥३६॥

अन्यदप्याह—

अङ्गुष्ठेन भ्रूदरं वाङ्गुलिं वा
स्पृष्ट्वा पृच्छेद् गर्भचिन्ता तदा स्यात्।
मध्वाज्याद्यैर्हेमरत्नप्रवालै-
रग्रस्थैर्वा मातृधात्र्यात्मजैश्च ॥३७॥

स्त्री स्वाङ्गुष्ठेन भ्रूयुगमुदरमङ्गुलिं वा स्पृष्ट्वा पृच्छेत्तदा गर्भः स्याद्वेत्। अथवा अग्रस्थैः पुरोऽवस्थितैः। मध्वाज्याद्यैः। मधु माक्षिकम्। आज्यं घृतम्। आदिग्रहणात् पुंनामभिः शोभनफलैश्च तथा हेमरत्नप्रवालैः हेम सुवर्णम्, रत्नानि मणयः, प्रवालं विद्रुमम्। तथा मातृधात्र्यात्मजैश्च माता जननी, धात्री स्तनदायिनी, आत्मजः पुत्रः। एतैरप्यग्रस्थैर्गर्भपृच्छामेव जानीयात्। तथा च पराशरः—

"अथ स्त्री भ्रुवौ जठरमङ्गुष्ठेन वाऽङ्गुलिं स्पृष्ट्वा पृच्छेद् गर्भपृच्छां जानीयात्। तथा फलच्छांयावृक्षप्रवालाङ्कुरमधुघृतहेमगर्भप्राजापत्ये वा मातृधात्रीपुत्रनिर्दशनशब्दप्रादुर्भावे गर्भपृच्छामेव" इति ॥३०॥

अन्यदप्याह—

गर्भयुता जठरे करगे स्याद्
दुष्टनिमित्तवशात्तदुदासः।
कर्षति तज्जठरं यदि पीठो-
त्पीडनतः करगे च करेऽपि ॥३८॥

जठरे उदरे करगे हस्तेन स्पृष्टे स्त्रीगर्भयुता स्याद्भवेत्। तस्मिन्नेव पृच्छासमये दुष्टनिमित्तवशाद् दुष्टनिमित्तदर्शनात्। क्षतक्षुभितभग्नविनष्टदग्धक्षीरादिदर्शने श्रवणात्तदुदासो गर्भपतनं भवति। अथवा तज्जठरं पीठोत्पीडनतः पीठमर्दनं कृत्वा कर्षति कण्डूयेत्। करगे च करेऽपि हस्तं हस्तेन वा अवलम्ब्य पृच्छति तदापि तदुदास इति ॥३८॥

अथ गर्भग्रहणकालज्ञानमाह—

घ्राणाया दक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत्।
वामेऽब्दौ कर्ण एवं मा द्विचतुर्घ्नः श्रुतिस्तने ॥३९॥

अङ्गुष्ठेनेत्यनुवर्तते घ्राणाया नासिकाया दक्षिणे द्वारे स्रोतसि अङ्गुष्ठेन स्पृष्टे गर्भग्रहणं मासोत्तरं वदेत् ब्रूयात्। मासेन गर्भग्रहणं भविष्यतीति। वामे स्रोतसि स्पृष्टे अब्दौ अब्दद्वयेन गर्भग्रहणं भवति। एवं वामे कर्णे वर्षद्वयेनैव। माःशब्देन मास उच्यते। मासो द्विचतुर्घ्नः श्रुतिस्तन इति श्रुतिः कर्णः। दक्षिणे कर्णच्छिद्रे स्पृष्टे मासो द्विघ्नो द्विगुणितः। मासद्वयेन गर्भग्रहणं भवति। वामे वर्षद्वयेन। स्तनस्पर्शने मासश्चतुर्घ्नश्चतुर्भिर्मासैः। स्तनद्वयस्पर्शनेनेति ॥३९॥

अन्यदप्याह—

वेणीमूले त्रीन् सुतान् कन्यके द्वे
कर्णे पुत्रान् पञ्च हस्ते त्रयं च।
अङ्गुष्ठान्ते पञ्चकं चानुपूर्व्या
पादाङ्गुष्ठे पार्ष्णियुग्मेऽपि कन्याम् ॥४०॥

वेणी केशकलापः, तन्मूले पृच्छायां स्पृष्टे त्रीन् सुतान् पुत्रान् द्वे कन्यके जनयिष्यसीति वक्तव्यम्। कर्णे कर्णयुग्मे पुत्रान् पञ्च। हस्ते हस्तयुग्मे त्रयम्। कनिष्ठाङ्गुलेनाऽरभ्याङ्गुष्ठान्तं यावदानुपूर्व्या क्रमेण पुत्रपञ्चकं सूते। तत्र कनिष्ठास्पर्शने एकं पुत्रम्। सुतद्वयमनामास्पर्शने। मध्यमायां त्रीन्। तर्जन्यां चतुरः। अङ्गुष्ठे पञ्च। पादाङ्गुष्ठस्पर्शे पार्ष्णियुग्मेऽपि स्पृष्टे कन्यामेकां सूत इति ॥४०॥

अन्यदप्याह—

सव्यासव्योरुसंस्पर्शे सूते कन्यासुतद्वयम्।
स्पृष्टे ललाटमध्यान्ते चतुस्त्रितनया भवेत् ॥४१॥

सव्यं दक्षिणमूरु, तत्संस्पर्शे कन्याद्वयं सुतद्वयं च जनयति। अपसव्ये वामेऽप्येवमेव। ललाटमध्यान्ते स्पृष्टे यथासंख्यम्। ललाटमध्ये स्पृष्टे चतुस्तनया चतुष्पुत्रा। ललाटान्ते स्पृष्टे त्रितनया भवेत् स्यादिति। तथा च पराशरः—

"तत्र जठरस्पर्शे गर्भिणीमेवमेव ब्रूयात्। अङ्गुष्ठेन नासास्रोतसि दक्षिणे कुर्याद् मासान्तरेण गर्भग्रहणम्। वामाद् द्विवर्षान्तरेण। कर्णच्छिद्रे मासद्वयेन। वामे वर्षद्वयेन। स्तनयोरङ्गुष्ठेनैव स्पर्शे चतुर्भिर्मासैः। पीठमर्दकं कृत्वा चानन्तर-

मुदरं कण्डूयेदग्रहस्तं हस्तेनाभिगृह्य वा पृच्छेद् भंग्नलौहिकपिठरकुद्दालककुठार-स्रुतिचलितपतितभग्नदर्शनशब्दे प्रादुर्भावे वा गर्भपतनं विन्द्यात; तथान्नपानपुष्पफल-पक्षिद्विचतुष्पदानामन्यद्रव्याणां पुंसंज्ञानां दर्शनशब्दप्रादुर्भावे पुञ्जन्म विद्यात्। स्त्रीसंज्ञानां स्त्रीजन्म। नपुंसकाख्ये नपुंसकानाम्। पुंसंज्ञमङ्गं संस्पृश्य गर्भिणी पृच्छेत् पुञ्जन्म विन्द्यात्। स्त्रीसंज्ञानां स्त्रीजन्म। नपुंसकाख्येषु नपुंसकानाम्"।

अथ विशेषः—

"वेणीमूलमभिगृह्य पृच्छेत्तदा द्वे कन्यके त्रीन् पुत्रान् जनयिष्यसीति ब्रूयात्। ललाटमध्यं स्पृशन्ती चत्वार्यपत्यानि। ललाटान्तं त्रीणि। कर्णयोः संस्पर्शे पञ्चापत्यानि। दक्षिणोरुसंस्पर्शे द्वौ पुत्रौ द्वे च कन्यके जनयिष्यसीति। वामस्य तिस्रः कन्या द्वौ पुत्रौ। पादाङ्गुष्ठस्य कन्यकैका। पाष्ण्योः कन्यकैकैवेति" ॥इति॥४१॥

अथ गर्भिण्याः कस्मिन्नक्षत्रे जन्तुर्जन्म भविष्यतीति ज्ञानार्थमाह—

शिरोललाटभ्रूकर्णगण्डं हनुरदा गलम्।
सव्यापसव्यस्कन्धश्च हस्तौ चिबुकनालकम्॥४२॥

उरः कुचं दक्षिणमप्यसव्यं
हृत्पार्श्वमेवं जठरं कटिश्च।
स्फिक्पायुसन्ध्यूरुयुगं च जानू
जङ्घेऽथ पादाविति कृत्तिकादौ॥४३॥

सूत इत्यनुवर्तते। पृच्छासमये गर्भिण्याः शिरःप्रभृतिसंस्पर्शे कृत्तिकादौ नक्षत्रे जन्म विन्द्यात्। तत्र शिरो मूर्धा तत्संस्पर्शे कृत्तिकानक्षत्रे जन्म भवति गर्भिणी सूते। एवं ललाटे रोहिण्याम्। भ्रुवौ मृगशिरसि। कर्णयोरार्द्रायाम्। गण्डयोः पुनर्वसौ। हन्वोस्तिष्ये। रदा दन्तास्तेष्वाश्लेषायाम्। गले ग्रीवायां मघासु। सव्ये दक्षिणस्कन्धस्पर्शे पूर्वफल्गुन्याम्। अपसव्ये वामस्कन्धसंस्पर्शे उत्तर-फल्गुन्याम्। हस्तयोः संस्पर्शे हस्ते। चिबुके आस्याधः चित्रायाम्। नालके कण्ठे स्वातौ। उरसि वक्षसि विशाखायाम्। कुचौ स्तनौ तत्र दक्षिणस्तनसंस्पर्शने अनुराधायाम्, अपसव्ये वामे ज्येष्ठासु। हृदि मूले। पार्श्वद्वयमेवं प्राग्वत्। तेन दक्षिणे पार्श्वे पूर्वाषाढायाम्। वाम उत्तराषाढायाम्। जठरे श्रवणे। कटयां धनिष्ठायाम्। स्फिग्गुदयोः सन्धिस्पर्शने शतभिषजि। दक्षिणोरुस्पर्शने पूर्वभद्र-पदायाम्। वामोरुस्पर्शने उत्तरभद्रपदायाम्। जान्वो रेवत्याम्। जङ्घयोरश्विन्याम्। पादयोर्भरण्यामिति। तथा च पराशरः—

"शिरसि संस्पृष्टे कृत्तिकासु जन्म विन्द्यात्। ललाटे रोहिण्याम्। भ्रुवोर्मृगशिरसि। कर्णयोरार्द्रायाम्। गण्डयोः पुनर्वसौ। हन्वोस्तिष्ये। दन्तयोराश्लेषासु। ग्रीवायां मघासु। दक्षिणांसे प्राक्फल्गुन्याम्। वामांसे उत्तरफल्गुन्याम्। हस्ते हस्तयोः। चिबुके चित्रायाम्। स्वातौ नालके। उरसि विशाखायाम्। दक्षिणस्तनेऽनुराधासु। ज्येष्ठासु वामे। हृदि मूले। दक्षिणपार्श्वे प्रागषाढासु। उत्तराषाढासु परपार्श्वे। जठरे श्रवणे। श्रोण्यां धनिष्ठासु। स्फिग्गुदयोर्वारुणे। दक्षिणोरुणा प्राक्प्रोष्ठपदायाम्। वामेनोत्तरपदायाम्। जानुभ्यां पौष्णे। जङ्घयोरश्विन्याम्। पादयोर्भरण्यामिति"॥४२-४३॥

अथोपसंहारार्थमाह—

इति निगदितमेतद् गात्रसंस्पर्शलक्ष्म
प्रकटमभिमताप्त्यै वीक्ष्य शास्त्राणि सम्यक्।
विपुलमतिरुदारो वेत्ति यः सर्वमेत-
न्नरपतिजनताभिः पूज्यतेऽसौ सदैव॥४४॥

इतिशब्द उपसंहारे प्रकारे वा। एतद्गात्रसंस्पर्शलक्ष्म अवयवस्पर्शनलक्षणं प्रकटमतिस्फुटं विरचितम्। किं कृत्वा सम्यगागमतः शास्त्राणि गर्गपराशरादिभिर्विरचितानि वीक्ष्य दृष्ट्वा। किमर्थम्? अभिमताप्त्यै अभीष्टार्थसिद्धये। यो विपुलमतिर्विस्तीर्णबुद्धिरुदारो ह्यलब्धं सर्वं निरवशेषमेतद्वेत्ति जानाति असौ नरपतिभिर्नृपैर्जनताभिर्जनसमूहैर्दैवज्ञः सर्वदैव सर्वकालं पूज्यते अभ्यर्च्यत इति॥४४॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ वज्रविद्या
नाम पञ्चाशत्तमोऽध्यायः॥५०॥

अतः परमपि केचित् पिटकलक्षणं पठन्ति। तदप्यस्माभिर्व्याख्यायते।

तत्र ब्राह्मणादीनां वर्णानां पिटकलक्षणमाह—

सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटका ये।
ते क्रमशः प्रोक्तफला वर्णानां नाग्रजातानाम्॥१॥

विप्रादीनां ब्राह्मणादीनां चतुर्णां वर्णानां क्रमेण परिपाट्या पिटकाः सितरक्तपीतकृष्णाः श्वेतलोहितहारिद्रकृष्णाः। ब्राह्मणानां सिताः, क्षत्रियाणां रक्ताः, वैश्यानां पीताः, शूद्राणां कृष्णा इति। एवं क्रमेण ये पिटका उक्तास्ते क्रमशोऽनुक्रमेण वर्णानां प्रोक्तफलाः कथितफलाः, किन्तु नाग्रजातानां ब्राह्मणवर्जितानाम्। एतदुक्तं भवति--सिता ब्राह्मणानां फलदा नान्ये। सितरक्ताः क्षत्रियाणां नान्ये। सितरक्तपीता वैश्यानां नान्ये। सितरक्तपीतकृष्णाः शूद्राणामिति ॥१॥

अधुना विशेषेण फलमाह—

सुस्निग्धव्यक्तशोभाः शिरसि धनचयं मूर्ध्नि सौभाग्यमारा-
द्दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशु दुःशीलतां च।
तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
प्रव्रज्यां शङ्खदेशेऽश्रुजलनिपतनस्थानगा रान्ति चिन्ताम् ॥२॥

शिरसि मूर्धनि पिटकाः सुस्निग्धा अरूक्षास्तथा व्यक्तशोभा व्यक्ता स्फुटा शोभा कान्तिर्येषां ते तथाभूता धनचयं वित्तसमूहं कुर्वन्ति। मूर्ध्नि मुखपृष्ठे केशान्ते आराच्छीघ्रमेव सौभाग्यम्। भ्रूयुगोत्था भ्रूयुगलोत्पन्ना दौर्भाग्यं दुर्भाग्यत्वम्। तन्मध्योत्था भ्रूसङ्गमजनिता प्रियजनघटनामिष्टबन्धुसंयोगं दुःशीलतां दुष्टशीलत्वं चाशु शीघ्रमेव कुर्वन्ति। नयनपुटगता अक्षिकोशजाताः शोकं ददति। नेत्रयोश्चक्षुषोरिष्टदृष्टिमिष्टदर्शनम्। शङ्खदेशे शङ्खस्थाने प्रव्रज्याम्। अश्रुजलनिपतनस्थानगा अश्रुजलं यत्र निपतति तत्र गताश्चिन्तां रान्ति ददति। तथा च पराशरः—

"अथ पिटकाः सितरक्तपीतकृष्णा द्विजादीनां वर्णानां क्रमात् स्थानवर्णविशेषणोत्तरोत्तरफलदा भवन्ति। तत्र मूर्ध्नि सुव्यक्तः सुस्निग्धः सुवर्णोऽभिषेकागमनं कुर्यात्। शिरसि धनागमम्। केशान्ते सौभाग्यम्। ललाटे धनसञ्चयम्। भ्रुवोर्दौर्भाग्यम्। सङ्गमे दौःशील्यमिष्टसङ्गमं च। नेत्रपुटयोः शोकम्। नेत्रयोरिष्टदर्शनम्। शङ्खदेशे प्रव्रज्याम्। चिन्तामश्रुपाते" इति ॥२॥

अन्यदप्याह—

घ्राणागण्डे वसनसुतदाश्चौष्ठयोरन्नलाभं
कुर्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे।
हन्वोरेवं गलकृतपदा भूषणान्यन्नपाने
श्रोत्रे षड्भूतगणमपि ज्ञानमात्मस्वरूपम् ॥३॥

घ्राणागण्डे यथाक्रमं वसनसुतदाः। तेन घ्राणायां नासादेशे वसनदा वस्त्रलाभप्रदाः पिटकाः। गण्डे सुतदाः पुत्रदाः। ओष्ठयोरन्नलाभमन्नागमं भोजनावाप्तिं कुर्युः। चिबुकतलमास्याधोभागः। तत्र गताः स्थितास्तद्वदन्नदा एव। ललाटे भूरि वित्तं प्रभूतं धनम्। हन्वोरेवं तत्र स्थिताःप्रभूतधनदा एव। मलकृतपदा गले कण्ठे कृतं पदं यैः। तत्र स्थिता इत्यर्थः। भूषणानि आभरणानि अन्नपाने च शोभने ददति। श्रोत्रे कर्णप्रदेशे। तद्भूषणगणमपि। तदिति कर्णपरामर्शस्तद्भूषणगणस्य कर्णालङ्कारसमूहस्यागमं तथा आत्मस्वरूपमध्यात्मज्ञानं प्राप्नोतीति। तथा च पराशरः—

"गण्डे सुतलाभम्। नासावंशे वस्त्रलाभम्। चिबुकाधरेष्वोष्ठाधरेष्वन्नम्। अभिहन्वोर्धनागमम्। गले चान्नपानमाभरणं च। शिरः सन्धौ ग्रीवायां चोपघातं शस्त्रेण कर्णयोस्तद्भूषणमात्मश्रवणं च" इति ॥३॥

अन्यदप्याह—

शिरःसन्धिग्रीवाहृदयकुचपार्श्वोरसि गता
अयोघातं घातं सुततनयलाभं शुचमपि।
प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृ-
द्विनाशं कक्षोत्था विदधति धनानां बहुमुखम् ॥४॥

शिरःसन्ध्यादिषु गताः पिटका यथाक्रममयोघातादिकं कुर्वन्ति। तेन शिरःसन्धावयोघातं शस्त्रपीडाम्। ग्रीवायां घातमुपतापम्। हृदये सुतलाभम्। कुचयोः स्तनयोश्च तनयलाभं पुत्रप्राप्तिम्। पार्श्वयोः शुचमपि शोकम्। उरसि वक्षसि गताः प्रियप्राप्तिमिष्टलाभम्। स्कन्धे अंसेऽपि असकृत् पुनः पुनः भिक्षार्थमटनं परिभ्रमणम्। अथशब्दश्चार्थे। कक्षोत्थाः कक्षयोः सम्भूता धनानां वित्तानां बहुमुखमनेकप्रकारं विनाशं क्षयम्। विदधति कुर्वन्ति ॥४॥

अन्यदप्याह—

दुःखशत्रुनिचयस्य विनाशं पृष्ठबाहुयुगजा रचयन्ति।
संयमं च मणिबन्धनजाता भूषणाद्यमुपबाहुयुगोत्थाः ॥५॥

पृष्ठबाहुयुगजा यथाक्रमं दुःखशत्रुनिचयस्य विनाशं रचयन्ति कुर्वन्ति। तत्र पृष्ठजाता दुःखनिश्चस्य दुःखसमूहस्य विनाशं कुर्वन्ति। बाहुयुगजाः शत्रुनिचयस्यारिसमूहस्य विनाशम्। मणिबन्धनजाताः प्रकोष्ठस्थानोत्पन्नाः संयमं हस्तबन्धं कुर्वन्ति। उपबाहुयुगोत्थाः प्रबाह्वोर्जाता भूषणाद्यमाभरणवस्त्रान्नदानं कुर्वन्ति। तथा च पराशरः—

"पार्श्वयोः शोकम्। उरसीष्टसङ्गमम्। स्कन्धयोर्भैक्ष्यचर्याम्। कक्षयोरर्थक्षयम्। हृत्स्तनयोः पुत्रलाभम्। पृष्ठे दुःखशमनम्। अरिविनाशं बाह्वोः। प्रबाह्वोराभरणम्। मणिबन्धने नियमनम्" इति ॥५॥

अन्यदप्याह—

धनाप्तिं सौभाग्यं शुचमपि कराङ्गुल्युदरगाः
सुपानान्नं नाभौ तदध इह चौरैर्धनहृतिम्।
धनं धान्यं बस्तौ युवतिमथ मेढ्रे सुतनयान्
धनं सौभाग्यं वा गुदवृषणजाता विदधति ॥६॥

कराङ्गुल्युदरगाः पिटका यथाक्रमं धनाप्त्यादिकं विदधति कुर्वन्ति। तत्र करगता धनाप्तिं वित्तागमम्। अङ्गुलिगताः सौभाग्यम्। उदरगताः शुचं शोकम्। नाभौ सुपानान्नं शोभनमन्नपानम्। तदधो नाभेरधोभागे इहास्मिन् पिटकलक्षणे चौरैस्तस्करैर्धनहृतिं वित्तहरणम्। बस्तौ धनं धान्यम्। मेढ्रे शिश्ने। युवतिं स्त्रियम्। सुतनयान् शोभनपुत्रान् विदधति। धनं सौभाग्यं वा गुदवृषणजाताः, गुदजाता अपानस्थानोद्भवा धनं वित्तम्। वृषणजाताः सौभाग्यमिति। तथा च पराशरः—

"पाणौ धनागमम्। सौभाग्यमङ्गुलिषु। शोकमुदरे। अन्नपानावाप्तिं च नाभौ। चौरैरर्थहरणं तदधरे। धनधान्यावाप्तिं वस्तौ। सौभाग्यमर्थलाभं च वृषणयोः। पुत्रजन्म स्त्रीलाभं मेहने। गुदे सौभाग्यम्" इति ॥६॥

अन्यदप्याह—

ऊर्वोर्यानाङ्गनालाभं जान्वोः शत्रुजनात् क्षतिम्।
शस्त्रेण जङ्घयोर्गुल्फेऽध्वबन्धक्लेशदायिनः ॥७॥

ऊर्वोर्यानलाभं वाहनाप्तिम्, अङ्गनालाभं स्त्रीप्राप्तिं च ददति। जान्वोः शत्रुजनाद्वरिलोकात् क्षतिं विनाशम्। जङ्घयोः शस्त्रेण विनाशम्। गुल्फे स्थिता अध्वनि पथि बन्धने च क्लेशदायिनः कष्टप्रदा भवन्ति। तथा च पराशरः—

"यानाङ्गनालाभमूर्वोः। जान्वोरुपरि रिपुघातम्। शस्त्रेण विनाशम्। जङ्घयोर्गुल्फयोरध्वबन्धपरिक्लेशागमः" इति ॥७॥

अन्यदप्याह—

स्फिक्पार्ष्णिपादजाता धननाशागम्यगमनमध्वानम्।
बन्धनमङ्गुलिनिचयेऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम् ॥८॥

स्फिक्पार्ष्णिपादजाताः पिटका यथासङ्ख्यं धननाशागम्यगमनमध्वानं कुर्वन्ति। तत्र स्फिक्पार्ष्णिजाता धननाशागम्यगमनम्। पादजाता अध्वानम्। अङ्गुलिनिचयेऽङ्गुलिसमूहे बन्धनम्। अङ्गुष्ठे ज्ञातिलोकतो बन्धुजनात् पूजामाप्नोति लभते। तथा च पराशरः—

"स्पिजोरर्थहरणम्। पार्ष्ण्योरगम्यगमनम्। पादयोरध्वगमनम्। नियमनमङ्गुल्याम्। अङ्गुष्ठेन जातिपूजाम्" इति ॥८॥

अत्रैव विशेषफलमाह—

उत्पातगण्डपिटका दक्षिणतो वामतस्त्वभीघाताः।
धन्या भवन्ति पुंसां तद्विपरीताश्च नारीणाम् ॥९॥

अङ्गस्पन्दनमुत्पातः। गण्डपटिकौ प्रसिद्धौ। एते पुंसां पुरुषाणां दक्षिणतो धन्याः शुभा भवन्ति। दक्षिणशरीरार्धभाग इत्यर्थः। अभीघाताः प्रहारा वामतो धन्याः। नारीणां स्त्रीणां तद्विपरीताश्च धन्याः। उत्पातगण्डपिटका वामतो दक्षिणतोऽभीघाता इति ॥९॥

अथान्येषामतिदेशार्थमाह—

इति पिटकविभागः प्रोक्त आमूर्धतोऽयं
व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः।
भवति मशकलक्ष्मावर्तजन्मापि तद्व-
न्निगदितफलकारि प्राणिनां देहसंस्थम् ॥१०॥

इत्येवं प्रकारः पिटकानां विभागो मया आमूर्धत आमस्तकात् प्रोक्तः कथितः। व्रणानां तिलकानां च विभागोऽप्येवमेव प्रकल्प्यश्चिन्तनीयः। येष्वङ्गेषु यत्फलं पिटकानां प्रोक्तं तदेव व्रणतिलकविभागे ज्ञेयम्। मशकः कृष्णो बिन्दुः। लक्ष्म प्रसिद्धम्। स्थाने लोमनिचय आवर्तो लोमावर्तः। मशकलक्ष्मावर्तसम्भवमपि प्राणिनां सत्त्वानां देहसंस्थं शरीरेऽवसंस्थं तद्वत्तेनैव प्रकारेण निगदितफलकारि भवति। पिटकोक्तं फलं प्रयच्छतीत्यर्थः ॥१०॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ पिटकलक्षणं नामैकपञ्चाशत्तमोऽध्यायः ॥५१॥